NAISHKARMYA SIDDHI WITH THE KLEŚHĀPAHĀRINI

Table of contents

नैष्कर्म्यसिद्धिः

क्लेशापहारिणीव्याख्यासहिता

ADHYATMA PRAKASHA KARYALAYA
HOLENARASIPUR-573 211

The Author

Shri Sureshwaracharya, the author of Naishkarmya Siddhi is also known as the Vartikakara in Vedantic circles. He has been a riddle to the historians. The legendary accounts of Sureshwara, as detailed in the various Shankara-Vijayas, are mutually contradictory in many respects, even with regard to his time, pre-monastic name, place of origin , etc and are hardly worth believing. Scholars are divided in their opinion on the identity of Mandana vis-a-vis Sureshwara and Vishwarupa. The only historical facts that are ascertainable as indubitable are those recorded by the author himself.

He was the immediate disciple of Shankara and wrote his work as commissioned by his guru. He also wrote the Vartikas on Taittiriya and Bṛhadaranyaka Bhashyas of Shankara. He is the only author of Vedantic works subsequent to Shankara, who closely follows the Upadesha Sahasri and profusely quotes from the same, in support of his propositions and thus vindicates his claim as a direct disciple of Shankara in marked differentiation to other purported disciples He supplements his teachings with arguments based on the Shruti invariably appealing to universal intuition and defending his position against all unvedantic encroachments.

The critical student will be greatly profited by a careful and diligent study of his thought stimulating works.

Adhyātma Granthāvaḷi

NAISHKARMYA-SIDDHI

OF

SHRI SURESVARĀCĀRYA

WITH

THE KLESĀPAHĀRIṆĪ

(AN ORIGINAL COMMENTARY)

BY

SHRI SHRI SATCHIDĀNANDENDRA SARASWATI

ADHYĀTMA PRAKĀSHA KĀRYĀLAYA
Holenarsipur - 573211
☎ : 08175-273820
2005

First Edition 1968 1000 Copies
Second Edition 2005 1000 Copies

Pages : 68 + 536

Price : Rs. 200

©

All Rights Reserved
by
The Adhyatma Prakasha Karyalaya,
Holenarsipur.

Typeset by
Dileep Bellave,
766, 10 'C' Cross, Mahalakshmipuram,
Near Modi Hospital, WOC Road,
Bangalore - 560 086
Ph. : 2359 3747 / 94481 07580

Printed by :
Sri Ganesh Maruthi Printers,
#76, 3rd Block, Thyagarajanagar,
Bangalore - 560028
Ph. : 26766342

अध्यात्मग्रन्थावलिः

श्रीसुरेश्वराचार्यप्रणीता

नैष्कर्म्यसिद्धिः

श्रीसच्चिदानन्देन्द्रसरस्वतीविरचितया

क्लेशापहारिण्याख्यया नूत्नव्याख्यया सहिता

क्रमाङ्कः १३८

अध्यात्मप्रकाशकार्यालयः
होळेनरसीपुरम्
२००५

ग्रन्थविभागानुक्रमः

	पृष्ठानि
श्रीसच्चिदानन्देन्द्रसरस्वतीस्वामिनः	5-6
प्रकाशकानां विज्ञप्तिः (आंग्ली)	7-10
आंग्लभाषामयी भूमिका	11-27
संस्कृतभूमिका	29-48
विषयानुक्रमणिका	49-67
सङ्केताक्षरविवरणम्	68
ग्रन्थशरीरम्	१-४७६
अनुबन्धाः	
१. श्लोकानां वर्णानुक्रमणिका	४७७-४८५
२. प्रमाणवचनानामाकरग्रन्थानुक्रमणिका	४८६-४८९
३. नैष्कर्म्यसिद्धौ उदाहृता वार्तिकश्लोकाः	४९०-४९२
४. नैष्कर्म्यसिद्धौ उदाहृता उपदेशसाहस्रीश्लोकाः	४९३-४९४
५. क्लेशापहारिण्यामुदाहृता बृहदारण्यकवार्तिकश्लोकाः	४९५-५०१
६. क्लेशापहारिण्यामुदाहृता तैत्तिरीयवार्तिकश्लोकाः	५०१
७. क्लेशापहारिण्यामुदाहृता उपदेशसाहस्रीश्लोकाः	५०२-५०४
८. प्रमेयाणां अक्षरानुक्रमणिका	५०५-५३६

Shri Shri Satchidānandendra Saraswathi Swamiji

Born: 05-01-1880 Mahasamadhi: 05-08-1975

Shri Satchidanandendra Saraswati Swamiji

A life of 95 years (1880-1975) dedicated to Shankaracharya

"Shri Satchidanandendra Saraswati Swamiji is the very personification of the couplet 'आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया' (right up to bed and right up to death, one should spend the time in Vedantic thoughts)" - this testimony comes from H H Chandrashekharendra Saraswati Swamiji, the 68th pontiff of Kanchi Kamakoti Peetam. He led a life up to the ripe age of 95 years dedicated to the feet of Shankara Bhagavatpada arising out of unflinching loyalty to every word of the Prasthana Traya Bhashyas by the great Acharya. His association with Shankara in a solemn way commenced at an early age of thirty when he was initiated at Kalady into the Vedantic learning in the traditional way by H H Shri Shivabhinava Nrisimha Bharati Swamiji, the then pontiff of Sringeri Mutt.

Initiation into bhakti by the great saint Shri Brahmachaitanya Maharaj of Gondavali, saved the Swamiji from being a mere dry, speculative, scholastic logician. His life was marked by constant association with many saintly personages.

He was greatly influenced by Shri K A Krishnaswamy Iyer, a true Vedantin, in his thinking and analytical discernment of the Ultimate Truth, based on universal experience. Study of Shankara Bhashyas was carried out mainly under the tutelage of Shri Virupaksha Shastri, the then Asthana Vidwan of the Sringeri Mutt, and Shri Kurtukoti Mahabhagavata, a saintly disciple of Shri Brahmachaitanya Maharaj.

Swamiji took upon himself the mountainous and apparently rebellious task of presenting the school of Gaudapada, Shankara and Sureshwara, the three resplendent stars of Advaita Vedanta, in its original pure form, both in words and spirit. With a crusader's zeal, he spared no efforts to purge the doctrines foreign to and opposed to the Shankara school, which were attributed to Shankara by the later Vedantins to suit their own pet doctrines.

The most significant contribution by Swamiji is the discovery of 'अध्यारोपापवादौ' (method of ascription and recession) as the cardinal method of interpretation adopted throughout by Shankara and that this is what is meant by 'tradition' as per Shankara. Swamiji's analytical exposition of the examination of the three states (अवस्थात्रयम्) finds no parallel.

He was a prolific writer having authored over two hundred books on Vedanta in Kannada, Sanskrit and English. His writings exhibit the confidence of an enlightened soul. His presentation of unmaligned Shankara caused great stirs in the Vedantic circles. Many neo traditionalists, failing to meet the points raised, resorted to accusing him of blasphemy and one lacking tradition. But the non prejudiced amongst them who could see reason in Swamiji's writings, shifted their allegiance to Shankara alone minus sub-commentators. Even after the lifetime of Swamiji not a few had expressed repentance for their antagonistic behaviour towards Swamiji. Today the picture is changing fast. Greatly influenced by his writings, certain scholars, including western writers of repute, have translated some of his works into other languages.

His life was an incessant battle with antagonistic forces - with afflictions, social obligations, philistine opposition, weak health and what is most inexhorable, finance. However his perseverance against all odds saw to the establishment of Adhyatma Prakasha Karyalaya devoted exclusively for propagation of the pristine pure Shankara school of Vedanta in as early as 1920, which still carries the torch lit by him.

Swamiji, though rebuked by some of the neo-traditionalists, earned the appreciation and the admiration of many. It is no exaggeration that many regard the Swamiji as **Abhinava Shankara**, come down to present Shankara as Shankara truly is.

ते हि लोके महाज्ञानास्तच्च लोको न गाहते - *in the world, they are the Knowers of the Ultimate Truth which the commoner fathoms not (Mandukya Karika, 4-95)*

Publishers' Note (Second Edition)

Many years have passed since the *Kleshāpaharinī*, a commentary in Sanskrit on Sureśvara's *Naishkarmya Siddhi* by His Holiness Shri Satchidānandendra Saraswati Swāmiji ran out of print. By the grace of His Holiness, we hereby present to this generation of Vedāntic readers, the reprint of the original work. The first edition proved to be an eminent guide to many Mumukshus (seekers of liberation), scholars and critical readers both Indian and foreign who have acknowledged their gratitude to the author of this work for his lucid and detailed commentary.

In this reprint edition, the errors that appeared in the main text as pointed out in the first edition and hitherto unnoticed errors have been corrected. The sub-headings which were not printed in the main text in certain cases but mentioned in the index have been incorporated in the appropriate places and in certain cases by making them precise. We crave the indulgence of the readers for the errors that have remained unnoticed inspite of repeated scrutiny.

'We hereby express our gratitude to all donors (see next page) who have magnanimously contributed towards this reprint edition. We express our appreciation to Shri Dileep Bellave for his neat execution of type setting work. We also thank M/s. Sri GaneshMaruthi Printers who have printed this edition in an attractive manner.

May the blessings of Shri Śaṅkara, Shri Sureśvara and H.H. Shri Satchidānandendra Saraswati Swāmiji be ever with all those who have helped in bringing out this edition and also the readers of this work.

Managing Committee
Adhyatma Prakasha Karyalaya

Holenarsipur
1.5.2005

Publishers' Note (First Edition)

The *Kleshāpahāriṇi*, an original commentary on the famous *Naishkarmya-Siddhi* of Sureśvara, the immediate desciple of the great Śaṅkarāchārya, was begun many years ago by Swāmi Satchidānandendra Saraswati, but its completion and publication had been put off for many reasons till now. It was only after the publication of his *Vedānta-Prakriyā-Pratyabhijñā* that the Swāmiji seriously thought of resuming the work, and we have taken up its publication inspite of the meagre financial aid that we could secure.

While we have a complete commentary, the *Chandrikā* by Jñānōttama in Sanskrit, Swamiji felt there was need of a new original commentary explaining all the intricate points raised in the work in greater detail and in perfect consonance with the spirit of the Vārtika Prasthāna, uninfluenced by the ideas of later Post-Śaṅkaras depending upon the Iṣṭa-Siddhi or Vivaraṇa. And we are glad that we have been able to bring forward this publication to meet the requirements of critical readers who are in sympathy with Swamiji's aim. In any case, we are sure that all readers of the famous *Naishkarmya-Siddhi* will be grateful to the Swamiji for undertaking this lucid and scholarly commentary aptly called *Kleshāpahāriṇi* (remover of all difficulties).

We are grateful to the following donors for their generous contributions to meet part of the printing cost : *Br. Sri. Subbaraya Avadhanigal*, Mattur, Shimoga Dt., *Sri R. Ramaswamiah*, Pleader, Holenarsipur, *Sri P. Jayavasudeva Sastri*, B.E., Professor, Bhooma Reddy Engineering College, Hubli, *Ambale Subbiah & Sons*,

Tiptur, *The Paramārtha-Vichāra-Sangha*, Bangalore, Sri Viswanatha Rao, Bangalore, *Sri K. Ramakrishniah*, Mysore, *Sri Basavalinga Swamigal*, Vidapanakallu, Bellary Dt., *Sri G. Balakrishnan*, c/o Therelek Furnaces Pt. Ltd., Tripuranithurai (Kerala), *Srimathi Mattur Laksmidevamma*, Shimoga and *Sri N.S. Rangaswamy*, I.A.S., Poona.

Swamiji has asked us to convey his Nārāyaṇa Smaraṇams to *Sri Parakkaje Subrahmanya Bhatta*, Vedanta Sriromani, Etc., and Panditapravara *Sri H. Ananta Murthy Sastrigal* for going through the manuscript and offering suggestions while the work was in progress.

We crave the indulgence of the readers for the many errors that have inevitably remained unnoticed, owing to the absence of Sri Swamiji, who could not supervise the final proofs, being bed-ridden most of the time when the work was in the press.

Holenārsipur
20-2-1968

Y. NARASAPPA
Chairman, A.P. Karyalaya

Donors for the Reprint Edition

Sri Sri Swaroopanandendra Saraswathi Swamiji, Sri Sharada Peetham, Chinna Mushidiwadi, Pendurthi 531173, Vishakapatnam, A.P.

Seethamma Krishnamurthy Public Charitable Trust, Bangalore (in memory of revered Pujya Nityanandendra Saraswati Swamiji)

Dharmika Ratna Eswara Rao Charitable Trust, Gurunagar Colony, Chittoor 517001; Dr. H.V. Naga Prasad, Bangalore

Sri N.R. Viraj, Bangalore; Sri B.K. Nagappa, Holenarasipur

Sri Phaniraj, Bangalore; Sri M.V. Ramachandra, Bangalore; Dr. N.K. Srinivasa Murthy, Bangalore

Dr. Uma, Smt. Shobha Manjunath, Smt. Jaya, Smt. Suchitra, Sri V. Shonty, Dr. Trayambaka, Sri Mohana Udupa, Dr. Rama, Sri Shiva Prakash, Sri Krishna, Sri Shashidhar, Smt. Gundamma, Sri Ravikumar, Smt. Jayanthi - all from Bangalore

INTRODUCTION

THE FOUR SIDDHIS

There are four works with the word *'Siddhi'* affixed to their title, each claiming to represent the genuine Vedantic system of Advaita taught in the Upanishads. Of these the *Brahma-Siddhi* of Mandana Miśra represents an extinct school which taught that the repeated conjoined practice (समुच्चय) of Karma or Vedic ritual and contemplation of Vedantic knowledge, is necessary for the final dispelling of ignorance and realization of Advaita. The *Naishkarmya-Siddhi* of Sureśvarā is the work now published. The third is the *Isṭa-Siddhi* of Vimuktātman which represents a type of Post-Śaṅkara sub-school which revives a more ancient system positing a potential Avidyā or *Māyā* as the material cause of the manifold world. And the *Advaita-Siddhi* of Madhusūdana is a work devoted to the defence of Advaita in general against the charges put forward by the *Nyāyāmṛta* a polemical work of Mādhva Dvaita.

WHO WAS SUREŚVARA ?

Sureśvarācārya is the author of the *Naishkarmya-Siddhi.* The only historical facts that are ascertainable as indubitable are those recorded by the author himself. He was the immediate disciple of Śaṅkara (4-74) and wrote this work as commissioned by his Guru (1-3). He has also written the *Vārtikas* on the *Taittirīya-Bhāshya* (Tai.Bh.V.3-90, 91) and on the Bṛhadāraṇyaka-Vṛtti (*or Bhāshya*) of *Śaṅkara* whose numerous disciples were far-famed and dispelled the mental darkness of students of Vedanta from the most

distant North to the most distant South (Bṛ. Bh. V. 6-5-24, 25).

The legendary accounts of Sureśvara as detailed in the various *Śaṅkara-Digvijayas* are hardly worthbelieving. In the Sanskrit Introduction I have stated my reasons for rejecting the identity of Maṇḍana and Sureśvara. The authors of the *Vijayas* are so recent, that there is no reason whatever why one should attach any weight to these flights of fancy.

Apart from this, however, there is a more serious question to be considered. It will be observed that Sureśvara has written his precious *Vārtikas* only on the *Taittirīya* and the *Bṛhadāraṇyaka.* Beyond referring to two Sutras of Bādarāyaṇa on his prefatory note (संबन्धोक्ति) on 1-91, he does not make a single reference either to the Sūtras or the *Sūtra-Bhāshya* even in his *magnum opus, the Bṛhadāraṇyaka-Bhāshya Vārtika.* Why is this ? Is there any significance in this preference to the *Bṛhadāraṇyaka ?* Of course we need not attach any importance to the story given in Mādhava's account of the affair, that Sureśvara was prevented from writing a Vārtika or critical commentary on the Sūtra-Bhāshya owing to the jealousy of fellow-disciples.. But there seems to be much more than is implied in Mādhava's account; for, an occasional clash also is in evidence between the two Bhāshyas on certain Vedāntic tenets :

(१) त एते वाङ्मनःप्राणाः सर्व एव समाः तुल्याः व्याप्तिमन्तः; यावत्प्राणिगोचरं साध्यात्माधिभूतं व्याप्य व्यवस्थिताः ; अत एवानन्ताः ॥

Br. Bh. 1-5-13, p. 702.[1]

1. The page numbers refer to the दशोपनिषदः (The Ten Upanishads) published by the Vāṇivilāsa Sanskrit Book Depot, Banaras.

(२) सर्वगतस्य तु शरीरपरिमाणवृत्तिलाभो न विरुध्यते ।।

Br. Bh. 1-3-22, p. 640.

(३) 'त एते सर्व एव समाः सर्वेऽनन्ताः' इति श्रुतेः सर्वात्मकानि तावत् करणानि । सर्वात्मकप्राणसंश्रयाच्च । तेषाम् आध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः । अतस्तद्वशात् स्वभावतः सर्वगतानामनन्तानामपि प्राणानां कर्मज्ञानवासनानुरूपेणैव देहान्तरारम्भवशात् प्राणानां वृत्तिः सङ्कुचति विकसति च ।। Br. Bh. 4-4-3, p. 912

Here it is stated in so many words that the *Prānas* or organs of sense are all-pervading, and that they function in particular bodies of Jīvas in accordance with their *Karma* (action) and *Bhāvana* (train of thought and feelings).

But in the *Sūtra-Bhāshya,* we have an express repudiation of this doctrine : -

(1) एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः (१) व्यापिनां करणानाम् आत्मनश्च देहान्तरप्रतिपत्तौ कर्मवशात् वृत्तिलाभस्तत्र भवति (२) केवलस्यैवात्मनो वृत्तिलाभस्तत्र भवति,...........इत्येवमाद्याः सर्वा एवानादर्तव्याः । श्रुतिविरोधात् ।। SBh. 3-1-1, p. 325.[1]

(2) सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत् । न । वृत्तिमात्रस्य करणत्वोपपत्तेः । यदेव हि उपलब्धिसाधनसाधनम् - वृत्तिः, अन्यद्वा तस्यैव नः करणत्वम्, संज्ञामात्रे विवादः - इति करणानां व्यापित्वकल्पना निरर्थिका । तस्मात् सूक्ष्माः परिच्छिन्नाश्च प्राणा इत्यध्यवस्यामः ।। SBh. 2-4-7, p. 312.

It will be seen from the first excerpt that the doctrine of the sense-organs beginning to function in the new body, is despised here as the product of the human mind

1. The page numbers refer to the Bhāshya Text only of the *Brahma-Sūtras,* published by the Nirnaya-Sāgara Press, Bombay.

(पुरुषमतिप्रभवाः) along with some other teachings which are all considered by the author of the *Sūtra-Bhāshya* as opposed to the *Śruti* (श्रुतिविरोधात्), whereas in the second extract we have the express statement that the organs are both subtle and limited (सूक्ष्माः परिच्छिन्नाश्च) in opposition to the view of the *Bṛhadāraṇyaka-Bhāshya.* With regard to the idea that the organs function only in the particular body while they remain all-prevading, it is maintained that this supposition is needless, since the functioning alone might be taken to be the organ of sense itself. The remark in the *Upanishad-Bhāshya* 'वृत्तिलाभो न विरुध्यते' (बृ. भा. १-३-२२) that 'it is no self-contradiction to hold that the senses only function in the particular body' would seem to imply that some Vedantins regarded this view as opposed to the all-pervading nature of the Pranas, or that it was opposed to the Vedantic tradition.

Are we to suppose in these circumstances that the *Bṛhadāraṇyaka Bhāshya* is from the pen of an author different from the writer of the *Sūtra-Bhāshya* ? We have to remember that this slight difference of opinion is no wise harmful to the main doctrine of Śaṅkara's Vedanta. It is not improbable that both the views regarding the *Prāṇas* were maintained by Vedantins belonging to Śaṅkara's tradition, and that they were both recorded by that teacher. At the same time, it is impossible to ignore the scoffing observation made by the author of the *Sūtra-Bhashya* that the other view is only a fancy of the human mind (पुरुषमतिप्रभवाः कल्पनाः). Surely one cannot be expected to deride oneself that way. It seems to be necessary to study both the Bhāshyas more deeply in order to see if there are any more noticeable differences in style or thought.

I have noticed one peculiarity of style in the *Bṛhadāraṇyaka-Bhāshya* which is conspicuous by its absence in the *Sūtra-Bhāshya.* Students of Śaṅkara-Bhāshyas are quite familiar with a mannerism that obtrudes itself on the attention of the reader every now and then. The Bhāshyakāra is fond of expressing an idea in an aphoristic phrase or sentence and subsequently expanding its meaning in one or more sentences. But a special feature that is common only to the Bhāshyas on the *Bṛhadāraṇyaka* and the *Taittirīya* is that short sentences expressing *prima facie* views ending with the particle चेत् (if) and closing explanatory sentences also with another चेत् (if), is to be met with in no Bhāshya other than that on the two Upanishad-Bhāshyas. A few extracts may be adduced here in illustration of this :-

1) गत्यैश्वर्यादिविरोधः इति चेत् । अथापि स्यात् - यद्यप्राप्यो मोक्षः, तदा गतिश्रुतीनां 'स एकधा', 'स यदि पितृलोककामः', 'स्त्रीभिर्वा यानैर्वा' इत्यादिश्रुतीनां च कोपः स्यात् इति चेत् ...... ॥ Tai. Bh. 1-11, p.277

2) कार्यन्तरमेव स्यात् इति चेत् । 'तदेवानुप्राविशत्' इति जीवात्मरूपं कार्यं नामरूपपरिणतं कार्यान्तरमेव आपद्यते इति चेत् ।......॥ Tai. Bh. 2-6, p. 300

3) पिण्डादिव्यतिरेकेण मृदादेरसत्त्वात् अयुक्तम् इति चेत् । पिण्डादिपूर्वकार्योपमर्दे मृदादिकारणं नोपमृद्यते, घटादिकार्यान्तरेऽपि अनुवर्तते इत्येतदयुक्तम् ; पिण्डघटादिव्यतिरेकेण मृदादिकारणस्य अनुपलम्भात् इति चेत् । .... ॥

Br. Bh. 1-2-1, p. 614

4) अप्रसिद्धनामभिः संबोधनमयुक्तम् इति चेत् । सन्ति हि प्राणविषयाणि प्रसिद्धानि प्राणादिनामानि । तान्यपोह्य अप्रसिद्धैर्बृहत्त्वादिनामभिः संबोधनमयुक्तम्; लौकिकन्यायापोहात् । तस्मात् भोक्तुरेव सतः प्राणस्य अप्रतिपत्तिः इति चेत् ... ॥

Br. Bh. 2-1-15, p. 724

Both the Upanishad-Bhāshyas literally teem with such instances, but not even once do we see such a usage in the *Sūtra-Bhāshya* or any other Bhāshya for that matter.[1] The Vārtikas on both of these Bhāshyas have incorporated some ślokas of the *Naishkarmya-Siddhi,* and both of them contain citations from the *Upadeśa-Sāhasri.*[2] This fact may also induce one to conclude or at least conjecture that the *Bṛhadāraṇyaka-Bhāshya* was perhaps written by some Śaṅkarācārya other than the author of the *Sūtra-Bhāshya.* In the list of the succession of the Gurus that occupied the pontifical seat in the Conjivaram Mutt, there occurs the name of one 'Dhīra-Śaṅkara' or 'Abhinava-Śaṅkara' (the thirty-sixth Guru in the list) the account of whose life is said to correspond with that of Ādya-Śaṅkara as narrated in the *Śankarendra-Vijaya-Vilāsa* of Vākpati-Bhatta of Cashmere. Leaving a margin for the differences in the various biographies of Śaṅkara, there is still a possibility that there may have flourished two different Śaṅkaras whose names are connected with the Bṛhadāraṇyaka and the *Sūtra Bhāshya.* Research scholars alone have to decide the question of their identity after a thorough study of the texts and the differences of teaching if any. Whether or not Sureśvara was the disciple of Sūtra-Bhāshyakāra also will remain an open question till then.

WHAT DOES NAISHKARMYA-SIDDHI SIGNIFY ?

Misled by the literal meaning of the word *'Naishkarmya-*

---

1. There are, however, three such instances in Aitareyōpanishad Bhāshya (Upōdghāta), three in the *Gītā-Bhāshya* (6-1, 13-2, 13-12). and one in Praśnopanishad Bhāshya (6-2).

2. I have not discussed the authorship of the Panchīkaraṇa-Vārtika and the Mānasōllāsa for the obvious reason that scholars are not unanimous in ascribing these to Sureśvara.

Siddhi' some have taken it to be a manual devoted to the condemnation of ritual as against Vedāntic knowledge. The term itself occurs in the *Bhagavadgītā* (18-49) where Bhagavan Sri Kṛshṇa says (नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति) 'One attains the highest ***'Naishkarmya Siddhi'*** by means of Sannyāsa'. Nobody can accuse the Gita of being partial to the order of Sannyasa as against ritual. Indeed in another place Sri Krishna emphatically. asserts that no one can attain *Naishkarmya* merely by non-performance of Karma and that no one can attain *Siddhi* through mere *Sannyāsa* (G. 3-4). Śaṅkara therefore explains that *Naishkarmya-Siddhi* is the perfect state of one who has transcended all karmas through the knowledge of the Brahma-Ātman (the Highest Self), or immediate Release which is the same as reaching one's own essential nature as the self above all action; and that *Sannyāsa* is the right intuition of the Self or renunciation of all action as a consequence of that intuition.

As for Sureśvara himself, the term is a synonym, for right intuition (सम्यग्ज्ञानम्) arising from the teaching of the Vedantic texts like 'That thou art' (तत्त्वमसि), which is the only means of wiping out ignorance (अज्ञानम्) of the Self. He not only sets forth this as the primary object of his undertaking the work in the prose Introduction at the commencement, but re-iterates the idea at the beginning of each chapter. That this realization inevitably takes the enlightened one beyond the sphere of action is placed beyond all doubt when the author says (4-1) that 'this knowledge does not cast even a side-glance as engagement in or desistence from (न प्रवृत्तिं निवृत्तिं वा कटाक्षेणापि वीक्षते । 4-1) religious works'. The main theme of this short work is the interpretation of the Vedantic Text *'Tat Tvam Asi'*

(that thou art) as conducive to the extinction of *Avidyā* which is the basic cause of all evil and the sole impediment to the attainment of one's own inherent blissful nature. It is this blotting out of ignorance by right knowledge of the teaching of the Vedantic text that constitutes quintessence of all Vedantic teaching, and induces the author to describe his work as अशेषवेदान्तसारसंग्रह 'An epitome of the central teaching of all the Vedantas'.

Ancient Schools Aiming At Advaita

Śaṅkara's was not the only school that taught the ultimate unity of the individual self and Brahman or the Universal Self. Side by side with the traditional school of Śaṅkara there flourished many other schools that acquiesced in such unity. A number of such schools are referred to in the Bṛhadāraṇyaka-Bhāshya-Vārtika. I have enumerated some of them in my *Vedānta-Prakriyā-Pratyabhijñā.* For the present, however, we shall take notice of only such systems as have been examined and refuted in the *Naishkarmya-Siddhi.*

(1) One school maintained that Mukti or final release can be attained by the observance of obligatory karmas to the exclusion of *Kāmya* and *Nishiddha* karmas which entail the experience of pleasure and pain respectively in a future birth. This would result in *Moksha* or release, in which state one would rest in his own true nature (स्वात्मन्यवस्थानम्).[1]

(2) There were some schools which admitted that there may be *Jñāna* also in conjuction with religious work as the

---

1. The above view is advanced and refuted in the *Taittirīya Bhāshya* (Tai.Bh. p. 258), in the *Gītā-Bhāshya* (GBh. p. 290) and in the *Sūtra-Bhāshya* (SBh. 4-3-14, p. 499) also.

means of *Mōksha*. *'Jñāna'* in this case is perhaps only meditation.

(3) In the course of the discussion of the *Samuccayavāda* (conjunction of knowledge and work) we have also the confutation of the system of *Bhartṛ-Prapañca* who held that Brahman was both Dvaitic and Advaitic in its nature (1-68 to 1-78).

(4) Another school is barely mentioned in passing. It supposed that by injuctions like 'आत्मेत्येवोपासीत' and 'आत्मा वा अरे द्रष्टव्यः', the seeker is directed to perform an action (नियोगोऽवसीयते). This system seems to be akin to that of the Vṛttikāra repeated in the second Varnaka of the *Sūtra-Bhāshya* on 1-1-4. This view is summarily dismissed by a remark that *Atma-Jñāna* is not *purushatantra* (dependent on the will of a person) 1-88.

It should be noted that while the first chapter is mostly devoted to the refutation of rival schools partial to religious works as means to release, it also demonstrates that all actions whether secular or Vedic is motivated by selfish desires springing from ignorance (1-29, 30) and also that right knowledge of Atman does not depend on any means of knowledge, for the nature of the unity of Atman is itself of the nature of intuition (ऐकात्म्यस्य स्वत एवानुभवमात्रात्मकत्वात् 1-89) and self-established (स्वतःसिद्धः). Hence it can be realised only through the Vedantic Text. These two points are developed in the subsequent chapters.

THREE ANCIENT INTERPRETATIONS OF TAT-TVAM-ASI

There are three more ancient systems refuted in the *Naishkarmya-Siddhi*. Their distinguishing feature is that, unlike the other systems mentioned above, they all acqui-

esce in the necessity of reflection on the meaning of the texts like *Tat-tvam-asi* for effective eradication of Avidya but do not agree with Śaṅkara's tradition when he insists that ignorance is removed once for all simultaneously with the dawn of knowledge of the meaning of the Vedantic text. We shall therefore enumerate them in order before we close the discussion of ancient Advaitic schools.

(5) The first of these three Vṛttikāras holds that the immediate knowledge of the meaning of the Vedantic text, cannot dispel ignorance, but only by the accumulated saturation of the mind with this thought by means of prolonged meditation (अहन्यहनि द्राघीयसा कालेनोपासीनस्य सतो भावनोपचयात्) is it removed without a residue (1-67).

This doctrine of the injunction of Brahman by means of continued meditation is attributed to Brahmadatta by a certain commentator on *Naishkarmaya-Siddhi,* on what authority we are not told.

(6) The second school held that the knowledge arising from the text, can only be something, which is a combination of inter-related concepts (संसर्गात्मकत्वात्), and therefore the intuition of the non-relational ineffable (अवाक्यार्थः) unity of Ātman can only accrue to the aspirant after a continued meditation of the original thought produced by listening to the Vedantic Text (1-67).

This is one of the three prima facie views refuted by Sureśvara in his Bṛhadāraṇyaka-Bhāshya-Vārtika. It is there attributed by Ānandajñāna to Maṇḍana and his followers (Br. V. 4-4-796). But in the Tika on *Sambandha Vārtika* 797, the same Ānandajñāna ascribes this Jñānābhyāsa doctrine to Brahmadatta and others ! Moreover, we know that Mandana as a matter of fact maintained that no injuction

is necessary for the practice of this meditation, since there are instances in ordinary life of the repetition of knowledge giving rise to correct knowledge (दृष्टा च ज्ञानाभ्यासस्य सम्यग्ज्ञान-प्रसादहेतुता लोके - *Brahma-Siddhi,* p. 154). Hence he could not have belonged to the school of Vedantins referred to by Sureśvara in connection with the 'injunction' of meditation supposed to be implied in the Śruti 'विज्ञाय प्रज्ञां कुर्वीत' (after understanding the meaning of Vedanta a brahmana should try to make his knowledge direct).

(7) The third and the last view rejected by Sureśvara in the *Siddhi,* is that of *Prasaṇkhyāna.* While the *Prasaṇkhyāna* School agrees with the two other views enunciated above in insisting on an injunction which demands a repeated practice of meditation of the idea conveyed by the Vedantic text 'Tat tvam asi', it is important to note that it is not a Samuccayavadin, for its distinctive doctrine is that the aspirant should renounce all karmas before undertaking the practice (3-126). This school also fears that even right knowledge produced by Vedantic teaching may be sublated by incorrect knowledge (बलवदपि सम्यग्ज्ञानं सदप्रमाणोत्थेनासम्यग्ज्ञानेन बाध्यमानमुपलभामहे - 1-38). This is endorsed by the *Upadeśa-Sāhasri* also when it makes the *Prāsaṇkhyānavādin* say 'Surely sensuous perception and the deep-rooted impression of duality, may do away with the knowledge now got from listening to the Śruti, and one may be lured outward by mental deficiencies (सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम् । शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ।। उप. १८-१३).

Scholars have not associated any particular name with this school of Vedantins. Among the commentators on Sūtra-Bhāshya, Vācaspati Miśra may be considered to be a

follower of a modified form of Prasaṅkhyānavāda in certain respects.[1]

Sureśvara's Interpretation of the Vedantic Text

Preparatory Step

In perfect contrast with all other schools of Vedanta, Sureśvara's holds that the Vedanta Vākya teaching the unity of Ātman, is the only means of obliterating all Avidya. If one does not realize the meaning of *Tat-tvam-asi* (That thou art) even on having been taught by the Śruti, it is only because he has not understood the meaning of the word 'thou'. Hence the second chapter is devoted to the way of discriminating its meaning (2-1). Two types of discrimination (अन्वयव्यतिरेकौ concommitance or continuance and exclusion), are serviceable in arriving at the entity denoted by the word 'Thou'. The self as the *seer* continues, or persists throughout while the non-self as the *seen* is excluded at some stage; this is द्रष्टृदृश्यान्वयव्यतिरेक type, where द्रष्टृ (seer) is the knower and all the rest is दृश्य (the seen). After we have gone through this first stage of discrimination (2-19 to 2-57), we take up the next one, viz., the self as witness and the rest as the witnessed (2-58 to 2-83) subject to appearance and disappearance (3-54). This two-fold discrimination, however, as the author warns (2-97) must be taken to last only so long as the nature of the self is not realized. And this realization dawns only when the teaching of the text 'That thou art' is intuited.

---

1. Compare for instance his sub-commentary on Śankara Bhāshya (4-1-2) where he evidently differs from the former.

THE EQUATION OF THE TERMS IN THE PROPOSITION

Sureśvara draws our attention to three steps (3-3) in the interpretation of the proposition which equates 'Thou' with 'That'.

(1) The terms are in apposition (सामानाधिकरण्यम्).

(2) The selves denoted by them qualify one another; that is to say, they have to be understood in such a way that neither affects the nature of the other (विशेषणविशेष्यता). And

(3) Therefore the extraneous meanings that may be involved in the two terms, are to be taken out so that the whole proposition may represent a real identity (लक्ष्यलक्षणभावः).

It is clear that on ascertaining the true meaning of 'thou' by the method of continuance and exclusion already explained at length, the import of the proposition culminates in inducing the intuition of the unity of both the selves and we realize that there is no contradiction whatever, when we see that the individual self denoted by 'thou' is really beyond all defects of *saṃsāra* and that the Brahman denoted by 'that' is really the very self immediately present (3-10). Only, the indicatory meaning of the term 'thou' is to be taken, just as we do when we say that the snake is really the rope for which it was mistaken (3-27).

The sum and substance of the process of interpretation is this: The term 'thou' is taken to indicate the witnessing Self to the exclusion of appearances that may be implied by the express and primary meaning. And the term 'That' is also taken to indicate the inmost Self only to the exclusion of all other possible meanings that may be implied by that word (3-23, 24). The reason for this procedure is the

collocation of the terms and the mutual relation of the entities that are meant. The steps of interpretation and the exact principles involved, have been explained at great length in the course of the commentary and the student is recommended to go through the details in order to understand this part of exposition with the care which it deserves.

The Proposition Tat-tvam-asi

'Tat-tvam-asi' as we all know is only a representative of the class of propositions called *Maha-Vakyas* (grand propositions) which convey the idea of identity of the individual self and the Supreme Self. The name itself never occurs either in Sureśvara's work or in Śaṅkara's Bhāshyas. They are so named probably because the Advaitins think that they contain the main purport of all Upanishadic teaching, to wit, the identity of the individual and the Absolute Self. It is surprising that Sureśvara follows the *Upadeśa-Sāhasri* exclusively in choosing his method of interpreting these propositions, a method to be seen in no other classical work ascribed to Śaṅkara. Neither in the *Sūtra-Bhāshya* nor even in the *Bṛhadāraṇyaka* do we find any approximation to the elaborate manner he has adopted in explaining the import of these Vedantic Texts. Of course the intrinsic value of the interpretation lies in the appeal made to the universal intuition of the Self, and the two specific types of *Anvaya* and *Vyatireka* adopted in the Upanishads. Why the empirical mode of reasoning (3-47 to 50) or even the Vedic reasoning of अन्वयव्यतिरेक (continuance and exclusion) for that matter (3-57,113; 4-15,16) is not capable of delivering the goods with regard to the knowledge or intuition of the unity of the Self, has been explained in the *Naishkarmya-Siddhi* in the most sublime manner.

VIDYĀ AND AVIDYĀ

Vidyā arising from the understanding of the meaning of the Vedantic text and the *Avidyā* to be eradicated by it, are quite unlike empirical knowledge and error. While *Avidyā* is the sole cause of all evil and *Vidyā* is the only means of destroying it, this distinction of ignorance and its sublation, is only a device for the purpose of teaching. From the highest point of view, there is neither ignorance to be burnt up nor knowledge that has got to be newly acquired. The destruction of ignorance by knowledge is no event in time or place, for the latter are merely the product of ignorance (4-58).

There is a seeming point of divergence between Śaṅkara and Sureśvara with regard to the emphasis to be laid on the privative aspect of Avidyā as contrasted with its projective aspect. Sometimes the author's phraseology is likely to be mistaken to be in favour of the theory of the Mūlāvidyā or positive ontological 'basic ignorance' so prominently brought forward by the Pañcapādikā and other Post-Śaṅkara Advaitins. It is to explain all such apparent discrepancies and elucidate all obscurities in the *Siddhi* that I have ventured to attempt a new commentary on the work. I would fain hope that the title *Kleśāpahāriṇī* (remover of all difficulties) is no mere boast. I have tried to justify my claim in this respect by appealing to universal intuition as well as to the *Vārtika* and the *Upadeśa-Sāhasrī* whenever I have had to make a departure from the older commentary in clarifying the knotty points of the original.

THE INDEXES NOW ADDED

Besides the index of ślokas, I have affixed a subject-Index of the important words also in order to assist the

reader in noting and comparing the important points of the Vedantic doctrines re-iterated by the author in different garbs suited to the several contexts. Indices of the *Vartika-ślokas* and *Upadeśa-Sāhasri* which I have relied upon, have been also appended for the ready reference of the critical reader who would be inclined to make a deeper study of the *Siddhi* in the light of those source-books.

CONCLUSION

The *Naishkarmya-Siddhi* occupies an important place among the Vedantic works professing to explain Śaṅkara's teaching. While the Pañcapādikā and the *Bhāmati try* to interpret Śaṅkara's system each in its own way, Sureśvara's work has the advantage of being the production of an immediate disciple of Śaṅkara, who presents the central doctrine of the latter's Vedanta in all its essential aspects and contrasts it with contemporary systems. In the course of the discussion, it is worthy of note that he refers to (1) the self-established nature of Ātman as unchanging Pure Consciousness; (2) ignorance as the only obstacle to the knowledge of Ātman; (3) the mutual super-imposition of the self and the non-self in consequence of ignorance only ; (4) the distinction of the means of right knowledge and their objects, no less than the distinction of action, means of action, and the result of action, as merely the figment of Avidyā or ignorance; (5) the enquiry into the nature of Brahman (ब्रह्मजिज्ञासा) as a Śāstra distinct and different from the enquiry into the nature of religious works (धर्मजिज्ञासा) ; (6) the Vedantic texts like *Tat-tvam-asi* being the means of right knowledge solely because of their efficiency in removing ignorance; and (7) absence of anything to be done for one who has gained the

supra-rational intuition of the self understanding through the right meaning of the texts. The ruggedness of style and the occasional grammatical and metrical difficulties that crop up, can never deter a student of genuine Vedantic seeking for immediate intuition of Reality from appreciating the beauty of this rare brilliant of a Vedantic compendium.

Holenarsipur,
January, 1968 SATCHIDANANDENDRA SARASWATI

भूमिका

ग्रन्थाभिधानम्, अत्र निरूपणीयविषयश्च

'नैष्कर्म्यसिद्धिः' इति निष्क्रियात्मरूपावस्थानलक्षणस्य नैष्कर्म्यस्य निष्पत्तिरुच्यते । सा च सर्वकर्मसंन्यासपूर्वकेण सम्यग्दर्शनेन लभ्या सद्योमुक्तिः - इति गीताभाष्ये (१८-४९) उपस्थापितं निर्वचनम् आश्रित्य स्यात्, ग्रन्थकारः स्वप्रणीतप्रकरणस्यापि तादर्थ्यात् तदेवाभिधानम् अकरोत् इत्युन्नीयते ! अन्वर्थं चेदमभिधानं ग्रन्थस्य । यतोऽज्ञानमात्रव्यवहितं सत् सर्वस्य निष्कर्मात्मस्वरूपं वेदान्तप्रमाणजनितज्ञानेनैव प्रकटीक्रियते न तु कर्मणा इत्यभिप्रायेण 'वेदावसानवाक्योत्थसम्यग्ज्ञानाशुशुक्षणिः । दन्दहीत्यात्मनो मोहं न कर्माप्रतिकूलतः' (१-८) इति प्रतिजानानो ग्रन्थकर्ता, स्वप्रतिज्ञास्थापनार्थमेव सर्वं प्रकरणं विनियुङ्क्ते ।।

वेदान्तशास्त्रप्रकरणत्वादेवास्मिन् ग्रन्थे न सर्वे वेदान्तशास्त्रनिरूपणीया विषयाः परिशीलिताः । 'अशेषवेदान्तसारसंग्रहप्रकरणमिदमारभ्यते' (१-१) इति तु प्रतिज्ञा मोक्षकारणभूतं ब्रह्मात्मज्ञानमेव सारः सर्वेषां वेदान्तानाम् ; तस्य सतत्त्वमिह संगृहीतमस्तीत्यभिप्रायिका । विशिष्य चात्र वेदांतागमवाक्यादेव 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्यादिरूपात् सम्यग्ज्ञानं भवति ; तच्च ज्ञानं स्वरूपलाभमात्रेणाऽऽत्मानवबोधलक्षणामविद्याम् अत्यन्तमुच्छिनत्ति, नैव त्वत्र कार्ये किञ्चन कायिकं वाचनिकं मानसिकं वा कर्म सहायत्वेनापेक्षते इति प्रतिपादितम् ।।

प्रकरणप्रणेता

'श्रीमच्छङ्करपादपद्मयुगलं संसेव्य' (४-७४), तस्मादेव 'प्रवरगुणनिधेर्वेदान्तदीप्तां विद्यां प्राप्य' (४-७६), 'कारुण्यात् तामवोचं जनिमृतिनिवहध्वस्तये दुःखितेभ्यः' (४-७६), 'ज्ञानं व्याकृतमप्यन्यैर्वक्ष्ये गुर्वनुशिक्षया' (१-३) - इति ग्रन्थकर्तृभिः स्वयमेव स्वस्य शङ्करभगवत्पादशिष्यत्वं कीर्तितम् ; गुर्वनुशिक्षयैव स्वस्य ग्रन्थप्रणयने प्रवृत्तत्वं च । अस्य नामधेयं सुरेश्वराचार्य इत्येतत् तैत्तिरीयभाष्यवार्तिकात् (३-९१) अवगम्यते ॥

मण्डनमिश्रो नाम मीमांसकः कुमारिलभट्टशिष्यः समयबन्धेन प्रचलिते वादे श्रीशङ्करभगवत्पादैः पराजितः - पारमहंस्यं स्वीकृत्य सुरेश्वराचार्याभिधानेन तदीयशिष्यः संवृत्तः - इति कथा माधवीय-शङ्करविजये लिखिता दृश्यते । अन्येषु तु शङ्करविजयेषु सुरेश्वराचार्याणां पूर्वाश्रमनामान्यथैवोल्लिखितम् । मण्डनमिश्रकृत-ब्रह्मसिद्धिभाषाशैली तु नैष्कर्म्यसिद्धिगद्यपद्यशैलीतो ललिततरा लक्ष्यते, वेदान्तप्रक्रिया चोभयोर्ग्रन्थयोरादृता भिन्नैवेति स्फुटम् । हेत्वन्तरैश्च ब्रह्मसिद्धिकारान्मण्डनमिश्रात् अन्य एव त्वयं नैष्कर्म्यसिद्धिप्रणेता सुरेश्वराचार्य इति वयं प्रतीमः । शङ्करविजयप्रणेतारस्तु भगवत्पादेभ्योऽत्यर्वाचीना इत्यतोऽपि तैर्वर्णिता कथा न सर्वा विश्वसनीया भवत्यैतिहासिकदृष्टिपरायणैः । किञ्च सुरेश्वराचार्या नैष्कर्म्यसिद्धेश्चतुर्थाध्यायारंभे एवं लिखन्ति - "सोऽयं न्याय्योऽपि वेदान्तार्थः शास्त्राचार्यप्रसादलभ्योऽप्यनपेक्षितशास्त्राचार्यप्रसादोऽ-नन्यापेक्षसिद्धस्वभावत्वात् कैश्चित् श्रद्दधानैर्न प्रतीयते । तेषां संग्रहार्थमभिमतप्रामाण्योदाहरणम् ॥" एवं प्रतिज्ञाय भगवत्पूज्यपाद-कृतात् **उपदेशसाहस्री**प्रकरणात् (नै. ४-१९ प्रभृति ३५ तमश्लोक-पर्यन्तम्, ...), **गौडपादाचार्यप्रणीतमाण्डूक्यकारिकातश्च** (नै. ४-

४१,४२) प्रमाणवाक्यान्युदहार्षुः । तेनेदमवगम्यते यत् तत्काले आसन् वेदान्तप्रक्रियान्तरावलम्बिनः शङ्करभगवत्पादगौडपादाचार्ययोरेवानुयायिनस्तयोराचार्ययोरभिप्रायम् अन्यथान्यथा व्याचक्षाणा इति, तत्प्रक्रियानिरासपूर्वकं स्वप्रक्रियायाः सांप्रदायिकत्वं प्रख्यापयितुमेव यथोक्तप्रमाणवचनान्युदाजह्रुः सुरेश्वराचार्या इति च । बृहदारण्यकभाष्यवार्तिके, तैत्तिरीयवार्तिके च नैष्कर्म्यसिद्धिगता एव नैके श्लोका अन्तर्गर्भिता दृश्यन्ते । तयोरपि नैष्कर्म्यसिद्धिवदेव वाक्यजन्यज्ञानोत्पत्त्यनन्तरमपि साधनान्तरं प्रमाणान्तरं वा समपेक्ष्यते आत्मसाक्षात्कारार्थम् इत्यातस्थुषां पक्षा निराकृताः, तयोरप्युपदेशसाहस्रीतो गौडपादकारिकातश्च प्रमाणवचनान्यादर्शितानि । तैत्तिरीयवार्तिकस्था अपि कतिपयश्लोका बृहद्वार्तिकेऽप्यन्तर्भाविता दृश्यन्ते । वार्तिककारश्च शङ्करभगवत्पादशिष्यः सुरेश्वर इत्युल्लेखश्च वार्तिकद्वयेऽप्युपलभ्यते (तै. १-२, ३-९०,९१ ; बृ.वा ६-५-२४,२५,२६) इत्येतेभ्यो[1] हेतुभ्यो नैष्कर्म्यसिद्धिप्रणेतारः सुरेश्वराचार्या एव वार्तिकद्वयस्यापि कर्तार इति वाक्यजन्यज्ञानानन्तरमपि प्रसङ्ख्यानादिकर्तव्यमवशिष्यते, प्रमाणान्तरं वा निष्पाद्यमस्तीत्यभिमन्यमानानां खण्डनार्थमेव स्वगुरुभिरनुशिष्टास्ते प्रकृतं ग्रन्थं प्राणैषुरिति चावगच्छामः ॥

प्रकरणशैली

श्लोकरूपं प्रकरणं रचयित्वा तदनन्तरमेव ग्रन्थकर्तारः स्वयमेव संबन्धोक्तिं ग्रन्थेन सन्दधुरिति केषाञ्चिदभ्यूहः । तस्य च 'संबन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता । नैष्कर्म्यसिद्धेर्ज्ञात्वेमां

---

1. दक्षिणामूर्तिस्तोत्रव्याख्यानरूपो मानसोल्लासः, पञ्चीकरणवार्तिकं च सुप्रसिद्धवार्तिककाराणामेवेत्यत्र ग्रन्थतत्त्वशोधकानां नैककण्ठ्यमित्यतोऽत्र न तद्विषयविमर्शनं प्रस्तुतम् ॥

व्याख्यातासौ भवेद् ध्रुवम् ॥' (४-७८) इति वचनं प्रमाणं स्यात् । क्वचित् संबन्धोक्तिगतानां केषाञ्चित् पदानां श्लोकस्थैरन्यैः पदैरन्वयो यथा स्यात् तथा गद्यबन्धो ग्रथितः । क्वचिच्च श्लोकेषु सूत्ररूपेणोपक्षिप्तानां विषयाणां विवरणं दृश्यते संबन्धोक्तौ । तदेवं संबन्धोक्तेः तदवतारितश्लोकस्य च समानविषयत्वात् क्वचित् पुनरुक्तिरपि सञ्जातास्ति ॥

अपि च मूलग्रन्थेऽपि एकस्मिन्नध्याये प्रतिपादितानामेव विषयाणां पूर्वोत्तरेष्वध्यायेषु च प्रकारान्तरेण प्रतिपादनादपि पुनरुक्तिः पदे पदे प्राप्नोति । सैषा श्लोकसंबन्धोक्तिग्रथनप्रयुक्ता मूलग्रन्थे एव प्रतिपादन-प्रकारभेदाज्जाता च पुनरुक्तिरस्माभिर्व्याख्याने तत्र तत्रैव परामृष्टा ; विषयसूच्यनुक्रमणिकायां परिशिष्टे दत्तायां तत्तद्विषयप्रतिपादकश्लोक-संख्यासङ्कलनेन च स्फुटीकृता । ग्रन्थकृद्भिरेव विशिष्य पुनरुक्तिमधिकृत्याभिहितम् - 'इत्यादि पुनः पुनरुच्यते ग्रन्थलाघवाद् बुद्धिलाघवं प्रयोजकम् इति ।' (३-२३) इति । वेदान्तप्रमेय-विशेषाणामेव च प्रकारान्तरेण पुनः पुनः प्रतिपादितं यथैव नैष्कर्म्यसिद्धौ वार्तिकयोश्च तथैव गौडपादकारिकासु उपदेशसाहस्त्र्यामपि च समुपलभ्यते ॥

तदेवं यद्यपि संबन्धोक्तेर्निर्माणं नैष्कर्म्यसिद्धिरचनानन्तरमेवेति वदतामप्याधारोऽस्त्येव, तथापि तु वेदान्तग्रन्थनिबद्धॄणां समकालमेव गद्यपद्यमिश्रितशैल्या प्रकरणनिर्माणं नाविदितपूर्वम् । यावता नैष्कर्म्यसिद्ध्याविर्भावात् प्रागेव ब्रह्मसिद्धिरेवंशैल्यैव निर्मिताऽभूत् । तत्र तु गद्यभाग एव सविस्तरं प्रकरणार्थं समुपस्थापयति ; श्लोकास्तु सूत्रभूता एव विषयप्रतिपादने इति विशेषः । ग्रन्थतत्त्वविवेचका एव तु प्रमाणं गद्यपद्यबन्धयोः समकालिकत्वमेव, उताहो अनुक्रमोऽप्यस्तीत्यत्र ॥

ग्रन्थप्रतिपाद्यविषयसंस्तवः

ग्रन्थप्रतिपाद्यः प्रधानविषयः संबन्धोक्तौ अतिसङ्क्षेपेणोपस्थापितः, तदुत्तरग्रन्थैः प्रपञ्चितश्च । द्वैतस्य सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वम् (ग्रन्थसंबन्धोक्तिः, २-९७,९८,११६ ; ३-१)[1] । यस्मात् द्वैते शुभाशुभाध्यासः, तत्कृतरागद्वेषौ, तदुत्थानि कर्माणि, पुण्यपापे, जन्म, दुःखं च - इत्येतत् सर्वं पूर्वपूर्वहेतुम्, उत्तरोत्तरं सम्भवति आत्मस्वरूपभूतस्य सुखस्य च तिरोधायकोऽप्येष एवानवबोधः (ग्र.सं.) तस्मात्, सर्वानर्थहेतुरज्ञानमेवेति अज्ञाननिवृत्तौ सकलदुःखनिवृत्तिः, सुखप्राप्तिश्च (१-७), आत्माज्ञानस्य ज्ञानमात्रनिवर्त्यत्वात् । आत्मनश्चाशेषप्रमेयविलक्षणत्वात्, प्रत्यक्षादीनां चानेवंविषयत्वात् (२-१, ४-११) आत्मानुभवमात्रप्रतीयमाना (१-७), अविचारितसिद्धा अविद्या, तत्त्वमस्यादिवेदान्तवाक्यमात्रजन्यज्ञानमन्तरेण न केनापि मानान्तरेण निवर्त्या (३-११३), आत्मनश्चानुभवैकस्वरूपत्वात् (२-५९) अविद्यामात्रव्यवहितत्वाच्च (३-११३) वाक्यजनितज्ञानमात्रेणाविद्यानिवृत्तिद्वारेणात्मज्ञानं भवति (२-१०५; ३-११५) ॥

वाक्यार्थाप्रतिपत्तौ त्वंपदार्थानभिज्ञत्वं हेतुः (२-१) । यस्य त्वंपदार्थविवेकः स्वप्रयत्नेनैव, अथवा दैववशात् जातः, न तस्य भूयो भूयो वाक्यार्थस्मारणमावश्यकम् (२-३, ३-६४) । यस्य पुनर्न त्वंपदार्थविवेकः, स अन्वयव्यतिरेकपुरःसरं स्मारणीयः (२-९, ३-६४) । अन्वयव्यतिरेकश्च द्वेधा, बुद्ध्याद्युपाधिकृतं ज्ञातृत्वोपाधि-

---

1. आत्मानवबोधश्चायम् अज्ञानादिपर्यायशब्दवाच्यो ज्ञानाभावस्वरूप एव ; तत्र अभावस्य यद्यपि स्वतः कारणत्वं न संभवति, तथापि अज्ञातसतो ब्रह्मात्मनः कारणत्वं भवेदिति वक्षत्युदर्के (३-७) । ग्रन्थान्ते दत्ता प्रमेयाणाम् अक्षरानुक्रमणिकापि द्रष्टव्या अज्ञानशब्दविवरणे ॥

मात्मानं परिगृह्य द्रष्टृदृश्यविवेकः (२-५८), अविद्यापरिकल्पित-साक्षित्वमाश्रित्य साक्षिसाक्ष्यविभागश्चेति (३-५४) । तत्राद्येनाहं-ममत्वादेः, द्वितीयेन तु कर्तृत्वादेश्चानात्मत्वेन परित्यागो भवति (२-५८) ॥

आत्मा अहंप्रत्ययगम्यः - इति मीमांसकपक्ष एवं निरसनीयः - (१) अहङ्कारो हि ज्ञातुर्विषयः (२-२४), (२) तस्यान्तःकरणधर्मत्वं प्रत्यक्षेणैवानुभूयते (२-२५) । (३) आत्मा निर्विभागः, निरंशः, अविषयश्च (२-२६) ; अहङ्कारस्तु आगमापायी (२-२२) प्रमाणैरवगम्यः (२-३७) ; सुषुप्ते तस्य स्वरूपव्यभिचारोऽपि भवति (२-३२) । एवं तावत्, द्रष्टृदृश्यान्वयव्यतिरेकाभ्यां गम्यते । अथ साक्षिसाक्ष्यान्वयव्यतिरेकाभ्याम् अन्वयव्यतिरेको यथा - सुषुप्तौ अन्तःकरणविकाराभावे सति 'इदम्' इति बुद्ध्या विषयज्ञातृत्वं नोपलभ्यते, नापि विषये 'मम' इति बुद्ध्युत्थोपकारित्वापकारित्वे वा तत्र दृश्येते (३-६२) । आत्मा अशेषबुद्धिप्रचाराणां साक्षी । बुद्धिः खलु तत्तद्विषयाकारेण परिणम्य पर्यायेण विषयान् जानाति । साक्षी पुनः स्वरूपचैतन्येन जात्यमणिः स्वप्रकाशेनेव सर्वान् संनिहितान् ज्ञात्रादीन् युगपदवभासयति (२-६४.....८९) । बुद्धेर्देहाद्युपाध्यापेक्षया प्रत्यक्त्वं प्रत्ययोत्पत्तिहेतुतो ज्ञातृत्वं चावभासेते, आत्मनस्तु प्रत्यक्त्वं ज्ञातृत्वं च स्वभाव एव (३-१८,१९) ; बुद्धेरिव ते नैव जातुचित् परस्परं व्यभिचरतः । न वा तयोर्धर्मधर्मिभावः (३-१२,१३,१४) । कूटस्थानुभवात्मत्वात् आत्मनो नैव विक्रिया जातुचित् । बुद्धिधर्माध्यासादेव तु तस्मिन् प्रमातृत्वं भोक्तृत्वं च (२-६१-......६३) । देहव्यतिरिक्ते बाह्ये वस्तुनि इदंबुद्ध्या अनात्मत्वं स्वतःसिद्धम् । ज्ञातुरप्यात्मता स्वत एव सिद्धा ; मध्ये स्थितानां तु देहादिबुद्ध्यन्तानां तारतम्येन अहंबुद्धिविषयत्वं (३-७२)

इदंबुद्धिविषयत्वं च दृश्यत इत्यतो मोमुह्यते जनः (४-४,५,६)। एष च मोहः पुरस्तादभिहितद्विविधान्वयव्यतिरेकन्यायाभ्यामपसरति (४-७)। तथा च सर्वमिदं बुद्ध्यादिदेहान्तमनात्मैवेति निश्चयो भवति ।।

सोऽयमात्मानात्मविभागोऽपि अविद्याकार्यमेव (४-१४); आत्मा स्वतःसिद्धः - अनात्मा तु अविचारितसिद्धः (२-९७), आत्मा कूटस्थबोधरूपः अनात्मा तु मिथ्याध्यास एव ; तयोश्चाविद्यानिमित्तः संबन्धः (३-१)। अस्याश्च अविद्यायाः वेदान्तवाक्यजन्यज्ञानादेव निवृत्तिः (२-१०१,१०२,१०३ ; ३-६)। केवलम् अन्वयव्यतिरेक-न्यायानुसरणान्नाविद्यानिवृत्तिः स्यात् ; देहादिविलक्षणोऽहम् इति - इत्येव स्वभावरूपं ज्ञानं तेनोपजायते । लिङ्गजन्येन ज्ञानेन आत्मास्तित्वमात्रं निश्चीयते (३-५७) नायमात्मा, भेदरहितश्चायम् - इत्येतावदेव तु विज्ञायते (२-९५, ३-६) 'अद्वितीयात्माऽहम्' इति तु ज्ञानं वेदान्तवाक्यादेव (३-३३)। अन्वयव्यतिरेकपूर्वकं वाक्यमेवा-वाक्यार्थरूपं आत्मानं प्रतिपादयति (३-३९,४०,६३)। अन्वय-व्यतिरेकाभ्यां सर्वाननात्मनो निरस्य 'कोऽस्मीति' इति वीक्षापन्नस्य 'तत्त्वमसि' इति श्रुतिर्बम्भणीति (३-५३)। अत्र दशमवाक्यं दृष्टान्तः (३-६४,६५,६८,६९,७०; ४-३४,३५) ।।

वाक्यार्थज्ञाने तत्त्वंपदयोः सामानाधिकरण्यम्, पदार्थयोर्विशेष्य-विशेषणभावः, पदार्थयोः प्रत्यगात्मनश्च लक्ष्यलक्षणभावश्च क्रमेण बोध्यः । लक्ष्यलक्षणभावप्रतिपत्तौ त्वंपदार्थस्य सद्वयत्वम्, तत्पदार्थस्य च पारोक्ष्यमपनीयते, अद्वितीयप्रत्यगात्मैव अवाक्यार्थो विज्ञातो भवति (३-७६,७७,७८)। 'तत्त्वमसि' इति वाक्ये त्वंपदम् 'अहं ब्रह्मास्मि' इति वाक्ये अहंपदं च अहंव्याजेन प्रत्यगात्मानमेवाद्वयं बुबोधयिषति । अहंवृत्तिं मुक्त्वा न कयाप्यन्यया वृत्त्या आत्मा लक्षयितुं शक्यः, तदा हि परमात्मा अनात्मैवेति मतिर्भवेत्, श्रुतिश्चाप्रामाण्यं इयात् (३-९८,

१०१) । अहङ्कारो हि बाह्यपदार्थापेक्षया प्रत्यक्त्वात्, अतिसूक्ष्मत्वात्, आत्मचैतन्याभासेन आत्मबुद्ध्यनुशीलनात्, स्वप्रतीतिसमये आत्मनाऽविनाभावाच्च परमात्मनो लक्षणं भवितुमर्हति (२-५५,५६ ; ३-१००) । तत्त्वंपदे तु अविवक्षितानूद्यमानसामान्यार्थ-परित्यागपूर्वकम् अद्वितीयप्रत्यगात्मलक्षणमेव विशेषार्थं गमयतः । तदर्थयोरेतादृशात्मैव निष्ठा इति वाक्येन विवक्षितमिति स्वीकार्यम् (३-७५,७६,८०) ॥

वाक्यार्थप्रतिपत्तिप्रकारवर्णनसमाप्तौ प्रथमाध्याये संक्षेपेण निरस्तोऽपि प्रसङ्ख्यानवादः पुनरपि सप्रपञ्चं निराकृतो दृश्यते । वाक्यजन्यं ज्ञानं यदि प्रत्यक्षविरुद्धमिव वदेत् प्रत्यक्षादेर्गौणत्वमेव ब्रूयात् (३-९६) । दृष्टिविध्यर्थत्वमेव वा वाक्यस्य कल्पयेत् (३-८१) इति स्थिते एव स्वसिद्धान्ते भिन्नभिन्नविषयत्वात् प्रमाणानां परस्परविरोधो नास्त्येवेति युक्त्युपबृंहिते (१-८६, ३-३५,८३,८४,८५,९६), वाक्योत्थज्ञानमेव बलीय (३-९४) इति मण्डनादिमतमपीहोपन्यस्तं प्रौढवादेनेत्यवधेयमेतत् । प्रमितिप्रमाणप्रमेयप्रमातृलक्षणो व्यवहारो मिथ्याध्यास एवेति (३ संबन्धोक्तौ पा. २५९) अज्ञाननिमित्त एव च मिथ्याध्यासकूटस्थात्मनोः संबन्ध इति भगवत्पादीयं मतं कण्ठरवेणोद्घोषितं चेति ॥

इदं तु वाक्याज्जायमानं प्रत्यगात्मज्ञानं व्यावहारिकज्ञानवत् ज्ञातृज्ञेयज्ञानविभागमपरित्यज्य न जायते, यस्मात् निष्क्रियाकारक-फललक्षणम् अद्वितीयप्रत्यक्त्वमेवास्यात्मनः स्वाभाविकं रूपम् (३-७१) । यथैवाऽऽप्रबोधाद् द्वैतादन्यस्य वस्तुनोऽसिद्धिः, एवमद्वितीय-प्रत्यगात्मवस्तुज्ञानावस्थायां तदन्यद् बुद्ध्यादि नैव विद्यते (४-५०) । यथा स्वप्ननिमित्तेन व्याघ्रगर्जनादिना प्रतिबोधितः स्वाप्नकर्तृ-करणकर्मविभागं नैव पश्यति, तथा श्रुतिप्रतिबोधितः

शास्तृशिष्यशास्त्रादिविकल्पं नैव पश्यति ; तदा द्वैतं सर्वमद्वितीया-वगतिनिष्ठमेव भवति (४-३६,३७,३८) ॥

अद्वैतप्रत्यगात्मज्ञानी स्वज्ञानस्वभावादेव न प्रवृत्तिधर्मे निवृत्तिधर्मे वा तिष्ठति (४-५६) । अथवा व्यावहारिकदृष्ट्या उत्खाततरुरिव शोषेणनिवृत्त्यैव प्रारब्धं कर्म क्षिणोति (४-६०,६१) । उत्पन्नात्मज्ञानस्य तु अद्वेष्टृत्वादिगुणाः स्वत एव भवन्ति न तु यत्नसाध्याः (४-६९) । तस्य यथेष्टचेष्टाचरणं तु नैव संभवति, संन्यस्ताखिलकर्मत्वात् (४-६३,६४) । मुमुक्षुरपि तावन्न यथेष्टाचरणे प्रवर्तेत (४-६५) । अतोऽस्य ज्ञानस्याधिकारी निरस्तसर्वकर्मा, अमानित्वादिनिष्ठः, अद्वेष्टृत्वादिसाधनश्च भवेत् (४-७०,७१,७३) ॥

एकदेशिमतखण्डनम्

अत्र स्वप्रक्रियाविरोधेन यस्मात्कस्माच्चित्साधनादेव मोक्षप्राप्तिः, न तु ज्ञानात् - इत्येवं वदतां मतम् खण्डितम् । (१) काम्यनिषिद्धवर्जनपूर्वकं नित्यकर्मानुष्ठानमेव मोक्षसाधनमिति वादम् अनूद्य (१-९ प्रभृति २१), कर्मभिरारादुपकृतं ज्ञानमेकमेव मुक्तिसाधनमिति स्वमतमुपन्यस्य, कर्मणस्तत्साधनतां सामान्येन व्युदस्य (१-२४......५३) कर्मणां चित्तशुद्ध्या प्रत्यक्प्रवणतायां पर्यवसानमुक्त्वा तेषां पारम्पर्येणाविद्यानिवृत्तिसाधनत्वं च दर्शयित्वा, कर्मज्ञानसमुच्चयपक्षा अपि निरस्ताः । अस्मिन्नवसरे 'नानारसं ब्रह्म' इत्यभ्युपगच्छतां **भर्तृप्रपञ्चानामपि पक्षे,** न समुच्चयसिद्धिः (१-६८) इति प्रदर्शितम् । एतत्पक्षखण्डनस्यायं सारः - नानारसब्रह्मणः साधकात्मता, तदनात्मता, तस्माद् भिन्नाभिन्नत्वं वा । आद्ये विकल्पे ज्ञानमेवालं मुक्तये, किं कर्मणा ? (१-७०) । अथ भिन्नं साधकात् तत् , तदा ज्ञानाभ्यासात् स्यादपि पुरुषार्थः कदाचित्, नैव तु कर्मणा (१-७१, ७२) । अथ तृतीयः कल्प आश्रीयते, ततो भिन्नाभिन्नमित्येव तावत्

स्वतो विरुद्धम् (१-७८) । मुक्तस्य ब्रह्मरूपं प्राप्तस्य सर्वेभ्यो भिन्नाऽभिन्नत्वात् अभिन्नपक्षे सर्वजीवानां दुःखमपि मुक्तस्य प्राप्नुयात् (१-७८) । तस्मात्, न साधुरयं वादः - इति ॥

अत्र निराकृता अद्वैतैकदेशिवादाः

अत्र निराकृताः केषाञ्चिदद्वैतसिद्धान्तिनामप्येकदेशिनां वादाः । ते कतमेषाम् इति तु न सुनिर्धारणम् । बृहदारण्यकभाष्यवार्तिके 'विज्ञाय प्रज्ञां कुर्वीत' (बृ. ४-४-२१) इति श्रुतेरर्थनिर्धारणप्रसङ्गेन, सुरेश्वराचार्यैस्त्रयः पक्षा एकदेशिनामनूदिताः । तत्र आद्यः पक्षो (१) भर्तृप्रपञ्चानाम् (बृ.वा. ४-४-७४१) इति स्वयमेव कण्ठरवेणोक्तम् । तत्र भर्तृप्रपञ्चानामिदमभिमतम् "उच्यते वचसा बुद्धौ वस्तुमात्रं समर्प्यते । विज्ञातस्य सतत्त्वस्य तादात्म्यप्रतिपादनम् ॥ भावनाज्ञानसन्तानैः प्रज्ञाकरणमुच्यते । अस्मिन् काले तु सा प्रज्ञा निष्ठां नीता कृता भवेत्" (४-४-७०७,७०८) ॥ वाक्यं हि सामान्यमर्थं बुद्धौ समर्पयति । भावनासन्तानात्तु तं साक्षात्कारयेत् साधकः - इत्यर्थः । "तमेवंविधमात्मानं ज्ञात्वा कुर्यान्मतिं दृढाम् । भावनाज्ञानसंतान-संरूढामविचालिनीम् ॥ द्वैताभिधायकान् शब्दान् ध्यानकाले न चिन्तयेत् । वाचं ते ग्लापयन्त्येतां येयमेकत्ववाचिनी ॥" (४-४-७३७, ७३८) इति भावनासन्तानेन वाक्योत्थमतिं दृढां कुर्याद् द्वैतचिन्तनं परित्यज्य - इति भर्तृप्रपञ्चानामभिप्राय इति गम्यतेऽनेन श्लोकद्वयेन । नैष्कर्म्यसिद्धावपि लिखितम् "केचित् स्वसंप्रदायबलावष्टम्भात् आहुः - यदेतद् वेदान्तवाक्यात् 'अहं ब्रह्म' इति विज्ञानम् समुत्पद्यते तन्नैव स्वोत्पत्तिमात्रेण अज्ञानं निरस्यति ; किं तर्हि अहन्यहनि द्राघीयसा कालेन उपासीनस्य सतो भावनोपचयात् निःशेषम् अज्ञानमपगच्छति । 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति श्रुतेः ।" इति (१-३७) । किमत्र निर्दिष्टा भर्तृप्रपञ्चा एव ? यावता तेऽपि भावनोपचयवादिनः,

मोक्षेऽद्वैतत्वप्राप्तिवादिनश्च - इत्येतद् पुरातत्त्वान्वेषकैर्विचारणीयम् । एवं चेत् अयं पक्षो सविशेषाद्वैतवादिनाम् इति कल्पयितुं शक्यते । अयं त्वस्मिन् कल्पने आतङ्कः । नैष्कर्म्यसिद्धिकाराः पक्षद्वयम् एकदेशिनां 'सकृत्प्रवृत्त्या मृद्नाति' इत्येकेनैव श्लोकेन निवार्य पक्षान्तरानुवादार्थम् एवं संबन्धोक्तिं लिखन्ति - 'एवं तावत् अनानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः । अथाधुना पक्षान्तराभ्युपगमेनापि प्रत्यवस्थाने पूर्ववदनाश्वासो यथा तथा अभिधीयते' - इति (१-६८) । भर्तृप्रपञ्चास्तु द्वैताद्वैतवादिनः, माध्यन्दिनशाखान्तर्गतबृहदारण्यकोपनिषदं स्वकीयसिद्धान्तानुगुणेन भाष्येणालञ्चक्रुः, यन्निराकरणार्थमेव विशिष्टो यत्नः कृतो शङ्करभगवत्पादैर्बृहदारण्यकभाष्ये - इति भाष्यतद्वार्तिकयोरवलोकनेन निःसंशयं हृदयमागच्छति विमर्शकानाम् । अत्र च प्रकरणे अनानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः पक्षद्वयनिरासेनेति कण्ठरवेणोच्यते सुरेश्वराचार्यैः । तस्मात् इदमवसीयते यदन्य एवैते भावनोपचयवादिनो वाक्यज्ञानमुपासीनस्य महता कालेनाज्ञानं विनश्यतीति ब्रुवाणा इति ।।

(२) अस्मिन्नेव प्रकरणे वार्तिककारैः 'तत्त्वमस्यादिवाक्योत्थविज्ञानेन यथोदितम् । विज्ञाय वस्त्वसंसर्गिप्रज्ञां कुर्वीत यत्नतः । (बृ.वा. ४-४-७९७) इति प्रारभ्य पक्षान्तरावलम्बिनां व्याख्यानमुपस्थापितम् (बृ.वा. ४-४-७९६.....८०९) । अयमेव पक्षोऽत्रापि प्रकरणे अनूद्य निराकृतो दृश्यते (१-६७, ३-९) । वार्तिकटीकाकारा आनन्दज्ञाना 'मण्डनादीनां तद्व्याख्यानमुत्थापयति' (बृ.वा. ४-४-७९६, पा. १८५२) इत्याचख्युः । परं तु त एव प्रसङ्ख्यानवादपरीक्षणे (सं.वा. ७९६, ७९७) - संसर्गकल्पनाशून्यमप्यैकात्म्यं प्रबोधयेत् शास्त्रम् (७८०) इति कण्ठरवेणोक्त्वा निराकृतपक्षपरीक्षणप्रसङ्गे -

भावनावर्त्मनैकात्म्ये विध्यर्थासम्भवो यथा ।
अधिकारपरीक्षायां तथा प्राक् प्रतिपादितम् ।।
नियोगपक्षमाश्रित्य विध्यर्थासम्भवो यथा ।
ऐकात्म्यसिद्धौ यत्नेन तथात्र प्रतिपाद्यते ।।

- सं. वा. ७९६, ७९७

इति वार्तिकद्वयव्याख्याने प्राहुः "वार्तिककारमतेन वेदान्तेषु विधिमाशङ्क्य तत्कृत्याभावात् अधिकारवार्तिकेषु 'अनर्थको विधिस्तस्मात्' इत्यादाववोचम् इत्यर्थः । इह तु **ब्रह्मदत्तादिमतेन** ज्ञानाभ्यासे विधिमाशङ्क्य निरस्यते, तन्न पुनरुक्तिरित्याह" (सं.वा.पा. २१९,२२०) इति । अतः संसर्गशून्यज्ञाननिष्पत्त्यर्थं नियोगमिच्छन्तो वादिनः कतमे इत्यत्र आनन्दज्ञानानामपि निश्चिता मतिर्नासीदित्येवावसीयते । अपि च नायं मण्डनमिश्रपक्ष इत्यत्र ब्रह्मसिद्धिरेव तत्कृता प्रमाणम् । यस्मात् तत्रासंसर्गज्ञाननियोगवादिपक्षं पूर्वपक्षिमुखेन निरस्य (ब्र. सि. पा. ३३) अन्यथैव तु स्वपक्षं मण्डनो वर्णयामास (ब्र. सि. पा. ३५); तदेव तु मण्डनप्रस्थानम् अद्यापि **भामतीकारै**रप्यनुस्रियते इति सुप्रसिद्धम् । मण्डनमिश्रवाचस्पतिमिश्रौ ज्ञानाभ्यासस्य विध्यपेक्षतां निरस्य ज्ञानाभ्यासेनात्मसाक्षात्कारवादस्तु लोकसिद्धन्यायेनैव सेत्स्यतीति प्रसङ्ख्यानं प्रकारान्तरेणाङ्गीचक्रुरित्यन्यदेतत् । प्रसङ्ख्यानविधिवादश्चायम् **उपदेशसाहस्र्यामपि** सविस्तरमनूद्य प्रत्याख्यातोऽस्तीत्यतो विज्ञायते यदमी वादिनो भगवत्पादानां समये एव अथवा तत्पूर्वमेव - स्वप्रस्थानं श्रुतियुक्तिभिरुपपाद्य लब्धप्रचारमकुर्वन् इति । सम्भावनापि वर्तते - तन्मतखण्डनायैव तु सुरेश्वराचार्याः प्रकरणलेखने नियुक्ता इति च ।।

तत्त्वमसिवाक्यार्थस्य प्रत्यक्षविरुद्धत्वात्, वाक्यस्य चाभिधाश्रुतित्वाच्च (३-४७) न तत् साक्षात् ब्रह्मात्मतत्त्वं बोधयतीति केचित्

प्रसंङ्ख्यानवादिनो वदन्ति स्म । तन्निराकरणेन वाक्यं भेदसंसर्गविधुरम् अवाक्यार्थमेव गमयति (३-२६,७६) इति स्वमतमुपस्थाप्य - प्रमाणानां परस्परविरोध एव नास्ति (३-८३,८४,८६) ; शब्दार्थ-संगत्यभावेऽपि सुप्तप्रबोधकवाक्यवत् (३-४७,१०५) तत्त्वमसि-वाक्यम् अज्ञानं विनिवर्तयत् स्वतःसिद्धात्मानं ज्ञापयति (३-३८, १०४) । अतो नास्त्येवाप्रामाण्यकारणं वाक्यस्य (३-६८,७०) - इति स्वपक्षं सविस्तरमुपपादयामासुः ।।

प्रसङ्ख्यानवादे सिद्धौ प्रदर्शिताः प्रधानदोषा इमे - दुःखित्वं चेत् सप्रमाणकम्, तर्हि न केनापि निवर्त्येत । तन्निवृत्तौ आत्मनोऽपि नाशः स्यात् (३-८८) । प्रसङ्ख्यानेन दुःखित्वनिवृत्तिश्चेदभ्युपगम्येत, तर्हि प्रत्यक्षविरुद्धत्वात् तदुत्पन्नविज्ञानं नैव प्रमा स्यात् (३-८१) । प्रसंख्यानं हि नाम शब्दयुक्त्यभ्यासः ; प्रमाणम् अभ्यासात् प्रमां जनयतीत्येतत्तु दृष्टविरुद्धम् (३-९०) । शब्दयुक्तिप्रसङ्ख्यानानि परस्परसाहाय्येन प्रमामुत्पादयन्तीति चेत्, तदपि दृष्टविरुद्धम् ; न हि प्रामाणानि परस्परापेक्षया प्रामाण्यं भजन्ते । अतोऽभ्यासजन्योऽयं बुद्धावतिशयो भावनालक्षणमैकात्म्यमेवेत्यापतति । तथा च तज्जन्या द्वैतनिवृत्ति-र्नात्यन्तिकी स्यात् (३-८३,९०,९१) । अनादिकालोपचिता चेत् दुःखित्वभावना प्रसङ्ख्यानेन विनाशिता, तर्हि अल्पीयोऽभ्यासजन्या भावना शाश्वती भवेदित्यत्र का प्रत्याशा (३-९२,९३) ? शास्त्रजनितं ज्ञानं यदि प्रसंख्यानाज्ज्ञानान्तरं जनयदेव सफलम्, तर्हि शास्त्रम-प्रमाणमेव भवेत् (३-१२३) । तस्मात्, न वाक्यजन्यज्ञानप्रसंख्यान-विधिः कल्पनीयः (१-९८) । शब्दयुक्ती चेत् न यथावज्ज्ञानजनकौ, तत्प्रसंख्यानं यथार्थज्ञानं जनयेदिति कथं निश्चेयम् (३-१२४) ? ये तु प्रसंख्यानविधिं व्यसनितया रोचयन्ते, तैः श्रवणादिप्रसंख्यानविधानेनैव कथञ्चित् सन्तोष्टव्यम् (३-१२५,१२६) ।।

(३) अस्त्यन्योऽपि वादो यो **बृहद्वार्तिके** प्रत्याख्यातः (बृ.वा. ४-४-८७७.....८८५) । यद्यपि वाक्यजन्यं ज्ञानं यथार्थमेव, तथापि स्वजन्मानन्तरमेव अनादिकालप्रवृत्तया अविद्यया तद् बाध्यते ; अविद्याकार्यरागादेर्दर्शनादेतदेवम् इति गम्यते (बृ.वा. ४-४-८७८-८७९) । आगन्तुकं ह्यज्ञानम् अनात्मविषयं सम्यग्ज्ञानजन्ममात्रेण ध्वस्यते ; नैसर्गिकी त्वविद्या बाधितापि पुनरुदेत्येव । अतस्तस्या निरन्वयनाशार्थं ज्ञानाभ्यासः कार्यः (बृ.वा. ४-४-८९५) इत्येक-देशिनामेतेषां मतम् । अस्त्यत्र श्रीगौडपादाचार्याणामपि सम्मतिः, 'तत्त्वादप्रच्युतो भवेत्' (गौ.का. २-३८) इति 'यदा न लीयते चित्तं न च विक्षिप्यते पुनः । अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥' (गौ.का. ३-४६) इति च तेषां कारिकात्र प्रमाणम् - इत्येते वादिनो मन्यन्ते (बृ.वा. ४-४-८८७,८८८) ॥

कतमे एते वादिन इत्यद्यावधि न विज्ञातम् । नैष्कर्म्यसिद्धावपि 'बलवदपि सम्यग्ज्ञानं सत्, अप्रमाणोत्थेनासम्यग्ज्ञानेन बाध्यमान-मुपलभामहे, यत उत्पन्नपरमार्थबोधस्यापि कर्तृत्वभोक्तृत्वराग-द्वेषाद्यनवबोधोत्थप्रत्यया आविर्भवन्ति' इति शङ्कामुद्भाव्य 'बाधितत्वादविद्याया विद्यां सा नैव बाधते' (१-३८) इति निराकृतोऽयं पक्षः । 'रागो लिङ्गमबोधस्य' (४-६७) इत्युक्तिरप्यविद्यायाः पुनरुत्थाननिराकरणायैव स्यात् । उपदेशसाहस्र्यामपि -

सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम् ।
शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ॥ १८-१३

श्रुतानुमानजन्मानौ सामान्यविषयौ यतः ।
प्रत्ययावक्षजोऽवश्यं विशेषार्थो निवारयेत् ॥ १८-१४

इति च श्लोकद्वयदर्शनात् प्रसंख्यानवादिनोऽपि 'श्रौतज्ञानं बाध्यते ; तस्मात् यावद्विशेषानुभवो न जायते तावत् प्रसंख्यानं कर्तव्यम्' इति

वदन्ति स्मेति गम्यते । वार्तिकपरामृष्टस्तु वादो बाधिताप्यविद्या सम्यग्ज्ञानमपि बाधते इत्याग्रहवान् इति विशेषः । एतैर्वादिभिरुदाहृतायाः कारिकाया (गौ.का. २-३८) भाष्येऽप्येतद्वादनिरसनसूचकानि वाक्यानि दृश्यन्ते । सिद्धौ 'अज्ञानमात्माश्रयम्, आत्मविषयकं च' इति प्रतिपाद्य 'अनात्मविषयकमज्ञानं नास्त्येव' (३-१, सं.) इत्यवधारणमप्येतद्वादनिराससूचकमिति भाति ॥

एकदेशिभिरेतैः श्रीगौडपादाचार्यवचनस्य स्वमतोपबृंहकत्वेनोदाहरणात्, श्रीशङ्करभगवत्पादकालात् प्रागेव गौडपादाचार्यानुयायिषु तदीयप्रस्थानविषये विमतिरासीदित्यवगच्छामः । अद्यापि श्रीशङ्करभगवत्पादकृतसूत्रभाष्यटीकाकारणाम् अविद्याविषये मतिभेदो दरीदृश्यते । तद्यथा -

पञ्चपादिकायाम् -

'अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या ; अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति । प्रमाणवैकल्यादेव तदग्रहणसिद्धेः । रजतप्रतिभासात् प्राक् ऊर्ध्वं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात् । अतस्तत्र रूपान्तरावभासहेतुरेव केवलम् ; प्रत्यगात्मनि तु चितिस्वभावत्वात् स्वयंप्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात्, तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव अहङ्काराद्यतत्प्रतिभासनिमित्तं च भवति'

- पं.पा. ९६

अत्र यद्यप्यात्मन्यनात्मनि च पृथक्पृथगेवाविद्याद्वयम् इति नोक्तम्, तथापि अनात्मनि मिथ्यार्थावभासहेतुरेव केवलम्, आत्मनि तु स्वरूपावारकं च इत्युक्तम् ॥

भामत्यां तु -

(१) 'कार्यकारणाविद्याद्वयाधारोऽहङ्कारास्पदं संसारी'

- वा. भा.पा.४५

इत्येकत्राविद्याद्वयं निर्दिष्टम् ।

अन्यत्र तु -

(२) 'न वयं प्रधानवदविद्यां सर्वजीवेष्वेकाम् आचक्ष्महे येनैवमुपालभ्येमहि, किं त्वियं प्रतिजीवं भिद्यते'

- वा.भा.पा. ३७७

इत्यविद्यानानात्वमपि स्वीकृतम् ।

अपरत्र पुनः -

(३) 'तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स (?) तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्यय-मपनयति ।'

- वा.भा.पा. ४०

इति ।।

(४) 'तस्मात्, यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कार-सचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्छनाभेदमध्यक्षम् अनु-भवति, एवं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमन्तःकरणेन'

- वा.भा.पा. ५८

इति च वाक्यार्थज्ञानाभ्यासोऽप्युररीकृतः ।।

नैष्कर्म्यसिद्धौ पुनः -

अविद्यानानात्वम् अविद्यासंस्कारनाशार्थं प्रयोजनान्तरार्थं वा ज्ञानप्रसंख्यानं च कण्ठरवेण निरस्तम् । अविद्यासंस्कारनाशार्थं

यत्नान्तरकरणं वृथायासः स्यात्, यतो विद्यास्मृतिरेवालं तद्विनाशायेति स्पष्टमुक्तम् -

बाधितत्वादविद्याया विद्यां सा नैव बाधते ।
तद्वासना निमित्तत्वं यान्ति विद्यास्मृतेर्ध्रुवम् ।। १-३८

इति । शाब्दज्ञानं परोक्षज्ञानमात्रम्, आत्मापारोक्ष्यं श्रवणमननाभ्याससचिवान्तःकरणेन - इति प्रस्थानं तु मण्डनमिश्रभुजावलम्बनफलं नैष्कर्म्यसिद्ध्या नैवानुमन्यते इति प्रसङ्ख्यानवादनिरासेनैव स्पष्टमिति न प्रथग्वक्तव्यमस्ति तत्र किञ्चित् । अधस्तादुदाहृतास्त्रयोऽपि पक्षाः, ज्ञानाभ्यासलक्षणं मनोनिग्रहरूपं वा निदिध्यासनम् आवश्यकत्वेन परिगृहीतवन्त इति कारणात् स्यात्, वार्तिककारः 'अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते' (बृ.वा. २-४-२१७) इत्याग्रहपूर्वकं प्रतिपादयति । इह च प्रकरणे वाक्यज्ञानं आत्मापरोक्षताकारणमिति (३-६९-७०); तच्च ज्ञानं निरस्तसमस्तकारकग्राममेवोदेति (३-७१) इति च सुस्फुटमुक्तम् । वाक्यज्ञानानन्तरमपि ब्रह्मसाक्षात्कारः कर्तव्यत्वेनावशिष्यत इति वादिनः प्राचीना अर्वाचीना वा दशमदृष्टान्तं (३-६८, ४-३३) न परामृशन्ति, वाक्यजन्यज्ञानं सकलकारकग्रामप्रध्वंसि (१-३६) इत्यपि नानुमन्यन्ते इत्येतत् वाचकैरवश्यमवधेयम् ।।

क्लेशापहारिणीव्याख्या

दुर्दैववशादिदानीं वार्तिकप्रस्थानस्य पठनपाठनसंप्रदायः शिथिलतां विच्छिन्नतां च गतः । सूत्रभाष्यव्याख्यानव्याजेन, स्वाभिमताविद्योपादानकप्रपञ्चवादं पुरस्कृत्य प्रचलितं **पञ्चपादिका तद्विवरणप्रस्थानम्,** मण्डनमिश्रकृतब्रह्मसिद्ध्यादृतविचारसरण्यनुसारिनानादर्शनाचार्यवाचस्पतिमिश्रोपज्ञं **भामतीप्रस्थानं** च - इत्येतद् व्याख्यानद्वयं विविधोपव्याख्यानैरुपबृंहितम् - प्रमेयविशेषप्रतिपादनप्रकारे, वेदान्तार्थनिर्णयाय समादृतेषु प्रक्रियाविशेषेषु च

परस्परं भाष्येण च तत्र तत्र विरुध्यमानमपि - एकमेवेदं शाङ्करं प्रस्थानम् इति दृढं विश्वसन्ति पण्डितप्रकाण्डाः पाठयन्ति च विनेयान् पाठशालासु विश्वविद्यालयोपजीविनीषु आंग्लभाषाप्रधानकलाशालासु चेत्यहो विधिविलासः !

अनुशाङ्करव्याख्यानप्रस्थानेषु वार्तिकप्रस्थानमेव प्राचीनतमम् इत्येतत् **तैत्तिरीयबृहदारण्यकभाष्यवार्तिकयोरवलोकनेन** स्फुटं भवति । अथवा **नैष्कर्म्यसिद्धिपरिशीलनेनापि** व्यक्तं भवेदेतत् । वार्तिकप्रस्थाने हि अर्वाचीनवेदान्तग्रन्थेषु विचारणीयत्वेन प्राचुर्येणोपलभ्यमानाः - अविद्या जगतः स्वातन्त्र्येण कारणं, द्वारकारणं वा ? अविद्या कस्य, जीवाश्रया वा सा, ब्रह्माश्रया वा ? एका वा, नाना वा ? जीवः किमेक एव, उत नाना ? भगवत्पादसंमतो जीवः किमन्तःकरणावच्छिन्नः, अथवा ब्रह्मणः प्रतिबिम्बं वा ? इत्यादि-विकल्पाः नैव विमर्शनीयत्वेनोपात्ताः क्वचिदपि । किञ्चान्यत्, **पञ्चपादिकायाम्** अन्तःकरणोपरागनिमित्तं मिथ्यैवाहङ्कर्तृत्व-मात्मनः - इत्युपपादनार्थं विविधदृष्टान्तानामुपन्यासमारभ्य एवं लिखितं दृश्यते -

"यत् पुनः, दर्पणजलादिषु मुखचन्द्रादिप्रतिबिम्बोदाहरणम्, तत् अहङ्कर्तुरनिदमंशे बिम्बादिव प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरं किं तु तदेव, तत्पृथगवभासविपर्ययस्वरूपमात्रं मिथ्या इति दर्शयितुम् । .... अत्राह - भवतु न वस्त्वन्तरम्, तदेव तत् इति तु न क्षम्यते । शुक्तिकारजतस्य मिथ्यारूपस्यापि सत्यरजतैक-रूपावभासित्वदर्शनात् । मैवम् । तत्र हि बाधदर्शनात् मिथ्याभावः, नेह स बाधो दृश्यते । यत् पुनः दर्पणापगमे तदपगमः, न स बाधः ; दर्पणेऽपि तत्प्रसङ्गात् । ननु तत्त्वमसिवाक्याद् बाधो दृश्यते । मैवम् । 'तत् त्वम्' इति बिम्बस्थानीयब्रह्मस्वरूपता

प्रतिबिम्बस्थानीयस्य जीवस्य उपदिश्यते । अन्यथा न 'तत्त्वमसि' इति स्यात्, किं तु 'न त्वमसि' इति भवेत् 'न रजतमस्ति' इतिवत् ।।" (पं.पा. ३४२-३४३)

इति । अत्र त्वं(अहं)पदार्थस्य तत्पदार्थैकता वाक्येनोपदिश्यते इत्यभिप्रायवान् टीकाकारः इति स्पष्टम् । अहमर्थबाधेनैव वाक्यार्थप्रतिपत्तिरिति तु **सिद्धौ** स्पष्टं लिखितमस्ति -

योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ।
ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्त्यते ।।२-२९।।

लक्षणं सर्पवद्रज्ज्वाः प्रतीचः स्यादहं तथा ।
तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि तदाश्रयात् ।।३-२७।।

भ्रान्तिप्रसिद्ध्यानूद्यार्थं तत्तत्त्वं भ्रान्तिबाधया ।
अयं नेत्युपदिश्येत यथैवं तत्त्वमित्यपि ।।३-७३।।

इति । एतेन पञ्चपादिकाकारः सुरेश्वरोक्तं बाधसामानाधिकरण्यं निरस्यन्, वार्तिककारादप्यर्वाचीनः स्यात् इत्युन्नेतुं शक्यते ; अत एव नैष्कर्म्यसिद्धौ पञ्चपादिकागताः प्रमेयविशेषा नैव परामृष्टा इति च ।।

तस्मात् शाङ्करप्रस्थानसतत्त्वं निर्दिधारयिषुभिरवश्यं वार्तिकप्रस्थानं यथावत् परिशीलनीयम् अर्वाचीनटीकाप्रस्थानयोः परिशीलनतः प्रागेवेति ग्रन्थतत्त्वशोधकैरभ्युपगन्तव्यम् । एतद्दृष्ट्या, नैष्कर्म्यसिद्धिप्रतिपादितवेदान्तप्रमेयानामनर्घतया च प्रलोभितोऽहं प्रकरणस्यास्य व्याख्यां क्लेशापहारिणीनाम्नीं नूत्नामेताम् अकार्षम् । यद्यपि चन्द्रिकया व्याख्यया संयुता सिद्धिर्मुद्रापितैव बहोः कालात् प्रांक् प्राकाश्यं नीता च वाचकानां दृष्टिपथमानीतास्ति, तथापि तव्द्याख्या-कर्तुरर्वाचीनव्याख्यानप्रस्थानप्रभावितत्वात् वार्तिकप्रस्थानस्याननुमता बहवः प्रमेयाः - स्वाभिलषितसिद्धिनिबन्धना मूलाविद्यावादादयो

मूलग्रन्थकृदभिप्रेतत्वेन विभाविताः - कथञ्चित् तत्र तत्र प्रवेशिता दरीदृश्यन्ते ; प्रसन्नगम्भीरे सिद्धिग्रन्थे स्थिताः प्रमेया बृहदारण्यक-वार्तिकाद्याकरसंवादं विना नैवाक्लेशेन विज्ञेया अपि भावाः सङ्क्षेपरुचिना चन्द्रिकाकर्त्रा समुपेक्षिता दृश्यन्ते । तस्मात्, ग्रन्थविस्तरभयं परित्यज्यापि मया तत्र तत्र यथायोग्यं बृहद्वार्तिकात् प्रमाणश्लोकान् आनीय जिज्ञासुजनमनःक्लेशनिवारणं यथा स्यात् तथा सिद्धिश्लोकानां संबन्धोक्तीनां चाभिप्रायो विवृतोऽस्ति । यद्येतया व्याख्यया नैष्कर्म्यसिद्धिगता ग्रन्थग्रन्थयः किञ्चिदपि भिद्यन्ते, जिज्ञासूनां च वार्तिकप्रस्थानविमर्शने अधिकतरा अभिरुचिश्च जायेत, तेनैवाहं धन्यं मन्येयात्मानमिति निवेदयति

प्लवंगसंवत्सरे
माघशुद्धैकादश्याम्

सच्चिदानन्देन्द्रसरस्वती भिक्षुः
ग्रन्थसंपादनकर्ता व्याख्यानकर्ता च

विषयानुक्रमणिका

अत्र कृष्णतराक्षरैरङ्किता नैष्कर्म्यसिद्धिग्रन्थशरीरविभागाः, ततः परं सूक्ष्माक्षरैरङ्कितास्तु क्लेशापहारिणीविभागाः ।।

पृष्ठानि

१. संबन्धोक्तौ ग्रन्थावतारिका

प्रकृतव्याख्यानस्य संबन्धप्रयोजने - संबन्धोक्त्यवतरणिका - प्रकरणस्यारम्भणीयत्वे शङ्का - शङ्कापरिहारः संक्षेपतः - दुःखनिवृत्तौ स्वरसत एव प्रवृत्तिः प्राणिनाम् - दुःखनिमित्तं धर्माधर्महेतुकं जन्म - धर्माधर्मयोश्च कर्महेतुकत्वम् - कर्म तु अध्यासोत्थरागद्वेषनिमित्तकम् - मिथ्याज्ञानं तु आत्मानवबोधमात्रनिबन्धनम् - आत्मानवबोधस्य दुःस्थितत्वम् - दुःखापरिहारवत् सुखानवाप्तिरप्यनवबोधकृतैव - अज्ञानोच्छित्तिरेव परमपुरुषार्थः - सम्यग्ज्ञानात्मलाभमात्रादेवाज्ञाननिवृत्तिः - आत्मानवबोधविषये एकदेशीयम् असङ्गतं व्याख्यानम् - सम्यग्ज्ञानं तु वेदान्तागमवाक्यादेव - वाक्यजन्यज्ञानादन्यत् साक्षात्काररूपं ज्ञानं न ग्रन्थकृन्मतम् - उपसंहारः ।। १-१५

प्रथमोऽध्यायः

(नैष्कर्म्यज्ञानादेव मोक्षः)

२. मङ्गलाचरणपूर्वकं ग्रन्थारम्भप्रतिज्ञा

(श्लोकाः १-६)

मङ्गलश्लोकगतसंबन्धोक्तिविवरणम् - मङ्गलश्लोकाभि-

प्रायः - गुरुनमस्कारश्लोकसंबन्धोक्त्याशयविवरणम् - स्वगुरोरनितर-साधारणसंप्रदायवत्त्वम् - वेदान्तोक्तज्ञानमत्र विषयः - स्वयंसिद्धात्म-विषयकं ज्ञानमत्र प्रतिपाद्यम् - गुरूक्तमेवात्र विशदीक्रियते - ग्रन्थकर्तुरीप्सितं प्रयोजनम् ॥ १६-२४

३. प्रकरणार्थः सङ्क्षेपतः

(श्लोकौ ७-८)

ग्रन्थसंबन्धः - भाष्यकारवार्तिककारयोरविद्याविषये संगानम् - अविद्याया अनुभवैकसिद्धत्वम् - अनर्थतद्धेतुनाशः पुरुषार्थः - वेदान्त-वाक्यजन्यज्ञानमेव पुरुषार्थहेतुः - अनर्थहेत्वविद्याविषये मतान्तरं तद्दूषणं च ॥ २४-२८

४. कर्मवादिनां पूर्वः पक्षः

(श्लोकाः ९-१९)

पूर्वपक्षविमर्शने हेतुः - [1]कर्मवादिपक्षावतारणम् - कर्मणैव मुक्तिरिति प्रतिज्ञा - काम्यनिषिद्धवर्जनान्मोक्षप्रतिबन्धपरिहारः - प्रतिबन्धपरिहारप्रकारः - प्रारब्धकर्मणो भोगादेव क्षयः - नित्यानुष्ठान-प्रयोजनम् - आत्मवस्तुविषयकज्ञाने न प्रमाणमस्ति - श्रुतिस्मृतिषु ज्ञानविधिवाक्यं नैवोपलभ्यते - अविधिना कृतं न परलोकफलाय - जैमिनिवचनप्रामाण्यादपि नास्ति ज्ञानम् - मन्त्रवर्णाच्च - ज्ञानं वाक्यप्रतिपाद्यमित्येतदेवासंभवि ॥ २८-३८

५. ज्ञानाभ्युपगमेऽपि कर्मणो मुक्तिसाधनत्वमक्षतम्

(श्लोकः २०)

विधेयज्ञानाभ्युपगमेऽपि समुच्चयत एव मोक्षः ॥ ३८-३९

६. पूर्वपक्षोपसंहारः

(श्लोकः २१)

सर्वाश्रमाणामपि कर्मभिर्मोक्षः ॥ ३९-४०

७. सिद्धान्तोपक्रमः - कर्म न मोक्षसाधनम्

(श्लोकाः २२-२८)

पूर्वपक्ष्युपहासः - दूषणाभिधानप्रतिज्ञा - मुक्तौ कर्मकृत्यं नास्ति - मुक्तेः कर्मफलत्वाङ्गीकारे दोषः - पारिशेष्यन्यायेनापि मुक्तिर्न कर्मफलम् - मुक्तेः कर्मफलत्वे नैव श्रुतिवचनमस्ति ॥

४०-४९

८. अज्ञानविनाशकत्वेनापि न मोक्षसाधनं कर्म

(श्लोकाः २९-३८)

कर्मप्रवृत्तिहेतुनिरूपणप्रतिज्ञा - प्रवृत्तिहेतुर्न निरूपणीय इति पूर्वपक्षः - कर्मप्रवृत्तिहेतुः सन्दिग्धः - प्रवृत्तिहेतुनिरूपणं सप्रयोजनम् - शास्त्रं पुरुषार्थोपायप्रदर्शकमात्रम् - उत्तरग्रन्थसंबन्धः - अत्र प्रत्यक्षादीनां विनियोगे मतान्तरं तद्दूषणं च - शास्त्रं न पुरुषेच्छाजनकम् - उत्तरग्रन्थसंबन्धः - शास्त्रप्रकाशितोपायविभागः - सम्यग्ज्ञानमेवाज्ञानबाधकं न कर्म - ज्ञानाज्ञानयोर्वैषम्ये शङ्का - परिहारः-ज्ञानं फलदाने निरपेक्षम् - आत्मज्ञानस्यापि नोत्पतिमात्रेणाज्ञाननिवर्तकत्वमित्येकदेशिमतम् - एकदेशिमतद्वयनिराकरणार्थत्वेनोत्तरश्लोकावतारणम् - अज्ञाननिवर्तकं ज्ञानमेवेत्युपसंहारः - सम्यग्ज्ञानमप्यविद्याबाध्यं भवेदिति शङ्का - अविद्यातद्वासनानां न क्वचिदपि बाधकत्वम् ॥

४९-७०

९. अविद्यान्वयेन संसारान्वयः

(श्लोकाः ३९-४४)

उत्तरग्रन्थसंबन्धः - अज्ञानान्वये संसारान्वयः - अज्ञानव्यतिरेके संसारव्यतिरेकः - उक्तान्वयस्य प्रपञ्चः - संसारोपवर्णनम् - उक्तार्थे प्रमाणोदाहरणम् ।। ७०-७६

१०. कर्मणां परम्परया मोक्षहेतुत्वम्

(श्लोकाः ४५-५३)

उत्तरग्रन्थसंबन्धः - कर्मणां चित्तशुद्धिद्वारेण वैराग्यजनकत्वम् - नैष्काम्यस्य ज्ञानोत्पत्तौ हेतुत्वम् - प्रत्यक्प्रवणचित्तस्य संन्यास एवाधिकारः - उक्तार्थोपसंहारः - कर्मानुष्ठानतत्संन्यासयोः प्रमाणम् - कर्मणां परम्परया मोक्षदायित्वे क्रमः - योगाभ्यासोऽत्र निदिध्यासनादन्यः - स्वात्मन्यवस्थानमेव मुक्तिरित्यत्र प्रमाणम् - मुक्तिर्न कार्यरूपा किं तु ज्ञाप्यैव ।। ७७-८८

११. ज्ञानस्य मोक्षं प्रति निरपेक्षसाधनत्वम्

(श्लोकाः ५४-६६)

अतीतग्रन्थोक्तार्थसंग्रहः - आगामिग्रन्थार्थः - उत्तरश्लोकसंबन्धः - ज्ञानं न कर्माङ्गम् - ज्ञानकर्मणोः समप्राधान्येनापि न समुच्चयः - ज्ञानकर्मणोर्बाध्यबाधकभावोपपत्तिः - ज्ञानिनो विधिनिषेधागोचरत्वम् - अज्ञस्यैव कर्मण्यधिकार इत्यत्र दृष्टान्तः - भ्रान्तिज्ञानमेव प्रवृत्त्यङ्गम्, न तत्त्वज्ञानम् - आत्मज्ञानस्य कर्मानङ्गत्वे हेत्वन्तरोपन्यासः - ज्ञानकर्मणोस्त्रेधा विरोधः ।।

८९-१०२

१२. एकदेशिसंमतसमुच्चयनिरासः

(श्लोकः ६७)

एकदेशिमतद्वयम् - भावनासञ्चयवादिनां मतम् - अवाक्यार्थ-ज्ञानवादिनां मतम् - समुच्चयवादिवेदान्तिखण्डनायोत्तरः श्लोकः ॥ १०२-१०६

१३. द्वैताद्वैतब्रह्मवादिनां मतेऽपि समुच्चयानुपपत्तिः

(श्लोकाः ६८-७८)

दूषणार्थं नानारसब्रह्मवादावतारः - नानारसब्रह्मवादस्य त्रेधा विकल्पः - अज्ञानमात्रव्यवहिते ब्रह्मणि, न समुच्चयः - अनात्मब्रह्म नैवाप्यम् - द्वितीयपक्षे न समुच्चयः - ब्रह्म प्रत्यगात्मभूतमेव साधकस्य इति पक्षे न विधिः - ब्रह्मभूतस्यापि कर्माभ्युपगमे सर्वकर्मसङ्करः - ज्ञानिनो नैव शरीराद्यभिमानोऽस्ति - नानारसब्रह्मभूयं गतस्य कर्म न नियोगसाध्यम् - ब्रह्मणो भिन्नाभिन्नत्वम् असंभावितम् - संभवित्वेनाभ्युपगतेऽपि भेदाभेदवादे दोषः ॥ १०६-११८

१४. समुच्चयनिरासोपसंहारः

(श्लोकः ७९)

प्रकरणोपसंहारः ॥ ११८-११९

१५. पूर्वपक्षोक्तिखण्डनम्

(श्लोकाः ८०-१००)

पूर्वपक्षयुक्तिनिरासप्रतिज्ञा - काम्यनिषिद्धकर्मणोरशेषतस्त्यागा-नुपपत्तिः - नित्यकर्मणा काम्यनिषिद्धयोर्न क्षयः - काम्यैः काम्यानां न नाशः - कर्मविधिबाहुल्यादेव कर्म मुक्तिसाधनमित्ययुक्तम् - नैष्कर्म्य-प्रवणाः श्रुतयोऽपि सन्ति - आत्मज्ञाने न नियोगः - ज्ञानविध्यङ्गी-

कारेऽपि नापूर्वविधिः - आत्मनि प्रमाणापेक्षा, अविश्वासो वा न संभवति - ज्ञानस्य निष्फलत्वोक्तिरनुभवविरुद्धा - आम्नायस्य क्रियार्थत्व-मित्येतत् कर्मकाण्डविषयम् - पूर्वपक्षिमतेऽप्यात्मनः शास्त्रीयकर्मसु न कर्तृत्वमस्ति - केवलाहंप्रत्ययगम्यस्यात्मनः कर्मसु नाधिकारः - शरीरातिरिक्तात्मनः कर्मफलभोक्तृत्वं न संभवति - अविद्यावन्तमभ्युप-गम्यैव कर्मविधिः - आत्मवाक्ये अस्यादिसिद्धार्थबोधकक्रियापद-मप्यस्ति - तत्त्वमस्यादिवाक्येषु विधिरशक्यकल्पनः - प्रतिज्ञातार्थोप-संहारः - पूर्वपक्षयुक्तिनिरासोपसंहारः ॥ १९९-१४४

द्वितीयोऽध्यायः

(आत्मज्ञानप्रतिबन्धापनयनम्)

१. अध्यायसंबन्धः

(श्लोकः १)

प्रत्यक्षादीनां शब्दादिविषयमात्रग्राहकत्वम् - आत्मा न प्रमाण-वेद्यस्वभावः - वेदान्तवाक्यस्यैवाऽऽत्मयाथात्म्यसमर्पकत्वम् - वृत्तानुद्रवणपूर्वकं वर्तिष्यमाणाध्यायतात्पर्यकथनम् - पदार्थाज्ञान-लक्षणप्रतिबन्धाद् वाक्यार्थाप्रतिपत्तिः ॥ १४५-१४९

२. वाक्यज्ञाने पूर्वः पक्षः

(श्लोकौ २-३)

पूर्वपक्षः-वाक्यादन्यस्मादपि ज्ञानं भवति - पूर्वपक्षः-वाक्यादपि ज्ञानं भवेत् ॥ १४९-१५१

३. वाक्यं नियमेन ज्ञानहेतुः .

(श्लोकौ ४-५)

वाक्यं नानैकान्तिकहेतुर्ज्ञाने - तत्त्वमसिवाक्यस्य स्वविषय-बोधकत्वादेव प्रामाण्यम् ।। १५२-१५४

४. पदार्थशोधनपूर्वकं वाक्यार्थसिद्ध्यर्थमुत्तरग्रन्थः

(श्लोकाः ६-१०)

वैराग्यादीनाम् ज्ञानहेतुत्वप्रकारः ।। १५५-१५६

५. स्थूलशरीरविवेकः

(श्लोकाः ११-२१)

देहोऽनात्मा अन्नकार्यत्वात् - देहोऽनात्मा आद्यन्तयोस्तथात्व-प्रसिद्धेः - देहोऽनात्मा अनात्मभूतान्नकार्यत्वात् - आत्मानात्मविवेक-फलम् - देहद्वयविविक्तात्मज्ञाने सति रागादेरात्यन्तिकनिवृत्तिः - देहोऽनात्मा दृश्यत्वात् - देहोऽनात्मा मिथ्याभिमानहेतुत्वात् - स्थूलदेहविवेकोपसंहार : ।। १५६-१६३

६. सूक्ष्मदेहविवेकः

(श्लोकाः २२-४४)

सूक्ष्मदेहविवेके युक्तिः - आत्मनोऽहंप्रत्ययविषयत्वं तर्कपराहतम् - आत्मनोऽहंप्रत्ययविषयत्वनिराकरणं न प्रत्यक्षविरुद्धम् - आत्मनोऽहंधर्मकत्वाङ्गीकारे दोषः - आत्मनो ग्राह्यग्राहकभावानुप-पत्तिः - अहमोऽनात्मत्वाभ्युपगमो न व्यवहारविरुद्धः - वाक्यस्याहं-व्यपनेतृत्वोपपतिः - बाधसामानाधिकरण्योक्तिर्नायुक्ता - अहंबुद्धि-व्यावृत्त्यर्थमेव विशेषयत्नकरणे हेतुः - आत्मा न नियमेनाहं-धर्माविनाभूतः - आत्मनोऽहमर्थतां ब्रुवतां पक्षे दोषः - आत्मनो

नित्यत्वं दुरपन्हवम् - आत्माहङ्कारयोर्विरुद्धस्वभावत्वम् - उपसंहारः - द्रष्टृदृश्ययोरितरेतरात्मत्वे व्यवहारलोपः - उक्तयुक्तेः श्रुतिस्मृतिमूलकत्वम् - उक्तार्थे स्मृतिप्रामाण्यम् - उत्तरार्थ उपसंहारः ।। १६४-१८८

७. द्वैतस्य प्रतीतिमात्रसिद्धत्वम्

(श्लोकाः ४५-५३)

द्वैतस्य मिथ्यासिद्धत्वं सुदुर्बोधत्वं च - द्वैतस्य मोहमूलत्वम् - आत्मभेदबुद्धिरप्यविद्याविजृम्भितैव - एकस्मिन्नेवात्मनि विरुद्धधर्म-समवायोपपतिः - अभूताभिनिवेशेन प्रवृत्तौ दृष्टान्तान्तरम् - अहंविवेकोपसंहारः ।। १८८-१९६

८. आत्मन्यहंशब्दप्रवृत्तिः कथम् ?

(श्लोकाः ५४-५७)

उत्तरग्रन्थसंबन्धः - आत्मन्यहंशब्दस्य लक्षणावृत्तिः - आत्मन्यहंशब्दस्य गौणी वृत्तिः - आत्मन्यहंशब्दस्य मुख्या वृत्तिः - वाङ्मनसागोचरस्यापि अहंशब्दबोध्यत्वं कथम् ? - 'अहं ब्रह्मास्मि' इत्यत्र विवक्षितमात्मस्वरूपम् ।। १९६-२०१

९. आत्मनः कूटस्थनित्यता

(श्लोकाः ५८-९५)

ग्रन्थसंबन्धः - उत्तरग्रन्थार्थः साक्षिसाक्ष्यान्वयव्यतिरेकौ - साक्षिणः स्वयंसिद्धत्वम् - अनुभवविषये आक्षेपः - अविक्रियस्यैव भ्रान्त्या भोक्तृत्वम् - कूटस्थतायां जात्यमणिदृष्टान्तः - आत्मनोऽद्वैतता - बुद्धेः परिणामित्वोपपत्तिः - आत्मनः कूटस्थता सर्वबुद्धिसाक्षित्वादेव - आत्मनो दुःखित्वाभावे युक्तिः - आत्मनः संविद्रूपत्वादेवाव्यभि-

चरद्रूपत्वम् - आत्मा बुद्ध्यसंहतः, सुखदुःखादिद्रष्टृत्वात् - बुद्धेः परिणामित्वे युक्त्यनुभवौ - आत्मनश्चाविकारित्वे युक्त्यनुभवौ - श्रौतप्रक्रिययाप्यात्मनो निर्विकारत्वम् - साङ्ख्यवेदान्तप्रक्रिययोर्वैलक्षण्यम् - आत्मनः कूटस्थतायां बुद्धेश्च परिणामित्वे युक्तिः - सर्वदेहेष्वात्मैकत्वम् - एकात्मतावादे ज्ञानिनो न सर्वजीवदुःखानुभवप्रसङ्गः - व्याख्यानान्तरदूषणम् - उक्तार्थे श्रुतिप्रमाणोदाहरणम् - आत्मनः कूटस्थत्वमनतिशङ्कनीयम् ।। २०२-२३१

१०. अन्वयव्यतिरेकन्यायोपसंहारः

(श्लोकः ९६)

अन्वयव्यतिरेकलब्धोऽर्थः ।। २३१-२३२

११. आत्मनः स्वतःसिद्धाद्वितीयत्वम्

(श्लोकाः ९७-९९)

उत्तरग्रन्थसंबन्धः - आत्मनोऽप्रमेयत्वे युक्त्यवतरणम् - आत्मा न प्रमेयः, अव्यवहितस्वरूपत्वात् ।। २३३-२३९

१२. आत्मानात्मनोरितरेतराध्यासोऽविद्यानिमित्तः

(श्लोकाः १००-१०२)

आत्मनः सर्वमेयवैलक्षण्यम् - अध्यासस्याविद्यानिबन्धनत्वम् ।। २३९-२४१

१३. आत्मज्ञानेनाविद्यानिवृत्तिः

(श्लोकाः १०३-१०६)

उत्तरश्लोकसंबन्धः - ज्ञानेनाज्ञानबाधो लोकसिद्धः - आत्मज्ञानं नानधिगताधिगमः - प्रमात्रादीनां स्वव्यतिरिक्तज्ञेयत्वम् ।। २४१-२४४

१४. शोधितत्वंपदार्थस्याद्वैतता

(श्लोकाः १०७-११५)

साक्षिणो ग्राहकादिविलक्षणत्वम् - साक्षिणो हानोपादानलक्षण-संसाररहित्यम् - ग्राहकादीनां साक्ष्यपेक्षयैव सिद्धत्वम् - ग्राहकादीनां साक्षिसिद्धत्वाङ्गीकारे नानवस्था - आत्मनोऽवगत्येकस्वरूपत्वम् - आत्मनोऽद्वैतत्वसिद्धिः - आत्मनः क्रियाकारकफलशून्यत्वे श्रुति-प्रमाणम् - आत्मव्यतिरेकेणानात्मा नाम नास्त्येव ।।

२४४-२५४

१५. श्रुत्युपदेशेन यथार्थज्ञानप्राप्तिः

(श्लोकाः ११६-११८)

मुमुक्षोः श्रुत्युपदेश एव शरणम् - श्रुत्युपदेशेन प्रमोत्पत्तिः ।।

२५४-२५७

१६. अध्यायार्थोपसंहारः

(श्लोकः ११९)

विद्याफलम् ।। २५७-२५८

तृतीयोऽध्यायः

(वेदान्तवाक्यार्थव्याख्यानम्)

१. अध्यायसंबन्धः

अतीताध्यायार्थनुवादः - आत्मानात्मनोः संबन्धोऽज्ञानकारितः - अज्ञानस्याश्रयविषयसापेक्षता - अनात्मा नाज्ञानाश्रयः - अनात्मा नाज्ञानविषयः - आत्मन एवाज्ञानित्वम्, अज्ञानविषयत्वं च -

आत्मनोऽज्ञानाश्रयत्वोपपत्तिः - आत्मनोऽज्ञानविषयत्वोपपत्तिः - अज्ञानाश्रयत्वतद्विषयत्वे न वास्तविके - उपसंहारः ॥ २५९-२७१

२. वाक्यादेवावाक्यार्थप्रतिपत्तिः

(श्लोकाः १-३)

वाक्यार्थज्ञानेनावाङ्मनसगोचरतत्त्वरूपेणावस्थानम् - वाक्यार्थज्ञानात् दुःखित्वानात्मत्ववारणम् - वाक्यार्थविचारारम्भार्थं सूत्रोपन्यासः ॥ २७१-२७४

३. श्रवणमनने विधिपरिप्रापिते

(श्लोकौ ४-५)

अन्वयव्यतिरेकपरिशीलनविषये शङ्का - अन्वयव्यतिरेकन्यायो विधिपरिप्रापितः - श्रवणादीनां विहितत्वे व्याख्यातॄणां विप्रतिपत्तिः - श्रवणादिविधिविषये सिद्धान्तः - कृतान्वयव्यतिरेकस्यैव वाक्योपदेशः ॥ २७४-२८०

४. वाक्यनिरसनीयाज्ञानस्वरूपम्

(श्लोकाः ६-८)

साङ्ख्यचोद्यम् - अविद्याकार्यं ज्ञानविनाश्यम् - पूर्वपक्षः - मिथ्याज्ञानव्यतिरेकेण अज्ञानं नास्ति - परिहारः - अज्ञानमेव संशयमिथ्याज्ञानयोस्तत्त्वम् - अज्ञातसत एव कारणत्वम् - अत्र मूलाज्ञानवादस्य नास्त्यवसरः - अज्ञातसतः स्वरूपम् ॥ २८०-२८८

५. वाक्यादवाक्यार्थप्रतिपत्तिप्रकारः

(श्लोकाः ९-२७)

वाक्यार्थनिदिध्यासनेनैव असंसर्गात्मकावबोध इति पूर्वः पक्षः -

वाक्यादेवावाक्यार्थप्रतिपत्तिः इति परिहारः - सामानाधिकरण्यं पदपदार्थयोः - बोद्धृताहन्ताभ्यां कूटस्थबोधप्रत्यक्त्वयोर्लक्ष्यत्वम् - बोद्धृत्वप्रत्यक्त्वयोः सहभावः - आत्मस्थबोद्धृत्वप्रत्यक्त्वयोर्न नानात्वम् - बुद्धिस्थबोद्धृत्वाहंतयोस्तु परस्परभेदः - आत्मबुद्ध्यो-र्बोद्धृत्वे वैलक्षण्यम् - कौटस्थ्यसंसारित्वयोर्वैलक्षण्यम् - बोद्धृत्व-प्रत्यक्त्वयोः स्वरूपविवेकः - आत्मबुद्ध्योः संबन्धहेतुः आत्मानवबोध एव - संबन्धाज्ञानं वाक्यं विनाशयति - अत्र बुद्धिलाघवार्थं पुनरुक्तिराश्रिता - पदयोरविवक्षितार्थवारणप्रकारः - विशेषणविशेष्य-भावो लक्षणार्थस्वीकाराय - अभिनववेदान्ति-कृतचोद्यपरिहारः ॥

२८८-३०८

६. अन्वयव्यतिरेकज्ञानमेवावाक्यार्थप्रतिपत्तिकारणम्

(श्लोकाः २८-३२)

अन्वयव्यतिरेकाभिज्ञस्यैवावाक्यार्थज्ञानम् - बुद्ध्यादेरात्मत्वा-नात्मत्वयोरविद्याकृतत्वम् - पदार्थज्ञस्यैव वाक्यादवाक्यार्थप्रतिपत्तिः - पदस्य विशेषार्थसमर्पकत्वम् ॥ ३०८-३१३

७. वाक्यादेव साक्षादज्ञाननिवृत्तिः

(श्लोकौ ३३-३४)

वाक्यादेवाज्ञानहानम्, न त्वन्वयव्यतिरेकमात्रात् - केवलानु-मानाश्रयणे नैरात्म्यवाद एव ॥ ३१४-३१५

८. वाक्यप्रामाण्यम्

(श्लोकाः ३५-३८)

वाक्ये अप्रामाण्यशङ्का नास्ति - वाक्यस्य नानुवादकत्वं विपरीतबोधकत्वं वा - नापि संशयितप्रतिपादकत्वम् - नतराम् अबोधकत्वम् ॥ ३१५-३१९

९. श्रुत्यनुगृहीतोऽन्वयव्यतिरेकन्यायः

(श्लोकाः ३९-४३)

श्रुत्यनुगृहीतान्वयव्यतिरेकन्यायस्य उदाहरणानि - स्वरूपविलये-नैव अहंवृत्तेः वाक्यार्थावगमः ।। ३१९-३२४

१०. कृतान्वयव्यतिरेकस्य न वाक्यार्थे विरोधप्रतीतिः

(श्लोकाः ४४-४६)

गृहीताहंपदार्थस्य न विरोधप्रतीतिः - वाक्यात् हेयोपादेय-विलक्षणस्य आत्मनो ज्ञानम् ।। ३२४-३२८

११. अभिधाश्रुतेरपि प्रामाण्यम्

(श्लोकाः ४७-५३)

अभिधाश्रुतेः अप्रामाण्यशङ्का, तत्परिहारश्च - आत्मनः प्रत्यक्षाद्यविषयत्वे हेतवः - आत्मनोऽप्रमेयत्वे श्रुतिप्रमाणम् - लिङ्गाभावात् आत्मा नानुमेयः - प्रमाणैरात्मान्वेषणं विफलम् - श्रुतिवाक्यैकगम्य आत्मा ।। ३२७-३३४

१२. अन्वयव्यतिरेकन्यायसंक्षेपः

(श्लोकाः ५४-५६)

द्रष्टृदृश्यविभागन्यायसारः - आगमापायिसाक्षिविभागन्याय-सारः - प्रकरणार्थसंक्षेपः ।। ३३४-३३७

१३. आत्मा वाक्यैकगम्यः

(श्लोकौ ५७-५८)

अनुमानेन न साक्षात्प्रतिपत्तिरात्मनः - सुषुप्ते निर्विशेषवस्तुज्ञानं

नास्ति - अन्तःकरणाभावात् सुषुप्तौ अज्ञानानभिव्यक्तिः - सुषुप्तौ अभ्युपगताज्ञानं ज्ञानाभावलक्षणमेव ।। ३३७-३४५

१४. अहंज्ञात्रोर्विवेके आक्षेपसमाधाने

(श्लोकाः ५९-६२)

अहंज्ञात्रोः एकत्र प्रतीतिः नायुक्ता - इदंज्ञानं ज्ञातुः, ममज्ञानं तु अहमः - एकत्रैव अज्ञानोपाधिकेन इदंज्ञानम्; अहङ्कारेण तु ममज्ञानम् - इदंममविवेकः - व्यतिरेकप्रदर्शनम् - अत्रैकदेशीय-व्याख्यानम् ।। ३४५-३५२

१५. श्रुत्यनुगृहीतान्वयव्यतिरेकोपसंहारः

(श्लोकः ६३)

अन्वयव्यतिरेकस्य इयत्तादर्शनम् ।। ३५३

१६. वाक्यादेव तमोहानिः

(श्लोकाः ६४-७२)

वाक्यार्थश्रावणे अधिकारी - वाक्यार्थकृत्ये दृष्टान्तः - दार्ष्टान्तिकेन समन्वयः - अविद्याया विचारासहिष्णुत्वम् - प्रत्यग्दृष्ट्या अविद्या नास्त्येव - वाक्यादेव अज्ञाननाशः स्यात् - दशमवाक्यवदेव वाक्यस्य प्रतिपादकत्वम् - वाक्यज्ञानस्याबाध्यत्वमपि दशमवाक्य-ज्ञानवदेव - वाक्यज्ञानं कारकग्राममुपमृद्यैव जायते - आत्मनः प्रत्यक्ता स्वतः, बुद्धेस्तु तद्दीप्तत्वात् - बुद्ध्यादिषूत्तरोत्तरम् आत्मभावः क्षीयते ।। ३५३-३६३

१७. वाक्ये कर्तृत्वादेर्बाधार्थमनुवादः

(श्लोकाः ७३-८०)

जीवत्वमनूद्य तदसीति तद्बाधः - बाधार्थमनुवादे दृष्टान्तः -

तत्त्वमर्थयोः न विरोधः - तत्त्वंपदार्थकः केवल आत्मा - तदर्थे पारोक्ष्यम्, त्वमर्थे चाहमर्थो हेयः - पदार्थयोः न बाध्यबाधकभावः - विरोधार्थकस्य बाधनम् - विरुद्धार्थबाधे हेत्वन्तरम् ।। ३६३-३७३

१८. तत्त्वमस्यादिवाक्यैः प्रसङ्ख्यानं न विधीयते

(श्लोकाः ८१-९५)

प्रत्यक्षादिविरुद्धं चेद्वाक्यं उपासनार्थम् - वस्तुबोधकं वाक्यं न क्रियापरम् - प्रमाणानां प्रमाणान्तरविरोधो नास्ति - प्रमाणानां भिन्नविषयत्वमेव - अभिन्नविषययोस्तु एकतरः प्रमाणाभासः - न च संभूयकारित्वं प्रमाणानाम् - वस्तुतो नैवास्ति दुःखितादिरात्मनः - वास्तवं नैव प्रसंख्यानादिना बाध्यते - प्रत्यक्षविरुद्धं प्रसंख्यानं न प्रमाणम् - प्रसंख्यानं न ज्ञानफलम् - भावनाजं फलं न स्थास्नु - वाक्यप्रत्यक्षयोर्विरोधे वाक्यस्य प्राबल्यम् ।। ३७४-३९०

१९. प्रत्यक्षविरोधपरिहारः

(श्लोकाः ९६-१०३)

वाक्यविरुद्धत्वाभासे प्रत्यक्षं गौणमेव - अहंवृत्त्यैव आत्मा ज्ञेयः - अहंवृत्तिरपि गुणलेशेनैव - अहंवृत्तेरपि लक्षणत्वे हेतुः - युष्मद्वृत्त्या उच्यमाने दोषः - अहंवृत्तिरपि न मुख्यवृत्त्या - शब्दप्रवृत्ति-निमित्ताभावात् लक्षणाश्रयणम् ।। ३९०-३९६

२०. शब्दादात्मनि सम्यग्ज्ञानोत्पत्तिप्रकारः

(श्लोकाः १०४-११२)

कल्पितस्यापि लक्षणत्वसंभवः - अभिधानं असंबद्धमपि बोधयेत् - मिथ्योपायेनापि सत्यबोधनं भवति - अविद्याया अविद्या-सिद्धत्वादेव निवृत्त्युपपत्तिः ।। ३९६-४०३

२१. अविद्यायाः शास्त्रैकमानेन निवृत्तिः

(श्लोकाः ११३-१२२)

तत्त्वमस्यादिवाक्यस्य प्रामाण्यम् - अभावादपि नानुमानेन व्यावृत्तिः - आत्मबोधः श्रुत्यैव, नानुमानेन - अविद्या सम्भावना - स्थिते वाक्यप्रामाण्ये प्रमाणान्तरं न मृग्यम् - अवगतिवाक्ये अविश्वासो न कार्यः - ऐकात्म्यमेवात्रोपादित्सितोऽर्थः - वाक्यार्थज्ञाने सति कार्यं न विद्यते - प्रमाणं वाक्यम् अवबोधयत्येव ॥ ४०३-४११

२२. प्रसंख्यानाभ्युपगमे दोषः

(श्लोकाः १२३-१२६)

प्रसंख्यानवादे दोषः - विधेरभ्युपगमेपि श्रवणादावेव - वार्तिकप्रस्थाने निदिध्यासनस्वरूपम् - विध्यनभ्युपगमेऽपि पारमहंसी चर्या सिद्ध्यति ॥ ४११-४१७

चतुर्थोऽध्यायः

(प्रकरणार्थसंक्षेपः)

१. अध्यायसंबन्धः

(श्लोकौ १-२)

उत्तरग्रन्थसंबन्धः ॥ ४१८-४१९

२. वृत्तग्रन्थार्थः संक्षेपतः

(श्लोकाः ३-१७)

निर्णेतव्यो विषयः - देहादिषु संशये बीजम् - आत्मानात्मविवेके न्यायः - कृतपदार्थविवेकस्य मनःस्थितिः - वीक्षापन्नस्य आत्मा-

प्रतिपत्तौ हेतुः - विवेकबुद्धिर्बुद्धावेव - केवलानुमानेन नात्मैकत्वम् - अज्ञानाश्रय एवायं विवेकः - अत्र श्रुतिप्रमाणम् ।। ४१९-४२९

३. वाक्यस्यैवात्मैकत्वबोधकत्वम्

(श्लोकः १८)

अतीताध्यायार्थसंक्षेपोपसंहारः ।। ४२९-४३०

४. अभियुक्तवचनसंवादः

(श्लोकाः १९-३०)

भगवत्पादादिवचनोदाहरणे हेतुः - अविविक्तात्मतत्त्वस्यैव श्रोतृत्वम् इत्यत्र भगवत्पादसंमतिः - अन्वयव्यतिरेकविषयेऽपि भगवत्पादसंमतिः - कृतान्वयव्यतिरेकस्यैवैकत्वोपदेश इत्यत्रापि भगवत्पादसंमतिः - अन्वयव्यतिरेकोदाहरणान्तरम् उपदेशसाहस्रीतः - सर्वन्यायोपसंग्रहः - वीक्षापन्नस्योपदेश इत्यत्र भगवत्पादसंमतिः - श्रुत्यैव निःशेषाविद्यानिवृत्तिः ।। ४३०-४४२

५. श्रुत्यैव निःशेषाविद्यानिवृत्तिरित्यत्र वृद्धसंमतिः

(श्लोकाः ३८-४४)

समस्तस्यैवापि प्रपञ्चस्य आत्मस्वरूपत्वं ज्ञानिनः - अविद्या-निवृत्त्यैवाऽऽत्मबोध इत्यत्र गौडपादसंमतिः .- अविद्यानिवृत्तिविषये भगवत्पादसंमतिः - तमोऽज्ञानमिति न भावरूपमज्ञानम् - गौडपादभगवत्पादवाक्योदाहरणस्य उपसंहारः ।। ४४२-४४९

६. उभयविधज्ञानमप्यनात्मधर्म एव.

(श्लोकाः ४५-४७)

अज्ञानं नात्मधर्मः - अत्रैकदेशिनां मतं तन्निरासश्च - द्वैतसंबन्धः सर्वोऽपि चित्तस्यैव - तत्र सुषुप्तिर्दृष्टान्तः ।। ४४९-४५३

७. आत्मनः नित्याद्वैतत्वम्

(श्लोकः ४८)

अवस्थात्रयेऽपि अद्वितीय एवात्मा ।। ४५३-४५४

८. ज्ञानफलम्

(श्लोकाः ४९-५१)

ज्ञानिनो ममाहंमत्यभावः - ज्ञानाज्ञानावस्थयोर्वैलक्षण्यम् - विदुषो व्यवहारः ।। ४५४-४५६

९. प्रकरणार्थोपसंहारः

(श्लोकौ ५२-५३)

इदमेव ज्ञानमज्ञानबाधकम् - सर्वे विभागाः आत्मनि कल्पिताः ।। ४५६-४५८

१०. आत्मज्ञानी न प्रवृत्तिनिष्ठः, नापि निवृत्तिनिष्ठः

(श्लोकाः ५४-५९)

ज्ञानिनो न कार्यम् - बोधे ज्ञानं आत्मैकालम्बनम् - ज्ञाने सति न निवृत्तिरपि - ज्ञाने सति अज्ञानत्रयस्यापि नाशः - आत्मा ज्ञानाज्ञान-संस्पर्शरहितः - अज्ञानादिदाहात्र ज्ञानिना कृत्यम् ।। ४५८-४६२

११. व्यवहारदृष्ट्या निवृत्तिनिष्ठत्वं ज्ञानिनः

(श्लोकाः ६०-६४)

आत्मविदः बाधितानुवृत्त्या कर्तृत्वम् - अत्र मतान्तरं तद्दूषणं च - तस्य निवृत्तिस्तूपचारतः - अलेपकपक्षनिरासः ।। ४६२-४६८

१२. मुमुक्षोरपि न यथेष्टाचरणम्, किं पुनर्मुक्तस्य

(श्लोकाः ६५-६७)

अत्र भगवत्पादसम्मतिः - चित्ते रागश्चेत् ज्ञानं न जातम् ।। ४६७-४६८

१३. ज्ञानिनो निवृत्तिधर्मोऽपि स्वभावत एव

(श्लोकौ ६८-६९)

बहिर्मुखचेतसो ज्ञानं नोत्पद्यते - निवृत्तिधर्मो ज्ञानिनोऽयत्नतो भवति ।। ४६८-४७१

१४. ग्रन्थश्रवणाधिकारी

(श्लोकाः ७०-७३)

ग्रन्थेऽधिकारी - ग्रन्थेऽनधिकारी - निष्कामाः संन्यासिन एव जानीयुः ।। ४७१-४७३

१५. ग्रन्थोपसंहारः

(श्लोकाः ७४-७६)

गुरोः प्राप्तमेवात्र निबद्धम् ।। ४७३-४७४

१६. गुरुनमस्क्रिया

(श्लोकः ७७) ४७४-४७५

१७. संबन्धोक्त्युपसंहारः

(श्लोकः ७८) ४७५-४७६

अनुबन्धाः ४७७-५३७

सङ्केताक्षरविवरणम्

अत्रोपनिषदां तत्तदाद्याक्षरेण तद्भाष्यस्य च भा. इति सङ्केतेन सङ्केतः कृतः । वाणीविलाससंस्कृतपुस्तकालयतः प्रकाशितपुस्तकस्थाः पत्रपार्श्वसंख्याः । गीताभाष्यस्यापि (गी.भा.) पत्रपार्श्वसंख्याः यथोक्तसंस्थाप्रकाशितपुस्तकस्था एव । सूत्रभाष्यं तु निर्णयसागरमुद्रणालयप्रकाशितम् । अवशिष्टानां तु सङ्केतानां विवरणमत्र दीयते ॥

सङ्केतः	विवरणम्
उप., उप सा.	उपदेशसाहस्री (मैसूरु 'ओरियंटल् लैब्ररी' प्रकाशिता)
गौ.का.	गौडपादाचार्यविरचिताः माण्डूक्यकारिकाः
गौ.सू.	गौतमधर्मसूत्रम्
जै.	जैमिनीयसूत्रम्
तै.	तैत्तिरीयोपनिषत्
तै.आ.	तैत्तिरीयारण्यकम्
तै.बा.	तैत्तिरीयब्राह्मणम्
तै.वा.	तैत्तिरीयवार्तिकम्
तं.वा.	तन्त्रवार्तिकम्
न्या.सू.	न्यायसूत्रम्
न्या.भा.वा.	न्यायभाष्यवार्तिकम्
पं.वि.	पञ्चपादिकाविवरणम्
परा.उप.	पराशरोपपुराणम्
बृ.वा.	बृहदारण्यकवार्तिकम्
ब्र.सि.	ब्रह्मसिद्धिः
मनु.	मनुसंहिता
वा.भा.	वाचस्पतिमिश्रविरचिता भामती
शा.भा.	शाबरं भाष्यम्
श्लो.वा.	श्लोकवार्तिकम्
सं.वा.	संबन्धवार्तिकम्

॥ॐ॥

नैष्कर्म्यसिद्धिः

(क्लेशापहारिणीसहिता)

१. सम्बन्धोक्तौ ग्रन्थावतारिका

आब्रह्मस्तम्बपर्यन्तैः सर्वप्राणिभिः सर्वप्रकारस्यापि दुःखस्य स्वरसत एव जिहासितत्वात्, तन्निवृत्त्यर्था प्रवृत्तिरस्ति स्वरसत एव । दुःखस्य च देहोपादानैकहेतुत्वात् । देहस्य च पूर्वोपचितधर्माधर्ममूलत्वात्, अनुच्छित्तिः । तयोश्च विहित-प्रतिषिद्धकर्ममूलत्वादनिवृत्तिः । कर्मणश्च रागद्वेषास्पदत्वात्, रागद्वेषयोश्च शोभनाशोभनाध्यासनिबन्धनत्वात्, अध्यासस्य चाविचारितसिद्धद्वैतवस्तुनिमित्तत्वात्, द्वैतस्य च शुक्तिका-रजतादिवत् सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोध-मात्रोपादानत्वात्, अव्यावृत्तिः । अतः सर्वानर्थहेतुरात्मानवबोध एव । सुखस्य चानागमापायिनोऽपरतन्त्रस्य आत्मस्वभावत्वात् तस्यानवबोधः पिधानम् । अतस्तस्यात्यन्तोच्छित्तौ

अशेषपुरुषार्थपरिसमाप्तिः । अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूप-लाभमात्रहेतुत्वात् तदुपादानम् । अशेषानर्थहेत्वात्मानवबोध-विषयस्य चानागमिकप्रत्यक्षादिलौकिकप्रमाणाविषयत्वात्, वेदान्तागमवाक्यादेव सम्यग्ज्ञानम् । अतोऽशेषवेदान्तसारसंग्रह-प्रकरणमिदमारभ्यते ।।

क्लेशापहारिणी

तमौपनिषदात्मानं पुरुषं सर्वसाक्षिणम् ।
नैष्कर्म्यसिद्धये नित्यं नौमि शङ्कररूपिणम् ।।१।।

नैष्कर्म्यसिद्धिं परमां दयालु-
व्याख्यत् पुरा पार्थहिताय योऽसौ ।
तं वासुदेवं विनिवेश्य चित्ते
नैष्कर्म्यसिद्धेर्विवृतौ यतिष्ये ।।२।।

श्रुतिशङ्करवाङ्मात्रादमृतत्वप्रदायकः ।
सुरेश्वरोऽनुगृण्हातु ज्ञानं नैष्कर्म्यसिद्धिगम् ।।३।।

नैष्कर्म्यसिद्धिं सुसुखं वशीकर्तुं यदीच्छथ ।
क्लेशापहारिणीं व्याख्यां भजतैकां समादरात् ।।४।।

प्रकृतव्याख्यानस्य संबन्धप्रयोजने -

इह खलु भगवान् श्रीसुरेश्वराचार्यः सकलमुमुक्षुजनप्रेप्सितं परमं निःश्रेयसं सर्वकर्मसंन्यासपूर्वकात् वेदान्तवाक्यश्रवणजन्यात्मज्ञान-निष्ठारूपाद् धर्मात् सिध्यति न साधनान्तरात् इतीमं श्रीशङ्कर-भगवत्पादसंमतं वेदान्तसिद्धान्तं संग्रहेणाऽऽविश्चिकीर्षुः अन्वर्थाभि-धानं **नैष्कर्म्यसिद्धिं** नाम प्रकरणं श्लोकसंदर्भरूपम् उपनिबबन्ध ।

तच्च प्रसन्नगम्भीरं मन्दमतीनां दुष्प्रवेशं मा भूदिति व्याख्यातॄणां स्वाभिप्रायग्रहणसामर्थ्याधायिनीं संबन्धोक्तिमपि दुर्व्याख्यानावकाश-निवारिणीं स्वयमेव चोदाजहार[1] । तथापीदं ग्रन्थरत्नं कालेन विविधविरुद्धप्रक्रियासंभिन्नव्याख्यानाकुलितचित्तानां जिज्ञासूनां दुरूह-तत्त्वमेव संवृत्तम् इत्यतोऽहं ग्रन्थकर्तृविरचितवार्तिकोपजीवी पाठ-कानां सर्वक्लेशापहारिणीम् इमां व्याख्यां विशुद्धवेदान्तप्रक्रिया-प्रकाशिनीं प्रस्तौमि ।।

संबन्धोक्त्यवतरणिका -

तत्र 'खानिलाग्न्यब्धरित्र्यन्तम्' इत्यादिर्नैष्कर्म्यसिद्धेर्मङ्गल-श्लोकः । तत्सहितस्यास्य प्रकरणस्य अवतारिकां करोति **संबन्धोक्तौ** ग्रन्थकृत् **'आब्रह्मस्तम्बपर्यन्तैः'** इत्यादिना **'प्रकरणमिदमारभ्यते'** इत्यन्तेन ।।

प्रकरणस्यारम्भणीयत्वे शङ्का -

अत्राहुः केचित् । नारम्भणीयमिदं प्रकरणम् । विषयाद्यनुबन्धा-भावात्, तथा हि - न तावदस्यासाधारणो विषयोऽस्ति । न चात्मज्ञानमेव सोऽस्त्विति वाच्यम् । आत्मनः सुप्रसिद्धत्वात् तत्र जिज्ञासानुपपत्तेः । न हि प्रसिद्धमपि जिज्ञासन्ते प्रेक्षावन्तः । आत्मा च अत्यन्तं प्रसिद्धः ; जिज्ञासोः स्वरूपत्वात् । अत एव तज्ज्ञानमपि सुप्रसिद्धमिति सुतरामजिज्ञास्यम् । तदेवं नास्त्यस्य प्रकरण-स्यासाधारणो विषयो यदधिगमनार्थं प्रकरणमारभ्येत । अभ्युपगम्यापि विषयं न प्रयोजनमस्य प्रकरणस्य संभावयामः । ननु निःश्रेयसप्राप्तिः प्रयोजनं भविष्यति ; तत्साधनभूतस्य ज्ञानस्यात्र निरूपणात् । न ।

---

1. 'संबन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता । नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातासौ भवेद् ध्रुवम् ।।' इति समाप्तिश्लोकोऽत्रानुसंधेयः ।।

तस्याः साधनान्तरायत्तत्वात् । वेदविहितकर्मोपासनादिसाधनायत्ता हि निःश्रेयसप्राप्तिः, न तु सा नित्यसिद्धात्मज्ञानादेव केवलात् सेद्धुमर्हति । अत एवास्य ग्रन्थस्य प्रकरणत्वमपि नोपपद्यते । शास्त्रसंबद्धं हि प्रकरणं नाम । प्रवृत्तिनिवृत्तिप्रयोजनं च शास्त्रम् । तत्र नात्मज्ञानं शास्त्रार्थः; तद्धि न प्रवर्तकम्, नापि निवर्तकम् । तस्माच्छास्त्रेणासंबद्धत्वान्नेदं प्रकरणम् । तस्मान्नारम्भणीयमिति ॥

शङ्कापरिहारः संक्षेपतः -

तामिमां विषयप्रयोजनाद्यभावशङ्कां वेदान्तशास्त्रविषय-प्रयोजनकथनद्वारेणैव परिहरिष्यन्नाह - **आब्रह्मस्तम्बपर्यन्तैरित्यादि** । इदमत्राकूतम् । न तावद्विषयादिरहितं प्रकरणम् । असाधारणविषय-प्रयोजनवद्वेदान्तशास्त्रैकदेशसंबद्धत्वादेव अस्यापि तद्वत्त्वोपपत्तेः । वेदान्तशास्त्रस्य च सकलदुःखनिवृत्तिपूर्वकात्यन्तिकसुखप्राप्तिरूप-निःश्रेयसप्रयोजनवदात्मज्ञानाभिव्यञ्जकत्वेन पारम्पर्येण तद्वत्त्वसिद्धेः । यत्तूक्तम् - 'आत्मनः सर्वस्य स्वरूपत्वेन सुप्रसिद्धत्वात्, अजिज्ञास्यत्वे सति तज्ज्ञानस्य सुतरामजिज्ञास्यत्वम्' इति । तदसत् । आत्मनः स्वरूपत्वेन ज्ञातत्वेऽपि अद्वितीयपरमात्मत्वेनाज्ञातत्वात् जिज्ञास्य-त्वोपपत्तेः । तादृशात्मज्ञानस्वरूपे च वेदान्तवाक्यैकजन्यत्वोपासना-रूपत्वप्रसङ्ख्यानजन्यानुभवरूपत्वादिप्रकारविशेषं प्रति वादिविप्रति-पत्तिदर्शनात्, तस्यापि जिज्ञास्यत्वोपपत्तेः । **न च दुःखात्यन्त-निवृत्यात्यन्तिकसुखप्राप्तीत्येतदुभयलक्षणस्य शास्त्रप्रयोजनभूतस्य निःश्रेयसस्य तत्प्राप्तेर्वा ज्ञानातिरिक्तसाधनायत्तत्वम् । साधनायत्तस्य** कृतकत्वादनित्यत्वे निःश्रेयसस्वरूपस्यैवासिद्धिप्रसङ्गात् । **तदेवं** तावत् आत्मनः, तज्ज्ञानस्य च, **जिज्ञास्यत्वे सिद्धे शास्त्रस्य** सविषयत्वं सप्रयोजनत्वं च सिद्धम् । अत एव प्रकृतग्रन्थस्य शास्त्रैकदेशभूतज्ञानप्रतिपादनसंबद्धत्वात् प्रकरणत्वम् विषयाद्यनु-

बन्धवत्त्वं च निष्प्रत्यूहं सिद्धम् इत्यारम्भणीयमेवेदं प्रकरणमिति । तदेतत् सर्वं मनसि निधाय प्रकरणस्य विषयप्रयोजनादिमत्त्वं मङ्गलश्लोकेनैव संसूचितं मूले । तदेव च संबन्धग्रन्थे स्फुटयितुमाह - **'आब्रह्मस्तम्बपर्यन्तम्'** इत्यादिना **'प्रकरणमिदम् आरभ्यते'** इत्यन्तेन ।।

दुःखनिवृत्तौ स्वरसत एव प्रवृत्तिः प्राणिनाम् -

तत्र तावद्दुःखस्य ज्ञानैकनिवर्त्यत्वोपपादनाय तस्याज्ञानकृतत्व-प्रदर्शनार्थम् **'अतः सर्वानर्थहेतुरात्मानवबोध एव'** इत्यन्तो ग्रन्थः । तस्यायमर्थः । आब्रह्मस्तम्बपर्यन्तैः, आब्रह्म च ते स्तम्बपर्यन्ताश्च कमलासनमारभ्य स्थावरान्तं ये स्थिताः तैः सर्वैरपि प्राणिभिः, सर्वप्रकारस्यापि आध्यात्मिकाधिभौतिकाधिदैविकरूपभेदेनानुभूय-मानस्य सुखलवेन सुखबाहुल्येन वा मिश्रस्य दुःखस्य वार्त-मानिकस्यागामिनो वा, स्वरसत एव स्वेच्छयैव शास्त्राचार्याद्युपदेशं विनापि, जिहासितत्वात् हातुं निवारयितुं च इष्टत्वात्, तादृश-दुःखनिवृत्त्यर्था प्रवृत्तिरपि स्वरसत एव भवतीति सर्वेषां नः प्रत्यक्षमेतत् । तत्र यदुक्तं शङ्कावादिना प्रवृत्तिनिवृत्तिप्रयोजनं शास्त्रमिति, तदनेन प्रत्युक्तं भवति । प्रवृत्तिनिवृत्त्योः स्वरसत एव प्राणिषु प्राप्तत्वात् तत्र शास्त्रव्यापारस्यानपेक्षणात् । दुःखहेतुप्रहाणं तु स्वात्मविज्ञानादेवेति युज्यते तदर्थं शास्त्रव्यापारस्यापेक्षणम् । तथा च सिद्धमात्मज्ञानोत्पत्तिद्वारा दुःखनिवृत्तिरूपं प्रयोजनं प्रकरणस्येति - इति भावः ।।

दुःखनिमित्तं धर्माधर्महेतुकं जन्म -

ननु भवतु दुःखप्रहाणाय स्वरसत एव सर्वप्राणिनां प्रवृत्तिरिति । नैतावता आत्मज्ञानस्यैव तत्रापेक्षा भवति । दृष्टेनैवोपायेन केनचिद्दुःख-

प्रहाणोपपत्तेः । तत्राह - **दुःखस्य च देहोपादानैकहेतुत्वात्** इति । देहोपादानं देहग्रहणं जन्मशब्दवाच्यम् ; तदेकहेतुत्वात् । सति देहे तत्प्रहाणानुपपत्तिरिति भावः । यद्यपि दृष्टैरप्युपायैर्दुःखस्य निवृत्तिर्भवति तथापि सति देहे तस्यात्यन्तिकी निवृत्तिर्न संभवति । क्षुधादिनिमित्तदुःखस्य भोजनादिना निवृत्तावपि पुनरनुवृत्तिदर्शनात् । आत्यान्तिकनिवृत्तिस्त्वत्र प्रयोजनत्वेन विवक्षिता इति भावः । ननु भवतु देहानुवृत्तिपर्यन्ता दुःखानुवृत्तिः । देहोच्छित्तेरनन्तरं तु स्यादेव तन्निवृत्तिः । तत्राह - **'देहस्य च पूर्वोपचितधर्माधर्ममूलत्वात्, अनुच्छित्तिः'** इति । नैतत् संभवि देहोच्छित्तेरूर्ध्वं दुःखनिवृत्तिः स्यादिति । कुतः ? देहसामान्यस्य पूर्वोपचितधर्माधर्ममूलत्वात् । एतद्देहस्य हि पूर्वं जन्मान्तरेषु उपचितयोः राशीकृतयोः धर्माधर्मयोः पुण्यापुण्ययोः एकदेश एव मूलम् । अतो यावत् सञ्चितपुण्यपापयोः शेषः, तावत् तत्तत्फलभोगहेतोर्देहोपादानम् अशक्यनिवारणम् । न च देहोपादाने सति धर्माधर्मोपचयो न भवति । तथा चैतद्देहपातेऽपि देहान्तरोपादानस्यावश्यम्भावात्, न सर्वथा देहस्योच्छित्तिः, देहमात्रस्य नाशो भविता । ततश्च तत्तद्देहोपादानहेतुकस्य दुःखस्याप्यनुच्छित्तिरेव । यद्यपि कदाचित् किञ्चिद्दुःखं सत्यपि देहे निवर्तते, तथापि नैव सर्वथा सर्वदुःखानां निवृत्तिः सति धर्माधर्ममूले देहसन्ताने संभवति । देहो हि सुखदुःखभोगायतनम् इति भावः ॥

धर्माधर्मयोश्च कर्महेतुकत्वम् -

अथ मतं धर्माधर्मयोरेव निवृत्त्या देहोपादानं न भविष्यति, तथा च दुःखमपि निवर्तत इति । एतदपि न शक्यमित्याह - **'तयोश्च विहितप्रतिषिद्धकर्ममूलत्वादनिवृत्तिः'** इति । अयमभिप्रायः । धर्माधर्मयोर्हि शास्त्रविहितप्रतिषिद्धकर्मणी मूलम् । विहितकर्मानुष्ठानाद्धर्मोपचयः, प्रतिषिद्धकर्मानुष्ठानाच्चाधर्मोपचयः इति

शास्त्रसिद्धमेतत् । प्राणिनस्तु सर्वे सर्वदा यत्किञ्चित्, विहितं प्रतिषिद्धं वा, कर्म कुर्वन्त एव वर्तन्त इति सति देहे धर्माधर्मोपचयं न शक्नुवन्ति सर्वथा वारयितुम् । धर्माधर्मौ च दुःखमूलम् । यद्यपि धर्मस्य इष्टप्राप्तिद्वारेण सुखकारणत्वात् तस्य दुःखमूलत्वोक्तिर्न घटत इव ; तथापि तत्फलस्य सुखस्याल्पत्वात् , अस्थिरत्वात्, बहुलायाससाध्यत्वात् , स्वभोगकालेऽपि सातिशयत्वात् , ईर्ष्यादि-जननद्वारा चित्तविक्षेपकरत्वात्, स्वक्षयिष्णुत्वचिन्तनेनोद्वेगजनकत्वात्, क्षयदर्शननिमित्तसन्तापोदर्कत्वाच्च तस्यापि दुःखत्वमेव परमार्थत इति धर्मोऽपि देहोपादानद्वारा दुःखमूलमित्युक्तम् इत्यदोषः । अत एव दुःखविचारं परिसमाप्य परमार्थसुखं हितमेव निरूपयिष्यतीत्यन्यदेतत् । तदेवं धर्माधर्ममूलकस्य देहान्तरोपादानस्य तद्धेतुकस्य दुःखस्य वा समुच्छेदो न शक्यप्रतिज्ञान इति स्थितम् ॥

कर्म तु अध्यासोत्थरागद्वेषनिमित्तकम् -

ननु तर्हि नैव वयं कर्म करिष्यामः । तथा च धर्मादिद्वारकं दुःखं सहेतुकं न भविष्यति । तत्र किमात्मज्ञानेनेति ? तदेतन्निरा-करोति **'कर्मणश्च रागद्वेषास्पदत्वात्'** इत्यादिना । अयमभिप्रायः । न कर्मणः सर्वथा परिवर्जनं संभवति । कुतः ? रागद्वेषास्पदत्वात् तस्य । रागद्वेषावेव हि समाश्रित्य 'इदं मे भूयात्' इति 'इदं मा भूत्' इति वा तत्तदिष्टमाहर्तुम्, अनिष्टं परिहर्तुं वा प्रयतते कर्ता । तौ च रागद्वेषौ शोभनाशोभनाध्यासनिबन्धनौ । 'इदं सुन्दरम्, इदं न' इत्यतथास्वभाव एव वस्तुनि तथात्वमध्यस्य मिथ्याज्ञाने-नाध्यारोप्य खलु तस्मिन् रागं द्वेषं वा वहति जनः । तद्यावदी-दृशम् अध्यासाख्यं मिथ्याज्ञानं प्रवहति तावद्रागद्वेषाववश्यंभाविनौ । ततश्च कर्मणि प्रवृत्तिरिति न तद्व्यावृत्तिः संभवति । न च शोभनाशोभनमतिः सम्यग्ज्ञानमेवेति युक्तम् । अव्यभिचारिण्येव वस्तुनि

व्यभिचारित्वात् । एकस्मिन्नेव हि वस्तुन्यवस्थान्तरानापन्ने एकस्यैव पुरुषस्य कदाचित् शोभनमिति मतिर्भवति कदाचित्त्वशोभनमिति । तदेवं यावच्छोभनाशोभनाध्यासः, तावद्रागद्वेषसन्तानाव्यावृत्तिः, यावच्च रागद्वेषौ, तावत्तदास्पदस्य कर्मणो न व्यावृत्तिः । ततश्च ध्रुवं धर्माधर्मोपचयो, देहोपादानम्, दुःखोदयश्चेति न दुःखोच्छित्तिः कथमपि संभावनीया इति स्थितम् ॥

मिथ्याज्ञानं त्वात्मानवबोधमात्रनिबन्धनम् -

स्यादेतत् । यद्येवं दुःखस्य परम्परया मिथ्याज्ञानकृतत्वम्, तर्हि मिथ्याज्ञानेनैव परिहृतेन दुःखोच्छित्तिर्भविष्यति ; किमनेनाद्वैतात्मज्ञानेन ? तथा हि **न्यायविदां सूत्रम्** 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या. सू. १-१-२) इति । उत्तरमुत्तरं यदा अपैति, तदा तत्तदनन्तरपूर्वमपैति ; एवं च मिथ्याज्ञाननिवृत्तिरेव परम्परया दुःखव्यावृत्त्युपायः इति सूत्रार्थः । अत्रोच्यते **'अध्यासस्य ह्यविचारितसिद्धद्वैतवस्तुनिमित्तत्वात्, द्वैतस्य च शुक्तिकारजतादिवत् सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वात् अव्यावृत्तिः'** इति । शोभनाशोभनाध्यासरूपमिथ्याज्ञानं हि द्वैतवस्तुनिमित्तम् । यावद्धि द्वैतं वस्तु सदिव प्रतीयते तावदेतन्मिथ्याज्ञानं नैवापैति । तच्च द्वैतं न वस्तुसत् परमार्थतः, किं तर्हि केवलम् अविचारितसिद्धम् । 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ. ४-५-१५) इत्यादिश्रुतेः । अविचारितसिद्धत्वे दृष्टान्तः **'शुक्तिकारजतादिवत्'** इति । यदा हि विचारतः 'इयं शुक्तिकैव' इति निश्चिता बुद्धिर्जायते तदा नैव रजतावभासो भवति । यदा पुनर्विचारमकृत्वैव मतिनयनदोषादिवशात् 'रजतम्' इति निश्चिनोति तदैव तद्रजतमवभासत इत्यविचारितसिद्धं शुक्तिकारजतम् । एवं रज्जुसर्पादिकमपि ज्ञेयम् । तदेवम् अविचारित-

सिद्धस्य द्वैतस्य सर्वस्यापि शुक्तिकारजतादिवत् स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वम् । तन्मात्रनिमित्तप्रतीतिमत्त्वम् इति यावत् । यदा खलु 'आत्मैवेदं सर्वम्' इति निश्चितोऽवबोधो जायते तदैवेदं द्वैतं शुक्तिकारजतादिवत् सर्वात्मना व्यावर्तते । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिश्रुतेः । एतच्चाग्रे स्फुटीकरिष्यते । तदेवम् आत्मानवबोधस्य द्वैतवस्तुप्रतीति-शोभनाशोभनाध्यास-रागद्वेष-विहितप्रतिषिद्धकर्मानुष्ठान-धर्माधर्मोपचय-देहोपादानपरम्परया दुःखसन्तानहेतुत्वात्, तस्मिन् सति दुःखस्योपायान्तरेण नात्यन्तिकी उच्छित्तिः संभवतीत्युपसंहरति **'अतः सर्वानर्थहेतुरात्मानवबोध एव'** इति ।।

आत्मानवबोधस्य दुःस्थितत्वम् -

अत्राद्वितीयात्मनः स्वतःसिद्धत्वविशेषणेन आत्मानवबोधस्यात्यन्तदुःस्थितत्वं ज्ञापितं भवति । न हि प्रमाणादिसर्वव्यवहाराश्रयत्वेन तद्व्यवहारात् प्रागेव स्वयंसिद्धस्य सर्वसाक्षिण आत्मनः साक्ष्यभूत-प्रमाणव्यापारनिरस्यमानानवबोधाश्रयत्वं तद्विषयत्वं वा संभावयितुमपि शक्यम् । उद्घोषयति चोदर्के दुःस्थितत्वम् ग्रन्थशरीरे एव कण्ठरवेण ग्रन्थकृत् **'अतिदुःस्थोऽप्रबोधोऽत्र'** (३-११०) इति । इत्थं चानवबोधस्य अत्यन्तदुःस्थितस्य निर्दुःखात्मबोधकवाक्यजन्य-ज्ञानमात्रान्निवृत्तिरप्युपपद्यत इति ग्रन्थप्रतिपाद्यप्रधानविषयस्य बीजावापोऽयमिति ध्येयम् ।।

दुःखापरिहारवत् सुखानवाप्तिरप्यनवबोधकृतैव -

नन्वस्त्वेवं दुःखहेतुरात्मानवबोध एवेति । तथा च भवतु नामात्मानवबोधनिवृत्तिरेव दुःखहानोपाय इति । सुखस्य तु प्राप्तौ साधनान्तरमेव मृग्यं भवति । सुखस्य हि प्राप्तिरिदानीमप्राप्तस्य । सा

कथमज्ञाननिवृत्तिमात्राद् भवेत् ? किञ्च, सकलविधविभागानर्ह आत्मेष्यते भवता । अद्वैतत्वात् । न च तत्र प्राप्तृप्राप्तव्यविभागस्य कथमप्यवकाशं पश्यामः । तत्राह - **'सुखस्य चानागमापायिनोऽ-परतन्त्रस्य आत्मस्वभावत्वात् तस्य अनवबोधः पिधानम्'** इति । अयमाशयः । सत्यं सुखप्राप्तिर्व्यवहारे प्राप्तृप्राप्तव्यविभागमपेक्षत इति । परमार्थतस्तु न तत्सुखम् । आगमापायित्वात् परतन्त्रत्वाच्च । विषयेन्द्रियसंयोगलक्षणभोगजनितं पुरुषानुकूलतया विभावितं हि सुखमिति व्यपदिश्यते लोके । तत् कथं विषयेन्द्रियपरतन्त्रं सुखं भवेत् ? आत्मवशं हि सुखं नाम । किं च मनसो विषयाकारापत्तिरूपस्पन्दनं विना नैव वैषयिकं सुखं लभ्यते । तदेतदायासलभ्यं सत् कथं नाम सुखं भवेत् ? किं चेदं लौकिकं सुखं व्यभिचरद्रूपम् । कथम् ? आगमापायित्वात् । विषयेन्द्रिय-मनःसंयोगादागच्छति लब्धोदयो भवति, तदन्यतमवियोगाच्चापैति अस्तमेतीत्यागमापायस्वभावं लौकिकं सुखम् । अनित्यम् इत्यर्थः । उपलक्षणमेतत् । दुःखोदर्कं चेति द्रष्टव्यम् । उक्तं हि **भगवता** 'ये हि संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥' (गी. ५-२२) इति । अपि च यदेवैकस्य पुरुषस्य सुखमिति भाति, तदेवापरेण पुरुषेण दुःखमिति विभाव्यते ; एकस्यापि कालपर्यायेण तद्दुःखमिति भातीति प्रसिद्धमेतत् । तदेवम् आगमापायित्वपरतन्त्रत्वादिभ्यो हेतुभ्यो लौकिकं सुखं दुःखमेव सत् सुखमिति विपर्यस्यति जनः - इत्येतन्मनसि निधाय तद्विपरीतं परमार्थसुखं निर्दिशन् आह **'सुखस्य चानागमापायिनोऽपरतन्त्र-स्यात्मस्वभावत्वात्'** इति । 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८-७), 'आत्मानन्दः स स्वराड् भवति' (छां. ७-२५-२) इत्यादिश्रुतिभ्य इति भावः । नन्वात्मस्वभाव एव चेत् प्राप्तमेव तदिति व्यर्थ एव

तत्प्राप्तौ प्रयत्नः । तत्राह- **'तस्याऽऽत्मानवबोधः पिधानम्'** इति । सत्यं नित्यप्राप्तमेव सुखम्, आत्मस्वभावत्वात् । तथापि तु तदनवबोधमात्रेण पिहितमिव सन्न प्रकाशते प्राग् वेदान्तवाक्य-जन्यज्ञानोत्पत्तेः । अतस्तज्ज्ञानार्थं यत्नः कार्य एवेति न प्रयत्नवैयर्थ्यमित्यभिप्रायः ॥

अज्ञानोच्छित्तिरेव परमपुरुषार्थः -

तदेवम् अभिलषितार्थस्य साधितत्वात् प्रकृतमुपसंहरति **'अतः'** इत्यादिना **'परिसमाप्तिः'** इत्यन्तेन । अतः दुःखोपस्थितेः सुखाप्राप्तेश्च आत्मानवबोधमात्रनिमित्तत्वात्, तस्य अनवबोधस्य अत्यन्तं पुनरावृत्तिराहित्यं यथा तथा उच्छित्तौ नाशे सति अशेष-पुरुषार्थपरिसमाप्तिः । यद्यपि सुषुप्तिसमाध्यादौ न संभवत्यनव-बोधः ; तत्र बोधाबोधकार्यकारणसामग्र्यभावात् । तथापि न तत्र तदुच्छित्तिरत्यन्ताय भवति ; पुनरुत्थाने सत्यनुवृत्तिदर्शनात् । अत उक्तम् **'अत्यन्तोच्छित्तौ'** इति । तस्यां सत्याम् अशेषस्य पुरुषार्थस्य परिसमाप्तिः । एतावानेव खलु पुरुषार्थो नाम यद् हातव्यस्य दुःखस्य अत्यन्तं हानम्, प्राप्तव्यस्य च परमार्थसुखस्य प्राप्तिश्चेति । अतोऽनवबोधोच्छित्तौ सकलोऽपि पुरुषार्थः परितः सम्यक् आप्तो भवति । न पुनः कियानप्यंश आप्तव्योऽवशिष्यत इत्यभिप्रायः ॥

सम्यग्ज्ञानात्मलाभमात्रादेवाज्ञाननिवृत्तिः -

नन्वेवम् आत्मानवबोधोच्छित्तौ यत्नः कार्य इत्यापतति, किमायातम् आत्मज्ञानस्येति ? अत्राह - **'अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूपलाभमात्रहेतुत्वात् तदुपादानम् ।'** इति । अनवबोधो नाम अज्ञानम्, ज्ञानाभाव एव । अतः सम्यग्ज्ञानस्वरूप-लाभमात्रेण तन्निवर्तते । प्रतियोगिभावस्योत्पत्तिरेव हि अभावस्य

निवृत्तिः । अतो यदैव सम्यग्ज्ञानं स्वरूपं लभते, तदैव तदुत्पत्तिमात्रेण तदभावस्याज्ञानस्य निवृत्तिर्भवति । नात्र ज्ञानाभ्यासादिरूपं साधनान्तरम् अपेक्ष्यते । अत एव चात्र कर्मोपासनादिकमपि नोपयुज्यते । अविचारितसिद्धक्रियाकारकफलविभागरूपद्वैताश्रयत्वात् कर्मादेः । अतः परिहृत्यान्यत् साधनं तन्निवृत्तये सम्यग्ज्ञानोपादानमेव तत्सिद्ध्यर्थप्रयतनमेव स्वीकर्तव्यम् इत्यभिप्रायः ॥

आत्मानवबोधविषये एकदेशीयम् असङ्गतं व्याख्यानम् -

अत्र **केचित्**, द्वैतस्य आत्मानवबोधमात्रोपादानकत्वोक्त्या सुखस्यात्मानवबोधपिधानकत्वोक्त्या च मोहिताः, प्राहुः । न किलानवबोधस्य कस्यचिदुपादानत्वं पिधायकत्वं वा संभवति । अभावत्वात् । अतोऽग्रहणान्यथाग्रहणाभ्यामन्यदेव यत्किञ्चित् द्वैतस्योपादानम् आत्मस्वरूपसुखस्य च पिधानम् अभ्युपेयम् । तथाहि प्राचीनैः संप्रदायविद्भिराचार्यैर्मूलाविद्याशब्दवाच्यं द्वैतोपादानमात्मपिधानं चाङ्गीकृतम् - इति । तदेतदनाकलितग्रन्थकृदाशयानां स्वोत्प्रेक्षामात्रम् इत्युपेक्ष्यम् । यतोऽत्र न द्वैतस्योपादानकारणत्वेन विवक्षितम् अज्ञानम्, मृदादिवद् घटादेः । नाप्यात्मसुखस्य समाच्छादकत्वेन, नीहारादिकमिव वृक्षादेः । किं तर्हि, शुक्त्यादिसम्यग्ज्ञानाभावात् रजतादिप्रतीतिवदात्माज्ञानमात्राद् द्वैतप्रतीतिः, तन्मात्रादेव च स्वरूपभूतस्यापि सुखस्यानवगमः - इत्येतावदिहोक्तम् । तदेतत् परस्तात् (सं. ३-७) ग्रन्थमुखेनैव विशदीकरिष्यत इत्यलमिहातिप्रपञ्चेन ॥

सम्यग्ज्ञानं तु वेदान्तागमवाक्यादेव -

स्यादेतत् । भवतु सर्वमेवेदम् । तथापि किमर्थं वेदान्तप्रकरणारम्भः ? यद्यप्यज्ञानस्य निवृत्तिः सम्यग्ज्ञानोत्पत्तिमात्रादेव भवति, तथापि

तु तत् सम्यग्ज्ञानं प्रत्यक्षाद्यन्यतमेनैव केनचित् प्रमाणेन सिध्येत्, किमागमपर्यन्तानुधावनेन ? अथाप्यागमवाक्यादेव तादृशं ज्ञानम् इत्याग्रहः, तर्हि योग्याद्याप्तवाक्यरूपात् तद्भवतु, किं वेदान्तवाक्येनेति ? अत्रोच्यते **'अशेषानर्थहेत्वात्मानवबोधविषयस्य चानागमिक-प्रत्यक्षादिलौकिकप्रमाणाविषयत्वात्, वेदान्तागमवाक्यादेव सम्यग्ज्ञानम्'** इति । यद्विषयो हि योऽनवबोधः स तद्विषयकसम्यग्ज्ञानेनैव निवर्त्यः । अत्र च सर्वानर्थहेतुत्वेनोप-वर्णितोऽनवबोधः आत्मविषयकः । तस्मात् स तद्विषयकसम्यग्ज्ञानेनैव निवर्त्यः । तत्र न तावत् अनागमिकप्रत्यक्षादीनि लौकिकानि प्रमाणानि प्रभवन्ति प्रकृतमनवबोधं निवर्तयितुम् । तेषामात्म-विषयकत्वाभावात् । प्रत्यक्षानुमानोपमानार्थापत्त्यनुपलब्ध्याख्यानि प्रत्यक्षादीनि । तानि तावत् नात्मविषयाणि । अनागमिकत्वात् । न हि आगमवाक्यविलक्षणानां सविशेषपराक्प्रमेयमात्रप्रकाशकानां प्रत्यक्षादीनां निर्विशेषप्रत्यगात्मविषयत्वं संभवति । अत एव हि श्रुतिः 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुः' (का. २-१-१) इति, 'नैषा तर्केण मतिरापनेया' (का. १-२-९) इति च । न च योगिवाक्य-रूपादागमादपि प्रकृतानवबोधनिवर्तनपटीयस्सम्यग्ज्ञानं संभवेत् । योगिप्रत्यक्षस्यापि पराङ्मात्रविषयत्वेन स्वेतरलौकिकप्रमाणा-विशेषात् । यथोक्तं **बृहद्वार्तिके** 'नेतीत्यस्थूलमित्यादिवाक्याद्योऽ-र्थोऽवगम्यते । योगिप्रत्यक्षगम्योऽयं न तत् प्रत्यक्त्वहेतुतः ॥' (बृ. वा. २-४-१७१) इति । अशेषविशेषनिराकरणरूपाद् वेदान्तवाक्यादेव योऽर्थ आत्मरूपोऽवगम्यते, स न योगिप्रत्यक्षगम्यः । नित्य-प्रत्यक्स्वभावत्वात्, लौकिकप्रत्यक्षादिवदेव योगिप्रत्यक्षं प्रत्यप्यात्म-त्वात्, पराक्प्रवणस्य योगिप्रत्यक्षस्य स्वप्रत्यगात्मनि प्रवृत्त्यनुपपत्तेः - इति वार्तिकार्थः ॥

वाक्यजन्यज्ञानादन्यत् साक्षात्काररूपं ज्ञानं न ग्रन्थकृन्मतम् -

'आगमिकप्रत्यक्षम् आगमवाक्यजन्यं साक्षात्कारलक्षणम् ; तन्न भवतीत्यनागामिकप्रत्यक्षम्' इति **केचिद्** व्याचक्षते । तत्र वाक्यजन्यमेव ज्ञानं प्रत्यक्षम्, आत्मनः परोक्षतापादकस्यानवबोधस्य नितरां विनाशकत्वात् - इति यद्यभिप्रायः, तर्हि न कोऽपि दोषः । 'अनागमिकप्रत्यक्षादि' इत्यत्र प्रत्यक्षपदार्थस्य आदिपदार्थेनान्वयस्तु दुर्घटो भवति । यदि पुनः वाक्यजन्यज्ञानात् अर्थान्तरं साक्षात्कार-लक्षणम् आगमिकप्रत्यक्षं विवक्ष्यते, तर्हि तस्य ग्रन्थकृतैव अग्रे (१-६७ सं.) निराकरिष्यमाणत्वात् अनादरणीयमेव भवति व्याख्यानम् । अतः, अनागमिकानि यानि प्रत्यक्षादीनि प्रमाणानि तेषाम् अविषयत्वात् वेदान्तागमवाक्यादेव सम्यग्ज्ञानम् । वेदान्तेषु य आगमः 'तत्त्वमसि' (छां. ६-८-७), 'नेति नेति' (बृ. २-३-६), 'अस्थूलमनणु' (बृ. ३-८-८) - इत्यादिरूप उपदेशविशेषः, तस्मादेव भवेत् प्रकृताज्ञाननिवर्तकं सम्यग्ज्ञानम्, न प्रमाणान्तरात् तार्किक-संमतसर्वज्ञप्रणीतागमाद्वा - इत्यर्थोऽवसेयः । 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३-९-२६) इति श्रुतेः । 'वेदान्तागमवाक्यादेव' इत्येवकारेण प्रसंख्यानादिजन्यं ज्ञानमिति मतनिरासो विवक्षितः । 'वैदिकागमवाक्यादेव' इति वक्तव्ये वेदान्तग्रहणम् एतत् सूचयति यत् कर्मवाक्यमुपासनावाक्यं च वैदिकागमरूपं सदपि प्रकृताज्ञानाप-नोदकं ज्ञानं जनयितुं नालमिति । तत्र कारणं तु क्रियाकारक-फलविभागरूपाविद्यासिद्धद्वैताश्रयत्वमित्युक्तम् (पृ. १२) । एतच्च सर्वं ग्रन्थमध्य एव स्फुटीभविष्यतीत्यलमतिप्रपञ्चेन ॥

उपसंहारः -

तदेवं वेदान्तागमवाक्यजनितं विज्ञानम् आत्माज्ञानप्रहाण-मुखेनाशेषपुरुषार्थसमाप्तिकृदिति स्थितम् । अथात्र ग्रन्थे तदेवैतद्

वेदान्तवाक्यज्ञानं प्रतिपाद्यत इति ससम्बन्धाभिधेयप्रयोजनं प्रकरणमिदमारम्भणीयमेवेत्युपसंहरति **'अतोऽशेषवेदान्तसारसंग्रहप्रकरणमिदमारभ्यते'** इति । अतः वेदान्तवाक्यजन्यज्ञानादेव वर्णितविधया परमपुरुषार्थसिद्धेः, अशेषाणां वेदान्तानां यः सारः सर्वोपनिषत्प्रतिपाद्यात्मज्ञानं तस्य संग्रहः स्वरूपकार्यादिनिरूपणेन संक्षेपकथनम् यस्मिन् तदीदृशमिदं प्रकरणम् आरभ्यते । वेदान्तरूपशास्त्रस्य एकदेशेन आत्मवस्तुनिरूपणेन संबद्धत्वात्, तस्यैव च कार्यान्तरे संग्रहेण वाक्यज्ञानस्वरूपादिनिरूपणे स्थितत्वाच्च, अस्य ग्रन्थस्य प्रकरणत्वमप्युपपन्नम् इति भावः । तथा हि प्रकरणलक्षणविदो वदन्ति 'शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् । आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ।।' (परा. उप. १८-२१) इति ।।

अथ प्रथमोऽध्यायः

(नैष्कर्म्यज्ञानादेव मोक्षः)

२. मङ्गलाचरणपूर्वकं ग्रन्थारम्भप्रतिज्ञा

(मूलम्)

तत्राभिलषितार्थप्रचयाय प्रकरणार्थसंसूत्रणाय[1] चायमाद्यः श्लोकः -

खानिलाग्न्यब्धरित्र्यन्तं स्रक्फणीवोद्गतं यतः ।
ध्वान्तच्छिदे नमस्तस्मै हरये बुद्धिसाक्षिणे ॥१॥

स्वसंप्रदायस्य चोदितप्रमाणपूर्वकत्वज्ञापनाय विशिष्टगुण-संबन्धसंकीर्तनपूर्विका गुरोर्नमस्कारक्रिया -

अलब्ध्वातिशयं यस्माद् व्यावृत्तास्तमबादयः ।
गरीयसे नमस्तस्मा अविद्याग्रन्थिभेदिने ॥२॥

(क्लेशापहारिणी)

मङ्गलश्लोकगतसंबन्धोक्तिविवरणम् -

अथ मङ्गलपूर्वकं प्रकरणार्थं सूचयति सिद्धौ । तत्र मङ्गल-श्लोकसंबन्धोक्तिः - **'तत्राभिलषितार्थप्रचयाय प्रकरणार्थसंसूत्रणाय चायमाद्यः श्लोकः'** इति । तत्र प्रकरणेऽयम् आद्यः श्लोकः । स किमर्थः ? अभिलषितार्थप्रचयाय इष्टार्थस्य प्रसिद्धये । इष्टोऽर्थः

---

1. 'संसूचनाय' पा. ॥

प्रकरणस्य निर्विघ्नं परिसमाप्तिः, शिष्यपरम्परया अधिकारिषु नियोगश्च । तत्सिद्ध्यर्थम् इत्यर्थः । यद्यपि ग्रन्थाद् बहिरपि कृतात् परमेश्वरनमस्कारात् एतत् सिध्यति, तथापि शिष्टाचारपरिपालनं कर्तव्यमिति शिष्यजनशिक्षार्थं ग्रन्थनिबन्धनद्वारेण मङ्गलमाविष्कृतम् । तदपि शिष्यशिक्षणं स्वाभिलषितार्थान्तर्गतमेवेति हृदयम् । ननु गणेशादिस्तुत्याप्यभिलषितार्थप्रचयः सिध्यति । तत्र किं विशिष्टदेवतानमस्कारेण ? उच्यते । न केवलमभिलषितार्थप्रचयाय, अपि तु प्रकरणार्थसंसूत्रणाय चायमाद्यः श्लोकः । प्रकरणप्रतिपाद्योऽर्थः सम्यक्सूचितो ह्यस्मिन् श्लोके । य एव हि वेदान्तानामर्थः प्रत्यगात्माभिन्नपरदेवताज्ञानम्, तेन च सर्वानर्थहेतोरज्ञानस्य समुच्छित्तिः, स एवात्र प्रकरणे संग्रहेण प्रतिपाद्यत इत्युक्तम् । तत्संसूत्रणाय चात्र विशिष्टा परा देवता नमस्क्रियते । आद्यश्चायं श्लोकः प्रकरणस्य । आदावेव संबन्धविषयप्रयोजनानां संसूत्रणे हि प्रेक्षावतां प्रकरणे आदरेण प्रवृत्तिर्भवेदिति ॥

मङ्गलश्लोकाभिप्रायः -

खानिलाग्न्यब्धरित्र्यन्तमिति ॥ अयमत्र श्लोके संसूत्रितोऽर्थः । आहरति, आनयति स्वमायया स्वस्मादनन्यदेव सदपि तत्त्वान्यत्वाभ्यामनिर्वचनीयेन रूपेण सर्वमिदं जगत् अविद्यातिमिरार्तानां विमूढानां दृष्ट्या इति, उपसंहरति च स्वस्मिन्नेव, जलशोषणेन सूर्यकमिव सूर्यः सर्वं संसारप्रपञ्चं प्रणतानामविद्याविनाशनेनेति हरिः, परमेश्वरः । तस्मादेव हि हरेः सर्वमिदं खानिलाग्न्यब्धरित्र्यन्तं जगत् उद्गतम्, तस्मिन्नेव चोपसंह्रियते । 'यतो वा' (तै. ३-१) इत्यादिश्रुतिप्रामाण्यात् । 'खानिलाग्न्यब्धरित्र्यन्तम्' इति तु आकाशादिभूम्यन्तम् इति लुप्तादिपदकत्वेन व्याख्येयम् । 'हिरण्यगर्भमारभ्य'[1] पञ्चभूतान्तं

1. द्रष्टव्यं तैत्तिरीयवार्तिकम्, अस्मदीयमानन्दवल्लीभाष्यव्याख्यानं चात्र विषये ॥

जगत्,' इत्यध्याहारेण वा । सर्वथापि पञ्चभूतोपलक्षितं जगत् यतः श्रीहरेरुद्गतं उद्भूतं तिष्ठति तस्मै हरये नमः इत्यभिप्रायः । किं परमार्थत एवोद्गतम् ? न । कथं तर्हि । स्रक्फणीव । यथा स्रजः मालायाः अनिश्चितस्वरूपायाः सकाशात् तदज्ञानादेव केवलं मालासर्पस्ततः समुद्भूत इव तत्र तिष्ठन्निव च भाति । एवमात्माज्ञानादेव केवलं पञ्चभूतात्मकं जगत् तस्माद् हरेरुद्गतमिव तस्मिंस्थितमिव च मिथ्यैव प्रतीयते इत्यर्थः । तदुक्तं **बृहद्वार्तिके** 'अज्ञानानुपमर्देन व्याकृतिर्याऽस्य जायते । स्वप्नविज्ञानवन्नासौ सत्यमेयव्यपाश्रया ।।' (बृ. वा. १-२-१३२) इति । तस्य च हरेर्जगत्कारणस्य पारोक्ष्यं मा भूदित्याह 'बुद्धिसाक्षिणे' इति । बुद्धेरपि साक्षाद् द्रष्टा यः सर्वेषां प्रत्यगात्मा तदभिन्न एवासौ हरिर्न परोक्षो मन्तव्यः । 'अयमात्मा ब्रह्म' (बृ. २-५-१९) इति श्रुतेः । यदा चैवं वाक्यतो ज्ञायते तदैव ध्वान्तं मिथ्याजगत्प्रतीतिकारणमज्ञानम् अत्यन्तं छिनत्तीत्यतोऽपि हरिरयमिति भावः । 'तस्मै नमः' इति तु मङ्गलार्थमित्युक्तम् ।।१।।

गुरुनमस्कारश्लोकसंबन्धोक्त्याशयविवरणम् -

अथ द्वितीयश्लोकाभिप्रायमाह **'स्वसंप्रदायस्य चोदितप्रमाण-पूर्वकत्वज्ञापनाय'** इति । चकारो भिन्नक्रमः । 'उदितप्रमाण-पूर्वकत्वज्ञापनाय च' इति संबन्धः । तथा च अभिलषित-प्रचयप्रकरणार्थसंसूचनाभ्याम् अस्य ज्ञापनस्य समुच्चयः सिध्यति । प्रमाणभूतगुरोर्हि प्रकरणार्थभूतज्ञानविषयादात्मनोऽभेदो विवक्षितः । तस्य नमस्क्रिया स्वाभीष्टसिद्धिप्रदा चेति च । नन्वेवं देवता-नमस्कारवचनं गुरुनमस्कारवचनं चेत्येतदुभयं स्वसंप्रदायस्य उदित-प्रमाणपूर्वकत्वज्ञापकमित्यापतति । बाढम्, इष्टमेव तदापतति । स्वसंप्रदायो हि वस्तुतन्त्रज्ञानेनाज्ञानोच्छित्तौ तावतैव परमपुरुषार्थ-प्राप्तिरिति विशिष्टप्रक्रियोपदेशः । तस्य च उदितप्रमाणपूर्वकत्वम्

'ब्रह्मविदाप्नोति परम्' (तै. २-१), 'मुमुक्षुर्वै शरणमहं प्रपद्ये' (श्वे. ६-१८), 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरम्' (छां. ६-१४-२) इत्यादिश्रुतिभ्यः । तत्र पूर्वस्मिन् श्लोके परदेवतानमस्कारोक्तिव्याजेन परमात्मज्ञानस्य परप्राप्तिफलकत्वं सूचितम् ; द्वितीये पुनस्तस्या एव देवताया गुरुमूर्तिरूपाया विशिष्टोपदेशनेनाविद्याग्रन्थिभेत्तृत्वमुच्यत इति विशेषः । न चैवं संबन्धग्रन्थद्वयानर्थक्यमिति शङ्कनीयम् । आद्यश्लोकस्य प्रकरणार्थसंसूत्रणप्राधान्यं द्वितीयस्य तु संप्रदायस्य प्रमाणपूर्वकत्वज्ञापनप्राधान्यमिति विवेचनेनावतरणिकाद्वयस्य सार्थक्योपपत्तेः ॥

अथवा चोदितप्रमाणेत्येव पाठः । इदानीं तु गुरोः परमात्माभेदादिकं श्लोकोक्त्यैवार्थात् सिध्यति । संबन्धोक्तौ तु विशेषमेवाह 'स्वसंप्रदायस्य' इत्यादि - इति व्याख्येयम् । स्वस्य संप्रदायः गुरुपरम्पराप्राप्तविशिष्टवेदान्तसिद्धान्तप्रक्रियोपदेशरूपः, प्रसङ्ख्यानादिसंप्रदायेभ्यो विलक्षणः । तस्य चोदितप्रमाणपूर्वकत्व-ज्ञापनाय चोदितम् 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२), 'गुरु-मेवाभिगच्छेत्' (मुं. १-२-१२), 'तद्विद्धि प्रणिपातेन' (गी. ४-३४) - इत्यादिश्रुतिस्मृतिपरिप्रापितं प्रमाणम् आचार्योपदेशरूपम्, तत्पूर्वक-त्वज्ञापनाय । संप्रदायस्य श्रुत्युक्तरीत्या स्वाविद्यानिरासचणाचार्य-पूर्वकत्वं ज्ञापयितुम् - इत्यर्थः । विशिष्टगुणसंबन्धकीर्तनपूर्विका असाधारणेन वक्ष्यमाणेन गुणेन स्वगुरोर्यः संबन्धः तत्संकीर्तनपूर्विका । अविद्यानिरासित्वरूपासाधारणगुणकथनपुरःसरा येयं नमस्क्रिया, सा स्वसंप्रदायस्य श्रुतिचोदितप्रमाणपूर्वकत्वज्ञापनाय - इति संबन्धः ॥

स्वगुरोरनितरसाधारणसंप्रदायवत्त्वम् -

अलब्ध्वेति । यस्माद् गुरोः सकाशात् अन्यत्र अतिशयम् अलब्ध्वा अतिशायनबोधकाः तमप्, तरप्, इष्ठन् - इत्यादिप्रत्ययाः

व्यावृत्ताः निवृत्ता भवन्ति । तस्मिन्नेव विश्रान्तिं लभन्ते इति यावत् । तस्मै **'अविद्याग्रन्थिभेदिने'** इति हेतुसमर्पकं विशेषणम् । अविद्याग्रन्थिर्नाम आत्माज्ञानवशात् चिरकालोपचितो ग्रन्थिवद् दृढीकृतो मिथ्याज्ञानवासनाराशिः । स च तत्त्वदर्शिगुरूपदेशात् सद्यः प्रणश्यति । 'आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत्' (छां. ४-९-३), 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।' (गी. ४-३४, ३५) इत्यादि-श्रुतिस्मृतिभ्यः । न चावशिष्यते कश्चिदविद्यालेशः, यस्य समुच्छित्तये विद्यातिशया-काङ्क्षया गुर्वन्तरोपसर्पणमिष्येत । तदेवं स्वगुरोरविद्या-ग्रन्थिभेत्तृत्वरूपानितरसाधारणगुणसंबन्धात् स्वस्यैव संप्रदायस्य उक्तप्रमाणकत्वं सिद्धमित्यभिप्रायः ॥२॥

(मूलम्)

नमस्कारनिमित्तस्वाशयाविष्करणार्थः -

वेदान्तोदरसंगूढं संसारोत्सारि वस्तुगम् ।
ज्ञानं व्याकृतमप्यन्यैर्वक्ष्ये गुर्वनुशिक्षया ॥३॥

किंविषयं प्रकरणमिति चेत् तदुपन्यासः -

यत्सिद्धाविदमः सिद्धिर्यदसिद्धौ न किञ्चन ।
प्रत्यग्धर्मैकनिष्ठस्य याथात्म्यं वक्ष्यते स्फुटम् ॥४॥

विवक्षितप्रकरणार्थप्ररोचनाय अनुक्तदुरुक्ताप्रामाण्यकारणशङ्का-व्युदासेन स्वगुरोः प्रामाण्योपवर्णनम् -

गुरूक्तो वेदराद्धान्तस्तत्र नो वचम्यशक्तितः ।
सहस्रकिरणव्याप्ते खद्योतः किं प्रकाशयेत् ॥५॥

गुरुणैव वेदार्थस्य परिसमापितत्वात्, प्रकरणोक्तौ ख्यात्याद्य-प्रामाण्यकारणाशङ्का इति चेत्, तद्व्युदासार्थम् उपन्यासः[1] -

न ख्यातिलाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते ।
स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु ॥६॥

(क्लेशापहारिणी)

वेदान्तोक्तज्ञानमत्र विषयः -

अथ ग्रन्थारम्भं प्रतिजानीते चतुर्भिः श्लोकैः । तत्र प्रथम-श्लोकसंबन्धं कीर्तयति - **'नमस्कारनिमित्तस्वाशयाविष्करणार्थः'** इति । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' (श्वे. ६-२३) इति श्रुतेर्देवताभक्ति-र्गुरुभक्तिश्च वेदान्तार्थग्रहणेऽन्तरङ्गं साधनमिति शिष्यशिक्षणार्थं श्लोकद्वयेन हरिगुर्वोर्नमस्कारो गुम्फितः । अथाधुना तादृशनमस्कारे निमित्तभूतो यः स्वाशयः वेदान्तवाक्यज्ञानव्याकरणेऽभिप्रायः, तमाविष्कर्तुम् इत्यर्थः ॥

वेदान्तेत्यादि । वेदान्तानामुदरे मध्ये स्थितमपि संगूढम् संछन्नम् गुरुदेवतानुग्रहं विना अप्राप्यम् इति यावत् । तेनावाप्तेन किं प्रयोजन-मिति ? अत आह - संसारोत्सारि स्वोत्पत्तिमात्रेणाविद्याकृतसंसार-नाशनम् इत्यर्थः । किंस्वरूपं तत् ? तत्राह - वस्तुगम् अद्वितीयात्म-वस्तुविषयकम् । वस्तुतन्त्रम् इति यावत् । अनेन कर्तृतन्त्रकर्म-ध्यानादिज्ञानं व्यावर्त्यते । तदीदृशं ज्ञानं वक्ष्ये व्याकरिष्ये इत्यर्थः । नन्वद्य यावत् किं न केनाप्युक्तं ज्ञानम्, येनागतार्थतां प्रकरणस्य स्यात् ? तत्राह - अन्यैः स्वस्वसंप्रदायाध्वना व्याकृतमपि न सम्यग्व्याख्यातम् । अतस्त्वया पुनरपि व्याकर्तव्यम् इति गुर्वनु-

---

1. 'आह' पा ॥

शिक्षया लोकानुग्रहैकरसिकगुरोः अनुशासनेन शुद्धसंप्रदायवर्त्मना व्याकरिष्यामीत्यर्थः ॥३॥

स्वयंसिद्धात्मविषयकं ज्ञानमत्र प्रतिपाद्यम् -

उत्तरश्लोकसंबन्धः **'किंविषयम्'** इति । यद्यपि वस्तुतन्त्रं वेदान्तवाक्यज्ञानमेव विषयः प्रकरणस्येत्युक्तमेव ; तथापि किंविषयकं ज्ञानमत्र विवक्षितमिति वस्तुविशेषजिज्ञासोरयं प्रश्नः इत्यदोषः । तदुपन्यासः । तस्य वस्तुन उपन्यासः 'समनन्तरश्लोके क्रियते' इति शेषः ॥

यत्सिद्धाविति । यस्यानुभवरूपस्य सिद्धौ यस्य सिद्धिमाश्रित्यैव इदमः इदंप्रत्ययगोचरस्य प्रमात्रादेः सिद्धिः प्रतीतिर्भवति व्यवहारे । यदसिद्धौ यस्य सिद्धेराश्रयं विना न किञ्चन न किञ्चिदपि सिध्येत् । न केवलं प्रमात्रादेः, किं तु तदभावस्यापि न सिद्धिर्भवेत् इत्यर्थः । निःसाक्षिकस्य कस्यचिदपि सिद्ध्यनुपपत्तेः - इति भावः । एतेनाऽऽत्मनो निरपेक्षसिद्धिरुक्ता भवति । तदिदमुक्तं **बृहद्वार्तिके** 'प्रमाता च प्रमाणं च प्रमेयो निश्चितिस्तथा । यत्सान्निध्यात् प्रसिध्यन्ति तत्सिद्धौ किमपेक्षते ॥' (बृ. वा. १-४ -८७०) इति । तस्य प्रत्यग्धर्मैकनिष्ठस्य प्रत्यग्धर्मः प्रत्यक्त्वम् । तस्य एका मुख्या निष्ठा पर्यवसानं यस्मिन् तत् प्रत्यग्धर्मैकनिष्ठम् । सर्वान्तरत्वश्रुतेः । अथवा प्रत्यङ् चासौ धर्मश्च प्रत्यग्धर्मः, प्रत्यगात्मा । प्रत्यग्धर्मे एवैकस्मिन् निष्ठा पर्यवसानं यस्य वस्तुनः तदिदं प्रत्यग्धर्मैकनिष्ठम् । प्रत्यगात्माभिन्नम् इति यावत् । 'स आत्मा तत्त्वमसि' (छां. ६-८-७) इत्यादिश्रुतेः । तस्य याथात्म्यं यथास्थितस्वरूपतत्त्वं वक्ष्यते स्फुटम् । एतेन वेदान्तेषूपदिष्टं तत्त्वं शारीरकमीमांसायां तद्भाष्ये च न्यायतो निर्णीतमपि विषयान्तरमिश्रितत्वात् विप्रकीर्णरूपेणोक्तत्वाच्च मन्दमतीनां दुरवगाहम् । अतोऽत्र तदेव संक्षिप्य एकत्रैव सुस्पष्टमुच्यत इति प्रकरणस्य ततो विशेषः प्रदर्शितः ॥४॥

गुरूक्तमेवात्र विशदीक्रियते -

'स्फुटं वक्ष्यते' इत्युक्तत्वात् स्वगुरुणा त्वयं वेदान्तार्थो न स्फुटमुक्तः, दुरुक्तो वा स्यात् - इति शङ्का समुन्मिषेत् । तथा च स्वसंप्रदायस्य चोदितप्रमाणपूर्वकत्वं यत् प्रतिज्ञातं तद्बाधितं भवेत् । अत उक्तशङ्कानिरसनपूर्वकम् उत्तरश्लोकेन प्रामाण्योपवर्णनं क्रियते । तत्प्रामाण्योपवर्णनं तु न केवलं शङ्कावादिसमाधानार्थम्, किं तु विवक्षिते प्रकरणार्थे शिष्याणां रुच्युत्पादनेन सादरं ग्रन्थाध्ययने प्रवृत्तिजननार्थमपीत्याह - **विवक्षितेत्यादि ।।**

गुरूक्त इति । गुरुणा उक्त एव नानुक्तः । वेदराद्धान्तः वेदान्तसिद्धान्त एवोक्तो न तु स्वकपोलकल्पितः - इति न दुरुक्तः । अतो नात्राप्रामाण्यकारणम् इति भावः । तत्र सिद्धान्ते गुरूक्ते नाधिकं वच्मि । तत् कस्मात् ? अशक्तितः, असामर्थ्यात् । तत्र दृष्टान्तः, **'सहस्रकिरणव्याप्त'** इति । खद्योतः रात्रिमात्रे लब्धेषत्प्रकाशः सहस्रकिरणेन भानुना व्याप्ते सुप्रकाशिते विषये किम् अधिकं प्रकाशयेत् ? न किमपि । यथायं दृष्टान्तः, तथा बहुभिः प्रकारैर्गुरुभिरेवोक्ते वेदान्तसिद्धान्ते किमप्यनुक्तं वक्तुं नायमुद्यमः, नापि किञ्चिद् दुरुक्तं समीकर्तुम् ; किं तु तदाकलनासमर्थानामर्थाय तदेव विशदीक्रियते मया इति भावः ।।५।।

ग्रन्थकर्तुरीप्सितं प्रयोजनम् -

शङ्कान्तरं निरस्यतेऽधुना इत्याह - **गुरुणैवेति ।। नेति ।।** न ख्यात्याद्यर्थं ग्रन्थोक्तिश्चेत् किमर्थं तर्हि सा ? न तावद् वेदान्तसिद्धान्तप्रकाशनाय । गुरुणैव भाष्येषु तस्य प्रकाशितत्वात् । नापि तत्स्फुटीकरणाय । **उपदेशसाहस्र्यादौ** स्फुटीकरणस्यापि निर्वृत्तत्वात्, अत्रोच्यते । यद्यपि गुरुणैव सिद्धान्तस्फुटीकरणमपि संपादितमस्ति, तथापि संप्रदायान्तरनिराकरणपूर्वकं वेदान्तवाक्यज्ञानं कुत्रापि

संग्रहेण न निरूपितम् । अतोऽल्पमतीनां श्रोतॄणां कृते स्फुटमुच्यत इति यत् प्रतिज्ञातम् तन्निराबाधमेव । 'नो वच्मि' इति तु स्वौद्धत्यपरिहारार्थं वचनम् इत्यदोषः । अथेदानीं वक्तुर्ममापि ख्यात्याद्यतिरिक्तं किञ्चित् प्रयोजनमस्ति प्रकरणनिर्माणेनेत्याह **स्वबोधपरिशुद्ध्यर्थम्** इति । ब्रह्मविद एव निकषाश्मानः, तेषु स्वबोधस्य परिशुद्ध्यर्थं परीक्ष्य योग्यतानिर्धारणार्थम् । यथा निकषशिलासु घर्षणेन परीक्ष्य हेम्नः शुद्धिर्निर्धार्यते, एवं ममापि ब्रह्मविद्भिः सह वादेन बोधशुद्धिर्भविष्यतीत्यभिप्रायः ।।६।।

---

३. प्रकरणार्थः संक्षेपतः

(मूलम्)

अनर्थानर्थहेतुपुरुषार्थतद्धेतुप्रकरणार्थसंग्रहज्ञापनायोपन्यासः -

ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया ।
साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः ।।७।।

पुरुषार्थहेतोरवशिष्टत्वात् तदभिव्याहारः -

वेदावसानवाक्योत्थसम्यग्ज्ञानाशुशुक्षणिः ।
दन्दहीत्यात्मनो मोहं न कर्माप्रतिकूलतः ।।८।।

(क्लेशापहारिणी)

ग्रन्थसंबन्धः -

यत्तदुपवर्णितं प्रकरणसंबन्धप्रघट्टके (पृ. १,२) आत्मानवबोध

एव सर्वानर्थहेतुः, वेदान्तवाक्यज्ञानं च तदुच्छित्तिद्वारेण परमपुरुषार्थहेतुरिति ; तदिह द्वाभ्यां श्लोकाभ्यां संगृह्य ज्ञाप्यत इत्याह - **अनर्थेति** ।।

भाष्यकारवार्तिककारयोरविद्याविषये संगानम् -

ऐकात्म्येति । एकश्चासौ आत्मा च एकात्मा अद्वितीयप्रत्यक्स्वरूपः । तस्य भावः ऐकात्म्यम् । तस्याप्रतिपत्तिः ज्ञानाभावः येयम् ऐकात्म्याप्रतिपत्तिः सैवाविद्या संसृतेर्बीजम् । संसारानर्थस्य कारणम् इत्यर्थः । यद्यपि मिथ्याप्रतिपत्तिरेव भाष्यकारैरविद्यात्वेनोपवर्णिता 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते', 'तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः' (अध्या. भा.) - इत्यादिस्थलेषु, तथापि अप्रतिपत्तिरेव मिथ्याप्रतिपत्तिनिबन्धनम् ; तेन च द्वारेण द्वैतवस्तुप्रत्युपस्थापने शोभनाशोभनाध्यासरागद्वेषप्रतिपत्तिपरम्परया एकत्वाप्रतिपत्तिरेव संसृतेर्बीजं भवतीत्यभिप्रायेण ऐकात्म्याप्रतिपत्तिर्या सैवाविद्येत्युक्तम् । अतो न दोषः । अत एव भाष्यकारा अपि 'अन्योन्यस्मिन्नन्योन्यात्मकताम् अन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन' इति, 'इतरेतरतद्धर्माध्यासलक्षणः क्षेत्रक्षेत्रज्ञसंयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः' (गी. भा. १३-२६) इति चाप्रतिपत्तिनिबन्धनत्वमेव मिथ्याप्रतिपत्तेर्वर्णयांबभूवुः । अध्यासस्यैव प्राधान्येनाविद्यात्वाभिधानं तु प्रमाणादिव्यवहारहेतुत्वेन साक्षादनर्थहेतुत्वविवक्षया, न पुनरप्रतिपत्तेरविद्यात्वेऽरुचेः । अत एव **गीताभाष्ये** 'तामसो हि प्रत्ययः, आवरणात्मकत्वात् अविद्या विपरीतग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा । विवेकप्रकाशभावे तदभावात् । तामसे चाऽऽवरणात्मके तिमिरादिदोषे सति अग्रहणादेरविद्यात्रयस्योपलब्धेः' (गी. भा. १३-२) इत्यप्रतिपत्तेरप्यविद्यात्वेन परिगणनं कृतम् । प्रकरणकृतस्तु मिथ्याप्रतिपत्तेरप्रतिपत्ति-

निबन्धनत्वात् कारणध्वस्तौ कार्यध्वस्तेरवश्यंभावाच्च अप्रतिपत्तिमेव अविद्यात्वेन व्यवजह्रुः । तदुक्तं **बृहद्वार्तिके** 'यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु । कारणेतररूपेण तयोरव्यभिचारतः ।।' (बृ. वा. १-४-३८६) इति, 'मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् । मूलध्वस्तौ हतं तच्चेन्मिथ्याधीः किं करोति नः' (बृ. वा. १-४-४३८) इति च । अधिकं **त्वेतद्ग्रन्थभूमिकातो**ऽधिगन्तव्यम् । तदेवं परिभाषाभेदेऽपि न प्रक्रियाभेद इत्यलं प्रसङ्गागतप्रपञ्चनेन ।।

अविद्याया अनुभवैकसिद्धत्वम् -

नन्वविद्या प्रमाणतः सिद्धा वा न वा ? सिद्धा चेत् तस्या उच्छेदानुपपत्तिः । वस्तुस्वभावस्योच्छेदासंभवात् । न हि भावानां स्वभावो निवर्तेत, अग्नेरिवोष्णस्वभावः । अथ न प्रमाणसिद्धा अविद्या, कस्तस्याः समुच्छेदाय प्रयतेतेति ? अत्राह - **'स्वात्मानुभवसंश्रया'** इति । स्वात्मानुभवमात्रं संश्रयतेऽविद्या स्वसिद्धये न प्रमाणम् इत्यर्थः । न हि घटविषयकम् अज्ञानं घटप्रमाणगम्यं तद्बाध्यत्वात् तस्य । नापि प्रमाणान्तरगम्यम् । अन्यस्य अन्यविषयकप्रमाणगम्यत्वे सर्वस्य सर्वविषयकप्रमाणगम्यत्वप्रसङ्गात् । अपि च वस्तुनोऽज्ञातत्वं न प्रमाणकृतम् । सर्वत्र ज्ञातत्वस्यैव प्रमाणकृतत्वप्रसिद्धेः । यथोक्तं **बृहद्वार्तिके** 'अज्ञातत्वं न मानेभ्यो ज्ञातत्वं तत्कृतं यतः । तैरप्यज्ञातता चेत् स्यात्काऽतिशीतिर्मितेर्भवेत् ।।' (बृ. वा. १-४-२९५) इति । अतो न जानामीति सार्वजनीनप्रसिद्धेरनुभवगम्यमेवाज्ञानम् इत्यभ्युपगन्तव्यम् । एवमात्माज्ञानमपि न प्रमाणसिद्धम्, किं तु प्रमाणव्यापृतेः पूर्वमेव स्वानुभवगम्यम् । प्रमाणादिव्यवहारोऽपि ह्यात्माज्ञानमनुभवसिद्धमाश्रित्यैव प्राणान् धारयतीति भावः । ननु नित्यानुभवस्वरूपेऽप्यात्मनि कथं तद्विषया अविद्या स्वात्मानं लभताम् ? अत्रोच्यते । न तावदस्या उत्पत्तिरनुज्ञायते । अनादित्वात् । प्रतीतिस्तु

प्रागैकात्म्यप्रतिपत्तेः 'परमात्मानं न वेद्मि' इति स्वानुभवसिद्धत्वान्नापलपनीया भवति । नाप्यनुपपन्ना सा । दृष्टत्वात् । न हि दृष्टेऽनुपपन्नं नामेति । तस्मात् साधूक्तं 'स्वात्मानुभवसंश्रया' इति ।।

अनर्थतद्धेतुनाशः पुरुषार्थः -

तदेवं संसृतिरनर्थः, अविद्या चानर्थहेतुः, इत्युक्तम् । अथ पुरुषार्थः कथ्यते **'तन्नाशो मुक्तिरात्मनः'** इति । यथा अविद्याकार्यभूतः संसार एवानर्थः, बन्धः, एवम् अविद्यानाश एव मुक्तिः, परमपुरुषार्थः इत्यर्थः ।।७।।

वेदान्तवाक्यजन्यज्ञानमेव पुरुषार्थहेतुः -

प्रतिज्ञातेषु चतुर्षु त्रयः प्रकरणार्था उक्ताः । चतुर्थस्य पुरुषार्थहेतोरवशिष्टत्वात् तस्याभिव्याहारः वचनम् उत्तरश्लोके भविष्यतीत्याह **- पुरुषार्थहेतोरिति** ।।

वेदावसानेति । वेदान्तवाक्यजनितः सम्यग्ज्ञानाग्निः निरवशेषमात्मनो मोहमविद्यां दहति । न तु कर्म केवलं ज्ञानसमुच्चितं वा । कुतः ? अप्रतिकूलतः । कर्मणोऽज्ञानेन विरोधाभावात् इत्यर्थः । सम्यग्ज्ञानम् इति विशेषणं तु मिथ्याज्ञानस्याप्यज्ञानमात्रत्वाद् बाध्यत्वज्ञापनार्थम्, उपासनादिरूपस्यापि ज्ञानस्यासम्यक्त्वज्ञापनार्थं चेति ध्येयम् ।।

अनर्थहेत्वविद्याविषये मतान्तरं तद्दूषणं च -

अत्र **केचिद्** 'अविद्या संसृतेर्बीजम्' इत्युक्तमवष्टभ्यं वर्णयन्ति - अविद्या नाम अग्रहणान्यथाग्रहणाभ्यां व्यतिरिक्ता सदसद्भ्यामनिर्वचनीया अनादिभावरूपा मूलाज्ञानापराभिधाना । सैव च द्वैतसंसारवृक्षस्य बीजम् उपादानकारणम् । 'ऐकात्म्याप्रतिपत्तिः' इत्यनेन

तस्या अविद्याया विषयः प्रदर्शितः, स्वात्मानुभवसंश्रया इति चाश्रयः । तदेवम् आत्माश्रया आत्मविषया च सा मूलाविद्या वाक्यजन्य-सम्यग्ज्ञानेन विनाश्यते । तद्विनाश एव च मुक्तिः इति । तदेतत्सर्वं अभित्तिचित्रम् । ग्रन्थकारैः कुत्राप्यनुपन्यासात् तादृशाविद्यायाः । ज्ञानविरोधित्वेन लोकेऽप्रसिद्धत्वाच्च तस्याः - इत्युपेक्ष्यते ।।८।।

---

४. कर्मवादिनां पूर्वः पक्षः

(मूलम्)

प्रतिज्ञातार्थसंशुद्ध्यर्थं पूर्वपक्षोक्तिः । तत्र ज्ञानमभ्युपगम्य तावदुपन्यासः -

मुक्तेः क्रियाभिः सिद्धत्वाज्ज्ञानं तत्र करोति किम् ।
कथं चेच्छृणु तत्सर्वं प्रणिधाय मनो यथा ।।९।।

अकुर्वतः क्रियाः काम्या निषिद्धास्त्यजतस्तथा ।
नित्यनैमित्तिकं कर्म विधिवच्चानुतिष्ठतः ।।१०।।

किमतो भवति ?

काम्यकर्मफलं तस्माद्देवादीमं न ढौकते ।
निषिद्धस्य निरस्तत्वान्नारकीं नैत्यधोजनिम् ।।११।।

देहारम्भकयोश्च धर्माधर्मयोर्ज्ञानिना सह कर्मिणः समानौ चोद्यपरिहारौ -

वर्तमानमिदं याभ्यां शरीरं सुखदुःखदम् ।
आरब्धं पुण्यपापाभ्यां भोगादेव तयोः क्षयः ।।१२।।

काम्यप्रतिषिद्धकर्मफलत्वात् संसारस्य तन्निरासेनैव अशेषानर्थनिरासस्य सिद्धत्वात् किं नित्यानुष्ठानेन ? - इति चेत्, तन्न । तदकरणादप्यनर्थप्रसक्तेः -

नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृशेत् ।
अनादृत्यात्मविज्ञानमतः कर्माणि संश्रयेत् ।।१३।।

(क्लेशापहारिणी)

पूर्वपक्षविमर्शने हेतुः -

वेदान्तवाक्यज्ञानं सर्वानर्थहेतुभूतामविद्यां दन्दहीति न कर्म । तस्य तया अविरोधात् (१-८) इत्युक्तम् । तत्रेदानीं पूर्वपक्षाः प्रदर्श्य खण्ड्यन्ते । ननु स्वपक्षस्थापनमेव क्रियताम्, किं परपक्षनिराकरणेन वीतरागकथायां प्रवृत्तस्य ? इत्यत आह - **प्रतिज्ञातेति** ।। प्रतिज्ञातो योऽर्थः वाक्योत्थसम्यग्ज्ञानमेवाविद्यानाशकं न कर्म - इत्येवंरूपः, तत्संशुद्ध्यर्थं परीक्ष्य निर्णयार्थं पूर्वपक्षोक्तिः । 'स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु' (१-६) इत्यपि हि प्रकरणप्रणयनप्रयोजनं प्रतिज्ञातम् । न च पक्षप्रतिपक्षग्रहणं विना तत्त्वावधारणं शक्यं कर्तुम् इति पूर्वपक्षा उपन्यस्य खण्ड्यन्ते, न तु व्यसनितया इति भावः ।।

कर्मवादिपक्षावतारणम् -

तत्र पूर्वपक्षाणां मध्ये, वेदान्तेषु वस्तुबोधकं ज्ञानमपि उपदिष्टमस्ति इत्यभ्युपगम्य कर्मणैव तु मोक्षः सिध्यतीति ब्रुवतां मीमांसकानां पक्षस्तावदुपन्यस्यत इत्याह - **तत्र ज्ञानमिति** ।

अभ्युपगमस्तु त्यक्ष्यते पूर्वपक्षिणा अनुपदमेव 'अभ्युपेत्यैवमुच्यते' (१-१४) इत्यत्रेति भावेन **'तावत्'** इत्युक्तम् ।।

कर्मणैव मुक्तिरिति प्रतिज्ञा -

मुक्तेरिति ।। मुक्तेः क्रियाभिः वेदोक्तकर्मभिरेव सिद्धत्वात् तत्र मुक्तौ साध्यभूतायां ज्ञानं विद्यमानमपि किं करोति ? न किञ्चित् तस्य तत्र कृत्यमस्तीत्यर्थः । यद्यपि मोक्षोपायविषयकेच्छाजनकतया कृत्यमस्त्येव ज्ञानस्य पूर्वपक्षिमतेऽपि ; यथाहुः - 'प्रार्थ्यमानं फलं ज्ञातं न चानिच्छोर्भविष्यति । आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते' (श्लो. वा. ?) इति । तथापि मुक्तौ तस्य साक्षात् कृत्यं नास्तीति भावः । किं च न पूर्वपक्षिसंमतं देहव्यतिरिक्तात्मज्ञानमात्रमत्र विवादास्पदम्, किं तु सिद्धान्तिसंमतम् अद्वितीयब्रह्मात्मज्ञानम् । तथा च केवलेभ्य एव कर्मभ्यो मोक्षस्य सिद्धत्वात्, ब्रह्मात्मज्ञानमनर्थकम् । विद्यमानत्वेनाभ्युपगतस्यापि तस्याकिञ्चित्करत्वात् । न हि ज्ञानं कारकमिष्यते सिद्धान्तिना - इत्यभिप्रायः ।।

अथ नित्याया मुक्तेः कथं क्रियाभिरेव सिद्धत्वम् ? - इति चेत् शङ्कसे, यथैतत् संभवति तथा वक्ष्यते । तदिदं सर्वं मनः प्रणिधाय समाधाय शृणु - इत्यर्थः ।।९।।

काम्यनिषिद्धवर्जनान्मोक्षप्रतिबन्धपरिहारः -

अथैतत्संभावनायाह - **अकुर्वत इत्यादि** ।। काम्याः क्रियाः अकुर्वतः, तथा निषिद्धाः क्रियास्त्यजतः, नित्यनैमित्तिकं च कर्म । नित्यनैमित्तिके कर्मणी इत्यर्थः । विधिवत् यथाविधि अनुतिष्ठतश्च मुक्तिर्विनापि सिद्धान्त्यभिमतज्ञानम्, सिध्यति इति शेषः । अयं भावः । न वयं क्रियासाध्यां मुक्तिम् अभ्युपगच्छामः, किं तु प्रतिबन्ध-परिहारादेव स्वात्मन्यवस्थानलक्षणा मुक्तिरयत्नसिद्धा भविष्यतीति । अतो नैतदसंभावितमिति ।।१०।।

प्रतिबन्धपरिहारप्रकारः -

एवमनुष्ठानमात्रात् कथं मोक्षप्रतिबन्धपरिहारो भवेत् ? - इति सिद्धान्ती शङ्कते - **किमतो भवति ?** इति । अस्मात् काम्याकरणाद्यनुसरणात् न किञ्चिदपि मुक्तिप्रापकं भवेत् इत्यर्थः ।।

स्वाशयं विवृण्वन् शङ्कां परिहरति कर्मवादी - **काम्यकर्मफलमिति** ।। तस्मात् काम्यकर्मत्यागात् इमं मुमुक्षुं देवादि देवत्वादिकाम्यकर्मफलं न ढौकते न स्पृशति । किं चायं नारकीं नरकसंबन्धिनीं स्थावरान्ताम् अधोजनिं नीचजन्मापि नैति न प्राप्नोति । कुत एतत् ? निषिद्धस्य कर्मणः निरस्तत्वात् । त्यक्तत्वात् इत्यर्थः । तदेवं शुभाशुभकर्मफलभोगयोर्निमित्ताभावादेव परिहारः कृतो भविष्यतीत्याशयः ।।११।।

प्रारब्धकर्मणो भोगादेव क्षयः -

नन्वेवमपि एतद्देहारम्भकयोः पुण्यापुण्ययोर्नाशः कर्मणा न भवेत् इत्याशङ्क्य तत्परिहारार्थमुत्तरश्लोक इति वक्तुं तत्तात्पर्यमाह - **देहारम्भकयोरिति** ।। यौ धर्माधर्मौ वर्तमानदेहमारब्धवन्तौ तयोः कथं क्षयः ? - इति चोद्यम्, भोगादेवेति परिहारश्च - इत्येतौ कर्मवादिनो ज्ञानवादिना सह समानौ । नातोऽत्रास्माभिरेव विशिष्य वक्तव्यमस्तीत्यभिप्रायः । अत्र यद्यपि सिद्धान्तिदृष्ट्या ज्ञानिनः किञ्चिदपि कर्म कथमपि न समस्ति । 'त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि' इत्यवगमो हि ज्ञानं नाम । तथापि व्यावहारिकदृष्ट्या ज्ञानवादिनापि अनारब्धकार्ये एव सुकृतदुष्कृते ज्ञानेन क्षीयेते इत्यङ्गीकारात् आरब्धफलयोस्तयोः 'समानौ चोद्यपरिहारौ' इत्याह पूर्वपक्षीति बोध्यम् ।।

वर्तमानमिति ।। स्पष्टार्थः श्लोकः ।।१२।।

नित्यानुष्ठानप्रयोजनम् -

उत्तरश्लोकाभिप्रायमाह - **काम्येत्यादिना** ।। संसारस्य सुखदुःखभोगलक्षणस्य काम्यप्रतिषिद्धकर्मफलत्वात् तन्निरासेनैव तयोस्त्यागेनैव अशेषानर्थस्य भोगार्थं देहग्रहणरूपस्य निरासः परिहारः सेत्स्यतीति तत्र किं नित्यानुष्ठानेन ? न हि तेन निरसनीयोऽनर्थोऽवशिष्यते । न च मोक्षस्य कर्मजन्यत्वमङ्गीक्रियते भवद्भिरपि, येन नित्यकर्मणां तत्र विनियोगः स्यादित्याक्षेपः । अत्र कर्मवादी परिहारमाह - **तत्र । तदकरणादपीति** । तस्य नित्यकर्मणोऽकरणादपि अनर्थप्रसक्तेः काम्यप्रतिषिद्धत्यागात् केवलात् न पुरुषार्थसमाप्तिर्भवेदित्यर्थः ।।

एवं च ज्ञाने सत्यपि केवलेन कर्मणैव मोक्षप्राप्तिरिति यत् प्रतिज्ञातं तत् साधितमित्युपसंहरति - **नित्यानुष्ठानतश्चेति** ।। आत्मज्ञानं विद्यमानमपि अनादृत्य मोक्षकारणसामग्र्यां तस्य नान्तर्भाव इति निश्चित्य कर्माण्येव संश्रयेत् । न हि वस्तुज्ञानमात्रात् स्वरूपावस्थितिलक्षणा मुक्तिर्भवित्री, किं तु प्रतिबन्धनिरासेन । स च निरासः कर्मणा भवति न ज्ञानेन इति पूर्वपक्षिणोऽभिप्रायः । श्लोकपूर्वार्धं न व्याख्यानमपेक्षत इत्युपेक्षितम् ।।१३।।

(मूलम्)

अभ्युपेत्यैवमुच्यते - न तु यथावस्थितात्मवस्तुविषयं ज्ञानमस्ति । तत्प्रतिपादकप्रमाणाभावात् -

यावत्यश्चेह विद्यन्ते श्रुतयः स्मृतिभिः सह ।
विदधत्युरुयत्नेन कर्मातो भूरिसाधनम् ।।१४।।

स्यात् प्रमाणासंभवो भवदपराधात् इति चेत्, तन्न । यतः -

यत्नतो वीक्षमाणोऽपि विधिं ज्ञानस्य न क्वचित् ।
श्रुतौ स्मृतौ वा पश्यामि विश्वासो नान्यतोऽस्ति नः ॥१५॥

स्यात् प्रवृत्तिरन्तरेणापि विधिं लोकवत् इति चेत्, तन्न । यतः -

अन्तरेण विधिं मोहाद्यः कुर्यात्सांपरायिकम् ।
न तत्स्यादुपकाराय भस्मनीव हुतं हविः ॥१६॥

अभ्युपगतप्रामाण्यवेदार्थविज्जैमिन्यनुशासनाच्च -

आम्नायस्य क्रियार्थत्वादानर्थक्यमितोऽन्यथा ।
इति साटोपमाहोच्चैर्वेदविज्जैमिनिः स्वयम् ॥१७॥

मन्त्रवर्णाच्च -

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
इति मन्त्रोऽपि निःशेषं कर्मण्यायुरवासृजत् ॥१८॥

ज्ञानिनश्च वस्तुनि वाक्यप्रामाण्याभ्युपगमात्, वाक्यस्य च क्रियापदप्रधानत्वात्, ततश्च अभिप्रेतज्ञानाभावः -

विरहय्य क्रियां नैव संहन्यन्ते पदान्यपि ।
न समस्त्यपदं वाक्यं यत्स्याज्ज्ञानविधायकम् ॥१९॥

(क्लेशापहारिणी)

आत्मवस्तुविषयकज्ञाने न प्रमाणमस्ति -

तदेवम् अभ्युपगम्यापि ब्रह्मात्मज्ञानं तस्य कार्यान्तरमुत्प्रेक्षितव्यम् । न तु मुक्तौ तस्य कृत्यमस्तीत्यावेदितम् । इदानीं तदेव नास्ति वस्तुमात्रबोधकं ज्ञानं नाम इत्युच्यते परेण ग्रन्थेनेत्याह -

अभ्युपेत्येति ।। यथावस्थितात्मविषयं परिनिष्ठितात्मरूपवस्तुबोधकं ज्ञानं नास्त्येव । कुतः ? **तत्प्रतिपादकप्रमाणाभावात्** । अयं भावः । किमत्र ज्ञानशब्देन विवक्षितम् ? किमदृष्टफलेषु कर्मसु प्रवृत्त्यर्थमपेक्षितं देहातिरिक्तात्मज्ञानम्, किं वा स्वतन्त्रमेव पुरुषार्थसाधकमिति ? यदि पूर्वः कल्पः, तत्रोमिति ब्रूमः । न हि कर्मणैव मुक्तिरिति पक्षस्य किञ्चिद् हीयते तेनाङ्गीकृतेन । अथ द्वितीयः कल्पः, न तादृशं ज्ञानं समस्ति । तत्प्रतिपादकप्रमाणाभावात् । न तावत् प्रत्यक्षादिना तादृशं ज्ञानं संभवति । आत्मनः प्रत्यक्षादेरविषयत्वाभ्युपगमात् । तत एव तज्ज्ञानस्यापि प्रत्यक्षविषयत्वाभावात् । न च तत्र वाक्यरूपं प्रमाणं क्रमते । तस्य कुत्राप्यदर्शनादिति ।।

प्रमाणवाक्याभावमेव दर्शयति **यावत्यश्चेति** । श्रुतयः स्मृतयश्च यावत्यः सन्ति तावत्यः सर्वा उरुयत्नेन तात्पर्येण **कर्मैव विदधति** । न तु आत्मवस्तु प्रतिपादयन्ति मोक्षार्थम् । न च क्वचिदपि श्रुतिस्मृतिवाक्यानां विधिसंस्पर्शमन्तरेण व्यापारो दृष्टः । अतः केवलवस्तुप्रतिपादकवाक्याभावात् कर्मविधानेनैव सर्वेषां वाक्या-नामुपक्षयदर्शनात् कर्मैव मोक्षं प्रति भूरिसाधनं पुष्कलोपाय इत्यवगम्यते इत्यर्थः ।।१४।।

श्रुतिस्मृतिषु ज्ञानविधिवाक्यं नैवोपलभ्यते -

अत्र सिद्धान्ती शङ्कते **स्यादिति** ।। अस्त्येव तात्पर्येणात्म-ज्ञानमपि विहितम् । अतोऽत्र प्रमाणासंभवाशङ्का भवदपराधात् अज्ञानरूपादित्युत्पश्याम इत्यर्थः । तत्र पूर्ववाद्याह - **तत्रेति** । **'यतः'** इति तु श्लोकार्धेन संबन्धनीयम् ।।

यतः यत्कारणं श्रुतौ स्मृतौ वा ज्ञानस्य विधिं यत्नतो वीक्षमाणोऽपि न पश्यामि, सर्वत्र तु क्रियाविधिमेव पश्यामि । अतः 'यदुक्तं भवता तत्र' इति संबन्धः । ननु श्रुतिस्मृतिबाह्यानामपि ज्ञाने प्रवृत्तिर्दृष्टा, अतोऽत्रापि

विषये कुत्राप्यन्यत्र विधिः स्यात् इति शङ्कयित्वा ब्रवीति - **'विश्वासो नान्यतोऽस्ति नः'** इति । वेदप्रमाणकानां नैतादृशी प्रवृत्तिः संभवति शब्दमात्रगम्येऽर्थे । न चात्र सुगताद्यागमानुसारिणां प्रवृत्तिरुदाहार्या भवति इत्यभिप्रायः ।।१५।।

अविधिना कृतं न परलोकफलाय -

ननु कुतोऽन्यतो विश्वासाभावः ? न हि क्षुधादिनिवृत्तिमन्वय-व्यतिरेकाभ्यां दृष्ट्वा जना भोजनादौ न प्रवर्तन्ते । तद्वदिहापि विधिं विनैव अज्ञाननिवृत्त्यर्था प्रवृत्तिः किं न स्यात् ? - इति शङ्कोत्तरत्वेन श्लोकान्तरमवतारयति । **'तत्र । यतः'** इत्यन्तेन ।।

अन्तरेणेति ।। संपरेयते इति संपरायः परलोकः तत्प्रयोजनः साम्परायिकः साधनविशेषः । यस्तु मोहात् विधिमन्तरेण शाब्दविधिं विना स्वाभ्यूहसिद्धमेव पारलौकिकं कर्म कुर्यात्, तत् तस्य कर्म न कस्मैचित् उपकाराय भवेत् । न पुरुषार्थसाधकं भवेत् । तत्र दृष्टान्तः 'भस्मनीव हुतं हविः' इति । यथा अङ्गारेषु होतव्यं वस्तु भस्मनि हुतं सत् व्यर्थमेव भवेत् तद्वत् - इत्यर्थः ।।१६।।

जैमिनिवचनप्रामाण्यादपि नास्ति ज्ञानम् -

न चेदं सर्वस्यैव वेदस्य क्रियाविधिपरत्वं स्वमनीषिकया अभ्यूहितम्, किं त्वाप्तवाक्यमवलम्ब्योच्यते । तस्मात् श्रद्धेयमित्याह - **अभ्युपगतेति** ।। अभ्युपगतं प्रामाण्यं यस्य सोऽयं जैमिनिरभ्युपगत-प्रामाण्यः । आप्तत्वेन उभयेषामप्यस्माकं संमत इति यावत् । प्रामाण्याभ्युपगमे हेतुसूचकं विशेषणम् 'वेदार्थवित्' इति । अभ्युपगतं प्रामाण्यं यस्य वेदस्य तदर्थवित् इति वार्थः । वेदार्थवित्त्वेन भवतामपि संमतस्य जैमिनेरनुशासनादपि क्रियापरत्वमेव वेदस्य न वस्तुपरतेति निश्चीयते इति शेषः ।।

किं तदनुशासनमिति ? तत्राह - **आम्नायस्येति** ।। 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. १-२-१) इति जैमिनीयं सूत्रम् । अस्मिन् हि सूत्रे इतोऽन्यथा क्रियार्थतोऽन्यथा प्रवृत्तानां वाक्यानामानर्थक्यम् आह जैमिनिः । तच्च उच्चैः साटोपम् अभिनिवेशपूर्वकम् आह । अत्राभिनिवेशाभावे हि आम्नायस्य क्रियार्थत्वम् इत्येतावदेव वदेत्, न तु कण्ठरवेण 'आनर्थक्यमतदर्थानाम्' इत्यपि इति भावः । यद्यपि पूर्वपक्षसूत्रमिदम्, तथापि 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (जै. १-२-६) इति सिद्धान्तसूत्रे अर्थवादानां क्रियास्तुत्यर्थेन विध्येकवाक्यत्वं वर्णयतो भगवतो जैमिनेः केवलवस्तुप्रतिपादनपरं वेदवाक्यं नास्ति ; अस्तित्वेऽपि केवलं जपार्थत्वमेव तस्य न तु बोधकतया प्रामाण्यम् इत्यत्रैव तात्पर्यमवसीयते इति पूर्वपक्षिणोऽभिप्रायः ।।१७।।

मन्त्रवर्णाच्च -

अपौरुषेयवचनोदाहरणार्थमुत्तरश्लोक इत्यभिप्रायेणाह - **मन्त्रवर्णाच्चेति** ।।

मन्त्रवर्णमेवोदाहरति - **कुर्वन्नेवेति** ।। **वाजसनेयिनां संहितोपनिषदि** ह्ययं मन्त्र आम्नायते । अध्यात्माधिकारे च पठितोऽयम् । अथ च निःशेषं पुरुषायुः कर्मण्येव अवासृजत् उत्ससर्ज, विनियोगं कृतवान् । अनेन हि मन्त्रेण यदि शतं समाः **संवत्सरान् जिजीविषेत्** तदा कर्माणि कुर्वन्नेव जिजीविषेत् इति **कर्म विहितम्** । **शतायुर्हि** पुरुषः । तेन वर्षशतात् परं केवलं ज्ञानमनुष्ठेयत्वेनात्र **विवक्षितम्** इत्युत्प्रेक्षितुमपि न शक्यत इति भावः ।।१८।।

ज्ञानं वाक्यप्रतिपाद्यमित्येतदेवासंभवि -

तदेवं ज्ञानविधिवाक्यादर्शनात्, आप्तवाक्यवेदवाक्याभ्यां सर्वस्यै-

वाम्नायस्य क्रियापरत्वावगमाच्च नास्ति श्रौतमात्मवस्तुविज्ञानमिति स्थितम् । अथेदानीं वस्तुनि वाक्यमात्रस्य प्रामाण्यमसंभावितम् इति दर्शयति - **ज्ञानिनश्चेति** । आत्मज्ञानादेव वेदान्तवाक्यजन्यात् कैवल्यम् इति वदन् ज्ञानी । तेन हि आत्मवस्तुनि न प्रत्यक्षादि प्रमाणम्, किं तु वेदान्तवाक्यमेव प्रमाणम् - इत्यभ्युपगम्यते । वाक्यं तु क्रियापद-प्रधानम् ; ततश्च अभिप्रेतज्ञानाभावः, सिद्धान्त्यभिमतस्य क्रिया-संबन्धरहितकेवलात्मज्ञानस्य अभावः । तादृशस्य ज्ञानस्य वाक्यप्रतिपाद्यत्वं नैव संभवतीत्यर्थः ॥

कथं क्रियापदप्रधानत्वं वाक्यस्येति ? एतद् विवृणोति - **विरहय्येति** । क्रियां क्रियापदं विना पदान्यपि न संहन्यन्ते । न हि 'दश दाडिमानि षडपूपाः' इत्यादीनां पदानां संहतिरस्तीत्याशयः । अत्र क्रियाशब्देन कर्तव्यं विवक्षितम् । न हि अनुष्ठेयेऽसति पदानि संहन्येरन्, सति तु तस्मिन् तादर्थ्येन संहन्यन्त इति युक्तम् ; यथा 'इदमनेनैवं कर्तव्यम्' इति - इति कर्मवादिनोऽभिप्रायः । इदमत्राकूतम् । आत्मनः पदार्थत्वे प्रत्यक्षादिप्रमाणान्तरविषयत्वं दुर्वारम् । वाक्यार्थत्वं त्वस्य नैव संभवति । वाक्यमात्रस्य अनुष्ठेयनिष्ठत्वात् । न ह्यनुष्ठेयवाचकपदं विना पदशतानामपि वाक्यत्वेन संघातो भवतीति । ननु पदानां संहतिः क्रियापदापेक्षैव भवतु ; तथापि वस्तुपरं वाक्यं किं न स्यात् ? नैतत् संभवि । न हि अपदं पदरहितं वाक्यं समस्ति संभवति यत् ज्ञानविधायकं कल्प्येत । पदसंघातस्यैव वाक्यत्वात् इत्यर्थः । अत्र सिद्धान्तिना ज्ञानविधानानभ्युपगमात् 'ज्ञानविधायकम्' इत्यस्य ज्ञानोपदेशकम् इत्यर्थः । अथवा पूर्वपक्षप्रारम्भ एव वस्तुबोधकं ज्ञानं सदपि मुक्तावकिञ्चित्करमिति वस्तुज्ञानपक्षस्य निराकृतत्वात् इह विधेयज्ञानमपि नास्तीत्युच्यते कर्मणो मुक्तिसाधकत्वेऽसहायकता-स्थापनार्थम् इति व्याख्येयम् । एवं हि योऽसौ 'अन्तरेण विधिम्'

(१-१६) इति मोक्षार्थप्रवृत्तेर्विध्यपेक्षतानियम उक्तः, तेनास्यैकवाक्यता भविष्यतीति ॥१९॥

---

५. ज्ञानाभ्युपगमेऽपि कर्मणो मुक्तिसाधनत्वमक्षतम्

(मूलम्)

ज्ञानाभ्युपगमेऽपि न दोषः । यतः -

कर्मणोऽङ्गाङ्गिभावेन स्वप्रधानतयाथवा ।
संबन्धस्येह संसिद्धेर्ज्ञाने सत्यप्यदोषता[1] ॥२०॥

(क्लेशापहारिणी)

विधेयज्ञानाभ्युपगमेऽपि समुच्चयत एव मोक्षः -

मुक्तिसाधनत्वेन वेदविहितं ज्ञानं नास्तीत्युक्तम् । अथ तादृश-ज्ञानाङ्गीकारेऽपि मुक्तेः कर्मसाधनत्वानपायात् न कोऽपि दोषः । अविधेयज्ञानस्यैव तु वाक्यप्रमाणकत्वं नास्तीति खल्वस्माकम् आग्रहः इत्याह - **ज्ञानाभ्युपगमेति** । कथं न दोषः ? - इत्याशङ्क्य तदुत्तरत्वेन श्लोकमवतारयति **'यतः'** इति ॥

कर्मण इति ॥ कर्मणो ज्ञानेन सह अङ्गाङ्गिभावेन संबन्धोऽस्मन्मतेऽपि संसिध्यति । कर्मणो ज्ञानमङ्गम् 'विद्वान् यजते' इत्यादिश्रुतिभ्यस्तथावगमात् । ज्ञानस्य वा कर्माङ्गम् । 'तमेतं

---

1. 'सत्यप्यदोषतः' इति पा. ॥

वेदानुवचनेन ब्राह्मणा विविदिशन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४-४-२२) इति श्रुतेः । स्वप्रधानतयैव वा कर्मणो ज्ञानेन संबन्धः । 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' (ई . ११) इति श्रुतेः । **यथोक्तमभियुक्तैः** - 'न च ज्ञानविधानेन कर्मसंबन्धवारणम् । प्रत्याश्रमवर्णनियतानि नित्यनैमित्तिककर्माण्यपि पूर्वकृतदुरितक्षयार्थम् अकरणनिमित्तानागतप्रत्यवायपरिहारार्थं च कर्तव्यानि । न च तेषां भिन्नप्रयोजनत्वात्, भिन्नमार्गत्वाच्च बाधविकल्पपरस्पराङ्गाङ्गि-भावाः संभवन्ति' (तं. वा. १-३-८-२७) इति । तदेवमनुक्रमेणोक्त-प्रकाराणाम् अन्यतमस्य स्वीकारे कर्मणो ज्ञानेन सह मुक्तिसाधनत्वेन संबन्धस्य समुच्चयस्य संसिद्धेः इह कर्मवादिनां पक्षे अदोषता नैव दोषवत्त्वं स्यात् । ज्ञानमात्रेण मुक्तिरिति तु नैव नः प्रापयितव्यम् इति भावः ॥२०॥

---

६. पूर्वपक्षोपसंहारः

(मूलम्)

यस्मात् ज्ञानाभ्युपगमेऽनभ्युपगमेऽपि न ज्ञानान्मुक्तिः -

अतः सर्वाश्रमाणां हि वाङ्मनःकायकर्मभिः ।
स्वनुष्ठितैर्यथाशक्ति मुक्तिः स्यान्नान्यसाधनात् ॥२१॥

(क्लेशापहारिणी)

सर्वाश्रमाणामपि कर्मभिर्मोक्षः -

यथावर्णितपूर्वपक्षोपसंहारार्थ उत्तरः श्लोकः । तत्र अतःशब्दा-

पेक्षितं पूरयन्नाह - **यस्मात् ज्ञानाभ्युपगमेऽपीति** । आत्मज्ञानाभ्युपगमे तावन्न ज्ञानान्मुक्तिः । केवलवस्तुबोधकस्य तस्य कृत्याभावात् । अभ्युपगमस्तु तुष्यतु दुर्जनन्यायेनैव, यतस्तादृशं ज्ञानं निष्प्रमाणकम् । विधेयस्य तूपासनादिरूपस्य तस्य कर्मणा सहाङ्गाङ्गिभावेन समप्रधानतया वा समुच्चितस्यैव साधनत्वात् केवलस्य च नित्यकर्माननुष्ठानोपात्तप्रत्यवायदूषितस्य मुक्तिप्रदानेऽनीश्वरत्वात् । आत्मज्ञानानभ्युपगमेऽपि प्रपञ्चितप्रकारेण केवलेन कर्मणैव मुक्तेः सुसाध्यत्वात् न केवलज्ञानान्मुक्तिः कस्मिंश्चिदपि पक्षे इति स्थितं यस्मात् इत्यर्थः ॥

अत इति ॥ अतः सर्वाश्रमाणाम् ; सर्वाश्रमिणाम् इत्यर्थः । 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः' (गौ. ध. २-२-२९) इति आश्रमशब्दस्याश्रमिपरत्वेन प्रयोगदर्शनात् । सर्वेषामप्यधिकारिणां स्वाश्रमविहितैः वाङ्मनःकायकर्मभिः यथाशक्ति स्वनुष्ठितैः ज्ञानेन समुच्चितैरसमुच्चितैर्वा मुक्तिः स्यात् । नान्यसाधनात् केवलात्, वस्तुतन्त्रज्ञानरूपात् उपासनारूपाद्वा इत्यर्थः । अत्र वाङ्मनःकायकर्मभिः इति श्रुतिस्मृतिविधानस्य त्रिविधकर्मविषयतामाह । 'यथाशक्ति' इत्यनेन सत्यां शक्तौ कर्मत्यागोऽनर्थकरः, तदनुष्ठानं तु श्रेयस्करम् इति सूचयतीति ध्येयम् ॥२१॥

---

७. सिद्धान्तोपक्रमः - कर्म न मोक्षसाधनम्

(मूलम्)

असदर्थप्रलापोऽयमिति दूषणसंभावनायाह -

इति हृष्टधियां वाचः स्वप्रज्ञाऽऽध्मातचेतसाम् ।
घुष्यन्ते यज्ञशालासु धूमानद्धधियां किल ॥२२॥

दूषणोपक्रमावधिज्ञापनायाह -

अत्राभिदध्महे दोषान् क्रमशो न्यायबृंहितैः ।
वचोभिः पूर्वपक्षोक्तिध्वातिभिर्नातिसंभ्रमात् ॥२३॥

(क्लेशापहारिणी)

पूर्वपक्ष्युपहासः -

अथ मूले पूर्वपक्षस्य असारतां प्रकटयितुमारभते । तत्र किमर्थमुत्तरश्लोके पूर्वपक्षिण उपहस्यन्ते इति ? तत्राह - **असदर्थेति** । एते पूर्वपक्षिणः न सन्तमर्थमुपदिशन्ति । किं त्वसन्तमेवार्थं प्रलपन्ति । अतस्तत्र दोषाः संभवन्तीति वक्तुं श्लोकमाह इत्यर्थः ॥

इति हृष्टधियामिति ॥ इति एवंप्रकारा 'वाचः' इति संबन्धः । एषणात्यागाद्यायासं विनैव केवलेन कर्मणा मुक्तिः सिध्यतीति हृष्टा धीर्येषां कर्मवादिनां त एते हृष्टधियः । अतोऽसदर्थं प्रलपन्तीति न चित्रमिति भावः । शान्तदर्पा एव हि तत्त्वार्थं निर्णेतुं क्षमन्ते न हृष्टधिया दृप्ताः । अत एवैते 'स्वप्रज्ञाऽऽध्मातचेतसः' । येयं स्वभूता स्वाभ्यूहित-प्रक्रियाजनिता प्रज्ञा न तु शास्त्राचार्योपदेशजनिता, तया आध्मातम् उच्छूनतां गतं चेतः येषां ते तथोक्ताः । प्राज्ञमानिन इति यावत् । अनेन असमाहितचित्तत्वमपि हेतुरसदर्थप्रलापे इत्युक्तं भवति । 'धूमान-द्धधियाम्' इति सदर्थग्रहणे प्रतिबन्धकसद्भावसूचनार्थकं विशेषणम् । धूममार्गोपलक्षितक्षयिष्णुफलाशाप्रतिबद्धज्ञाना ह्येते । श्रुतिश्चात्र भवति 'अग्निमुग्धो हैव धूमतान्तः स्वं लोकं न प्रतिप्रजानाति' (तै. ब्रा. ३-

१०-११-१) इति । तदेवं कर्मफलमात्रात् तृप्तिः, पण्डितमानिता, कर्मफलाशाप्रतिबद्धविचारशक्तिता चेत्येतत् त्रितयं तेषामसदर्थ-प्रलापित्वे हेतुः । अत एतादृश्यो वाचः स्वगोष्ठीष्वेव शोभन्ते न तु विदुषां समीपे इत्युपहसति 'घुष्यन्ते यज्ञशालासु' इति । अत्र 'अविद्यायां बहुधा वर्तमानाः' (मुं. १-२-८), 'इष्टापूर्तं मन्यमाना वरिष्ठम्' (मुं. १-२-१०), 'नैषा तर्केण मतिरापनेया' (का. १-२-९), 'नाशान्तो नासमाहितः' (का. १-२-२४) इत्यादिश्रुतयोऽप्यनुसंधेयाः ।।२२।।

दूषणाभिधानप्रतिज्ञा -

अथेदानीं दूषणमुपक्रम्य केवलकर्मवादः, वस्तुबोधकवाक्य-निरासवादः, कर्मज्ञानसमुच्चयवादश्च इति वादत्रयं क्रमाद् दूषयिष्यत इत्याह - **दूषणेति** ।।

अत्रेति । अत्र पूर्वपक्षे दोषान् क्रमशः अभिदध्महे ब्रूमः । न्यायबृंहितैः युक्तिपरिपुष्टैः । अत/एव पूर्वपक्षोक्तिघातिभिः तदुक्तिखण्डनसमर्थैरेव वचोभिर्ब्रूमः । एतदपि दूषणं न यथाकथञ्चित् पूर्वपक्षो दूषयितव्य इति व्यसनितया, किं तु तत्पक्षस्यासारता-प्रकटनद्वारेण सिद्धान्ते जिज्ञासूनामादरजननार्थमेवेति भावेनाऽऽह - 'नातिसंभ्रमात्' इति ।।२३।।

(मूलम्)

चतुर्विधस्यापि कर्मकार्यस्य मुक्तावसंभवान्न मुक्तेः कर्म-कार्यत्वम् -

अज्ञानहानि[1]मात्रत्वान्मुक्तेः कर्म न साधनम् ।
कर्मापमार्ष्टि नाज्ञानं तमसीवोत्थितं तमः ।।२४।।

1. 'हानमात्रत्वात्' पा. ।।

(क्लेशापहारिणी)

मुक्तौ कर्मकृत्यं नास्ति -

उत्तरश्लोकाभिप्रायविशदीकरणायाऽऽह - **चतुर्विधस्यापीति** । उत्पत्त्यादिलक्षणस्य चतुर्विधस्यापि कर्मकार्यस्य कर्मव्यापारस्य अग्रे (१-५३) वक्ष्यमाणस्य इत्यर्थः । तस्य मुक्तौ असंभवात् न मुक्तेः कर्मकार्यत्वं कर्मफलत्वम् इत्यर्थः ।।

मुक्तिः कर्मव्यापारानपेक्षेति कथम् इत्यत आह - **अज्ञानहानिमात्रत्वादिति** ।। मुक्तिर्नाम स्वरूपेणावस्थानमात्मनः । तच्च नित्यसिद्धमिति तदज्ञानमात्रेण स्वरूपेऽनवस्थितिः । तस्मादज्ञानहानिरेव मुक्तिरित्युपचर्यते । तच्चाज्ञानहानं ज्ञानादेवेति लोकप्रसिद्धेरवगम्यते । अतो मुक्तेः कर्म न साधनम् । नन्वज्ञानहानमपि कर्मणैव भविष्यति । तत्राऽऽह - 'कर्मापमार्ष्टि नाज्ञानम्' इति । तत्र हेतुगर्भं निदर्शनमाह 'तमसीवोत्थितं तमः' इति । यथा तमसि रज्ज्वाद्यज्ञाने सति उत्थितम् उत्पन्नं स्थितं च तमः भ्रान्तिज्ञानं रज्जुसर्पादिज्ञानम् न स्वमूलमज्ञानं हन्तुं क्षमम् तद्वदित्यर्थः । अत्र तमसीवोत्थितं तमः इति अज्ञानापेक्षोत्पत्तिमत्त्वम् अज्ञानापेक्षस्थितिमत्त्वं चेत्येतदुभयमपि विवक्षितं कार्याज्ञानस्य । ज्ञानं हि स्वोत्पत्तौ अज्ञानं समपेक्षमाणमपि स्वोत्पत्तिमात्रेणाज्ञानं निवर्तयति कर्म तु न केवलं स्वोत्पत्तये किं तु स्वस्थितयेऽप्यज्ञानं समपेक्षत इति न जातुचिदज्ञाननिवर्तनायालमिति । एतच्च परस्तात् (१-३५) स्फुटीकरिष्यते । अज्ञानहानिमात्रत्वात् इति 'मात्र'पदोपादानं तु अज्ञाननिरासात् परमपि उपासनादिरूपं कर्म अपेक्ष्यत इति मतनिरासायेति बोध्यम् । एतदपि स्वावसरे (१-६७) निरूपयिष्यत इत्यास्तां तावत् ।।२४।।

(मूलम्)

कर्मकार्यत्वाभ्युपगमेऽपि दोष एव -

एकेन वा भवेन्मुक्तिर्यदि वा सर्वकर्मभिः ।
प्रत्येकं चेद् वृथान्यानि सर्वेभ्योऽप्येककर्मता ॥२५॥

(क्लेशापहारिणी)

मुक्तेः कर्मफलत्वाङ्गीकारे दोषः -

कर्मव्यापाराभावात् मुक्तेर्न कर्मफलत्वमित्यभिहितम् । इदानीं कर्मफलत्वमङ्गीकृत्यापि दोषादनिस्तार इत्याह - **कर्मकार्यत्वाभ्युपगमेऽपीति ॥**

एकेनेति । किमेकेनैव कर्मणा मुक्तिर्भवेत्, किं वा सर्वैरपि मिलितैरनुष्ठितैरिति विकल्पः । किं चातो यद्यादिमः कल्पः, यदि वा द्वितीय इति ? अत आह - **प्रत्येकं चेत्** , एकेनैव कृतेन निष्पाद्या मुक्तिश्चेत् अन्यानि कर्माणि वृथा स्युः । न हि तदा एकस्यैव निरपेक्षसाधनत्वेन तदितरेषां विधानं सार्थकं भवेदिति भावः । सर्वेभ्यो मिलितेभ्यो मुक्तिर्निष्पाद्या चेत् सर्वेषामपि समुच्चितानामेककर्मता प्राप्नोति । फलैकत्वाभ्युपगमात्, एकनियोगविषयत्वाच्च । तच्चायुक्तम् । प्रत्येकं फलभेदश्रवणात्, भिन्नाधिकारिककर्मणामेककर्मत्वानुपपत्तेश्च इति भावः ॥२५॥

(मूलम्)

सर्वप्रकारस्यापि कर्मण उत्पत्तित एव विशिष्टसाध्याभिसंबन्धान्न पारिशेष्यन्यायसिद्धिः -

दुरितक्षपणार्थत्वान्न नित्यं स्याद्विमुक्तये ।
स्वर्गादिफलसंबन्धात्काम्यं कर्म तथैव न ॥२६॥

(क्लेशापहारिणी)

पारिशेष्यन्यायेनापि मुक्तिर्न कर्मफलम् -

ननु यस्य कर्मणः फलं नाभिहितमस्ति तस्य मुक्तिफलत्वं कल्पयिष्यामः । अन्यथा विधानानुपपत्तेः इत्याशङ्क्य प्रत्याचष्टे **सर्वप्रकारस्यापीति** ।। अत्रेदं बोध्यम् । विधिश्चतुर्विधः - उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रं ज्ञापयन् उत्पत्तिविधिरित्युच्यते । तस्याङ्गसंबन्धं ज्ञापयन् स एव विनियोगविधिरिति, फलसंबन्धज्ञापनेन पुरुषं प्रवर्तयन् अधिकारविधिरिति, क्रमान्तं च सर्वमुपसंहृत्यानुष्ठापयन् प्रयोगविधिरिति । तत्र यद्यप्युत्पत्तिविधिवाक्यादेव न कर्मणः स्वासाधारणफलाभिसंबन्धः प्रतीयते, तथापि तस्यैव विधेर्विनियोगादिरूपेणाप्यवस्थानात् उत्पत्तित एवेत्युक्तमिति । तथा च उत्पत्तित एवेति विधानत एवेत्यर्थः । अयमाशयः । यद्यद् विधीयते कर्म तस्य तस्य स्वफलसंबद्धस्यैव विधानं दृश्यते । यत्रापि विश्वजिदादिषु न फलश्रवणमस्ति तत्रापि 'स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात्' इति (जै. ४-३-१५) स्वर्ग एव कर्मफलत्वेनाभिहितो **जैमिनिना** । तस्मान्न तदस्ति कर्म यस्य मुक्तिः फलमिति कल्प्येत । तदेवमुत्पत्तित एव विशिष्टसाध्याभिसंबन्धात् स्वासाधारणफलसंबद्धत्वात् सर्वप्रकारस्यापि कर्मणः न पारिशेष्यन्यायसिद्धिः । पूर्वपक्षी हि पारिशेष्यन्यायमवलम्ब्य नित्यकर्मफलं मुक्तिरिति कल्पयति । नित्यानां कर्मणां चोदितानां फलं न श्रुतम् । तेषां च फलेन भाव्यम् । इतरथा चोदनाप्रवृत्त्यनुपपत्तिप्रसङ्गात् । सर्वस्यापि कर्मणः स्वं स्वं फलं श्रुतमस्ति । सर्वस्यापि श्रुतस्य फलस्य स्वानुरूपसाधनभूतं कर्म श्रुतमेवेति नेतरकर्मफलव्यतिरेकेण कल्पनायोग्यं फलमस्ति । परिशिष्टश्च मोक्षः । स च साधनमपेक्षत इति फलाकाङ्क्षिणां

नित्यानां कर्मणां फलत्वेन कल्पयितव्य इति । तदेतन्निराचष्टे **'पारिशेष्यन्यायासिद्धि'रिति** । अभ्युपगम्यापि फलाश्रवणं न मोक्षः परिशिष्येत । विश्वजिन्न्यायेन स्वर्गस्यैव कल्पयितव्यत्वात् । न च नित्यस्य फलासिद्धिः । फलस्य ग्रन्थ एव निर्देक्ष्यमाणत्वादिति भावः ।।

दुरितक्षपणार्थत्वात् इति । 'येन केनचन यजेतापि वा दर्वीहोमेनानुपहतमना एव भवति' (?) इति श्रुतेर्दुरितक्षपणं तावत् फलं वेदसिद्धम् इत्यर्थः । एतच्च फलाभिसन्धिरहितानां नित्यकर्मणां ज्ञानार्थत्वमभिप्रेत्योक्तम् । तथा च 'कर्मणा पितृलोकः' (बृ. १-५-१६) इति श्रुत्या अविरोधो द्रष्टव्यः ।।

साभिसंधीनां 'ब्रह्मा विश्वसृजः' (मनु. १२-५०) इत्यादिफलस्य शिष्टैः कण्ठरवेण स्मृतत्वात् । न च तत् काम्यकर्मफलम् । कामिनां देवसार्ष्टितालक्षणस्य फलस्योक्तत्वात् । यद्यपि 'नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृशेत्' (१-१३) इत्यत्र पूर्वपक्षिणा प्रत्यवायपरिहार एव नित्यानुष्ठानफलत्वेनोक्तः, तथापि स्वाभिप्रायेणैतद्वचनं दुरितक्षपणार्थत्वादिति । प्रत्यवायपरिहारस्य केवलस्याभावरूपत्वात् फलत्वानुपपत्तेः कृतस्य कर्मणः फलदातृत्वाभावे च वृथायास-फलकं कर्म वेदो विदधातीत्यन्याय्यकल्पनापत्तेः । अतो विधान-सामर्थ्यादेव नित्यानामपि कर्मणां फलवत्त्वमेव न्याय्यम् । तत्र चोदाहृतश्रुतिः प्रमाणम् । 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' (गी. १८-४), 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफल-मनुभूय ....' (गौ. सू. २-२-२९) इत्यादिस्मृतयश्च - इति भावः । अथ कथञ्चित् प्रत्यवायपरिहारोऽपि फलत्वेनोपपाद्यते, तर्हि तदुपलक्षणार्थत्वमस्तु दुरितक्षपणस्य । मीमांसकैरप्येवमुभय-फलाङ्गीकारात् । यथाहुः - 'नित्यनैमित्तिककर्माण्यपि पूर्व-

कृतदुरितक्षयार्थम् अकरणनिमित्तानागतप्रत्यवायपरिहारार्थं च कर्तव्यानि' (तं. वा. १-३-८-२७, पृ. २८८) इति । सर्वथापि तु दुरितक्षपणार्थत्वात् नित्यं कर्म विमुक्तये न स्यात् इत्यर्थः ।।

काम्यमपि कर्म अस्माकं मते तथैव नित्यकर्मवदेव न मुक्तये । कुतः ? तस्य स्वर्गादिफलसंबन्धात् । तत्तत्फलसाधनत्वेनैव हि काम्यानि विधीयन्ते इत्यभिप्रायः । यद्यपि पूर्वपक्षिणा काम्यं कर्म मुमुक्षुणा त्याज्यमित्येवोक्तं (१-१०) देवत्वादिप्राप्तिसाधनत्वात् (१-११) न मुक्तिसाधनमिति, तथापि पारिशेष्यासिद्ध्युपपादनाय तदभ्युपगतमेवात्रानूद्यत इत्यदोषः ।।२६।।

(मूलम्)

प्रमाणासंभवाच्च -

साध्यसाधनभावोऽयं वचनात्पारलौकिकः ।
नाश्रौषं मोक्षदं कर्म श्रुतेर्वक्त्रात्कथञ्चन ।।२७।।

(क्लेशापहारिणी)

मुक्तेः कर्मफलत्वे नैव श्रुतिवचनमस्ति -

ननु यद्यपि प्रत्येकं कर्मणां विशिष्टसाध्यसंबद्धत्वं श्रूयते तथापि नासंभावितमिदं कस्यचित् कर्मणः फलं स्यान्मोक्ष इति । न ह्यसर्वज्ञेनेदं शक्यप्रतिज्ञानं यन्नास्त्येव किञ्चिदपि कर्म यत्साध्यो मोक्षो न भवेदिति । तत्राह - **प्रमाणासंभवाच्च** इति । न केवलं कर्मणां तत्तत्साध्याभिसंबन्धात्, किं तु प्रमाणाभावाच्चैवं ब्रूमः इत्यभिप्रायः ।।

कथमिति ? आह - **साध्यसाधनभावोऽयम्** इति । अयं पारलौकिकः साध्यसाधनभावः वचनादेवावगन्तव्यः, न त्वनुमानगम्यः । भवद्भिरपि खल्वेतदेवोपगतं विधिमन्तरेण कृतं साम्परायिकं नोपकाराय स्यात् (१-१६) इति वदद्भिः । न त्वहं श्रुतेर्मुखात् मोक्षदं कर्म

विहितम् अश्रौषम् । न ह्यस्ति श्रुतिवचनं मोक्षार्थिना इदं कर्म कर्तव्यम् इति । स्वमनीषिकयैव तु केवलमभ्यूहितं संभवेत् किञ्चित् कर्म मोक्षसाधकम् इति । अतो नायं शास्त्रार्थः । अत एव च वैदिकैरनुपादेयः इत्यभिप्रायः ॥२७॥

(मूलम्)

अभ्युपगताभ्युपगमाच्च श्वश्रूनिर्गच्छोक्तिवद् भवतो निष्प्रयोजनः प्रलापः -

निषिद्धकाम्ययोस्त्यागस्त्वयापीष्टो यथा मया ।
नित्यस्याफलवत्त्वाच्च न मोक्षः कर्मसाधनः ॥२८॥

(क्लेशापहारिणी)

ननु मोक्षं प्रति साक्षात्साधनत्वाभावेऽपि कर्मणाम्, तैर्यथावर्णितविधयानुष्ठितैः सर्वप्रतिबन्धविगमे सति संसारहेत्वभावादेव मोक्षः सेत्स्यति । काम्यनिषिद्धवर्जनपुरःसरं नित्यानुष्ठानात् सर्वानर्थहानिः स्यात्, ततश्च स्वात्मन्यवस्थानं मुक्तिरिति खलूक्तमस्माभिः । तत्र किं दूषणमुक्तं भवता ? - इत्याशङ्क्य, अत्रापि श्लोकद्वयम् उक्तशङ्कापरिहारार्थमावर्तनीयम् - **'साध्यसाधनभावोऽयम्'** (१-२७), **'निषिद्धकाम्ययोस्त्यागः'** (१-२८) - इति च । न ह्यस्ति शास्त्रवचनं किञ्चित् मोक्षार्थिना इत्थं कर्तव्यमिति । अतो नायं शास्त्रार्थ इत्यतः उक्तानुष्ठानात् प्रतिबन्धनाशद्वारेणापि मोक्षो न भवेत् - इत्याद्यश्लोकाभिप्रायः । न केवलं प्रमाणाभावात् एवमुच्यते, त्वदभ्यूहस्य निष्प्रयोजनत्वाच्च - इति द्वितीयश्लोकाभिप्रायः ॥

तदेव निष्प्रयोजनत्वं प्रपञ्चयितुं श्लोकमवतारयति - **अभ्युपगताभ्युपगमाच्चेति** । य एव मया अभ्युपगतः स एव त्वयाप्यभ्युपगतः काम्याकरणादिः 'अकुर्वतः क्रियाः काम्याः

निषिद्धास्त्यजतस्तथा' (१-१०) इति ब्रुवता । न त्वयमभ्युपगमोऽस्मत्पक्षस्य बाधकः, त्वत्पक्षस्य वा साधकः । न हि निषिद्धकाम्ययोस्त्यागमात्रं मोक्षकारणम् इत्यभ्युपगन्तुं शक्यते । वक्तव्यदोषश्चायमभ्युपगमोऽध्यायान्ते 'योऽयं काम्यानां प्रतिषिद्धानां च त्यागः' (१-८१) इत्यादिना सविस्तरम् । अतो निष्प्रयोजनोऽयं प्रलापः । निष्प्रयोजनत्वे निदर्शनम् **'श्वश्रूर्निर्गच्छोक्तिवत्'** इति । यथा भिक्षार्थिने भिक्षां प्रत्याख्यातवतीं स्नुषां निर्भर्त्स्य श्वश्रूः पुनस्तमाहूयाऽऽह 'नास्त्यस्या भिक्षानिराकरणेऽधिकारः, अहमेव तु स्वामिनी गृहे ; निर्गच्छेदानीम्, नास्ति भिक्षा' इति, एवमेवास्मदभिप्रायमेवानुवदसि त्वम्, न तु किञ्चिदधिकं साध्नोषि - इत्याशयः ॥

ननु नित्यानुष्ठानमपि मया मुक्त्यर्थमित्यधिकमुक्तम् । तत्राह - **नित्यस्येति** । नित्यस्य निष्फलत्वमेवोक्तं त्वया 'नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृशेत्' (१ - १३) इति । न हि प्रत्यवायासंस्पर्श एव मुक्तिः । स्वात्मन्यवस्थानं हि मुक्तिर्नाम । न च तस्यैकस्यैव कर्मणः प्रत्यवायपरिहारार्थत्वं मुक्त्यर्थत्वं चेति युक्तम् । तत्र प्रमाणाभावादित्युक्तदोषात् । तत्कल्पने च वाक्यभेदप्रसङ्गात् । ननु स्वात्मन्यवस्थानमेव मुक्तिः, तच्चावस्थानं प्रतिबन्धक्षयादित्युच्यतेऽस्माभिः । न । आत्मन्यवस्थानस्य नित्यसिद्धत्वेन साधनानपेक्षत्वात् । अतः सर्वथापि न मोक्षः कर्मसाधनः - इत्यभिप्रायः ॥२८॥

---

८. अज्ञानविनाशकत्वेनापि न मोक्षसाधनं कर्म

(मूलम्)

एवं तावत् 'मुक्तेः क्रियाभिः सिद्धत्वात्' (१ - ९) इति निरस्तोऽयं पक्षः । अथाधुना सर्वकर्मप्रवृत्तिहेतुनिरूपणेन यथावस्थितात्मवस्तुविषयकेवलज्ञानमात्रादेव सकलसंसारानर्थ-निवृत्तिरितीमं पक्षं द्रढयितुकाम आह ।।

इह चेदं परीक्ष्यते - किं यथा प्रतिषिद्धेषु यादृच्छिकेषु च कर्मसु स्वाभाविकस्वाशयोत्थनिमित्तवशादेव 'इदं हितम्, इदम् अहितम्' - इति[1] परिकल्प्य मृगतृष्णिकोदकपिपासुरिव लौकिकप्रमाणप्रसिद्धान्येव साधनान्युपादाय हितप्राप्तयेऽहित-निरासाय च स्वयमेव प्रवर्तते निवर्तते च तथैवादृष्टार्थेषु काम्येषु नित्येषु च कर्मसु, किं वा अन्यदेव तत्र प्रवृत्तिनिवृत्तिनिमित्तम् ? - इति ।।

किञ्चातो यद्येवम् ? शृणु । यदि तावद् यथावस्थित-वस्तुसम्यग्ज्ञानं प्रमाणभूतं लौकिकं आगमिकं वा प्रवृत्ति-निमित्तमिति निश्चीयते, निवृत्तिशास्त्रं च नाभ्युपगम्यते, तदा हताः कर्मत्यागिनः । भ्रान्तिविज्ञानमात्रावष्टम्भात्, अलौकिक-प्रमाणोपात्तकर्मानुष्ठानत्यागित्वाच्च । अथ मृगतृष्णिकोदक-पिपासुप्रवृत्तिनिमित्तवदयथावस्तुभ्रान्तिविज्ञानमेव सर्वप्रवृत्ति-निमित्तम्, तदा वर्धामहे वयं, हताः स्थ यूयम् इति ।।

1. 'इति' इत्यनन्तरं 'विशेषान्' इति अधिकं पा.

हितं संप्रेप्सतां मोहादहितं च जिहासताम् ।
उपायान्प्राप्तिहानार्थान् शास्त्रं भासयतेऽर्कवत्　॥ २९ ॥

(क्लेशापहारिणी)

कर्मप्रवृत्तिहेतुनिरूपणप्रतिज्ञा -

अथागामिग्रन्थस्य संबन्धकथनार्थम् अतीतग्रन्थार्थसंक्षेपमाह **'एवं तावत्'** इति । 'कर्मापमार्ष्टि नाज्ञानं तमसीवोत्थितं तमः' (१-२४) इति कर्मणो मुक्तिसाधनत्वासंभवे हेतुः सूत्रितः । तत्रायं हेतुरसिद्ध इति मा शङ्कीति तदुपपादनाय सर्वकर्मप्रवृत्तिहेतुनिरूपणं क्रियते । तेन च निरूपणेन सर्वप्रकारेऽपि लौकिके वैदिके वा कर्मणि प्रवृत्तिरज्ञानहैतुकीति सेत्स्यति । ततश्च कर्मणः स्वहेतुभूताज्ञानविनाशनासमर्थत्वम्, अर्थात् आत्मवस्तुविषयात् केवलज्ञानादेव सकलसंसारनिवृत्तिः, न तु कर्मापेक्षात् प्रसंख्यानाद्यपेक्षाद्वा इत्येतदपि दृढीकृतं भविष्यति । यद्यपि अज्ञानहेतुकज्ञानवत् कर्मणोऽप्यज्ञाननिवर्तकत्वमस्तु इत्यपि शङ्कयितुं शक्यते, तथापि तदुत्तरत्र समाधातव्यमितीह नोत्थाप्यते सा शङ्का । इह तु निवृत्तिशास्त्रमनभ्युपगम्य 'शास्त्रचोदितत्वादेव कर्म प्रभवेदज्ञानप्रहाणाय' इति शङ्काव्याधिरेव भिषज्यते सर्वप्रवृत्तिनिमित्तनिरूपणेनेत्यदोषः । तदेवं कर्मणोऽज्ञाननाशनासामर्थ्ये स्थिते ज्ञानस्यैव तत्र प्रभुत्वम् - इति ज्ञानवादिपक्षं द्रढयितुम् उत्तरग्रन्थ इत्याह - **अथाधुनेत्यादि** ॥

प्रवृत्तिहेतुर्न निरूपणीय इति पूर्वपक्षः -

ननु किमस्ति निरूपणीयमत्र ? लौकिकेषु कर्मसु तावत् प्रत्यक्षादिप्रमाणसिद्धमेव यथाप्रसिद्धसाधनैः प्राप्तुं परिहर्तुं वा प्रवर्तते लोकः । शास्त्रीयेषु तु कर्मसु शास्त्रप्रचोदित एव प्रवर्तत इति युक्तम् ; तत्र साध्यसाधनसंबन्धस्य प्रत्यक्षादिनानवगमात् । शास्त्रैक-

गम्यत्वाच्च । तथा हि पारमर्षं सूत्रम् 'चोदनालक्षणोऽर्थो धर्मः' (जै. १-१-२) इति । तदेवं नास्त्येवात्र संशयः, यस्य निवारणाय कर्महेतुनिरूपणं क्रियेत । नापि प्रयोजनमस्य निरूपणस्य संभावयामः । विनैव निरूपणं लौकिकेषु वैदिकेषु च हिताहितेषु प्रवृत्तिनिवृत्त्योः सिद्धत्वात् । न हि पुरुषोत्प्रेक्षामात्रसाध्यः आमुष्मिकफलस्य कर्मणः कार्याकार्यत्वविनिश्चयः । उक्तं हि भगवता 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ' (गी. १६ - २४) इति । आह च पूर्वमीमांसा - भाष्यकारः 'तस्माच्चोदनालक्षणः श्रेयस्करः' (शा. भा. १ - १ - २) इति । तद्वार्तिककारश्च 'श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः । चोदनालक्षणैः साध्या तस्मात्तेष्वेव धर्मता' ।। (श्लो. वा. १-२-१९१, पा. २८) इति । तस्मात् संशयप्रयोजनरहितत्वान्न कर्मप्रवृत्तिहेतुर्निरूपणमर्हतीति ।।

कर्मप्रवृत्तिहेतुः सन्दिग्धः -

अत्राह सिद्धान्ती - **इह चेदं परीक्ष्यत** इति । अयमाशयः । सत्यम् संन्दिग्धं सप्रयोजनमेव च परीक्षामर्हतीति । तथाभूतमेव त्वत्रापि परीक्षणीयम् । कथम् ? संदेहस्तावत् प्रदर्श्यते । प्रतिषिद्धेषु तावत् कर्मसु अभक्ष्यभक्षणादिषु यादृच्छिकेषु च यदृच्छाप्राप्ताहारविहारादिषु कर्मसु स्वाभाविकस्वाशयोत्थनिमित्तवशादेव - स्वाभाविकं मनुष्यस्वभावादेव प्राप्तं न त्वाप्तवाक्यशास्त्रचोदनादिपरिप्राप्तं **स्वाशयोत्थं** स्वान्तःकरणे समुत्पतितं रागद्वेषादिरूपं यन्निमित्तम्, **तद्वशादेव तत्प्रेरित एव** - **स्वयं** प्रवर्तते निवर्तते च इति प्रसिद्धं प्रवृत्तिनिवृत्तिनिमित्तोपादानम् । **ननु तादेव** निमित्तं कस्मात् समुत्तिष्ठतीत्यत आह - **इदं हितम्, इदम् अहितम् इति परिकल्प्येति** । हिताहितपरिकल्पनारूपोऽध्यास एव हेतू रागद्वेषसमुत्थाने । तयोश्चान्तःकरणे समुत्थितयोः सतोः प्रवर्तते जनो हितप्राप्तये, निवर्तते चाहितात् इति सर्वेषां नः प्रत्यक्षमेतत् । अत्र

दृष्टान्तः **मृगतृष्णिकोदकपिपासुरिवेति** । यथा पिपासापगमेच्छुः, जलपानसुखेच्छुश्च मृगतृष्णिकोदकम् उदकाभासमेव 'उदकमिदम्, एतत्पानं चाहितपिपासापरिहाराय हर्षादिजननद्वारा हितप्राप्तये च भविष्यति' इति परिकल्प्य तादृशाध्यासनिबन्धनरागद्वेषाभ्यामेव तत्र पाने प्रवर्तते । स चाध्यासः स्वाभाविक एव न शास्त्रकृतः । एवमेव प्रतिषिद्धेषु यादृच्छिकेषु च कर्मसु स्वाभाविकनिमित्तैव प्रवृत्तिरिति सुविदितमेतत् इत्यभिप्रायः । न ह्यभक्ष्यकलञ्जादिभक्षणे अपेय-सुरादिपाने वा निमित्तभूतं क्षुधार्तस्य पिपासार्दितस्य वा भक्ष्यत्व-पेयत्वज्ञानं शास्त्रकृतमिति मन्यते कश्चित् । तच्च ज्ञानं 'न कलञ्जं भक्षयेत्', 'न सुरां पिबेत्' - इति प्रतिषेधज्ञानस्मृत्या बाध्यते । अतस्तत्र प्रवृत्त्यभाव एव शास्त्रेण क्रियत इति भवद्भिरप्यङ्गीक्रियते इति भावः । प्रतिषिद्धेषु यादृच्छिकेषु च कर्मसु न केवलं साध्ये फलत्वबुद्धिर्न शास्त्रकृता, किं तर्हि साधनेषु साधनत्वबुद्धिरपीत्याशयवानाह - **लौकिकप्रमाणप्रसिद्धान्येव साधनान्युपादायेति** । तत्र यथा प्रतिषिद्धकर्मणि यादृच्छिके च हितप्राप्तयेऽहितनिरासाय च स्वयमेव प्रवर्तते मिथ्याज्ञानोत्थरागद्वेषप्रेरितः सन्, किं तथैव अदृष्टार्थेषु पारलौकिकफलेषु काम्येषु नित्येषु च कर्मसु मिथ्याध्यास-जनितनिमित्तवशादेव स्वयं प्रवर्तते, किं वा अन्यदेव शास्त्रजनितं तत्र काम्येषु नित्येषु च कर्मसु प्रवृत्तिनिमित्तम् ? - यथाह पूर्वपक्षी - इति संशयः । किं दृष्टफलत्वादृष्टफलत्वविभागात् प्रवृत्तिनिमित्त-विभागोऽपि भवितुमर्हति, किं वा कर्मत्वसामान्यादुभयत्रापि समानमेव प्रवृत्तिनिमित्तम् ? - इति युक्तः संशय इत्यभिप्रायः ।।

प्रवृत्तिहेतुनिरूपणं सप्रयोजनम् -

ननु भवत्वेवं संशयः । निष्प्रयोजनत्वादेव निरूपणं व्यर्थं भविष्यतीति शङ्कयति **'किञ्चातो यद्येवम्'** इति । किमतो भवति

यद्येवं संशयः ? यदि खलु समानमेव प्रवृत्तिनिमित्तम् यदि वा भिन्नम्, किं तावता भवेत् ? न किञ्चित्तत्र फलभेदं पश्यामः - इत्याक्षेपः । अस्य परिहारार्थमाह - **शृण्विति** । यदि तावत् यथावस्थितवस्तुसम्यग्ज्ञानं वस्तुतत्त्वानुसार्येव सम्यग्ज्ञानं लौकिकं लौकिकेषु कर्मसु प्रवृत्तिनिमित्तम्, काम्येषु नित्येषु च यथावस्थितवस्तुसम्यग्ज्ञानमेव आगमिकं प्रमाणभूतमेव प्रवृत्तिनिमित्तम्, न तु मिथ्याज्ञानम् अप्रमाणभूतम्, यदि च निवृत्तिशास्त्रं सर्वकर्मसंन्यासविधायि प्रमाणमिति नाभ्युपगम्यते 'यावज्जीवमग्निहोत्रं जुहोति' (?) इत्यादिशास्त्रविरोधात्, तदा कर्मत्यागिनः, सर्वकर्मसंन्यासपूर्वकात्मवस्तुज्ञानादेव मुक्तिरिति वदन्तः, हताः पुरुषार्थात् परिभ्रष्टा भवेयुः । कुतः ? **भ्रान्तिविज्ञानमात्रावष्टम्भात्** । अशास्त्रोत्थस्वकपोलकल्पितसंन्यासहेतुकमुक्तिविज्ञानाश्रयणात् इत्यर्थः । न केवलं पुरुषार्थात् परिभ्रंशः, किं त्वनिष्टप्राप्तिरपि तेषां भवेदित्याशयवानाह - **अलौकिकप्रमाणोपात्तकर्मानुष्ठानत्यागित्वाच्चेति** । अलौकिकं वैदिकं यत् प्रमाणम्, 'स्वाध्यायोऽध्येतव्यः', 'यावज्जीवमग्निहोत्रं जुहोति' - इत्यादिवचनरूपम्, तेन उपात्तं स्वीकृतं विहितं यत् कर्मानुष्ठानम् तत्त्यागित्वाच्च ते हता भवेयुरित्यर्थः । तदेतत् फलं यदि सम्यग्ज्ञाननिमित्ता कर्मप्रवृत्तिः । अथ पक्षान्तरे सिद्धान्त्यभिमते मृगतृष्णिकोदकपिपासुप्रवृत्तिनिमित्तवत् अयथावस्तुभ्रान्तिविज्ञानमेव सर्वप्रवृत्तिषु लौकिकीषु वैदिकीषु च निमित्तम्, तदा वयं नैष्कर्म्यज्ञानवादिनो वर्धामहे । अज्ञानप्रहाणद्वारा पुरुषार्थप्राप्तेः । हताः स्थ यूयं मिथ्याज्ञानप्रयुक्तकर्मण एव मुक्तिमाशासानाः । मिथ्याज्ञानावलम्बिनो हि फलाद्वञ्चितत्त्वं दृष्टम्, अनर्थप्राप्तिश्च मृगतृष्णिकोदकपानप्रवृत्त्यादिषु इति भावः ।।

शास्त्रं पुरुषार्थोपायप्रदर्शकमात्रम् -

ननु भवत्वेवं कल्पभेदेन फलभेदः । कः खल्वत्र निर्णयः ? तत्राह **हितं संप्रेप्सतामिति** ।। अयमभिप्रायः । न तावत् शास्त्रं कञ्चिदपि पुरुषं बलात् कुत्रचित् प्रवर्तयितुं कुतश्चिन्निवर्तयितुं वा शक्नोति । दृश्यन्ते हि पुरुषा रागादिवशात् शास्त्रमप्यतिक्रामन्तः । न च रागादयः शास्त्रकृताः । 'हितं प्राप्स्यामः, अहितं च हास्यामः' इतीच्छा तु स्वयमेवोत्पद्यते लोकस्य नैसर्गिकान्मोहात् । दृश्यते खलु हितसंप्रेप्सा अहितजिहासा च गोपालादीनामनधीतशास्त्राणामपीति । किं तर्हीदानीं शास्त्रं करोतीति ? तत्राह - **उपायानिति** । प्राप्त्यर्थान् हानार्थांश्च उपायान् केवलं भासयते शास्त्रम् । अर्कवत् । यथा हि अर्कः प्रकाशस्वभावः सूर्यः पथिगतान् पदार्थान् प्रकाशयत्येव केवलम् । तत्र हानोपादानौदासीन्यबुद्धयस्तु पथिकानां बुद्धि-संस्कारविशेषवशात् यथायथं स्वयमेव जायन्ते न त्वर्केणोत्पाद्यन्ते, तद्वदित्यर्थः । एतदुक्तं भवति । प्रमाणं हि शास्त्रं स्वविषयं पुरुषार्थोपायं ज्ञापयत्येव केवलं यथा प्रत्यक्षादीनि प्रमाणानि स्वं स्वं विषयम् । न हि प्रमाणस्य प्रवर्तकत्वं निवर्तकत्वं वा क्वचिद् दृष्टम् । यः पुनः प्रमितेऽर्थे हानायोपादानाय वा प्रवृत्तिनिवृत्तिरूपो व्यवहारो दृश्यते लोके, पुरुषेच्छावशादेव सः, न तत्र प्रमाणं व्याप्रियते । न चैवं निवृत्तिशास्त्रस्यापि निवृत्तौ व्यापाराभावप्रसङ्गः । मोहादध्यारोपितकर्तृत्वे मोक्षिजनेऽपि उक्तन्यायादेव विषयदोषदर्शनेन वैराग्यान्निवृत्त्युपपत्तेः । प्राप्तसम्यग्ज्ञाने तु प्रवृत्तिनिवृत्तिमूलभूतेच्छा-कारणमज्ञानं प्रध्वस्तमिति न प्रवृत्तिर्निवृत्तिर्वा तत्राभ्युपगम्यत्त इति सर्वं निर्मलमिति ।।२९।।

(मूलम्)

एवं तावत् प्रत्यक्षानुमानागमप्रमाणावष्टम्भात्, आत्मनो

निरतिशयसुखहिताव्यतिरेकसिद्धेः अहितस्य च षष्ठगोचरवत् स्वत एवानभिसंबन्धात्, एवंस्वाभाव्यात्मानवबोधमात्रादेव 'हितं मे स्यादहितं मे मा भूत्' इति मिथ्याज्ञानं तूषरशुक्तिकानवबोधोत्थमिथ्याज्ञानवत् प्रवृत्तिनिमित्तम् इति निर्धारितम्। शास्त्रं च न पदार्थशक्त्याधानकृदिति। अथैतस्यैवोत्तरत्र प्रपञ्च आरभ्यते -

न परीप्सां जिहासां वा पुंसः शास्त्रं करोति हि।
निजे एव तु ते यस्मात् पश्चादावपि दर्शनात् ॥३०॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

वृत्तवर्तिष्यमाणयोः संबन्धमाह - **एवं तावदित्यादिना, आरभ्यते इत्यन्तेन** ॥ तत्र प्रकृतमिदम्। प्रत्यक्षं चानुमानं चागमश्च प्रत्यक्षानुमानागमाः। त एव प्रमाणानि। तेषाम् अवष्टम्भात् आश्रयणात् 'इति निर्धारितम्' इति व्यवहितेन संबन्धः। तत्र आगमप्रमाणं तावत् पुरुषार्थोपायमेव भासयते 'इदंकामोऽनेन यागेन यजेत' इत्येवम्, न तु द्वैतसत्यत्वप्रतिपादनेऽपि व्याप्रियत इत्यङ्गीकर्तव्यम्। न हि पुरुषार्थोपायप्रदर्शनम्, विषयसत्यत्वप्रतिपादनं चेत्येकस्य वाक्यस्य द्वौ व्यापारौ संभवतः। कथं तर्हि पुरुषस्य प्रवृत्तिस्तत्रेति ? अत आह - **मिथ्याज्ञानं त्विति**। तुरवधारणे। मिथ्याज्ञानमेवेत्यर्थः। यद्यपि द्वैतं न परमार्थसत् तथापि मिथ्याज्ञानवशात् तत्सत्यत्वं तत्र हिताहितत्वं च परिकल्प्य रागादिवशात् प्रवर्तते निवर्तते च - इति न काचिदनुपपत्तिरिति भावः। तत्र प्रत्यक्षमनुमानं च प्रमाणयति **ऊषरशुक्तिकेत्यादिना**। अयमर्थः। प्रत्यक्षं तावत् पुरुषा मिथ्याज्ञानकृतेच्छाप्रेरिताः, ऊषरे जलार्थं प्रवर्तन्ते शुक्तिकायां च रजतार्थमिति। ततश्चानुमानं भवति 'यथा मिथ्याज्ञानमूषरादौ जलादिरहितेऽपि

प्रवृत्तिनिमित्तम्, एवं मिथ्याज्ञानमेव द्वैतविषयशून्येऽप्यात्मनि तद्वत्त्वकल्पनया तत्र प्रवृत्तिनिमित्तं भवितुमर्हति' इति । ननु मिथ्याज्ञानोत्थाने किं निमित्तमित्यत आह - **आत्मानवबोधमात्रादेवेति** । तत्र दृष्टान्तः 'ऊषरशुक्तिकानवबोधोत्थमिथ्याज्ञानवत्' इति । तदयं वाक्यार्थः । यथा ऊषरशुक्तिकयोर्जलरजतसंबन्धशून्ययोरेव तत्स्वाभाव्यानवबोधादेव मिथ्याज्ञानमुत्तिष्ठति 'जलमिदम्', 'रजतमिदम्' इति च । ततश्च 'हितमिदम्' इति परिकल्प्य तत्र प्रवृत्तिः । उपलक्षणमिदमहितपरिकल्पनस्यापि । "यथा वा रज्ज्वादौ सर्पादिसंबन्धशून्येऽपि तत्स्वाभाव्यानवबोधादेव मिथ्याज्ञानमुत्तिष्ठति सर्पोऽयमिति, ततश्च 'अहितमिदम्' इति परिकल्प्य ततो निवृत्तिः" इत्यपि द्रष्टव्यम् । यथायं दृष्टान्तः, एवमेव निरतिशयसुखहिताव्यतिरिक्तस्वरूपे निर्द्वैतेऽप्यात्मनि तत्स्वाभाव्यानवबोधादेव मिथ्याज्ञानमुत्तिष्ठति हिताहितद्वैतकल्पकम्, ततश्च हितं मे स्यादिति प्रवृत्तिः, अहितं मे मा भूदिति च निवृत्तिः इति ॥

अत्र प्रत्यक्षादीनां विनियोगे मतान्तरं तद्दूषणं च -

अत्र 'प्रत्यक्षानुमानागमावष्टम्भात्' इत्यस्य 'आत्मनो निरतिशयसुखहिताव्यतिरेकसिद्धेः' इत्यव्यवहितेन संबन्धमिच्छन्ति **केचित्** । तन्न युक्तम् । आत्मनो निरतिशयसुखरूपत्वस्य प्रत्यक्षाद्याश्रयणेन पूर्वस्मिन् ग्रन्थे साधितत्वाभावात् । ग्रन्थप्रतिपादनशैल्यननुसाराच्च । इयं हि शैली तत्रभवत आचार्यस्य यदयं स्वतःसिद्धमेव नित्यनिरतिशयानन्दस्वरूपत्वमात्मनो वेदान्तैर्ज्ञाप्यत इति प्रतिज्ञाय तत्स्फुटीकरणार्थमेव सर्वस्यापि हिताहितप्राप्तिपरिहारार्थस्य कर्मणो मिथ्याज्ञाननिमित्तत्वं प्रदर्शयति । तथा च बाह्यविषये सुखहितबुद्धिरपि असुखाहितबुद्धिवत् मिथ्याज्ञानमेव स्वात्मस्वरूपानवबोधनिमित्तेति मन्यत इत्यवगम्यते । तस्मात् पूर्वापरविरुद्धो ग्रन्थप्रतिपादन-

शैल्यननुसारी चैवमन्वयः । एवं तु भवति । आत्मनो निरतिशयसुखहिताव्यतिरेकसिद्धेः अहितस्य च षष्ठप्रमाणगोचरीभूताभाववत्, षष्ठेन्द्रियविषयवदेव अत्यन्तमनभिसंबन्धादात्मना । एवंस्वाभाव्यस्य स्वभावेनैव सुखहितानन्यरूपस्य नित्यनिर्द्वैतस्य आत्मनोऽनवबोधमात्रादेव हिताहितविकल्पनरूपं हितमिदं मे स्यात् अहितमिदं मे मा भूत् - इति यन्मिथ्याज्ञानं तदेवात्र प्रवृत्तिनिमित्तम् ऊषरशुक्तिकाद्यनवबोधोत्थमिथ्याज्ञानवत् इति प्रत्यक्षानुमानागमप्रमाणावष्टम्भात् पूर्वस्मिन् ग्रन्थे निर्धारितमिति । अत्र प्रत्यक्षानुमाने यथोपन्यस्तदृष्टान्तबलात् सिध्यतः । आगमस्तु 'उपायान् भासयतेऽर्कवत्' (१-२९) इत्यनेनैव सिद्धः । तत्र हि शास्त्रं नेच्छां प्रवृत्तिं वा जनयति किं तूपेयभूतस्वर्गपुत्रपश्वादिकामस्य तत्प्राप्त्युपायं दर्शयति केवलम् - इत्युक्तम् । तदाह - 'शास्त्रं च न पदार्थशक्त्याधानकृदिति' इति । न हि शास्त्रं क्रियाकारकफलरूपस्य द्वैतस्य मिथ्याज्ञानपरिकल्पितस्य सत्यत्वमाधातुमीष्टे, कर्तृत्वभोक्तृत्वे प्रवृत्तिनिवृत्ती वा उत्पादयितुं कार्यकरणरहिते आत्मनि । पुरुषार्थोपायांस्तु प्रकाशयति - इत्युक्तम् इत्यभिप्रायः ।।

तदेवमतीतग्रन्थस्य तात्पर्यं संक्षेपेणोक्त्वा इदानीमुत्तरग्रन्थस्य तात्पर्यमाचष्टे - 'अथैतस्यैवोत्तरत्र प्रपञ्च आरभ्यते' इति । प्रवृत्तिनिवृत्ती स्वाभाविकमोहकृते एव ; तस्मात् मोहोत्थं कर्म मोहं निवर्तयितुं नालम्, सम्यग्ज्ञानं तु तत्र प्रभवतीत्येतस्यार्थस्य, शास्त्रस्य च पुरुषेच्छाप्रवृत्त्यादिजनकत्वं नास्तीत्येतस्यार्थस्य च प्रपञ्चः विवरणम् उत्तरस्मिन् ग्रन्थे भविष्यतीत्यर्थः ।।

शास्त्रं न पुरुषेच्छाजनकम् -

अथ हितसंप्रेप्साम् अहितजिहासां वा शास्त्रं नाधत्ते इति तावदुपपादयति - **न परीप्सामिति** ।। पर्याप्तुमिच्छा परीप्सा,

हातुमिच्छा च जिहासा । ताम् इष्टप्राप्तीच्छाम् अनिष्टपरिहारेच्छां वा पुंसः पुरुषस्य अधिकारिणः शास्त्रं न करोति नोत्पादयति । हिः प्रसिद्ध्यर्थकः । तदेतत् कुतोऽवसीयते ? यस्मात् ते परीप्साजिहासे निजे एव । अविद्यास्वभावनिबन्धने एव । तद्वा कुतोऽवगम्यते ? इत्यत्रोत्तरम् 'पश्वादावपि दर्शनात्' इति । अत्यन्तासंभावितशास्त्रविज्ञानेष्वपि पशुपक्ष्यादिषु स्वभावत एव तयोर्दर्शनात् प्रसिद्धमेतत् यदिष्टानिष्टप्राप्तिपरिहारेच्छा न शास्त्रकृता इति - इति हिशब्दप्रयोगेण विवक्षितां लोकप्रसिद्धिमभिव्यनक्ति । न च पश्वादिषु अविवेकात् प्रवृत्तिनिवृत्तिदर्शनेऽपि कथं विवेकिनां पुरुषाणां तथा व्यवहार इति संभावयामः ? तत्संभावने वा कथं प्रत्यक्षादीनां प्रामाण्यं न व्याहन्येत ? - इति शङ्क्यम् । प्रयोजकेच्छायाः समानत्वात् । समाना हि सर्वत्र विवेकिषु पुरुषेषु, अविवेकिषु पश्वादिषु वा प्रवृत्तिनिवृत्तिप्रयोजिका इच्छा । न हि कश्चन विवेक्यपि पुरुषः इच्छया अप्रयुक्तः प्रवर्तते क्रियायाम्, निवर्तते वा ततः । सा च स्वाभाविकी सर्वेषु प्राणिष्विति समान एव पुरुषाणां पश्वादिभिर्व्यवहार इत्यनवद्यम् । प्रत्यक्षादीनां च यावदविद्यानिवृत्तिः स्वप्नप्रमाणवत् प्रामाण्योपपत्तेः । तस्मात् सुखदुःखप्राप्तिपरिहारेच्छाकारणं तादृशेच्छापूर्वकप्रवृत्तिनिवृत्तिव्यवहारकारणं चाविद्यास्वभाव एवेति सिद्धमिति भावः ॥३०॥

(मूलम्)

उक्तं तावदनवबुद्धवस्तुयाथात्म्य एव विधिप्रतिषेधशास्त्रेष्वधिक्रियत इति । अथाधुना विषयस्वभावानुरोधेन प्रवृत्त्यसंभवं वक्तुकाम आह -

लिप्सतेऽज्ञानतो लब्धं कण्ठे चामीकरं यथा ।
वर्जितं च स्वतो भ्रान्त्या छायायामात्मनो यथा ॥३१॥

भयान्मोहावनद्धात्मा रक्षः परिजिहीर्षति ।
यच्चापरिहृतं वस्तु तथाऽलब्धं च लिप्सते ॥३२॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

तदेवं प्रवृत्तिनिमित्तपरीक्षणेन सर्वमपि कर्माज्ञाननिमित्तमेवेति निर्धारितम् । ततश्चाज्ञानकृतानर्थनिवृत्तौ न कर्म साधनमित्येतद् व्यवस्थापितम् । इदानीं पुरुषार्थस्वभावविवेचनेनापि तदावस्थापयितुम् आगामिग्रन्थसन्दर्भ इत्याह - **उक्तं तावदिति** ॥ अनवबुद्धवस्तुयाथात्म्य एव विधिप्रतिषेधशास्त्रेष्वधिक्रियते । 'अनवबोधोत्थमिथ्याज्ञाननिमित्तत्वात् प्रवृत्तिनिवृत्त्योः' इति शेषः । यद्यपि क्रियाकारकफलसंबन्धज्ञानवानेव कर्मस्वधिक्रियते नाज्ञानी, तथाप्यात्मनो नित्यनिवृत्तदुःखरूपत्वसुखहिताव्यतिरेकत्वज्ञानं नैवापेक्ष्यते कर्माधिकारे । ईदृशज्ञानस्य कर्मण्यनुपयोगात्, अधिकारविरोधाच्च । नित्यनिवृत्तदुःखरूपत्वं सुखहिताव्यतिरेकत्वं चाऽऽत्मनो याथात्म्यम् - इति साधूक्तम् 'अनवबुद्धवस्तुयाथात्म्य एवाधिक्रियत' इति । एष तावदतीतानन्तरग्रन्थार्थः । अथोत्तरग्रन्थे किमुच्यते ? इति प्रश्नापाकरणायाह - **अथाधुना विषयस्वभावानुरोधेन प्रवृत्त्यसंभवं वक्तुकाम आह -** इति । विषयाः प्राप्तव्यपरिहर्तव्यार्थाः ॥

विषयस्वभावविवेचनार्थमेव प्राप्यपरिहार्यार्थौ तावद्विभजते - **लिप्सत** इत्यादिना । तत्र तावत् प्राप्तमपि प्राप्यं भवति । परिहृतमेव च परिहर्तव्यम् इति सोदाहरणं दर्शयति सार्धश्लोकेन । वस्तुतो लब्धमपि अज्ञानतो लिप्सते कण्ठे चामीकरं यथा । कण्ठस्थमेव स्वर्णभूषणं नष्टमिति अज्ञानेन परिकल्प्य लब्धुमीहते इत्यर्थः । एवं स्वतो वर्जितमेव भ्रान्त्या परिहर्तुमिच्छति । तत्र दृष्टान्तः । यथा आत्मनश्छायायां स्वतः परिहृतमपि रक्षः राक्षसं मोहावनद्धात्मा

अज्ञानावृतान्तःकरणः भयात् परिजिहीर्षतीति । अप्राप्तप्राप्यम् अपरिहृतपरिहर्तव्यं तु सुप्रसिद्धमित्याह - **'यच्चापरिहृतं वस्तु'** इति । तदपि परिजिहीर्षति । तथा अलब्धं च लिप्सते । न तत्र निदर्शनापेक्षा ; सर्वसंप्रतिपन्नत्वात् । तदित्थं प्राप्यं परिहार्यं च प्रत्येकं द्विविधं भवतीत्यर्थः ॥३१॥३२॥

(मूलम्)

तत्रैतेषु चतुर्षु विषयेषु प्राप्तये परिहाराय च विभज्य न्यायः प्रदर्श्यते -

प्राप्तव्यपरिहार्येषु ज्ञात्वोपायाञ्छ्रुतेः पृथक् ।
कृत्वाथ प्राप्नुयात्प्राप्यं तथानिष्टं जहात्यपि ॥३३॥

अथावशिष्टयोः स्वभावत एव -

परिहृतावाप्तयोर्बोधाद्धानप्राप्ती न कर्मणा ।
मोहमात्रान्तरायत्वात्क्रियया ते न सिध्यतः ॥३४॥

(क्लेशापहारिणी)

शास्त्रप्रकाशितोपायविभागः -

तत्रैवं स्थिते शास्त्रेण कस्मिन् प्राप्ये परिहार्ये वा कीदृश उपायः प्रकाश्यत इत्यत्रोत्तरत्वेन श्लोकद्वयमानयन् आह - **तत्रैतेष्विति** ॥ अत्र चतुर्ष्वपि न सर्वत्र समानोपायता भवतीति विभज्यैव वक्तव्यं भवतीत्याह - **विभज्य न्यायः प्रदर्श्यत** इति ॥ तत्र अप्राप्तप्राप्तव्यापरिहृत-परिहर्तव्येषु कथं प्राप्तिपरिहारौ इत्येतद्दर्शयति **प्राप्तव्येत्यादिना** । तत्र उपायान् श्रुतेर्मुखादेव ज्ञात्वा कृत्वा तत्तदुपायाननुष्ठायैव च अथ अनुष्ठानानन्तरं प्राप्यं प्राप्नुयात्, तथा अनुष्ठानानन्तरमेव च परिहर्तव्यम् अनिष्टं जह्यात् न तत्राननुष्ठाय प्राप्तिः परिहारो वा,

नाप्यनुष्ठानसमसमये । देहान्तरगतकालान्तरगतेष्टानिष्टप्राप्तिपरिहारविषयत्वात् इच्छायाः इति भावः । यथोक्तं **भाष्यकृद्भिः** - 'सर्वथाप्यस्त्यात्मा देहान्तरसंबन्धीत्येवं प्रतिपत्तुर्देहान्तरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनः तद्विशेषज्ञापनाय कर्मकाण्डमारब्धम्' (बृ. भा. अव.) इति ।।३३।।

तदितरयोः किंस्वभावतेत्यत आह - **अथावशिष्टयोरिति** । 'स्वभावत एव परिहृतावाप्तयोः' इति श्लोकस्थेन संबन्धः । अक्षराधिक्येऽपि न च्छन्दोभङ्गः । भुरिगनुष्टुब्लक्षणाक्रान्तत्वात् । यद्यपि 'न्यूनाधिकेनैकेन निचृद्भुरिजौ' (छं. सू. ३-५९) इत्येतत्सूत्रं वेदाङ्गतया प्रणीतम्, तथापि लोकवेदसाधारणं लक्षणं मन्यत आचार्य इति गम्यते । उत्तरत्रापि तथैव तत्र तत्रानुगमात् ।।

स्वभावत एव परिहृतावाप्तयोः हानप्राप्ती बोधादेव न कर्मणा । कुतः ? तयोर्हानप्राप्त्योः मोहमात्रान्तरायत्वात् । अज्ञानं हि केवलं तत्र प्रतिबन्धकम् । तच्च बोधमात्रनिवर्त्यमिति ते हानप्राप्ती क्रियया कर्मणा न सिध्यतः । हेयोपादेयवस्तुस्वभावानुरोधेन हि प्रवृत्तिसंभवासंभवौ निश्चेतव्यौ इति भावः ।।३४।।

(मूलम्)

कस्मात्पुनरात्मवस्तुयाथात्म्यावबोधमात्रादेवाभिलषितनिरतिशयसुखावाप्तिनिःशेषदुःखनिवृत्ती भवतो न तु कर्मणेति ? उच्यते -

कर्माज्ञानसमुत्थत्वान्नालं मोहापनुत्तये ।
सम्यग्ज्ञानं विरोध्यस्य तामिस्रस्यांशुमानिव ।।३५।।

(क्लेशापहारिणी)

सम्यग्ज्ञानमेवाज्ञानबाधकं न कर्म -

अत्र शङ्कते **कस्मात्पुनरिति** ।। भवतु निरतिशयसुखा-

वाप्तिर्निःशेषदुःखनिवृत्तिश्च मोहान्तरायनाशादेवेति । सोऽप्यन्तराय-नाशः कर्मणैव कुतो न भवति ? दृष्टं हि लोके मृगतृष्णिकादिसमीपगमनादिना कर्मणा तत्रोदकभ्रान्तिविनाशः - इति शङ्कितुराशयः । शङ्कापरिहाराय श्लोकमवतारयति - **उच्यत** इति ।।

'कर्माज्ञानसमुत्थत्वात्' इति । यद्यप्युक्तमेवेदं प्रागपि नित्यकाम्ययोरपि प्रवृत्तिरात्मस्वभावानवबोधजनितमिथ्याज्ञाननिमित्तैवेति, तथापि तदेवेहानूद्यतेऽभ्यधिकाशङ्कापरिहारार्थम् - इत्यदोषः । कर्म मोहापनुत्तये नालं न पर्याप्तम् । कुतः ? यस्मात् अज्ञानसमुत्थत्वात् नाज्ञानविरोधि । सम्यग्ज्ञानं तु अस्य मोहस्य विरोधि । अत्र निदर्शनं 'तामिस्रस्यांशुमानिव' इति । यथा अंशुमान् भानुः प्रकाशस्वभावत्वात् तमो विरुणद्धि एवं सम्यग्ज्ञानमपि मोहं विरुणद्धि । न हि तमोमात्रलब्धात्मा कश्चिदपि पदार्थस्तमसो विरोधीति युज्यते । दृष्टविरोधात् । समीपगमनादिरूपं कर्म तु न साक्षादज्ञानम् अपनुदति किं तु सम्यग्ज्ञानहेतुत्वेन परम्परयैवेत्यन्यदेतत् - इति भावः ।।३५।।

(मूलम्)

नन्वात्मज्ञानमप्यविद्योपादानम् । न हि शास्त्रशिष्याचार्याद्यनुपादायाऽऽत्मज्ञानमात्मानं लभत इति । नैष दोषः । यत आत्मज्ञानं हि स्वतःसिद्धपरमार्थात्मवस्तुस्वरूपमात्राश्रयादेवाविद्यातदुत्पन्नकारकग्रामप्रध्वंसि स्वात्मोत्पत्तावेव शास्त्राद्यपेक्षते नोत्पन्नमविद्यानिवृत्तौ । कर्म पुनः स्वात्मोत्पत्तौ उत्पन्नं च । न हि क्रिया कारकनिस्पृहा कल्पकोटिव्यवहितफलदानाय स्वात्मानं बिभर्ति साध्यमानमात्ररूपत्वात् तस्याः । न च क्रिया आत्मज्ञानवत् स्वात्मप्रतिलम्भकाल एव स्वर्गादिफलेन कर्तारं संबध्नाति ।

आत्मज्ञानं पुनः पुरुषार्थसिद्धौ नोत्पद्यमानस्वरूपव्यतिरेकेणान्यद् रूपान्तरं साधनान्तरं वा अपेक्षते । कुत एतत् ? यतः -

बलवद्धि प्रमाणोत्थं सम्यग्ज्ञानं न बाध्यते ।
आकाङ्क्षते न चाप्यन्यद्बाधनं प्रति साधनम् ॥३६॥

(क्लेशापहारिणी)

ज्ञानाज्ञानयोर्वैषम्ये शङ्का -

'तामिस्रस्यांशुमानिव' (१-३५) इत्यत्र विवक्षितं दृष्टान्त-दार्ष्टान्तिकयोः सामान्यमजानन् शङ्कते - **नन्विति** ॥ यथा हि कर्म स्वोत्पत्तौ अविद्योत्थं कारकग्रामम् अपेक्षते, एवमेव आत्मज्ञानमपि स्वोत्पत्तौ शास्त्रशिष्याचार्यादिभेदम् अज्ञानोत्थम् अपेक्षत एव । तत्र यदुक्तम् 'कर्माज्ञानसमुत्थत्वान्नालं मोहापनुत्तये' (१-३५) इति, तदयुक्तं भाति । न हि शास्त्रादिभेदमज्ञानोत्थम् अनुपादाय अस्वीकृत्य आत्मज्ञानम् आत्मानं लभते । तत् स्वीकृत्यैव तु जायते इति प्रसिद्धमेतत् इत्यर्थः । अत आत्मज्ञानमप्यविद्योपादानम्, अज्ञानसमुत्थमेव । न कञ्चिदत्र विशेषं संभावयामः - इति शङ्कावादिनोऽभिप्रायः ॥

परिहारः - ज्ञानं फलदाने निरपेक्षम् -

सिद्धान्ती तु स्वाशयमाविष्कुर्वन् शङ्कां परिहरति - **नैष दोष इति** । आत्मज्ञानमप्यविद्योपादानमित्येष नैव दोषः । कथम् ? तत्राह - **यत इति** । यत आत्मज्ञानेऽस्त्ययं विशेषः । आत्मज्ञानं हि 'स्वात्मोत्पत्तावेव अज्ञानोत्थशास्त्रादिभेदम् अपेक्षते, नोत्पन्नमपि अविद्यानिवृत्तौ' इति व्यवहितेन संबन्धः । अत्र यत इत्यारब्धत्वात् हीत्यतिरिच्यते । अथवा प्रसिद्धार्थकोऽयं हिशब्दः । प्रसिद्धं हीदं शास्त्रे आत्मज्ञानं स्वतःसिद्धपरमार्थात्मवस्तुस्वरूपमात्राश्रयादेवाविद्यातदुत्पन्नकारकग्राम-विध्वंसीति इत्यभिप्रायः । न ह्यात्मज्ञानं कर्मवत् स्वव्यापाराय

प्रमाणसिद्धकारकाद्याश्रयते, किं तु स्वतःसिद्धात्मवस्तुमात्रमाश्रयते । तत्स्वरूपचैतन्याश्रयेणैव तद्व्याप्तं तदाभासं च सत् व्याप्रियते । स्वतःसिद्धश्चायमात्मा नैव स्वप्रकाशनार्थं ज्ञानव्यापारमपेक्षते, किमर्थं तर्हि, अज्ञानव्यवधाननिवृत्तिमात्रार्थम् । तन्निवृत्तिरेव ह्यात्मप्रकाशनं ज्ञानस्येत्युपचर्यते । अत एव चेदं ज्ञानं परमार्थवस्त्वाश्रयम्, न तु कर्मवदविचारितसिद्धद्वैतवस्त्वाश्रयम् । अपि च ज्ञानं स्वात्मभूत-वस्त्वाश्रयम्, न तु कर्मवत् स्वात्मभिन्नवस्त्वाश्रयम् । किं च ज्ञानम् आत्मवस्तुस्वरूपमात्राश्रयं सत् अन्यानपेक्षमेव स्वकार्यं करोति न तु कर्मवत् स्वव्यतिरिक्तकारकापेक्षम् । किं चान्यत् ज्ञानम् अविद्यातदुत्पन्न-कारकग्रामप्रध्वंसि, तत्सत्यत्वबुद्ध्यपहारकत्वात् ; न तु कर्मवद-विद्योत्थकारकग्रामोपजीवि स्वप्राणधारणेऽपि । अतो महदिदं वैषम्यं ज्ञानकर्मणोः । तदेवं वैलक्षण्यात् ज्ञानं स्वोत्पत्तिमात्रेणाविद्यां विनाशयति, न च तत्र विनाशने शास्त्रादिभेदमपेक्षते । कर्म तु कारक-साध्यात्मरूपत्वात् स्वोत्पत्तौ कारकग्राममपेक्षते, उत्पन्नमपि चापेक्षते स्वफलदानायेति । किं तर्हि कर्मणो ज्ञानाद् वैलक्षण्यं स्वफलदाने इति ? तत्राह - **कर्म पुनरिति** । पुनःशब्दो ज्ञानाद् विशेषमाह । तदेव विवृणोति फलस्वभावकथनद्वारेण - **न हि क्रियेति** । क्रिया कारकनिरपेक्षा नैव स्वात्मानं बिभर्ति नैव चिरं स्थातुमर्हति । साध्यमानमात्ररूपत्वात् तस्याः । न हि सा जातुचिद् वस्तुवत् सिद्धरूपा किं तु कारकसाध्यमात्रस्वरूपा कारकपरतन्त्रस्वरूपा । अतः स्वाश्रयं विना न कथञ्चित् स्थातुमुत्सहत इत्यर्थः । नन्वेवमपि को दोषः ? उच्यते । कर्मफलं हि कदाचित् कल्पकोटिकालव्यव-हितमपि भवति । तत्तादृशं फलं स्वयमचिरस्थायिनी क्रिया कथं प्रसवितुं प्रभवेत् ? अत एव हि कर्ममीमांसकाः प्राहुः - अपूर्वाख्यं रूपान्तरमास्थायैव कर्म स्वं फलं ददातीति । ननु किं कारणं

कारकापेक्षमेव प्राणधारणं क्रियायाः काङ्क्षणीयम् ? क्रियापि आत्मज्ञानवदेव उत्पत्तिसमसमयमेव फलं दास्यतीत्याशङ्क्योक्तम् - **स्वर्गादिफलेनेति** । न हि कालव्यवहितेन स्वर्गादिना सम्बन्धः कर्तुः क्रियोत्पत्तिकाले भविष्यतीति चिन्तयितुमपि शक्यमिति भावः ।।

आत्मज्ञानस्यापि नोत्पत्तिमात्रेणाज्ञाननिवर्तकत्वमित्येकदेशिमतम् -

अत्रावसरे **केचिदाहुः** । आत्मज्ञानमपि निरतिशयसुखावाप्तिनिःशेषदुःखपरिहाररूपपुरुषार्थेन नाधिकारिणं स्वात्मप्रतिलम्भकाल एव संबध्नाति, नाप्युत्पन्नमात्रमविद्यां निवर्तयितुमलम् । यस्माद् वाक्यजन्यं ज्ञानमभ्यासवशात् अवाक्यार्थविज्ञानरूपं प्राप्यैवाविद्यानिवर्तनसमर्थं भवति । अथवा यद्यपि वाक्यज्ञानमुत्पन्नमेवाविद्यानिवर्तनसमर्थम्, तथाप्यनादिकालप्रवृत्तत्वादविद्यावासना बलवती पुनरप्युत्थाय दुर्बलं ज्ञानमपि बाधते । अतो यावद् दृढतरबोधो न जायते तावत् शास्त्रयुक्त्यभ्यासोऽपेक्ष्यत एव । तथा कर्माणि च पुरुषार्थप्रतिबन्धनिवर्तनद्वारेण सहकारीणि, इत्यतो न युक्तमिदं केवलस्य वाक्यजन्यज्ञानस्याभ्यासादिनिरपेक्षस्य स्वोत्पत्तिमात्रेण पुरुषार्थहेतुत्ववर्णनमिति ।।

एकदेशिमतद्वयनिराकरणार्थत्वेनोत्तरश्लोकावतारणम् -

तदेतन्मतद्वयं निराकर्तुमुत्तरश्लोकमवतारयति - **आत्मज्ञानं पुनरिति** । रूपान्तरं साक्षात्काररूपम्, साधनान्तरम् अभ्यासादिरूपम् इत्यर्थः । तत्र एकदेशिनः, मध्यस्थस्य वा प्रश्नः - 'कुत एतत् ?' इति । अवगम्यते इति शेषः । यतः यस्माद् 'बलवद्धि सम्यग्ज्ञानम्' इति श्लोकस्थेन संबन्धः ।।

बलवद्धीति ।। यत्तावदुच्यते वाक्यजनितं ज्ञानं नालमविद्यां

निवर्तयितुमिति । तदसत् । कुतः ? बलवद्धि तत् अविद्यापेक्षया । कथम् अपौरुषेयवेदान्तवाक्यरूपप्रमाणोत्थत्वात् । अविद्या तु दुर्बला । केवलमविचारितसिद्धत्वादिति भावः । न चैवं कर्मणोऽपि प्रमाणोत्थत्वात् तस्यापि ज्ञानेनापबाधने शास्त्रस्य व्याहतवचनत्वप्रसङ्गः । उक्तपरिहारत्वात् । उक्तं हि चोदनाशास्त्रं विशिष्टसाध्योपायमात्रम् अवभासयतेऽर्कवत् न तु क्रियाकारकफलात्मकद्वैतस्य सत्यत्वमपि प्रतिपादयति, सम्यग्ज्ञानं तु द्वैतसत्यत्वमात्रमपबाधते न तु साध्यसाधनसंबन्धमपीति । अत उक्तपरिहारत्वान्न व्याहतवचनत्वप्रसङ्ग इति । न हि प्रमाणोत्थं ज्ञानं स्वविषयविषययाविद्यया बाध्यमानं क्वचिद् दृष्टम् ; अविद्याबाधकत्वं तु तस्य नियमेन दृश्यते । यच्चोच्यते सम्यग्ज्ञानमपि कर्मवद् रूपान्तरं साधनान्तरं वा समपेक्षते फलदानायेति । एतदप्यसत् । कुतः ? उक्तहेतोरेव । प्रमाणोत्थं ज्ञानं स्वविषयविषयाविद्यां निराकुर्वदेव हि प्रमितिर्नाम । विप्रतिषिद्धं चेदं बलवती प्रमितिरुत्पन्ना प्रमेयविषया, अविद्या च न बाधितेति । तदेवं प्रमाणोत्थत्वादेव सम्यग्ज्ञानमज्ञानापेक्षया बलवत्, तत एव चाज्ञानबाधकम्, न त्वज्ञानबाध्यमितिस्वान्यनिरपेक्षमेव स्वप्रमेयप्रकाशनसमर्थमिति च सिद्धम् इत्यर्थः ।।३६।।

(मूलम्)

स्वपक्षस्य हेत्ववष्टम्भेन समर्थितत्वान्निराशङ्कमुपसंह्रियते-

तस्माद् दुःखोदधेर्हेतोरज्ञानस्यापनुत्तये ।
सम्यग्ज्ञानं सुपर्याप्तं क्रिया चेन्नोक्तहेतुतः ।।३७।।

(क्लेशापहारिणी)

अज्ञाननिवर्तकं ज्ञानमेवेत्युपसंहारः -

तदेवं 'मुक्तेः क्रियाभिः सिद्धत्वात्' इति पूर्वपक्षं निराकृत्यात्म-

ज्ञानादेव केवलात् परमपुरुषार्थः इत्ययं स्वपक्षः समर्थितः । अतः प्रतिज्ञातार्थ उपसंह्रियत इत्याह - **स्वपक्षस्येति** ।।

तस्मादिति ।। दुःखोदधेः सर्वानर्थसागरस्य हेतोः अज्ञानस्य अपनुत्तये निरासाय सम्यग्ज्ञानमेकमेव सुपर्याप्तं पुष्कलं साधनम् । क्रियैव क्रियापि वा तत्र साधनमिति चेत्, न । उक्तहेतुतः । सर्वप्रकारस्यापि कर्मणः स्वसाधारणफलवत्त्वेनैव विधानात्, कस्यापि कर्मणो मोक्षसाधनत्वेनाविहितत्वात्, कर्मप्रवृत्तिमात्रस्य मिथ्याज्ञान-पूर्वकत्वात्, मुक्तौ च कर्मकार्यस्य चतुर्विधस्याप्यसंभवात्, नित्य-प्राप्तस्य च परमपुरुषार्थस्याज्ञानत एव प्राप्यत्वेन प्रतिभासात्, अज्ञानस्य चाज्ञानोत्थकर्मणा निवृत्त्ययोगात्, सम्यग्ज्ञानस्य तु केवलस्यैवा-ज्ञानापनोदनद्वारा मुक्तिहेतुत्वोपपत्तेः, न काचिदपि क्रिया मुक्तिसाधनम् - इति समुदितार्थः ।।३७।।

(मूलम्)

ननु बलवदपि सम्यग्ज्ञानं सदप्रमाणोत्थेनासम्यग्ज्ञानेन बाध्यमानमुपलभामहे ; यत उत्पन्नपरमार्थबोधस्यापि कर्तृत्व-भोक्तृत्वरागद्वेषाद्यनवबोधोत्थप्रत्यया आविर्भवन्ति । न ह्यबाधिते सम्यग्ज्ञाने तद्विरुद्धानां प्रत्ययानां संभवोऽस्ति । नैतदेवम् । कुतः ?

बाधितत्वादविद्याया विद्यां सा नैव बाधते ।
तद्वासना निमित्तत्वं यान्ति विद्यास्मृतेर्ध्रुवम् ।।३८।।

(क्लेशापहारिणी)

सम्यग्ज्ञानमप्यविद्याबाध्यं भवेदिति शङ्का -

अत्र च वेदान्तवाक्यजन्यस्य ज्ञानस्य प्रमाणोत्पन्नत्वेन बलवत्त्वम-ज्ञानबाधकत्वं च उक्तम् (१-३६) । स्वतःसिद्धपरमार्थात्मवस्तु-स्वरूपमात्राश्रयत्वमेव तत्र प्रयोजकमित्युक्तम् । अथेदानीम्, यद्यप्य-

विचारितसिद्धद्वैतवस्त्वाश्रयमेव लौकिकं प्रत्यक्षादिज्ञानम्, तथाप्यनादिकालप्रवृत्तत्वात् तद्वासना पुनरप्युदेत्य सम्यग्ज्ञानं बाधिष्यते इति पूर्वपक्षेणाशङ्कयति - **ननु बलवदपीति** ।। अप्रमाणोत्थेनेति आविद्यकलौकिकप्रमाणोत्थेनेत्यर्थः । ननु सम्यग्ज्ञानमपि बाध्यत इति कुतोऽवसीयत इत्याशङ्क्याह - **यत उत्पन्नपरमार्थबोधस्यापीति** । वेदान्तवाक्येन इति शेषः । अनवबोधोत्थाः कर्तृत्वभोक्तृत्वरागद्वेषादिप्रत्यया आविर्भवन्ति । दृष्टमिदं लोके इत्यभिप्रायः । नन्वेवमपि सम्यग्ज्ञानं बाधितमिति कुतो निश्चय इत्यत आह - **न हीति** । अबाधिते सम्यग्ज्ञाने तद्विरुद्धानां भ्रान्तिप्रत्ययानां संभवो नास्ति । दृश्यन्ते च वाक्यावगतपरमार्थस्यापि कर्तृत्वबुद्ध्यादिरूपाः मिथ्याप्रत्ययाः । अतो यथा द्विचन्द्रदर्शनदिग्विपर्यासादय आप्तवचनविनिश्चितचन्द्रैकत्वादितत्त्वानामप्यनुवर्तन्ते, एवमेव वेदान्तवाक्यावगततत्त्वानामपि द्रढीयोमिथ्याज्ञानसंस्कारवशात् सम्यग्ज्ञानमपि बाधितमसम्यग्ज्ञानकल्पं भवति, तत एव मिथ्याप्रत्ययानुवृत्तिरिति निश्चीयते । तस्मात् तादृशानुवृत्तमिथ्याप्रत्ययविनाशाय सम्यग्ज्ञानपटुसंस्कारार्थमस्त्यन्यत् किञ्चिदपेक्ष्यमिति भावः । वर्णितशङ्कापनोदाय श्लोकमवतारयति - **नैतदेवम् इति** ।।

अविद्यातद्वासनानां न क्वचिदपि बाधकत्वम् -

बाधितत्वादिति ।। बाधितायाः पुनरुत्थानं बाधकत्वं च नैव संभवतीति श्लोकपूर्वार्धार्थः । यद्यपि अविद्यावासनाः पुनरुद्भवेयुः, तथापि तत एव ज्ञानस्मृतेरप्युद्भावयित्र्यो भूत्वा पुनरपि तयैव बाध्येरन् इत्युत्तरार्धार्थः । अयमत्राभिप्रायः । सम्यग्ज्ञातेऽपि विषये चेत् अज्ञानानुवृत्तिः शङ्क्यते तर्हि ज्ञानानर्थक्यम्, अज्ञानहानं प्रत्यनाश्वासश्च सर्वत्रेत्यतिप्रसङ्गः । विद्याविद्ययोर्हि बाध्यबाधकभावः संबन्धः । बाधितायाश्चाविद्याया हेतुरहितायाः पुनरुत्थितिर्दुःसंभाव्या,

तस्या विद्याबाधकत्वं तु सुतरां दुःसंभाव्यम् । पूर्वं हि विद्यमानाप्यविद्या विद्याजन्मनिरोधे नैव शक्ताऽभूत्, जातमात्रया च तया बाधिता । कथं सेदानीं मृता सती विद्याबाधिका भवेत् ? किं चोत्पन्नापि विद्या बाध्यते चेत् तदा विद्याभ्यासस्त्वदभिमतः कथङ्कारं मुमुक्षुभिः शक्यकरणः स्यात् ? यच्चोच्यते कर्तृत्वादयो दोषा विदितपरमार्थस्यापि पुनराविर्भवन्तीति । अयमप्यदोषः । बाधितानामेव प्रत्ययवासनानां तत्राविर्भावात् । न चाविद्यावासनानां विघातो बलवत्त्वं शक्यशङ्कम् । बाध्यबाधकयोः सकृदेव संबन्धात्, अविद्यायाश्च विद्याया पूर्वमेव बाधितत्वात् । अविद्यावासनास्तु जायमानाः स्वाक्षिप्ताभिर्विद्या-वासनाभिः पुनरपि बाध्यन्त एवेत्युक्तम् । यत् पुनर्द्विचन्द्र-दर्शनादिविपर्यासा आप्तवचनोत्तरमप्यनुवर्तन्त इति । तत्र ब्रूमः । युक्ता चन्द्रादीनामनात्मत्वात् वाक्यमात्रेणापरोक्ष्यं न भवतीति विपर्यासानुवृत्तिः । अत्र पुनः प्रागपि वाक्यश्रवणाद् ब्रह्मणः श्रोतुरव्यतिरेकान्न कोऽपि हेतुरस्त्यविद्यानाशोत्तरमपि तत्पारोक्ष्ये । न ह्यात्मनः स्वात्मा कदापि केनापि व्यवहितः - इति वैषम्यम् । तस्मान्नास्त्येव शङ्काकारणं विद्या स्वबाधिताविद्यया बाध्यत इतीति । तदेतत् सर्वं ग्रन्थकृद्भिरेव **बृहद्वार्तिके** (बृ. वा. ४-४-९१४......९५८) सविस्तरं प्रतिपादितमिति तत्रैवानुसंधेयम् इत्यलं दिष्टहतहननप्रयासेन ॥३८॥

---

९. अविद्यान्वयेन संसारान्वयः

(मूलम्)

'कर्माज्ञानसमुत्थत्वात्' (१-३५) इत्युक्तो हेतुः । तस्य च

समर्थनं पूर्वमेवाभिहितं 'हितं संप्रेप्सताम्' (१-२९) इत्यादिना। तदभ्युच्चयार्थम् अविद्यान्वयेन च संसारान्वयं[1] प्रदर्शयिष्यामीत्यत आह -

ब्राह्मण्याद्यात्मके देहे लात्वा नात्मेति भावनाम्।
श्रुतेः किङ्करतामेति वाङ्मनःकायकर्मसु ॥३९॥

यस्मात्कर्माज्ञानसमुत्थमेव तस्मात्तद्व्यावृत्तौ निवर्तत इत्युच्यते -

दग्धाखिलाधिकारश्चेद्ब्रह्मज्ञानाग्निना मुनिः।
वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिङ्करः ॥४०॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

आगामिग्रन्थस्य संबन्धमाह - **कर्माज्ञानसमुत्थत्वादितीति** ॥ कर्म नाज्ञाननिवर्तकम् इति प्रतिज्ञाय तत्र 'अज्ञानसमुत्थत्वात्' इति हेतुरुक्त इत्यर्थः। **तस्य चेति**। नित्यकाम्ययोः शास्त्रविहितत्वात् नाज्ञानसमुत्थत्वमित्याशङ्कायां पुरुषार्थोपायप्रदर्शकमात्रं शास्त्रम्, न पदार्थशक्त्याधानकृत् - इत्यतः सर्वापि कर्मणि प्रवृत्तिरज्ञानोत्थ-मिथ्याज्ञाननिमित्तैवेति 'हितं संप्रेप्सताम्' इत्यादिना हेतुसमर्थनं पूर्वमेवोक्तमित्यर्थः। किं तर्हीदानीमुच्यते ? तत्राह - **तदभ्युच्चयार्थमिति**। अभ्युच्चयः, तस्याज्ञानसमुत्थमिथ्याज्ञानहेतुकस्य कर्मणः नियमेन संसारान्वयित्वमस्ति यतः, तस्मात् संसारनिवृत्तिलक्षणहेतुत्वं न संभवीति युक्त्यन्तरेणापि समर्थनम्। तदर्थम्। **अविद्यान्वयेन च संसारान्वयमिति**। उपलक्षणमेतत्। अविद्याव्यतिरेकेण संसारव्यतिरेकं चेति द्रष्टव्यम्। प्रदर्शयिष्यामीत्यतः प्रदर्शयिष्यामीति हेतोः।

1. संसारान्वयित्वमित्यपि पाठः ॥

एतदर्थम् इति यावत् । अत्रेदं बोध्यम् । न केवलम् अज्ञानसमुत्थत्वं किं तूत्पन्नस्य संसारहेतुभूताविद्यान्वयित्वमपि हेतुः अविद्यानिवर्तनासामर्थ्ये । अविद्यान्वये संसारान्वयस्य नान्तरीयकत्वादिति भावः । यत्तदुक्तं (सं. ३६) ज्ञानम् स्वोत्पत्तिमात्रे अविद्यामपेक्षते, कर्म पुनः स्वात्मोत्पत्तौ उत्पन्नं च इति, तत्र अविद्यासमुत्थत्वं तावत् समर्थितम् ; अथेदानीम् उत्पन्नमपि कारकाद्यविद्याकार्यमपेक्षते, ततश्च संसारहेतुरवश्यं भविता इति द्वितीयो हेतुस्तदभ्युच्चयार्थः । न हीह अविद्यान्वयव्यतिरेकाभ्यां संसारान्वयव्यतिरेकौ प्रदिदर्शयिषितौ, अतत्प्रकरणत्वात् ; किं तर्हि कर्मणोऽविद्यानिवर्तनसामर्थ्याभावे हेतुः । अतस्तदेवेह प्रदर्श्यते कर्मणः संसारहेतुभूताविद्यान्वयित्वादपि नाविद्यानिवर्तकत्वमस्तीति ॥

अज्ञानान्वये संसारान्वयः -

ब्राह्मण्याद्यात्मक इति ॥ ना पुरुषः ब्राह्मण्याद्यात्मके वर्णाश्रमादिमति देहे आत्मेतिभावनाम् आत्मत्वाभिमानं लात्वा स्वीकृत्य वाङ्मनःकायनिर्वर्त्येषु कर्मसु निमित्तभूतेषु श्रुतेः किङ्करतामेति । 'अहमधिकारी श्रुत्या अस्मिन् कर्मणि नियुक्तः' इति बुद्ध्या तत्तत्कर्मणि प्रवर्तत इत्यर्थः । अज्ञानोत्थादेव देहाद्यभिमानलक्षणान्मिथ्याज्ञानात् कामपरवशः सन् भृत्यः इव स्वामिना नियुक्तः श्रुतिविहितानि कर्माणि कृत्वा तत्तत्फलं भोक्तुमीहते इत्येष अज्ञानान्वयेन संसारान्वयः प्रदर्शितः, उत्पन्नस्यापि कर्मणः स्वफलदानायाविद्यापेक्षा दुर्वारा इति प्रदर्शनार्थम् ॥३९॥

अज्ञानव्यतिरेके संसारव्यतिरेकः -

अथेदानीं व्यतिरेकप्रदर्शनमारभ्यत इत्याह - **यस्मादिति** ॥ तद्व्यावृत्तौ अज्ञाननिवृत्तौ निवर्तते कर्म । ततश्च संसाराभाव इति भावः ॥

दग्धाखिलेति ।। अधिक्रियतेऽनेनेत्यधिकारः । कर्तृत्व-भोक्तृत्वार्थित्वसमर्थत्वविद्वत्त्वापर्युदस्तत्वाद्यधिकारकारणम् । ब्रह्मज्ञानाग्निना दग्धाः अखिलाधिकाराः यस्य स मुनिः ब्रह्मतत्त्वमननशीलः । नियोगाविषयब्रह्मात्मत्वदर्शित्वादेव श्रुतेर्मूर्ध्नि सामन्तमूर्ध्नि विन्यस्त-चरण इव सार्वभौमः श्रुतिशिरसि वर्तमानः । तत्कारणीभूत-तत्प्रतिपाद्यसर्वज्ञब्रह्मरूपेणैवावस्थितः इति यावत् । अत एवेदृशो मुनिर्वेदकिङ्करो नैव स्यात् । 'अनेनाहं नियुक्त' इति नैव प्रवर्तत इत्यर्थः । यथोक्तं **भाष्यकारैः** 'न हि स्वविज्ञानोत्थेन वचसा स्वयं नियुज्यते । नापि बहुवित् स्वामी अविवेकिना भृत्येन' (ऐ. भा. अव.) इति । सोऽयमविद्याव्यतिरेकेण संसारव्यतिरेकः प्रदर्शितः, ज्ञानेनाज्ञान-निवृत्तौ सत्यां कर्माद्यन्यनिरपेक्षैव मुक्तिरिति प्रदर्शनार्थम् ।।४०।।

(मूलम्)

अथेतरो घनतराविद्यापटलसंवीतान्तःकरणोऽङ्गीकृत-कर्तृत्वाद्यशेषकर्माधिकारकारणो विधिप्रतिषेधचोदनासंदंशोपदष्टः कर्मसु प्रवर्तमानः -

शुभैः प्राप्नोति देवत्वं निषिद्धैर्नारकीं गतिम् ।
उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः ।।४१।।

आब्रह्मस्तम्बपर्यन्ते घोरे दुःखोदधौ घटीयन्त्रवदारोहावरोह-न्यायेनाधममध्यमोत्तमसुखदुःखमोहविद्युच्चपलसंपातदाग्निनीर्विचित्र-योनीश्चण्डोत्पिञ्जलकश्वसनवेगाभिहताम्बोधिमध्यवर्तिशुष्कालाबुवत् शुभाशुभव्यामिश्रकर्मवायुसमीरितः -

एवं चंक्रम्यमाणोऽयमविद्याकामकर्मभिः ।
पाशितो जायते कामी म्रियते चासुखावृतः ।।४२।।

उक्तान्वयस्य प्रपञ्चः -

अथैतस्यैव प्रपञ्च आरभ्यते वैराग्यहेतोर्मुमुक्षूणामित्याशयवानाह - **अथेतर इति** ।। इतरः दग्धाखिलाधिकारान्मुनेरन्यः घनतरेण अतिनिबिडेन अविद्यापटलेन संवीतम् आच्छादितम् अन्तःकरणं यस्य स तथोक्तः । यथा पटलावृतनेत्रो वस्तून्यन्यथान्यथा पश्यति, अविद्यमानान्यपि केशमशकादीनि च । एवमविद्यावृतान्तःकरण-नयनत्वान्मिथ्याज्ञानेनाङ्गीकृतकर्तृत्वभोक्तृत्वाद्यशेषकर्माधिकारकारणः सन् । अध्यस्ताधिकारकारणत्वादेव हेतोर्विधिप्रतिषेधचोदना-संदंशोपदष्टः । संदंशः आयुधविशेष उभयतोदन्तः । विधिचोदना प्रतिषेधचोदना चेत्युभयलक्षणत्वादुभयतोदन्तेन संदंशेन उपदष्टो गृहीतः । उभयविधचोदनाबद्ध इत्येतत् । स एवं कर्मसु प्रवर्तमानः किं फलमाप्नोतीत्याह । उत्तरश्लोकेन इति शेषः ।।

शुभैरिति ।। उक्तं हि **मोक्षधर्मेषु** 'शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषम् । अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः ।।' (मो. ध. ३२९-२५) इति ।।४१।।

संसारोपवर्णनम् -

अवशत्वमेव विशदयति - **आब्रह्मस्तम्बपर्यन्ते इति** ।। 'योनीः' इत्यस्य 'चंक्रम्यमाणः' इत्यनेन श्लोकस्थेनान्वयः । घटीयन्त्रवदारोहावरोहन्यायेनेति । यथा घटीयन्त्रेऽवसक्तो घट आरोहति वाप्याः, पुनरप्यवरोहति तस्यामेव यथापूर्वम्, तद्वदित्यर्थः । आरोहावरोहावेव प्रपञ्चयति - अधमेत्यादिना । तारतम्येन सुखदुःखमोहानां विद्युत इव चपलो यः संपातः अत्यन्तचञ्चल-संबन्धः, तं दातुं शीलं यासां ता विचित्रयोनीः देवनर-

तिर्यगाद्याश्चंक्रम्भमाणः । योनीनां वैचित्र्ये हेतुमाह - शुभाशुभव्यामिश्रकर्मवायुसमीरितः इति । कर्मप्रेरित एव तत्तत्फलभोगार्थं विचित्रा योनीः पर्यायेण प्राप्नोतीत्यर्थः । चंक्रमणे दृष्टान्तः - चण्डः उत्पिञ्जलकः आकुलीभूतश्च यः श्वसनो वायुः, तस्य वेगेन अभिहतस्य अम्भोनिधेर्मध्ये वर्तमानं शुष्कालाबु यथा बंभ्रमीति तथा - इत्यर्थः । एवं भ्रमन्नयम् अविद्यया, तत्कृतकामेन, कामप्रेरितकर्मभिश्च, पाशितो बद्धः सन् असुखावृत एव जायते म्रियते च । तत्र हेतुसमर्पकं विशेषणं 'कामी' इति । तथा हि श्रुतिः 'कामान् यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र' (मुं. ३-२-२) इति । एतेनाविद्यैव कामकर्मद्वारा संसृतेर्बीजम् - इत्युक्तं भवति ।।४२।।

(मूलम्)

यथोक्तेऽर्थ आदरविधानाय प्रमाणोपन्यासः -

श्रुतिश्चेमं जगादार्थं कामस्य विनिवृत्तये ।
तन्मूला संसृतिर्यस्मात्तन्नाशोऽज्ञानहानतः ।।४३।।

का न्वसौ श्रुतिरिति चेत् -

यदा सर्वे प्रमुच्यन्त इति न्विति च वाजिनः ।
कामबन्धनमेवेदं व्यासोऽप्याह पदे पदे ।।४४।।

(क्लेशापहारिणी)

उक्तार्थे प्रमाणोदाहरणम् -

यथोक्तेऽर्थे श्रुतिस्मृतिप्रमाणमुदाह्रियते श्लोकद्वयेन । तदाह - **यथोक्त इति ।।**

श्रुतिश्चेममिति ।। यस्मात् काममूला संसृतिः, तन्नाशश्च

तद्धेतुभूताज्ञाननाशतो भवति, तस्मात् कामस्य विनिवृत्तये श्रुतिश्च इममर्थं कामादेव संसरति काममोक्षाच्च विमुच्यते इत्याह - इति श्लोकार्थः ।।४३।।

का न्वसौ श्रुतिरिति चेत् । तत्रोत्तरमुत्तरश्लोकेनोच्यत इति शेषः ।।

यदा सर्व इति ।। 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।' (बृ. ४-४-७), 'प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६) इति च वाजिनः । आमनन्तीति शेषः । तत्र हि श्रुत्या कामान्वयव्यतिरेकाभ्यां संसृत्यन्वयव्यतिरेकौ प्रदर्शितौ । तथा स्मृतावप्युक्तमित्याह - **कामबन्धनमेवेदमिति** । 'कामबन्धनमेवेदं नान्यदस्तीह बन्धनम् । कामबन्धनमुक्तो हि ब्रह्मभूयाय कल्पते' (मो. ध. २५१-७) इति पूर्णं वाक्यम् । इदं सर्वेषां जनानां प्रत्यक्षतोऽनुभूयमानं बन्धनं कामकृतबन्धनमेव । एतद्व्यतिरेकेण नास्तीह संसारे बन्धनकारणम् । यस्मात् कामबन्धनान्मुक्त एव ब्रह्मभावं गन्तुं समर्थो भवतीत्यन्वयव्यतिरेकाभ्यां दृष्टं कामस्यैव बन्धनत्वमिति व्यासवाक्याभिप्रायः । **'व्यासोऽप्याह पदे पदे'** इत्यनेन । 'एतां बुद्धिं समास्थाय मङ्किर्निर्वेदमागतः । सर्वान् कामान् परित्यज्य प्राप ब्रह्म महत्सुखम् ।।' (मो. ध. १७९-५७) इत्यादिव्यासवचनजातं ग्राह्यम् । अतोऽविद्यान्वये कामकर्मद्वारा संसारान्वयः, तद्व्यतिरेके च संसारव्यतिरेकः इति यत् प्रतिज्ञातम् (१-३९), तत् सप्रमाणकमित्यभिप्रायः ।।४४।।

१०. कर्मणां परम्परया मोक्षहेतुत्वम्

(मूलम्)

एष संसारपन्था व्याख्यातः । अथेदानीं तद्व्यावृत्तये कर्माण्यारादुपकारकत्वेन यथा मोक्षहेतुतां प्रतिपद्यन्ते तथा अभिधीयते -

तस्यैवं दुःखतप्तस्य कथञ्चित्पुण्यशीलनात् ।
नित्येहाक्षालितधियो वैराग्यं जायते हृदि ॥४५॥

कीदृग्वैराग्यमुत्पद्यत इति ? उच्यते -

नरकाद्भीर्यथाऽस्याभूत्तथा काम्यफलादपि ।
यथार्थदर्शनात्तस्मान्नित्यं कर्म चिकीर्षति ॥४६॥

एवं नित्यनैमित्तिककर्मानुष्ठानेन -

शुध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः ।
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम् ॥४७॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

कर्म संसारकारणम् इत्युक्तम् । तन्नाशाय ज्ञानमेव साक्षात्साधनम् इति च । अतः कर्मणां मोक्षे सर्वथा उपयोगाभाव इति प्राप्ते तेषां तत्राप्युपयोगप्रकारं वक्तुमयमारम्भ इत्याह - **एष संसारपन्था इति** । समासान्तविधेरनित्यत्वात् पन्था इति प्रयोगो मर्षणीयः । अविद्याहेतोः कामः, कामात् कर्म, ततः फलभोगार्थं देहधारणम् इत्येष मार्गः संसाराय । 'न स तत्पदमाप्नोति संसारं चाधिगच्छति' (का. १-३-७)

इति श्रुतेः । अथेदानीं । तद्व्यावृत्तये संसारमार्गविनिवृत्तये यद्यपि कर्माणि न साक्षात् प्रभवन्ति । तथापि आरात् परम्परया तद्धेतुभूतज्ञानोत्पादनद्वारेण यथा मोक्षहेतुतामपि प्रतिपद्यन्ते प्राप्नुवन्ति तथा अभिधीयते । उत्तरग्रन्थे इति शेषः ।।

कर्मणां चित्तशुद्धिद्वारेण वैराग्यजनकत्वम् -

कथमारादुपकारकत्वम् ? तत्राह - **तस्यैवमिति** । तस्य कामिनः एवं वर्णितप्रकारेण दुःखतप्तस्य कथञ्चित् दैवात् पुण्यशीलनात् शास्त्रोक्तपुण्यकर्मानुष्ठानात् नित्येहाक्षालितधियः नित्यकर्मानुष्ठानेन क्षालिता निर्मलीकृता धीर्यस्य तस्य तत एव हृदि वैराग्यमुपजायते इत्यर्थः । ततश्च वक्ष्यमाणेन क्रमेण मोक्षोपायानुष्ठानात् परम्परया मुक्तिहेतुत्वं कर्मणामिति भावः ।।४५।।

उत्कटवैराग्यमेव संसारव्यावृत्तिहेतुरिति प्रदर्शयन् काम्यकर्मफलवैरस्यं तावत् समनन्तरश्लोकेनोच्यत इत्याह - **क्रीदृग्वैराग्यमिति** ।।

नरकादिति । प्रतिषिद्धकर्मसेवाफलान्नरकाद् भीर्भयं यथास्य पुरा अभूत्, तत एव भिया प्रतिषिद्धत्यागपूर्वकं काम्ये कर्मणि प्रावर्तत तत्र शोभनत्वबुद्ध्या । एवमेव इदानीं काम्यफलादपि भीर्भवति । कुतः ? यथार्थदर्शनात् । तस्य सातिशयत्वक्षयिष्णुत्वादिदोषवत्त्वदर्शनात् इत्यर्थः । यद्यपि काम्यफलस्य स्वर्गादेरदृष्टस्य कालान्तरभाविन इदं याथात्म्यं न साक्षाद्द्रष्टुं शक्यम् । तथापि शास्त्रदृष्टिमवलम्ब्य 'तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' (छां. ८-१-६) इत्यादि न्यायोपबृंहितश्रुतिबलान्निश्चेतुं शक्यत एवेति सूक्तं 'यथार्थदर्शनात्' इति । यत एवं काम्यफलादपि भीर्जाता, तस्मात् नित्यं कर्म चिकीर्षति । कर्तुमिच्छति । तत्रैव यत्नवान् भवतीत्यर्थः ।।४६।।

तत्र नित्यस्य कर्मणः फलान्तरमप्यस्तीति मोक्षोपयोगित्वं कथ-

मित्याकाङ्क्षापरिहारायोत्तरः श्लोकः । तमवतारयति - **एवम्** इत्यादिना । 'नित्यं कर्म चिकीर्षति' इत्यत्र नित्यग्रहणं प्रदर्शनार्थमित्याशयेन प्राह - **नित्यनैमित्तिककर्मानुष्ठानेनेति** ।।

एवं काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकानुष्ठानत एव किं वैराग्यमुपजायते ? न । अन्यदपि कर्तव्यमस्तीत्याह - **शुध्यमानं त्विति** । स्पष्टार्थः श्लोकः । यद्यपि वर्णाश्रमविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः 'स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय' (गौ. ध. २-२-२९) इत्यादिस्मृतिभ्यः, वर्णिनामाश्रमिणां च लोकफलभेददर्शकपुराणवाक्येभ्यश्च ; तथापि तेषामेव कर्मणामीश्वराराधनत्वेनोपयुक्तानां चित्तशुद्धिवैराग्यजननेन ज्ञानयोग्यतारूपं फलान्तरमत्रोच्यत इति न विरोधः । अत्र च 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४-४-२२) इत्यादिकाः श्रुतयः, 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।। एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।।' (गी. १८-५, ६) 'यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।' (गी. १८-४६) इत्यादिस्मृतयश्च प्रमाणम् । यद्यपि च पूर्वत्र (१-२९) निषिद्धयादृच्छिकयोरिव काम्यनित्ययोरपि मिथ्याज्ञाननिमित्तकप्रवृत्तिविषयत्वमभिहितम्, तथाप्यविद्यादशायामेव नित्यनैमित्तिककर्मणोर्ज्ञानोत्पत्तिहेतुत्वं कथयितुमिह वैराग्यादिजनकत्वं प्रदर्श्यत इत्यविरोधः ।।४७।।

(मूलम्)

यस्माद् रजस्तमोमलोपसंसृष्टमेव चित्तं कामबडिशेनाऽऽकृष्य विषयदुरन्तसूनास्थानेषु निक्षिप्यते, तस्मान्नित्यनैमित्तिककर्मानुष्ठानपरिमार्जनेनापविद्धरजस्तमोमलं प्रसन्नमना-

कुलं संमार्जितस्फटिकशिलाकल्पं बाह्यविषयहेतुकेन च रागद्वेषात्मकेनातिग्रहबडिशेनानाकृष्यमाणं विधूताशेषकल्मषं प्रत्यङ्मात्रप्रवणं चित्तदर्पणमवतिष्ठते । अत इदमभिधीयते -

व्युत्थिताशेषकामेभ्यो यदा धीरवतिष्ठते ।
तदैव प्रत्यगात्मानं स्वयमेवाविविक्षति ॥४८॥

(क्लेशापहारिणी)

नैष्काम्यस्य ज्ञानोत्पत्तौ हेतुत्वम् -

कामप्रयुक्तः कर्मभिः संसरतीत्युक्तम् । नित्यनैमित्तिकानुष्ठानेन विशुद्धसत्त्वस्य तु चित्तं ब्रह्मलोकादावपि नैष्काम्यं व्यनक्तीति च । अथास्य नैष्काम्यस्य ज्ञानोत्पत्तावुपयोगं दर्शयितुमुत्तरग्रन्थ इत्युपपत्तिपूर्वकं दर्शयति - **यस्मादित्यादिना** । स्वभावतश्चित्तं स्वच्छमपि, संसारिषु न सत्त्वप्रधानं भवति, किं तु रजस्तमोमलाभ्याम् उपसंसृष्टम् । कलुषीकृतमित्येतत् । एवं कलुषितमेव चित्तं कामबडिशेन आकृष्यते विषयदुरन्तसूनास्थानेषु निक्षिप्यते च । बडिशं मत्स्यवेधनसाधनम् । सूनास्थानानि वधस्थानानि । यथा बडिशेनाऽऽकृष्य मत्स्यः सूनास्थानेषु निक्षिप्यते, एवं समलविक्षेपं चित्तं कामेनाऽऽकृष्य अनर्थकरेषु बहिर्विषयेषु दुरन्तेषु दुःखावसानेषु निक्षिप्यते । ततश्च जन्मादिसंसारप्रबन्धो नान्तरीयक इत्यर्थः । एवं मलिनमेव चित्तं संसारभाग्भवति यस्मात्, तस्मात् नित्यनैमित्तिककर्मानुष्ठानरूपेण परिमार्जनेन क्षालनेन अपविद्धरजस्तमोमलम् अपनीतकल्मषं सत् प्रसन्नं भवति । अनाकुलमचञ्चलं च भवति । प्रसन्नत्वे निदर्शनम् **संमार्जितस्फटिकशिलाकल्पमिति** । यथा स्फटिकशिला स्वभावत एव स्वच्छा सती सम्यक् क्षालनेन स्वच्छतरा भाति विगतरजआदिकल्मषा, तद्वत् चित्तमपि स्वच्छतरम् आत्म-

॥हणयोग्यं भवतीति भावः । स्मर्यते हि 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' (गी. ५-११) इति । अनाकुलत्वे हेतुं दर्शयति - **बाह्यविषयहेतुकेनेति** । यावद् हि तमोनिमित्तं विषययाथात्म्यादर्शन-रूपं मलं रजोनिमित्तं चाञ्चल्यं च चित्ते तिष्ठति, तावत् कामबडिशेनाऽऽकृष्यत इति युक्तम् । अत्र कामबडिशेनेति प्रदर्शनार्थमुक्तम्, यतो विषयं द्विषन्नपि तत्परिहारार्थं प्रवर्तत एव । तदाह - **रागद्वेषात्मकेनेति** । इन्द्रियाणां ग्रहत्वं जीवस्य वशीकरणात् ; विषयाणां चातिग्रहत्वं ग्रहाणामिन्द्रियाणामपि वशीकरणात् । 'अष्टौ ग्रहा अष्टावतिग्रहाः' (बृ. ३-२-१) इत्यादिश्रुत्या प्रपञ्चितं ह्येतत् । तत्र तु 'मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान् कामयते' (बृ. ३-२-७) इत्येतावदुक्तम् । तुल्यन्यायेन तु 'मनसा हि द्वेष्यान् द्वेष्टि' इत्यपि द्रष्टव्यम् इत्यभिसंधायाह - रागद्वेषात्मकेनातिग्रहबडिशेनेति । यदा पुनश्चित्तं रजस्तमोमलवियुक्तं जातं तदा नैव रागद्वेषाभ्यामाकृष्यते बहिः, किं तु विधूताशेष-कल्मषत्वात् प्रत्यङ्मात्रप्रवणम् अन्तःस्थितात्ममात्राभिमुखं बाह्यपराङ्मुखं चेत्यर्थः । चित्तदर्पणम् इति रूपकं निर्मलत्वेनाऽऽ-त्मग्रहणसामर्थ्यद्योतनार्थम्, अवतिष्ठते इति चाचाञ्चल्येन तन्निष्ठायोग्यत्वद्योतनार्थम् इत्यवधेयम् । एतावत्पर्यन्तं वर्णितेऽर्थे श्लोक इत्याह - **अत** इति ॥

व्युत्थितेति ॥ यदा धीः अशेषकामेभ्यो व्युत्थिता अवतिष्ठते । तदैव स्वयमेव कारणान्तरमनपेक्ष्य प्रत्यगात्मानम् आविविक्षति प्रवेष्टु-मिच्छति । आत्मविविदिषासंपन्ना भवतीत्यर्थः । यद्यपि 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥' (का. २-३-१४) इति सर्वकामप्रमोक्षो मुक्तलक्षणत्वे-नैवाभिहितः श्रुत्या, स्मृत्या च 'प्रजहाति यदा कामान्' (गी. २-५५)

इत्यादिकया, तथापीह स एव यत्नसाध्यत्वात् मुमुक्षोः साधनत्वेन प्रदर्शित इत्यविरोधः ॥४८॥

(मूलम्)

अतःपरम् अवसिताधिकाराणि कर्माणि प्रत्यक्प्रवणत्वसूनौ कृतसंप्रत्तिकानि चरितार्थानि सन्ति -

प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥४९॥

(क्लेशापहारिणी)

प्रत्यक्प्रवणचित्तस्य संन्यास एवाधिकारः -

यदैवं प्रत्यक्प्रवणता संजाता ततः कर्मसंन्यास एव कर्तव्य इत्याह - **अतःपरमिति** । चरितार्थानि सन्ति 'अस्तमायान्ति' इति श्लोकस्थेन संबन्धः । यद्यपि 'कृतार्थानि' इत्येतदपि श्लोकमध्य एवास्ति, तथापि 'कृतसंप्रत्तिकानि' इत्येतदन्तं हेतुवचनं तेनैव संबन्धनीयमिति स्पष्टीकरणार्थं 'चरितार्थानि सन्ति' इत्यधिकं संबन्धोक्तावित्यदोषः । संप्रत्तिर्नाम पुत्राय स्वव्यापाराणां संप्रदानम्, तस्यैव तत्करणे नियोजनम् । यदा पिता मरणकालमात्मनः संनिहितं मन्यते, प्रव्रजिष्यन् वा भवति, तदा पुत्रमाहूयाऽऽह - 'एतावन्तं कालं यद्यद् वैदिकं कर्म मम कर्तव्यमासीत् तत् सर्वम् इत ऊर्ध्वं त्वयैव कर्तव्यम्' इति । सेयं संप्रत्तिः **बृहदारण्यके** 'अथातः संप्रत्तिः' (बृ. १-५-१६) इत्यादिनोपदिष्टा । तदालम्ब्याह अवसिताधिकाराणि समाप्तकर्तव्यानि स्वाश्रये कर्त्तरि कृत्याभावात् प्रत्यक्प्रवणत्वसूनौ कृतसंप्रत्तिकानीति । इदमुक्तं भवति । प्रत्यक्प्रवणत्वमेव मुमुक्षुकर्मणां मुख्यं कार्यम् । तत ऊर्ध्वं यत् कर्तव्यं ज्ञानजननं तत् प्रत्यक्प्रवणत्वेनैव निर्वर्त्यत इति प्रत्यक्प्रवणतारूपावान्तरव्यापारद्वारैव तानि ज्ञानोत्पत्तिहेतुत्वं प्रतिपद्यन्त इति ॥

प्रत्यक्प्रवणतामिति । सुगमः श्लोकार्थः । अभिप्रेतं त्विदम् । कर्मणः कार्यं चित्तशुद्धिवैराग्यप्रत्यक्प्रवणताजननपर्यन्तमेव । यदा तु प्रत्यक्प्रवणता जाता तदा कर्मसंन्यास एव कर्तव्य इति । 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' (जा. ४) इति श्रुतेः ॥४९॥

(मूलम्)

यतो नित्यकर्मानुष्ठानस्यैष महिमा -

तस्मान्मुमुक्षुभिः कार्यमात्मज्ञानाभिलाषिभिः ।
नित्यं नैमित्तिकं कर्म सदैवाऽऽत्मविशुद्धये ॥५०॥

(क्लेशापहारिणी)

उक्तार्थोपसंहारः -

नित्यनैमित्तिककर्मणां सङ्गफलत्यागपूर्वकम् ईश्वरार्पणबुद्ध्या-मुमुक्षुभिरवश्यकर्तव्यतामुक्तामुपसंहर्तुमुत्तरः श्लोक इत्याह - **यत** इति ॥

तस्मादिति । स्पष्टार्थः श्लोकः । 'धर्मान्न प्रमदितव्यम्' (तै. १-११), 'न त्याज्यं कार्यमेव तत्' (गी. १८-५), 'सङ्गं त्यक्त्वाऽऽत्मशुद्धये' (गी. ५-११) - इत्यादिश्रुतिस्मृतयोऽत्रानुसंधेयाः ॥५०॥

(मूलम्)

यथोक्तेऽर्थे सर्वज्ञवचनं प्रमाणम् -

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शम एवेति च स्मृतिः ॥५१॥

(क्लेशापहारिणी)

कर्मानुष्ठानतत्संन्यासयोः प्रमाणम् -

कर्मणां बुद्धेः प्रत्यक्प्रवणत्वजन्मनः प्रागनुष्ठेयत्वं ततःपरं तु

संन्यसनीयत्वमित्यत्र भगवदुक्तिं प्रमाणयति - **यथोक्तेऽर्थे** इति ॥

आरुरुक्षोरिति । ज्ञानसाधनं ध्यानयोगमारुरुक्षोः तदनुष्ठान-सामर्थ्यप्राप्तिपर्यन्तं ईश्वरार्पणबुद्ध्या अनुष्ठितं नित्यं नैमित्तिकं च कर्म कारणं तत्साधनमुच्यतेऽभियुक्तैः । तस्यैव योगारूढस्य योगानुष्ठान-समर्थस्य तु शमः, उपशमः । कर्मसंन्यास एवेत्यर्थः । कारणमुच्यते मुक्तिं प्रतीति गीतास्मृतिः अस्मदुक्तार्थमेवाऽऽह इत्यर्थः ॥५१॥

(मूलम्)

नित्यकर्मानुष्ठानाद्धर्मोत्पत्तिः, धर्मोत्पत्तेः पापहानिः, ततश्चित्तशुद्धिः, ततः संसारयाथात्म्यावबोधः, ततो वैराग्यम्, ततो मुमुक्षुत्वम्, ततस्तदुपायपर्येषणम्, ततः सर्वकर्मतत्साधनसंन्यासः, ततो योगाभ्यासः, ततश्चित्तस्य प्रत्यक्प्रवणता, ततस्तत्त्वमस्यादि-वाक्यार्थपरिज्ञानम्, ततोऽविद्योच्छेदः, ततश्च स्वात्मन्येवा-वस्थानम् 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६), 'विमुक्तश्च विमुच्यते' (का. २-२-१) इति -

पारम्पर्येण कर्मैवं स्यादविद्यानिवृत्तये ।
ज्ञानवन्नाविरोधित्वात् कर्माविद्यां निरस्यति ॥५२॥

(क्लेशापहारिणी)

कर्मणां परम्परया मोक्षदायित्वे क्रमः -

कर्मणां येन **पारम्पर्येण** मोक्षहेतुत्वं प्रतिज्ञातं तदुत्तरश्लोके उपसंह्रियते । तदेव च पारम्पर्यमत्र संबन्धोक्तौ विन्यस्यते साधन-सोपानक्रमज्ञापनार्थं **नित्यकर्मानुष्ठानादित्यादिना** । (१) नित्य-कर्मानुष्ठानात् धर्मोत्पत्तिः पुण्यनिष्पत्तिः । (२) तदुत्पत्तेश्च

पापहानिः । (३) ततश्च चित्तशुद्धिः । (४) चित्तशुद्धौ ततः संसारयाथात्म्यावबोधः । संसारस्य याथात्म्यं दुःखमयत्वादिदोषवत्त्वम् । तस्यावबोधो ज्ञानम् । यदर्थम् ईश्वरगीतासु भगवान् अमानित्वादिज्ञानसाधनानुक्रमणप्रसङ्गेनाऽऽह - 'जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्' (गी. १३-८) इति । (५) ततो वैराग्यं यदुपदर्शितं 'वैराग्यं ब्रह्मलोकादौ' (१-४७) इति । (६) ततो मुमुक्षुत्वम् एकान्तेन मोक्षेच्छावत्त्वम् । (७) ततस्तदुपायपर्येषणं मोक्षसाधनान्वेषणं यदप्युपदर्शितं 'तदैवं प्रत्यगात्मानं स्वयमेव प्राविविक्षति' (१-४८) इति । (८) ततः कर्मतत्साधनसंन्यासः । सर्वाणि अग्निहोत्रादीनि गृहस्थं प्रति चोदितानि कर्माणि । तत्साधनानि च यज्ञोपवीतादीनि । तेषां संन्यासो विधिवत्त्यागः । (९) ततो योगाभ्यासः प्रत्यगात्मध्यानम् । (१०) ततश्चित्तस्य प्रत्यक्प्रवणता या पूर्वमुपदर्शिता 'प्रत्यक्प्रवणतां बुद्धेः' (१-४९) इत्यत्र । (११) ततस्तत्त्वमस्यादिवाक्यार्थज्ञानम् । श्रवणादिपूर्वकम् इति शेषः । (१२) ततोऽविद्योच्छेदः । (१३) ततः स्वात्मन्येवावस्थानम् इति । अविद्योच्छेदः अविचारितसिद्धद्वैतप्रतिभानशोभनाशोभनाध्यासरागद्वेषकर्मधर्माधर्मोपचयदेहोपादानदुःखरूपसर्वानर्थपरम्परायाः परमहेतुभूतस्य आत्मानवबोधस्य नाशः । आत्मन्यवस्थानं प्रत्यस्तमितसर्वदुःखे आगमापायरहितसुखस्वभावे स्वस्वरूपेऽवस्थानम् इत्यर्थः । यद्यप्यविद्योच्छेदो न ज्ञानादतिरिक्तः । तदुच्छेदाद्वा नात्मन्यवस्थानमतिरिक्तम् । यथोक्तं स्वयमेवाचार्येणान्यत्र 'न चाविद्यासमुच्छित्तिर्ज्ञानोत्पत्त्यतिरेकतः' (बृ. वा. २-४-१९५) इति । 'ऐकात्म्याज्ञानविध्वंसव्यतिरेकेण नेष्यते । ऐकात्म्यविज्ञानफलं प्राप्तमेव हि तत्त्वतः ॥' (बृ. वा. २-४-२३५) इति च । तथापि प्राप्तप्राप्तिः

परिहृतपरिहारश्चैवंक्रमेण भवत इति प्रतिपत्तिक्रम एवात्र प्रदर्शितो न तु कालकृतक्रम इति सन्तोष्टव्यम् ॥

योगाभ्यासोऽत्र निदिध्यासनादन्यः -

केचित्तु 'योगाभ्यासः' इति श्रवणमनननिदिध्यासनादीनामनुष्ठानम् इति व्याचक्षते । विवेचयन्ति च 'अत्र चित्तस्य प्रत्यक्प्रवणता नाम प्रत्यगात्मन्येवाप्रयत्नेनावस्थानम्, कर्मसंन्यासहेतुत्वेन पूर्वोदिता तु प्रत्यक्प्रवणता प्रत्यगात्मविविदिषामात्ररूपा' इति । तदेतन्न ग्रन्थकृतां हृदयस्थम् । यतो **बृहद्वार्तिके** ध्यानस्यापि निदिध्यासनात् पृथगुपादानं दृश्यते । 'अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते' (बृ. वा. २-४-२१७) इति हि तत्र निदिध्यासनं स्वायत्तवाक्यज्ञानत्वेनैव वर्णितम् । 'ध्यानशङ्कानिर्वृत्त्यर्थं विज्ञानेनेति भण्यते । निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ॥' (बृ. वा. २-४-२३३) इति च निदिध्यासनं विज्ञानत्वेनोपवर्ण्य ततः शेषेणोक्तम् 'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम्' (बृ. वा. २-४-२३४) इति । अत इहापि योगाभ्यासशब्देन निदिध्यासनाद् व्यतिरिक्तमेव ध्यानं विवक्षितमित्यवगम्यते । इदं च ध्यानम् उपासनापराभिधानं ज्ञानयोग्यताकारणत्वेनोपन्यस्तमिति व्याख्येयम् । 'उपासनं च यत्किञ्चिद्विद्याप्रकरणे श्रुतम् । तदप्यैकात्म्यविज्ञानयोग्यत्वायैव कल्पते ॥' (सं. वा. ३२९) इति वचनात् । 'तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वात् अद्वैतज्ञानोपकारकाणि' (छां. भा. अव.) इति छान्दोग्यभाष्यवचनाच्च ॥

यत्तु कर्मानुष्ठानेनान्यादृशी प्रत्यक्प्रवणता योगाभ्यासेन चान्यादृशीत्युत्प्रेक्षणम्, तदसत् । पूर्वप्रतिज्ञाताया एव प्रत्यक्प्रवणताया अत्र साधनपरम्परानुक्रमदर्शनार्थं विशिष्टस्थाननिर्देशेन विशदीकरणमेतदित्यपि व्याख्यानसंभवात् । भवदुक्तप्रत्यक्प्रवणताविभागस्याऽऽ-

नार्येण क्वचिदप्यादृतत्वाभावाच्च । तस्मात्, योगाभ्यासेन वेदोक्तोपासनया वाक्यार्थपरिज्ञानं निदिध्यासनशब्दितं श्रवणमनन-क्रमेणेत्येव सुव्याख्यानमित्युत्पश्यामः । एवं हि द्वितीयाध्याये पदार्थविवेचनरूपं मननं तृतीये च वाक्यार्थविज्ञानरूपं निदिध्यासनं निरूपयिष्यमाणं समञ्जसमनेनैकार्थं च भविष्यति । **भाष्यप्रस्थाने** तु यद्यपि निदिध्यासनमुपासनाद् भावनारूपाद् भिन्नम्, तथापि न वाक्यार्थज्ञानं तत्, किं तु वाक्यार्थस्य स्वसंवेद्यत्वापादनार्था प्रणिधानापराभिख्या काचिन्मानसी क्रिया । 'अपि चोपासनं निदिध्यासनं चेत्यन्तर्णीतावृत्तिगुणैव क्रिया अभिधीयते' (सू. भा. ८-१-१) इत्युक्तेः । एवं च निदिध्यासनशब्दस्य साधनविशेष-वाचकत्वेन तत्फलरूपविज्ञानवाचकत्वेन चाभ्युपगमाद् भाष्य-वार्तिकप्रस्थानयोर्भेद[1] इत्यन्यदेतत् । सर्वथापि त्वत्र योगाभ्यासशब्देन न निदिध्यासनं विवक्षितमित्यलमतिप्रपञ्चेन ।।

स्वात्मन्यवस्थानमेव मुक्तिरित्यत्र प्रमाणम् -

प्रकृतमनुसरामः । अविद्योच्छेदेन स्वात्मन्यवस्थानमेव मुक्तिः, न पुनरप्राप्तप्राप्तिरूपा, अपरिहृतपरिहाररूपा वा सा, येन कर्मणामपि तत्र साक्षात्साधनत्वं स्यादित्युक्तम् । तत्र प्रमाणमाह **'ब्रह्मैव सन् ब्रह्माप्येति'** (बृ. ४-४-६) इति । **'विमुक्तश्च विमुच्यते'** (का. २-२-१) इति च । ज्ञानात्प्रागपि ब्रह्मैव सन् इति वचनेन प्राप्तप्राप्तिरेव ब्रह्माप्ययः, न स्वव्यतिरिक्ते ब्रह्मणि लयः - इति प्रदर्शितं भवति । 'विमुक्तश्च' इत्यनेन च बन्धो नित्यनिवृत्त एव, अविद्योच्छित्तिमात्रेण तु विमुच्यत इत्युपचर्यते, न पुनरनिवृत्तानर्थनिवृत्तिरिह विवक्षितेति प्रदर्शितं भवतीति सर्वमवदातम् ।।

---

1. अधिकं त्वत्र मदीय'**वेदान्तप्रक्रियाप्रत्यभिज्ञा**'तः एतद्ग्रन्थभूमिकातश्चाधि-गन्तव्यम् ।।

प्रकृतार्थमुपसंहरति - **पारम्पर्येणेति** । न व्याख्यानापेक्षः श्लोकः ॥५२॥

(मूलम्)

न च कर्मणः कार्यमण्वपि मुक्तौ संभाव्यते । नापि मुक्तौ यत्संभवति तत् कर्मापेक्षते । तदुच्यते -

उत्पाद्यमाप्यं संस्कार्यं विकार्यं च क्रियाफलम् ।
नैवं मुक्तिर्यतस्तस्मात्कर्म तस्या न साधनम् ॥५३॥

(क्लेशापहारिणी)

मुक्तिर्न कार्यरूपा किं तु ज्ञाप्यैव -

नन्वविद्यानिवृत्तिर्मास्त्वेव । विनैव तन्निवृत्तिं साक्षात्कर्मण एव मुक्तिरित्यस्तु, इति शङ्कमानम् उक्तपरिहारस्मारणेनैव (१-२४) समाधत्ते **न चेति** ॥

उत्पाद्यमिति । क्रियाफलमुत्पाद्यादिचतुर्विधं वस्तु । मुक्तिस्तु नैवम् । स्वात्मन्यवस्थानं हि मुक्तिरित्युपपादितम् । न हि सा घटस्वर्गादिवत् कर्मणा समुत्पादयितव्या । नित्यसिद्धत्वात् । तथा नाऽऽप्या ग्रामादिवत् । साधकस्वरूपाव्यतिरिक्तत्वादेव नित्याप्तत्वात् । न च स्वरूपाव्यतिरिक्तापि यौवनवार्धकादिवदाप्या भवेदिति शङ्कनीयम् । कालदेशादिविशेषरहितत्वात्, निर्विकारात्मस्वरूपत्वाच्च । अत एव न विकार्या । नापि संस्कार्या । आत्मनः कर्मसाधनद्रव्यत्वाभावात्, नित्यनिर्विकारत्वात्, नित्यशुद्धत्वे सति दोषापनयनगुणाधानरूपसंस्कारानपेक्षत्वाच्च । तदेवं कर्मकार्यस्य सर्वथा दुःसंभाव्यत्वात्, संभावितस्य चाज्ञानोच्छेदेनाऽऽप्यत्वस्य कर्मानपेक्षत्वात्, तस्या मुक्तेः कर्म न साधनं भवितुमर्हतीत्यभिप्रायः ॥५३॥

११. ज्ञानस्य मोक्षं प्रति निरपेक्षसाधनत्वम्

(मूलम्)

एवं तावत् केवलं कर्म साक्षादविद्यापनुत्तये न पर्याप्तमिति प्रपञ्चितम् । मुक्तौ च मुमुक्षुज्ञानतद्विषयस्वाभाव्यानुरोधेन सर्वप्रकारस्यापि कर्मणोऽसंभव उक्तो 'हितं संप्रेप्सताम्' (१-२९) इत्यादिना । यादृशश्चाऽऽरादुपकारकत्वेन ज्ञानोत्पत्तौ कर्मणां समुच्चयः संभवति तथा प्रतिपादितम् । अविद्योच्छित्तौ तु लब्धात्मस्वभावस्याऽऽत्मज्ञानस्यैवासाधारणं साधकतमत्वं नान्यस्य प्रधानभूतस्य गुणभूतस्य च - इत्येतदधुनोच्यते । तत्र ज्ञानं गुणभूतं तावदहेतुरित्येतदाह -

संनिपत्य न च ज्ञानं कर्माज्ञानं निरस्यति ।
साध्यसाधनभावत्वादेककालानवस्थितेः ॥५४॥

(क्लेशापहारिणी)

अतीतग्रन्थोक्तार्थसंग्रहः -

वृत्तवर्तिष्यमाणयोः संबन्धकथनाय वृत्तमनुद्रवति - एवं तावदिति । केवलं ज्ञाननिरपेक्षं कर्म साक्षादविद्यापनुत्तये न पर्याप्तम् । स्वयमेवाविद्यानिवर्तनासमर्थम् इति प्रपञ्चितं विस्तरेण प्रतिपादितम् । मुक्तौ च सर्वप्रकारस्यापि नित्यनैमित्तिकादिभेदभिन्नस्य कर्मणः साधनत्वासंभव उक्तः मुमुक्षुज्ञानतद्विषयस्वाभाव्यानुरोधेन । मुमुक्षुस्वभावस्तावत्, ईश्वरार्पितनित्यनैमित्तिककर्मानुष्ठानेन लब्धचित्तशुद्धिवैराग्यस्य प्रत्यङ्मात्रप्रवणान्तःकरणत्वम् । ज्ञानस्वभावश्च

परमार्थात्मवस्त्वाश्रितत्वं स्वोत्पत्तिमात्रेणैवाविद्यानिरसनसमर्थत्वम्, प्रमाणोत्थत्वादविद्यातद्वासनाभ्यामशक्यबाधनत्वं चेति । ज्ञान-विषयस्याऽऽत्मनश्च स्वभावो नित्यनिवृत्तदुःखत्वम्, नित्य-सुखाव्यतिरिक्तत्वं स्वतःसिद्धत्वं चेति । तदेवमेतेषां मुमुक्षु-ज्ञान-तद्विषयाणां स्वाभाव्यस्यानुरोधेन तत्स्वभावमनुसृत्यैव विचारणेन, अविद्यासमुच्छित्तिं विहाय नास्त्यन्यदपेक्षितव्यं मुक्तये इत्यवगम्यते । अतोऽविद्यासमुत्थस्य कर्मणः सर्वविधस्याप्यसंभव इत्युक्तं 'हितं संप्रेप्सतां' (१-२९) इत्यादिना गतेन ग्रन्थेनेति वाक्यार्थः । यादृशश्चेति । ज्ञानोत्पत्तौ आरादुपकारकत्वेन चित्तशुद्ध्याद्युत्पादन-क्रमेण यादृशः कर्मणां समुच्चयः संभवति । यथेति शेषः । कर्माधिकारापेक्षितकर्तृत्वाद्यध्यारोपणसहिष्णुमिथ्याज्ञानेनैव हि कर्मणां समुच्चयः संभवतीति वर्णितं प्राक् । तदीदृशः समुच्चयो यथा ज्ञानोत्पत्तौ हेतुत्वेन संभवति तथा प्रतिपादितम् इत्यर्थः । सोऽयं वृत्तग्रन्थभागे प्रतिपादितोऽर्थः ॥

आगामिग्रन्थार्थः -

अथेदानीं वर्तिष्यमाणेन ग्रन्थभागेन किं विवक्ष्यत इति ? तदाह - **अविद्योच्छित्तौ त्विति** । तुशब्दः कार्यविषयाद् वैलक्षण्यद्योतनार्थः । यद्यप्युत्पाद्यादिलक्षणे कार्ये जनयितव्ये अन्यदपि कर्म तत्समुच्चितम् उपासनात्मकं ज्ञानं वा साधकं भवेत्, तथापि अविद्योच्छित्तौ तदकिञ्चित्करमिति भावः । अत्र तु लब्धात्मस्वभावस्याऽऽत्मज्ञानस्यैव असाधारणं साधकत्वम् । लब्धः प्राप्तः आत्मस्वभावः आत्मनो याथात्म्यं क्रियाकारकफलजातानन्तर्भावित्वं नित्यसिद्धत्वं चेत्येतद्रूपं येन तदिदम् आत्मज्ञानं लब्धात्मस्वभावम् । तस्य यथावस्थितात्म-वस्तुज्ञापकस्येत्यर्थः । न ह्यनीदृशेन अविद्यासमुत्थितेन, अविद्याश्रयेणैव च प्राणधारणसमर्थेन कर्मणा तत्समुच्चितेन ज्ञानेन वा अविद्या-

समुच्छित्तिः शक्यसाधनेति वस्तुतन्त्रस्यैवाऽऽत्मज्ञानस्य असाधारणमितरसाधारणं तत्र साधकत्वमिति युक्तम् इति भावः । 'लब्धात्मलाभस्य' इति पाठस्तु नात्र संगतार्थः । न ह्युत्तरग्रन्थे ज्ञानमुत्पन्नमात्रमेव अविद्यासमुच्छेत्तृ न कारकान्तरमपेक्षत इति प्रतिपादयिष्यते, किं तर्हि ज्ञानकर्मसमुच्चयनिरासमात्रं क्रियत इति । अत एवेत्थं लब्धात्मस्वभावस्यैव ज्ञानस्याविद्यासमुच्छित्तौ साधकतमत्वम् । यत्सत्यं कर्म तत्समुच्चितमुपासनात्मकं ज्ञानं वा चित्तशुद्धिज्ञानयोग्यताज्ञानोत्पत्तिद्वारेण परम्परया अविद्यासमुच्छित्तावपि साधकं भवतीति, तथापि तु तत्र साक्षात्साधनत्वं त्वस्यैव वस्तुतन्त्रात्मज्ञानस्येति भावेन 'साधकतमत्वम्' इति तमब्ग्रहणम् । तमिमम् आत्मज्ञानस्यैवेत्येवकारेण विवक्षितम् अन्यव्यवच्छेदं कण्ठरवेणाऽऽह - **नान्यस्य प्रधानभूतस्य गुणभूतस्य वेति** । अन्यस्य, कर्मसाहचर्यसहस्य पुरुषतन्त्रस्वरूपस्य ज्ञानस्येत्यर्थः । तच्च साहचर्यं ज्ञानस्य प्रधानभूतस्य स्वाङ्गभूतेन कर्मणा वा स्यात्, गुणभूतस्य स्वयमङ्गभूतस्य अङ्गिना कर्मणा वा स्यात् । उभयथापि तस्य ज्ञानस्य नाविद्यासमुच्छित्तौ साधकतमत्वमस्तीत्यभिप्रायः । उपलक्षणमिदम् । समप्रधानयोर्ज्ञानकर्मणोरपि नाविद्यासमुच्छेदप्रभुत्वम् - इत्यपि द्रष्टव्यम् । एवं च सर्वानर्थनिवृत्तिः अपरतन्त्रनिरतिशयसुखावाप्तिश्चेत्येतदुभयरूपायाः मुक्तेरविद्याव्यवधाननिवृत्तिमात्रसाध्यत्वात्, अविद्यानिवृत्तेश्चकर्मतत्समुच्चितज्ञानयोरन्यतरेणाप्यशक्यसाधनत्वात्, यथावस्थितात्मस्वभावानुगुणमात्मज्ञानमेव मुमुक्षुभिरेष्टव्यमित्येतदधुनोच्यते इत्यभिप्रायः ॥

उत्तरश्लोकसंबन्धः -

साम्प्रतमुत्तरश्लोकविषयमाह - **तत्रेत्यादिना** । प्रतिपिपादयिषितेषु मध्ये ज्ञानं गुणभूतं कर्माङ्गभूतं सत् कर्मसमुच्चितम् अविद्योच्छित्तावहेतुरित्येतत् तावदाहेत्यर्थः ॥

अत्रेत्थं पूर्ववादिशङ्का द्रष्टव्या । नन्वस्तु वस्तुतन्त्रस्याऽऽत्मज्ञानस्यैव असाधारणं साधकत्वमविद्याविनाशे इति, अस्तु च ज्ञानान्तरस्य प्रधानस्य गुणभूतस्य वा कर्मसहकृतस्य न तत्र तादृशं साधकत्वं समस्तीति ; तथापि त्वस्यैवाऽऽत्मज्ञानस्य भवदभिमतस्य कर्मसहकारित्वं भवेदिति युज्यते । अन्यथा हि चोदनाशास्त्रम् अप्रमाणमिति निष्कारणं कल्पितं स्यादिति । अतो ज्ञानमज्ञानतिरस्करणे कर्तव्ये कर्मणो गुणभूतमेव व्याप्रियत इति कल्प्यताम् । अथवा ज्ञानकर्मणोः समप्रधानतैव स्यात् तत्र । अथवा पुनरस्तु प्रधानमेव सदिदं ज्ञानं गुणभूतमेव कर्म स्वफलसिद्धावपेक्षत इति । न च कर्मणः सहकारोऽत्र केन द्वारेणेति नैव संभाव्यत इति शङ्क्यम् । चोदनान्यथानुपपत्त्यैव केनचिददृष्टेन द्वारेण शास्त्रचोदितं कर्म शास्त्रोपदिष्टज्ञानसहकारि भवतीति हि नासंभावितकल्पनमिदमिति ॥

अत्रोत्तरम् । अविमृश्यैव कर्मज्ञानयोः स्वाभाव्यमिमं ज्ञानकर्मसमुच्चयम् उत्प्रेक्षते भवान् । यतः सुविमृष्टे कर्मज्ञानयोः स्वाभाव्ये सर्वथापि तयोः साहचर्यं न घटते । कथम् ? तत्र प्रकारत्रये भवदुद्भाविते ज्ञानं कर्मगुणभूतं सत्स्वफलसाधकं भवितुमर्हति न वा इत्येतदेव तावद्विचार्यताम् इति समनन्तरश्लोकावतरणिका ॥

ज्ञानं न कर्माङ्गम् -

संनिपत्येति । न च इति चोऽवधारणे । ज्ञानं संनिपत्य कर्म हि प्राप्य नैव अज्ञानं निरस्यति । केवलमेव निरस्यतीत्यर्थः । तत्र हेतुः **साध्यसाधनभावत्वादिति** । कर्म हि परम्परया ज्ञानसाधनमित्युक्तम् ; ज्ञानस्यान्तरङ्गभूतां बुद्धेः प्रत्यक्प्रवणतामुत्पाद्य स्वयमस्तं यातीति च (१-४९) । अत एवं साध्यसाधनभावत्वात् तयोरेककालानवस्थितेः । स्वसाध्येन ज्ञानेन सह परम्परया साधनभूतस्य कर्मणः समकाल-

ावस्थातुमशक्तत्वात् इत्यर्थः । न हि साध्यं ज्ञानं प्रति साधनभूतस्य कर्मणोऽङ्गिभाव उपपद्यते । साधनानुष्ठानकाले स्वरूपस्यैवाभावात् इत्यभिप्रायः । न हि समकालानवस्थितयोः समुच्चयः स्वप्नेऽपि संभावयितुं शक्यत इति भावः ।।५४।।

(मूलम्)

समप्रधानयोरप्यसंभव एव -

बाध्यबाधकभावाच्च पञ्चास्योरणयोरिव ।
एकदेशानवस्थानान्न समुच्चयता तयोः ।।५५।।

(क्लेशापहारिणी)

ज्ञानकर्मणोः समप्राधान्येनापि न समुच्चयः -

तदेवं ज्ञानस्य गुणभावं व्युदस्य कर्मणा समप्राधान्यमपि निराचष्टे **समप्रधानयोरपीति** । उक्तहेतोरेव समकालानवस्थितेः समप्रधानतयापि समुच्चयासंभवस्य शक्यसाधनत्वेऽपि प्रकारान्तरेणापि तत्साधयितुमुत्तरश्लोक इत्यभिप्रायः ।।

बाध्यबाधकभावाच्चेति । पञ्चास्यः सिंहः, उरणो मेषः । तयोरिव बाध्यबाधकभावाच्च तयोः संहत्यैककार्योत्पादकत्वानुपपत्तिः । एवं तमःप्रकाशवदेकदेशानवस्थानात्, एकस्मिन्नेव पुरुषे युगपत्स्थातुमशक्यत्वाच्च, तयोः ज्ञानकर्मणोः न समुच्चयता न समप्रधानतया समुच्चयो घटत इत्यर्थः । अयं च हेतुः सर्वविधसमुच्चयासंभवेऽप्यनुसंधेयः ।।५५।।

(मूलम्)

कुतो बाध्यबाधकभावः ? यस्मात् -

अयथावस्त्वविद्या स्याद् विद्या तस्या विरोधिनी ।
समुच्चयस्तयोरेवं रविशार्वरयोरिव ।।५६।।

(क्लेशापहारिणी)

ज्ञानकर्मणोर्बाध्यबाधकभावोपपत्तिः -

बाध्यबाधकभाव एव आक्षिप्य समाधीयत उत्तरश्लोके । तदाह - **कुत इति ?** कुतो बाध्यबाधकभावः कर्मज्ञानयोः ? न हि ज्ञानं सिंह इव मेषमाक्रम्य कर्म व्यापादयति । किं च दृष्टान्ते मेषस्य यावद् वध्यत्वं तावदेकदेशस्थितिरपि सिंहेनावकल्पत एवेति यावत्तावदपि ज्ञानकर्मणोर्बाध्यबाधकभावे सहावस्थितिरपि त्वदनिष्टा प्रसजेत् इति शङ्कितुर्भावः । अतः स्वाशयाविष्करणेन सर्वशङ्कानिरासार्थमाह बाध्यबाधकभावोपपत्तिं समनन्तरश्लोके । तदाह - **यस्मादिति** ।।

अयथावस्त्विति । वस्त्वनतिक्रम्य यथावस्तु । यथावस्तु वर्तमानं न भवति यथा तथा इति अयथावस्तु । वस्तुस्वाभाव्यमननुरुन्धानैवाविद्या अन्यथा सन्तमात्मानमन्यथा प्रतिपद्यत इत्यर्थः । विद्या तु यथास्थितात्मवस्त्वनुसारिणीति तस्या अविद्याया विरोधिनी । विरोधित्वमेव कीदृशमिति दृष्टान्तादानेन विशदयति - **रविशार्वरयोरिवेति** । प्रकाशरूपस्य रवेः, चक्षुर्वृत्तिनिरोधकस्य शार्वरस्य तमसश्चेव बाध्यबाधकभाववतोः परस्परविरहेणैव स्वात्मस्थितिं लभमानयोः कथं वा समुच्चयो घटेतेति भावः ।।५६।।

(मूलम्)

तस्मादकारकब्रह्मात्मनि परिसमाप्तावबोधस्य अशेषकर्मचोदनानाम् अचोद्यस्वाभाव्यात् कुण्ठता । कथम् ? तदभिधीयते -

बृहस्पतिसवे यद्वत् क्षत्रियो न प्रवर्तते ।
ब्राह्मणत्वाद्यहंमानी विप्रो वा क्षत्रकर्मणि ।।५७।।

(क्लेशापहारिणी)

ज्ञानिनो विधिनिषेधागोचरत्वम् -

तस्मात् संजाते ज्ञाने सुतरां न कर्मसु प्रवृत्तिः संभवतीत्याह- **तस्मादिति** । उक्तरीत्या ज्ञानकर्मणोः सहभावानुपपत्तेरित्यर्थः **'अकारकब्रह्मात्मनि'** इति प्रदर्शनार्थम् । क्रियाकारकफलसंसर्ग-रहितेऽद्वितीये ब्रह्मात्मनीत्यर्थः । परिसमाप्तः विश्रान्तः अवबोधो ज्ञानं यस्य तादृशज्ञानिन इत्यर्थः । तस्य विषये अशेषकर्मचोदनानां विधिनिषेधरूपाणां कुण्ठता । घनतरशिलायां प्रयुक्तस्य खड्गस्येव निर्व्यापारतेत्यर्थः । कुतः ? अचोद्यस्वाभाव्यात् तस्य । अनियोज्य-स्वभावत्वादित्यर्थः । कथं कुण्ठतेति पृच्छायां कर्माधिकारनिवृत्तेरेवेति प्रदर्शयितुमुत्तरश्लोक इत्याह - **कथम् ? तदभिधीयत इति** ।।

बृहस्पतिसव इति । बृहस्पतिसवे ब्राह्मणस्यैवाधिकारः । तत्र क्षत्रियो न प्रवर्तते । तत्कुतः ? तस्य ब्राह्मणत्वाद्यहंमानाभावात् । तथा ब्राह्मणत्वादिषु अधिकारकारणेषु अहंमानी विप्रः क्षत्रकर्मणि राजसूयादौ न प्रवर्तते । क्षत्रियत्वाद्यहंमानित्वाभावादेवेति भावः । यद्वद् ब्राह्मणः क्षत्रियकर्मणि न प्रवर्तते, क्षत्रियो वा ब्राह्मणकर्मणि, तत्र तत्राधिकृतत्वबुद्ध्यभावात् तस्य तस्य । एवमत्रापीति भावः ।।५७।।

(मूलम्)

यथायं दृष्टान्त एवं दार्ष्टान्तिकोऽपीत्येतदाह -

विदेहो वीतसन्देहो नेतिनेत्यवबोधितः ।
देहाद्यनात्मदृक् तद्वत्तत्क्रियां वीक्षतेऽपि न ।।५८।।

(क्लेशापहारिणी)

समनन्तरश्लोके दार्ष्टान्तिकः समर्प्यत इत्याह - **यथायमिति** ।। **विदेह इति** । विदेहः मिथ्याप्रत्ययनिमित्तदेहरहितः । वीतसंदेहः

विगतसर्वसंशयः । 'छिद्यन्ते सर्वसंशयाः' (मुं. २-२-८) इति श्रुतेः । 'नेति नेति' (बृ. २-३-६) इति श्रुत्या सर्वानात्मविकल्पापह्नवेन अज्ञाननिद्रायाः प्रबोधितः । अद्वयात्माहमिति निश्चितज्ञानवान् इति यावत् । देहाद्यनात्मदृक् देहादावसत्कल्पे आत्माभिमानशून्यो यस्मात्, अहमशरीर एवेति निश्चयवांश्च, तस्मात् देहाद्यभिमान्याधिकारिकीं क्रियां न वीक्षतेऽपि । न हि 'अशरीरोऽहमपेतब्रह्मक्षत्रादिभेदोऽद्वितीयात्मा' इति बुद्धिः कर्माधिकारकारणं भवेदिति भावः ॥५८॥

(मूलम्)

तस्यार्थस्याविष्करणार्थमुदाहरणम् -

मृत्स्नेभके यथेभत्वं शिशुरध्यस्य वल्गति ।
अध्यस्याऽऽत्मनि देहादीन्मूढस्तद्वद्विचेष्टते ॥५९॥

(क्लेशापहारिणी)

अज्ञस्यैव कर्मण्यधिकार इत्यत्र दृष्टान्तः -

विदेहत्वान्न कर्म वीक्षते ज्ञानीत्युक्तम् । तद्विपर्ययेणाज्ञानी देहाभिमानवत्त्वादेव कर्मणि प्रवर्तत इति व्यतिरेकमुखेनापीममेवार्थं विशदयितुमनन्तरः श्लोक इत्याह - **तस्यार्थस्येति ॥**

मृत्स्नेभक इति । इभत्वशून्येऽपि मृत्स्नेभके मृन्निर्मितकलभाकारविशेषे इभत्वं सत्यगजत्वमध्यस्य भ्रान्त्या अध्यारोप्य शिशुर्बालो वल्गति गच्छति सत्यगज इवाचरति यथा तद्वदेव मूढः आत्मज्ञानशून्यः आत्मनि देहादिरहितेऽपि देहादीनध्यस्य 'अहं देही' इति मिथ्याभिनिवेशेन निमित्तेन कामेन विचेष्टते कर्म करोतीत्यर्थः ॥५९॥

(मूलम्)

न च वयं ज्ञानकर्मणोः सर्वत्रैव समुच्चयं प्रत्याचक्ष्महे । यत्र

प्रयोज्यप्रयोजकभावो ज्ञानकर्मणोः तत्र नास्मत्पित्रापि शक्यते निवारयितुम् । तत्र विभागप्रदर्शनाय उदाहरणं प्रदर्श्यते -

स्थाणुं चोरधियाऽऽलाय भीतो यद्वत्पलायते ।
बुद्ध्यादिभिस्तथाऽऽत्मानं भ्रान्तोऽध्यारोप्य चेष्टते ॥६०॥

एवं यत्र यत्र ज्ञानकर्मणोः प्रयोज्यप्रयोजकभावः, तत्र सर्वत्रायं न्यायः । यत्र तु न समकालं नापि क्रमेणोपपद्यते समुच्चयः, स विषय उच्यते -

स्थाणोः सतत्त्वविज्ञानं यथा नाङ्गं पलायने ।
आत्मनस्तत्त्वविज्ञानं तद्वन्नाङ्गं क्रियाविधौ ॥६१॥

(क्लेशापहारिणी)

भ्रान्तिज्ञानमेव प्रवृत्त्यङ्गम्, न तत्त्वज्ञानम् -

अज्ञानविरोधितत्त्वविज्ञानव्यतिरिक्तमुपासनादिरूपं ज्ञानमप्यस्ति यत्कर्मणा समुच्चयं सहत एव । आत्मतत्त्वविज्ञानं तु नैवं समुच्चयसहमित्येतावदत्रोच्यत इति प्रदर्शयितुमुत्तरश्लोक इत्याह - **न च वयमिति** । कर्म प्रयोज्यं ज्ञानं च प्रयोजकम् - इति यत्र प्रयोज्यप्रयोजकभावः, हेतुहेतुमद्भावः । तत्र समुच्चयो न केनापि शक्यते निवारयितुम् । तत्र विभागप्रदर्शनाय 'अत्र प्रयोज्यप्रयोजकभावो विद्यते, अत्र तु न' इति विभज्य प्रदर्शयितुम् उदाहरणमानीयते समनन्तरश्लोके इत्यर्थः ॥

स्थाणुमिति । यद्वत् स्थाणुं चोरधिया भ्रान्त्या आलाय गृहीत्वा ततः कल्पितचोराद्भीतः पलायते, तथा बुद्ध्यादिभिरात्मानमालाय चेष्टते । यथा दृष्टान्ते स्थाणौ चोरत्वमध्यारोप्य पलायते, तथा भ्रान्त एव दार्ष्टान्तिकेऽप्यात्मनि बुद्ध्यादिरूपत्वमध्यारोप्य चेष्टते कर्म करोति

रागद्वेषादिप्रेरितः सन्नित्यर्थः । भ्रान्तिज्ञानमेव सर्वत्र कर्मणा समुच्चीयते । न तु सम्यग्ज्ञानम् इति वाक्यार्थः । यद्यपि दृष्टान्ते स्थाणौ ज्ञेये ज्ञेयस्यैव चोरत्वस्याध्यारोपः क्रियते ज्ञात्रा, आत्मनि तु ज्ञातर्येव ज्ञेयानां बुद्ध्यादीनामध्यारोप इति वैषम्यमस्ति, तथापि देहस्य ज्ञेयभूतस्यैव धर्मा जरामरणादयो ज्ञातर्यपि आत्मन्यध्यारोप्यन्त इति सर्वैरात्मवादिभिरभ्युपगमात् स्थाणुचोरदृष्टान्तो न विषमः । यद्यपि च न कोऽपि जातु 'अहं बुद्धिः', 'अहमिन्द्रियम्', 'अहं देहः', - इति व्यवहरति भ्रान्त्यापि, यथा दृष्टान्ते 'अयं चोरः' इति - तथापि 'अहमिच्छामि', 'अहं संशये', 'अहं निश्चिनोमि', 'अहं पश्यामि', 'अहं शृणोमि', 'अहं गच्छामि', 'अहं तिष्ठामि' - इति सर्वत्र अनात्मधर्मानात्मना संसृज्यैव व्यवहारदर्शनात्, अत्रापि भ्रान्त्याऽनात्मधर्मानध्यारोप्यैव चेष्टते इति युक्तमध्यवसातुमिति न विषम उपन्यास इति ध्येयम् ॥६०॥

तदेवं भ्रान्तिज्ञानस्यैव सर्वत्र समुच्चयार्थत्वमिति सोदाहरणमुपपाद्य सम्यग्ज्ञानस्य तु न कुत्रापि कर्मणा समुच्चयोऽस्तीति प्रदर्शयितुं श्लोकान्तरमित्याह - **एवमिति** ॥

तत्रोदाहरणं **स्थाणोरिति** । स्थाणोः सतत्त्वं स्थाणुतत्त्वमेव । तस्य विज्ञानं 'स्थाणुरेवायं न पुरुषः' इति निश्चयरूपम् । तद्यथा पलायने नाङ्गं भवति, प्रत्युत भीतिहेतुभूतमिथ्याज्ञानविरोधित्वात् पलायननिरोधकमेव भवति । तद्वत् आत्मनोऽपि तत्त्वविज्ञानं 'अहमस्म्यद्वितीयः कूटस्थ आत्मा' इति निश्चयरूपं क्रियाविधौ कर्मानुष्ठाने नाङ्गं भवति प्रत्युत सर्वकर्मनिरोधकमेव भवतीत्यर्थः । यद्यपि स्थाण्वादिविज्ञानान्यपि प्रवृत्त्यङ्गान्येव, प्रमितेऽर्थे हानोपादानादेस्तन्मूलत्वात् ; तथापि यया भ्रान्त्या यत्र प्रवृत्तिरासीत्, तस्या भ्रान्तेः सम्यग्ज्ञानेन नाशे सति न पुनस्तत्प्रयोज्या प्रवृत्तिर्भवतीत्येतावदत्र विवक्षितमित्यदोषः ॥६१॥

(मूलम्)

यस्माद् गुणस्यैतत्स्वाभाव्यम् -

यद्धि यस्यानुरोधेन स्वभावमनुवर्तते ।
तत्तस्य गुणभूतं स्यान्न प्रधानाद् गुणो यतः ॥६२॥

यस्मात् -

कर्मप्रकरणाकाङ्क्षि ज्ञानं कर्मगुणो भवेत् ।
यद्धि प्रकरणे यस्य तत्तदङ्गं प्रचक्षते ॥६३॥

स्वरूपलाभमात्रेण यत्त्वविद्यां निहन्ति नः ।
न तदङ्गं प्रधानं वा ज्ञानं स्यात् कर्मणः क्वचित् ॥६४॥

समुच्चयपक्षवादिनापि अवश्यमेतदभ्युपगन्तव्यम् । यस्मात् -

अज्ञानमनिराकुर्वज्ज्ञानमेव न सिध्यति ।
विपन्नकारकग्रामं ज्ञानं कर्म न ढौकते ॥६५॥

(क्लेशापहारिणी)

आत्मज्ञानस्य कर्मानङ्गत्वे हेत्वन्तरोपन्यासः -

तत्त्वज्ञानं क्रियाया नाङ्गं भवतीत्यत्र युक्त्यन्तरं समर्पयत्युत्तरः श्लोकः । तदाह - यस्मादिति ॥

यद्धीति ॥ यद् यस्याविरोधि, तदविरोधेन तत्स्वभावमप्यनुवर्तते, तदेव तस्य गुणभूतं स्यात्, तदङ्गं भवेत् । गुणस्यैष स्वभावो यत्प्रधानोपकारित्वम् इति यावत् । कस्मात् ? यतः यत्कारणं गुणो न प्रधानात् प्रधानमत्तीति । मुख्यबाधकमिति यावत् । न हि प्रधानविघातकृद् गुणो नाम । आत्मज्ञानं तु क्रियाकारकफल-

विभागज्ञानविघातकमेवेति न क्रियाया अङ्गं भवितुमर्हतीत्यभिप्रायः ।।६२।।

उक्तार्थमेव विशदयत्यागामिश्लोकद्वयमित्याह - **यस्मादिति** ।। **कर्मप्रकरणाकाङ्क्षीति** ।। यत् कर्मप्रकरणम् आकाङ्क्षते तत् ज्ञानं कर्मगुणो भवेत् । यद्धि कर्मप्रकरणे विधीयते यथा आज्यावेक्षणादि, यच्च कर्मप्रयुक्तमेव भवति, तदेव कर्मगुणो भवेत्, नान्यत् । कुतः ? यस्य प्रकरणे यत् पठ्यते तदेव तदङ्गं भवतीति प्रचक्षते कथयन्ति कर्ममीमांसकाः । इदं त्वात्मज्ञानं न कर्मप्रकरणे पठितम् । न वा कर्माधिकृतस्यैवाधिकारोऽत्र । न चास्य कर्मणि विनियोजकं प्रमाणमुपलभामहे । प्रमाणाभावेऽपि प्रकरणान्तरस्थज्ञानस्य कर्माङ्गत्वोपगमे तु सर्वस्यापि वेदविहितस्य सर्वकर्माङ्गता प्रसज्येत । अतोऽपि ज्ञानं न कर्माङ्गमित्यभिप्रायः ।।

एतेन इदमपि प्रत्युक्तं यदाहुः कर्ममीमांसकाः आत्मज्ञानं संयोगपृथक्त्वेन क्रत्वर्थपुरुषार्थत्वेन ज्ञायते । तेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्यसंभवात् । .... न च ज्ञानविधानेन कर्मसंबन्धकारणम् । प्रत्याश्रमवर्णनियतानि नित्यनैमित्तिककर्माण्यपि पूर्वकृतदुरितक्षयार्थम् अकरणनिमित्तानागतप्रत्यवायपरिहारार्थं च कर्तव्यानि (तं. वा. १-३-२७) इति च । न हि वयं तादृशं ज्ञानं प्रवृत्त्यङ्गं-कर्माविरुद्धं समुच्चयानर्हमिति प्रत्याचक्ष्महे । यत्तु आत्मवस्तुबोधनमात्रपर्यवसायि स्वप्रकरणस्थं कर्माधिकारनिर्बर्हि कर्महेत्वविद्यानिहन्तृत्वात् तादृशे ज्ञाने न संभवति कथमपि कर्मसाङ्गत्यम् इत्येतावत् प्रतिपादयामः । तादृशज्ञानवतस्तु नित्यकर्म प्रत्यवायपरिहारार्थं स्यादिति शङ्का हि स्वप्नेऽपि न संभाव्येति ।।६३।।

ननु ज्ञानं कर्मप्रकरणमनाकाङ्क्षमाणमपि कर्माङ्गतां किं न भजते ? न हि ज्ञानमभ्यासादिकं विना स्वकार्यमज्ञाननिवृत्तिं सम्पाद-

[illegible]लम् । तेन यथा कर्मज्ञानं स्वोत्पत्त्युत्तरकालं कर्मानुष्ठानमपेक्षते, [illegible]दमप्यात्मज्ञानम् अभ्यासं नित्यकर्मानुष्ठानं चापेक्षत इत्येवंनीत्या [illegible]ङ्गं भवेदित्याशङ्क्य 'आकाङ्क्षते न चाप्यन्यत्' (१-३६) इति [illegible]क्तं स्मारयन् परिहरति - **'स्वरूपलाभमात्रेण'** इति । अविद्या-[illegible]निर्नाम नाऽऽत्मज्ञानोत्पत्तिव्यतिरिक्ता । अतोऽज्ञानकृतकर्म-[illegible]चर्यमेव नास्ति ज्ञानस्य, कुतस्तत्राङ्गभावेन प्रधानभावेन वा [illegible]मुच्चयप्रतीक्षा - इत्यभिप्रायः ॥६४॥

ननु ज्ञानस्योत्पत्तिमात्रेणाज्ञानविनाशकत्वमस्माकं न संमतम् । [illegible]त्राऽऽह - **समुच्चयपक्षवादिनामपीति** ॥ कुत एतदित्यत्रोत्तरत्वेन [illegible]ोकमवतारयति - **यस्मादिति** ॥

अज्ञानमिति ॥ अज्ञानबाधकत्वमेव ज्ञानत्वमिति सर्व-[illegible]प्रतिपन्नमेतत्, अन्यथा कर्मादिज्ञानोदयेऽपि तदज्ञानानुवृत्तेस्त-[illegible]नुष्ठानाभावप्रसङ्गात् । तस्मात् अद्वितीयात्मज्ञानमपि विपन्न-[illegible]ारकग्रामम् अविद्योत्थकारकसमूहरूपं द्वैतं विनाशयदेवोत्पद्यत [illegible]ति बलादापतति । तादृशं च ज्ञानं कारकापेक्षं कर्म न ढौकते न [illegible]पृशति । तथा च यस्य यत्साहचर्यमेव नास्ति कुतस्तस्य तेन [illegible]मुच्चित्यानुष्ठानसंकथेति युक्तमेवोक्तमिति भावः ॥६५॥

(मूलम्)

इदं चापरं कारणं ज्ञानकर्मणोः समुच्चयनिर्बर्हि -

हेतुस्वरूपकार्याणि प्रकाशतमसोरिव ।
विरोधीनि ततो नास्ति साङ्गत्यं ज्ञानकर्मणोः ॥६६॥

(क्लेशापहारिणी)

ज्ञानकर्मणोस्त्रेधा विरोधः -

समुच्चयासंभवे हेत्वन्तरमुपन्यसितुं श्लोकान्तरमित्याह - **इदं**

चेति ।। **हेतुस्वरूपकार्याणीति** ।। कर्मणो हेतुरज्ञानं रागद्वेषौ च, ज्ञानस्य तु वस्तुयाथात्म्यानुसारि प्रमाणम् ; कर्मणः स्वरूपं वस्तुतत्त्वानवबोधिका प्रवृत्तिर्निवृत्तिर्वा, ज्ञानस्य तु वस्तुप्रकाशनमात्रम् ; कर्मणः कार्यमुत्पाद्यविकार्यादि चतुर्विधम्, ज्ञानस्य तूत्पत्त्यादिरहितकूटस्थस्वरूपेऽवस्थापनम् । तदेवं ज्ञानकर्मणोर्हेतुस्वरूपकार्याणि परस्परेण विरुध्यन्ते । ततस्तयोः साङ्गत्यमेव नास्ति विरुद्धस्वभावयोस्तमःप्रकाशयोरिवेति दूरे संकथा तयोः समुच्चयस्येत्यर्थः ।।६६।।

---

१२. एकदेशिसंमतसमुच्चयनिरासः

(मूलम्)

एवमुपसंहृते केचित् स्वसंप्रदायबलावष्टम्भादाहुः । यदेतद् वेदान्तवाक्यात् 'अहं ब्रह्म' इति विज्ञानं समुत्पद्यते तन्नैव स्वोत्पत्तिमात्रेण अज्ञानं निरस्यति । किं तर्हि, अहन्यहनि द्राघीयसा कालेनोपासीनस्य सतो भावनोपचयात्, निःशेषमज्ञानम् अपगच्छति । 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति श्रुतेः- इति । अपरे तु ब्रुवते । वेदान्तवाक्यजनितम् 'अहं ब्रह्म', इति विज्ञानम् संसर्गात्मकत्वात्, आत्मवस्तुयाथात्म्यावगाह्येव न भवति । किं तर्हि, एतदेव गङ्गास्रोतोवत् सततमभ्यस्यतोऽन्यदेव अवाक्यार्थात्मकं विज्ञानान्तरम् उत्पद्यते । तदेवाशेषाज्ञानतिमिरोत्सारि, 'विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' (बृ. ४-४-२१) इति श्रुतेः - इति । अस्य पक्षद्वयस्य निवृत्तये इदमभिधीयते -

सकृत्प्रवृत्त्या मृद्नाति क्रियाकारकरूपभृत् ।
अज्ञानमागमज्ञानं साङ्गत्यं नास्त्यतोऽनयोः ॥६७॥

(क्लेशापहारिणी)

एकदेशिमतद्वयम् -

आत्मज्ञानस्य कर्मणा समुच्चयः सर्वथा नास्तीत्युक्तमसहमाना अद्वैतवेदान्तिन एव केचिदत्र प्रत्यवतिष्ठन्त इत्याह - **एवमुपसंहृत** इति । एवं ज्ञानोत्पत्तिमात्रेणाविद्यासमुच्छित्तिरिति उपसंहारे कृते तदमृष्यन्तः केचिद् वेदान्त्येकदेशिनः स्वसंप्रदायावष्टम्भात्, स्वसंप्रदायः स्वस्य गुरुपरम्परया प्राप्त उपदेशः, तद्बलाश्रयादेव केवलात्, वक्ष्यमाणरीत्या आहुरित्यर्थः । एतेन तेषां स्वसंप्रदाय एव बलम्, न तु श्रुतियुक्त्यनुभवबलमस्तीत्युक्तं भवति ।।

भावनासञ्चयवादिनां मतम् -

तत्र भावनोपचयवादिनः प्राहुः । यदेतद् वेदान्तवाक्यात् 'अहं ब्रह्मास्मि' इति विज्ञानं समुत्पद्यते, तन्नैव स्वोत्पत्तिमात्रेणाज्ञानं निरस्यति । सामान्यात्मकत्वात्, परोक्षात्मकत्वाच्च वाक्यजन्यज्ञानस्य - इति शेषः । कीदृशं तर्हि ज्ञानमज्ञाननिरासीति पृच्छति - 'किं तर्हि इति । उत्तरमाह - **अहन्यहनि इति** । सत्कारपूर्वकं द्राघीयसा कालेन दीर्घतरेण कालेन आमरणकालम् उपासीनस्य निरन्तरं ध्यायमानस्य सतः साधकस्य भावनोपचयाद् ध्यानसञ्चयात् निःशेषमज्ञानमपगच्छति । **यथाहुस्तन्त्रान्तरीयाः** - 'स तु दीर्घकालादरनैरन्तर्यसत्कारासेवितो दृढभूमिः' (यो. सू. १-१४) इति । ज्ञानस्य भावनासञ्चयात् साक्षात्काररूपत्वं भवति, तेनैव चाज्ञानं विलाप्य साधको ब्रह्मसायुज्यं गच्छति - इति तेषामभिप्रायः । किंबलादेतदवसीयते इति चेदत्राहुः - 'देवो भूत्वा देवानप्येति'

(बृ. ४-१-२) इति श्रुतेः इति । देवो भूत्वा भावनाबलादुपास्य देवं साक्षात्कृत्य 'अहमेव सः' इति, देवानप्येति अज्ञानापगमानन्तरमुपास्यदेवताभावं प्राप्नोति - इति श्रुतेरर्थः पूर्वपक्ष्यभिमतः इति ।।

अवाक्यार्थज्ञानवादिनां मतम् -

अपरे तु वादिनः स्वसंप्रदायबलात् वाक्यजन्यज्ञानेन उत्पन्नमात्रेणाभ्यस्तेन वा, नैवाज्ञानं विनश्यतीति मन्यमाना एवं ब्रुवते - वेदान्तवाक्यजनितम् अहं ब्रह्मेति विज्ञानम् आत्मवस्तुयाथात्म्यावगाह्येव न भवति । आत्मतत्त्वं नैवावबोधयतीत्यर्थः । कुतः ? संसर्गात्मकत्वात् वाक्यजन्यज्ञानस्य । 'नीलमुत्पलम्' इत्यादिवाक्यजन्यज्ञानवत् इति शेषः । नीलपदार्थोत्पलपदार्थयोः संसर्गमेव हि 'नीलमुत्पलम्' इति वाक्यमभिधत्ते । एवमेव वेदान्तवाक्यमपि संसृष्टमेवार्थमभिधातुं शक्नोति । वाक्यत्वात् । आत्मा तु सर्वथा विभागरहित इति न तस्मिन् विभक्तपदार्थसंसर्गग्राहिवाक्यजन्यज्ञानविषयता संभवतीति भावः । कीदृशं तर्हि ज्ञानम् आत्मयाथात्म्यावगाहीति प्रश्नमुत्थाप्योत्तरमाहुः - **'किं तर्हि'** इत्यादिना । एतदेव वाक्यार्थज्ञानं गङ्गास्रोतोवत् सततमभ्यस्यतः, साधकस्य वाक्यजन्यज्ञानादन्यदेव विज्ञानमुत्पद्यते अवाक्यार्थात्मकम् असंसर्गबोधकम् इत्यर्थः । एतच्च 'संसर्ग एव वाक्यार्थः' इति मीमांसकमतेनोक्तमिति ध्येयम् । तदेवं संसर्गविधुरतत्त्वबोधकं यद् विज्ञानान्तरमुत्पद्यते, तदेवाशेषाज्ञानतिमिरोत्सारि । पूर्वोत्पन्नं तु वाक्यजन्यज्ञानं यद्यपि तिमिरमज्ञानमुत्सादयति, तथापि निरवशेषं नोत्सादयति संसर्गावबोधकत्वादिति भावः । प्रथमपक्षावलम्बिनां भावनोपचयवादिनां मते वाक्यार्थज्ञानं नाज्ञाननिरासि । किं तूपासनानुष्ठानप्रयोजकमेव तत् । अत्र पुनः संसर्गबोधकत्वान्निरवशेषतया नाज्ञाननिरासीति विशेषः । कस्मात् पुनः प्रमाणादेतदवगम्यते ? तत्राहुः - **'विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः'** (बृ. ४-४-

२१) इति श्रुतेरिति । तमेव धीरो विवेकी विज्ञाय वाक्येन तस्य संसृष्टरूपत्वमादौ ज्ञात्वा प्रज्ञां कुर्वीत ज्ञानाभ्यासबलेनासंसृष्टत्वावगाहिसाक्षात्काररूपां प्रज्ञामुत्पादयेत् इति पूर्वपक्ष्यभिप्रेतः श्रुत्यर्थः । यः पुनः शास्त्रप्रमाणकं ब्रह्मेति प्रवादः, स तु शास्त्रस्य प्रज्ञाजनकज्ञानजनकत्वेनोपचारात् । अथवा प्रज्ञैव शास्त्रकार्यम्, संसर्गज्ञानं तु न वस्तुतः शास्त्रज्ञानमित्यभिप्रायेण ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यत इत्यदोषः - इति पूर्वपक्षिणामभिमानः ॥

समुच्चयवादिवेदान्तिखण्डनायोत्तरः श्लोकः -

तदेवं वाक्यज्ञानानन्तरमुपासनानुष्ठानात् साक्षात्कारद्वारेण मोक्षप्राप्तिरिति पक्षम्, वाक्यज्ञानाभ्यासादेव विशिष्टां प्रज्ञां संपाद्य ततोऽज्ञानं निरस्यतः साधकस्य इहैव मोक्ष इति पक्षं चोपन्यस्य एकपक्षद्वयनिरासायोत्तरश्लोकप्रवृत्तिरिति मत्वाऽऽह - 'अस्य पक्षद्वयस्येति । उपलक्षणमेतत् । सर्वेषामपि वाक्यज्ञानानन्तरमनुष्ठेयशेषसद्भाववादिनां परिहाराय चेति द्रष्टव्यम् । प्रसङ्ख्यानवादस्यापि निरसितव्यत्वादुत्तरत्र । अन्येषामप्येतत्सजातीयवादिनां बृहद्वार्तिके निरस्तत्वाच्च । तस्मात् अस्य पक्षद्वयस्य वाक्यज्ञानात्परमपि कर्तृत्वानुवृत्त्यभ्युपगमदूषितस्य निवृत्तये परिहाराय इदम् उत्तरश्लोकस्थं खण्डनम् अभिधीयते इत्यर्थः ॥

सकृत्प्रवृत्त्या इति । आगमज्ञानं वेदान्तागमजनितं ज्ञानं सकृत्प्रवृत्त्या एकवारं विषयप्रकाशनरूपव्यापारेणैवोत्पन्नमात्रम् अभ्यासादिकमनपेक्ष्यैवेत्यर्थः । क्रियाकारकरूपभृत् क्रियायाः कारकाणां च रूपं बिभर्तीति क्रियाकारकरूपभृत् । क्रियाकारकवेषं धारयत् - अज्ञानमेव हि क्रियादिरूपेण प्रथते-तदज्ञानं स्वोत्पत्तिमात्रेण ज्ञानं मृद्नाति नाशयति । अतोऽनयोः, ज्ञानकर्मणोः साङ्गत्यं साहचर्यं नास्ति । आम्नायते हि कर्माधिकारहेतोः क्रियाकारकफललक्षणस्य

सर्वस्यापि भेदस्याविद्याकृतस्य विद्यया स्वरूपोपमर्दनम्। 'यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत् तत्केन कं पश्येत्' (बृ. २-४-१४) इत्यादि । अतो ज्ञानाभ्यासदशायां ज्ञानकर्मसमुच्चय इत्येतन्मिथ्यैव । यतोऽनयोर्ज्ञानाज्ञानयोः न कदाचिदपि साङ्गत्यं संभवति । अज्ञानकृतकर्मणा ज्ञानस्य साङ्गत्यं चिन्तयितुमपि न शक्यम् । 'अज्ञानमनिराकुर्वत् ज्ञानमेव न सिध्यति' (१-६५) इत्युक्तयुक्ते-र्बाधकाभावादिति भावः । 'विज्ञाय प्रज्ञां कुर्वीत' इति श्रुत्यर्थस्तु वाक्योत्थविज्ञानेनैवाऽऽत्मज्ञानरूपां प्रज्ञां संपादयेदिति, शास्त्राचार्य-मतिरूपविज्ञानेन स्वात्मप्रत्ययरूपां प्रज्ञां संपादयेदिति वा, पदार्थ-बोधरूपेण विज्ञानेन वाक्यार्थबोधरूपां प्रज्ञां संपादयेदिति वा, प्रज्ञां कुर्वीतेति यत् तत् तमेव विज्ञायेति वा, अन्यथा वा, **बृहद्वार्तिकोपदर्शितदिशा** सिद्धान्ताविरोधेन ग्राह्यः । यत्तूच्यते वाक्यज्ञानं नोत्पत्तिमात्रेणाज्ञानं निरस्यतीति, तत्र वाक्यजन्यं ज्ञानमप्रमाणं तदभ्यासस्तु प्रमाणजनकमिति शोभनमभिहितम् ! श्रुतहान्यश्रुतकल्पनालक्षणश्च स्फुटो दोषोऽत्र पक्षद्वयेऽपि । यदपि संसर्गात्मकमेव वाक्यजन्यं ज्ञानमिति, तदपि ग्रन्थकृद्भिरेव भिषक्ष्यते तृतीयाध्याय इत्यलमतिप्रपञ्चेन ॥६७॥

---

१३. द्वैताद्वैतब्रह्मवादिनां मतेऽपि समुच्चयानुपपत्तिः

(मूलम्)

एवं तावदनानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः ।

अथाधुना पक्षान्तराभ्युपगमेनापि प्रत्यवस्थाने पूर्ववदनाश्वासो यथा तथा अभिधीयते -

अनुत्सारितनानात्वं ब्रह्म यस्यापि वादिनः ।
तन्मतेनापि दुःसाध्यो ज्ञानकर्मसमुच्चयः ॥६८॥

(क्लेशापहारिणी)

दूषणार्थं नानारसब्रह्मवादावतारः -

अतीतागामिनोर्ग्रन्थभागयोर्यद्यपि ज्ञानकर्मसमुच्चयनिराकरणमेक एवार्थः, तथापि पूर्वपक्षिणामभ्युपगमभेदेन पृथक्समालोचनमित्याह - **एवं तावदिति** । एकरसं ब्रह्माभ्युपगच्छतां ज्ञानकर्मसमुच्चयवादो निराकृतः । अथाधुना पक्षान्तराभ्युपगमेनापि नानारसब्रह्मवादाङ्गीकारेणापि प्रत्यवस्थाने प्रतिवादितया पूर्वपक्षिणा अवस्थीयमाने तदापि पूर्ववदेव समुच्चये अनाश्वास एव असंभावनैव यथा भवति तथोत्तरग्रन्थे अभिधीयते इत्यर्थः ॥

अनुत्सारितेति । यस्यापि वादिनो मते ब्रह्म अनुत्सारितनानात्वम् अप्रत्यस्तमितवैचित्र्यं वृक्षसमुद्रादिवदेकानेकात्मकमेव, तस्य मतेनापि ज्ञानकर्मसमुच्चयो दुःसाध्य एवेति प्रतिज्ञा, उपपादनं तु समनन्तरग्रन्थे ॥६८॥

(मूलम्)

तस्य विभागोक्तिर्दूषणविभागप्रज्ञप्तये -

ब्रह्माऽऽत्मा वा भवेत्तस्य यदि वानात्मरूपकम् ।
आत्मानाप्तिर्भवेन्मोहादितरस्याप्यनात्मनः ॥६९॥

तत्र यदि तावद्वास्तवेनैव वृत्तेन ब्रह्म प्राप्तम्, आत्मस्वाभाव्यात्,

केवलम् आसुरमोहापिधानमात्रमेव अनाप्तिनिमित्तम्, तस्मिन् पक्षे -

मोहापिधानभङ्गाय नैव कर्माणि कारणम् ।
ज्ञानेनैव फलावाप्तेस्तत्र कर्म निरर्थकम् ॥७०॥

अनात्मरूपके तु ब्रह्मणि न कर्म साधनभावं प्रतिपद्यते नापि ज्ञानं कर्मसमुच्चितमसमुच्चितं वा । यस्मात्, अन्यत्वं स्वत एव साधकस्य, ब्रह्मणोऽपि अन्यत्वं स्वत एव सिद्धम् । तत्रैवम् -

अन्यस्यान्यात्मताप्राप्तौ न क्वचिद्धेतुसंभवः ।
तस्मिन् सत्यपि ना नष्टः परात्मानं प्रपद्यते ॥७१॥

(क्लेशापहारिणी)

नानारसब्रह्मवादस्य त्रेधा विकल्पः -

प्रतिज्ञातमर्थं समर्थयितुं नानारसब्रह्मवादस्त्रेधा विकल्प्य दूषयिष्यत इत्याह - **तस्येति** । विभागोक्तिः, त्रेधा विभज्य वचनम् । दूषणविभागप्रज्ञप्तये एकैकस्मिन् पक्षे विद्यमानं दूषणं विभज्य ज्ञापयितुमित्यर्थः ॥

विभागमेवाह - **ब्रह्मात्मा वेत्यादिना** । तस्य मते ब्रह्म साधकस्य आत्मा वा भवेत्, यदि वा अनात्मरूपकम् । उभयथापि न समुच्चयेन ब्रह्मप्राप्तिः स्यात् इति शेषः । तत्र हेतुः - आत्मानाप्तिरित्यादिना समर्प्यते । यद्यात्मैव नानारसं ब्रह्म साधकस्य, तदा तदनाप्तिर्मोहादेव न वस्तुतः । न हि वस्तुतः स्वात्मैव स्वात्मनो व्यवहित इति शक्यं कल्पयितुम् इति भावः । तथा इतरस्यापि अनात्मनः स्वस्मादन्यस्य ब्रह्मणोऽपि, अनाप्तिर्मोहादेव इत्यनुषज्यते । न हि अनात्मता कदापि प्राप्या स्यात् केनचिदपि येन तदनाप्तिः परमार्थो भवेदित्यभिप्रायः ।

'इतरस्याप्यताऽऽत्मनः' इति पाठे तु इतरस्य स्वत एवान्यस्य आत्मनः परमात्मनो ब्रह्मणः आप्यता मोहादित्यर्थः । आत्मनः सकाशादितरस्य ब्रह्मात्मन आप्यता मोहादेव स्यादिति व्याख्येयम् ।।६९।।

अज्ञानमात्रव्यवहिते ब्रह्मणि, न समुच्चयः -

अस्तु मोहादेवानाप्तत्वमेकस्मिन् पक्षे, मोहादेव चाप्यत्वमितरस्मिंश्च इति । का नो हानिरिति ? अत आह - **तत्रेति** । तत्रैतयोः पक्षयोर्मध्ये वास्तवेनैव वृत्तेन वस्तुस्वभावेनैव ब्रह्म प्राप्तम्, आत्मस्वाभाव्यात् साधकस्यात्मस्वरूपत्वात् । आसुरमोहापिधानमात्रम् - असुरसंबन्धी दम्भदर्पकामक्रोधलोभादिकृतो यो मोहः स एव केवलं नान्यत् अपिधानं तिरोधायकं स्वरूपभूतस्य ब्रह्मणः । तादृशापिधानमेव ब्रह्मणोऽनाप्तौ निमित्तम्, अज्ञानादेव तु केवलाद् ब्रह्म नाप्तमिति बुद्धिः, इति पक्षो यदि स्वीक्रियते तस्मिन् प्रथमे पक्षे इत्यर्थः । 'ज्ञानेनैव फलावाप्तेः' इत्यनेन श्लोकस्थेनास्य संबन्धः ।।

मोहेति । सुगमार्थः श्लोकः ।।७०।।

अनात्मब्रह्म नैवाप्यम् -

प्रथमपक्षे कर्मणो निरर्थकत्वान्न समुच्चयसिद्धिरित्युक्तम् । अथ द्वितीयपक्षेऽपि तदसिद्धिं वक्तुमाह - **अनात्मरूपके त्विति** । तस्मिन् पक्षे ब्रह्मप्राप्तौ न कर्म साधनम् । न केवलं ज्ञानम्, न वा कर्मज्ञानसमुच्चयः इति कथं ज्ञायते ? तत्राह - **यस्मादिति** । अन्यत्वं साधकस्य ब्रह्मणः सकाशात् स्वत एव सिद्धम्, ब्रह्मणोऽपि साधकादन्यत्वं स्वत एव सिद्धम् । ततोऽनेन साधकेन तदन्यस्य ब्रह्मणः प्राप्यता मोहादेवेति विज्ञायत इति भावः । नन्वन्यत्वेऽपि कथमनाप्यत्वं ब्रह्मणः ? आप्यते हि ग्रामादिरन्योऽन्येन चैत्रेण - इति शङ्कोत्तरत्वेन श्लोकमवतारयति - **तत्रैवमिति** ।

तस्मिन् पक्षे एवं वर्णितेन प्रकारेण परस्परान्यत्वे स्वतःसिद्धे सतीत्यर्थः ।।

अन्यस्येति । ब्रह्मण आप्तिर्नाम ब्रह्मात्मताप्राप्तिः, न तु ग्रामादिप्राप्तिवत् तत्संयोगः । तथा हि श्रुतिः 'ब्रह्मविदाप्नोति परम्' (तै. २-१) इत्यनेन तुल्यवत् 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६), 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) - इति ब्रह्मण्यप्ययं ब्रह्मात्मतां चाह । अतः साध्वभिहितं कर्मादिकं नैव साधनं ब्रह्मप्राप्ताविति - इति भावः । न ह्यन्यस्यान्यात्मताप्राप्तौ क्वचिद् हेतुः संभवति । अन्यथा घटः पटात्मतामप्याप्नुयात्, शिलोच्चयोऽपि समुद्रात्मताम् - इति सर्वव्यवहारलोपप्रसङ्ग इति भावः ।।

अन्यस्यान्यात्मताप्राप्तौ न क्वचिद् हेतुसंभव इत्युक्तम् । तदयुक्तम् । यतः शास्त्रोक्तसाधनानुष्ठानात् अन्यस्याप्यन्यात्मता भवति । अन्यथा साधनविधानानुपपत्तेः शास्त्रस्यैवाप्रामाण्यापातात् इत्याशङ्क्याह - **तस्मिन् इति** । अयं भावः । न तावच्छास्त्रं वस्तुनोऽविद्यमानशक्त्याधानकृत्, किं तु संभाव्यमानपुरुषार्थोपायप्रदर्शकम् । न चान्यस्यान्यात्मता संभाव्यते । अतो यदि नामान्यस्यान्यात्मताप्राप्तिबोधकाभासं शास्त्रमस्ति ततस्तदन्यथैव नेयमिति । अथाङ्गीकृत्यापि ब्रूमः । तस्मिन् हेतौ शास्त्रोक्ते सत्यपि ना पुरुषः, नष्टः मृतेरूर्ध्वमेव परात्मानं प्रपद्यत इत्यवगन्तव्यम् । न हि स्वरूपस्याविनाशेऽपि संसारदशायां परमात्मभावप्राप्तिर्भविष्यतीति कथञ्चन युज्येत - इति भावः ।।७१।।

(मूलम्)

अपरस्मिंस्तु पक्षे -

परमात्मानुकूलेन ज्ञानाभ्यासेन दुःखिनः ।
द्वैतिनोऽपि विमुच्येरन् न परात्मविरोधिना　　।।७२।।

(क्लेशापहारिणी)

द्वितीयपक्षे न समुच्चयः -

अस्तु तर्हि यथोक्त एव पक्षः 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) 'एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि' (छां. ३-१४-४) - इत्यादिश्रुतिभ्यः । इह जन्मनि तदात्मसाक्षात्कारं कृत्वा देहपातादूर्ध्वं तद्रूपप्राप्त्युपपत्तेः इत्याशङ्क्याह - **अपरस्मिंस्त्विति** । अन्यस्यान्यरूपताप्राप्तिर्मृतेरूर्ध्वमिति द्वितीयस्मिन् पक्षे इत्यर्थः ।।

यद्यप्यत्र साधनविधिः संभवति, तथापि न समुच्चयो घटत इत्यभिप्रायेणाह - **परमात्मानुकूलेनेति** । 'अहमस्मि नानारसं ब्रह्म' इत्युपासनमत्र ज्ञानाभ्यासः । तादृशाभ्यासः परमात्मानुकूलः, तेनैव तत्प्राप्त्युपपत्तेः । 'यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति' (छां. ३-१४-१) इति श्रुतेः - इति भावः । न तु कर्मानुष्ठानेन परात्मविरोधिना । न हि तत्तदनुकूलम् । न हि संसारित्वबुद्धिर्मुक्त्यनुगुणा भवति, प्रत्युत मुक्तिविरुद्धमेव फलमारभते । उक्तं च पूर्वम् उत्पाद्याद्यन्यतममेव कर्मणः कार्यमिति । तथा च कर्मारब्धमुत्पत्त्यादिमत्वादनित्यमेव भवेत्, न तु नित्यमिति मुक्तिविरोध्येव कर्म । एवं द्वैतिनोऽपि अन्योऽसौ साधको ब्रह्म चान्यत्, शास्त्रविहितमुक्तिसाधनानुष्ठानेन च साधको ब्रह्मात्मतां प्राप्नोति मृतेरूर्ध्वम् इति ये वदन्ति, तेऽपि ज्ञानाभ्यासेन कथञ्चिद् विमुच्येरन् नाम, न तु परात्मप्राप्तिविरोधिना कर्मणा । तथा च न परस्परविरोधिनोः साधनयोः समुच्चयसंभवः इत्याशयः । अयं चाभ्युपगमवादः । वस्तुतस्तु अन्यस्यान्यात्मताप्राप्तेरसंभवात् साधकाद् ब्रह्म नान्यत् किं तु संसारदशायामप्यात्मैव तस्य । यस्तु मन्दाधिकारी न द्रागिव तत्त्वं ज्ञातुं समर्थः, तं प्रत्येवोपासना विधीयते, अविद्यादृष्ट्या आपेक्षिकमुक्तिप्राप्त्यर्थम्, ज्ञानद्वारा क्रममुक्त्यर्थं वा इत्युपासना

फलमपि मुक्तिरित्युपचर्यत इति रहस्यम् । तदेतत् सर्वमभिसंधायैव 'तस्मिन् सत्यपि ना नष्टः परात्मानं प्रपद्यत' इत्युक्तमिति ध्येयम् ।।७२।।

(मूलम्)

इतरस्मिंस्तु पक्षे विधेरेवानवकाशत्वम् । कथम् ?

समस्तव्यस्तभूतस्य ब्रह्मण्येवावतिष्ठतः ।
ब्रूत कर्मणि को हेतुः सर्वानन्यत्वदर्शिनः ।।७३।।

सर्वकर्मनिमित्तसंभवासंभवाभ्यां सर्वकर्मसङ्करश्च प्राप्नोति । यस्मात् -

सर्वजात्यादिमत्त्वेऽस्य नितरां हेत्वसंभवः ।
विशेषं ह्यनुपादाय कर्म नैव प्रवर्तते ।।७४।।

स्याद्विधिरध्यात्माभिमानादिति चेत् । नैवम् । यस्मात् -

न चाध्यात्माभिमानोऽपि विदुषोऽस्त्यासुरत्वतः ।
विदुषोऽप्यासुरश्चेत्स्यान्निष्फलं ब्रह्मदर्शनम् ।।७५।।

अज्ञानकार्यत्वान्न समकालं नापि क्रमेण ज्ञानकर्मणोर्वस्त्व-वस्तुतन्त्रत्वात् सङ्गतिरस्तीत्येवं निराकृतोऽपि काशं कुशं वा अवलम्ब्याऽऽह -

अथाध्यात्मं पुनर्यायादाश्रितो मूढतां भवेत् ।
स करोत्येव कर्माणि को ह्यज्ञं विनिवारयेत् ।।७६।।

सिद्धत्वाच्च न साध्यम् । यतः -

सामान्येतररूपाभ्यां कर्माऽऽत्मैवास्य योगिनः ।
निश्श्वासोच्छ्वासवत्तस्मान्न नियोगमपेक्षते ॥७७॥

(क्लेशापहारिणी)

ब्रह्म प्रत्यगात्मभूतमेव साधकस्येति पक्षे न विधिः -

अथ संसारदशायामपि नानारसब्रह्मण आत्मत्वमेवोपगम्यते, तदानी तु प्राप्तमेव तदिति तत्प्राप्त्यर्थं किमपि साधनं नापेक्षितमिति समुच्चयस्य सुतरामसंभव इत्याह - **इतरस्मिंस्तु पक्षे इति** । ज्ञानस्य कर्मणो वा विधेरेवानवकाशत्वमिति कथम् ? इति प्रश्नस्योत्तरत्वेन श्लोकमवतारयति - **कथमिति** । 'मोहापिधानभङ्गाय' (१-७०) इत्यत्र मुमुक्षोर्ज्ञानकर्मसमुच्चयो न संभवतीत्युक्तम् । इह पुनर्ज्ञानिना-प्राप्तब्रह्मात्मभावस्य समुच्चयासंभव उच्यत इत्यपौनरुक्त्यम् ॥

समस्तव्यस्तभूतस्येति । एकं चानेकं च ब्रह्म वृक्षसमुद्रादिवदिति नानारसब्रह्मवादिनो मतम् । तथाविधब्रह्मभावमापन्नस्य ब्रह्मण्येवाव-तिष्ठतः, ब्रह्मणः सकाशाद्देशतः कालतो वा अव्यवहितस्य, कर्मणि को हेतुः ? किं हि फलं हेतूकृत्यायं कर्मणि प्रवर्तताम् ? न प्राप्योत्पाद्याद्यन्यतममवशिष्यत इत्यभिप्रायः । न च ब्रह्मभिन्नोऽर्थः कश्चन संपादनीयोऽस्तीति कल्प्यम् । कुतः ? तत्र हेतुगर्भं विशेषणम् 'सर्वानन्यत्वदर्शिनः' इति । समस्तव्यस्तभूतं हि नाम सामान्य-विशेषात्मकम् । तच्च ब्रह्म सामान्यरूपतया सर्वेणानन्यदेव । तद्रूपश्चायं जीवन्मुक्त इति सकलक्रियाकारकफलरूपेणावतिष्ठते । अतो न किञ्चिदस्य कर्मणा प्राप्तव्यमस्तीत्यभिप्रायः । 'कर्मणि को हेतुः' इत्युपलक्षणम् । 'ज्ञाने वा' इत्यपि द्रष्टव्यम् । ज्ञानेनाप्यवाप्यस्य कस्यचिदर्थस्याभावात् । अत एव संबन्धग्रन्थे (१-७३) 'विधेरेवान-वकाशत्वम्' इत्युक्तमिति ध्येयम् ॥७३॥

ब्रह्मभूतस्यापि कर्माभ्युपगमे सर्वकर्मसङ्करः -

विदुषोऽपि कर्माभ्युपगमे दोषान्तरमप्यापततीत्याह - **सर्वकर्मनिमित्तेति** ।।

सर्वजात्यादिमत्त्वेऽस्येति । संबन्धोक्तिमनुसृत्य विभज्य व्याख्येयः श्लोकार्थः । कथम् ? समस्तव्यस्तब्रह्मभूतत्वादस्य सर्वजात्याश्रमादिकर्मनिमित्तासंभवे नितरां कर्मणि हेत्वसंभवः । कुत इत्यत आह - **विशेषमिति** । विशेषं ब्राह्मण्यादिकम् अनुपादाय नैव कर्म प्रवर्तते । बृहस्पतिसवराजसूयादिषु व्यवस्थया प्रवृत्तिर्नैव संभवति । सर्वजात्यादिकर्मनिमित्तसंभवे तु सर्वकर्मसङ्करः प्राप्नोति सर्वः सर्वस्मिन् कर्मण्यधिकारी स्यात् । सर्वानन्यब्रह्मस्वरूपत्वात् । न च सर्वेषु कर्मसु युगपत्प्रवृत्तिरस्तीत्यतोऽपि नितरां कर्मणि हेत्वसंभवः इत्यभिप्रायः ।।७४।।

ज्ञानिनो नैव शरीराद्यभिमानोऽस्ति -

ज्ञानिनो न कस्मिंश्चित्कर्मणि नियमेन प्रवृत्तिरित्येतदसहमानः कथञ्चित् कर्माधिकारं संभावयिष्यन्नाह - **स्यादिति** । अध्यात्माभिमानात्, जीवन्मुक्तस्यापि स्वशरीरादिविशेषाभिमानादित्यर्थः । उत्तरं वदच्छ्लोकमवतारयति **'नैवम् । यतः'** इति ।

न चेति । स्पष्टार्थः श्लोकः ।।७५।।

पूर्ववादी स्वपक्षस्य सर्वथापि निरस्तत्वात् तत्समर्थने निराशः सन् असंभावितमप्युपक्षिपतीत्याह - **अज्ञानकार्यत्वादिति** । ज्ञानं वस्तुतन्त्रम्, यथाप्रमाणं यथावस्तु च । जायमानत्वात् । न पुरुषतन्त्रम्, कर्तुमकर्तुमन्यथा वा कर्तुमशक्यत्वात् । कर्म तु अवस्तुतन्त्रं पुरुषतन्त्रमेव तु । अनुष्ठातुः स्वेच्छयैव तत्र प्रवृत्तेः । तस्य च कर्मणोऽज्ञानकार्यत्वात् न कर्मज्ञानसमुच्चयः संभवतीति 'अयथावस्त्वविद्यास्याद्विद्या तस्या विरोधिनी' (१-५६) इत्यत्रैव निराकृतोऽपि पूर्वपक्षी

अगाधे जलाशये निपातितोऽपि जीविताशया काशं कुशं वा अवलम्ब्य उन्मङ्क्तुं प्रयतमान इव, अत्रावसरे प्रशिथिलमपि कञ्चित्तर्कमवलम्ब्य आह शङ्कते इत्यर्थः । 'अथाध्यात्मं पुनर्यायात्' इत्याह इति श्लोकपादेन संबन्धः । अथवा दुर्बलमपि तर्कमवलम्ब्य पूर्वपक्षिद्वारेण शङ्कयित्वा आह प्रत्याह - इति सर्वेणापि श्लोकेन संबन्धः ॥

अथेति । अथशब्दः पक्षान्तरोपन्यासे । यदि ज्ञानेन समस्तव्यस्तब्रह्मभूतोऽपि विद्वान् पुनरपि पूर्ववत् अध्यात्मं शरीरादिपरिच्छेदाभिमानं यायात् प्राप्नुयात् इत्यसंभाव्यमानमपि संभाव्य प्रत्यवतिष्ठते इत्यर्थः । तर्हि मूढताम् आश्रितो भवेत् । ज्ञानित्वमपि जह्यात् इत्यर्थः । अस्तु तदपीति वदन्तमुपहसति **स इति** । स मूढत्वमाश्रितः कर्म करोत्येव । मौढ्यमेव हि प्रवृत्तिकारणमिति वयं ब्रूमहे । को ह्यज्ञं विनिवारयेत् ? अज्ञो हि कामप्रयुक्तः, न तं कोऽपि विनिवर्तयितुं शक्नुयात् 'निग्रहः किं करिष्यति ?' (गी. ३-३३) इति भगवद्वचनात् इति भावः । न ह्यज्ञः कर्म करोतीत्येतावता ज्ञानकर्मसमुच्चय उपपादितो भवेदिति वाक्यार्थः । वस्तुतस्तु ज्ञान्यपि सन् पुनरप्यध्यात्माभिमानं धत्त इत्युपहास्यमेतदिति हृदयम् ॥७६॥

नानारसब्रह्मभूयंगतस्य कर्म न नियोगसाध्यम् -

क्रियाकारकफलरूपनानारसब्रह्मात्मनैव स्थितत्वाद्विदुषः, कर्मविध्यनवकाश इत्याह - **सिद्धत्वाच्चेति** । कर्मणः सिद्धत्वात् स्वरूपभूतत्वादेव च न नियोगेन तस्य साध्यत्वमित्यर्थः ॥

सामान्येतरेति । ब्रह्म हि सामान्यविशेषरूपेणावतिष्ठत इति हि मतं पूर्ववादिनः । तद्भावेनैव तिष्ठतोऽस्य योगिनो ज्ञानिनः कर्म सामान्यं तद्विशेषो वा आत्मैव स्वरूपमेवेति न नियोगार्हम् । तत्र

दृष्टान्तः - **निश्श्वासोच्छ्वासवदिति** । तस्मात् विदुष आत्मभूतत्वादेव यथा निश्श्वासोच्छ्वासौ पुरुषे स्वभावत एव प्रवर्तेते इति न नियोगमपेक्षेते, एवमस्य कर्म स्वभाव एवेति न नियोगमपेक्षत इत्यर्थः ॥७७॥

(मूलम्)

अस्तु तर्हि भिन्नाभिन्नात्मकं ब्रह्म । तथा च सति ज्ञानकर्मणी संभवतः । भेदाभेदविषयत्वात् तयोः । तत्र तावदयं पक्ष एव न संभवति । किं कारणम् ? न हि भिन्नोऽयम् इत्यभेदबुद्धिमनिराकृत्य भेदबुद्धिः पदार्थमालिङ्गते । एवं ह्यनभ्युपगमे भिन्नाभिन्नपदार्थयोरलौकिकत्वं प्रसज्येत । अथ निष्प्रमाणकमप्याश्रीयते, तदापि उभयपक्षाभ्युपगमात् अभेदपक्षे दुःखि ब्रह्म स्यात् । अत आह -

भिन्नाभिन्नं विशेषैश्चेद्दुःखि स्याद् ब्रह्म ते ध्रुवम् ।
अशेषदुःखिता च स्यादहो प्रज्ञाऽऽत्मवेदिनाम् ॥७८॥

(क्लेशापहारिणी)

ब्रह्मणो भिन्नाभिन्नत्वमसंभावितम् -

एवं तावन्नानारसब्रह्मवादी न समुच्चयेऽधिक्रियते यदि ब्रह्म तस्मात् साधकाद्भिन्नम्, यदि वाऽभिन्नम् भवतु स मुमुक्षुर्जीवन्मुक्तो वा - इत्युपपादितम् । अथ तृतीयं विकल्पमनूद्य निराकरोति - **अस्तु तर्हीति** । नन्वस्मिन् पक्षे पूर्वोक्तपक्षद्वयदोषाः समुच्चित्य प्रादुःष्युरित्याशङ्क्याऽऽह - **तथा च सतीति** । अभेदमाश्रित्य ज्ञानम्, भेदं चाश्रित्य कर्म - इत्युभयमपि संगच्छत इत्यभिप्रायः । परिहरति - **तत्रेति** । एवमेव ब्रह्म साधकाद्भिन्नमभिन्नं चेति वचो न युक्तिमत् । कुतः ? लोकेऽपि कुत्रापि भिन्नाभिन्नत्वस्यानुपलब्धेः । असंभवाच्च ।

न्ाममसंभव इति ? तत्राऽऽह - **न हीति** । भेदाभेदौ हि परस्पर-
प्रतिद्वन्द्विनौ । यदि तावत् कश्चन पदार्थः कस्माच्चिद्भिन्नः, तर्हि न स
तत एवाभिन्नो भवितुमर्हतीति । नन्वयुक्तमिदम् । कार्यस्य कारणाद्
भिन्नाभिन्नत्वदर्शनात् । एवं गुणगुणिजातिव्यक्त्यादीनामपि भेदाभेदा-
वनुभूयेते तत्कथं दृष्टेऽप्यनुपपत्तिः शङ्क्यत इति ? नैवम् । भेदबुद्धिर्हि
तावदभेदबुद्धिं निराकृत्यैव प्रवर्तत इति सर्वसंप्रतिपन्नमेतत् ।
एतदनभ्युपगच्छतो हि भेदबुद्धिर्नामाभेदबुद्धिरेवेत्यापद्यते । ततश्च
भेदाभेदाविति वचनव्यक्त्या द्विवारमभेद एवोक्तो भवेत् । भेदाभेदशब्दौ
वा न लोकसिद्धार्थवाचिनौ स्यातामित्याह - **एवं हीति** । कार्य-
कारणादिस्थले तु कार्यादीनां प्रातीतिको भेदः, परमार्थतस्तु
कारणादिसकाशादभेद एवेत्यन्यदेतत् । तथा च श्रुतिः 'मृत्तिकेत्येव
सत्यम्' (छां. ६-१-४) इति । अतो निष्प्रमाणकमिदमुच्यते
साधकाद्भिन्नाभिन्नात्मकं ब्रह्मेति । अस्तु लोके भिन्नाभिन्नपदार्थो
नास्त्येवेति । ब्रह्मणि तु शास्त्रबलाद् भिन्नाभिन्नत्वाश्रयणे को दोषः ?
इति वदन्तं प्रत्याह - **अथेति** । निष्प्रमाणकं प्रत्यक्षादिप्रमाणरहित-
मित्यर्थः । शास्त्रमप्यसंभावितं भिन्नाभिन्नलक्षणमेकं वस्तु नाव-
गमयितुमलम् पुरुषार्थतत्साधनप्रकाशनपरत्वेन शास्त्रस्याविद्यमान-
पदार्थशक्त्याधानसामर्थ्याभावादित्युक्तम् । अथाप्यभ्युपगम्य-
निष्प्रमाणकं भिन्नाभिन्नं ब्रूते, तदापीति । तस्मिन् पक्षे उभयपक्षाभ्युप-
गमात् । अभेदपक्षे नानारसं ब्रह्म साधकादभिन्नमिति पक्षे ब्रह्म दुःखि
स्यात् । अत आह - 'मूलकृत्' इति शेषः । यद्यपि **नैष्कर्म्यसिद्धिकृदपि
स्वयमेव**, तथापि संबन्धोक्तिकारत्वेन स्वस्मिन्नेवौपाधिकं भेदं
प्रकल्प्येदं वचनमिति मन्तव्यम् ॥

संभवित्वेनाभ्युपगतेऽपि भेदाभेदवादे दोषः -

भिन्नाभिन्नमिति । सामान्यविशेषात्मकं ब्रह्म विशेषैर्जीवैर्भिन्ना-

भिन्नमिति चेदभ्युपगम्यते, तर्हि ब्रह्मणो जीवानतिरेकाद् ब्रह्म दुःख्यपि ध्रुवं स्यात् । किञ्च बद्धस्य जीवस्य स्वाश्रितदुःखमात्रानुभवः, मुक्तस्य तु ब्रह्मात्मना सर्वजीवाभेदात् अशेषदुःखिता च भवतीत्यहो प्रज्ञा आत्मवेदिनाम्, यस्याः प्रज्ञाया महिम्ना ते बन्धकालदुःखातिशायि-दुःखभाजो भवन्तीत्युपहासः ।।७८।।

---

१४. समुच्चयनिरासोपसंहारः

(मूलम्)

तस्मात् सम्यगेवाभिहितं न ज्ञानकर्मणोः समुच्चय इत्युपसंह्रियते -

तमोऽङ्गत्वं यथा भानोरग्नेः शीताङ्गता यथा ।
वारिणश्चोष्णता [1]यद्वज्ज्ञानस्यैवं क्रियाङ्गता ।।७९।।

(क्लेशापहारिणी)

प्रकरणोपसंहारः -

तदेवमद्वैतिमतेन द्वैताद्वैतिमतेन वा सर्वथापि ज्ञानकर्मसमुच्चयो न घटत इति परमप्रकृतमुपसंहरति - **तस्मादिति । ये त्वधुनातन-वेदान्तिनो** वदन्ति - जीवानां सदा ब्रह्मणः सकाशाद्भिन्नानामेव सतां मुक्तौ स्वभूतसुखानुभूतिर्भविष्यतीति । तेषां सुखं नैजं चेद् बन्ध-दशायामपि तेन भाव्यम् । स्वभावस्यापाये हेत्वभावात् । अतोऽज्ञानेनैव तस्यानभिव्यक्तिरिति ज्ञानेनैव तदभिव्यक्तिरित्यायातम् । तत्र किं कर्मणेति प्रष्टव्यास्ते । अथ स्वभूतमपि सुखं केनचिदावृतं सन्नावभासते

---

1. 'तोयस्योष्णाङ्गता' इति पाठः कल्पितः कैश्चित् स्यात्प्रक्रमभङ्गवारणार्थम् ।।

मोक्षकाले ध्यानकर्मभ्यां तु प्रतिबन्धकीभूतावरणनाशादभिव्यज्यत इत्युच्यते, तदापि स्वीयस्यैव चित्प्रकाशस्य विषयभूतमावरणं किमिति 'इदमित्थम्' इत्येवं न भासते बन्धदशायामिति वक्तव्यं भवति । चित्प्रकाशस्याप्यावरणं ब्रुवन्तम् एवमेव निराकुर्यात् । अथैतद्दोष-परिजिहीर्षया आवरणमपि मिथ्याज्ञानकृतमिति यदि ब्रूयात्, तर्हि ज्ञानमेवालम् अज्ञानोच्छित्तये किं कर्मणेति समुच्चयानुपपत्तिः । यापि कल्पना परमेश्वर एव यथोक्तं जीवानां स्वरूपभूतं सुखं स्वेच्छया आवारयति, तैराराधितस्तु आवरणम् अपाकरोतीति, तत्र यः परमेश्वरः शक्तोऽपि पूर्वम् आवरणेनाच्छादयति स्म स पुनरपि तथैव न करोतीति कैव प्रत्याशा ? अपि च जीवान् अविद्यया प्रच्छाद्यापि सन्तुष्यतः परमेश्वरस्य कथं नाम न नैर्घृण्यम् - इत्यादिदोषाः स्फुटा एवेत्यलमति-प्रपञ्चेन ॥

तमोऽङ्गत्वम् इति । स्पष्टार्थः श्लोकः ॥७९॥

---

१५. पूर्वपक्षोक्तिखण्डनम्

(मूलम्)

यथोक्तोपपत्तिबलेनैव पूर्वपक्षस्योत्सारितत्वात्, वक्तव्यं नावशेषितमित्यतः प्रतिपत्तिकर्मवत् पूर्वपक्षपरिहाराय यत्किञ्चिद् वक्तव्यम् इत्यत इदमभिधीयते -

मुक्तेः क्रियाभिः सिद्धत्वादित्याद्यनुचितं बहु ।
यदभाणि तदन्याय्यं यथा तदधुनोच्यते ॥८०॥

(क्लेशापहारिणी)

पूर्वपक्षयुक्तिनिरासप्रतिज्ञा -

कर्मणां केवलानां ज्ञानसमुच्चितानां वा न मुक्तिहेतुत्वमित्युपपत्तिबलेनैव प्रतिपादितम् ; ज्ञानादेव तु केवलादज्ञानोच्छित्तिरिति च । तत्र यद्यप्येतावतैव प्रतिज्ञातार्थः सिध्यति, तथापि पूर्वपक्षोक्तिखण्डनायोत्तरो ग्रन्थभाग इत्याह - **यथोक्तेति** । प्रतिपत्तिकर्मवत् स्वयं प्राप्तत्यागस्य कृष्णविषाणस्य 'स कृष्णविषाणं च मेखलां च चात्वाले प्रास्यति' (शत. ब्रा. ४-४-१-२) इति विधिवचनवशाच्चात्वाले त्याग इव, उपपत्तिबलेन खण्डितमपि पूर्वपक्षं तदुक्तिनिरासेनापि खण्डयित्वा तस्यात्यन्तमेव निस्सारतां प्रदर्श्य तत्परिहारायेदानीं प्रयत्यत इत्यर्थः ।।

मुक्तेरिति । स्पष्टो ग्रन्थः ।।८०।।

(मूलम्)

योऽयं काम्यानां प्रतिषिद्धानां च त्यागः प्रतिज्ञायते सा प्रतिज्ञा तावन्न शक्यतेऽनुष्ठातुम् । किं कारणम् ? कर्मणो हि निर्वृत्तात्मनो द्वाभ्यां प्रकाराभ्यां निवृत्तिः संभवति । आरब्धस्य फलस्योपभोगेन, अनारब्धफलस्य अशुभस्य (च)[1] प्रायश्चित्तैरिति । तृतीयोऽपि त्यागप्रकारोऽकर्त्रात्मावबोधात् । स त्वात्मज्ञानानभ्युपगमाद् भवता नाभ्युपगम्यते । तत्र यान्यनुपभुक्तफलानि अनारब्धफलानि, तानि ईश्वरेणापि केनचिदपि न शक्यन्ते परित्यक्तुम् । अथारब्धफलानि त्यज्यन्ते तान्यपि न शक्यन्ते त्यक्तुम् । किं कारणम् ? निर्वृत्तेः[2] । अनिर्वृत्तं हि चिकीर्षितं कर्म शक्यते त्यक्तुम् । प्रवृत्तिनिवृत्ती प्रति

1. अत्र चकार एकोऽपेक्षितोऽपि मुद्रितपुस्तकेषु न दृश्यते ।।
2. 'अनिवृत्तेः' इत्यसाधुः पाठः ।।

कर्तुः स्वातन्त्र्यात् । निर्वृत्ते तु कर्मणि तदसंभवात् दुरनुष्ठेयः प्रतिज्ञातार्थः । अशक्यप्रतिज्ञानाच्च । न च शक्यते प्रतिज्ञातुं 'यावज्जीवं काम्यानि प्रतिषिद्धानि च कर्माणि न करिष्यामि' इति । सुनिपुणानामपि सूक्ष्मापराधदर्शनात् । प्रमाणाभावाच्च । न च प्रमाणमस्ति मोक्षकामो नित्यनैमित्तिके कर्मणी कुर्यात्, काम्यप्रतिषिद्धे च वर्जयेत्, आरब्धफले चोपभोगेन क्षपयेत् - इति । आनन्त्याच्च । न चोपचितानां कर्मणाम् इयत्ता अस्ति । संसारस्यानादित्वात् । न च काम्यैः प्रतिषिद्धैर्वा तेषां निवृत्तिरस्ति । शुद्ध्यशुद्धिसाम्ये सत्यविरोधात् इति । अत आह -

न कृत्स्नकाम्यसंत्यागोऽनन्तत्वात् कर्तुमिष्यते ।
निषिद्धकर्मणश्चेह[3] व्यतीतानन्तजन्मसु ॥८१॥

स्यान्मतम्, व्यतीतानन्तजन्मोपात्तानां कर्मणाम् -

क्षयो नित्येन तेषां चेत्प्रायश्चित्तैर्यथैनसः ।
निष्फलत्वान्न नित्येन काम्यादेर्विनिवारणम् ॥८२॥

प्रमाणाभावाच्च । कथम् ?

पापापनुत्तये वाक्यात् प्रायश्चित्तं यथा तथा ।
गम्यते काम्यहानार्थं नित्यं कर्म न वाक्यतः ॥८३॥

(क्लेशापहारिणी)

काम्यनिषिद्धकर्मणोरशेषतस्त्यागानुपपत्तिः -

काम्यनिषिद्धयोस्त्यागात्, नित्यनैमित्तिकयोश्चानुष्ठानात् प्रारब्ध-

---

3. 'कर्मणश्चेत्तु' पा.

कर्मणश्च फलोपभोगेन क्षपणात् अयत्नसिद्धो मोक्षः - इति हि पूर्वः पक्षः । तत्र त्यागस्तावदनुष्ठातुं न शक्यत इत्याह - **योऽयमिति** । तत्र हेतुमाह प्रश्नपूर्वकम् - **किं कारणम् ? कर्मणो हीत्यादि** । निर्वृत्तात्मनः निष्पन्नरूपस्य द्वाभ्यां प्रकाराभ्यां निवृत्तिः संभवति । आरब्धपलस्योपभोगेन क्षयः, अनारब्धफलस्याशुभस्य च प्रायश्चित्तैरिति । इयमपि कर्मणो निवृत्तिस्तात्कालिकी, न त्वात्यन्तिकीति ज्ञेयम् । उपभुक्तानां वासनाबीजावापात् पुनरपि कर्माङ्कुरावकाशसत्त्वात् । प्रायश्चित्तैर्दोषक्षपणेऽपि कर्मत्वाविशेषेणाविद्याकृतकर्तृत्वं पुरस्कृत्यैव प्रवृत्तत्वात् कर्तृत्वशक्तेरनपहारात्, सति कर्तृत्वे कर्मोद्भवनिवारणकारणाभावात् । यस्तु तृतीयः प्रकारोऽकर्त्रात्मज्ञानाद् भवति स आत्यन्तिकः । अज्ञाननिमित्तस्य कर्मणोऽज्ञाननाशे शेषानुपपत्तेः । एवं तृतीयोऽपि प्रकारो यद्यप्यस्ति कर्मनिवृत्तेः, तथापि तु स प्रकारो भवता कर्मवादिना नाभ्युपगम्यते । तत्र एवमवशिष्टे कर्मणो निवृत्तिप्रकारद्वये, यान्यनुपभुक्तफलान्यनारब्धफलानि सञ्चितानि, तान्यनुपस्थितत्वादेव न शक्यन्ते परित्यक्तुम्, ईश्वरेणापि स्वतन्त्रेणापि । न ह्यनुपस्थितो रोगो भिषज्यते सुनिपुणेनापि वैद्येनेति भावः । अथारब्धफलानि त्यक्ष्यन्ते इत्युच्यते, तान्यपि न शक्यन्ते त्यक्तुम् । अत्राशङ्कते **किं कारणम् ?** इति । उत्तरमाह **निर्वृत्तेः** । निष्पत्तेरित्यर्थः । निष्पन्नं हि कृतमेवेति न तस्य त्यागे स्वातन्त्र्यमस्ति कर्तुः । अथ लब्धस्वरूपाणां भोगादेव सर्वेषां क्षयः क्रियते क्रमेणेति । तदप्यशक्यप्रतिज्ञानम् । न ह्यनन्तानां सञ्चितकर्मणां स्वस्वकाले निष्पत्स्यमानफलानां कल्पकोटिभिरप्युपभोगेन क्षयो भविता । न चाऽऽगामिकर्मणां प्रतिबन्धोऽस्ति येन सर्वकर्मक्षये प्रत्याशा स्यादित्याह - **अशक्यप्रतिज्ञानाच्चेति** । तदेव विवृणोति - **न च शक्यत** इति । किमिति न शक्यते ? तत्राह - **सुनिपुणानामपीति** । तथा च पौराणिकाः प्राहुः - युधिष्ठिरस्यापि नरकदर्शनं बभूव, अणीमाण्ड-

ग्यापि शूलारोपणम् - इत्यादि । अपि चैष मुक्तिसाधनप्रकारो न शास्त्रोक्तः, किं तु त्वयैवाभ्यूहित इत्याह - **प्रमाणाभावाच्चेति** । नित्यनैमित्तिकयोर्मोक्षार्थत्वं नास्तीति पूर्वमेवोक्तम् 'नाश्रौषं मोक्षदं कर्म' (१-२७) इति । इह तु कर्मक्षयप्रकारेऽपि शास्त्रप्रमाणमपह्नूयत इति विशेषः । किञ्च यद्यपि केषाञ्चित् सञ्चितानां कर्मणां प्रायश्चित्तादिभिस्त्यागः संभवेत्, तथाप्यानन्त्यात् कर्मणाम् अशेषतस्त्यागो न संभवतीत्याह - **न चेति** । एकैकस्यापि कर्मणोऽनेकजन्मप्रदानसामर्थ्यं स्मर्यते । जन्मनि जन्मनि चाभिनवानि कर्माणि क्रियन्ते । तत्र कथं प्रायश्चित्तेनोपभोगेन वा सर्वेषां क्षयः शक्यते संभावयितुमिति भावः । न च कर्मानन्त्ये प्रमाणाभावः । अनेकजन्मान्तरसञ्चितानामनारब्धफलानां सद्भावस्य श्रुतिस्मृतिभ्यामवगमादित्यपि द्रष्टव्यम् । यथोक्तं **संबन्धवार्तिके** 'ततः शेषेण वचनात्तथा तद्य इहेत्यतः । अनारब्धफलेहानां गम्यते संस्थितिस्ततः ॥' (सं. वा. ९५) इति । किञ्चान्यत् - काम्यैः कृतैः काम्यानामुपचय एव स्यान्न नाशः, तथा प्रतिषिद्धैश्च प्रतिषिद्धानाम् इत्याह - **न च काम्यैरिति** ! तदेतत्सर्वमभिसंधायोत्तरश्लोकप्रवृत्तिरित्याह - **अत आहेति** - तस्मादाह ग्रन्थकृत् इति शेषः । 'इत्याह' इति पाठे तु इत्यभिसंधायाह इत्यर्थः ॥

न कृत्स्नेति । व्यतीतानन्तजन्मसु कृतस्य कृत्स्नस्याशेषस्य काम्यस्य निषिद्धकर्मणश्च संत्यागो न कर्तुमिष्यते, अनन्तत्वात् इति योजना । कृत्स्नस्य संत्यागः इति पदद्वयमर्थतो 'निषिद्धकर्मणश्च' इत्यनेनापि संबध्यते योग्यत्वादिति ध्येयम् ॥ ८१॥

नित्यकर्मणा काम्यनिषिद्धयोर्न क्षयः -

अनन्तानामपि काम्यानां निषिद्धानां च नित्यकर्मणैव क्षयः स्यात्, यथा इहजन्मकृतानां प्रतिषिद्धानां प्रायश्चित्तैरित्याशङ्क्य परिहरति - **स्यान्मतम् इति** ॥

क्षयो नित्येनेति । यथा एनसः पापस्य प्रायश्चित्तैः क्षयः, एवं तेषाम् अनन्तजन्मोपात्तानामपि काम्यनिषिद्धानां नित्येन क्षयः इति चेत्, न नित्येन काम्यादेः काम्यनिषिद्धयोर्विनिवारणं संभवति । निष्फलत्वात् । नित्यं कर्म निष्फलम् इति भवद्भिरङ्गीकारादित्यर्थः । मया च नित्यानामपि स्वासाधारणफलवत्त्वाभ्युपगमादित्यपि द्रष्टव्यम् । यथोक्तं **संबन्धवार्तिके** 'आम्रे निमित इत्यादि ह्यापस्तम्बस्मृतेर्वचः । फलवत्त्वं समाचष्टे नित्यानामपि कर्मणाम्' (सं. वा. ९७) इति ॥८२॥

नित्यकर्मणा काम्यनिषिद्धयोः प्रहाणिरित्येतन्न केवलं भवतः प्रतिज्ञाहानिप्रसञ्जकम्, अपि तु निष्प्रमाणकमपीत्याह - **प्रमाणाभावाच्चेति** ॥

पापापनुत्तय इति । काम्यहानार्थमित्युपलक्षणम्, निषिद्ध-हानार्थमित्यपि द्रष्टव्यम् । 'कर्मणा पितृलोकः' (बृ. १-५-१६), 'सर्व एते पुण्यलोका भवन्ति' (छां. २-२३-१) इत्यादिभिः श्रुतिभिः नित्यानां कर्मणां कार्यान्तरार्थत्वावगमात् ॥८३॥

(मूलम्)

अथापि स्यात्, काम्यैरेव काम्यानां पूर्वजन्मोपचितानां क्षयो भविष्यतीति । तन्न । यतः -

पाप्मनां पाप्मभिर्नास्ति यथैवेह निराक्रिया ।
काम्यैरपि तथा नास्ति काम्यानामविरोधतः ॥८४॥

(क्लेशापहारिणी)

काम्यैः काम्यानां न नाशः -

अस्त्रमस्त्रेण शाम्यतीति न्यायेन काम्यैरेव काम्यानां कर्मणां नाशोऽस्त्विति पक्षान्तरमुत्थाप्य पराकरोति - **अथापि स्यादिति** ॥

पाप्मनामिति । निषिद्धानां निषिद्धैर्नाशस्तावदतिदवीयस्त्वेन न नाशकार्यः । न हि पङ्कं पङ्कलेपेन क्षालयन्तीति । एवं काम्यैः शुद्धैरनुष्ठितैः पुण्यातिशय एव भवेत्, न पुण्यनाशः शुद्धिसाम्यात् । नन्वेतत् 'न च काम्यः' इति संबन्धोक्तावेवोक्तम् । बाढम् । इत एव आकृष्य तत्रोक्तमित्यदोषः ।।८४।।

(मूलम्)

एवं तावत्, 'मुक्तेः क्रियाभिः सिद्धत्वात्' (१-९) इति निराकृतम् । अथ, आत्मज्ञानस्य सद्भावे प्रमाणासंभव उक्तः । तत्परिहारायाह -

श्रुतयः स्मृतिभिः साकमानन्त्यात् कामिनामिह ।
विदधत्युरुयत्नेन कर्मातो बहुकामदम् ।।८५।।

न च बाहुल्यं प्रामाण्ये कारणभावं प्रतिपद्यते । अत आह -

प्रामाण्याय न बाहुल्यं न ह्येकत्र प्रमाणताम् ।
वस्तुन्यटन्ति मानानि त्वेकत्रैकस्य मानता ।।८६।।

यत्तूक्तं 'यत्नतो वीक्षमाणोऽपि' (१-१५) इति, तत्रापि भवत एवापराधः । कस्मात् ? यतः -

परीक्ष्य लोकानित्याद्या आत्मज्ञानविधायिनीः ।
नैष्कर्म्यप्रवणाः साध्वीः श्रुतीः किं न शृणोषि ताः ।।८७।।

(क्लेशापहारिणी)

कर्मविधिबाहुल्यादेव कर्म मुक्तिसाधनमित्ययुक्तम् -

उत्तरग्रन्थसंबन्धमाह - **एवं तावदित्यादिना** । तत्र सर्वासु श्रुतिषु

स्मृतिषु च कर्मैव विहितं यत्नपूर्वकम् । अतः कर्मैव मुक्तिसाधनम् इत्यत्र शास्त्रतात्पर्यं संभाव्यत इत्यतः, आत्मज्ञानस्य सद्भावे प्रमाणं न संभाव्यत इति यदुक्तं तन्निराचष्टे समनन्तरश्लोक इत्याह - **अथेति** ।

श्रुत्यादीनामपि यत्नाधिक्यदर्शनं तावत् न कर्मण एव मोक्षं प्रति पुष्कलकारणत्वे युक्तिः । तस्यान्यथाप्युपपद्यमानत्वात् इत्याह - **श्रुतयः इति** ।। कामिनामानन्त्यात् कामानामप्यानन्त्यम् । कामावाप्तये च कर्माणि विधीयन्ते । तत्प्रदानोपायत्वात् । न चैतावता कर्मणो मोक्ष-साधनत्वं ज्ञानस्य तदसाधनत्वं वा संभाव्यत इति भावः ।।८५।।

ननु बहूनि कर्मवाक्यानि । अत एव संभाव्यते कर्मणः साधनत्वमित्युक्तम् । तत्राह - **न चेति** । 'अत आह' इति पूर्ववद्-व्याख्येयम् ।।

प्रामाण्यायेति । प्रमाणस्य हि प्रामाण्यं स्वत एव । तत्रैकस्य प्रमाणस्यान्यापेक्षा किमतिशयार्था भवेत् ? न ह्येकस्मिन् वस्तुनि प्रमेये बहूनि मानानि प्रमाणतामटन्ति प्रामाण्यं प्राप्नुवन्ति । किं त्वेकत्र प्रमेये एकस्यैव मानता इति स्थितिः । यत्तु **प्रमाणसंप्लववादिनः** प्राहुः - 'प्रमाणान्यनेकान्यपि प्रमेयमभिसंप्लवन्ते कदाचित् । तद्यथा 'अमुत्राग्निः' इत्याप्तोपदेशात् अग्निं प्रत्याहितप्रत्ययो लौकिकः तं देशं गच्छति । प्रत्यासीदन् पुनर्धूमविशेषणं धूमाङ्गित्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते । आसन्नतरस्तु इदानीम् इन्द्रियसन्निकर्षात् अग्निप्रत्ययं करोति । तदा निराकाङ्क्षो भवतीत्यतः प्रधानं प्रत्यक्षम्' (न्या. वा. पा. ३०) इति । तत्रापि वाक्येन प्रत्ययमात्रं जायते, धूमविशेषणदर्शनेन तु नूनमत्रास्ति हुतभुक् इति निश्चीयते, इन्द्रियसंनिकर्षे तु अग्निं साक्षादनुभवतीत्यतः आप्तोपदेशेन विश्वस्तता-मात्रमस्तित्वस्य, अनुमानेन तु निश्चितता, प्रत्यक्षेण पुनः साक्षादु-पलब्धत्वम् इत्यनधिगतांशे एवाग्नेः प्रमाणानां व्यापार इति तैरप्यङ्गी-

...गत एव । अतो न तत् स्थितस्य न्यायस्य बाधकं भवेदिति ज्ञेयम् । ...मात् नास्त्येवैकत्र वस्तुनि बहूनां प्रमाणानां व्यापारः । कामानां ...त्वादेव तु कर्मणामपि बहुत्वात्, तद्विधिबाहुल्यमिति निरवद्यम् । एवं ... कर्मणां प्रातिस्विकफलमुद्दिश्य विहितत्वात् मोक्षं प्रति कर्मणः ...नत्वे नैवास्ति सम्भावनायुक्तिः । न च कर्मविधिबाहुल्यं ज्ञानस्य ...क्षसाधनत्वं वारयितुं प्रभवेदित्यभिप्रायः ॥८६॥

नैष्कर्म्यप्रवणाः श्रुतयोऽपि सन्ति -

नन्वेवमपि ज्ञानस्य मोक्षं प्रति साधनत्वं कुतः सेत्स्यति ? उक्तं हि ...गा नात्मज्ञानविधिः क्वचिदपि दृश्यत इति - इत्याशङ्क्य तत्परि...गयोत्तरश्लोक इति तमवतारयति - **यत्तूक्तमिति** । तत्रापि विध्यदर्शने भवत एवापराधः, यतो विद्यमानान्यपि प्रमाणवाक्यानि कर्मपक्ष...तित्वदोषदूषितान्तःकरणत्वात् न पश्यसीति भावः । 'कस्मात्' ...त पूर्वपक्षिण आक्षेपमाशङ्क्य प्रमाणवाक्यदर्शनपूर्वकमपराधं ...शदयति **यतः इति** ॥

तत्रैकां श्रुतिमुपलक्षणत्वेनोदाहरति **'परीक्ष्य लोकान्'** इति । 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । ...द्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥' (मुं १-२-१२) इति पूर्णो मन्त्रः । एवमाद्याः **आत्मज्ञानविधायिनीः** । आत्मज्ञानमवश्यं सम्पादयितव्यं नित्यनिःश्रेयसार्थिना - इति तदर्थं गुर्वभिगमनादिविधायिनीः, नैष्कर्म्यप्रवणाः ज्ञाननिष्ठाप्राप्यं निष्कर्मभावमेव तात्पर्येणोपदिशन्तीः, साध्वीः सर्वथाप्यबाध्यत्वेन प्रबलाः श्रुतीः किं न शृणोषि ताः सुप्रसिद्धाः येनैवं ब्रवीषीति भावः । अत्रात्मज्ञानं सर्वथा कर्मनिरपेक्षमेव मोक्षसाधनमिति कृत्वा तदर्थं यत्नातिशयः कर्तव्य इत्युद्घोषणं श्रुत्वापि किमेवं भाषसे इति काक्वा केवलज्ञाने श्रुतीनां ...मतात्पर्यं सूचयति । 'आत्मज्ञानविधायिनीः' इति साधन-विधायिन्य

एव श्रुतयः परामृश्यन्ते । यत्रापि विधय इवाभासन्ते वाक्यानि तत्रापि विधीनां गत्यन्तरं दर्शयामीत्याशयः सिद्धान्तिनः ।।८७।।

(मूलम्)

ननु 'आत्मेत्येवोपासीत' (बृ. १-४-७) 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-४-५) - इत्यपूर्वविधिश्रुतेः पुरुषस्य आत्मदर्शनक्रियायां नियोगोऽवसीयत इति । नैवम् । अपुरुषतन्त्रत्वाद् वस्तुयाथात्म्यज्ञानस्य सकलानर्थबीजात्मानवबोधोत्सारिणो मुक्तिहेतोरिति । विध्यभ्युपगमेऽपि नापूर्वविधिरयम् । अत आह[1] -

नियमः परिसङ्ख्या वा विध्यर्थोऽपि भवेद्यतः ।
अनात्मादर्शनेनैव परात्मानमुपास्महे ।।८८।।

(क्लेशापहारिणी)

आत्मज्ञाने न नियोगः -

अत्र 'आत्मज्ञानविधायिनीः' इत्युपश्रुत्य वेदान्त्येकदेशिनः प्राहुः । सत्यम् आत्मज्ञानविधायिन्यः श्रुतयोऽपि विद्यन्ते । ताभिर्विधीयमानं तु ज्ञानं न कर्मविरोधीति । तदनूद्य निराकरोति - **नन्विति** । 'आत्मेत्येवोपासीत' (बृ. १-४-७) इत्युपासनं विधीयते । न च तद्वाक्यज्ञानमात्रम् । श्रवणमात्रेण स्वयंजन्यत्वेन अविधेयत्वात् । तथा 'आत्मा वा अरे द्रष्टव्यः'.(बृ. २-४-५, ४-५-६) इति दर्शनं विधीयते । तत्रापि नात्मवस्तुदर्शनं विधेयम् । नित्यप्राप्तत्वात् । अतोऽपूर्वविधिरयं ज्ञानाभ्यासं भावनातिशयवशाद् ब्रह्मात्मदर्शनफलकं विदधाति । अथवा वाक्यज्ञानं संसृष्टार्थबोधकमित्यतोऽसंसृष्टार्थरूपात्मविज्ञानार्थं ज्ञानाभ्यासं विदधातीत्यभ्युपगन्तव्यम् - इत्याह पूर्वपक्षी - **पुरुषस्येति** ।

1. 'आहुः' इति न समीचीनः पाठः ।।

तदेतत् सिद्धान्ती निराचष्टे - **नैवमित्यादिना** । न ह्यात्मज्ञानं दर्शनापराभिधानं पुरुषतन्त्रम् । वस्तुयाथात्म्यज्ञानं हि तदिति वस्तुतन्त्रमेव । तच्च स्वोत्पत्तिमात्रेण सकलानर्थहेतोरज्ञानस्योत्सारि विनाशकम् । तावतैव च मुक्तिहेतुरिति नाभ्यासापेक्षमिति पूर्वमेव (१-६७) समावेदितमित्यर्थः ॥

ज्ञानविध्यङ्गीकारेऽपि नापूर्वविधिः -

अथ प्रौढिवादेन विधिमङ्गीकृत्यापि तस्यापूर्वविधित्वं निराकरोति - **विध्यभ्युपगमेऽपीति** । अपिशब्दस्यायमर्थः । 'नेदं यदिदमुपासते' (के. ५), 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. ३-४-२) इत्यादयः श्रुतयो ब्रह्मणः परमार्थत एव उपासनाविषयत्वं द्रष्टव्यत्वं च निषेधन्ति । अतो न विध्यर्था उदाहृताः श्रुतयः । अथापि त्वत्परितोषार्थं विधिरभ्युपगन्तव्यः, तर्हि नायमपूर्वविधिरग्निहोत्रादिविधिवत् । अत्यन्तमप्राप्त्यभावादिति ब्रूम इति ॥

कीदृशस्तर्हि विधिः ? तत्राह - **नियमः परिसङ्ख्या** इति । एवं ह्यपूर्वनियमपरिसङ्ख्याविधीनां लक्षणभेदो वर्णितः 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति कीर्त्यते' (तं. वा. १-२-३४, पृ. १५२) इति । यदा ह्यात्मस्वरूपविज्ञानेन देहाद्यात्माभिमानरूपमज्ञानं निवृत्तम्, तदा विषयध्यानाद्यसंभवादात्मचिन्तैव भवति । तस्मात् तस्मिन् पक्षे न विधातव्यमुपासनम् । प्राप्तत्वात् । तथापि प्रारब्धकर्मवशाद् यदा शरीरस्थितिहेतुषु कर्मसु प्रवृत्तिर्भवति तदा ज्ञानदौर्बल्यमपि प्राप्तम् । अतोऽस्मिन् पक्षे आत्मविज्ञानसन्ततिर्नियन्तव्या भवतीति नियमविधिः स्यात् । अत्र च 'आत्मेत्येवोपासीत', 'आत्मा वा' इति चावधारणशब्दोऽनुकूलो भवति । अथवा आत्मदर्शनवत् अनात्मदर्शनस्यापि सत्त्वात् ; 'अनात्मा न द्रष्टव्यः' इति परिसंख्यानार्थं विधिः स्वीक्रियताम् । तदेवं यतो नियमः परिसंख्या

वापि विध्यर्थो भवेत्, अतः अनात्मादर्शनेनैव परात्मानमुपास्महे । न तत्रापूर्वविधिरपेक्षितः । प्राप्तत्वादेवेति भावः । अत्र विध्यभ्युपगमो विधिवादस्य दौर्बल्यसिद्ध्यर्थमेव न तु वस्तुवृत्तेन विधिः संभवतीति न प्रस्मर्तव्यम् । आत्मोपासनस्य हि नात्यन्तमप्राप्तिः । न वा पक्षे प्राप्तिः, नाप्यात्मानात्मनोरुपासनस्य तुल्यवत् प्राप्तिः । न हि बाह्यविषयसंबन्धे तदसंबन्धे वा चित्तस्य प्रत्यगात्मसंबन्धः कदापि विच्छिद्यते । अत एव बृहद्वार्तिके नियमपरिसंख्याविधिपक्षौ विस्तरेण निराकृतौ (बृ. वा. १-४- ९२१ प्रभृति ९३१ पर्यन्तम्, २-४-१४६) दृश्येते । तस्माद्विधिपक्षदौर्बल्यार्थमेवात्राभ्युपगमवाद इत्यलमतिविस्तरेण ॥८८॥

(मूलम्)

यच्चोक्तं 'विश्वासो नान्यतोऽस्ति नः' (१-१५) इति तदपि निद्रातुरचेतसा त्वया स्वप्नायमानेन प्रलपितम् । किं कारणम् ? न हि वयं प्रमाणबलेन ऐकात्म्यं प्रतिपद्यामहे । ऐकात्म्यस्य स्वत एवानुभवमात्रात्मकत्वात् । अत एव सर्वप्रमाणावतारासंभवं वक्ष्यति । प्रमाणव्यवस्थायाश्च अनुभवमात्राश्रयत्वात् । अत आह -

वाक्यैकगम्यं यद्वस्तु नान्यस्मात् तत्र विश्वसेत् ।
नाप्रमेये स्वतःसिद्धेऽविश्वासः कथमात्मनि ॥८९॥

यदप्युक्तम् 'अन्तरेण विधिम्' (१-१६) इति, तदप्यबुद्धिपूर्वकमिव नः प्रतिभाति । यस्मात् कालान्तरफलदायिषु कर्मसु एतद् घटते । आत्मलाभकाल एव फलदायिनि त्वात्मज्ञाने नैतत् समञ्जसम् इत्याह -

ज्ञानात्फले ह्यवाप्तेऽस्मिन् प्रत्यक्षे भवघातिनि ।
उपकाराय तन्नेति न न्याय्यं भाति नो वचः ॥९०॥

(क्लेशापहारिणी)

आत्मनि प्रमाणापेक्षा, अविश्वासो वा न संभवति -

तदेवमात्मज्ञाने शास्त्रप्रामाण्यं दर्शितम् । तच्च शास्त्रम् अज्ञान-निवर्तनमुखेनैव प्रमाणमात्मनि, नाज्ञातज्ञापनेनेति स्फुटीकरणार्थं 'विधिं विना निष्प्रमाणकमर्थं न विश्वसिमो वयम्' इति पूर्वपक्ष्युक्तिं प्रति उत्तरत्वेन आगामिग्रन्थमवतारयति - **यच्चोक्तमिति** । यदप्युक्तं श्रुतिस्मृतिभ्यामन्यत्रास्माकं विश्वासो नास्तीति (१-१५), तदप्यज्ञाननिद्राविष्टचित्तेन त्वया स्वप्नायमानेन मिथ्यादर्शनव्यग्रेण यत्किञ्चित् प्रलपितम्, न तु विवेकपूर्वकमुक्तमित्यर्थः । अभिप्रायं विवृण्वन् प्रश्नमवतार्योत्तरयति - **किं कारणमिति** । ऐकात्म्यस्य हि अनुभवमात्रं स्वरूपम् । अतो न तस्य प्रमाणबलेन सिद्धिं ब्रूमः । अत एव मूलकृद् द्वितीयाध्याये सर्वप्रमाणानामप्यात्मन्यवतारासंभव इति वक्ष्यति । कथं वक्ष्यतीत्याह **'प्रमाणव्यवस्थायाश्चे'ति** । प्रमाणसिद्धेरपीत्यर्थः । अनुभवमात्राश्रयत्वात्, अनुभवस्वरूपात्माश्रयणेनैव स्वरूपलाभादित्यर्थः । 'यतो राद्धिः प्रमाणानां स कथं तैः प्रसिध्यति' (२-३७) इति श्लोकार्थपरामर्शोऽयम् ॥

वाक्यैकगम्यमिति । यद्वस्तु धर्माधर्मादिकं वाक्यैकगम्यं केवलश्रुत्यादिवाक्यप्रमाणादेव ज्ञातव्यम्, तत्र वस्तुनि विषये श्रुत्यादिवाक्यादन्यस्मात् प्रमाणान्तरात् न विश्वसेत् श्रद्दध्यात् । अप्रमेये तु स्वात्मनि न तथा । कुतः ? प्रमाणापेक्षाभावादेव । कथं तर्ह्यप्रमेयस्य वस्तुनः सिद्धिः ? तत्रोत्तरं **'स्वतःसिद्धे'** इति । न हि प्रमाणतः कादाचित्कसिद्धावेव वस्तु सिद्धं भवतीति नियमः, येन प्रमाणापेक्षयैव सिद्धिरपेक्ष्या भवेत् । आत्मा तु स्वतःसिद्ध इति तस्मिन् कथम-

विश्वासः ? स्वतःसिद्धत्वादेव हि नान्यापेक्षा भवति, नाप्यविश्वासः । 'आत्मनि' इति च साभिप्रायो निर्देशः । विश्वासोऽविश्वासो वा आत्मनोऽन्यत्र हि संभवति, न त्वात्मनि । अविश्वसितुरप्यात्मत्वात्, इत्यभिप्रायः ॥८९॥

ज्ञानस्य निष्फलत्वोक्तिरनुभवविरुद्धा -

नन्वेवमपि विधिमन्तरेण ज्ञाने प्रवृत्तिर्व्यर्थेत्युक्तम् । तत्र कः परिहार इति ? तदेतदनूद्य परिहरति - **यदप्युक्तमिति** । आत्मनस्तावत् स्वात्मनि न प्रवर्तकप्रमाणापेक्षा । आत्मत्वादेव । न चात्मज्ञाने विधिः संभवतीत्युक्तम् । अथाऽऽत्मज्ञाने विध्यभावात् प्रयोजनाभावश्चोद्यते, तत्राह - **तदपीत्यादि** ॥

ज्ञानादिति । आत्मज्ञानात्, भवघातिनि अज्ञाननिवृत्तिद्वारेण संसारनाशके अस्मिन् फते प्रत्यक्षे सत्यपि तज्ज्ञानं नोपकाराय निष्फलम् इति वचः । नः अस्माकं न न्याय्यं भाति । भुजिसाध्यायां तृप्तावनुभूयमानायामेव तमपह्नुवान इवानुभवापलापी भवान् कथमुपादेयवचनः स्यात् ? - इति भावः ॥९०॥

(मूलम्)

यदपि जैमिनीयं वचनम् उद्घाटयसि तदपि तद्विवक्षाऽपरिज्ञानादेवोद्भाव्यते । किं कारणम्? यतो न जैमिनेरयमभिप्रायः 'आम्नायः सर्व एव क्रियार्थ' इति । यदि ह्ययम् अभिप्रायोऽभविष्यत् 'अथातो ब्रह्मजिज्ञासा' (वे. सू. १-१-१), 'जन्माद्यस्य यतः' (वे. सू. १-१-२) - इत्येवमादिब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरं गम्भीरन्यायसंदृब्धं सर्ववेदान्तार्थमीमांसनं श्रीमच्छारीरकं नासूत्रयिष्यत् । असूत्रयच्च । तस्माज्जैमिनेरेवायमभिप्रायः । यथैव विधिवाक्यानां स्वार्थमात्रे प्रमाण्यम्, एवमैकात्म्यवाक्यानामपि ।

अनधिगतवस्तुपरिच्छेदसाम्यात् इति । अत इदमभिधीयते -

> अधिचोदनं य आम्नायस्तस्यैव स्यात्क्रियार्थता ।
> तत्त्वमस्यादिवाक्यानां ब्रूत कर्मार्थता कथम् ॥९१॥

(क्लेशापहारिणी)

आम्नायस्य क्रियार्थत्वमित्येतत्कर्मकाण्डविषयम् -

'आम्नायस्य क्रियार्थत्वात्' (१-१७) इत्युक्तमनूद्य निराकरोत्यागामि श्लोकः । तत्राह - **यदपीति** । आम्नायस्येत्यादि जैमिनीयं वचनमुद्घाटयसीति यत् तदपि तद्विवक्षाऽपरिज्ञानादेव जैमिन्यभिप्रायपरिज्ञानाभावादेव उद्भाव्यते । किं कारणम् ? कस्मादेवमवगम्यत इति प्रश्नः । उत्तरमाह - यत इति । आम्नायस्येत्यादि पूर्वपक्षसूत्रमित्युक्तम् । तत्राम्नायपदेन न वेदसामान्यं विवक्षितं जैमिनेः । तेन धर्मजिज्ञासार्थमेव शास्त्रप्रणयनात्, 'चोदनालक्षणोऽर्थो धर्मः' (जै. सू. १-१-२) इति चोदनागम्यस्यैव कर्मणो लक्षितत्वाच्च कर्मकाण्ड एव विवक्षित इति गम्यते । अत एव हि तत्रस्थानामक्रियार्थानाम् आनर्थक्यं पूर्वपक्षेणाशङ्क्य परिहरति 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (जै. सू. १-२-७) इति । 'सोऽरोदीत्' (तै. सं. १-५-१) इत्यादीनि हि वाक्यानि न कर्तव्यक्रियामवगमयन्ति, न वा क्रियासंबद्धं किञ्चित् । अतस्तानि कस्मिन् धर्मे प्रमाणानि स्युः ? - इत्याशङ्क्यायं परिहारः । न तु जैमिनिना वस्तुस्वरूपबोधकवाक्यान्यपि विचारयितुमिष्टानि, येन क्रियार्थानीत्यनेन तान्यपि विवक्षितानि स्युरित्यर्थः ॥

तत्कथमिदमवगम्यते सर्व एवाम्नायो न विचिचारयिषितो जैमिनिनेति ? तत्राह - **यदीति** । यदि जैमिनेरयमभिप्रायोऽभविष्यत्, तर्हि श्रीमच्छारीरकं नासूत्रयिष्यत् । भगवान् बादरायण इति शेषः ।

ब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरमिति । यद्यपि शारीरके ब्रह्मोपासनान्यपि चिन्तितानि प्राणोपासनादीनि च, तथापि न तत्परमदः शास्त्रम् । 'अथातो ब्रह्मजिज्ञासा' (वे. सू. १-१-१) इति ब्रह्मण एव जिज्ञास्यत्वेन प्रतिज्ञातत्वात्, 'जन्माद्यस्य यतः' (वे. सू. १-१-२) इति तस्यैव लक्षणप्रणयनात्, 'शास्त्रयोनित्वात्' (वे. सू. १-१-३) इति च तस्मिन्नेव वेदप्रामाण्योपन्यासात् चेत्यभिसंधाय 'इत्येवमादि ब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरम्' इति विशेषणमपि उक्तमिति ज्ञेयम् । आदिशब्देन 'तत्तु समन्वयात्' (वे. सू. १-१-४) इति सूत्रस्य ग्रहणम् । वेदान्तवाक्यानां तद्गतपदानां च ब्रह्मवस्तुन्येव समनुगतत्वाभिधानात्तत्र । उपासनावाक्यानां तु पूर्वत्रामीमांसितत्वादत्र पूर्वतन्त्रन्यायैरेव चिन्ता प्रतायते मन्दमध्यमाधिकारिणामनुग्रहार्थमिति भावः । उपलक्षणमेतत् । 'अरूपवदेव हि तत्प्रधानत्वात्' (वे. सू. ३-२-१४) इति भगवता बादरायणेन ब्रह्मवाक्यानां निष्प्रपञ्चब्रह्मवस्तुप्रधानत्वसंसूत्रणात् इत्यपि द्रष्टव्यम् । तेन हि विधिप्रधानेभ्यो वाक्येभ्यो वस्तुमात्रपराण्यपि वाक्यानि विचारितानि शारीरके इति सेत्स्यति । ननु तर्हि शारीरकम् अप्रमाणत्वेनोपेक्ष्यमेव धर्ममीमांसाविरुद्धत्वात् इत्याशङ्क्याह **'गम्भीरन्यायसंदृब्धं सर्ववेदान्तार्थमीमांसनम्'** इति । अयं भावः । यथा प्राची मीमांसा, तथा इयमपि मीमांसैव । वेदान्तवाक्यार्थनिर्णयार्थं पृथक्प्रवृत्तत्वात् । यथा च पूर्वमीमांसा स्वोचितगम्भीरन्यायसंदर्भसहिता तथैवेयमपि तया अनवगतमर्थं ब्रह्मस्वरूपं निर्धारयतीति नानादरणकारणमस्तीति । असूत्रयच्च भगवान् बादरायणः पृथङ्मीमांसनम् । तदेवं पृथक्छास्त्रारम्भान्यथानुपपत्तिरवगमयति जैमिनेः सर्व एवाम्नायः क्रियार्थ इति नाभिप्राय इति । अन्यथा हि पूर्वमीमांसयैव गतार्थत्वात् पृथक्छास्त्रं नैवारभ्येतेत्याशयः । तस्माज्जैमिनेरेव भवदभिमतप्रामाण्यस्य अयमभिप्रायोऽवगम्यते यथैव विधि-

वाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवमेवैकात्म्यवाक्यानामपि अनधिगतवस्तुपरिच्छेदसाम्यादिति । जैमिनिर्हि औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे, तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' (जै. सू. १-१-५) इति सूत्रयन् अनधिगतस्याबाधितस्य च प्रमेयस्य परिच्छेदनं प्रामाण्ये कारणं ब्रवीति शास्त्रस्य । तस्मात्, यथा विधिवाक्यानां स्वार्थमात्रे कर्मणि प्रामाण्यम्, एवमैकात्म्ये वेदान्तवाक्यानामपि स्वप्रमेयपरिच्छेदसाम्यात् प्रामाण्यमिति जैमिनेरेवाभिप्रायः संवृत्त इति भावः ॥

एतावता किं निष्पन्नमित्युत्तरश्लोके अभिधीयत इत्याह - **अत इदमिति.।**

अधिचोदनमिति । श्लोके वर्णाधिक्यं कथञ्चित् समाधेयम्[1] । चोदनामधिकृत्य य आम्नायः, तस्यैव स्यात् क्रियार्थता जैमिनेरपि । तत्त्वमस्यादिवाक्यानाम् अकर्मप्रकरणस्थानां तात्पर्येणैकात्म्यं ब्रुवतां कर्मार्थता कथम् ? इत्येतद् ब्रूत, यदि शक्नुथेति शेषः । न हि तात्पर्येण स्वार्थं ब्रुवतां भिन्नवाक्यत्वे सिद्धेऽप्येकवाक्यता शक्यकल्पनेतिभावः । यद्यपि कर्मणां चित्तशुद्धिद्वारेण ज्ञानकाण्डवाक्यार्थशेषत्वं सिद्धान्तिभिः स्वीकृतमस्ति तथापि तत्र 'विविदिषन्ति यज्ञेन' (बृ. ४-४-२२) इत्यादि विनियोजकप्रमाणवशादेकवाक्यत्वमङ्गीक्रियते । न त्वेवं वेदान्तवाक्यानां क्रियावाक्यैः सहैकवाक्यत्वे प्रमाणमस्तीति वैषम्यम् । एतच्च सर्वं ग्रन्थकृद्भिरेव **संबन्धवार्तिके** निपुणतरमुपपादितमिति तत एवाधिगन्तव्यमित्यलं विस्तरेण ॥९१॥

(मूलम्)

अपि च, ऐकात्म्यपक्ष इव अदृष्टार्थकर्मसु भवत्पक्षेऽपि प्रवृत्तिर्दुर्लक्ष्या । यतः -

1. 'अधि चोदनमाम्नायः' इति पाठः केषाञ्चित् ।

स्वर्गं यियासुर्जुहुयादग्निहोत्रं यथाविधि ।
देहाद्व्युत्थापितस्यैवं कर्तृत्वं जैमिनेः कथम् ॥९२॥

न च प्रत्याख्याताशेषशरीरादिकर्मसाधनस्वभावस्याऽऽत्ममात्रस्य कर्मस्वधिकारः । यस्मात् -

सर्वप्रमाणासंभाव्यो ह्यहंवृत्त्यैकसाधनः ।
युष्मदर्थमनादित्सुर्जैमिनिः प्रेर्यते कथम् ॥९३॥

प्रवृत्तिकारणाभावाच्च । यस्मात् -

सुखदुःखादिभिर्योग आत्मनो नाहमेक्ष्यते ।
पराक्त्वात् प्रत्यगात्मत्वाज्जैमिनिः प्रेर्यते कथम् ॥९४॥

किं च -

न तावद्योग एवास्ति शरीरेणात्मनः सदा ।
विषयैर्दूरतो नास्ति स्वर्गादौ स्यात् कथं सुखम् ॥९५॥

(क्लेशापहारिणी)

पूर्वपक्षिमतेऽप्यात्मनः शास्त्रीयकर्मसु न कर्तृत्वमस्ति -

अथाधुना 'कुर्वन्नेवेह कर्माणि' इति श्रुतिविरोधो य उद्भावितः (१-१८), तं परिजिहीर्षुरदृष्टार्थकर्मसु प्रवृत्तिरविद्यां विना नोपपन्नेति पूर्वोक्तं स्मारयंस्तावदाह - **अपि चेति** । ऐकात्म्यपक्षे तावत् क्रियाकारकफलभेदस्य अविद्याविषयत्वावगमात्, अशरीरस्यात्मनः कर्मसु प्रवृत्तिर्न संगच्छत इति स्फुटमेव । इदानीं भवत्पक्षेऽपि कर्मवादिपक्षेऽपि अदृष्टार्थकर्मसु पारलौकिककर्मसु प्रवृत्तिर्यथा दुर्लक्ष्या दुःखेनापि न लक्ष्यते, निष्प्रमाणकत्वात्, तथा हेतुभिरुपपादयाम इत्यर्थः । हेतुप्रदर्शनायाऽऽह - **यत इति** ।

स्वर्गं यियासुरिति । स्वर्गं यियासुः गन्तुमिच्छुः अग्निहोत्रं यथाविधि जुहुयात् । 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति वाक्यस्यार्थतः पठनमिदम् । एवम् इत्येवमादिभिर्वाक्यैः देहाद् व्युत्थापितस्य देहं विहायैव आत्मा वर्तत इति बोधितस्येत्यर्थः । तस्य शरीरातिरिक्तात्मज्ञानिनः कर्तृत्वं कथं स्यात् ? न हि शरीरं विना अग्निहोत्रादि क्रियत इति भावः जैमिनेरिति जैमिनिमतेऽपीत्यर्थः ।।९२।।

केवलाहंप्रत्ययगम्यस्यात्मनः कर्मसु नाधिकारः -

एतदेव विशदयितुमुत्तरश्लोक इत्याह **- न चेति** ।

सर्वप्रमाणेति । सर्वैरिन्द्रियादिभिः प्रमाणैः, असंभाव्योऽनाकलनीयास्तित्वः । अहंवृत्त्येकसाधनः अहंवृत्त्या एकयैव असाधारणया साध्यते इति । अहंप्रत्ययमात्रगम्य इति यावत् । कर्ममीमांसकैरात्मनस्तथात्वेनोपगमात् । यद्वा अहंवृत्तिरेव एकं साधनं यस्य सोऽयम् अहंवृत्त्येकसाधनः । न तु देहादिसहितः इत्यर्थः । युष्मदर्थम् अहङ्कारव्यतिरिक्तं देहेन्द्रियविषयादिकम् इत्यर्थः । अनादित्सुः उपादातुमनिच्छन् । देहेन्द्रियादिरहित इति यावत् । जैमिनिः जैमिनिमतानुयायीत्यर्थः । कथं कर्मसु प्रेर्यते प्रवर्त्यते ? न हि देहेन्द्रियादिष्वहंममाभिमानहीनः कर्मस्वधिक्रियत इति भावः । युष्मदर्थम् अहङ्कारादिलक्षणम् इति तु न सम्यग्व्याख्यानम् । अहङ्काराश्रयस्यैव पूर्वपक्षिणा आत्मत्वेन स्वीकारात् । केवलाहंप्रत्ययगम्य आत्मा न कथञ्चन प्रवर्त्येत होमादिषु शरीरेन्द्रियाद्यपेक्षेषु इति वाक्यार्थः ।।९३।।

शरीरातिरिक्तात्मनः कर्मफलभोक्तृत्वं न संभवति -

तदेवं कर्तृत्वम् अधिकारित्वं वा कर्मसु न संभवत्यात्मन इत्युप-

पादितम् । इदानीं तस्य फलभोक्तृत्वमपि न संगच्छत इत्याह - **प्रवृत्तिकारणाभावाच्चेति ।** प्रयोजनाभावाच्चेत्यर्थः । तत्र हेतुमाहोत्तर-श्लोक इति तमवतारयति - **यस्मात् इति ।।**

सुखदुःखादिभिरिति । अहमा अहंप्रत्ययिना आत्मत्वेन भवदभिमतेनेत्यर्थः । आत्मनः सुखदुःखादिभिर्योगः संबन्धः नेक्ष्यते न विषयीकर्तुं शक्यते । विषयिणः स्वस्यैव स्वविषयत्वानुपपत्तेः स्वस्य सुखदुःखसंबन्धस्यापीक्षणं दुर्लभमिति भावः । तदेव स्पष्टयति - **पराक्त्वादिति** । सुखदुःखादीनां पराक्त्वात् बाह्यविषयत्वात् । स्वस्य चाहंप्रत्ययिरूपात्मनः प्रत्यगात्मत्वात् प्रत्यक्स्वरूपत्वात् । तदेवमात्मनः सुखदुःखसंबन्धेक्षणस्यासंभावितत्वे सति जैमिनिः तन्मतानुयायी कर्म-मीमांसकः कथं प्रेर्यते ? न हि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तत इति भावः ।।९४।।

उक्तार्थ एवोपष्टम्भकयुक्तिमाह समनन्तरोत्तरश्लोक इति तमवतारयति - **किं चेति** ।

न तावदिति । आत्मनः शरीरेण योग एव सदा नास्ति । शरीरेणैव संबन्धुम् योग्यैर्विषयैर्योगस्तु दूरतोऽपि नास्ति । नतरां संभाव्यत इत्यर्थः । एवं स्थिते स्वर्गादौ सुखं कथं स्यात् ? अत्यन्तासंभावित-मेतदित्यभिप्रायः । न चात्मकृतधर्माधर्मनिमित्तः शरीरयोगः संभवतीति शङ्क्यम् । शरीरं विना धर्माधर्मयोरशक्यकरणात् । शरीरयोगस्य चाद्याप्यसिद्धेः । शरीरयोगसिद्धौ धर्माधर्मसिद्धिः, तत्सिद्धावेव च शरीर-योगसिद्धिरिति सिद्ध्योः परस्परमुखनिरीक्षणकाङ्क्षाप्रसङ्गात् । पूर्वपूर्वजन्मकृतयोः धर्माधर्मयोः उत्तरोत्तरजन्मनि शरीरयोगः कार्यम् - इति ब्रुवाणस्य तु न क्वचिदपि धर्माधर्मसिद्धिरद्यापि निष्पन्नेति निर्हेतु-कमेवानादित्वं धर्माधर्मतत्कृतशरीरयोगयोः सन्तानस्य कल्पयितुरन्ध-परम्परैवापतेत् न कथमपीष्टः शरीरयोगः सिध्येत् इति ।।९५।।

(मूलम्)

यस्मादन्यथा नोपपद्यते -

नराभिमानिनं तस्मात्कारकाद्यात्मदर्शिनम् ।
मन्त्र आहोररीकृत्य कुर्वन्निति न निर्द्वयम् ॥९६॥

(क्लेशापहारिणी)

अविद्यावन्तमभ्युपगम्यैव कर्मविधिः -

ननु तर्हि कर्मविधयः सुतरामविषया इत्यप्रमाणत्वमेव तेषामायातम् इत्याशङ्क्य प्रकारान्तरेण तेषां सविषयत्वसंभवान्नैवमित्यर्थकत्वेन भाविश्लोकमवतारयति - **यस्मादिति** । अन्यथा क्रियाकारकफलानाम् अविद्याविद्यमानत्वमनङ्गीकृत्य आत्मनः कर्मसु प्रवृत्तिर्नोपपद्यते यस्मात् तस्मादिति श्लोकस्थेनान्वयः ॥

नराभिमानिनम् इति । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' (ई. २) इत्येष मन्त्रः, नराभिमानिनम् आत्मानं मनुष्यमभिमन्यमानम्, कारकाद्यात्मदर्शिनम् क्रियाकारकफलान्वयिस्वरूपमात्मनि पश्यन्तम् । अधिकारिलक्षणान्वितोऽहमिति मिथ्याज्ञानिनम् इति यावत् । उररीकृत्यैव अध्यारोपदृष्ट्या 'कुर्वन्' इति मन्त्र आह, न निर्द्वयम् अशरीरमेवाद्वितीयमात्मत्वेन निश्चितवन्तम् आत्मज्ञानिनं स्वीकृत्य । इत्यवगम्यत इति शेषः । नराभिमानिनं स्वीकृत्याह इति तु 'एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' इति वाक्यशेषाद् गम्यत इत्याशयः ॥९६॥

(मूलम्)

यच्चोक्तम् 'विरहय्य' (१-१९) इति तदपि नः[1] सम्यगेव ।

---

1. 'न सम्यगेव' इत्ययुक्तः पाठः ॥

तथापि तु न या काचित् क्रिया यत्र क्व चाध्याहरणीया, किं तु या यत्राभिप्रेतसंबन्धं घटयितुं शक्नोति आकाङ्क्षां च वाक्यस्य पूरयति, सैवाध्याहरणीया । एवंविशिष्टा च क्रिया अस्माभिरभ्युपगतैव । सा तूपादित्सितवाक्यार्थाविरोधिन्येव नाभूतार्थप्रादुर्भावफला इति । षड्भावविकाररहितात्मवस्तुनो निर्धूताशेषद्वैतानर्थस्य, अपराधीनप्रकाशस्य, विजिज्ञापयिषितत्वात् 'असि', 'अस्मि' इत्यादिक्रियापदं स्वमहिमसिद्धार्थप्रतिपादनसमर्थम् अभ्युपगन्तव्यम्, न विपरीतार्थप्रतिपादनपरम् इति ।।

धावेदिति न दानार्थे पदं यद्वत् प्रयुज्यते ।
एधीत्यादि तथा नेच्छेत् स्वतःसिद्धार्थवाचिनि ।।९७।।

न च यथोक्तवस्तुवृत्तप्रतिपादनव्यतिरेकेण तत्त्वमस्यादिवाक्यं वाक्यार्थान्तरं वक्तीति शक्यमध्यवसातुम् इत्याह -

तत्त्वमस्यादिवाक्यानां स्वतःसिद्धार्थबोधनात् ।
अर्थान्तरं न संद्रष्टुं शक्यते त्रिदशैरपि ।।९८।।

(क्लेशापहारिणी)

आत्मवाक्ये अस्यादिसिद्धार्थबोधकक्रियापदमप्यस्ति -

ज्ञानविधायकं वाक्यं नास्त्येवेत्येतदपहस्तितम् । इदानीमात्मवस्तुनि वाक्यप्रामाण्याभ्युपगमात् क्रियापदाभावे वाक्यस्यैवाभावात् तद्विधायकं वाक्यं न संभवतीति यदुक्तम्, तदपि निरसिष्यत इत्याह - **यच्चोक्तमिति** । यद्यपि 'सोऽयं पुरुषः', 'सुन्दरं वनम्' इत्यादिवाक्येषु क्रियां विनापि पदसंहतिर्दृश्यत एव, तथापि भवदुक्तमङ्गीकृत्यापि

प्रतिवक्ष्यामीत्याह **तदपि नः सम्यगेवेति** । तथापि तु क्रियापदापेक्षामङ्गीकृत्यापि तु न या काचित् क्रिया यत्र क्वचन समध्याहरणीया भवति । अतिप्रसङ्गात् । नाप्यवश्यं क्रियापदमध्याहर्तव्यमिति निर्बन्धो युक्त इति भावः । कीदृशी तर्हि क्रिया कुत्राध्याहरणीयेत्यत्र विनिगमनाहेतुर्वक्तव्य इत्यत आह - **किं त्विति** । **एवंविशिष्टेति** । अभिप्रेतसंबन्धघटकत्ववाक्याकाङ्क्षापूरकत्वरूपोभयधर्मविशिष्टेत्यर्थः । उपादित्सितो यो वाक्यार्थः, आत्मैकत्वरूपः, तेनाविरोधिन्येव यथावस्थितवस्तुस्वरूपप्रकाशनयोग्यैव । न त्वभूतार्थप्रादुर्भावफला न त्वपूर्वोत्पत्त्यादिफला । इति हेतोरभ्युपगतैवेति संबन्धः । कीदृशमत्र क्रियापदमभ्युपगतं भवता ? किं च कारणं तदेवाङ्गीक्रियते न त्वभूतोत्पत्त्यादिबोधकम् ? इत्यत आह - **षड्भावेति** । जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति इत्येते षड्भावविकाराः । जायमानस्य सर्वस्यापि पदार्थस्येमे नियमेन भवन्ति । एतैः रहितम्, अत एव निर्धूताशेषद्वैतानर्थं यदात्मवस्तु, तस्यैव स्वयंप्रकाशस्य विज्ञापयितुमिष्टत्वात् ; 'अस्ति', 'अस्मि' इत्यादिक्रियापदमभ्युपगन्तव्यम् । 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिस्थले इवेति शेषः । अभ्युपगमे हेतुमाह - **स्वमहिमसिद्धार्थप्रतिपादनसमर्थमिति** । न हि स्वतःसिद्धवस्तुनि यथावस्थितवस्तुस्वरूपप्रतिपादनं विना कार्यान्तरमस्ति काङ्क्षणीयम् इति भावः । न विपरीतार्थप्रतिपादनपरमिति । तद्विपरीतोऽर्थः साध्यरूपः । तत्प्रतिपादनपरं विकार्यकार्यादिप्रतिपादनपरं नाभ्युपगन्तव्यम् इति हेतोरेवंविशिष्टा क्रिया अस्माभिरभ्युपगतेत्यर्थः ॥

धावेदिति । नन्वस्यादिक्रियापदमेवाभूतार्थप्रतिपादकमित्यस्तु । 'उपरि हि देवेभ्यो धारयति' (?) इत्यादिस्थलेषु वर्तमानव्यपदेशक-

शब्दैरपि विधिकल्पनदर्शनात् । तथा च 'आम्नायस्य क्रियार्थत्वम्' इत्यभियुक्तोक्तिरप्यनुगृहीता भविष्यतीति व्यामोहव्युदासायेदमुच्यते । युक्तं दृष्टान्ते कार्यप्रकरणत्वात् कार्यत्वाच्च धारणस्य विधिकल्पनम् । अस्यादीनि तु पदानि स्वतःसिद्धार्थज्ञापकानि, अकर्मप्रकरण-वाक्यस्थानीति कथं विक्रियादिबोधकानीति कल्प्येरन् ? न हि स्वतःसिद्धं च, अभूत्वा भावि चेति अविप्रतिषिद्धं भवेत् । विप्रतिषेधात् । न च 'असि' इति पदम् 'एधि' 'कुरु' इत्याद्यर्थे, 'अस्मि' इति पदं च 'भवानि', 'करिष्यामि' इत्याद्यर्थे भगवता वेदेन प्रयुक्त इति कल्पयितुमपि शक्यम्, न हि लोकेऽपि केनापि सचेतसा 'गां दद्यात्' इत्यर्थे 'गां धावेत्' इति प्रयुज्यते । तस्मात् स्वतःसिद्धार्थवाचि पदं साध्यार्थे प्रयुक्तमिति विवेकिभिर्न कल्पनीयमित्यभिप्रायः ॥९७॥

तत्त्वमस्यादिवाक्येषु विधिरशक्यकल्पनः -

ननु यत्रापि वस्तुस्वरूपप्रतिपादनपरता लक्ष्यते 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिषु वाक्येषु, तत्रापि कार्यवाचिक्रियापद-मध्याहृत्य 'सदस्मीति धारय', इत्यादिरीत्योपासनापरतैवावसीयताम्, 'विज्ञाय प्रज्ञां कुर्वीत' इत्यादिवाक्यस्य प्रज्ञाकरणविध्यपेक्षितविज्ञेय-वस्तुसमर्पणपरता वा । तत्राह - **न चेति** । वाक्यार्थान्तरम् अध्याहरणेन, विधिव्यसनितया वाक्यान्तरं प्रकल्प्य तदर्थं उपासनादिकं वक्तीति अध्यवसातुं निश्चेतुं वा न शक्यम् इत्याह । मूलकृत् इति शेषः ॥

तत्त्वमस्यादीति । किमित्यर्थान्तरं संद्रष्टुं न शक्यते ? तत्र हेतुः **स्वतःसिद्धार्थबोधनादिति** । स्वतःसिद्धार्थे एव वाक्यस्थानां पदानां समन्वयात्, तद्बोधकत्वेनैव वाक्यस्योपक्षीणत्वादित्यर्थः । यथाहि कर्मबोधकं वाक्यं वस्तुप्रतिपादकमिति न शक्यते कल्पयितुम्,

एवमिहापि न कर्मादिपरत्वं शक्यते संभावयितुं त्रिदशैरप्यप्रतिहतैश्वर्यैर्देवैरपि । किमुत मानवैः । श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति भावः ॥९८॥

(मूलम्)

यस्मादेवम् -

अतः सर्वाश्रमाणां तु वाङ्मनःकायकर्मभिः ।
स्वनुष्ठितैर्न मुक्तिः स्याज्ज्ञानादेव हि सा यतः ॥९९॥

तस्माच्च कारणात् एतदप्युपपन्नम् -

स्वमनोरथसंक्लृप्तप्रज्ञाध्मातधियामतः ।
श्रोत्रियेष्वेव वाचस्ताः शोभन्ते नात्मवेदिषु ॥१००॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य
श्रीमच्छङ्करभगवत्पादशिष्यश्रीसुरेश्वराचार्यविरचितायां
नैष्कर्म्यसिद्धौ ससंबन्धोक्तौ प्रथमोऽध्यायः

(क्लेशापहारिणी)

प्रतिज्ञातार्थोपसंहारः -

अतो ज्ञानादेव मुक्तिरिति यत् प्रतिज्ञातमस्माभिस्तदेव युक्तम् न पूर्वपक्षोक्तम् इत्युपसंहरति - **यस्मादिति** ॥

अत इति । स्पष्टार्थः श्लोकः ॥९९॥

पूर्वपक्षयुक्तिनिरासोपसंहारः -

अत एव च 'इति हृष्टधियाम्' (१-२२) इत्यादि

यदुक्तम् तदपि संगच्छत इति दूषणोपसंहारमाह - **तस्माच्चेति** ।।

स्वेति । कल्पितद्वैतविषयकः कर्मवादस्तावदेव शोभते यावत् परमार्थात्मवादो बुद्धौ नावतरतीत्यभिप्रायकः श्लोकः ।।१००।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य
श्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन
श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन
भिक्षुणा प्रणीतायां नैष्कर्म्यसिद्धिव्याख्यायां
क्लेशापहारिण्यां प्रथमोऽध्यायः

ॐ तत्सत्

अथ द्वितीयोऽध्यायः

(आत्मज्ञानप्रतिबन्धापनयनम्)

१. अध्यायसंबन्धः

(मूलम्)

प्रत्यक्षादीनाम् अनेवंविषयत्वात्, तेषां स्वारम्भकविषयोपनिपातित्वात्, आत्मनश्च अशेषप्रमेयवैलक्षण्यात्, सर्वानर्थैकहेत्वज्ञानापनोदिज्ञानदिवाकरोदयहेतुत्वं वस्तुमात्रयाथात्म्यप्रकाशनपटीयसस्तत्त्वमस्यादेर्वचस एव - इति बह्वीभिरुपपत्तिभिः प्रदर्शितम् । अतस्तदर्थाप्रतिपत्तौ यत् कारणम्, तदपनयनाय द्वितीयोऽध्याय आरभ्यते ।।

श्रावितो वेत्ति वाक्यार्थं न चेत् तत्त्वमसीत्यतः ।
त्वंपदार्थानभिज्ञत्वादतस्तत्प्रक्रियोच्यते ।।१।।

(क्लेशापहारिणी)

प्रत्यक्षादीनां शब्दादिविषयमात्रग्राहकत्वम् -

वृत्तवर्तिष्यमाणयोरध्याययोः संबन्धः कथ्यते 'श्रावितो वेत्ति' इत्यादिश्लोकेन । तदेतद् विवरीतुकाम आह - **प्रत्यक्षादीनामित्यादि** । अनेवंविषयत्वात् स्वतःसिद्धात्मवस्तुस्वरूपाविषयत्वादित्यर्थः । तदविषयत्वे हेतुमाचष्टे - **स्वारम्भकविषयोपनिपातित्वात्** इति । स्वारम्भकाः स्वस्य कारणभूताः ये शब्दादिविषयाः, तेष्वेव, उपनि-

पातित्वात् तद्विषयीकरणस्वाभाव्यात् । पराक्प्रमेयमात्रविषयीकरण-सामर्थ्यात् इति यावत् । इन्द्रियाणां हि पराक्प्रवणस्वभावत्वमभिहितं श्रुतौ 'पराञ्चि खानि व्यतृणत्स्वयम्भूः' (क. २-१-१) इति । एतत्स्वाभाव्ये च हेतुः स्फुटीकृतः 'स्वारम्भक' इति विषय-विशेषणेन । उक्तं हि **बृहदारण्यकभाष्ये** 'विषयस्यैव स्वात्मग्राहकत्वेन संस्थानान्तरं करणं नाम' (बृ. भा. २-४-११) इति । भवति च श्रौतं लिङ्गं करणानां भौतिकत्वे 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' (छां. ६-५-४) इत्येवञ्जातीयकम् । न च स्वभावातिवर्तनं शक्यं कस्यचित् । अत एवोच्यते 'प्रत्यक्षादीनामनेवं-विषयत्वम् इति' इति भावः ।।

'प्रत्यक्षादीनाम्' इति 'आदि'ग्रहणं तु प्रत्यक्षोपजीव्यनुमानाद्युप-संग्रहार्थम् । यदा स्वविषयप्रकाशनसमर्थानामपि श्रोत्रादीनामेव न सामर्थ्यमात्मप्रकाशने, तदा कैव कथा तदुपदर्शितोपजीविनाम् अनुमानादीनाम् इति तेषामनेवंविषयत्वे हेत्वन्तरं नोपात्तमिति ध्येयम् । यद्यपि वाक्यप्रमाणमपि प्रत्यक्षोपदर्शितोपजीव्येव, तथापि न तदज्ञातस्यात्मनो ज्ञापकत्वेन प्रमाणम्, आत्मनो नित्यावगत्येकरूपत्वेन स्वज्ञापकानपेक्षणात् ; किं तु आत्मगताविद्यानाशकत्वमात्रेण प्रमाण-मित्युपचर्यते । तथा च वक्ष्यति 'अविद्यानाशमात्रं तु फलमित्युपचर्यते । नाज्ञातज्ञापनं न्याय्यमवगत्येकरूपतः' ।। (२-१०५) इति । प्रत्यक्षादीनां तु अनेवंविषयत्वादेव नाविद्याविनाशने सामर्थ्यमिति वैषम्यम् इति ज्ञेयम् । स्वारम्भकेत्यत्र स्वशब्दस्य समस्तपदैकदेशभूतप्रत्यक्ष-पदमात्रेणान्वयरूपो दोषस्तु कथञ्चित् समाधेयः । **यत्तु व्याख्यानम्** - आदिशब्देन श्रोत्रादीनामिह ग्रहणमिति । तदनादेयम् । अनुमानाद्य-नागमिकप्रमाणानामेवंविषयत्वप्रसङ्गावकाशप्रदत्वात् । इष्टं हि तेषामपि प्रत्यक्षवदेवानेवंविषयत्वमिति ।।

आत्मा न प्रमाणवेद्यस्वभावः -

तदेवं प्रत्यक्षादिप्रमाणानां स्वभावपर्यालोचनया तेषामनेवंविषयत्वमुपपादितम् । इदानीम् आत्मस्वभावपर्यालोचनयापि तदुपपादयितुमाह - **आत्मनश्चेति** । प्रमेया हि सर्वे विषयाः परतःसिद्ध्यपेक्षाः पराक्स्वभावाः शब्दादिमन्तः स्वग्राहककरणारम्भकाश्च । आत्मा पुनः स्वतःसिद्धः प्रत्यक्स्वभावः शब्दादिरहितः सविषयाणां करणानामपि प्रकाशयिता च चैतन्यैकस्वभाव इत्यतोऽशेषप्रमेयविलक्षणः । अतः आत्मनः प्रमेयवैलक्षण्यादपि प्रत्यक्षादीनाम् अनेवंविषयत्वमित्यभिप्रायः ॥

वेदान्तवाक्यस्यैवात्मयाथात्म्यसमर्पकत्वम् -

नन्वेवम् आत्मनोऽप्रमेयत्वे वेदान्तवाक्यप्रमाणस्यापि नास्ति कृत्यं तत्र इत्याशङ्क्याह - **सर्वानर्थैकहेत्विति** । न हि शास्त्रमिदंतया आत्मानं विषयीकुर्वत् प्रामाण्यमश्नुते येनेत्थं पर्यनुयुज्येत, कथं तर्हि सर्वानर्थहेत्वज्ञानापनोदितया । उक्तं हि प्रकरणावतारिकाग्रन्थे 'द्वैतस्य च शुक्तिकारजतादिवत् सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वादव्यावृत्तिः । अतः 'सर्वानर्थहेतुरात्मानवबोध एव' इति । तदिदमिहानूद्यते 'सर्वानर्थैकहेत्वज्ञानापनोदिज्ञानदिवाकरोदयहेतुत्वं तत्त्वमस्यादेर्वचस' एवेति । एतेन सुखस्य चात्मस्वरूपत्वात्तस्याज्ञानापनोदेनैवाविर्भाव इति न तत्प्राप्त्यर्थं यत्नान्तरमास्थेयमित्येतदप्यर्थादनूदितप्रायम् । ज्ञानेन अज्ञानापनोदनं चेदमुक्तं न वस्तुत एव विद्यमानस्याज्ञानस्य, पङ्कस्येव प्रक्षालनेन निवर्तनरूपं व्यापारमुरीकृत्य, कथं तर्हि ? सर्वमिथ्याविकल्पनिषेधपूर्वकं निर्विशेषात्मसतत्त्वकथनमात्रेणेत्याशयेनोपात्तं **'वस्तुमात्रयाथात्म्यप्रकाशनपटीयसः'** इति वचसो विशेषणम् । वाक्यं हि वस्तुमात्रस्याद्वितीयात्मनो

याथात्म्यं प्रकाशयति स्वात्मलाभमात्रेण न तु तत्रापूर्वातिशयं कञ्चिदुत्पादयतीति ।।

वृत्तानुद्रवणपूर्वकं वर्तिष्यमाणाध्यायतात्पर्यकथनम् -

एवं तावत् प्रथमाध्यायस्य विषय इह संगृहीतः । तदिदं 'बह्वीभिरुपपत्तिभिः प्रदर्शितम्' अतीतग्रन्थे । अतो विस्तरस्तत्रैव द्रष्टव्य इति भावेन द्वितीयाध्यायस्य तात्पर्यमाह - **'अतस्तदर्थाप्रतिपत्तौ' इति** । यद्यपि तत्त्वमस्यादिवचस एव आज्ञानापनोदिज्ञानोदयहेतुत्वम्, तथापि न सर्वेषां जिज्ञासूनां तच्छ्रवणादज्ञानोच्छित्तिर्जायते वाक्यार्थ-ज्ञानाभावात्तेषाम् । न हि वाक्यं स्वविषयविषयकज्ञानमनुत्पाद्य स्वयमेवाज्ञानमपनोदितुं पारयति । ज्ञानस्यैवाज्ञानविरोधित्वात् । अथ कस्मात्ते वाक्यस्यार्थं न जानन्ति ? उच्यते । पदार्थापरिज्ञानमेव वाक्यार्थज्ञानानुत्पत्तौ हेतुः । अतस्तदर्थाप्रतिपत्तौ वाक्यार्थापरिज्ञाने यत् कारणं तस्य पदार्थापरिज्ञानस्य अपनयनाय पदार्थशोधनार्थमयं द्वितीयोऽध्याय आरभ्यते इत्यर्थः ।।

पदार्थाज्ञानलक्षणप्रतिबन्धाद् वाक्यार्थाप्रतिपत्तिः -

उक्ताध्यायार्थं श्लोकेन संगृह्णाति - **श्रावित इति** । तत्त्वमसि इत्यतो वाक्यात् वाक्यार्थं श्रावितोऽपि न वेत्ति चेत्, तदवेदनं त्वंपदार्थानभिज्ञत्वात् इत्यतः तत्प्रक्रिया त्वंपदार्थविचारप्रकार उच्यते । अस्मिन् द्वितीयेऽध्याये इति शेषः । उक्तं च **भगवत्पादैः** - 'तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः । व्यज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमित्यतः ।। अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा ।।' (उप. सा. १८-१८१, १८२) इति । 'त्वंपदार्थानभिज्ञत्वात्' इत्युप-लक्षणम् । तत्पदार्थानभिज्ञत्वादित्यपि द्रष्टव्यम् । प्राधान्येन त्वंपदार्थविवेचनस्यैवापेक्षितत्वात्तु तदुपादानम् । अनभिज्ञानपदेन चात्र

न केवलमज्ञानम्, किं तु तन्निबन्धनसंशयविपर्ययावपि गृह्येते । तयोरपि पदार्थज्ञानप्रतिबन्धकत्वेनेष्टत्वात् । उक्तं हि **शारीरकभाष्ये** - 'तत्र येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां तत्त्वमसीत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति' (सू. भा. ४-१-२) इति । इदमुक्तं भवति - पदार्थज्ञानपूर्वकत्वाद् वाक्यार्थज्ञानस्य पदार्थापरिज्ञानमेव वाक्यार्थाप्रतिपत्तिकारणम् । अतोऽस्य वाक्यार्थज्ञानप्रतिबन्धस्यापनयनाय अयमध्याय आरभ्यत इति ।।१।।

---

२. वाक्यज्ञाने पूर्वः पक्षः

(मूलम्)

योऽयम् अहं ब्रह्मेति वाक्यार्थः, तत्प्रतिपत्तिर्वाक्यादेव, प्रत्यक्षादीनामनेवंविषयत्वात् इत्यवादिषम् । तस्य विशुद्ध्यर्थम् अनैकान्तिकत्वं पूर्वपक्षत्वेनोपस्थाप्यते -

कृत्स्नानात्मनिवृत्तौ च कश्चिदाप्नोति निर्वृतिम् ।
श्रुतवाक्यस्मृतेश्चान्यः स्मार्यते च वचोऽपरः ।।२।।

एतत्प्रसंङ्गेन श्रोत्रन्तरोपन्यासमुभयत्रापि संभावनायाह -

वाक्यश्रवणमात्राच्च पिशाचकवदाप्नुयात् ।
त्रिषु यादृच्छिकी सिद्धिः स्मार्यमाणे तु निश्चिता ।।३।।

(क्लेशापहारिणी)

पूर्वपक्षः - वाक्यादन्यस्मादपि ज्ञानं भवति -

उत्तरश्लोकस्योत्थानमाह - योऽयमिति । ब्रह्मात्मैक्यरूपस्य

अर्थस्य प्रतिपत्तिर्वाक्यादेव केवलात्, प्रत्यक्षादीनामनेवंविषयत्वात् इत्यवादिषम् । तस्य विशुद्ध्यर्थं निराकुलत्वप्रदर्शनार्थम् अनैकान्तिकत्वं पूर्वपक्षत्वेनोपस्थाप्यते, वाक्यस्य तादृशज्ञानहेतुत्वं नैकान्तिकं न नियतम् । वाक्यश्रवणे सति, असति च तस्मिन् ज्ञानोत्पत्तिदर्शनादिति पूर्वपक्ष उपन्यस्यते समनन्तरश्लोकेनेत्यर्थः ॥

'**कृत्स्नानात्मनिवृत्तौ**' इति । कश्चित् परिशुद्धकार्यकरणैः संपन्नः, कृत्स्नस्य सर्वस्यापि अनात्मनः आत्मव्यतिरिक्तस्य निवृत्तौ सर्वैकत्वज्ञानेन बाधे सति, निर्वृतिम् सर्वबन्धोपरमम्, आनन्दात्मस्वरूपताम्, आप्नोति स्वभूतमद्वितीयात्मरूपत्वं श्रवणमन्तरेणापि प्रतिपद्यत इत्यर्थः । यथा प्रजापतिर्जन्ममात्रेण । 'स हायमीक्षांचक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय' (बृ. १-४-२) इति श्रुतेः । श्रुतवाक्यस्मृतेश्चान्यः । यथा **भृगुः** पितुर्वाक्यं 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म' इत्येतत् सकृच्छ्रुतं वाक्यम् अर्थतः स्मृत्वा, पुनः पुनस्तपस्तप्त्वा अन्नप्राणादिक्रमेण पर्यन्ते आनन्दो ब्रह्मेति व्यजानात् । तत्र वाक्यार्थस्मृतिरेव कारणमभूत्, न वाक्यश्रवणमात्रम् इति भावः । तथा स्मार्यते च वचोऽपरः । ज्ञानार्थम् इति शेषः । यथा **श्वेतकेतुः** पित्रा नवकृत्वस्तत्त्वमसीति स्मार्यमाणः, तत्तदध्यारोपितांशापनयनपूर्वकम् अन्ते तदेवाहमस्मीति विजज्ञौ । तत्र च पुनःपुनर्वाक्यस्मारणमेव ज्ञानकारणमभूत् । न स्वयंकृतविमर्शः, सकृच्छ्रुतवाक्यार्थस्मरणो वेति भावः ॥२॥

पूर्वपक्षः - वाक्यादपि ज्ञानं भवेत् -

तदेवं वाक्यादन्यस्यैव ज्ञानकारणत्वं प्रदर्श्य अधुना वाक्यस्यापि तत्प्रदर्श्यते पूर्वोक्तं नैकान्तिकत्वं द्रढयितुमित्याह - **एतत्प्रसङ्गेनेति** । वाक्यं विनैव ब्रह्मात्मताप्रतिपत्त्युपन्यासप्रसङ्गेन स्मृतं

श्रोत्रन्तरमप्युपन्यस्यति वाक्यश्रवणमात्रात्कृतकृत्यस्य श्रोत्रन्तर-स्याप्युपन्यासं करोति ग्रन्थकृत् । तत्कुतः ? उभयत्रापि वाक्येऽपि वाक्यतोऽन्यत्रापि ज्ञानकारणत्वसंभावनाय । वाक्यस्यैकान्ततो हेतु-भावं निराकर्तुमित्यर्थः ।।

वाक्यश्रवणमात्राच्चेति । न तत्स्मृतेः नापि वाक्ययुक्त्यभ्यास-प्रयोजकात् स्मारणात्, किं तु केवलादेव वाक्यात्, कश्चित् निर्वृति-माप्नुयात् । तत्र दृष्टान्तः **पिशाचकवत्** इति । यथा कश्चित् पुरुषः पापवशात् कुत्सितां पिशाचतां प्राप्तः स्वयाथात्म्यबोधकपुरुषवाक्यं श्रुत्वैव 'त्वममुकशर्मा' इति कस्माच्चित्कारुणिकात्, विशापं गतः स्वमेव प्राकृतं रूपम् आप्नुयात्, एवम् इत्यर्थः ।।

अस्तु सर्वमेवैतत् कथमेतावता वाक्यस्यानैकान्तिकहेतुता ? तत्राह - **त्रिष्विति** । एषु चतुर्षु स्मार्यमाणस्थलव्यतिरिक्तेषु त्रिषु सिद्धिर्ज्ञानप्राप्तिर्यादृच्छिकी यदृच्छया भाविनी न तु नियमेन । अनात्मनिवृत्तावपि हि विराजः भयारत्यादिः संसारकार्यमुद्बभूव । यदृच्छया तु स प्रतिपेदे 'अहमद्वितीयः' इति । एवं प्रजापतिवाक्यं स्मृत्वापि विरोचनस्य अन्यथामतिरुद्बभूव नेन्द्रस्येति या सम्यङ्मतिसिद्धिः सापि यादृच्छिकी मन्तव्या । पिशाचस्य तु यादृच्छिकसिद्धित्वं सुस्पष्टम् । मान्त्रिकवाक्यश्रवणादपि पैशाचाभि-माननिवृत्तेर्बहुलमुपलम्भात् । स्मार्यमाणे तु निश्चिता सिद्धिः । पुनःपुनर्ज्ञानाभ्यासात् संशयविपर्ययाणां नियमेन निवृत्तेः । अतो वाक्यमेव ब्रह्मात्मत्वप्रतिपत्तिहेतुरिति नायं नियम इति भावः ।।३।।

३. वाक्यं नियमेन ज्ञानहेतुः

(मूलम्)

नायं अनैकान्तिको हेतुः । यतः -

सर्वोऽयं महिमा ज्ञेयो वाक्यस्यैव यथोदितः ।
वाक्यार्थं न ह्यृते वाक्यात् कश्चिज्जानाति तत्त्वतः ॥४॥

वाक्यं च प्रतिपादनाय प्रवृत्तं सत् प्रतिपादयत्येव । सर्वप्रमाणानामपि एवंवृत्तत्वात् -

नाहंग्राह्ये न तद्धीने न प्रत्यङ् नापि दुःखिनि ।
विरोधः सदसीत्यस्माद् वाक्याभिज्ञस्य जायते ॥५॥

(क्लेशापहारिणी)

वाक्यम् नानैकान्तिकहेतुर्ज्ञाने -

अथ सिद्धान्तमाह - **नायमिति** । अयं वाक्यलक्षणो नानैकान्तिको हेतुर्ज्ञाने, किं तु एकान्तेन ज्ञानसाधनमेवेत्यर्थः । कथं नानैकान्तिकः ? यावता विनापि वाक्यं ज्ञानोत्पत्तिर्दृश्यत इत्युक्तम् - इत्याशङ्क्य श्लोकं तत्रोत्तरत्वेनावतारयति - **यत इति** ॥

सर्वोऽयमिति । सर्वोऽयं यथोदितः श्रावणस्मरणस्मारणरूपेण ज्ञानोत्पादनलक्षणो वाक्यस्यैव महिमा । न हि वाक्याद् ऋते कश्चिदपि श्रोता वाक्यार्थम् 'अहं ब्रह्म' इत्याकारकं तत्त्वतो जानाति । न हि वाक्यस्मरणस्मारणद्वारेण जातं ज्ञानं वाक्यहेतुकं न भवति । पूर्वं श्रुतं वाक्यं विना वाक्यस्मरणस्य तत्स्मारणस्य वा स्वरूपलाभाभावादित्यभिप्रायः । यत्पुनरुक्तम् - कृत्स्नानात्मनिवृत्तौ निर्वृतिमाप्नोति वाक्यं विनैवेति । तदसत्, सुषुप्तादौ सर्वानात्मनिवृत्तावपि तदभावदर्शनात् । न

च विराडात्मनोऽनात्मनिवृत्तिमात्रं भयापगमे हेतुः । किं तु ज्ञानादेव । 'स हायमीक्षां चक्रे' इति श्रुतेः । तच्चैकत्वज्ञानं तस्य प्राग्जन्मभावित-ज्ञानकर्मफलभूतधर्मवैराग्याद्यतिशयवशाज्जातमित्यन्यदेतत् । किं च तस्य 'अहमस्मि प्रजापतिरद्वितीयः' इत्येव ज्ञानं जातम्, न तु सर्वविशेषरहितं स्वतःसिद्धं ब्रह्माहमस्मीति इत्यपि सुवचम् । प्रकरणात्, वाक्यशेषाच्च । प्रकरणं हीदं ज्ञानकर्मफलोत्कर्षप्रदर्शनार्थम्, न तु परमार्थज्ञानविषयम् । वाक्यशेषे च अरत्यादिसंसारधर्मवत्तासंकीर्तनं लक्ष्यते । अत एवोक्तं भाष्येऽपि 'विवक्षितं त्वेतत् सर्वमप्येतत् ज्ञानकर्मफलं संसार एव । भयारत्यादियुक्तत्वश्रवणात्, कार्यकरण-लक्षणत्वात्, स्थूलव्यक्तानित्यविषयत्वाच्चेति' (बृ. भा. १-४-१) इति । भाष्यकारप्रणीतैकत्वदर्शनविचारस्तु स्वप्रकरणस्थज्ञानविषये अवगन्तव्य इत्येव वार्तिकप्रस्थानमित्यस्माकं भाति । यत्तु **बृहद्वार्तिक-व्याख्यानकारै**र्विराडैक्यज्ञानपक्षः पूर्वपक्षत्वेन नीतस्तद्भाष्यकारवचन-गौरवात्, वार्तिकपूर्वापरविचारप्रणाळीमननुसंधाय वेत्यस्तु तावदेतत् । सर्वथापि तु न वाक्यादृते कस्यचिदप्यहं ब्रह्मेति ज्ञानमिति प्रकृतग्रन्थार्थ इत्यनवद्यम् ।।४।।

तत्त्वमसिवाक्यस्य स्वविषयबोधकत्वादेव प्रामाण्यम् -

ननु वाक्यं चेदेकान्तेनैव हेतुरात्मयाथात्म्यज्ञापने, न तर्हि ततोऽप्रतिपत्तिः संशयितप्रतिपत्तिर्विप्रतिपत्तिर्वा भवेत् । तथा च न स्मरणस्मारणकाङ्क्षा स्यात् वाक्यज्ञानात् परम् । अभ्युपगम्यते तु भवतापि पक्षे तदपेक्षा । तत् कथमेतत् ? इत्याशङ्क्याह - **वाक्यं चेति** । अयमभिप्रायः । न तावदप्रतिपत्तिः । न हि तत्त्वमस्यादिवाक्यं ब्रह्मात्मैकत्वं जातुचिन्न प्रतिपादयति । वाक्यमात्रस्य स्वार्थप्रतिपादन-दर्शनात् । अथ न प्रतिपादयत्येवेत्याग्रहः, भवद्वाक्यस्यापि तत्प्रति-पादनप्रतिषेधासामर्थ्यप्रसङ्गः । यथा च ज्योतिष्टोमादिकर्मवाक्यात्

तत्प्रतिपत्तिः कर्तुर्देहान्तरसंबन्धस्वर्गादिफलसंबन्धादिप्रतिपत्तिश्चावश्यं जायते, तथैव ब्रह्मात्मैकत्ववाक्यात् तत्प्रतिपत्तिः कस्मान्न जायते शास्त्रवाक्यत्वाविशेषेऽपीति प्रष्टव्यो भवान् । किं चान्यत्, सर्वप्रमाणानामप्येवंवृत्तत्वात् तत्त्वमस्यादिवाक्ये न कोऽपि विशेषः शक्यशङ्कः । प्रत्यक्षादि हि स्वविषयप्रतिपादनाय प्रवृत्तं प्रतिपादयत्येवेति सर्वसंप्रतिपन्नम् । तथा वाक्यमपि प्रमाणत्वाविशेषादित्यकामेनाप्यङ्गीकर्तव्यं भवतीति ॥

ननु न प्रत्यक्षादिसाम्यमत्र संभवति । न हि प्रत्यक्षादीनि प्रमाणान्तरविरुद्धार्थं क्वचित् प्रतिपादयन्ति दृष्टानि । इह तु प्रत्यक्षादिविरुद्धार्थप्रतिपादनमस्तीति वैषम्यमिति चेत् तत्रोत्तरम् - **नाहं ग्राह्ये** इति । अयमर्थः । विरोधाभास एवायं न वास्तविको विरोधः यतो वाक्याभिज्ञस्य तत्त्वमस्यादिवाक्यार्थमभिजानतः । अहंग्राह्ये अहमा अहंप्रत्ययेन अहंत्वेन ग्राह्ये देहेन्द्रियादौ सदसीत्यस्माद् वाक्यात् विरोधो न जायते । तस्य सद्ब्रह्मात्मत्वानुपदेशाद् वाक्येन । **न तद्धीने** अहंप्रत्ययवेद्यत्वरहिते, केवलं युष्मत्प्रत्ययगोचरे । इदंतयैव ग्राह्ये शब्दादिविषये इति यावत् । तत्र नतरां विरोधो जायते । तस्य वाक्याविषयत्वस्य स्फुटतरत्वादित्यर्थः । न **प्रत्यङ्** । नापि प्रत्यगात्मनीत्यर्थः । तस्यैव त्वंपदलक्ष्यत्वेन सत्तादात्म्योपदेशात् इति भावः । **नापि दुःखिनि** अहंप्रत्ययाश्रये दुःखादिसंसारधर्मवतीत्यर्थः । तत्रापि न विरोधो जायते । तस्य त्वंपदवाच्यत्वेऽपि तल्लक्ष्यत्वाभावेन सत्तादात्म्योपदेशाविषयत्वादिति भावः । यथा चैतत्तथा अस्मिन्नध्याये स्फुटीकरिष्यत इति प्रतिज्ञामात्रेणैतदुक्तमिति ज्ञेयम् । तदेवं प्रमाणान्तरविरोधस्य आभासमात्रत्वात् न वाक्यप्रामाण्यविघातकत्वमिति वाक्यार्थः ॥५॥

४. पदार्थशोधनपूर्वकं वाक्यार्थसिद्ध्यर्थमुत्तरग्रन्थः

(मूलम्)

नाविरक्तस्य संसारान्निविवृत्सा ततो भवेत् ।
न चानिवृत्ततृष्णस्य पुरुषस्य मुमुक्षुता ॥६॥

न चामुमुक्षोरस्तीह गुरुपादोपसर्पणम् ।
न विना गुरुसंबन्धं वाक्यस्य श्रवणं भवेत् ॥७॥

तथा पदपदार्थौ च न स्तो वाक्यमृते क्वचित् ।
अन्वयव्यतिरेकौ च तावृते स्तां किमाश्रयौ ॥८॥

अन्वयव्यतिरेकाभ्यां विना वाक्यार्थबोधनम् ।
न स्यात्तेन विना ध्वंसो नाज्ञानस्योपपद्यते ॥९॥

विनाज्ञानप्रहाणेन पुरुषार्थः सुदुर्लभः ।
तस्माद् यथोक्तसिद्ध्यर्थं परो ग्रन्थोऽवतार्यते ॥१०॥

(क्लेशापहारिणी)

वैराग्यादीनाम् ज्ञानहेतुत्वप्रकारः -

एवं कुचोद्यमुन्मूल्य यत्तदादौ प्रतिज्ञातं पदार्थज्ञानपूर्वकत्वं वाक्यार्थप्रतिपत्तेः तदेवोपसंहरन् वाक्यार्थप्रतिपत्तौ उपायसोपानं विशदयति पञ्चभिः श्लोकैः - **नाविरक्तस्येत्यादिभिः** ॥

वैराग्यादेव संसारान्निर्वर्तितुमिच्छा । ततो मुमुक्षुता, ततो गुरूपसरणम्, ततो वाक्यश्रवणम्, ततस्तदर्थज्ञानार्थं तत्स्थ-

पदपदार्थान्वयव्यतिरेकौ, ततो वाक्यार्थबोधः, ततोऽज्ञानप्रहाणम्, ततश्च सर्वानर्थनिवृत्तौ निजानन्दस्वरूपप्राप्तिरूपः पुरुषार्थ इति क्रमेण वैराग्यादेः परम्परया वाक्यार्थबोधहेतुत्वम्, अन्वयव्यतिरेकाभ्यां पदार्थविवेकस्य च साक्षात्तद्बोधजनकत्वं यस्मात् तस्मात् पदार्थ-विवेकसिद्ध्यर्थमुत्तरो ग्रन्थ इति पिण्डितार्थः । एतच्चोपदिष्टं **भगवत्पूज्यपादैः** - 'नित्यमुक्तत्वविज्ञानम्' इत्यादिना (उप. सा. १८-१९०, १९१), ग्रन्थकृतैवोदाहरिष्यते चतुर्थे । एतेन त्रिषु यादृच्छिकी सिद्धिरिति प्रत्युक्तम् । सर्वत्र पदार्थस्मरणद्वारत्वात् वाक्यार्थप्रतिपत्तेः । असकृत्स्मारणं तु सकृदुक्तवाक्यार्थानु-भवाशक्तं प्रति, क्रमेण प्रतिबन्धापनयार्थमिति सर्वं निरवद्यम् ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

---

१. स्थूलशरीरविवेकः

(मूलम्)

वर्चस्कं त्वन्नकार्यत्वाद्यथा नात्मेति गम्यते ।
तद्भागः सेन्द्रियो देहस्तद्वत् किमिति नेक्ष्यते ॥११॥

(क्लेशापहारिणी)

देहोऽनात्मा अन्नकार्यत्वात् -

इदानीं त्वंपदार्थशोधनमारभमाणः स्थूलदेहे तावदात्ममतिं निरासयितुमाह - **वर्चस्कं त्विति** । यथा वर्चस्कं पुरीषं अन्नकार्यत्वात् नात्मा अन्नवदेवेति गम्यते निश्चीयते, तद्भागः अन्नकार्यांश एव सन् सेन्द्रियो देहोऽपि तद्वदिति किं नेक्ष्यते ? किं कारणं तथैव

सोऽप्यनात्मेति नाधिगम्यते ? इत्याक्षेपः । सेन्द्रियो देहः अनात्मैव, अनात्मभूतान्नकार्यत्वात् पुरीषादिवदित्यध्यवसातव्यमित्यभिप्रायः । करणानां भौतिकत्वे श्रुतिरुदाहृता प्राक् । तथा देहोऽपि भौतिक एव सन् अन्नकार्यमुच्यते, तत्प्रधानत्वात्, 'स वा एष पुरुषोऽन्नरसमयः' (तै. २-१) इति श्रुतेश्च - इत्यवगन्तव्यम् ॥११॥

(मूलम्)

आद्यन्तयोरनात्मत्वे प्रसिद्धे मध्येऽपि कः प्रतिबन्धः ? -

प्रागनात्मैव जग्धं सदात्मतामेत्यविद्यया ।
स्रगालेपनवद्देहं तस्मात्पश्येद्विविक्तधी· ॥१२॥

अथैवमपि मद्वचनं नाद्रियसे, स्वयमेवैतस्मात् शरीरादशुचिराशेर्निराशो भविष्यसि -

मन्यसे तावदस्मीति यावदस्मान्न नीयसे ।
श्वभिः क्रोडीकृते देहे नैवं त्वमभिमंस्यसे ॥१३॥

शिर आक्रम्य पादेन भर्त्सयत्यपरान् शुनः ।
दृष्ट्वा साधारणं देहं कस्मात्सक्तोऽसि तत्र भोः ॥१४॥

श्रुतिपरिप्रापितोऽयमर्थोऽनात्मा बुद्ध्यादिदेहान्त इतीदमाह -

बुसव्रीहिपलालांशैर्बीजमेकं त्रिधा यथा ।
बुद्धिमांसपुरीषांशैरन्नं तद्वदवस्थितम् ॥१५॥

(क्लेशापहारिणी)

देहोऽनात्मा आद्यन्तयोस्तथात्वप्रसिद्धेः -

एतमेवार्थमुपबृंहयति समनन्तरश्लोकस्थयुक्तिरपीत्याह -

आद्यन्तयोरिति । आदौ प्राग्देहभावात् अन्नरूपेणानात्मत्वं प्रसिद्धं देहस्य । अन्ते च पश्चात् देहपाते सति भस्मीभावात् मृद्भावापत्तेर्वा तथात्वं प्रसिद्धम् । तत्रैवं सति मध्येऽपि देहभावकालेऽपि स अनात्मैवेति प्रतिपत्तेः कः प्रतिबन्धः ? न कोऽपि समस्तीत्यर्थः ।।

प्रागनात्मैवेति । प्रागनात्मैव सत्, जग्धं भक्षितं त्वविद्यया अध्यासरूपया स्वयाथात्म्यानिर्धारणात्, आत्मतामेति आत्मभावं प्राप्नोतीवेति इवशब्दलोपो द्रष्टव्यः । स्रगालेपनवत् यथा पुष्पाङ्गरागादिकं धारणकाले तत्सतत्त्वाविवेकेनैव स्वात्मत्वेन प्रतिभाति मन्दमतेः, एवं देहोऽपीत्यर्थः । तस्मात् विविक्तधीः सन् तमनात्मधिया पश्येत् इत्यभिप्रायः । अथवा यथा स्रगालेपने धारणकालेऽप्यनात्मतया अवगच्छति व्युत्पन्नमतिः एवं विविक्तधीर्देहमपि पश्येत् इति योजयितव्यम् ।।१२।।

स्रगादिदृष्टान्तेनादौ देहस्यानात्मत्वं निदर्शितम् । इदानीमन्तेऽपि तद्दर्शयित्वा देहानात्मताचिन्तां निगमयत्युत्तरश्लोकद्वयमित्याह - **अथैवमपीति** । 'अशुचिराशेः' इति शुद्धात्मनः सकाशाद्विवेकार्थमिति ध्येयम् ।।

एतदेव विशदयति **मन्यस इति** । अस्मिन् देहे 'अयमहमस्मि' इति तावदेवाभिमन्यसे यावदस्मात् देहात् न लोकान्तरं देहान्तरं वा प्रतिनीयसे । नीते तु त्वयि मांसादिराशिरेवायमवशिष्येत श्वादयश्चेमं क्रोडीकुर्वीरन् । क्रोडीकृते तस्मिन् देहे नैवं यथेदानीं देहे त्वमात्मभावेन तिष्ठसि न तथा अभिमंस्यसे अभिमानं करिष्यसीत्यर्थः । तथा च अभिमानादेव देहस्यात्मत्वं न वस्तुत इत्यभिमानव्यतिरेकप्रदर्शनेन दर्शितं भवतीति ज्ञेयम् ।।१३।।

शरीरेऽहंमतिरविद्यैवेत्येतद् विशदयति - **शिर इति** । एकः श्वा तव मृतेरूर्ध्वम् अस्य देहस्य शिरः पादेन आक्रम्य अपरान् शुनः

तद्भक्षणायागतान् भर्त्सयति । 'ममायम्' इत्यभिमन्यमानः इति शेषः । तथा अपरेऽपि श्वानः तत्रैव 'अस्माकमयम्' इत्यभिमानं कुर्वन्तीति सर्वसाधारणोऽयं देहः, न तवैवासाधारणः । एवं साधारणं दृष्ट्वा निश्चित्यापि तत्र देहे कस्मात् कारणात् सक्तोऽसि भोः । नन्विदं मनसि करणीयम् इत्यभिप्रायेण 'भोः' इति संबोधनम् । इत्थं चासक्तेरविद्यैकहेतुत्वं स्फुटमिति भावः ॥१४॥

देहोऽनात्मा, अनात्मभूतान्नकार्यत्वात् -

'तद्भागः सेन्द्रियो देहः' (२-११) इत्यादिना यद्देहादेरनात्मत्वमुक्तम्, न तदनुमानमात्रम्, आगमावष्टम्भेनापि शक्यसाधनत्वादित्याह **श्रुतीति** ॥

बुसव्रीहीति । यथैकमेव बीजं बुसव्रीहिपलालांशैस्त्रिधा परिणतं भवति तद्वदन्नमेकमेव बुद्धिमांसपुरीषात्मना त्रेधा परिणतमवस्थितं भवति । आह हि श्रुतिः 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' (छां. ६-५-१) इति । तस्मात् साध्वेतद्देहस्यानात्मत्वकथनमित्यभिप्रायः ॥१५॥

(मूलम्)

यथोक्तार्थप्रतिपत्तौ सत्यां न रागद्वेषाभ्यां विक्रियते विपश्चित् - इत्यस्यार्थस्य प्रतिपत्तये दृष्टान्तः -

वर्चस्के संपरित्यक्ते दोषतश्चावधारिते ।
यदि दोषं वदेत्तस्मै किं तत्रोच्चरितुर्भवेत् ॥१६॥

तद्वत् सूक्ष्मे तथा स्थूले देहे त्यक्ते विवेकतः ।
यदि दोषं वदेत्ताभ्यां किं तत्र विदुषो भवेत् ॥१७॥

एतावदेव हि 'अहं ब्रह्मास्मि' इति वाक्यार्थाप्रतिपत्तौ कारणं यदुत बुद्ध्यादौ देहान्ते अहंममेति निःसन्धिबन्धनो ग्रहः । तद्व्यतिरेके हि न कुतश्चिद् विभज्यते, एकल एव प्रत्यगात्मन्यवतिष्ठत इत्याह -

रिपौ बन्धौ स्वदेहे च समैकात्म्यं प्रपश्यतः ।
विवेकिनः कुतः कोपः स्वदेहावयवेष्विव ॥१८॥

(क्लेशापहारिणी)

आत्मानात्मविवेकफलम् -

सर्वानात्मविविक्तात्मवेदनस्य फलमुच्यते सदृष्टान्तमुत्तरश्लोक-द्वयेनेत्याह - **यथोक्तार्थप्रतिपत्ताविति ॥**

वर्चस्के इति । तद्वदिति च ॥ यद्यपि स्थूलशरीरविवेक एव प्रकृतः, तथाप्यनुपदमेव वक्ष्यमाणं सूक्ष्मशरीरविवेकमप्युक्तवत् कृत्वा विवेकफलमुच्यते, कथं नु नाम मुमुक्षवो देहद्वयादप्यात्मनो विवेचने प्रवर्तेरन्निति । उच्चरितुः पुरीषोत्स्रष्टुः तत्र पुरीषे केनचिद् दोषवदने सति किं भवेत् ? न किमपि तस्य छिद्यते । तद्वत् दुष्टवर्चस्कविविक्तदेहज्ञानिनो यथा तद्दोषकथनश्रवणेन न किञ्चिद् भवेत् तथैव स्थूलसूक्ष्मदेहाभ्यामनात्मत्वेन परित्यक्ताभ्यां तावुद्दिश्येत्यर्थः । यदि कश्चिद्दोषं वदेत् तत्र दोषवदने, विदुषः देहद्वयातिरिक्तमात्मानं जानतः किं भवेत् ? न किमपि रागद्वेषादिकं भवेदित्यभिप्रायः ॥ १६ ॥ १७ ॥

देहद्वयविविक्तात्मज्ञाने सति रागादेरात्यन्तिकनिवृत्तिः -

सति देहद्वये आत्माभिमाने रागद्वेषोदयः, त्यक्ते तु तस्मिन्नभिमाने तत्र परदृष्टदोषस्य स्वेनापि दर्शनात् नैव रागद्वेषौ इत्यन्वयव्यतिरेकाभ्यां

रागद्वेषास्पदत्वावगमाद्देहादेरनात्मत्वं निश्चीयत इत्युक्तम् । इदानीं देहद्वयातिरिक्तप्रत्यगात्मन एव स्वात्मत्वेन निश्चये सर्वात्मत्वेन स्वात्मनो दर्शनं भवतीति नैवावशिष्यते रागविषय इत्यतोऽपि देहादावात्ममतिः परित्याज्या विवेकिभिरित्युच्यते । तदाह - **एतावदेव हीति** । अहं ब्रह्मास्मीत्यप्रतिपत्तौ कारणं त्वंपदार्थापरिज्ञानमित्युक्तं पुरस्तात् । तदपरिज्ञाने च कारणं बुद्ध्यादौ देहान्ते अहंममेति निःसन्धिबन्धनो ग्रहः, निरूढनिरन्तराभिमान इत्यधुनोच्यते । तेन न पूर्वापरविरोधः । त्वंपदार्थभूते प्रत्यगात्मनि देहद्वयपरिच्छिन्नत्वबुद्धिरेव तद्याथात्म्यपरिज्ञाने प्रतिबन्धः । अतस्तद्व्यतिरेके आत्मनि सर्वथापि परिच्छिन्नत्वबुद्धिर्निवर्तते । तथा च तत्त्वमसीति सामानाधिकरण्यबोधकवाक्ये न विरोधः प्रतीयत इत्याह - **न कुतश्चिद्विभज्यते एकल एव प्रत्यगात्मन्यवतिष्ठत इति** । **इत्याहेति** - एवमर्थमाहोत्तरश्लोक इत्यर्थः ॥

रिपाविति । विवेकिनः यथोक्तविधया देहद्वयव्यतिरेकेण विविच्य रिपुदेहे बन्धुदेहे स्वदेहे च तमेवैकं निर्विशेषात्मानं पश्यतः । कुतः कोपः ? कोप इत्युपलक्षणम् ; सकारणस्य सर्वस्यैव संसारस्याक्षेपोऽत्र द्रष्टव्यः । तथा च श्रुतिः 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।' (ई. ७) इति । अत्र दृष्टान्तः **स्वदेहावयवेष्विवेति** । यथा लोके सर्वावयवयुक्ते देहे एक एवाहमात्मा इति पश्यन् पुरुषः स्वावयवेषु तारतम्यं विशेषेण रागं द्वेषं वा न करोति । तद्वदित्यर्थः ॥१८॥

(मूलम्)

इतश्चानात्मा देहादिः -

घटादिवच्च दृश्यत्वात्तैरेव करणैर्दृशेः ।
स्वप्ने चानन्वयाज्ज्ञेयो देहोऽनात्मेति सूरिभिः ॥१९॥

देहादिकार्यकरणसंघातव्यतिरेकाव्यतिरेकदर्शिनः प्रत्यक्षत एव विरुद्धं कार्यमुपलभ्यते -

चतुर्भिरुह्यते यत्तत्सर्वशक्त्या शरीरकम् ।
तूलायते तदेवाहंधियाऽऽघ्रातमचेतसाम् ॥२०॥

(क्लेशापहारिणी)

देहोऽनात्मा दृश्यत्वात् -

देहानात्मतानिश्चयार्थमेव प्रासङ्गिकीं फलोक्तिमुपसंहृत्य प्रकृतामेव देहाद्यनात्मताचिन्तामनुवर्तयति - **इतश्चेति** । 'देहादिः' इत्यादिशब्दो बुद्ध्यादिदेहान्तानामनात्मत्वोक्तिप्रसङ्गात् । विवक्षितस्तु स्थूलदेहव्यतिरेक एवेति बोध्यम् । अथवा 'तद्भागः सेन्द्रियो देहः' (२-११) इत्यत्रोपात्तेन्द्रियग्रहणार्थ आदिशब्दः । विवक्षितस्तु स्थूलदेहविवेक एवेति तमेवोपपादयति श्लोके ॥

घटादिवच्चेति ॥ दृशेः दृगात्मनः, देहो नात्मा । तैरेव घटादि-दर्शकैरेव करणैर्दृश्यत्वात् घटादिवत् । स्वप्ने चाऽऽत्मनोऽन्वयेऽपि अनन्वयाच्च, घटादिवदेव । देहस्यानन्वयस्तु स्वप्ने कल्पितदेहान्तर-दर्शनादित्यवगन्तव्यम् । तदेताभ्यां हेतुभ्यां देहो नात्मेति सूरिभिः अन्वयव्यतिरेककुशलैः ज्ञेय इत्यर्थः । यद्यपि स्वदेह एव स्वनिष्ठकरणैः दृश्यते घटादिवत् इति वक्तुं न युज्यते, प्रकृते करणानां स्वाश्रयदेह-व्यतिरेकेण ग्राहकतया अनवस्थानात् । तथापि लोकबुद्धिमनुसृत्य परदेहवत् स्वदेहस्यापि करणग्राह्यत्वं सिद्धवत्कृत्य एवमुक्तम् इति अदोषः ॥१९॥

देहोऽनात्मा मिथ्याभिमानहेतुत्वात् -

स्थूलदेहस्य विवेकाविवेकाभ्यां फलभेदमाह तस्य सुविवेच-नत्वमादर्शयितुम् - **देहादीति** । अत्राप्यादिशब्दस्तुल्यन्यायत्वात्

इन्द्रियादिष्वप्यनात्मत्वातिदेशसूचनार्थः । स्थूलदेहविवेक एव तु प्रत्यक्ष इति ध्येयम् ।।

चतुर्भिरिति । आत्मा शरीरव्यतिरिक्त इति दर्शिनः शरीरं मृतस्य यदिदं शरीरकम् कुत्सितं शरीरम् सर्वशक्त्या चतुर्भिरुह्यते क्लेशेन नीयते इति स्फुटम्, तदेव अहंधिया मिथ्याभिमानेन आघ्रातमचेतसां परवशीकृतचित्तानाम् । देहतादात्म्याभिमानं गतानाम् इति यावत् । तूलायते तूलवल्लघुर्भवतीत्यहो मोहस्य वैभवमित्यभिप्रायः ।।२०।।

(मूलम्)

प्रसिद्धत्वात् प्रकरणार्थोपसंहारायाह -

स्थूलं युक्त्या निरस्यैवं नभसो नीलतामिव ।
देहं सूक्ष्मं निराकुर्यादतो युक्तिभिरात्मनः ।।२१।।

(क्लेशापहारिणी)

स्थूलदेहविवेकोपसंहारः -

इदानीं प्रकृतं स्थूलदेहविवेकमुपसंहृत्य सूक्ष्मदेहविवेकायावतारिकां करोतीत्याह - **प्रसिद्धत्वादिति** । लोकदृष्ट्यापि सिद्धत्वात् बहुवादिसंप्रतिपन्नत्वाच्चेत्यर्थः ।।

स्थूलमिति । नभसो नीलतामिवेति प्रतीतिसिद्धस्याप्यात्मत्वस्याध्यस्ततां प्रकटीकर्तुं दृष्टान्तः ।।२१।।

६. सूक्ष्मदेहविवेकः

(मूलम्)

कथं देहं सूक्ष्मं निराकुर्यादिति ? उच्यते -

अहंममत्वयत्नेच्छा नात्मधर्माः कृशत्ववत् ।
कर्मत्वेनोपलभ्यत्वादपायित्वाच्च वस्त्रवत् ॥२२॥

वैधर्म्ये दृष्टान्तः -

नोष्णिमानं दहत्यग्निः स्वरूपत्वाद्यथा ज्वलन् ।
तथैवाऽऽत्माऽऽत्मनो विद्यादहं नैवाविशेषतः ॥२३॥

(क्लेशापहारिणी)

सूक्ष्मदेहविवेके युक्तिः -

कथमिति । अहंममत्वेत्यादि । अहंममत्वयत्नेच्छा इत्युपलक्षणम् । अहंकारममकारबुद्धिसुखदुःखेच्छाद्वेषयत्नादयो वैशेषिकादीनामात्मधर्मत्वेनाभिमता वस्तुतो नात्मधर्माः, कर्मत्वेनोपलभ्यत्वात् कृशत्ववत्, अपायित्वाच्च वस्त्रादिवत् - इत्यनुभवानुसारियुक्तिद्वयेन अहंत्वादीनामनात्मधर्मत्वं सिध्यति । अत्र च 'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः । एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ॥' (गी. १३-५, ६) इति श्लोकद्वयार्थोऽनुसंधेयः कर्मत्वेनोपलभ्यत्वादित्यत्र । न हि विदिक्रियाकर्मत्वेनोपलभ्यमानानां क्षेत्रज्ञधर्मत्वं संभवति । 'एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः' (गी. १३-१) इति विदिकर्तृत्वस्मरणात् तस्येति । एवम् अपायित्वाद् वस्त्रादिवत् इत्यत्र 'वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति

नरोऽपराणि । तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।।' (गी. २-२५) इति श्लोकोदाहृतन्यायोऽनुसंधेयः । तत्र शरीराणामिवात्राप्यहंममतादीनामपायित्वस्य विवक्षितत्वात् । अहंताममतादीनां विषयत्वेनोपलभ्यत्वात्, आत्मना नियतसाहचर्याभावाच्च नात्मधर्मत्वमिति वाक्यार्थः । इत्थं च धर्माणामहंत्वादीनामनात्मधर्मत्वे सति तद्वतः सूक्ष्मदेहस्यापि अनात्मत्वं सेत्स्यतीति भावः । न चासिद्धत्वं हेत्वोः अनुपदमेव तयोः साधयिष्यमाणत्वात् । अत एव वक्ष्यमाणसमुच्चयात् 'युक्तिभिः' (२-२१) इति बहुवचनमविरुद्धमिति द्रष्टव्यम् ।।२२।।

वैधर्म्य इति । कर्मत्वेनोपलभ्यत्वमागमापायित्वं च यत्र स नात्मधर्म इत्यत्र कृशत्ववत्, वस्त्रवत् इति च साधर्म्यदृष्टान्तावुक्तौ । यत्र ह्युपलभ्यत्वं यथा कृशत्वादौ, आगमापायित्वं च यथा वस्त्रादौ तत्रानात्मत्वं दृष्टमिति । अथ 'यद्धर्मा यः पदार्थो न तस्यैवेयात् स कर्मताम् ।' (उप. सा. १६-१३) इति न्यायेन यत्र स्वात्मधर्मत्वं न तत्र स्वात्मविषयत्वम् इति वैधर्म्ये दृष्टान्त उच्यत इत्यर्थः ।।

नोष्णिमानमिति । यथा उष्णिमानं नाग्निर्दहति ज्वलन्नपि ; स्वरूपत्वात्, स्वात्मधर्मत्वात् । तथैव आत्मा आत्मनः स्वरूपभूतं धर्मभूतं वा अहंकारादिकं धर्मं नैव विद्यात् । अविशेषतः । स्वरूपत्वाविशेषात्, स्वधर्मत्वाविशेषाच्च इत्यर्थः । अत्र 'स्वरूपत्वात्' इति धर्मस्याप्युपलक्षणम् । अतः स्वधर्मत्वादित्यपि द्रष्टव्यम् । इच्छादीनां परैर्धर्मत्वेनैवाङ्गीकारात् । स्वरूपस्येव स्वधर्माणामपि स्वात्मानमविषयीकृत्य कर्मतापादनासंभवात् । न च धर्मिणमविदित्वा धर्मानेव हिरुग् वेदितुमलं कश्चित् । प्रकृते चाऽऽत्मा वेत्त्यहमादिकम् इत्युभयसंप्रतिपन्नम् । तस्मादेव नात्मनः स्वरूपं धर्मो वाऽहमादिरिति फलतीत्यभिप्रायः ।।२३।।

(मूलम्)

एकस्याऽऽत्मनः कर्मकर्तृभावः सर्वथा नोपपद्यत इति श्रुत्वा मीमांसकः प्रत्यवतिष्ठते अहंप्रत्ययग्राह्यत्वाद् ग्राहक आत्मेति । तन्निवृत्त्यर्थमाह -

यत्कर्मको हि यो भावो नासौ तत्कर्तृको यतः ।
घटप्रत्ययवत्तस्मान्नाहं स्याद्द्रष्टृकर्मकः ॥२४॥

अत्राऽऽह । प्रत्यक्षेणाऽऽत्मनः कर्मकर्तृत्वाभ्युपगमे तत्पादोपजीविना अनुमानेन प्रत्यक्षोत्सारणमयुक्तमिति[1] । तन्निराकरणाय प्रत्यक्षोपन्यासः -

यत्र यो दृश्यते द्रष्ट्रा तस्यैवासौ गुणो न तु ।
द्रष्टृस्थं दृश्यतां यस्मान्नैवेयाद् द्रष्टृबोधवत् ॥२५॥

प्रत्यक्षेणैव भवदभिमतस्य प्रत्यक्षस्य आभासीकृतत्वात् सुस्थमेवानुमानम् । अतस्तदेव प्रक्रियते । तत्र च विकल्प्य दूषणाभिधानम् -

नाऽऽत्मना न तदंशेन गुणः स्वस्थोऽवगम्यते ।
अभिन्नत्वात्समत्वाच्च निरंशत्वादकर्मतः ॥२६॥

न युगपन्नापि क्रमेणोभयथा चैकस्य धर्मिणो ग्राह्यग्राहकत्वमुपपद्यत इति प्रतिपादयन्नाह -

---

1. अस्यानन्तरं 'चोद्यम्' इत्यधिकं मुद्रितपुस्तके । तत्र चोद्यमाह - इति संबन्धः करणीयः ।।

द्रष्टृत्वेनोपयुक्तत्वात्तदैव स्यान्न दृश्यता।
कालान्तरे चेद् दृश्यत्वं न ह्यद्रष्टृकमिष्यते ॥२७॥

(क्लेशापहारिणी)

आत्मनोऽहंप्रत्ययविषयत्वं तर्कपराहतम् -

एकस्येति । एकस्यैवाऽऽत्मनः कर्मकर्तृभावो नोपपद्यत इत्युक्तं श्रुत्वा मीमांसको भाट्टः प्रत्यवतिष्ठते । अहंप्रत्ययग्राह्यत्वात्, अहंप्रत्ययविषयत्वादेव हेतोर्ग्राहक आत्मेति । अयं भावः । इदमेव हि ग्राहकत्वस्यासाधारणं लक्षणं यदुताहंप्रत्ययग्राह्यत्वं नाम । अहं-प्रत्ययग्राह्यत्वरूपेण हि इदंप्रत्ययग्राह्येभ्यो विषयेभ्यः प्रविविच्यतेऽसौ । अत एव चास्य कर्तृत्वभोक्तृत्वेऽपि 'इदं करिष्येऽहम्' 'इदं भोक्ष्येऽहम्' इति अहंप्रत्ययग्राह्य एव सन् कर्माणि कुरुते तत्तद्विषयांश्च भुङ्क्ते इति । **'तन्निवृत्त्यर्थमाह'** ; 'तत्प्रतिकूलतर्कम्' इति शेषः ।।

यत्कर्मक इति । यो भावो यत्कर्मको भवति, नासौ तत्कर्तृको भवति - इति दृष्टं लोके । घटप्रत्ययवदिति दृष्टान्तः । यथा घटप्रत्ययो घटकर्मकः सन् घटकर्तृको न भवति, एवमहं-प्रत्ययोऽपि यद्यात्मकर्मकः स्यात्, तर्हि नासावात्मकर्तृकः स्यात् । तच्चानिष्टं तव । आत्मकर्तृकत्वस्याप्यभ्युपगमात् । तस्मात्तर्कानु-गृहीतत्वात्सम्यगेवोक्तम् यत् आत्मा आत्मनोऽहंरूपं धर्मं न विद्यादिति - इत्यभिप्रायः ।।२४।।

आत्मनोऽहंप्रत्ययविषयत्वनिराकरणं न प्रत्यक्षविरुद्धम् -

अत्राऽऽहेति । मीमांसक इति शेषः । अहंप्रत्ययविषयत्वमात्म-ग्राहकत्वं चेत्यात्मनः कर्मकर्तृत्वम् 'मामहं जानामि' इत्यनुभव-बलादभ्युपगतं मया । अतस्तत्पादोपजीविना प्रत्यक्षमुपजीव्यैव व्याप्रियमाणेन अनुमानेन साधर्म्यवैधर्म्यदृष्टान्तावष्टम्भादेव प्रत्यक्षो-

त्सारणमयुक्तम् इत्याह - इति योजना । तन्निराकरणायाह । तदुपन्यस्त-प्रत्यक्षस्याऽऽभासीकरणार्थं बलवत्तरप्रत्यक्षोपन्यासं करोति - इत्यभिप्रायः ।।

यत्रेति ।। योऽहंप्रत्ययादिः यत्रान्तःकरणादौ येन द्रष्ट्रा दृश्यते असौ दृश्यमानः तस्यैवान्तःकरणादेर्गुणः, न तु तस्यैव द्रष्टुर्गुणः इति 'तस्यैव' इत्यस्याऽऽवृत्त्या योजना कर्तव्या । 'गुणो मतः' इति पाठो यद्यस्ति तर्हि न कोऽपि क्लेशः । तदेतत् कस्मात् ? यस्मात् द्रष्टृस्थं किमपि दृश्यतां नैव इयात् प्राप्नुयात् । द्रष्टृबोधवत् । इदमुक्तं भवति । अहंप्रत्ययोऽन्तःकरणस्थ एव दृश्यते । अतोऽन्तःकरणधर्म एव सः, कामादिवत् - इति युक्तमध्यवसातुम् । अन्यथा हि द्रष्टृधर्मत्वे तस्य दृश्यतैव न स्यात् । न ह्यदृश्यस्य द्रष्टुर्धर्ममात्रं दृश्यतामियादिति श्लिष्यते । तथात्वे द्रष्टृधर्मस्य बोधस्यापि तथैव दृश्यत्वप्रसङ्गः । न च तदप्यङ्गीक्रियत एवेति वाच्यम् । द्रष्टुर्बोधस्य बोद्धव्यत्वरूप-विषयत्वे सति स्वविषयकत्वापातात्, बोधान्तरसत्त्वे च प्रमाणाभावात् ; तदभ्युपगमे च तस्य तस्यान्यबोधबोद्धव्यत्वाभ्युपगमप्रसङ्गेनानवस्थापाताच्च । तस्मादहंप्रत्ययस्य स्वात्मधर्मत्वे अदृश्यत्वप्रसङ्ग इति सूक्तम् । दृश्यते त्वन्तःकरणे द्रष्ट्रा स प्रत्ययः । तस्मात्तस्यैवान्तःकरणस्य धर्मः सः । यत्तु 'मामहं जानामि' इति प्रत्यक्षम्, तदन्तःकरणोपाधि-विशिष्टस्यात्मन इति न केवलस्याहंप्रत्ययग्राह्यत्वमावहतीति ज्ञेयमिति ।।२५।।

आत्मनोऽहंधर्मकत्वाङ्गीकारे दोषः -

प्रत्यक्षेणैवेति । द्रष्टृप्रत्यक्षेणान्तःकरण एवाहंप्रत्ययो दृश्यत इति प्रत्यक्षमेवावलम्ब्येत्यर्थः । भवदभिमतस्य, अहंप्रत्ययगम्य एवाऽऽत्मा ग्राहक इत्यत्र प्रमाणत्वेनोदाहृतप्रत्यक्षस्य आभासी-कृतत्वात् आत्मनि यदहंप्रत्ययग्राह्यत्वम् तदाभासमात्रम्, सान्तः-

करणस्यैव तथा प्रतीतेः, अन्तःकरणापरिच्छिन्नस्य तु तथा अप्रतीतेः इति दर्शितत्वादित्यर्थः । अनुमानं कृशत्ववस्त्रादिदृष्टान्तेनोपन्यस्तं सुस्थमेव न प्रत्यक्षविरुद्धम् इत्यर्थः । अतः एवमनुमानस्य निराबाधात् तदेव प्रक्रियते, अहंकारस्यानात्मधर्मत्वं यत्प्रतिज्ञातं साधितं च तदेव विशदीक्रियत इत्यर्थः । तत्र च प्रक्रियायाम् आत्मनोऽहंधर्मत्वाङ्गीकारपक्षे विकल्प्य दूषणं तावदभिधीयते । 'उत्तरश्लोके' इति शेषः ।।

नात्मनेति । स्वस्थो गुणः आत्मधर्मत्वेनाभिमतोऽहंप्रत्ययः । स किं कृत्स्नेनात्मना अवगम्यत इति मतम् किं वा तदंशेनेति ? उभयथापि न संभवति । पूर्वस्मिन् कल्पे तावत् आत्मस्थस्याहंप्रत्ययस्य स्वात्मग्रहणमन्तरेण आत्मस्थत्वेन ग्रहणायोगात् आत्मनश्च स्वेनाभिन्नत्वादेव स्वेनैव ग्रहणानुपपत्तेः । यदि ह्यात्मा आत्मानमेव गृह्णीयात् तदा येन ग्राह्य आत्मा यश्चासौ ग्राहकः, तौ द्वौ प्रसज्येयाताम् । एक एव वा ग्राह्यग्राहकत्वेन द्विधा छिन्नो भवेदित्युत्तरकल्पाभ्युपगमप्रसङ्गः । ननु भवत्वसावेव कल्पः का हानिरित्यत आह - **समत्वाच्चेति** । यथा हि द्वयोः प्रदीपयोः प्रकाशरूपत्वेन समयोः न प्रकाश्यप्रकाशकत्वमवकल्पते, एवमात्मतदंशयोरुभयोरपि चेतनत्वेन समत्वात् न ग्राह्यग्राहकत्वमवकल्पेत । अपि चायं कल्प एव दुरूहस्तावत् । आत्मनो निरंशत्वात् । तदेवमुभयथाप्यात्मनोऽकर्मतः, विषयत्वासंभवात् न स्वग्राहकत्वमिति सुष्ठूक्तं तत्स्थाहंप्रत्ययरूपो गुणो न कथमप्यवगम्यत इति ।।२६।।

आत्मनो ग्राह्यग्राहकभावानुपपत्तिः -

तदेवम् आत्मस्थोऽहंप्रत्यय आत्मस्थत्वेन नात्मनैव ग्रहीतुं शक्यते । आत्मग्रहणापेक्षत्वादात्मस्थग्रहणस्य, आत्मनश्च ग्राहकस्यैव

सतो ग्राह्यत्वायोगादित्युक्तम् । अथेदानीं स एव ग्राह्यग्राहकत्वायोगो विशदीक्रियत इत्याह - **न युगपदित्यादिना** ।।

द्रष्टृत्वेनेति ।। न तावदात्मनो युगपदेव ग्राह्यग्राहकत्वमुपपद्यते । कुतः ? आत्मनः द्रष्टृत्वेनैवोपयुक्तत्वात् तदैव द्रष्टृत्वावस्थायामेव न तस्य दृश्यता संभवति । यावद्धि स द्रष्टा तावद् दृश्यानां दर्शन एवावहितो भवतीति न कदापि स्वात्मदर्शनस्यावसरोऽस्ति । न च द्वितीयोऽस्ति कश्चिद् द्रष्टा, नापि द्रष्टृदृश्यत्वेन द्विधाभावोऽस्तीत्युक्तम् । अस्तु तर्हीदानीं द्रष्टा आत्मा, कालान्तरे तु स एव दृश्यो भविष्यतीति क्रमेण ग्राह्यग्राहकत्वम् । तत्राऽऽह **कालान्तरे चेदिति** । न ह्यद्रष्टृकं दृश्यत्वमिष्यते । न च तदा स्वयं द्रष्टा दृश्यत्वेनैवोपयुक्तत्वात् । न च द्वितीयोऽन्योऽस्ति कश्चिद्द्रष्टा । तदेवं सर्वथापि दुरूहमिदमेकस्यैवात्मनो ग्राह्यग्राहकत्वम् इत्यभिप्रायः ।।२७।।

(मूलम्)

सन्तु कामम् अनात्मधर्मा ममत्वादयः । यथोक्तन्यायबलात्, अनात्मतयैव च तेषु व्यवहारात् । अहंरूपस्य तु प्रत्यगात्मसंबन्धितयैव प्रसिद्धेः, 'अहं ब्रह्मास्मि' (बृ. १-४-१०) इति श्रुतेश्च अनात्मधर्मत्वमयुक्तमिति चेत्, तन्न -

अहंधर्मस्त्वभिन्नश्चेदहंब्रह्मेति वाक्यतः ।
गौरोऽहमित्यनैकान्तो वाक्यं तद्व्यपनेतृ तत् ।।२८।।

कथं 'वाक्यं तद्व्यपनेतृ तत्' इति ? उच्यते -

योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ।
ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्त्यते ।।२९।।

(क्लेशापहारिणी)

अहमोऽनात्मत्वाभ्युपगमो न व्यवहारविरुद्धः -

उक्तार्थे व्यवहारविरोधशङ्काम् परिहरत्यागामिश्लोक इत्याह - **सन्त्वित्यादि** । अयमत्र पूर्वपक्षिणोऽभिप्रायः । यदुक्तम् 'अहं-ममत्वयत्नेच्छादयो नाऽऽत्मधर्माः, कर्मत्वेनोपलभ्यत्वात्, कृशत्वादि-वत् । आगमापायित्वाच्च, वस्त्रादिवत्' (२-२२) इति । तत्र ममत्वाद्यंशे अनुमानं समीचीनमेव । तेष्वनात्मतयैव व्यवहारदर्शनात् । न हि कश्चित्तेष्वात्मबुद्धिं करोति, आत्मशब्दं प्रयुङ्क्ते वा । अतः सन्तु कामं ममत्वादयोऽनात्मधर्मा इति । अहंरूपस्य त्वनात्मधर्मत्वमिति न मृष्यामहे । कस्मात् ? तस्य प्रत्यगात्मतयैव प्रसिद्धेः । न ह्यहंरूपम् आत्मसमवेतत्वं परित्यज्यान्यत्र स्वातन्त्र्येण क्वचित् प्रतीयते । न केवलमेवं लौकिकव्यवहारप्रसिद्धेः, किं तु वैदिकव्यवहारप्रसिद्धेरपि अहंरूपस्य प्रत्यगात्मता नियमेन स्वीकार्या । अहं ब्रह्मास्मीति श्रुतेः । 'य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति' (बृ. १-४-१०) इति विद्या-दशायामप्यात्मधर्मत्वेनैव श्रुत्या व्यवहारदर्शनात् । 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति' (बृ. १-४-१०) इति च ब्रह्मणोऽप्यहंत्वेनैव व्यपदेशाच्च । न हि श्रुतिरपि मिथ्याव्यवहार-मनुजानीयात् । अतोऽहमोऽनात्मधर्मत्वमित्ययुक्तमिति युक्तमुत्पश्याम इति । तदेतन्निराकरणार्थत्वेन श्लोकमवतारयति - **तन्नेति** ।।

अहंधर्मस्त्विति । अयमर्थः । किं सामानाधिकरण्येन व्यपदेशादेव केवलमहम् आत्मधर्मत्वमिष्यते, किं वा 'अहं ब्रह्म' इति वाक्यस्यान्यथानुपपत्त्या ? तत्र न पूर्वः कल्पः क्षोदक्षमः । 'गौरोऽहम्' इति व्यपदेशाद् गौरत्वस्याप्यात्मधर्मत्वप्रसङ्गात् । अतोऽनैकान्तिको हेतुः । सत्यपि व्यपदेशे तदभिन्नत्वस्याभावात् । ननु गौरोऽहमिति व्यपदेशः आध्यासिको देहाद्विविच्यात्मानमजानानस्य, अतो न

व्यपदेशमात्रं तत्र हेतुः किं त्वहं ब्रह्मास्मीति वैदिकव्यपदेश इत्युक्तम् । उपलक्षणमिदम्, 'अहमात्मा गुडाकेश' (गी. १०-२०) इत्यादि-**गीताचार्यव्यपदेशोऽप्यत्रो**दाहार्यः । न ह्याप्ततमस्य सर्वज्ञस्य भगवत आध्यासिको व्यपदेश इति वक्तुं शक्यत इति । एवं ब्रह्मात्मैकत्वविदुषामपि व्यवहार उदाहरणमर्हति । तेऽपि खल्वात्मान-महंरूपतयैव व्यवहरन्ति - इति चेत् । अत्रोच्यते - **वाक्यं तद्व्यपनेतृ तत्** । तद्वाक्यम् 'अहं ब्रह्मास्मि' इत्येवंरूपं तद्व्यपनेतृ अहंधर्मता-बाधकं न तु तत्साधकम् । तत्र वक्ष्यमाणयुक्तिसद्भावात् । भगवतो विदुषां च व्यवहारस्य संव्यवहारमात्रालम्बनार्थत्वान्ना-पवादत्वम् । यथा हि विवेकिनोऽपि कदाचिद् 'कृष्णोऽद्य आकाश' इति व्यवहरन्ति संव्यवहारालम्बनेन । न तु तावता कृष्ण एवाऽऽकाशो भवति परमार्थतः । तद्वत् । अतो न व्यवहारादप्यहम आत्मधर्मत्व-मिति ।।२८।।

वाक्यस्याहंव्यपनेतृत्वोपपत्ति :-

अहं ब्रह्मेति वाक्यमहंधर्मताबाधकमित्युक्तमतीतश्लोके । तदेव कुत इत्याशङ्कोत्तरत्वेन श्लोकमवतारयति - **कथमित्यादिना उच्यत इत्यन्तेन** ।।

योऽयमिति । यथा कश्चिन्मन्दान्धकारे अतिदूरदेशे वा तिष्ठन्तं निश्चलं पुरुषं स्थाणुत्वेन गृहीत्वा तदनु प्रकाशसहायः सन् समीपं गत्वा वा निपुणतरमवेक्ष्य प्रत्येति व्यपदिशति च 'योऽयं स्थाणुः पुमानेषः' इति, तत्र पुंधिया उत्तरभाविन्या प्राक्तनी स्थाणुधीर्निवर्त्यते ; एवम् अहं ब्रह्मास्मीति श्रुतिवाक्योत्थधिया, पूर्वं लब्धप्रसरा 'अहं मनुष्यः, चक्षुष्मान्, बुद्धिमान्' - इत्यादिरूपा अशेषा अहंबुद्धिरपि निवर्त्यते इति न चित्रम् । तस्मादहं ब्रह्मास्मीति श्रुतिव्यपदेशो नाहम आत्म-धर्मत्वमाधातुमलम् इत्यभिप्रायः ।।

यत्तूच्यते 'तदात्मानमेवावेत्' (१-४-१०) इति श्रुतिर्ब्रह्मात्मनोऽप्यहंरूपतामाचष्ट इति । तदसत् । वस्तुतो ब्रह्मरूपाणामेव सतां जीवानाम् अहमभिमानव्यपनेतृत्वेनैव तस्यापि वाक्यस्योपक्षयात् । कथम् ? 'ब्रह्म वा इदमग्र आसीत्' इति । यदिदमस्मिन् शरीरे द्रष्टृत्वादिरूपेण गृह्यते तदग्रे प्राक्प्रतिबोधादपि, ब्रह्मैवासीत् सर्वं च । अप्रतिबोधात्तु 'अब्रह्मास्म्यसर्वं च' इत्यात्मानं मिथ्याध्यासवशादमन्यत इत्यर्थः । तदात्मानमेवावेदहं ब्रह्मास्मीति तत् पुनः शास्त्राचार्योपदेशादात्मानमेव स्वाभाविकमहंप्रत्ययसाक्षिणं ब्रह्मात्मानमवेत् अहं ब्रह्मास्मीति । योऽयं स्थाणुः पुमानेष इतिवत् अहंबुद्धिव्यपनयेन ब्रह्मात्मानमेवावेत् । तस्मात्तत्सर्वमभवत् । तस्मादेवाऽसर्वत्वापादकाहंप्रत्ययबाधकब्रह्मप्रत्ययादेव तत्स्वाभाविकं सर्वत्वमाप्नोदिव इत्यर्थः । तदेवम् प्रतिबुद्धजीवजातस्याहंप्रत्ययगम्यत्वव्यपनयनेन स्वाभाविकब्रह्मात्मताप्रकाशकत्त्वान्नोदाहृतवाक्यस्य ब्रह्मण्यहंरूपताबोधकत्वमस्तीति निरवद्यम् ।।

बाधसामानाधिकरण्योक्तिर्नायुक्ता -

केचित्तु व्याख्यातारो बाधायां सामानाधिकरण्यमत्राश्रितमसहमाना आहुः । इदमापाततः । वस्तुतस्त्वहमर्थजीवबाधे मोक्षासिद्ध्या बाधसामानाधिकरण्योपगमानुपपत्तेः । भेदभ्रमनिवर्तकमहावाक्यस्यात्रैक्यपरत्वेनाखण्डचैतन्याभिव्यञ्जकनिर्विकल्पकज्ञानद्वारा सकार्याज्ञानव्यपनेतृत्वमेवेति । तदिदमविचारितसुन्दरं वचनम् । कथम् ? न हि मोक्षेऽहमर्थस्य जीवस्य बाधमनुमोदतेऽत्राऽऽचार्यः किं तर्हि तस्याहंप्रत्ययगम्यत्वरूपजीवत्वस्यैव । न च मोक्षे जीवत्वस्यानुवृत्तिरिष्यते कैश्चिदप्यद्वैतवादिभिरिति । न चेदं बाधायां सामानाधिकरण्यं संप्रदायाध्वना अनागतमिति युक्तमास्थातुम् । ''यदविद्याप्रत्युपस्थापितम् अपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादिदोषकलुषितम् अनेकानर्थयोगि, तद्विलयनेन तद्विपरीतम् अपहतपाप्मत्वादिगुणकं पारमेश्वरं

स्वरूपं विद्यया प्रतिपाद्यते । सर्पादिविलयनेनेव रज्ज्वादि'' (सू. भा. १-३-१९) इति, 'देहेन्द्रियसंघाते आत्मबुद्धिरात्मन्येवात्म बुद्ध्या पश्चाद्भाविन्या तत्त्वमसीत्यनया यथार्थबुद्ध्या निवर्त्यते' (सू. भा. ३-३-९) इति **भगवत्पादैः** शारीरकभाष्ये स्पष्टमनुमोदितत्वादित्यलमस्थाने संभ्रमेण ।।२९।।

(मूलम्)

अहंपरिच्छेदव्यावृत्तौ न किञ्चिदव्यावृत्तं द्वैतजातमवशिष्यते द्वितीयसम्बन्धस्य तन्मूलत्वात् । अत आह -

निवृत्तायामहंबुद्धौ ममधीः प्रविलीयते ।
अहंबीजा हि सा सिध्येत्तमोऽभावे कुतः फणी ।।३०।।

विवक्षितदृष्टान्तांशज्ञापनाय दृष्टान्तव्याख्या -

तमोऽभिभूतचित्तो हि रज्ज्वां पश्यति रोषणम् ।
भ्रान्त्या भ्रान्त्या विना तस्मान्नोरगं स्त्रजि वीक्षते ।।३१।।

(क्लेशापहारिणी)

अहंबुद्धिव्यावृत्त्यर्थमेव विशेषयत्नकरणे हेतुः -

नन्वत्राहंबुद्धेरेव व्यपनये किमिति महान् यत्नः क्रियते, न तु ममत्वयत्नेच्छादीनामपि ? समो हि तेषामप्यात्मधर्मत्वेनाध्यासः - इत्याशङ्क्य परिहारार्थत्वेन श्लोकमवतारयति - **अहंपरिच्छेदव्यावृत्तावित्यादिना** । न ममत्वादीनां निवृत्तौ पृथग्यत्न आदरणीयः । तत्कारणीभूताहंकारनिरासेनैव तेषामपि सुनिरस्यत्वात् । कथमेतत् ? तत्राऽऽह - **द्वितीयसंबन्धस्य तन्मूलत्वादिति** । अहमध्यासो हि सर्वेतराध्यासमूलम् । ततश्च तद्बाधे सर्वस्यापि तत्कार्यभूतस्य नान्तरीयकतया बाधो भवेत् । अतो वृथायासः स्यात्तदितरममत्वादि-

व्यावृत्तौ प्रयत्नविशेष इत्यभिप्रायः ।।

निवृत्तायामिति । तमोऽभावे दीपादिसाहाय्येन मन्दान्धकारे विनाशिते, निपुणतरवीक्षणेन वा अज्ञानाभावे । यथा अज्ञानमूलैव रज्जुसर्पभ्रान्तिः, ततश्चाज्ञाननिवृत्तौ सर्पनिवृत्तिर्नान्तरीयकी, एवमहं बुद्धिमूलैव ममत्वादिबुद्धिः, तन्निवृत्तौ च स्वत एव प्रविलीयत इत्यर्थः ।। **विवक्षितेत्यादिसंबन्धग्रन्थः** श्लोकश्च स्पष्टार्थः ।।३१।।

(मूलम्)

अनन्वयाच्च नाऽऽत्मधर्मोऽहङ्कारः -

आत्मनश्चेदहं धर्मो यायान्मुक्तिसुषुप्तयोः ।
यतो नान्वेति तेनायमन्यदीयो भवेदहम् ।।३२।।

(क्लेशापहारिणी)

आत्मा न नियमेनाहंधर्माविनाभूतः -

ननु च न जातुचिदात्मा अहंरूपतां व्यभिचरति । तत्कथं गौरोऽहमिति व्यवहारसाम्यमहं ब्रह्मेति श्रौतव्यवहारस्य ? कथं वा अहंबुद्धिव्यपनयार्थमेव 'अहं ब्रह्मास्मि' इति श्रुतिवाक्यमित्याश्रीयते ? - इत्याशङ्काव्यपनोदनार्थतया श्लोकमवतारयति - **अनन्वयाच्चेदित्यादिना** ।।

आत्मनश्चेदिति ।। ननु चात्मधर्मत्वमेव युक्तम् अहमः, सर्वत्रानुगमात् इत्याशङ्क्येदमुत्तरम् । सत्यम् यो यस्य स्वाभाविको धर्मः, स तमनुगच्छत्येव सर्वास्वप्यवस्थास्विति । यथोष्णिमा वह्निधर्मः सन् सर्वदा तमनुगच्छति । न हि वह्निरात्मनः स्वभावभूतमुष्णिमानं व्यभिचरति जातुचिदिति । आत्मा पुनर्न सर्वदा अहंरूपः । ताद्रूप्यं विहायापि सत्त्वात् । यथा सुषुप्तिमुक्त्योः । सुषुप्तौ तावदहं नान्वेत्यात्मानमिति सार्वजनीनमेतत् । श्रुतिश्चैतमर्थमनुवदति 'नाह खल्वयं एवं

संप्रत्यात्मानं जानात्ययमहमस्मीति' (छां. ८-११-२) इति । **ये** पुनः **केचित्** 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति सुप्तोत्थित-परामर्शबलादवयन्ति सुषुप्तावप्यहंरूपमनुवर्तत एवेति, तेषां पिण्ड-मुत्सृज्य कूर्परं लेढीति न्याय आपतति । यतस्ते प्रत्यक्षं सौषुप्तानुभवं प्रत्याख्याय स्मृत्याभासबलेनानुभवविरुद्धमप्यनुमित्सन्ते । न हि कश्चिज्ज्ञाता जातुचिदयमहमस्मीति स्वात्मानं वेदितुं प्रभवति सुषुप्ते । न च ज्ञातृ रूपमनुवर्तते अथ च तन्न वेत्तीति युक्तियुक्तं स्याद्वचः । श्रुतिश्च सद्ब्रह्मणा एकीभाव एव निमित्तं तत्र वेदनाभावे इति सुस्पष्टमाह 'सति संपद्य न विदुः' (छां. ६-९-२) इति । तस्मात्सार्वजनीनानुभवानु-सारिणां नास्त्येवाहमनुवृत्तिः सुषुप्ते । तदेवं सुषुप्तेऽनन्वयान्नात्म-धर्मोऽहंरूपमिति सिद्धम् । मुक्तौ तु 'एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एव । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' (बृ. २-४-१२) इत्यादिश्रुतेरहमनुभवानन्वयोऽवगम्यते । तदेवं मुक्तिसुषुप्तयोरननुगमात् नाहंरूपमात्मनो धर्मः, अन्यदीयोऽन्तः-करणस्यैव त्वयं अहङ्कारः धर्मो भवेत् इति स्थितम् ।।३२।।

(मूलम्)

आत्मधर्मत्वाभ्युपगमे अपरिहार्यदोषप्रसक्तिश्च -

यद्यात्मधर्मोऽहङ्कारो नित्यत्वं तस्य बोधवत् ।
नित्यत्वे मोक्षशास्त्राणां वैयर्थ्यं प्राप्नुयाद् ध्रुवम् ।।३३।।

स्यात्परिहारः स्वाभाविकधर्मत्वाभ्युपगमेऽपि, आम्रादिफल - वदिति चेत्तन्न -

आम्रादेः परिणामित्वाद्गुणहानिर्गुणान्तरैः ।
अविकारि तु तद्ब्रह्म न हि द्रष्टुरिति श्रुतेः ।।३४।।

अहङ्कारस्य चागमापायित्वात्, तद्धर्मिणश्चानित्यत्वं प्राप्नोति -

आगमापायिनिष्ठत्वादनित्यत्वमियाद् दृशिः ।
उपयन्नपयन् धर्मो विकरोति हि धर्मिणम् ॥३५॥

अस्त्वनित्यत्वं कमुपालभेमहि ? प्रमाणोपपन्नत्वादिति चेत् । तन्न -

सदाविलुप्तसाक्षित्वं स्वतःसिद्धं न पार्यते ।
अपह्नोतुं घटस्येव कुशाग्रीयधियाऽऽत्मनः ॥३६॥

(क्लेशापहारिणी)

आत्मनोऽहमर्थतां ब्रुवतां पक्षे दोषः -

विपक्षे बाधकमाह - **आत्मधर्मत्वाभ्युपगम इति** ॥

यद्यात्मधर्म इति । नित्यत्वमप्यस्तु का नो हानिरित्यत आह - **नित्यत्व** इति । अहङ्कारो हि नियमेन रागद्वेषादिभिः संसारधर्मैः संदूषितः । यदि तु ते मोक्षेऽप्यनुवर्तेरन्, कृतं मोक्षोपदेशशास्त्रैरित्यर्थः ॥

अत्र **केचिदधुनातनवेदान्तिनः** संप्रदायान्तरमवष्टभ्य प्राहुः - यदेतदुच्यते यद्यात्मा अहंरूपः स्यात् तर्हि मुक्तावपि तद्रूपमनुयायात् । तथात्वे च मोक्षशास्त्राणां वैयर्थ्यमाप्नोतीति । तत्र विपरीतमेव वस्तुवृत्तम् । यत्कारणं यस्यैव नाहमर्थ आत्मा तस्यैव तु मोक्षशास्त्राणां वैयर्थ्यं प्रादुःष्यात् । कथम् ? य एव परमार्थतो भ्रान्त्या वा आध्यात्मिकादिदुःखैर्दुःखिनं स्वात्मानमनुसंधत्ते 'अहं दुःखी'ति, स एव हि सर्वमेतद्दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयमित्युत्पन्नमोक्षरागस्तत्साधने प्रवर्तते । यदि तु साधनानुष्ठानेनाहमेव न भविष्यामीत्यवगच्छेत्, अपसर्पेदेवासौ मोक्षकथाप्रस्तावात् ।

ततश्चाधिकारिविरहादेव ध्रुवं सर्वं मोक्षशास्त्रं व्यर्थं स्यादिति । अत्र वयं पृच्छामः । केयं बिभीषिकेति ? किमहंशब्दवाच्यत्वमेवात्मनः स्वरूपमित्येतदभिप्रेत्येदमुच्यते, आहोस्वित् स्वात्मनो व्यतिरिक्तोऽहंधर्मोऽपि विद्यते तस्मिन्निति । तत्र न तावद् द्वितीयः कल्पः । सुषुप्तावहं नानुवर्तते, अथ च नात्मविनाशस्तत्रेति श्रुतियुक्त्यनुभवावष्टम्भेन साधितत्वात् । सुषुप्ताविवाहंरूपविगमेऽपि मुक्तावहंशब्दोपलक्षितात्मस्वरूपानुवृत्तेरप्रतिबन्धात् । ननु तथापि किं तेन ? मयि विनष्टेऽपि मत्तोऽन्यत्किमपि चैतन्यमवस्थास्यत इति मत्वा न हि कश्चिद्बुद्धिपूर्वकारी प्रवर्तते । अत एवमपि तदवस्थमेव मोक्षशास्त्रवैयर्थ्यमिति नायं पन्थाः । तस्मादहमर्थस्यैव ज्ञातृतया सिध्यतः प्रत्यगात्मत्वं भवता अकामेनाप्यभ्युपगन्तव्यमिति चेत् । तदेतदनाकलिताऽस्मदभिप्रायस्य वृथायासफलकं प्रत्यवस्थानम् । यतो न वयं मत्तोऽन्यत्किञ्चित्तत्त्वं मोक्षेऽवतिष्ठत इति ब्रूमः । किं तर्हि, अहंशब्दलक्ष्यार्थ आत्मैवावतिष्ठते, न त्वहंधर्मोऽपीति । एतेन, अहंशब्दवाच्यत्वमेवात्मनः स्वरूपमिति प्रथमकल्पोऽपि प्रत्युक्तः । अहंशब्दवाच्यत्वाभावेऽपि सुषुप्ताविवात्मस्वरूपस्य मुक्तावपि तल्लक्ष्यत्वादेवाहंशब्दगम्यत्वसंव्यवहारोपपत्तेः । यस्तु तत्राहंप्रत्ययविनाशादेवात्मनोऽपि नाशं शङ्कते, तस्य सुषुप्तावात्मनाशभिया सुषुप्तादपसरणमपि प्रसज्यत इत्युपहास्य एवायं श्रुतिसंविदनुसारिणां स्यादित्यलं शब्दप्रत्ययार्थानां विवेचनेऽसमर्थैर्विवादेनेत्युपरम्यते ।।३३।।

स्वाभाविकधर्मस्याप्याम्रफलस्थाम्लादेरिव निवृत्त्युपपत्तेः कुचोद्यमेतदिति शङ्कान्तरमुत्थाप्य समाधत्ते समनन्तरोत्तरः श्लोकः । तत्र शङ्कामनुवदति - **स्यात्परिहार इति** । परिहारार्थं श्लोकमवतारयति - **तत्रेति** ।।

आम्रादेरिति । सावयवस्याम्रादेः परिणामित्वान्माधुर्यादि-

गुणान्तरैरुद्भूतैराम्लादेः पूर्वगुणस्य हानिर्भवति । तत् अहङ्काराश्रयत्वेन भवदभिमतं ब्रह्म तु अविकारि, अपरिणामि । कूटस्थनित्यमिति यावत् । अतस्तस्मिन् धर्मान्तरोत्पत्तिस्तेनाहंधर्मस्याभिभूतिर्वा न शक्यशङ्केत्यभिप्रायः । ब्रह्मणोऽविकारित्वमेव कुतोऽवसितम् ? तत्राह - **न हि द्रष्टुरिति** । 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. ४-२-२३) इतीयं हि श्रुतिरात्मनः कूटस्थनित्यचैतन्यस्वभावतामाह । तथा चाहङ्कारस्य तद्धर्मत्वे न कदाचिदपि तस्य परिहारो भवेत्, चैतन्यवदेवेति भावः ॥३४॥

अथाऽऽत्मा कूटस्थचैतन्यस्वाभाव्येनैवावतिष्ठताम् । अहमस्तु तद्धर्मस्य परिहारोऽपि निमित्तान्तरेण भविष्यतीत्याशङ्क्य तत्परिहारत्वेन श्लोकान्तरमवतारयति - **अहङ्कारस्य चेति** ॥

आगमापायिनिष्ठत्वादिति । आगमापायशीलोऽहङ्कारः । तस्य निष्ठा धर्मत्वेन अवस्थितिः यस्मिन् दृशौ सः आगमापायिधर्मनिष्ठत्वादेव हेतोरनित्यत्त्वं प्राप्नुयात् । कस्मात् ? उपयन्नपयंश्च धर्मो हि यस्मात् धर्मिणं दृशिरूपमात्मानमवश्यं विकरोति । धर्मस्यागमादुपचयः, तदपायाच्चापचयः - इत्येवं विकारोऽपरिहार्यो धर्मिणि । सविकारस्य च ध्रुवमनित्यत्वमिति भावः ॥३५॥

आत्मनो नित्यत्वं दुरपन्हवम् -

अथ वैयात्यात् पूर्वपक्षी सिद्धान्तहानिमप्यलक्षयित्वा शङ्कते **अस्त्विति** । अथवा, एतन्मध्येऽहंप्रत्ययालम्बनमालयविज्ञानत्वेन स्वीकृत्य तद्व्यतिरिक्तमात्मानममानयन् विज्ञानवादी शून्यवादी वा शङ्कते - **अस्त्विति** । प्रमाणोपपन्नत्वादिति, आगमापायित्वाद् विक्रियमाणस्यैव नदीस्रोतोज्वालादिवदेकत्वभ्रान्त्यावहत्वोपपत्तेर्वा तस्यानित्यत्वमेवास्तु । नात्र कस्यचिदप्युपालम्भः प्राप्तावसर इत्यर्थः । तदतिरिक्तस्याप्रामाणिकस्याऽऽत्मन आनयनेन तु किमपि

प्रयोजनं न पश्याम इति तु हृदयम् । शङ्कानिरासिश्लोकमवतारयति - **तन्नेति** ।।

सदेति ।। आत्मनः सदाविलुप्तसाक्षित्वं कूटस्थचैतन्यस्वरूपतया दृष्टेः अविपरिलुप्तत्वाद् युगपत्साक्षात्सर्वदर्शनस्वभावत्वम् । कालं प्रत्यपि साक्षित्वेन कालानवच्छिन्नत्वादिति भावः । न त्वहंप्रत्ययगम्यस्येव पर्यायेण द्रष्टृत्वमिति तद्वैलक्षण्यद्योतनार्थमिदं विशेषणम् । तच्च साक्षित्वं स्वतःसिद्धं स्वसिद्ध्यै प्रमाणान्तरानपेक्षम् । प्रमाणानामपि तदीयचैतन्यनिर्भासिततयैव सिद्धेरिति भावः । न ह्यहंप्रत्ययगम्यात्माभासव्यतिरेकेण तत्साक्षी कूटस्थचैतन्यस्वरूप आत्मा केनचित् प्रत्याख्यातुं शक्यः । य एव हि प्रत्याचिख्यासुस्तस्यैवाऽऽत्मस्वरूपत्वात् । स चायमविलुप्तदृक्स्वभाव इत्यभ्युपगन्तव्यम् । तद्विलोपहेतोर्विलोपसाधकप्रमाणस्य चाभावात् । न चेदं साक्षित्वं कस्यचिदप्रसिद्धं घटादिप्रमेयवत् । येन प्रमाणाभावान्नास्तीत्यपह्नूयेत । अतस्तदीदृशमप्यपह्नोतुकामेन त्वया स्थवीयोबुद्धित्वमेवाविष्कृतं भवतीत्युपहसति - **कुशाग्रीयधियेति** । अतिसूक्ष्मबुद्धिनेत्यर्थकेन विशेषणेन काक्वा सूक्ष्मविषयविवेचनासमर्थबुद्धिनेति विवक्षितम् ।।३६।।

(मूलम्)

एतस्माच्च हेतोरहङ्कारस्यानात्मधर्मत्वम् अवसीयताम् -

प्रमाणैश्चाव्यगम्यत्वाद्घटादिवदहं दृशेः ।
यतो राद्धिः प्रमाणानां स कथं तैः प्रसिध्यति ।।३७।।

धर्मधर्मिणोश्चेतरेतरविरुद्धात्मकत्वादसङ्गतिः -

धर्मिणश्च विरुद्धत्वान्न दृश्यगुणसङ्गतिः ।
मारुतान्दोलितज्वालं शैत्यं नाग्निं सिसृप्सति ।।३८।।

(क्लेशापहारिणी)

आत्माहङ्कारयोर्विरुद्धस्वभावत्वम् -

अहङ्कारस्याऽऽत्मधर्मत्वाभ्युपगमे दोषौ कथितौ तस्य नित्यत्वापत्त्या मोक्षशास्त्रवैयर्थ्यप्रसङ्गः, आत्मनोऽनित्यत्वप्रसङ्गश्चेति । अथेदानीं तयोर्विरुद्धस्वभावत्वाद्धर्मधर्मिभावासंभव एवेति दर्शयितुमुपक्रमते । तदाह - **एतस्माच्चेति** ।।

प्रमाणैश्चेति ।। अहंप्रत्ययगम्यत्वात् प्रत्यक्षेण, प्रमाणानामाश्रयत्वादनुमानेन, 'अहमस्मीत्यग्रे व्याहरत्तस्मादहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यन्नाम प्रब्रूते' (बृ. १-४-१) इति श्रुतेरागमेन चावगम्यत्वात् प्रमाणैरवगम्यत्वात् दृशेः दृग्रूपस्यात्मनः अहङ्कारः घटादिवत् विषयभूत एव । तस्मात्तस्यात्मधर्मत्वमसंभावितम् इत्यर्थः । नन्वात्मापि प्रमाणगम्य एव । अतोऽहमस्तद्धर्मत्वमविरुद्धम् इत्याशङ्क्याह - **यतो राद्धिरिति** । सिद्धानां हि प्रमाणानां प्रवृत्तिरप्रवृत्तिर्वा क्वचिदाशङ्क्येत । तेषां राद्धिः सिद्धिरेव तु यत आत्मनो भवति, स कथं तैः प्रसिध्यतीति शङ्क्येतापि । न हीन्द्रियाणि मनो वा स्वयमचेतनानि चेतनप्रकाशं विना सिध्येयुः । नापि चैतन्येनानवभासितानि स्वार्थान् प्रकाशयितुं प्रभवेयुर्वा । अतः सर्वेषां प्रमाणानामात्मत एव सिद्धिः । न तु तैस्तस्य । तथा च श्रुतिः - 'श्रोत्रस्य श्रोत्रं मनसो मनः' (के. १-२), 'यन्मनसा न मनुते येनाहुर्मनो मतम्' (के. १-६), 'यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति' (के. १-७), 'एतदप्रमयं ध्रुवम्' (बृ. ४-४-२०) इत्यादिः । एवं च चिद्रूपत्वाचेतनत्वाभ्यां स्वतःसिद्धत्वप्रमाणसिद्धत्वाभ्यां चात्यन्तविरुद्धस्वभावौ आत्माहङ्कारौ, ततश्च न धर्मधर्मिभावस्तयोर्घटमान इत्याशयः ।।३७।।

आशयमेवोद्घाटयति - **धर्मधर्मिणोश्चेति** । धर्मधर्मित्वेनाभिमत-

योरात्माहमोरितरेतरविरुद्धात्मकत्वात्, दृग्दृश्यस्वभावेन युगपदेकत्र भावानुपपत्तेः, असंगतिः असम्बन्धः । न वास्तवधर्मधर्मिभावोऽवकल्पत इत्यर्थः ॥

धर्मिणश्चेति । न हि विषयिणि चिदात्मके दृश्यगुणस्य विषयभूतान्तःकरणधर्मस्याहङ्कारस्य संगतिरुपपद्यते । तत्र निदर्शनम्, मारुतान्दोलितज्वालं पवनसाहाय्येन समिद्धमग्निं न हि शैत्यं सिसृप्सति सामीप्यं गन्तुमप्युत्सहते । तत्र का वार्ता तयोर्धर्मधर्मिभावस्येत्यर्थः ॥३८॥

(मूलम्)

तस्माद्विस्रब्धमुपगम्यताम् -

द्रष्टृत्वं दृश्यता चैव नैकस्मिन्नेकदा क्वचित् ।
दृश्यदृश्यो न च द्रष्टा द्रष्टुर्दर्शी दृशिर्न च ॥३९॥

सर्वसंव्यवहारलोपश्च प्राप्नोति । यस्मात् -

द्रष्टापि यदि दृश्याया आत्मेयात् कर्मतां धियः ।
यौगपद्यमदृश्यत्वं वैयर्थ्यं चाप्नुयाच्छ्रुतिः ॥४०॥

कुतः ? यस्मात् -

नालुप्तदृष्टेर्दृश्यत्वं दृश्यत्वे द्रष्टृता कुतः ।
स्याच्चेद्दृगेकं निर्दृश्यं जगद्वा स्यादसाक्षिकम् ॥४१॥

(क्लेशापहारिणी)

उपसंहारः -

'द्रष्टृस्थं दृश्यतां यस्मान्नैवेयात्' (२-२५) इति यत् प्रतिज्ञातं

तदिदानीमुपसंहरति - **तस्मादिति** । विस्रब्धं सविश्वासम् ; निःशङ्कमिति यावत् ।।

उपगन्तव्यमर्थमाह - **द्रष्टृत्वमिति** । एकस्मिन्नेव धर्मिणि एकदा युगपद् द्रष्टृत्वं दृश्यता च नैव क्वचिदपि संभवेताम् । तमःप्रकाशयोरिव विरुद्धस्वभावत्वात्तयोरित्यर्थः । द्रष्टा न दृश्यदृश्यः दृश्येन न द्रष्टुं-शक्यः । द्रष्टृत्वादेव । न च दृशिः दृष्टिः द्रष्टुः स्वरूपभूतं चैतन्यम् द्रष्टुर्दर्शी । स्वात्मनि क्रियाविरोधात् । न चास्त्यन्यो दृशिर्यो द्रष्टुर्दर्शी भवेदनवस्थाप्रसञ्जनं विनेत्यभिप्रायः । अतः सर्वथाप्यात्मनि ज्ञेयत्वं नोपपद्यत इति भावः । 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. ३-४-२), 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृ. २-४-१२) - इति च श्रुतेः ।।३९।।

द्रष्टृदृश्ययोरितरेतरात्मत्वे व्यवहारलोपः -

विपक्षे दण्डमाह - **सर्वसंव्यवहारेति** । यद्येकस्मिन्नेव धर्मिणि युगपद् द्रष्टृत्वं दृश्यत्वं च भवेताम्, तर्हि संव्यवहारमात्रस्य लोपः कथं प्राप्नुयादिति पृच्छायां तदुत्तरत्वेन श्लोकमवतारयति - **यस्मादिति** ।।

द्रष्टापीति । द्रष्टापि सन् यद्यात्मा दृश्यायाः अहंधियः कर्मताम् इयात्, तर्हि यौगपद्यं स्यात्, द्रष्टुरपि दृश्यत्वम्, दृश्यस्यापि द्रष्टृत्वं च युगपत् भवेताम् इत्यर्थः । किं चातः ? तत्राह - **अदृश्यत्वमिति** । अहंप्रत्ययलक्षणदृश्यस्यापि द्रष्टृत्वात्, तद्दृश्यत्वेनाभ्युपगम्यमानस्यापि द्रष्टृत्वे तदविशेषात्, दृश्यस्याभाव एव प्रसज्येतेत्यर्थः । दृश्यं हि नाम द्रष्ट्रपेक्षभाववत् । तच्चेद् दृश्यं द्रष्टृत्वयुक्तमपि हता बतेयं तस्य दृश्यत्वकथेति । किं चान्यत्, वैयर्थ्यं चाप्नुयात् श्रुतिः । 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. ३-४-२) इत्यादिका श्रुतिः व्यर्थैव भवेत् । न हि तस्याः प्रामाण्यं तदा भवति, द्रष्टुरपि दर्शनगोचरत्वादुक्तपक्षे इत्यर्थः ।।४०।।

ननु यौगपद्यमेव तावत् कथम् ? न हि दृश्यस्याहंप्रत्ययगम्यता

स्वीक्रियतेऽस्माभिः येन तस्यापि द्रष्टृता भवेत्। तथा च द्रष्टृत्वं दृश्यत्वं च युगपदुभयोरपि स्यात्, दृश्याभावश्च। श्रुतेर्वैयर्थ्यं वा कथम्? न हि श्रुतिरात्मनोऽहंप्रत्ययविषयतां प्रत्याचष्टे, किं त्विदंप्रत्ययविषयताम्। न चास्माभिरिदंप्रत्ययगोचरत्वेन दृश्य आत्मेत्यभ्युपगम्यते येन श्रुतिविरोधः प्रसजेत् इत्याशङ्क्य श्लोकेनैव परिहारं वक्ष्यामीत्याह - **कुतः? यस्मादिति**।।

नालुप्तदृष्टेरिति। अयमभिप्रायः। अलुप्तदृष्टेः, आत्मनो दृष्टिलोपमन्तरेण दृश्यत्वं कथमपि न संभवति। द्रष्टृ च दृश्यं चेति हि व्याहतम्। अलुप्तदृष्टिश्चायमात्मा। 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ. ४-३-२३) इति श्रुतेः। अथ चाहंप्रत्ययविषयत्वमुररीक्रियतेऽस्य भवतेति। एवं च यद्यहमो दृश्यस्य द्रष्टृत्वमभ्युपगम्यते, अलुप्तदृष्टिस्वभावस्याहंप्रत्ययदृश्यत्वं च, स्फुटं दृश्यत्वद्रष्टृत्वयोर्यौगपद्यम्। दृश्याभावश्च। उभयोरपि द्रष्टृत्वाभ्युपगमात्। श्रुतिवैयर्थ्यं च। अलुप्तदृष्टेरनभ्युपगमात्। यदप्युच्यते, अनात्मा केवलं दृश्य एव, इदंप्रत्ययगम्यत्वात् इति। तदपि मृषैव। अनात्मन एवाहमो द्रष्टृत्वाभ्युपगमात्। तदेवमुक्तदोषत्रयं सुस्थितम्। ननु 'मामहं जानामि' इति ज्ञातृत्वज्ञेयत्वयोरेकत्रापि दर्शनात् द्रष्टुरपि दृश्यत्वमस्तु का हानिः? इत्याशङ्क्याह - **स्याच्चेदिति**। दृश्यस्यापि द्रष्टृत्वं स्याच्चेत्, तथा द्रष्टुरपि दृश्यत्वं स्याच्चेदित्यर्थः। तत्र प्रथमकल्पे सर्वस्यापि द्रष्टृत्वमेवेति दृगेकं निर्दृश्यमिति स्यात्। द्वितीयकल्पे तु सर्वस्यापि दृश्यत्वमेवेति जगद्वा असाक्षिकमिति स्यात्, तथा च द्रष्टृदृश्यभाव एव विलुप्येतेति सर्वसंव्यवहार लोप एव स्यादित्यभिप्रायः। यद्यपि असाक्षिकस्य कस्यचिदपि नैव सिद्धिरित्यतोऽनुभवविरुद्ध एवायं विकल्पः, तथापि तर्कमात्रावष्टम्भिनो प्राप्नुयादेवायम् अनिष्टो विकल्पः इत्येतावतात्रानिष्टप्रसञ्जकस्तर्क उपन्यस्त इति बोद्धव्यम्।।४१।।

(मूलम्)

उक्तयुक्तिं दृढीकर्तुमागमोदाहरणोपन्यासः -

आर्तमन्यद्दृशेः सर्वं नेति नेतीति चासकृत् ।
वदन्ती निर्गुणं ब्रह्म कथं श्रुतिरुपेक्ष्यते ॥४२॥

महाभूतान्यहङ्कार इत्येतत् क्षेत्रमुच्यते ।
न दृशेर्द्वैतयोगोऽस्ति विश्वेश्वरमतादपि ॥४३॥

(क्लेशापहारिणी)

उक्तयुक्तेः श्रुतिस्मृतिमूलकत्वम् -

ननु युक्तिमात्रमिदं भवद्भिरभ्यूहितं यद्यात्मा अहंप्रत्ययगम्यः स्यात् तर्हि यौगपद्यादिकमनिष्टं प्रसज्येतेति । श्रौत एव तु पक्षोऽनुभवानुसारी स्वीकृतोऽस्माभिः । दर्शित एव तावत् अनुभवो मामहं जानामीति । श्रुतिश्च भवति स्वात्मन एव विषयत्वबोधिनी 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-४-५) इत्यादिना । अतः प्रशिथिलमूलत्वादुपेक्ष्योऽयं युक्त्याभास इत्याशङ्क्याह - **उक्तयुक्तिमिति** ॥

आर्तमिति । नोक्ता युक्तिर्निर्मूला । श्रुत्यवष्टम्भात् । तथा हि श्रुतिः 'न दृष्टेर्द्रष्टारं पश्येः .... एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तम्' (बृ. ३-४-२), 'बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः .... अतोऽन्यदार्तम्' (बृ. ३-५-१), 'अदृष्टो द्रष्टा .... नान्योऽतोऽस्ति द्रष्टा ..... अतोऽन्यदार्तम्, (बृ. ३-७-२३) इति च दृष्टेर्द्रष्टुः शोकमोहाद्यतीतस्यानात्मभूताहङ्काराद्वैलक्षण्यम्, दृश्यानात्मप्रत्ययतिरस्कारपूर्वकमेव च मुख्यब्राह्मण्यलाभं च प्रतिपादयति । दृङ्मात्रस्वरूपादस्मादात्मनोऽन्यदार्तं विनाशीति चासकृज्ज्ञापयन्ती अनात्मभूतस्याहमो नित्यात्मधर्मत्वं व्यासेधति । एवम् 'अथात

आदेशो नेति नेति' (बृ. २-३-६) इति प्रतिज्ञाय, 'स एष नेति नेत्यात्मा' (बृ. ३-९-२६, ४-२-४, ४-५-१५) - इति सर्वदृश्यासंस्पर्शित्वेनासङ्गत्वं चासकृद् ब्रवीति । तदेवं निर्गुणं ब्रह्मैवायमात्मा इति सादरं वदन्ती श्रुतिः कथं भवद्भिरुपेक्ष्यते ? कथं वा तद्विरोधमविगणय्य तस्याहंधर्मत्वमूरीक्रियते ? या तूदाहृता श्रुतिः 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-४-५) इति, न तया आत्मनो दर्शनं विधीयते । आत्मव्यतिरिक्तस्य द्रष्टुरभावादशक्यानुष्ठानविधानप्रसङ्गात् । संसारिणश्च आत्मनो दृष्टत्वादेव तद्दर्शनविध्यानर्थक्यात् । तस्मिन् दृष्टेऽपि प्रयोजनाभावाच्च । तद्दर्शनादेव हि संसारबन्ध इति । तस्मादात्मानात्मविवेचनेन सर्वमात्मेति ज्ञानं संपादयेत् इत्येव श्रुत्युपदेशार्थः । तत्रापि दर्शनस्य फलत्वादविधेयत्वे सति तदुपायभूतश्रवणमननयोरेवात्र दर्शनमुद्दिश्य विधानमित्यवसीयते । यथोक्तं **बृहद्वार्तिके** 'सर्वमात्मेत्यतः पश्येदात्मानात्मविभागवित् । आत्मा द्रष्टव्य इत्युक्त्या ह्येषोऽर्थोऽत्राभिधीयते' (बृ. वा. २-४-२११), 'दर्शनस्याविधेयत्वात्तदुपायो विधीयते । वेदान्तश्रवणं यत्नादुपायस्तर्क एव च ।।' (बृ. वा. २-४-२१३) इति ।।

यः पुनरनुभव उदाहृतः 'अहं मामभिजानामि' इति, सोऽविद्यया आत्मत्वेन गृहीतस्यैव न परमार्थात्मन इति मन्तव्यः । 'आत्मनश्चेदहंधर्मो यायान्मुक्तिसुषुप्तयोः ।।' (२-३२) इति स्वाभाविकसुषुप्ताद्यनुभवमाश्रित्य तदनन्वयस्य प्रागेव दर्शितत्वात् । अतो भ्रान्तिरेवेयमहंप्रत्ययगम्यताप्रतीतिरात्मन इत्यवसीयते । अविद्याकल्पितदेहेन्द्रियाद्यपेक्षणात् तस्याः । अविद्याकल्पितत्वं च देहादिसर्वद्वैतस्योपपादयिष्यतेऽनुपदमेव । तदेवम् आगमोपपत्तिभ्यां प्रसाधितत्वात् साधुरेवायमात्मनोऽहंधर्मत्वनिरास इति स्थितम् ।।४२।।

उक्तार्थे स्मृतिप्रामाण्यम् -

स्मृतिसम्मतश्चायम् आत्मनोऽहंधर्मत्वनिरास इत्याह - **महाभूतानीति** । विश्वश्वेरो हि भगवान् वासुदेवोऽर्जुनाय तत्त्वज्ञानमुपदिदिक्षुः, 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।।' (गी. १३-१) इति क्षेत्रक्षेत्रज्ञपदार्थौ निरुच्य 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ।।' (गी. १३-२) इति क्षेत्रक्षेत्रज्ञस्वरूपनिर्धारणार्थं प्रवृत्तः 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ।। इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः । एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ।।' (गी. १३-५, ६) इति जगौ । अत्र हि महाभूताहङ्कारादि धृत्यन्तं सर्वमेव प्रकृति-परिणामभूतं पुरुषस्य भोगापवर्गनिष्पादनार्थं देहेन्द्रियाद्याकारेण संहन्यमानं क्षेत्रसंज्ञकं शरीरमित्यभिधत्ते भगवान्, न तु तस्य दृशिरूपक्षेत्रज्ञधर्मतामाचष्टे । अतोऽवगम्यते भागवतमतादपि न दृशेः द्वैतयोगः द्वितीयधर्मसंबन्धोऽस्तीति । तदेवं श्रुतिस्मृति-मूलकत्वान्न शुष्कतर्कमात्रमस्मदुक्तमिति भावः ।।४३।।

(मूलम्)

अधुना प्रकृतार्थोपसंहारः -

एवमेतद् हिरुग् ज्ञेयं मिथ्यासिद्धमनात्मकम् ।
मोहमूलं सुदुर्बोधं द्वैतं युक्तिभिरात्मनः ।।४४।।

(क्लेशापहारिणी)

उत्तरार्थ उपसंहारः -

स्थूलसूक्ष्मदेहविवेकमुपसंहृत्य अधुना सर्वस्याप्यनात्मनो मिथ्यात्वमुच्यते वाक्यार्थप्रतिपत्त्यर्थम् । तदाह - **अधुनेति** ।।

एवमिति । एवम् यथोक्तनीत्या एतत् स्थूलसूक्ष्मरूपं द्वैतम् आत्मनः सकाशात् हिरुक् पृथक्कृत्य ज्ञेयम् । दृशेस्तद्योगानुपपत्तेः । अथ तत्स्वभावमाचष्टे - मिथ्यासिद्धं प्रतीतिमात्रसिद्धम् । यद्यपि दृगात्मनि तस्य प्रतीतिर्मिथ्या तथापि तस्य स्वात्मना कुत्रचिदन्यत्र सिद्धिः स्यादित्याशङ्क्याह - अनात्मकं 'निःस्वभावकम्' इति । कथं तर्हि तस्य प्रतीतिः ? तदाह - 'मोहमूलम्' इति । अज्ञानवशादेवात्मन्यध्यस्तम् । स्वरूपेण तु सुदुर्बोधम्, तत्त्वान्यत्वाभ्यामनिर्वचनीयमित्यर्थः ॥४४॥

---

७. द्वैतस्य प्रतीतिमात्रसिद्धत्वम्

(मूलम्)

कुतो मिथ्यासिद्धत्वं द्वैतस्येति चेत् -

न पृथङ् नात्मना सिद्धिरात्मनोऽन्यस्य वस्तुनः ।
आत्मवत् कल्पितस्तस्मादहङ्कारादिरात्मनि ॥४५॥

तस्मादज्ञानविजृम्भितमेतत् -

दृश्याः शब्दादयः क्लृप्ता द्रष्टृ च ब्रह्म निर्गुणम् ।
अहं तदुभयं बिभ्रद्भ्रान्तिमात्मनि यच्छति ॥४६॥

(क्लेशापहारिणी)

द्वैतस्य मिथ्यासिद्धत्वं सुदुर्बोधत्वं च -

द्वैतस्य विवेकार्थमनृतत्वमुक्तं मिथ्यासिद्धमित्यादिविशेषणैः । तत्र मिथ्यासिद्धत्वं सुदुर्बोधत्वं च तावदुपपादयति समनन्तरश्लोकेनेत्याह - कुत इति ।

न पृथगिति । आत्मनोऽन्यस्य वस्तुनः, अन्यवस्तुत्वेन विभाव्यमानस्येत्यर्थः । न पृथक् स्वातन्त्र्येण सिद्धिः । यथा अश्वान्महिषः पृथगेव विद्यते, नाश्वापेक्षा तत्प्रतीतिः । सर्वो ह्यनात्मा आत्मचैतन्यप्रकाशित एवास्तित्वं लभते, न चैतन्यप्रकाशनिरपेक्ष इति । नाप्यात्मना आत्मरूपेणैव तत्सिद्धिः । तद्वैलक्षण्येनापि प्रतीतेः । व्यतिरेकेण आत्मवत् । यथा आत्मा स्वेतरनिरपेक्षः स्वयंसिद्धः, स्वात्मना नित्याभिन्नश्च, नैवम् अनात्मा स्वयंसिद्धात्माभिन्नत्वेन सिद्ध इत्यर्थः । तदेवम् आत्मत्वेन तदन्यत्वेन वा सिद्ध्यभावात्, अहङ्कारादिः, अहङ्कारबुद्धिमनइन्द्रियदेहादिः, आत्मन्यद्वितीये कल्पितः अध्यस्त एवेत्यभिप्रायः । एतदेव हि सर्पस्य मिथ्यात्वं नाम यद्रज्ज्वज्ञानाल्लब्धप्रतीतित्वम्, रज्जुत्वेन तदन्यत्वेन वा निर्वचनासहत्वं चेति ।।४५।।

द्वैतस्य मोहमूलत्वम् -

द्वैतस्य मोहमूलकत्वं विशदयति श्लोकान्तर इत्याह - **तस्मादिति** । अज्ञानविजृम्भितं भ्रान्तिविलासमात्रमेतदिति कथम् ? तत्राह - **दृश्या इति** । शब्दादयः दृश्याः क्लप्ताः दृश्यत्वेनैव नियताः, न तु तेषु द्रष्टृत्वप्रतीतिरस्ति । तथा ब्रह्म च सर्वस्याऽऽत्मभूतं द्रष्टृ क्लृप्तम् इति विपरिणामेन योजना । ब्रह्म द्रष्टृ नियमत इति कुतः ? यतो निर्गुणम्, दृश्यसंबन्धरहितम् । एवं विविक्तस्वभावयोरपि द्रष्टृत्वदृश्यत्वयोः कथमात्मनि प्रतीतिः ? तत्राह - **अहमिति** । अहंकारस्तु तदुभयं द्रष्टृत्वं दृश्यत्वं च बिभ्रत् - स्वेतरानात्मापेक्षया द्रष्टा, आत्मापेक्षया तु दृश्य इत्युभयधर्मसंभेदात् स्वाध्यासेन आत्मनि भ्रान्तिं यच्छति, आत्माप्युभयरूप इति मिथ्यामतिं विदधातीत्यर्थः ।।४६।।

(मूलम्)

तत एवेयम् अभिन्नस्यात्मनो भेदबुद्धिः -

दृगेका सर्वभूतेषु भाति दृश्यैरनेकवत् ।
जलभाजनभेदेन मयूखस्रग्विभेदवत् ॥४७॥

यथोक्तार्थस्य प्रतिपत्तये दृष्टान्तः -

मित्रोदासीनशत्रुत्वं यथैकस्यान्यकल्पनात् ।
अभिन्नस्य चितेस्तद्वद्भेदोऽन्तःकरणाश्रयः ॥४८॥

अपहारो यथा भानोः सर्वतो जलपात्रकैः ।
तत्क्रियाकृतिदेशाप्तिस्तथा बुद्धिभिरात्मनः ॥४९॥

(क्लेशापहारिणी)

आत्मभेदबुद्धिरप्यविद्याविजृम्भितैव -

न केवलमात्मनि दृग्दृश्यताबुद्धिः ; किं तु तदनेकत्वबुद्धिरपि अज्ञानविजृम्भिताहङ्कारकृतैवेत्याह - **तत एवेति** । आत्मनो भेदबुद्धिः, आत्मनो यो भेदः, तमातन्वती बुद्धिरित्यर्थः ॥

दृगेकेति । अन्तःकरणोपाधिभेदादेव दृग्रूपस्याऽऽत्मनोऽनेकत्वभानमित्यत्र दृष्टान्तः जलभाजनभेदेनेति । यद्यपि मयूखस्रग्वी किरणमाली सूर्यः स्वेन रूपेण एक एव, तथापि जलभाजनभेदेन तत्तत्पात्रगतजलभेदेन भिन्न इवावभासते, एवं सर्वभूतेषु स्थावरजङ्गमात्मकेषु क्षेत्रेषु दृश्यैरन्तःकरणैर्भिन्न इवेत्यर्थः । 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥' (?) इत्यादिशास्त्रप्रामाण्यात् । उपाधिभेदादेकोऽपि भिन्न इवाऽऽभातीत्यंशमात्रे दृष्टान्तः । न तु

गलभाजनतद्गतजलवदुपाधिवैविध्यमपि वास्तविकं विवक्षितम् । अघटितघटनाचतुरो ह्यनृताहङ्काराध्यासो वस्तुत एकस्मिन्नेव ब्रह्मण्यनन्तजीवावभासतामनन्तजीवोपाधींस्तद्धर्मभेदांश्च प्रत्युपस्थापयतीति तु तत्त्वम् ॥४७॥

एतदेव विशदयितुं दृष्टान्तान्तरोपादानमित्याह **यथोक्तेति** ॥

मित्रोदासीनशत्रुत्वमिति । एकस्यैव स्वरूपेण स्थितस्य चैत्रस्य अन्येषां मैत्रडित्थडवित्थानां कल्पनात् मित्रत्वम् उदासीनत्वम् शत्रुत्वं च यथा, तद्वत् अभिन्नस्यैव चितेः चिन्मात्रस्याऽऽत्मनः भेदः, अन्तःकरणाश्रयः अन्तःकरणभेदेन कल्पितो भेदः न त्वात्मनः स्वतो भेदोऽस्तीत्यर्थः । अत्र 'चितेः' इति धात्वर्थनिर्देशोऽभिप्रेतश्चिद्रूपस्यात्मनः इति । अथवा एकस्यैव पुरुषस्य अभिन्नस्य स्वतो भेदरहितस्यापीति दृष्टान्तवाक्यगतत्वेनैवाभिन्नस्येति पदस्यान्वयो बोध्यः । ततश्च 'चितेरभिन्नस्य' इति भिन्नलिङ्गसमभिव्याहारो निवारितो भवति ॥४८॥

ननु चान्तःकरणाश्रयणेनापि नाद्वितीयस्य स्वभावापहारो युक्तः । न ह्यग्निः स्वभावत उष्णः सन् अन्याश्रयेणानुष्णो भवेदित्याशङ्क्याऽऽह - **अपहार इति** । अयमर्थः । नायं स्वभावापहारः परमार्थतः, किं त्वज्ञानविजृम्भित इत्युक्तम् (२-४७) । तत्र दृष्टान्तः । यथा भानोः सूर्यस्य स्वरूपप्रतिष्ठितस्य सर्वतः स्थितैर्जलपात्रकैरपहारः यथा च तत्तत्पात्रस्थजलक्रिया चलनाद्या, आकृतिः ह्रस्वत्वाद्या, तत्तत्पात्रदेशश्चेति तत्तत्क्रियाकृतिदेशानामाप्तिरिवाऽऽप्तिर्भ्रान्त्यैव, सूर्यस्तु स्वरूपेणैव तादृशक्रियादिभिरसंस्पृष्ट एवावतिष्ठते आकाशे, तथैव आत्मनः बुद्धिभिरन्तःकरणैः दृश्यत्वानेकत्वादिधर्मापादकैः तत्तद्धर्मप्राप्तिरिव भवति भ्रान्त्या, आत्मा तु स्वे महिम्न्येव सदा तिष्ठतीति न कोऽपि दोष इत्यभिप्रायः । 'सूर्यो यथा सर्वलोकस्य चक्षुर्न

लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' ।। (का. २-२-११) इति श्रुतेः ।।४९।।

(मूलम्)

न च विरुद्धधर्माणामेकत्रानुपपत्तिः । किं कारणम् ?

कल्पितानामवस्तुत्वात् स्यादेकत्रापि संभवः ।
कमनीयाऽशुचिः स्वाद्वीत्येकस्यामिव योषिति ।।५०।।

न चायं क्रियाकारकफलात्मक आभास ईषदपि परमार्थवस्तु स्पृशति । तस्य मोहमात्रोपादानत्वात् -

अभूताभिनिवेशेन स्वात्मानं वञ्चयत्ययम् ।
असत्यपि द्वितीयेऽर्थे सोमशर्मपिता यथा ।।५१।।

वस्तुयाथात्म्यानवबोधपटलावनद्धाक्षः सन् -

सुभ्रूः सुनासा सुमुखी सुनेत्रा चारुहासिनी ।
कल्पनामात्रसंमोहाद्रामेत्यालिङ्गतेऽशुचिम् ।।५२।।

(क्लेशापहारिणी)

एकस्मिन्नेवाऽऽत्मनि विरुद्धधर्मसमवायोपपत्तिः -

तदेवं द्वैतस्य मिथ्यासिद्धत्वात्, मिथ्यासिद्धाहंधर्मासंपर्कादेव विरुद्धधर्माणामप्येकस्मिन्नेवाऽऽत्मनि प्रतीतिरुपपद्यते । अतः कथमेकस्यैव युगपद् दृग्रूपत्वं दृश्यत्वं च, एकत्वमनेकत्वं चेति विरुद्धधर्माश्रयत्वमुपपद्यत इति चोद्यस्यानवसर इति श्लोकेन प्रतिपाद्यत इत्याह - **न चेत्यादि** । उपपत्तिमेव विवक्षुराक्षेपमुत्थापयति **किं कारणमिति** ।।

कल्पितानामिति । एकस्यामेव योषिति कमनीयेति कामुकस्य,

अशुचिरिति विरक्तस्य, स्वाद्वीति शुनश्च विरुद्धधर्माणां कल्पना यथोपपद्यते, एवम् एकत्रैवाऽऽत्मनि विरुद्धानेकधर्माणां पराध्यारोपितानां संभवोऽस्ति । कल्पितानामवस्तुत्वादेवेत्यर्थः ॥५०॥

अध्यारोपितधर्मैरात्मा स्वल्पमपि न संपृच्यत इत्याह - **न चायमिति** । अयम् अहमाद्युपाधिवशतः प्रतीयमानः क्रियाकारकफलात्मक आभासः ईषदपि परमार्थवस्तु न स्पृशति । उपलक्षणमिदम् । अद्वितीयात्मनो नित्यशुद्धबुद्धत्वादयो मिथ्यासिद्धाहमाद्यनात्मानम् ईषदपि न स्पृशन्तीत्यपि द्रष्टव्यम् । उक्तं हि **भाष्यकारैः** 'तत्रैवं सति यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यत' (सू.भा.अव.) इति । तदेतत्कुतः ? तस्य क्रियाकारकाद्याभासस्य मोहमात्रोपादानत्वात् । वस्तुयाथात्म्यानवबोधेनाध्यारोपितत्वादित्यर्थः । उपादान- शब्दोऽत्र क्रियाकारकाद्यनिर्वचनीयवस्तूत्पत्तिकारणमित्यर्थक इति तु न भ्रमितव्यम् । ग्रन्थावतारप्रघट्टके **'द्वैतस्य च शुक्तिका-रजतादिवत् सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वात्'** इतिवदज्ञान-निमित्तकल्पनाकृतप्रतीतिमात्रशरीरत्वादिति ऋजुवर्त्मनैव वाक्यार्थग्रहणे प्रतिबन्धकाभावात् ॥

अभूताभिनिवेशेनेति । अयं लोकः, द्वितीयेऽर्थे असत्यपि अभूते अवस्तुनि मिथ्यासिद्धे प्रतीतिमात्रशरीरे अभिनिवेशेन स्वात्मानं वञ्चयति । तत्र दृष्टान्तः **सोमशर्मपिता यथेति** । अजाते एव सोमशर्मणि पुत्रे जातत्वाभिनिवेशेन स्वमनोरथकल्पितां भार्यां तिताडयिषुर्ब्रह्मचारी सक्तुभाण्डं भित्त्वा भृशं शुशोचेति प्रसिद्धेयमाख्यायिका **पञ्चतन्त्रे (५-९)** । तत्र यथाऽसौ सोमशर्मपिता मिथ्याभिनिवेशेन भिक्षासक्तून् प्रणाश्य स्वात्मानमेव पाण्डरं कृत्वा वञ्चयति स्म तद्वदयं लोकोऽपि संसारिणमात्मानमभिमन्यमान इत्यर्थः । **उक्तं ह्यभियुक्तैः** 'अभूताभिनिवेशोऽस्ति द्वयं तत्र न

विद्यते ।' (मां. का. ४-७५), 'अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्तते' (मां. का. ४-७८) इति च ॥५१॥

अभूताभिनिवेशेन प्रवृत्तौ दृष्टान्तान्तरम् -

अत्रैव दृष्टान्तान्तरमाह श्लोकान्तरमित्याह - **वस्तुयाथात्म्येति** । वस्तुतत्त्वस्य अनवबोध एव पटलं नेत्ररोगः, तेनावनद्धमावृतं मनोरूपं अक्षि चक्षुरिन्द्रियं यस्य स तादृशः सन् इत्यज्ञाननिमित्तकत्वं कल्पनायामुच्यते ॥

सुभ्रूरिति । यथा कल्पनामात्रसंमोहात् अशुचिमपि स्त्रियमालिङ्गति, एवं दार्ष्टान्तिकेऽपि कल्पनामात्रसंमोहादेव क्रियाकारकफलात्मताभिष्वङ्ग इति भावः ॥५२॥

अहंमतिबाधे आत्मनोऽद्वैतता

(मूलम्)

सर्वस्यानर्थजातस्य जिहासितस्य मूलमहङ्कार एव । तस्याऽऽत्मानात्मोपरागात् । न तु परमार्थत आत्मनोऽविद्यया तत्कार्येण वा संबन्धोऽभूत्, अस्ति, भविष्यति वा । तस्यापरिलुप्तदृष्टिस्वाभाव्यात् -

दृश्यानुरक्तं तद्द्रष्टृ दृश्यं द्रष्ट्रनुरञ्जितम् ।
अहंवृत्त्योभयं रक्तं तन्नाशेऽद्वैतताऽऽत्मनः ॥५३॥

(क्लेशापहारिणी)

अहंविवेकोपसंहारः -

एवं तावदात्मन्यनात्मसंबन्धप्रतीतिः, अनेकत्वप्रतीतिः, क्रियाकारकफलात्मताप्रतीतिः, विरुद्धानेकधर्मवत्त्वप्रतीतिश्चेत्येतत् सर्वमनर्थजातम् अज्ञानविलसितभ्रान्तिमात्रमिति प्रदर्शितम् । तत्र च

अहङ्कारस्य द्रष्टृत्वदृश्यत्वोभयरूपधारणमेव निमित्तमिति यदादौ प्रतिज्ञातम् 'अहं तदुभयं बिभ्रद्भ्रान्तिमात्मनि यच्छति' (२-४६) इति, तदिदानीमुपसंहरत्युत्तरश्लोक इत्याह - **सर्वस्यानर्थजातस्येत्यादि** । जिहासितस्य हातुमिष्टस्यानर्थस्य दुःखस्य मूलमहङ्कार एव । अविद्यासिद्धद्वैतरूपे देहादौ आत्मबुद्धिरेव हि धर्माधर्मद्वारेण देहान्तरोपादानहेतुतया दुःखमूलं भवति । न तु परमार्थतः केवलस्याहङ्कारहीनस्य आत्मनः न जानामीत्यविद्यया तत्कार्येण द्वैताध्यासेन वा संबन्धः कदापि घटते । तस्याऽऽत्मनोऽपरिलुप्तदृष्टिस्वाभाव्यात्, अद्वितीयकूटस्थनित्यचैतन्यस्वरूपत्वादित्यर्थः ॥

दृश्यानुरक्तमिति । दृश्यैः शब्दादिभिः अनुरक्तं तदहंरूपमन्तःकरणं द्रष्टृ भवति । दृश्यापेक्षया द्रष्टृपदमनुभवतीत्यर्थः । एवं द्रष्ट्रनुरञ्जितं स्वद्रष्टृभूतात्मसंबद्धं सत् तदेव दृश्यं भवति । द्रष्टृभूतसाक्षिचैतन्यापेक्षया तद्विषयपदमनुभवतीत्यर्थः । अहंवृत्त्या उभयं रक्तम् । अहंसंबन्धेनैवाऽऽत्मा असङ्गोऽपि द्रष्टृव्यवहारगोचरतामापद्यते । न हि केवलस्य देहेन्द्रियादिष्वहंममाभिमानरहितस्य 'द्रष्टाऽहम्, अहमिदं जानामि' इत्यभिमानः सुषुप्तादौ दृश्यते । यथैव च सुषुप्ते तथैव स्वप्नजागरितयोरपि तस्य चिन्मात्रत्वमनुभूयत एव । ततश्चेदं निष्पन्नम् - आत्मनस्तावत् केवलस्य न कर्तृत्वम् । अविकारित्वात् । विकारिणोऽप्यहमो न ज्ञानकर्तृत्वमस्ति । तस्य चैतन्याभावात् । इत्थं च 'अहं ज्ञः' इति व्यवहारोऽयं मिथ्यैवाऽऽत्मनि अहंवृत्त्यनुरागात्कल्पित इति गम्यते । यथोक्त**मुपदेशसाहस्र्याम्** - 'बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते । तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते' (उप. १८-६५) इति । अत एव शब्दादेर्दृश्यस्य 'इदं जानामि' इति व्यवहारगोचरताप्यहंवृत्त्यनुरागादेवेति गम्यते । न हि केवलेनाऽऽत्मना सामान्येन सर्वावभासकेन इदमिति परिच्छेदेन विषयीकरणं शब्दानामिति युज्यते ।

परिच्छेदनक्षमस्य त्वहमश्चैतन्याभावात् न केवलेन तेनापि विषयीकरणं शब्दानामिति युक्तम् । अत 'इदमहं जानामि' इति द्वैतज्ञाने हेतुरहंवृत्तिरेवेति सिद्धम् । तदेतदभिसंधायोक्तम् 'अहंवृत्त्योभयं रक्तम्' इतीति बोध्यम् ।।

अस्त्वेवं द्वैतज्ञानं दृग्दृश्ययोरहमनुरागादेवेति । ततः किं फलतीत्यत आह - **'तन्नाशेऽद्वैततात्मनः'** इति । अत इदं फलति यत् तन्नाशे अहमो विद्यया मिथ्यात्वावधारणेन बाधे सति, आत्मनोऽद्वैतता भवेत् द्वैतप्रतिभानहेतोरभावादिति भावः ।।५३।।

---

८. आत्मन्यहंशब्दप्रवृत्तिः कथम् ?

(मूलम्)

इह केचिच्चोदयन्ति । योऽयम् अन्वयव्यतिरेकाभ्याम् अनात्मतयोत्सारितोऽहङ्कारो वाक्यार्थप्रतिपत्तये, सोऽयं विपरीतार्थः संवृत्तः ; यस्मात् 'अहं ब्रह्मास्मि' इति ब्रह्माहंपदार्थयोः सामानाधिकरण्यश्रवणात् अनात्मार्थेन सामानाधिकरण्यं प्राप्नोति । वक्तव्या वा प्रत्यगात्मनि तस्य वृत्तिरिति । सोच्यते प्रसिद्धलक्षणागुणवृत्तिभिः -

नाज्ञासिषमिति प्राह सुषुप्तादुत्थितोऽपि हि ।
अयोदाहादिवत्तेन लक्षणं परमात्मनः ।।५४।।

प्रत्यक्त्वादतिसूक्ष्मत्वादात्मदृष्ट्यनुशीलनात् ।
अतो वृत्तीर्विहायान्या ह्यहंवृत्त्योपलक्ष्यते ।।५५।।

आत्मना चाविनाभावमथवा विलयं व्रजेत् ।
न तु पक्षान्तरं यायादतश्चाहंधियोच्यते ॥५६॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

एतावता ग्रन्थेनाहङ्कारादेरनात्मत्वमवधृतम् । अथेदानीम् 'अहं ब्रह्मास्मि' इति वाक्ये अहंब्रह्मणोः सामानाधिकरण्योपपादनम् अहंशब्दादीनामिति अहंशद्बस्य आत्मनि वृत्तिं च विविच्य दिदर्शयिषुः शङ्कामुत्थापयति - **इह केचिच्चोदयन्तीति** । आत्मान्वयाहङ्कार-व्यतिरेकाभ्यां योऽयम् अहङ्कारोऽनात्मतया उत्सारितः दूरीकृतः, वाक्यार्थप्रतिपत्तये तत्त्वमसीत्यादिवाक्यार्थस्याविरोधेन प्रतिपत्तिर्यथा स्यादिति, सोऽयं निराकृतोऽहङ्कारः विपरीतार्थः संवृत्तः । यदिदमहङ्कारस्यानात्मतया निराकरणं तदिदं विपरीतार्थम् अभीप्सितविपरीतफलकमेव संवृत्तमित्यर्थः । तत् कस्मादिति ? आह - 'अहं ब्रह्मास्मि' इति ब्रह्माहंपदार्थयोः सामानाधिकरण्येनैव श्रवणात्, अहंपदार्थस्य चानात्मतया निर्धारितत्वात् । अनात्मार्थेन ब्रह्मपदार्थस्य सामानाधिकरण्यं प्राप्नोति । न चैतदिष्टं निर्विशेषब्रह्मात्मवादिनस्तवेति भावः । अथ नेष्यते यथाप्रापितमनात्मपदार्थसामानाधिकरण्यं ब्रह्मणः, तर्हि कयाचिद् वृत्त्या तस्य अहंशब्दस्य प्रवृत्तिर्वक्तव्येत्याह - **वक्तव्या वा प्रत्यगात्मनि तस्येति** । तस्येति तद्वाचकशब्दस्येत्यर्थः । सिद्धान्ती तु प्रत्यगात्मन्यपि शब्दस्य प्रवृत्तिं दर्शयिष्यामीत्याह - **सोच्यत इति** । यद्यपि पूर्वमेवास्य परिहारः प्रोक्तः 'योऽयं स्थाणुः पुमानेषः' (२-२९) इति, 'वाक्यं तद्व्यपनेतृ तत्' (२-२८) - इत्यस्य व्याख्यानप्रसङ्गेन, तथापि कया वृत्त्या अहंशब्दस्य तत्र प्रवृत्तिरित्येतदधुना स्फुटीक्रियत इति विशेषः । **प्रसिद्धलक्षणागुणवृत्तिभिरिति** - प्रसिद्धया मुख्यवृत्त्या, लक्षणावृत्त्या, गुणवृत्त्या चेत्यर्थः ॥

आत्मन्यहंशब्दस्य लक्षणावृत्तिः -

तत्र लक्षणावृत्तिं तावत्प्रसाधयति - **नाज्ञासिषमिति** । सुषुप्ते नाहं किञ्चिदवेदिषम् इति हि सुषुप्तादुत्थितः प्राह । न च सुषुप्तेऽहङ्कारोऽनुभूतचरः । तथा च 'अहं नाज्ञासिषम्' इति यदाह तदहंविशिष्टस्यासंभवात् केवलस्यैवाऽऽत्मनः परामर्शायेति गम्यते । दृष्टश्च वह्निविशिष्टायोवाचकस्य वह्निमात्रे लक्षणया प्रयोगः 'अयो दहति' इत्यत्र । न हि तत्र मुख्यार्थस्यायसो दग्धृत्वं समस्ति । एवमयोदाहादिवत्, अयो दहतीत्यादिस्थले इव 'अहं ब्रह्मास्मि' इत्यत्रापि अहङ्कारः परमात्मनो लक्षणं भविष्यतीत्यर्थः । **ये त्वत्रास्मदीयाः केचित्** 'न किञ्चिदवेदिषम्' इत्युत्थितस्य स्मरणात् सुषुप्ते भावरूपमनिर्वचनीयमज्ञानमहङ्कारोपादानकारणमनुभूतमिति कल्पयन्ति, अननुभूतस्य स्मरणानुपपत्तेरिति हेतुमुपस्थापयन्तः, ते सौषुप्तानुभवं 'सति संपद्य न विदुः सति संपद्यामह इति' (छा. ६-९-२), 'प्राज्ञेनाऽऽत्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ. ४-३-२१) इति च सच्चिन्मात्रे परमात्मनि संपत्तिमेव तत्र ज्ञानाभावे हेतुमुद्घोषयन्तीं श्रुतिं च पृष्ठतः कुर्वन्तः, आकाशेऽपि पदेन शकुन्ताननुविन्देयुः । ये पुनर्वावदूका अत एव सौषुप्तपरामर्शबलात् सुषुप्तेऽप्यहमर्थ एवाऽऽत्मा इत्यध्यवस्यन्ति । ये च तत्रावस्थायां जीव-कालतमआत्मकं त्रितयमप्यनुमातुमीहन्ते, ते उत्तरोत्तरं साहसिकतरा इति न तान् प्रति किञ्चिद्वक्तुं प्रभवामः ।।५४।।

आत्मन्यहंशब्दस्य गौणी वृत्तिः -

अथ गुणवृत्त्याप्यहंशब्द आत्मनि प्रयुज्यत इति दर्शयति - **प्रत्यक्त्वादिति** । इदंप्रत्ययगोचरानात्मान्तरापेक्षया प्रत्यक्त्वात् आन्तरत्वात्, शब्दस्पर्शादिरहितत्वेनातिसूक्ष्मत्वात्, आत्मदृष्ट्यनु-शीलनात्, आत्मदृष्टेः चिद्रूपाया अनुशीलनात् तदाभासत्वेनानु-

करणाच्च, अयं अहङ्कारः प्रत्यासन्नतर इत्यतः, अन्या वृत्तिः ममेदमाद्याः विहाय अहंवृत्त्यैवोपलक्ष्यते आत्मा । तस्मादहंशब्देनैव गौण्या वृत्त्या लक्ष्यते । अहंगुणानामात्मनि विद्यमानत्वात् । यथा सिंहगुणानां शौर्यादीनां सत्त्वात् सिंह इति व्यपदिश्यते देवदत्तस्तद्वदित्यभिप्रायः ॥५५॥

आत्मन्यहंशब्दस्य मुख्या वृत्तिः -

अथेदानीं मुख्ययापि वृत्त्या भवेदात्मन्यहंशब्द इत्युपपादयन्नाह - **आत्मनेति** । अहंवृत्तिर्हि आत्मना अविनाभावमेव व्रजेत् स्वव्यवहार-काले, अथवा विलयं व्रजेत् । न हि सदा 'अहम्' इत्युल्लिखित-स्वरूपमेव तिष्ठत्यहङ्कारः । केवलविषयज्ञानकाले अहमुल्लेखा-भावात् । यदा तूल्लिखितस्वरूपेण व्यवहारः तदा चित्स्वरूपाविवेकेनैव तथा व्यवह्रियते । केवलस्य तस्य स्वरूपलाभाभावादेव । आत्मनि तत्त्वान्यत्वाभ्यामनिर्वचनीय एव ह्यहङ्कारादिरनात्मा परिकल्पित इति न स्वास्पदं विहाय तस्य क्वचिदपि प्रतीतिर्भवेदिति । न त्वयमहङ्कारः पक्षान्तरं यायात् । आत्माविनाभावं विलयं वा मुक्त्वा स्थित्यन्तरं नैव व्रजेदित्यर्थः । न हि इदंप्रत्ययगोचरत्वेनाहङ्कारमनुभवति जातुचित् कश्चित् । अतश्च हेतोः आत्माविनाभावेनैव व्यवहारभाक्त्वात् । अहंवृत्तिमूलकमेव व्यपदिशत्यात्मानं लोकः अयमहमिति । आत्मा च स्वव्यवहारकाले अस्मत्प्रत्ययगोचरत्वेनैव प्रतीयते । तदेवमात्मा-हङ्कारयोरेकलोलीभावपूर्वकमेव संव्यवहारो भवतीति सर्वेषां नः प्रत्यक्षमेतत् । अतो मुख्ययापि वृत्त्या अहंधियोच्यते, अहंशब्देना-भिधीयत आत्मेत्यर्थः ॥

वाङ्मनसागोचरस्याप्यहंशब्दबोध्यत्वं कथम्?

ननु मुख्ययापि वृत्त्या अहंशब्देनाभिधीयते चेत्, अहंवृत्तिगम्य

एवात्मेति पुनरापन्नम् । तथा च 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' (तै. २-९) इति श्रुतिविरोधः प्रसज्येतेति चेत् । लोकबुद्ध्यनुसाराददोष इति ब्रूमः । यदिदमुपवर्णितं प्रसिद्धलक्षणागुणवृत्तिभिरहंशब्दस्य प्रवृत्तिरात्मनीति तदिदं लोकबुद्ध्यनुसारात्, न तु वास्तविकेनैव वृत्तेन । दृष्टा हि देहादिमत्यात्मन्यहंप्रत्ययगोचरत्वबुद्धिरज्ञलोकस्य । तदनुसारेण प्रत्यगात्मनि प्रयुज्यमानोऽयमहंशब्दो देहादीनामनात्मत्वेन प्रत्याख्याने यत्परिशिष्टं तत्त्वं तदवाच्यमप्रत्ययगम्यमपि गमयतीत्यहंशब्दगोचर इवाहंप्रत्ययगम्य इव च भवत्यात्मेति कृत्वा कल्पितसंवृत्त्या संव्यवहरन्ति वृद्धा अहंशब्दगम्य आत्मेति । न तु परमार्थत एव किञ्चिच्छब्दप्रवृत्तिनिमित्तमात्मन्यस्तीति कृत्वा । अतो न दोषः । इत्थमेव च लोकबुद्धिमनुसरन्ती श्रुतिरप्याह 'अहं ब्रह्मास्मि' इति संव्यवहारार्थम् । सर्वत्रापि त्विदमंशभूतमहङ्कारं परित्यज्यैव प्रयोग इत्यनवद्यम् । यथोक्तम् **उपदेशसाहस्र्याम्** 'इदमंशोऽहमित्यत्र त्याज्योऽनात्मेति पण्डितैः । अहं ब्रह्मेति शिष्टोंऽशो भूतपूर्वगतेर्भवेत् ॥' (उप. ६-६) इति ॥५६॥

(मूलम्)

कीदृक्पुनर्वस्तु लक्ष्यम् -

नामादिभ्यः परो भूमा निष्कलोऽकारकोऽक्रियः ।
स एवाऽऽत्मवतामात्मा स्वतः सिद्धः स एव नः ॥५७॥

(क्लेशापहारिणी)

अहं ब्रह्मास्मीत्यत्र विवक्षितमात्मस्वरूपम् -

एवं तावत् प्रसिद्धलक्षणागुणवृत्तिभिरात्मन्यहंशब्दस्य प्रवृत्तिरित्युपपादितम् । परमार्थात्मन्यहङ्कारसंबन्धः सर्वथा नास्तीति चोक्तम् । इदानीं यथोक्ताहंशब्दोपलक्षितस्यात्मनः स्वतोरूपं निर्दिदिक्षुः

प्रश्नमुत्थापयति - **कीदृगिति** । लक्ष्यमित्युपलक्षणम् । प्रसिद्ध-लक्षणागुणवृत्तिभिरहंशब्देन संव्यवह्रियमाणमित्यर्थः ।।

उत्तरमाह - **नामादिभ्य इति** । अयमाशयः । विधिवदुपसन्नं नारदं प्रति भगवान् सनत्कुमारो नामाद्याशान्तानि वस्तून्युत्तरोत्तर-भूयस्त्वेनोपदिश्य तत्तद्ब्रह्मत्वेनोपासीनस्य फलमप्युक्त्वा आशाया अपि भूयस्त्वेन प्राणमुपदिदेश । प्राणब्रह्मोपासकस्य चातिवादित्वं फलमाह - 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति' (छां. ७-१५-४) इति । ततः प्राणादपि परं ब्रह्मोपदिशन् 'एष तु वा अतिवदति यः सत्येनातिवदति' (छां. ७-१५-५) इति सत्य-शब्दवाच्येन ब्रह्मणा अतिवदत एव परमार्थातिवादित्वमुक्त्वा तस्य च सत्यस्याधिगमे विज्ञानश्रद्धानिष्ठादिसाधनपरम्परां ततः तदेव च सत्यं भूमानमुपदिश्य तल्लक्षणमुवाच - 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छां. ७-२४-१) इति । य एष परमात्मा नामादि प्राणान्तेभ्यः परो भूमा 'यत्र नान्यत्पश्यति' इत्यादिश्रुत्या वर्णितः । अत एव निष्कलः निरवयवः, अकारकोऽक्रियश्च । क्रियाकारकफलशून्योऽद्वैत इति यावत् । स एव सर्वेषामात्मवतां प्राणिनाम् आत्मा परमार्थतः । न तु देहादिसंहतोऽहंप्रत्ययगम्यत्वे-नाभिमतो मीमांसकादीनाम् । स एव च नः सर्वसाक्षित्वात् स्वतःसिद्ध इष्ट अस्मभ्यमित्यर्थः । इदमुक्तं भवति । य एकस्सर्वभूतेषु गूढः परमात्मा स एवायम् 'अहं ब्रह्मास्मि' इत्यहंपदोपलक्षितत्वेनोपगम्यतेऽ-स्माभिः । स च स्वयंसिद्धत्वादेव नाहंप्रत्ययम् अन्यद्वा प्रमाणं स्वात्मसिद्धये काङ्क्षत इति ।।५७।।

९. आत्मनः कूटस्थनित्यता

(मूलम्)

अज्ञानोत्थबुद्ध्यादिकर्तृत्वोपाधिमात्मानं परिगृह्यैव अन्वय-व्यतिरेकाभ्याम् 'अहं सुखी दुःखी च' इत्यहङ्कारादेरनात्म-धर्मत्वमुक्तम्। केवलात्माभ्युपगमे अशक्यत्वात्, फलाभावाच्च। अथेदानीम् अविद्यापरिकल्पितं साक्षित्वमाश्रित्य कर्तृत्वाद्यशेष-परिणामप्रतिषेधार्थमाह -

एष सर्वधियां नृत्तमविलुप्तैकदर्शनः।
वीक्षतेऽवीक्षमाणोऽपि निमिषत्तद्ध्रुवोऽध्रुवम् ॥५८॥

(क्लेशापहारिणी)

ग्रन्थसंबन्धः -

उत्तरग्रन्थस्य संबन्धं स्फुटयितुं वृत्तार्थमनुकीर्तयति - **अज्ञानोत्थेति**। अयमाशयः। द्रष्टृव्यतिरेकेणाविद्यमानत्वात्, द्रष्ट्रन्वयेऽपि व्यतिरेकाच्च अहङ्कारादिरनात्मैवेति प्रतिपादितं प्राक्तनग्रन्थेन। तत्र द्रष्टृत्वं स्वाभाविक एवात्मनो धर्म इति स्यात् कस्यचिद् भ्रम इति तत्प्रत्याख्यानायोत्तरग्रन्थ आरभ्यत इति॥

ननु तर्हि किमिति द्रष्टृत्वमुक्तम्? द्रष्टृत्वमनङ्गीकृत्यैव किमित्यहङ्कारादिरनात्मत्वेन न निराकृत इति? तत्राह - **केवलात्माभ्युपगमे अशक्यत्वादिति**। निर्विशेषस्याव्यवहार्यस्य हि केवलात्मनोऽभ्युपगमे कस्य कुत्रान्वयः, कस्य कुतो व्यतिरेको वा शक्येत दर्शयितुम्? अतोऽन्वयव्यतिरेकयोर्यस्मिन् सत्येव शक्यमुपपादनं तस्य द्रष्टृत्वस्याभ्युपगमेनैव तद्दर्शितमित्यर्थः। **फलाभावाच्चेति**। न हि स्वतःसिद्धे निर्विशेषाद्वयात्मनि,

अन्वयव्यतिरेकापेक्षा विद्यते येन तत्साफल्यं भवेदित्यर्थः । किमिति तर्हि तद्द्रष्टृत्वमुत्तरत्र निराक्रियते ? - इत्याशङ्क्य तस्यानात्मधर्मत्वादेवेत्याशयेनाह - **अज्ञानोत्थेति** । 'बुद्ध्यादि' इत्यादिशब्दात् मुख्यप्राण इन्द्रियाणि च गृह्यन्ते । अज्ञानोत्थमेव यद्यपि तत्सर्वं बुद्ध्यादि, तथापि तत्तत्कर्तृत्वमध्यारोप्यैव तस्य तस्य विषयभूतस्यानात्मत्वमध्यवसितं कर्त्रन्वयकर्मव्यतिरेकाभ्यामेतावद्ग्रन्थेन - इत्यभिप्रायः ॥

उत्तरग्रन्थार्थः साक्षिसाक्ष्यान्वयव्यतिरेकौ -

वर्तिष्यमाणग्रन्थविषयमाह - **अथेदानीमिति** । साक्षित्वमादाय साक्ष्यन्वयसाक्ष्यभूतकर्तृतादिव्यतिरेकाभ्यामात्मनोऽशेषपरिणामप्रतिषेधायाह । उत्तरश्लोकमिति शेषः । साक्षित्वं तर्हि वास्तवं भवेदित्याशङ्कां परिहरति - **अविद्यापरिकल्पितमिति** । अविद्याकल्पितसाक्ष्यापेक्षं हि साक्षित्वं नाम - इति भावः ॥

अत्रेदं रहस्यम् । यद्यप्यात्मा स्वतःसिद्धः कूटस्थोऽद्वयश्च नित्यशुद्धबुद्धमुक्तस्वभाव एव परमार्थतः, तथा चान्वयव्यतिरेकोक्तिरत्र न घटत इव, अद्वितीये आत्मनि तदयोगात् ; तथापि यावद् वेदान्तवाक्यात् साक्षादात्मप्रतिपत्तिर्न भवति, तावत्तत्प्रतिपत्त्युपायत्वेन कल्पिताश्रयणेनाप्यन्वयव्यतिरेकौ भवत एव । तत्रापि तत्तत्कल्पितान्तरापवादार्थं कल्पितान्तराश्रयणं प्रतिपत्तिसौकर्यार्थं भविष्यतीत्यदोषः । यथोक्तं **बृहद्वार्तिके** 'पुंव्युत्पत्तिप्रधानत्वादन्वयादेरदोषता । न त्वन्वयादिनैवेहवस्तुतत्त्वस्य संस्थितिः ॥ यावत्त्वागमतः साक्षान्न वेत्त्यात्मानमद्वयम् । अन्वयाद्यात्मबोधार्थं तावत्तत्केन वार्यते ॥ क्लृप्तानामपि रज्ज्वादौ कल्पितान्तरसंश्रयात् । क्लृप्तान्तरापनुत्तिः स्याद्यथा तद्वदिहाऽऽत्मनि ॥' (बृ. वा. २-१-१६७, १७३, १७५) इति । तदेतत्प्रतिपत्तिक्रममाश्रित्यात्रापि अज्ञानकल्पितबुद्ध्यादिकर्तृत्वमध्यारोप्याहङ्कारसुखदुःखाद्यपवादः प्राक्कृतः । इदानीं त्वज्ञानमात्रोपाधि-

कृतसाक्षित्वमध्यारोप्य कर्तृत्वभोक्तृत्वाद्यपवादः क्रियते । यदनन्तरमेव वाक्यज्ञानेनाज्ञानसमुच्छित्तिः सेत्स्यतीति ॥

एष इति । एषोऽविलुप्तैकदर्शनः कूटस्थचिन्मात्रदृष्टिस्वभावः, सर्वधियां सर्वबुद्धीनां नृत्तं नर्तनं वृत्तिजातम् । वृत्तमिति पाठान्तरे तच्चरितं वृत्तिजातमित्यर्थः । निमिषद् व्यापारवद् स्वयमवीक्षमाणोऽपि वीक्षणव्यापारशून्योऽपि अध्रुवम् नित्यविकारित्वादनित्यम् स्वयं ध्रुव एव सन् वीक्षते प्रकाशयति । स्वरूपसत्तामात्रेण सवितेव स्वप्रकाश्यमित्यर्थः । तथा च कूटस्थपरिणामिनोर्विवेकः सुगम इति भावः ॥५८॥

(मूलम्)

ननु सर्वसिद्धान्तानामपि स्वस्वदृष्ट्यपेक्षया उपपन्नत्वात्, इतरेतरदृष्ट्यपेक्षया दुःस्थितसिद्धिकत्वात्, नैकत्रापि विश्वासं पश्यामः । न च सर्वतार्किकैरदूषितं समर्थितं सर्वतार्किकोपद्रवापसर्पणाय वर्त्म संभावयामः । उच्यते । विस्रब्धैः संभाव्यताम् । अनुभवमात्रशरणत्वात् सर्वतार्किकप्रस्थानानाम् । तदभिधीयते -

इमं प्राश्निकमुद्दिश्य तर्कज्वरभृशातुराः ।
त्वाच्छिरस्कवचोजालैर्मोहयन्तीतरेतरम् ॥५९॥

(क्लेशापहारिणी)

साक्षिणः स्वयंसिद्धत्वम् -

एवं तावत् कूटस्थनित्यः साक्षी वेदान्तमानैकसिद्धः सूत्रितः । अथास्य सूत्रस्य वृत्तिस्थानीयो ग्रन्थ आरभ्यते । प्रथमं तावत् साक्षिणः स्वरूपसिद्धिमेवाक्षिप्य परिहरन् आक्षेपं तावदुत्थापयति - **नन्विति ।** **मीमांसकास्तावदहंप्रत्ययगम्यमात्मानमुपगच्छन्ति ।** **लोकायतिकास्तु**

चैतन्यविशिष्टं कायमेवात्मेत्युपयन्ति । **बौद्धाः** पुनर्विज्ञानातिरिक्त आत्मा नास्तीत्याहुः ; तेष्वेव **केचित्तु** शून्यमेवात्मस्वभावं मन्यन्ते । तत्र स्वस्वदृष्ट्या मीमांसकादीनां दृष्टया स्वस्वसिद्धान्तस्योपपत्तिमत्त्वमस्ति, तदितरदृष्टया तु दुःस्थितसिद्ध एव स सिद्धान्तः । तत्र किं कारणमेकस्यैव सिद्धान्तस्योपपन्नत्वं विश्वसिमः ? एवं च त्वदभिमतसाक्षिणोऽपि परवादिदृष्ट्यपेक्षया दुःस्थितसिद्धिकत्वमेवेति किं कारणमत्रैव विश्वासं बध्नीमः ? - इत्याक्षेप्तुरभिप्रायः । ननु तथाप्यस्मत्प्रक्रिया सर्वतार्किकसंमता किं न स्यात् ? न हि कुत्रचिदपि सर्वेषां संप्रतिपत्तिर्नास्त्येवेति शक्यं वदितुम् । यदा च सर्वसंप्रतिपन्नं दर्शनमेकमभ्युपगम्यते, तदा अद्वैतदर्शनस्यैव तथात्वं युज्यते । यथोक्तमभियुक्तैः 'अविवादोऽविरुद्धश्च देशितः' (मां. का. ४-२) इति - इत्याशङ्क्य परिहरति - **न चेति** । अयमभिप्रायः । न तावत् सर्वे तार्किका अतीतानागतवर्तमानकालीना एकत्र शक्याः समाहर्तुम् । न चाद्वैतप्रक्रिया वर्तमानतार्किकैरदूषिता समर्थिता वा भवद्भिः सर्वदोषपरिहारेण । तस्मात् भवद्वचनमात्रेण न शक्यं श्रद्धातुं भवदीयमेव दर्शनं सर्वसंप्रतिपत्तिस्थानमितीति । सिद्धान्ती तु सर्वसंप्रतिपत्तिमप्रत्याख्येयां संभावयिष्यामीत्याह - **उच्यत - इति** । विस्रब्धैर्विश्वस्तैः संभाव्यतामस्मत्सिद्धान्तः सर्वसंमत इति । कथम् ? अनुभवमात्रशरणत्वात् सर्वतार्किकप्रस्थानानाम् । न ह्यनुभवमनाश्रित्य तर्कः प्रवर्तते । स एव चानुभवोऽस्माकं साक्ष्यात्मेति नाविश्वासे कारणमस्तीत्यभिप्रायः । तदभिधीयते । यथा चेदं तथोच्यते समनन्तरश्लोक इत्यर्थः ॥

इममिति । अनुभवमेव प्राश्निकं मध्यस्थं सभ्यमुद्दिश्य तर्कज्वरेण भृशमत्यर्थम् आतुराः ज्वरेणार्दिता इव प्रलपन्तः । त्वाच्छिरस्कवचोजालैः 'अमुकत्वात् इत्थम्', 'अमुकत्वान्न तथा' इति पञ्चम्यन्तहेतूक्ति-

रूपैरिन्द्रजालैः, इतरेतरं मोहयन्ति भ्रामयन्ति । यद्यपि तेषां क्वचिदपि तर्के निष्ठा संप्रतिपत्तिर्वा नावगम्यते तथापि 'ममैवानुभवसंमतस्तर्कः, ममैव तु' इति चोद्घोषयन्तः सर्वे अनुभवमेव प्राड्विवाकं स्वीकुर्वन्तीति नानुभवरूपे आत्मनि कस्यचिद्विमतिरित्यभिप्रायः ।।५९।।

(मूलम्)

अत्रापि चोदयन्ति । अनुभवात्मनोऽपि विक्रियाभ्युपगमे अनभ्युपगमेऽपि दोष एव । यस्मादाह -

वर्षातपाभ्यां किं व्योम्नश्चर्मण्येव तयोः फलम् ।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्समः ।।६०।।
बुद्धिजन्मनि पुंसश्च विकृतिर्यद्यनित्यता ।
अथाविकृतिरेवायं प्रमातेति न युज्यते ।।६१।।

अस्य परिहारः -

ऊर्ध्वं गच्छति धूमे खं भिद्यते स्विन्न भिद्यते ।
न भिद्यते चेत्स्थास्नुत्वं भिद्यते चेद्भिदास्य का ।।६२।।

इत्येतत्प्रतिपत्त्यर्थमाह -

अविक्रियस्य भोक्तृत्वं स्यादहंबुद्धिविभ्रमात् ।
नौयानविभ्रमाद्यद्वन्नगेषु गतिकल्पनम् ।।६३।।

(क्लेशापहारिणी)

अनुभवविषये आक्षेपः -

सिद्धान्ते साक्षिणः स्वयंसिद्धत्वेऽभ्युपगतेऽपि दोषस्तदवस्थ

इति शङ्कामुत्थापयति - **अत्रापीति** । कथमात्मनो सविक्रियत्वेऽविक्रियत्वे वा अभ्युपगते दोषादनिस्तारः ? इत्याशङ्क्य आक्षेप्ता स्वाशयमुत्तरश्लोकेनाचष्टे इत्याह - **यस्मादाहेति** ॥

वर्षातपाभ्यामिति । अस्या **वैनाशिककारिकाया** अयमभिप्रायः । वर्षेण आतपेन वा अविकार्ये आकाशे न कोऽप्यतिशयः क्रियते । चर्मण्येव तु विकार्यस्वभावे तयोर्वर्षातपयोः फलमस्ति सङ्कोचविकासरूपम् । तयोर्भयम् इति क्वचित् पाठः । तत्राप्ययमेवार्थः । तत्राऽऽत्मा चर्मोपमश्चेत् विकार्यस्वभावश्चेत्, तर्हि तस्यानित्यता ध्रुवेति व्यर्थः साक्षित्वसाधनप्रयासः । अथ खतुल्यः, नास्मिन् विक्रिया अभ्युपगम्यते, तर्ह्यसत्समः । न हि तदा अर्थक्रियाक्षमो भवेदात्मा - इत्यभिप्रायः ॥६०॥

अविक्रियस्यैव भ्रान्त्या भोक्तृत्वम् -

एतदेव विशदयति - **बुद्धिजन्मनीति** । विषयवेदनादिना बुद्धिजन्मनि तत्तज्ज्ञानोत्पत्तौ पुंसश्च साक्षिरूपस्य पुरुषस्यापि यदि विकृतिः स्यात्, तर्हि तस्यानित्यतैव स्यात् । चर्मादेरिव । ततश्च परमपुरुषार्थस्याभाव एव प्रसज्येत । तदुपभोक्तुः स्थायिनः कस्यचिदसिद्धेः - इति भावः । अथाविकृतिरेवात्मनि ज्ञानसुखदुःखादिभिर्बुद्धिविकृतावपि, तदायमात्मा प्रमाता ज्ञातेति, भोक्तेति वा न युज्यते । न हि प्रमाणफलमभुञ्जानः प्रमाता, क्रियाफलमभुञ्जानो भोक्तेति वा उपपद्यत इत्यभिप्रायः ॥६१॥

आक्षेपं प्रतिबन्ध्या परिहरिष्यन्नाह - **अस्येति** ॥

ऊर्ध्वमिति । धूमे ऊर्ध्वं गच्छति सति खमाकाशं भिद्यते विदीर्यते वा आहोस्विन्न भिद्यते । न भिद्यते चेत् स्थास्नुत्वं स्थितिरेव स्याद्धूमस्य न गतिः - इति दृष्टविरोधः । अथ भिद्यते खम् अस्य धूमस्य गमनेन, तस्मिन् पक्षे कास्य भिदा ? कीदृशोऽस्य विभाग

इति वक्तव्यम् । तत्तु नैव शक्यं निर्वक्तुम् । आकाशस्य विभागे विभक्तावयवयोरन्तरा अनाकाशप्रसङ्गात् इत्यर्थः ।।६२।।

इत्येतत्प्रतिपत्त्यर्थमिति । एतत्प्रतिबन्धीन्यायोपस्थापने विवक्षितांशस्य इदमित्थमिति प्रतिपत्त्यर्थम् आह । उत्तरश्लोकेनेति शेषः ।।

अविक्रियस्येति । अविक्रियस्यैवाऽऽकाशस्य धूमगमनेन भेद इव भवति धूमगत्युपाध्यविवेकात्, एवमहंबुद्धिविभ्रमात् अहंविक्रियाविषया बुद्धिरहंबुद्धिः । तस्या विभ्रमात् अहङ्कार एव तु परिणामी न त्वात्मा इति विवेकाग्रहनिबन्धनभ्रान्तेः, अविक्रियस्यैव सतः प्रमातृत्वमिव क्रियाफलभोक्तृत्वमिव च भवतीत्यर्थः । तथा च वास्तविकविक्रियाभावान्नानित्यता, अहमात्मनोरन्योन्याध्यासवशात् कल्पितप्रमातृत्वस्यापि संभवान्न दृष्टविरोधोऽपीति नोक्तविकल्पनावकाश इति भावः । तत्र सक्रियोपाध्यविवेकान्निष्क्रियेऽपि क्रियाध्यासे निदर्शनमाह - **नौयानेति** । यथा नौस्थस्य नावि गच्छन्त्यां तटस्थेष्वगतिष्वपि, नगेषु प्रातिकूल्येन गच्छन्ति वृक्षा इति कल्पनम् नौगतिविवेकाभावनिमित्तविभ्रमात्, एवं प्रकृतेऽपीत्यर्थः । यथोक्तं **भगवत्पादैः** - 'नौस्थस्य प्रातिलोम्येन नगानां गमनं यथा । आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः ।।' (उप. ५-३) इति ।।६३।।

(मूलम्)

यथोक्तार्थाविष्करणाय दृष्टान्तान्तरोपादानम् -

यथा जात्यमणेः शुभ्रा ज्वलन्ती निश्चला शिखा ।
संनिध्यसंनिधानेषु घटादीनामविक्रिया ।।६४।।

अयमत्रांशो विवक्षित इति ज्ञापनायाऽऽह -

यदवस्था व्यनक्तीति तदवस्थैव सा पुनः ।
भण्यते न व्यनक्तीति घटादीनामसंनिधौ ।।६५।।

तत्र च -

सर्वधीव्यञ्जकस्तद्वत्परमात्मा प्रदीपकः ।
संनिध्यसंनिधानेषु धीवृत्तीनामविक्रियः ॥६६॥

न प्रकाशक्रिया काचिदस्य स्वात्मनि विद्यते ।
उपचारात्क्रिया सास्य यः प्रकाश्यस्य संनिधिः ॥६७॥

(क्लेशापहारिणी)

कूटस्थतायां जात्यमणिदृष्टान्तः -

कूटस्थनित्येऽपि प्रमातृत्वं कर्तृत्वं भोक्तृत्वं चोपपद्यते उपाध्यविवेकवशादित्यत्रैव दृष्टान्तान्तरमुच्यत इत्याह - **यथोक्तेति** ॥

यथेति । यथा जात्यमणेः उत्कृष्टजात्युत्पन्नस्य महार्घस्य रत्नस्य शिखा प्रभा घटादीनां संनिधानेषु असंनिधानेषु वा यथा शुभ्रा शुद्धैव न तु तत्तद्विषयसंनिधौ तत्तद्रूपिता सती तदसंनिधौ अन्यथा भवति । ज्वलन्त्यैव तिष्ठति घटादिप्रकाशनसमय एव तु ज्वलति प्रकाशते, तदसंनिधौ तु न तथा - इति वैलक्षण्यं न भजते ; निश्चला न पुनश्चञ्चला विषयप्रकाशकाले स्वयमपि चञ्चला, स्थिरवस्तुप्रकाशनकाले च स्थिरा । एवं यथा सा शिखा अविक्रिया विकारहीनैव तिष्ठति । 'तद्वत्' इति दार्ष्टान्तिकश्लोकस्थेनान्वयः ॥६४॥

दृष्टान्तदार्ष्टान्तिकयोः कस्मिन्नंशे साम्यं विवक्षितमित्युत्तरश्लोकेन ज्ञापयतीत्याह - **अयमत्रेति** ॥

यदवस्थेति । यदवस्था सा शिखा घटादीनां संनिधौ तान् व्यनक्तीति भण्यते व्यपदिश्यते तदवस्थैव शुभ्रा ज्वलन्ती निश्चला चैव सतीत्यर्थः । तेषामसंनिधौ न तान् व्यनक्तीति भण्यते । न व्यञ्जनसमये केनचिद्व्यापारेण नूत्नतया विकारवतीत्यभिप्रायः ॥६५॥

अथ दार्ष्टान्तिके विवक्षितांशसाम्यं संगमयति - **तत्र चेति** । दार्ष्टान्तिके परमात्मनि चेत्यर्थः ।।

सर्वधीव्यञ्जक इति । न केवलमेकस्मिन्नेव पुरुषे बुद्धिवृत्तिव्यञ्जकत्वमात्मनः, यावत् सर्वेष्वपि प्राणिष्वित्यभिप्रायेणोक्तं सर्वधीव्यञ्जक इति । उक्तं हि **उपदेशसाहस्र्याम्** 'यथात्मबुद्धिचाराणां साक्षी तद्वत् परेष्वपि ।' (उप. ७-२) इति । अथवा संनिध्यसंनिधानेषु धीवृत्तीनामविक्रियः प्रदीपको भवतीति वाक्यशेषात् विषयसंनिध्यसंनिधिषु समान एवाविक्रिय आत्मनः प्रकाश इत्यंशस्यैवात्र विवक्षितत्वात् सर्वासामेव धियां बुद्धिवृत्तीनां व्यञ्जको भण्यत इत्येवार्थः । तदपि ह्युक्तं **भगवत्पादैः** - 'विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः । अशेषबुद्धिसाक्षित्वाद्बुद्धिवच्चाल्पवेदना ।।' (उप. ७-३) इति ।।६६।।

नन्वविक्रिय एव धीवृत्तीः प्रकाशयतीति कथमुच्यते ? न हि प्रकाशक्रिया आत्मानमाश्रयमाणा तमविकुर्वती स्वरूपं लभत इत्याशङ्क्य अत्रापि मणिसाधर्म्यमस्त्येवेत्याह - **न प्रकाशक्रियेति** । अस्यात्मनः प्रकाशनाम्नी क्रिया, स्वात्मनि स्वरूपाश्रिता काचित् न विद्यत एव । कथं तर्हि प्रकाशयतीति ? उच्यते । यः प्रकाश्यस्य धीवृत्तिजातस्य संनिधिः सैव अस्य क्रियेत्युपचारात् व्यपदिश्यते । यथा मणेर्व्यञ्जनक्रिया मणिस्वरूपभूतैव व्यंग्यसंनिध्यपेक्षया तथोपचर्यते तद्वदित्यभिप्रायः ।।६७।।

(मूलम्)

मैवं शङ्किष्ठाः साङ्ख्यराद्धान्तोऽयमिति । यतः -

यथा विशुद्ध आकाशे सहसैवाभ्रमण्डलम् ।
भूत्वा विलीयते तद्वदात्मनीहाखिलं जगत् ।।६८।।

तस्मादेष कूटस्थो न द्वैतं मनागपि स्पृशति । यतः -

शब्दाद्याकारनिर्भासाः क्षणप्रध्वंसिनीर्दृशा ।
नित्योऽक्रमदृगात्मैको व्याप्नोतीव धियोऽनिशम् ॥६९॥

(क्लेशापहारिणी)

आत्मनोऽद्वैतता -

नन्वेवं यद्यात्मा सर्वबुद्धिवृत्तिसाक्षी कूटस्थचैतन्यमात्रस्वरूपः, बुद्धिरेव परिणामिनी तत्तद्विषयसंस्पर्शात् सुखदुःखे अनुभवन्ती संसरति, बुद्ध्यात्मनोरविवेकादेव चाऽऽत्मनि संसारः कल्प्यत इत्यङ्गीक्रियते, तर्हि प्रकृतिरेव तु कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेप इति वदतां सांख्यानां सिद्धान्त एवायं वेदान्तापरनाम्ना भवद्भिः स्वीकृत इत्याप्नोतीत्याशङ्क्य परिहरति - **मैवं शङ्किष्ठा इति** ॥

यथेति । आकाशे विशुद्धस्वभाव एव यथा येन प्रकारेण तस्मादेवाकाशात् वाय्वग्निक्रमेण जातं जलं मेघमण्डलरूपेण प्रादुर्भूय कञ्चित्कालं स्थित्वा पुनस्तत्र विलीयमानं तिसृष्वपि जन्मस्थितिलयावस्थास्वाकाशात्मतां न व्यभिचरति, तद्वदेवात्मन एव जायमानं तेनैव लब्धस्थितिकं तत्रैव लीयमानं च तिसृष्वप्यवस्थास्वात्मस्वरूपं न व्यभिचरतीत्यभ्युपेमो वयम् । आत्मैव सर्वं बुद्ध्यादिकं जगदिति हि वेदान्तसिद्धान्तः, नैवं साङ्ख्यैरात्मैकत्वं प्रकृतेः परमार्थत आत्मानन्यत्वं वा अभ्युपगम्यते । अतो महदत्र वैषम्यमित्यर्थः । अत्रेदं तत्त्वम् । नैव वेदान्तनये बुद्धेः प्रमातृत्वं कर्तृत्वं भोक्तृत्वं वा तात्पर्येण विवक्ष्यते, किं तर्हि आत्मनः कूटस्थनित्यतां प्रतिपादयितुं बुद्धौ तत्सर्वम् अध्यारोप्यते । वस्तुतस्तु नैवात्मा प्रमातृत्वादिभाक्, अविक्रियत्वात् नापि बुद्धिः प्रमातृत्वादिभागिनी अचेतनत्वात्, अविद्याकल्पितत्वाच्च । तस्मादात्मनि सर्वविशेषरहित एवाद्वितीये स्वरूपविवेका-

भावनिबन्धनोऽयं प्रमातृत्वादिव्यवहार इति । अत्र तु ग्रन्थभागे प्रतिपत्तिसौकर्यार्थं साङ्ख्यप्रक्रियामवलम्ब्य तावद्बुद्धेः परिणाम उच्यते **अध्यारोपापवादन्यायेन** आत्मनः कूटस्थनित्यताबोधनार्थमिति सर्वमनवद्यम् ।।६८।।

यस्मादेवमाकाशवत् कूटस्थोऽसङ्गश्च, तस्माद् द्वैतसंबन्धरहित एवायमात्मा परमार्थतः स्वकार्यसंसृष्ट इवाऽऽकाश इत्युत्तरश्लोकार्थमवतारयति - **तस्मादिति** ।।

अयं द्वैतं मनागपि न स्पृशतीति कथमित्येतद्विवरीतुकाम आह - **शब्दादीति** । अत्रेत्थमाशङ्का भवेत् । यथा हि बुद्धिवृत्तयो स्वस्वविषयान् व्याप्नुवन्ति प्रकाशयन्ति च तथैवायमात्मा बुद्धिवृत्तीर्व्याप्नोति प्रकाशयति च । तत्र कथं बुद्धेरेव विषयसंस्पर्शः, न त्वात्मनो बुद्ध्यादिद्वैतसंस्पर्श इति विश्वसिम इति ? अत्र परिहारः । यदा धियः बुद्धिवृत्तयः शब्दाद्याकारेण परिणता एव तत्तन्निर्भासा भवन्ति, तदा आत्मचैतन्याभासयुक्ता एव च विषयान् प्रकाशयन्ति न तु स्वतन्त्रमेवेति सूचयितुं शब्दाद्याकारनिर्भासा इति विशेषणमिति ध्येयम् । किं च ता वृत्तयः क्षणप्रध्वंसिन्यः । न हि शब्दाकारेण परिणता बुद्धिः स्पर्शाकारेण परिणतिमन्तरेण तदाकारनिर्भासा भवेत् । अतस्तस्या विकारित्वं विषयसंस्पर्शेनाशुद्धत्वं चावश्यंभावीति भावः । अत एव क्रमदर्शित्वमपि बुद्धेः । एकैकविषयाकारतया परिणामेनैव क्रमशो तत्तद्विषयप्रकाशनसामर्थ्यात् । आत्मा पुनर्धियो यथोपवर्णिता व्याप्नोतीव, न तु तत्त्वतस्तदाकारपरिणामेन व्याप्नोति । सदैकरूपत्वात् । बुद्धिवृत्तयो हि जायमाना एव चिद्व्याप्ताश्चिदाभासयुक्ताश्च चिदात्मानमाश्रित्यैव जायन्ते यथा आकाशेऽभ्रमण्डलम् इत्युक्तम् । अत एवास्य न द्वैतसंस्पर्शोऽस्तीति भावः । अत एव चायम् **अक्रमदृक्**, युगपदेव स्वप्रकाशेन तदवस्थेनैव सर्वा धियः प्रकाशयति । जात्यमणिरिव

घटादीन् इत्यर्थः । किं चायम् **एक** एव सर्वा धियः प्रकाशयति । तेन सर्वज्ञश्चायं नाल्पविद्बुद्धिवदित्यर्थः । यथोक्तं **भगवत्पादैः** 'विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः । अशेषबुद्धिसाक्षित्वाद्बुद्धिवच्चाल्पवेदना ।।' (उप. ७-३) इति । तत्राप्यनिशं व्याप्नोतीव न तु बुद्धिवृत्तिवत् स्वव्याप्तिक्षणावच्छेदेनेत्यर्थः । यत एवंरूपः, तस्मादेव कूटस्थो द्वैतं मनागपि ईषदपि न संस्पृशतीति संबन्धवाक्यस्थयतःशब्दयोजना ।।६९।।

(मूलम्)

एवं च सति बुद्धेः परिणामित्वं युक्तम् -

अतीतानागतेहत्यान् युगपत्सर्वगोचरान् ।
वेत्त्यात्मवन्न धीर्यस्मात्तेनेयं परिणामिनी ।।७०।।

(क्लेशापहारिणी)

बुद्धेः परिणामित्वोपपत्तिः -

अल्पवित्त्वादेव बुद्धेः परिणामित्वमित्याह - **एवं च सतीति** ।।

तदेव स्पष्टयति - **अतीतेत्यादिना** । कालत्रयगतान् सर्वविषयानपि युगपत् यथा आत्मा वेत्ति तथा धीः न वेत्ति, किं तर्हि क्रमेणैव वेत्ति यस्मात् तेन हेतुना इयं परिणामिनी भवितुमर्हतीत्यर्थः ।।७०।।

(मूलम्)

ततश्चैतत्सिद्धम् -

अपश्यन् पश्यतीं बुद्धिमशृण्वन् शृण्वतीं तथा ।
निर्यत्नोऽविक्रियोऽनिच्छन्निच्छन्तीं चाप्यलुप्तदृक् ।।७१।।

द्विषन्तीमद्विषन्नात्मा कुप्यन्तीं चाप्यकोपनः ।
निर्दुःखो दुःखिनीं चैव निःसुखः सुखिनीमपि ॥७२॥

अमुह्यमानो मुह्यन्तीं कल्पयन्तीमकल्पयन् ।
स्मरन्तीमस्मरंश्चैव शयानामस्वपन्मुहुः ॥७३॥

सर्वाकारां निराकारः स्वार्थोऽस्वार्थां निरिङ्गनः ।
निस्त्रिकालस्त्रिकालस्थां कूटस्थः क्षणभङ्गुराम् ॥७४॥

निरपेक्षश्च सापेक्षां पराचीं प्रत्यगद्वयः ।
सार्वधिं निर्गतेयत्तः सर्वदेहेषु पश्यति ॥७५॥

(क्लेशापहारिणी)

आत्मनः कूटस्थता सर्वबुद्धिसाक्षित्वादेव -

सर्वबुद्धीनामपि साक्षित्वादेवाऽऽत्मनः कूटस्थत्वसिद्धिरित्याह - **ततश्चेति** ॥

अपश्यन्नित्याद्याः 'सर्वदेहेषु पश्यती'त्यन्ताः पञ्च श्लोकाः सुगमार्थाः । बुद्धिरेव श्रोत्रादिरूपपरिणामवतीत्येतत् **महाभारते** दर्शितम् 'शृण्वती भवति श्रोत्रम्' (मो. ध. २४८-४) इत्यादिना । आत्मनश्च श्रोत्रादिसाक्षित्वं श्रुत्यैव दर्शितम् 'दृष्टेर्द्रष्टा श्रुतेः श्रोता' (बृ. ३-४-२) इत्यादिना । सुखदुःखसंनिपातेऽन्तःकरणे स्वात्मानं प्रतिलभमानौ प्राप्तपरिहारविषयककृतिविशेषौ इच्छाद्वेषौ । कामप्रतिघातनिमित्तोऽपराधित्वेन विभावितवस्तुनिमित्तो वा अमर्षः कोपः । सुखदुःखे प्रसिद्धे इष्टानिष्टप्राप्तिनिमित्ते हर्षविषादजनके । मोहोऽविवेकनिमित्तो भ्रमः । कल्पनं विषयसङ्कल्पविकल्पनादिरूपम् । स्मरणं कालान्तरेऽनुभूतस्य तत्संस्कारोद्बोधे सति वर्तमानकाले एवमसावासीदिति विषयीकरणम् । दृष्ट्यादयः स्मरणान्ताः सर्वासामनुक्तानामपि वृत्तीनामुपल-

क्षणार्थाः । शयनं सुप्तिस्तमोनिमित्तः सर्वव्यापारोपरमः । तदेवं सर्ववृत्तिभिः सर्वाकारां तत्तद्विषयाकारेण परिणामिनीं बुद्धिं स्वयं निराकारो निर्विकार एव सन् अस्वार्थां शुक्तिरजतादिवत् परार्थां स्वार्थः सर्वविकल्पास्पदत्वात् । शुक्त्यादिस्थानीयः स्वतन्त्रसत्तारूप इत्यर्थः । 'स्वार्थदेशः परार्थोऽर्थः' (बृ. वा. १-४-३०१) इत्यादि**वार्तिक**प्रयोग-दर्शनात् । त्रिकालस्थां त्रैकाल्यविषयवृत्तिमत्त्वेन तिष्ठतीति तथोक्ताम् निस्त्रिकालः कालादीनामपि साक्षित्वात्, अत एव कूटस्थः । कूटवदेव एकरूपेणैव स्थितः । परमार्थनित्य इति यावत् । क्षणभङ्गुरां विविध-वृत्तिरूपेण प्रतिक्षणं दृष्टनष्टस्वरूपाम् । सापेक्षां ग्राह्यविषयापेक्षयैव लब्धस्थितिकाम् । अथवा आत्मसांनिध्यापेक्षयैव लब्धसत्ताकाम् - इत्यर्थः । प्रतीतरूपेण तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात् । निरपेक्षः स्वयंसिद्धः सच्चिदानन्दघनस्वभावः । पराचीनां परागेव बहिर्विष-येष्वञ्चन्तीं प्रत्यक् सर्वान्तरस्वभावः । अत एव धीवन्नानात्वराहित्या-दद्वयः । सावधिं देशकालवस्तुपरिच्छिन्नां निर्गतेयत्तोऽपरिच्छिन्न-स्वभावः । अत एव च सर्वदेहेषु स्थितः पश्यति । 'समं सर्वेषु भूतेषु' (गी. १३-२७) इति स्मृतेः । देहेष्वेव सर्वसाक्षितया समुपलभ्य-मानत्वात् देहेषु पश्यन्तमित्युच्यते न तु तदधिकरणकत्वेन स्थिततया । न हि निर्गतेयत्तस्य क्वचिदाधेयत्वं संभवतीति ध्येयम् । स्वरूपभूत-चित्प्रकाशेन सर्वशरीरस्थितां बुद्धिमवभासयन् पश्यतीव - इत्यर्थः ॥७५॥

(मूलम्)

एतस्माच्च कारणादयमर्थो व्यवसीयताम् -

दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भवेत् ।
दुःखिनः साक्षिताऽयुक्ता साक्षिणो दुःखिता तथा ॥७६॥

पूर्वस्यैव व्याख्यानार्थमाह -

नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः ।
धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ॥७७॥

(क्लेशापहारिणी)

आत्मनो दुःखित्वाभावे युक्तिः -

बुद्धिरेवोक्तविधया विविधपरिणामभागिनी न त्वात्मेत्यत्र हेत्वन्तरं वक्ष्यामीत्याह - **एतस्माच्चेति** ॥

दुःखीति ॥ यद्यात्मा दुःखी भवेत्, तर्हि दुःखित्वसिद्धिरेव कथमिति प्रष्टव्यो भवान् । न हि निःसाक्षिकस्य कस्यचिदपि सिद्धिरिष्यते । न चात्मानं विहाय साक्षी नामान्योऽस्तीत्याशयेनाह - **कः साक्षीति** । ननु स्वयमेव स्वदुःखित्वसाक्षीति किं न भवेत् ? अत आह **दुःखिन** इति । दुःखित्वसाक्षित्वयोस्तमःप्रकाशवद्विरुद्धस्वभावयोः कथमपि न युगपदेकत्र सद्भावसंभव इत्यभिप्रायः ॥७६॥

कथं न युक्ता दुःखिनः साक्षिता, साक्षिणो वा दुःखिता ? - इत्याशङ्क्य तद्व्याख्यानायैव परश्लोकप्रवृत्तिरित्याह - **पूर्वस्यैवेति** ॥

नर्ते स्यादिति । दुःखित्वं हि नाम दुःखरूपविकाराश्रयत्वम् । साक्षित्वं तु सर्वविकारद्रष्टृत्वम् । अतः परस्परव्यावृत्तस्वभावे दुःखित्वसाक्षित्वे इत्यर्थः । यथोपदिष्टं **भगवत्पादैः** - 'दुःखी स्याद्दुःख्यहंमानाद्दुःखिनो दर्शनान्न वा । संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ॥' (उप. १६-९) इति ॥ ७७॥

(मूलम्)

एवं सर्वस्मिन् व्यभिचारिणि, आत्मवस्त्वेवाव्यभिचारि - इत्यनुभवतो व्यवस्थापनायाह -

प्रमाणतन्निभेष्वस्या नोच्छित्तिर्मम संविदः ।
मत्तोऽन्यद्रूपमाभाति यत्तत्स्यात्क्षणभङ्गि हि ॥७८॥

उत्पत्तिस्थितिभङ्गेषु कुम्भस्य वियतो यथा ।
नोत्पत्तिस्थितिनाशाः स्युर्बुद्धेरेवं ममापि च ॥७९॥

(क्लेशापहारिणी)

आत्मनः संविद्रूपत्वादेवाव्यभिचरद्रूपत्वम् -

एवं चात्मबुद्ध्योः कूटस्थत्वपरिणामित्वदर्शनादेवात्मनोऽव्यभिचरद्रूपस्य परमार्थता, बुद्धेश्च व्यभिचरद्रूपाया अपरमार्थता चानुभवसिद्धेत्याहोत्तरश्लोकद्वयमिति संबन्धमाह - **एवं सर्वस्मिन्निति** ॥

प्रमाणेति । प्रमाणतन्निभेष्वित्युपलक्षणं प्रमाणाभावस्यापि । उक्तं हि **बृहद्वार्तिके** 'प्रमाणमप्रमाणं च प्रमाभासं च यद्भवेत् । चैतन्याकारमेवैतत् प्रथते सर्वमेव तत् ॥' (बृ. वा. २-४-१२४) इति । बुद्धेः परिणामा हि प्रमाणादीनि । तेषूच्छिन्नेष्वपि मम संविदः चैतन्यरूपस्य नोच्छित्तिः । सर्वबुद्धिपरिणामतदभावसाक्षित्वात् । संविदभावस्य कल्पयितुमप्यशक्यत्वाच्चेति भावः । यत्तु मत्तोऽन्यदचेतनं बुद्धिपरिणामरूपम् आभाति तत् क्षणभङ्गि हि । सर्वस्या अपि वृत्तेर्वृत्त्यन्तरमभिभूयैव स्वात्मलाभदर्शनादिति भावः ॥७८॥

न च बुद्धिगतैः परिणामैरात्मा किञ्चिदपि संस्पृश्यते, असङ्गत्वादाकाश इवेत्याह - **उत्पत्तीति** । कुम्भस्येव बुद्धेरुत्पत्तिस्थितिनाशेषु ममाप्याकाशस्थानीयस्योत्पत्तिस्थितिनाशा न स्युरिति दृष्टान्तदार्ष्टान्तिकयोस्तौल्यमित्यर्थः ॥७९॥

(मूलम्)

सुखदुःखतत्संबन्धानां च प्रत्यक्षत्वात्, न श्रद्धामात्रग्राह्यमेतत् -

सुखदुःखादिसंबद्धां यथा दण्डेन दण्डिनम्।
राधको वीक्षते बुद्धिं साक्षी तद्वदसंहतः ॥८०॥

(क्लेशापहारिणी)

आत्मा बुद्ध्यसंहतः, सुखदुःखादिद्रष्टृत्वात् -

ननु 'सुख्यहम्', 'दुःख्यहम्' इत्यादिप्रतिपत्तेः प्रत्यक्षत्वात् कथमिदं श्रद्दध्याम यदनात्मधर्मत्वमेव सुखादीनामिति ? न ह्यनुभवमपि युक्तिरपबाधितुं प्रभवेदित्याशङ्क्य सुखित्वदुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वमवसेयम्, तेषामप्यनात्मधर्मत्वस्य सार्वत्रिकानुभवसिद्धत्वादित्यभिप्रायकम् उत्तरश्लोकमवतारयति - सुखदुःखेति ॥

यथा कश्चिदाराधको दण्डविशिष्टस्य यतेर्द्रष्टृत्वादेव तेन दण्डेन स्वयमसंहतः, एवं सुखदुःखादिविशिष्टबुद्धिद्रष्टृत्वादेवायमात्मा तेन सुखदुःखादिना स्वयमसंहत इत्यवगम्यत इत्यभिप्रायः ॥८०॥

(मूलम्)

एतस्माच्च हेतोर्धियः परिणामित्वं युक्तम् -

येनैवास्या भवेद्योगः सुखकुम्भादिना धियः।
तं विदन्ती तदैवान्यं वेत्ति नातो विकारिणी ॥८१॥

अस्याश्च क्षणभङ्गुरत्वे स्वयमेवात्मा साक्षी। न हि कूटस्थावबोधमन्तरेण बुद्धेरेवाविर्भावतिरोभावादिसिद्धिरस्ति -

परिणामिधियां वृत्तं नित्याक्रमदृगात्मना ।
षड्भावविक्रियामेति व्याप्तं खेनाङ्कुरो यथा ॥८२॥

(क्लेशापहारिणी)

बुद्धेः परिणामित्वे युक्त्यनुभवौ -

एवं तावदात्मनः सुखदुःखादिमत्त्वाभावेऽनुभवानुसारिणी युक्तिः प्रदर्शिता । बुद्धेश्च तत्संबद्धत्वमनुभवसिद्धमित्युक्तम् । अथेदानीं बुद्धेः परिणामित्वे युक्त्यन्तरमुपन्यस्यते । तदाह - **एतस्माच्चेति** ॥

येनैवास्येति । सुखसंबन्धकाले सुखमेव वेत्ति न दुःखादिकम्, घटसंबन्धकाले च न पटादिकम् - इत्येवं येनैव विषयेण, आध्यात्मिकेन बाह्येन वा योगस्तमेव वेत्ति न तद्वेदनकाले एवान्यं विषयं वेदितुं प्रभवति । अतस्तत्तद्विषयाकारेण परिणममानैव वेत्तीति सा विकारिणीत्यवगम्यत इत्यर्थः । विदन्तीत्यपाणिनीयं रूपं कथञ्चित् समाधेयम् ॥८१॥

न केवलं युक्तिः, अपि त्वात्मानुभवोऽपि बुद्धेः परिणामित्वे जागर्तीत्याह **अस्याश्चेति** । प्रतिक्षणं भज्यते विपरिणमते ताच्छील्येनेति क्षणभङ्गुरा परिणामिनी । अस्या बुद्धेरेतत्स्वभावत्वे स्वयमेव प्रमाणान्तरनिरपेक्ष आत्मा साक्षी साक्षाद्द्रष्टेति स एव प्रमाणम् इत्यर्थः । कथमेतत् ? तत्राह - **न हीति** । न तावद्बुद्धिः स्वयमेव स्वस्याः साधयित्री । एकस्या एव कर्मकर्तृभावस्य विरोधात्, न चात्मानं विहायान्यदस्ति तस्या ग्राहकम् । अत आह - **न हीति** । आविर्भावतिरोभावौ आद्यन्तविकारौ । आदिशब्देन मध्यभाविनोऽपि विकारा गृह्यन्ते । न हि कूटस्थावबोधमन्तरेण बुद्धेरेवाविर्भावादीनां सिद्धिरस्ति । यदि तावद्बुद्धिरपि परिणाम्यन्तरादेव सेत्स्यति, किं कूटस्थापेक्षया इति मन्येत, तदापि तस्य परिणामवत्त्वं स्वसिद्धये परिणाम्यन्तरमपेक्ष्येत, तथा तस्यापीत्येवमनवस्था स्यात् । तस्मात्

कूटस्थावबोधरूप एवात्मा स्वयं तत्साक्षीति सिद्धमित्यभिप्रायः । एवं स्वस्य तिरोभावम् आविर्भावं वा न स्वयमेव साधयेद्धीः, तदानीं स्वस्या अभावादेव । न चात्मनोऽन्योऽस्ति तदवबोधने इति द्रष्टव्यम् ॥

परिणामिधियामिति । यथा खेन आकाशेन व्याप्त एवाङ्कुरो जायते, आकाशाव्याप्तप्रदेशस्य चिन्तितुमप्यशक्यत्वात्, अङ्कुरस्यापि परम्परया आकाशकार्यत्वेन तदनन्यत्वाच्च । विविधविक्रियाश्चानुभवति । एवं नित्याक्रमदृगात्मना नित्यश्चासौ अक्रमदृक्चेति नित्याक्रमदृक् युगपदेव कूटस्थचैतन्यप्रकाशेन कालादिसर्वविकारावभासकत्वात् । तादृशेनात्मना व्याप्तमेव परिणामिधियां स्वभावेनैव विकारिणीनां बुद्धीनां वृत्तं स्वरूपं षड्भावविक्रियां जायते, अस्तीत्यादिलक्षणामेति प्राप्नोतीत्यर्थः । परिणामिन्या हि बुद्धेः शब्दाद्याकारावभासा आत्मचैतन्यस्य विषयभूता उत्पद्यमाना एव नित्याविलुप्तदृगात्मचैतन्येन व्याप्ता एव जायन्ते इत्यत एव ते सर्वास्वप्यवस्थासु ज्ञानशब्दवाच्या भवन्ति । न ह्यन्यथा तेषां सिद्धिरवकल्पते ॥८२॥

(मूलम्)

सत आत्मनश्चाविकारित्वे युक्तिः -

स्मृतिस्वप्नप्रबोधेषु न कश्चित्प्रत्ययो धियः ।
दृशाऽव्याप्तोऽस्त्यतो नित्यमविकारी स्वयंदृशिः ॥८३॥

(क्लेशापहारिणी)

आत्मनश्चाविकारित्वे युक्त्यनुभवौ -

एवं बुद्धेः परिणामवत्त्वं साक्षिप्रत्यक्षेण प्रसाध्य, सर्वप्रत्ययसाक्षित्वादेव हेतोरात्मनोऽपरिणामित्वं सेत्स्यतीति वक्तुमुत्तरश्लोकप्रवृत्तिरित्याह-**सत इति** । बुद्धिवृत्तीनां व्यभिचरत्स्वरूपत्वात्, साक्षित्वतदन्यत्वाभ्यामनिर्वचनीयत्वाच्चासत्त्वमभिप्रेत्य तद्विपर्ययेणा-

त्मनः स्वयंसिद्धत्वं कूटस्थस्वरूपत्वं चेत्याशयेन 'सत' इति विशेषणम् ।।

स्मृतीति । धियः सम्यक्प्रत्ययमिथ्याप्रत्ययस्मृतिरूपेषु प्रत्ययेषु व्यभिचारिषु मध्ये न कश्चिदपि प्रत्ययो दृशा चैतन्येन अव्याप्तोऽस्ति । अव्यभिचारी हि सर्वत्रात्मा चैतन्यरूपेणेत्यर्थः । अतो दृशिरात्मा स्वयं नित्यमविकार्येवेति सिद्धमित्यभिप्रायः स्वयंदृशिः स्वयंप्रकाशः विकारभूतप्रत्ययनिरपेक्ष एवेत्यभिप्रायः ।।८३।।

(मूलम्)

एवं तावत् पराभ्युपगतप्रक्रियाप्रस्थानेन निरस्ताशेषविकारैकात्म्यं प्रतिपादितमुपपत्तिभिः । अथाधुना श्रौतीं प्रक्रियामवलम्ब्योच्यते -

अस्तु वा परिणामोऽस्य दृशेः कूटस्थरूपतः ।
कल्पितोऽपि मृषैवासौ दण्डस्येवाप्सु वक्रता ।।८४।।
षट्सु भावविकारेषु निषिद्धेष्वेवमात्मनि ।
दोषः कश्चिदिहासक्तुं न शक्यस्तार्किकश्वभिः ।।८५।।

(क्लेशापहारिणी)

श्रौतप्रक्रिययाप्यात्मनो निर्विकारत्वम् -

यत्तत् सूत्रितं कूटस्थनित्यत्वमात्मनः परिणामशीलाया बुद्धेर्वैलक्षण्यं च 'एष सर्वधियां नृत्तम्' (२-५८) इति, तदेतत् प्रपञ्चितम् एतावता ग्रन्थेन । बुद्धिस्तावत् तत्तद्विषयाकारपरिणामेनैव विषयान् क्रमेण पश्यति, सा च शुक्तिरजतादिवत् परार्था, व्यभिचरत्स्वरूपविविधवृत्तिमती । आत्मचैतन्यनिर्भासमन्तरेण दुःस्थितिसिद्धिकस्वरूपस्थितिका, सदा चिद्व्याप्तैव परिणममाना चेति प्रतिपादितम् ।

आत्मा पुनरेक एव युगपत् सर्वबुद्धिवृत्तीः प्रकाशयति । स च शुक्त्यादिवत् स्वार्थ एवाव्यभिचरच्चिन्मात्रस्वरूपः, स्वतःसिद्धः, सर्व-विकाररहितश्चेति प्रसाधितम् । एतच्च सर्वं प्रकृतिरेव कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः - इति साङ्ख्यप्रक्रियामवलम्ब्य तदीयेनापि प्रस्थानेनास्मन्मतमेव सेत्स्यतीत्यभिप्रायेणोक्तम् । तदाह - **एवं तावदिति** । **निरस्ताशेषविकारैकात्म्यम्** इति । सर्वशरीरेष्वपि सर्वबुद्धिवृत्तीनां साक्षी एक एव । तद्भेदे मानाभावात् । शरीरभेदबुद्धि-भेदतद्वृत्तिभेदानां साक्षिचैतन्यबलादेव प्रसिद्धेः, तेषां तद्व्यतिरिक्तत्वे मानाभावाच्चेति भावः । आत्मा च सर्वथा निर्विकार इत्येषा साङ्ख्य-प्रक्रियेत्यभाणि । इदानीं त्वात्मापि कल्पितपरिणामभागिति श्रौत-प्रक्रियामवलम्ब्योक्तमेव पुनरवधार्यत इत्याह - **अथाधुनेति** ।।

साङ्ख्यवेदान्तप्रक्रिययोर्वैलक्षण्यम् -

अयमत्र साङ्ख्यवेदान्तप्रस्थानयोर्विशेषः । साङ्ख्यास्तावदाहुः - त्रिगुणात्मिका प्रकृतिः प्रधानापराभिधाना स्वतन्त्रा, आध्यात्मिक-बुद्ध्यादिरूपेण आधिभौतिकशब्दादिरूपेण च स्वयं परिणमते । पुरुषाणां च भोगापवर्गौ संपादयति च स्वव्यापारेण । प्रधानपुरुषसंयोगा नित्यानुमेया इति । वेदान्तिनस्तु ब्रुवते सेयमनुपपन्ना कल्पना । स्वतन्त्रस्य प्रधानस्याचेतनत्वात् स्वयं प्रवृत्त्यनुपपत्तेः परिणामासंभवात्, अनाधेयातिशयेऽसङ्गे च पुरुषे तत्कृतभोगापवर्गसंसर्गानुपपत्तेश्च । अत एव च पुरुषबहुत्वे प्रमाणाभावः । 'एको देवः सर्वभूतेषु गूढः' (श्वे. ६-११) इत्यादिश्रुतिविरोधाच्च । तस्मात्, एकस्मिन्नेव पुरुषेऽविद्याकल्पितनामरूपमायावेशवशेन नानात्वम्, जगद्रूपेण परिणामः, जीवभावो, भोगापवर्गव्यवहारश्चेत्यभ्युपगन्तव्यम् । 'अजायमानो बहुधा विजायते' (तै. आ. ३-१३-३९) इति श्रुतिप्रामाण्यादिति ।।

तदेतत्सर्वमभिसंधायाह - **अस्तु वेति** । अस्तु वा दृशेः कल्पितः परिणामोऽपि । तथाप्यस्य कूटस्थरूपतः स्वतोऽव्यभिचरित-स्वभावत्वात् असौ परिणामः, अप्सु दण्डस्य वक्रतेव मृषैव मिथ्यैवेत्यर्थः ।।८४।।

किमतो यद्येवम् ? तत्राह - **षट्स्विति** । आत्मनि षट्स्वपि भावविकारेषु जायते अस्तीत्यादिषु एवम् उक्तनीत्या मायिकस्य स्वास्पदसंस्पर्शाभावेन निषिद्धेषु सत्सु इह नित्यशुद्धबुद्धमुक्ते आत्मनि तार्किकश्वभिः दूरतो भषद्भिरिव श्वभिः शुष्कतर्कप्रयोक्तृभिः, कश्चिदपि दोषः कर्तृत्वभोक्तृत्वानित्यत्वादिः आसक्तुमासञ्जयितुं न शक्यते । अथवा इह श्रौतप्रक्रियायां न कश्चन दोषः प्रसञ्जयितुं शक्यते इत्यर्थः । न ह्यध्यस्तगतेन दोषेण तदास्पदं वस्तु मनागपि संबध्यते, न ह्यध्यस्तेन जलेनोषरभूमिः पङ्कीक्रियते इत्यभिप्रायः । श्रूयते हि 'न जायते म्रियते वा विपश्चित्' (का. १-२-१८) इति, 'अजायमानो बहुधा विजायते' (तै. आ. ३-१३-३९) इति च ।।८५।।

(मूलम्)

प्रकृतमेवोपादाय बुद्धेः परिणामित्वम् आत्मनश्च कूटस्थत्वं युक्तिभिरुच्यते -

प्रत्यर्थं तु विभिद्यन्ते बुद्धयो विषयोन्मुखाः ।
न भिदाऽवगतेस्तद्वत्सर्वास्ताश्चिन्निभा यतः　　।।८६।।

स्वसंबद्धार्थ एव -

सावशेषपरिच्छेदिन्यत एव न कृत्स्नवित् ।
नो चेत् परिणमेद् बुद्धिः सर्वज्ञा स्वात्मवद्भवेत्　　।।८७।।

अतोऽवगतेरेकत्वात् -

चण्डालबुद्धेर्यद्द्रष्टृ तदेव ब्रह्मबुद्धिदृक् ।
एकं तदुभयोर्ज्योतिर्भास्यभेदादनेकवत् ॥८८॥

कस्मात् ?

अवस्थादेशकालादिभेदो नास्त्यनयोर्यतः ।
तस्माज्जगद्धियां वृत्तं ज्योतिरेकं सदेक्षते ॥८९॥

(क्लेशापहारिणी)

आत्मनः कूटस्थतायां बुद्धेश्च परिणामित्वे युक्तिः -

इदं च प्रसङ्गादुक्तं वेदान्तप्रक्रियामवलम्ब्यात्मनो मिथ्या-परिणामवत्त्वम् । प्रकृतं तु साक्ष्यन्वयसाक्ष्यव्यतिरेकार्थमात्मनः कूटस्थताप्रदर्शनम्, बुद्धेश्च परिणामित्वव्यवस्थापनम् । अतस्तदेवानुवर्त्यत इत्याह - **प्रकृतमेवोपादायेति** ॥

प्रत्यर्थमिति ॥ बुद्धयः प्रत्यर्थं तु विभिद्यन्ते । तुशब्दोऽव-धारणार्थको भिन्नक्रमः । अर्थमर्थं प्रति भिद्यन्त एवेत्यर्थः । तत्र हेतुसमर्पकं विशेषणं **विषयोन्मुखा इति** । यस्मात् तत्तद्विषयाकारा इत्यर्थः । न हि घटाकारपरिणतिमन्तरेण घटबुद्धिः समस्तीति भावः । तद्वत् यथा बुद्धीनां भिदा, तथा तदवगतेर्न भिदास्ति । यतः सर्वास्ताश्चिन्निभा एव, चिदाभासा एव । अयं भावः । यो यो बुद्धेः प्रत्ययो घटादिविषयमवभासयतीति व्यवह्रियते, स स सर्वोऽप्यात्म-चैतन्याभासफलावसान एव तत्तद्बुद्धित्वेन व्यपदिश्यते इत्यतो विषयानु-वर्तिन्यो बुद्धयः सर्वा आत्मचैतन्यानुविद्धा एव स्वविषयावभासनक्षमाः । न त्वेवमात्मचैतन्यं कदापि बुद्धिमपेक्षते स्वप्रकाशनायेत्यतो यदाभासा-व्यभिचारित्वं सर्वासां बुद्धीनाम्, तदेकं भेदरहितमिति ॥८६॥

बुद्धिस्तु नैवमव्यभिचरितस्वरूपेत्याह - **स्वसंबद्धार्थ एवेति** । श्लोकस्थ 'परिच्छेदिनी'त्यनेनास्य संबन्धः ॥

सावशेषपरिच्छेदिनीति । बुद्धिः स्वसंबद्धार्थ एव सावशेषपरिच्छेदिनी, संबद्धार्थमेव परिच्छिनत्ति, तत्रापि सावशेषमेव परिच्छिनत्ति न त्वन्यमप्यर्थं तदैव वेत्ति । नापि कृत्स्नं वेत्तीत्यभिप्रायः । अत एवेयं **न कृत्स्नवित्** । नो चेत् तत्तत्परिच्छेदार्थं तत्तदर्थाकारेण परिणमेत् तदा अशेषस्वप्रचारसाक्षिस्वात्मवत् स्वयमपि सर्वज्ञा भवेत् । युगपदेव सर्वविषयप्रकाशिनी भवेदित्यभिप्रायः । न चैतदस्तीत्यतः परिणामिनीत्यवगम्यत इति भावः । यद्यप्यात्मनोऽव्यभिचरत्स्वरूपत्वेन सर्वावभासकत्त्वं बुद्धेः परिच्छिन्नार्थप्रकाशकत्वं च पूर्वमप्युक्तम्, तथापि तदेवानूद्येहात्मन एकत्वं स्फुटीक्रियत इत्यदोषः ।।८७।।

सर्वदेहेष्वात्मैकत्वम् -

न भिदावगतेरस्तीत्युक्तम् । ततः किं सिध्यतीत्याशङ्क्याह - **अतोऽवगतेरिति** । एकत्वात्, एकरूपत्वादित्यर्थः ।।

चण्डालबुद्धेरिति । चाण्डालोऽयम् इति अत्यन्ताशुद्धवस्तुगोचरबुद्धेर्यच्चैतन्यं द्रष्टृ साक्षिभूतं तदेव ब्रह्मबुद्धिदृक् हिरण्यगर्भबुद्धिसाक्षिभूतमपि ब्राह्मणबुद्धिसाक्षिभूतं वा । उभयोरपि ज्योतिः प्रकाशकं चैतन्यम् एकमेव सत् उपाधिभूतभास्यवस्तुवशादनेकवद् विभाव्यते । अतः सर्वदेहेष्वपि साक्षी एक एवेति सिद्धमित्यभिप्रायः ।।८८।।

कथमेकमेव भासकज्योतिः सर्वत्रेति शक्यं संभावयितुं तत्तदवस्थादेशकालादिभेदकेषु सत्सु ? इति शङ्कामुत्थापयति - **कस्मादिति** ।।

समाधत्ते - **अवस्थेति** ।। अनयोः चण्डालबुद्धिब्रह्मबुद्धिद्रष्ट्रोः, अवस्थादिभेदो नास्ति । यद्यद्धि भेदकत्वेनोन्नीयते, तत् तत् सर्वं प्रति साक्षित्वादेव ; साक्षिणश्च साक्ष्यधर्मसंस्पर्शानुपपत्तेरिति भावः । यस्मादेवं तस्मात् जगद्धियां जगति विद्यमानानां सर्वासामपि धियां

वृत्तं चारित्रम् चैतन्यज्योतिरेकमेव सदा कालानवच्छेदेन ईक्षते स्वयमविक्रियमेव सदवभासयतीत्यर्थः ॥८९॥

(मूलम्)

सर्वदेहेष्वात्मैकत्वे प्रतिबुद्धपरमार्थतत्त्वस्याप्यप्रतिबुद्धदेह-संबन्धात्, अशेषदुःखसंबन्ध इति चेत्, तन्न -

बोधात्प्रागपि दुःखित्वं नान्यदेहोत्थमस्ति नः ।
बोधादूर्ध्वं कुतस्तत्स्याद्यत्र स्वगतमप्यसत् ॥९०॥

(क्लेशापहारिणी)

एकात्मतावादे ज्ञानिनो न सर्वजीवदुःखानुभवप्रसङ्गः -

तदेवं साङ्ख्यप्रक्रियाभ्युपगमेनाप्यात्मैकत्वं प्रसाधितममृष्यमाणः परः शङ्कते - **सर्वदेहेष्विति** ॥

परिहरति - **बोधादिति** । अन्यदेहोत्थं परदेहगतं दुःखं बोधात् प्रागपि आत्मैकत्वज्ञानात् पूर्वमपि नः अस्माकं पक्षे नास्ति । साङ्ख्यप्रक्रियामवलम्ब्य पुरुषबहुत्वाभ्युपगमेऽपि हि साक्ष्यधर्माणां साक्षिणि संक्रमानुपपत्तेर्नास्त्यन्यदेहोत्थदुःखस्यैतद्देहा-वच्छिन्नात्मनि संभवः । न च सांख्योऽपि पुरुषस्य वस्तुतः सुखदुःखादिमत्त्वमिच्छति । बुद्धिसंबन्धाभ्युपगमात्सुखदुःखादीनाम् । अस्माकं तु पुरुषबहुत्वं घटाकाशन्यायेन कल्पितम् । न च कल्पितदुःखस्याप्येकजीवगतस्य सर्वजीवेषु संभवः । घटाकाश-न्यायेनैव । **यथाहुरभियुक्ताः** - 'यथैकस्मिन् घटाकाशे रजोधूमादिभि-र्युते । न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः' (गौ. का. ३-५) इति । साक्षिणस्तु परमार्थात्मनः सर्वदेहगतत्वेऽपि न दुःखसंबन्धः । 'अनश्नन्नन्योऽभिचाकशीति '(मुं. ३-१-१) इति श्रुतेः इत्यभिप्रेत्योक्तं 'नः' इति । तदेतद्बोधात्पूर्वमविद्याकल्पितजीवबहुत्वाभ्युपगम-

दशायामुक्तम् । बोधादूर्ध्वं तु कुत एव हेतोस्तत् परदेहगतं दुःखमात्मनि प्रसञ्जनीयं स्यात् ? सांख्यानामपि तावदविवेकेनैव बुद्धिगतं दुःखं पुरुषेष्वारोप्यत इति पुरुषसतत्त्वबोधादूर्ध्वं निर्विशेषाः सर्वे चेतनमात्रा आत्मान इत्यवबोधात् परस्तात् न स्वदेहगतदुःखसंबन्धोऽस्ति । दुःखस्य बुद्धिधर्मत्वाभ्युपगमादेव । अस्माकं पुनर्यत्र जीवे स्वगतमप्यसत् । जीवस्य ब्रह्मणोऽनन्यत्वेन जीवत्वस्यैव मिथ्यात्वावगमात् 'तत्त्वमसि' (छां. ६-८-७), 'नान्योऽतोऽस्ति विज्ञाता' (बृ. ३-७-२३) इत्यादिश्रुतिभ्यः । तत्र कैव कथा परगतदुःखस्य - इत्येवमाशयेन 'नः' इत्युभयतोऽन्वयिपदं प्रयुक्तमिति ध्येयम् ।।

व्याख्यानान्तरदूषणम् -

बोधादूर्ध्वमिति ब्रह्मात्मैक्यापरोक्ष्येण मूलाज्ञाने बाधिते इति **केचिद् व्याकुर्वते** । तदनादेयं व्याख्यानम् । ब्रह्मात्मैक्यापरोक्ष्यस्यात्राप्रकृतत्वात्, मूलाज्ञानस्य ग्रन्थकृदनभिमतत्वाच्च । अत्र ह्यविद्यापरिकल्पितं साक्षित्वमाश्रित्य कर्तृत्वाद्यशेषपरिणामप्रतिषेधः प्रतिज्ञातो (२-५८) ग्रन्थकृता । मूलाज्ञानं च तदभिमतप्रक्रियानन्तर्गतमिति दर्शितं प्रागेवेति ।।९०।।

(मूलम्)

न चेयं स्वमनीषिकेति ग्राह्यम् । कुतः ? श्रुत्यवष्टम्भात् -

शब्दाद्याकारनिर्भासा हानोपादानधर्मिणी ।
भास्येत्याह श्रुतिर्दृष्टिरात्मनोऽपरिणामिनः　　।।९१।।

का न्वसौ श्रुतिः ?

दृष्टेर्द्रष्टारमात्मानं न पश्येर्दृश्यमानया ।
विज्ञातारमरे केन विजानीयाद्धियां पतिम्　　।।९२।।

(क्लेशापहारिणी)

उक्तार्थे श्रुतिप्रमाणोदाहरणम् -

बुद्धिः परिणामिनी कूटस्थस्त्वात्मा इत्येतच्छ्रुतिबलादेवोच्यतेऽस्माभिः । युक्तयस्तु श्रुत्यनुगृहीता एवानुभवाङ्गत्वेनाश्रीयन्त इत्याह - **न चेति** ।।

शब्देति । आत्मचैतन्याभासानुगृहीतत्वात् शब्दाद्याकारनिर्भासा हेयोपादेयविषयत्वाद् हानोपादानधर्मिणी च दृष्टिः, अपरिणामिनः स्वभास्यानुगुणपरिणामशून्यस्याहेयानुपादेयस्वभावस्यात्मनश्चैतन्यभासा भास्या-इत्याह श्रुतिः । तामेवावलम्ब्येदमुक्तमस्माभिरपीत्यर्थः ।।९१।।

तादृशीं श्रुतिमेव नोपलभामहे इत्याशयेन पृच्छति पूर्वपक्षी - **का न्वसौ श्रुतिरिति** ।।

तदुत्तरत्वेन श्रुतिमुदाहरति - **दृष्टेर्द्रष्टारमिति** । 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयाः' (बृ. ३-४-२) इत्याद्या श्रुती रूपाकारेण परिणामिन्या दृष्टेः द्रष्टारं कूटस्थचैतन्येनावभासकं दृष्टेरप्यात्मानं सन्तं न पश्येः, दृश्यमानया चैतन्यविषयभूतया दृष्ट्या विषयीकर्तुं न शक्नुयाः । एवं शब्दाकारेण परिणामिन्याः श्रुतेः श्रोतारमवभासकं श्रुतेरप्यात्मानं न शृणुयाः, विषयभूतया श्रुत्या विषयीकर्तुं न शक्नुया इत्याह । अत्र हि दृष्टिश्रुत्यादिशब्दव्यपदेश्या बुद्धिः रूपशब्दाद्याकारेण परिणामिनी द्रष्टृश्रोत्रादिशब्दगम्येनात्मना भास्येत्युच्यते । 'येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयात्' (बृ. २-४-१४) इतीयं श्रुतिस्तु सर्वमिदं बुद्ध्यन्तं येन चैतन्येन विज्ञात्रा विषयीकरोति तं केन करणेन विजानीयात् ? न हि करणेन कर्ता विषयीक्रियेत, सर्वस्यापि करणस्य विज्ञेये विनियुक्तत्वात्, नाप्यात्मा स्वात्मनैव विज्ञायेतेति । बोधादूर्ध्वमपि विज्ञातारं केवलमद्वयं सन्तं केन विजानीयात्, विज्ञातृव्यतिरिक्तस्यैवाभावादिति कूटस्थात्मचैतन्यस्य

सर्वथाप्यविषयत्वमाहेत्यभिप्रायः । 'धियां पतिम्' इति विशेषणं तु सर्वा धीवृत्तय आत्मानमाश्रित्यैव जायन्ते स्वविषयनिर्भासनक्षमाश्च भवन्ति, स तु ता अनपेक्ष्यैव स्वेनैव ज्योतिषा भाति । सुषुप्त्यादिषु तासां प्रत्यस्तमयेऽपि तद्भानाविपरिलोपादित्यभिप्रायकमिति मन्तव्यम् ।।९२।।

(मूलम्)

यस्मात् सर्वप्रमाणोपपन्नोऽयमर्थस्तस्मात् अतोऽन्यथावादिनो जात्यन्धा इवानुकम्पनीया इत्याह -

तदेतदद्वयं ब्रह्म निर्विकारं कुबुद्धिभिः ।
जात्यन्धगजदृष्ट्येव कोटिशः परिकल्प्यते ।।९३।।

प्रमाणोपपन्नस्यार्थस्याऽसंभावनात् तदनुकम्पनीयत्वसिद्धिः । तदेतदाह -

यद्यद्विशेषणं दृष्टं नात्मनस्तदनन्वयात् ।
खस्य कुम्भादिवत्तस्मादात्मा स्यान्निर्विशेषणः ।।९४।।

अतश्चात्मनो भेदासंस्पर्शः । भेदस्य मिथ्यास्वाभाव्यात् । अत आह -

अवगत्यात्मनो यस्मादागमापायि कुम्भवत् ।
साहङ्कारमिदं विश्वं तस्मात्तत्स्यात् कचादिवत् ।।९५।।

(क्लेशापहारिणी)

आत्मनः कूटस्थत्वमनतिशङ्कनीयम् -

एवं श्रुत्युपपत्तिविद्वदनुभवेभ्यः साधितत्वादेवात्मनः कूटस्थत्वमनतिशङ्कनीयमित्याह - **यस्मादिति** । यद्यपि प्रमाणसंप्लववादो नाङ्गीक्रियते सिद्धान्ते, तथापि कूटस्थसाक्षी तावत् स्वयंसिद्ध

एवानुभवमात्रात्मा । तद्‌गताज्ञाननिवर्तनमुखेन तु श्रुत्युपपत्ती तत्रोपकुरुत इति सर्वप्रमाणोपपन्नत्ववाचोयुक्तिर्न विरुध्यत इति ध्येयम् । तस्मात्, अतोऽन्यथावादिनः कूटस्थस्वरूपतोऽन्यथा आत्मानमूरीकृत्य अहंप्रत्ययगम्यम्, ज्ञानसुखदुःखादिगुणकम्, क्षणिकविज्ञानरूपम्, शून्यरूपं वा - इत्येवं विविधं कल्पयन्तः, 'एवमात्मा', 'नैवमात्मा' - इति च विवदन्तः परिच्छिन्नात्मबुद्धयो जात्यन्धा इव अनुकम्पनीया अनाद्यविद्याविमूढत्वादित्याहेत्यर्थः ।।

तदेतदद्वयमिति । कुबुद्धिभिः कुत्सितबुद्धिभिः । अप्रतिष्ठिततर्कमात्रशरणैः आगमवदाचार्यानाहितसंस्कारबुद्धिभिरित्यर्थः । अद्वयम्, सजातीयविजातीयस्वगतभेदरहितम् अत एव स्वतो वा परतो वा विकारासहमपि सत् तदेतद् यथोपवर्णितं ब्रह्म, जात्यन्धगजदृष्ट्येव यथैव जात्यन्धाः मूढाः स्पर्शमात्रगृहीतगजावयवा एव अवयवमात्रधर्मान् गजे अतिदिश्य कृत्स्नगजबुद्धिं अवयवमात्रे परिकल्पयेयुः, तथैवाकृत्स्नदृष्ट्या 'अस्ति' 'नास्ति', 'सगुणम्' 'निर्गुणम्', 'सक्रियम्' 'निष्क्रियम्' - इत्यादिप्रकारैः कोटिशः परिकल्प्यते इत्यर्थः ।।९३।।

अद्वैतं ब्रह्मेत्यपि तव विकल्पमात्रं किं न स्यात् ? इत्यत आह - **प्रमाणोपपन्नस्येति** । 'असंभावनात्' इत्युपलक्षणम् । विपरीतभावनया विकल्पनाच्चेति द्रष्टव्यम् । एवं ह्युदाहृतजात्यन्धदृष्टान्त उपपद्यते । **तदेतदाहेति** - उपपन्नत्वमेवाहेत्यर्थः ।।

यद्यदिति । यथा कुम्भादयः - 'कुम्भाकाशः' 'करकाकाशः' इत्यादिव्यवहारे खस्य आकाशस्य विशेषणीभूता अपि - न तद्धर्माः आकाशान्वयेऽपि तद्व्यतिरेकात्, एवं सशरीरत्वसप्राणत्वसमनस्त्वसुखित्वदुःखित्वादिकं यद्यदात्मविशेषणत्वेनाविवेकिभिः दृष्टम्, न तत् तस्यात्मनः । आत्मान्वयेऽपि तद्व्यतिरेकात्, तस्मादात्मा निर्विशेषणः स्यात् इति प्रमाणोपपन्नम् इत्यर्थः ।।९४।।

न केवलमात्मानन्वयित्वात्, किं त्वागमापायिस्वरूपत्वादितरेतर-व्यभिचारादप्यनात्मधर्मत्वं सुखदुःखादीनामित्याह - **अतश्चेति** । भेदासंस्पर्शो, भेदस्य मिथ्यास्वाभाव्यात् सर्पधारादिलक्षणविकल्पित-भेदस्य मिथ्यात्वादेव यथा रज्ज्वादेस्तदसंस्पर्शः, तद्वदित्यर्थः । **'अत आह'** इत्युक्तहेतोरेव हृदि स्थितमाशयं स्पष्टमाहोत्तरश्लोकेनेत्यर्थः ।।

अवगत्यात्मन इति । साहङ्कारमिदं विश्वं अवगत्यात्मनः यस्मात् आकाशापेक्षया कुम्भवदागमापायि - आगच्छति कुम्भः आकशधर्मत्वेन प्रतीतो भवति 'कुम्भाकाशः' इति प्रतीतिकाले ; अपैति च विनष्टो भवति, 'आकाशमेवेदम्' इत्यवधारणकाले यथा, तथा अहमादिविश्वमप्यवगत्यात्मनि आगच्छति तस्मादपैति च इति आगमा-पायीति दृष्टनष्टस्वरूपत्वमेवात्र विवक्षितम् । मिथ्यास्वाभाव्योप-पादकत्वेन दृष्टान्तप्रणयनादिति बोध्यम् । विवेकिदृष्ट्या आकाश-विकारा हि कुम्भादयस्तद्व्यतिरेकेण वस्तुतो न सन्त्येव ; एवमहङ्का-रादेरपि आत्मविकारत्वात् तदव्यतिरिक्तत्वमेवेति भावः । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां . ६-१-४) इत्यादिश्रुतिभ्य इत्यर्थः । अत एवाह **'तस्मात्तत्स्यात्कचादिवत्'** इति । यथा तैमिरिकदृष्टकेशमशकमक्षिकादेर्न वस्तुसत्त्वम्, एवमहङ्कारादिविश्व-स्यापीत्यर्थः ।।९५।।

---

१०. अन्वयव्यतिरेकन्यायोपसंहारः

(मूलम्)

सर्वस्यैवानुमानव्यापारस्य फलमियदेव यद्विवेकग्रहणम् । तदुच्यते -

बुद्धेरनात्मधर्मत्वमनुमानात् प्रसिध्यति ।
आत्मनोऽप्यद्वितीयत्वमात्मत्वादेव सिध्यति ॥९६॥

(क्लेशापहारिणी)

अन्वयव्यतिरेकलब्धोऽर्थः -

तदेवं द्रष्ट्रन्वयदृश्यव्यतिरेकाभ्यां साक्ष्यन्वयसाक्ष्यव्यतिरेकाभ्यां च सिद्धमर्थमुपसंहरति - **सर्वस्यैवेति** । अनुमानव्यापारस्येति, यथोपदर्शितान्वयव्यतिरेकदर्शनलक्षणमानसव्यापारस्येत्यर्थः । न तु तार्किकाभिमतानुमानप्रमाणमिहाभिप्रेतम् इति स्पष्टमेव । अनुमातुः परमार्थस्वरूपस्यैवात्मत्वेन, एकस्यैव युगपन्मातृमेयत्वासंभवात् । यथोक्तान्वयव्यतिरेकदर्शनस्यानुमानत्वव्यपदेशस्तु, अनुभवरूपप्रत्यक्षानुसारिव्यापारत्वात्, अनात्मन आत्मासंस्पर्शित्वे मानत्वाच्चेति संतोष्टव्यम् ॥

बुद्धेरिति । बुद्ध्यादेरित्यर्थः । आत्मविलक्षणस्य सर्वस्याप्यनात्मत्वात् । तस्यात्मधर्मत्वाभावः, अन्वयव्यतिरेकरूपानुमानात् प्रसिध्यति । आत्मनोऽपीति । आत्मनस्तु इत्यर्थः । आत्मत्वादेव, सर्वमाप्नोतीत्यात्मा । सर्वस्यापि तदीयचैतन्येन व्याप्तेस्तदन्यस्यासिद्धेः, आत्मनोऽद्वितीयत्वं सिध्यति । अद्वितीयत्वमात्मनः स्वभाव एवेति नात्र प्रमाणकृत्यमस्तीत्यर्थः ॥९६॥

११. आत्मनः स्वतःसिद्धाद्वितीयत्वम्

(मूलम्)

यद्यप्ययं ग्रहीतृग्रहणग्राह्यगृहीतिफलात्मक आब्रह्मस्तम्बपर्यन्तः संसारोऽन्वयव्यतिरेकाभ्याम् अनात्मतया निर्माल्यवदपविद्धः ; तथापि तु नैवासौ स्वतःसिद्धात्मव्यतिरिक्तानात्मप्रकृतिपदार्थव्यपाश्रयः साङ्ख्यानामिव, किं तर्हि स्वतःसिद्धानुदितानस्तमितकूटस्थात्मप्रज्ञानमात्रशरीरप्रतिबिम्बिताविचारितसिद्धात्माऽनवबोधाश्रय एव, तदुपादानत्वात् तस्य इतीममर्थं निर्वक्तुकाम आह -

ऋते ज्ञानं न सन्त्यर्था अस्ति ज्ञानमृतेऽपि तान् ।
एवं धियो हिरुग् ज्योतिर्विविञ्च्यादनुमानतः ॥९७॥

यस्मात् प्रमाणप्रमेयव्यवहार आत्माऽनवबोधाश्रय एव, तस्मात् सिद्धमात्मनोऽप्रमेयत्वम् । नैव हि कार्यं स्वकारणमतिलङ्घ्य अन्यत्राकारके आस्पदमुपनिबध्नाति । अत आह -

व्यवधीयन्त एवामी बुद्धिदेहघटादयः ।
आत्मत्वादात्मनः केन व्यवधानं मनागपि ॥९८॥

स्वयमनवगमात्मकत्वात्, अनवगमात्मकत्वं च मोहमात्रोपादानत्वात् -

प्रमाणमन्तरेणैषां बुद्ध्यादीनामसिद्धता ।
अनुभूतिफलार्थित्वादात्मा ज्ञः किमपेक्षते ॥९९॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

एतावता ग्रन्थेन सिद्धमर्थम् अनूद्य वर्तिष्यमाणग्रन्थस्योत्थानमाह **यद्यपीति** । ग्रहीता प्रमाता, ग्रहणं प्रमाणम्, ग्राह्यं प्रमेयं गृहीतिफलं तु प्रमेयपरिच्छित्तिः । अत्र गृहीतितत्फलम् इति पठित्वा 'गृहीतिरर्थ-ज्ञानम्, तत्फलमर्थावच्छिन्नं स्फुरणम्,' इति व्याचक्रुः **केचित्** । तन्न युक्तम् । प्रमितिव्यतिरिक्तफलस्य कुत्रापि वार्तिके अपरामृष्टत्वात् । प्रमितेरेव गृहीतिशब्देनागामिन्यध्याये परामक्ष्र्यमाणत्वाच्च । अतः 'गृहीतिफलम्' इत्येव मूले लिखितं लेखकप्रमादेन 'तत्फलम्' इति क्वचित् परावर्तितं स्यादित्यनुमीयते । 'अनुभूतिफलार्थित्वात्' (२-९९) इत्यस्मिन्नेवाध्याये उत्तरत्र प्रयोगादप्येवमवसीयते इत्यलमनपेक्षितपाठ-कल्पनेन । यद्यपि प्रमितिर्नामात्मचैतन्यतो न भिन्ना, तथापि प्रत्यक्षादि-बुद्धिवृत्त्युदयान्ते साऽभिव्यक्ता तत्तत्प्रमाणफलत्वेनोपचर्यते । वृत्त्युदयेन च प्रमितिरप्युदितेवाविवेकिभिर्विभाव्यत इत्यतो वृत्त्युपहितत्वेन रूपेण तस्या अप्यनात्मत्वमिह परिगणितमित्यदोषः । फलस्य संविदभेदस्तु **संबन्धवार्तिके** स्फुटमुद्घोषितः 'परागर्थप्रमेयेषु या फलत्वेन संमता । संवित् सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥' (सं. वा. १५९) इति सर्वमनाकुलम् ॥

प्रकृतमनुसरामः । आब्रह्मस्तम्बपर्यन्तो व्याकृतप्रपञ्चो यथोप-प्रदर्शितग्रहीत्रादिरूपः संसारः सर्वोऽप्यनात्मैव, साक्षिचैतन्यावभास्य-त्वात्, तदन्वयेऽपि तद्व्यतिरेकाच्च - इत्यन्वयव्यतिरेकाभ्यां निर्माल्य-वदपविद्धः, यथा तत्तद्दिने पूजातः प्राक् पूर्वपूर्वदिनार्पितपुष्पपत्रादिकं विसृज्यते, तथा परमात्मज्ञानेऽनुपयोगित्वात् परित्यक्तः । योऽसौ तथा परित्यक्तः, नैवासौ सांख्यानामिव प्रकृतिपदार्थाश्रयः - स्वतन्त्र-मूलप्रकृतित्वेनाभिमतप्रधानमाश्रयतेऽसौ तद्विकारत्वादनात्मजातस्येति

सांख्याः यथाहुः, तथा नास्माभिरभ्युपगम्यते ; किं तर्हि, स्वतःसिद्धानुदितानस्तमितकूटस्थात्मप्रज्ञानमात्रशरीरप्रतिबिम्बिताविचारितसिद्धात्मानवबोधाऽऽश्रय एव । अनुदितं च तत् अनस्तमितं चानुदितानस्तमितम् । जन्मविनाशरहितमित्येतत् । तादृशं यत् कूटस्थात्मनः निर्विकारपरमात्मनः प्रज्ञानमात्रं शरीरं चैतन्यघनस्वरूपम्, तस्मिन् प्रतिबिम्बितः प्रतिभासमानः, अविचारितसिद्धः - न जानामीति स्वाभाविकानुभवबलादेव सिद्धो न तु वास्तविकः योऽयमात्माऽनवबोधः, तदाश्रय एवेत्यर्थः । एतदुक्तं भवति । यद्यपि नित्यशुद्धबुद्धमुक्ताद्वितीयस्वभाव एव सर्वस्यात्मा, तथापि प्राकृतजनस्याविचारदशायां यत् स्वभावतो वर्ततेऽज्ञानम् । 'ममात्मस्वरूपं न जानामी'ति, तदाश्रयस्तत्कार्यभूत एवायं प्रमातृप्रमाणाद्यनात्मप्रपञ्चः । अज्ञानभावे भावात्, तदभावेऽभावाच्चेति । तदाह - **तदुपादानत्वात्तस्य** । तादृशानवबोधनिमित्तत्वात् तस्य ग्रहीत्रादिसंसारस्येत्यर्थः । वास्तविकोऽनवबोधस्तु न कश्चनात्रात्मनि सिध्यतीत्यभिप्रायेण विशेषणद्वयम् 'प्रतिबिम्बितः', 'अविचारितसिद्धः' इति च । न ह्यरूपस्य चिदात्मनः प्रतिबिम्बोद्ग्राहित्वम्, अभावलक्षणस्याज्ञानस्य प्रतिबिम्बत्वं वा कथञ्चिदपि संभवेत् । ये त्वज्ञानस्यानिर्वचनीयभावरूपतां स्वीचक्रुः, 'तदुपादानत्वात् तस्य' इति यथाश्रुतग्रन्थमाश्रित्य, ते प्रकरणसंबन्धग्रन्थव्याख्यानेनैव वारिताः, **'स्वतःसिद्धाद्वितीयात्माऽनवबोधमात्रोपादानत्वात्तस्य'** इत्यस्य विवरणप्रस्तावे इति न तेषामिह पुनरवकाशः । प्रज्ञानघनेऽप्यात्मनि प्रागैकात्म्यप्रबोधात् स्वानुभवसिद्धमज्ञानम् इति **बृहद्वार्तिकेऽप्युक्तम्** 'तस्मिन्नपहतध्वान्तेऽप्यविद्या स्वानुभूतितः । स्वानुभूतिर्न वेद्मीति प्रागैकात्म्यप्रबोधतः ॥' (बृ. वा. १-४-२१६) इति । अनात्मनोऽविद्याविजृम्भितमात्रत्वात्, तस्याप्यविद्यात्वम्, अविद्यातिरिक्तशरीराभावश्च - इति स्पष्टमुक्तम् **तैत्तिरीयवार्तिके** 'न

जानामीत्यविद्यैका नित्या तत्कारणं मता । स्वप्रसिद्ध्यैव सा सिध्येन्निशोलूकीव वासरे ।। अनात्मेतीह यद्भाति तदविद्याविजृम्भितम् । तस्मादविद्या साप्युक्ता विद्या त्वात्मैकरूपिणी । आत्माग्रहातिरेकेण तस्या रूपं न विद्यते । अमित्रवदविद्येति सत्येवं घटते सदा ।।' (तै. वा. १-१७६, १७८, १७९) इति ।।

तदेवमनात्मनो ग्रहीतृग्रहणादिप्रपञ्चस्यात्मानवबोधमात्राश्रयत्वमनूद्य, आत्मनः स्वतःसिद्धता समनन्तरग्रन्थभागेनोच्यत इत्याह - **इतीममर्थम् इति** । संसारस्यानवबोधमात्रनिमित्तत्वम्, आत्मनश्च स्वतःसिद्धत्वम् इत्यर्थः । निर्वक्तुकामः, निष्कृष्य वक्तुमिच्छन् । आहोत्तरश्लोकेनेत्यर्थः ।।

ऋते ज्ञानमिति । चैतन्यं विना अर्था अहङ्कारादयो न सन्ति, ज्ञानं तु तान् ऋतेऽप्यस्ति । सुषुप्तादौ तथा अनुभवात् इति भावः । एवं धियः सकाशात् हिरुक् - बुद्धितद्विषयेभ्यो विलक्षणम् इत्यभिप्रायः - ज्योतिः, आत्मचैतन्यम् अनुमानतः, अन्वयव्यतिरेकलक्षणेन तर्केण विविञ्च्यात् । विवेकेन निर्धारयेदित्यर्थः । अर्थेभ्यो विविञ्च्यादिति वक्तव्ये, धियो विविञ्च्यादिति विशेषग्रहणम् धीप्रयुक्तत्वादात्मनः प्रमातृत्वस्य धीविवेकेन प्रमातृत्वस्याप्यनात्मपक्षपातित्वं यथा ज्ञापितं भवेदिति । तथा च 'सर्वोऽपि प्रमाणप्रमेयव्यवहारो निर्माल्यवदपविद्ध' इत्युक्तं सम्यक्तया दृढीकृतं भवति । धियोऽपि ह्यविशिष्टम् आत्मज्योतिरायत्तसत्तास्फुरणत्वम्, आत्मनश्च सुषुप्तादौ ऋतेऽपि धियं स्वतःसत्तास्फुरणं चेति ।।९७।।

आत्मनोऽप्रमेयत्वे युक्त्यवतरणम् -

एवमात्मनः स्वतःसिद्धत्वं बुद्ध्यादीनां च तदधीनसिद्धिकत्वं प्रदर्श्य, अथेदानीं तत एवात्मनोऽप्रमेयत्वं सिध्यतीत्याह - **यस्मादिति** । यस्मादुक्तविधया प्रमाणप्रमेयव्यवहारः सर्वोऽप्यात्मानव-

बोधाश्रयः । आत्मानवबोधं विना बुद्ध्यादीनामसिद्धेः, बुद्धिसंबन्धं विना चात्मनः प्रमातृत्वासिद्धौ प्रमाणप्रमेयव्यवहारस्य सुतरामसिद्धेः, तस्मात् सिद्धमात्मनोऽप्रमेयत्वम् । प्रमेयत्वं ह्यनवबोधकार्यम् । तस्मान्नैवादोऽनवबोधं जातुचिदत्येतुं पारयति, तदसंस्पृष्टमात्मानं वा समाश्रयितुम् । तत्र न्यायमाह - **नैव हीति** । न हि कार्यं घटादि स्वकारणं मृदाद्यतिलङ्घ्य अन्यत्राकारणे तूलादौ आस्पदमुपनिबध्नाति । कार्यस्य कालत्रयेऽपि स्वकारणायत्तत्वनियमात् । अत्र प्रमातृत्वस्याविद्याकार्यत्वेऽपि तत्रैव प्रमेयत्वं न संभवति - प्रमातुर्हि प्रागेव सिद्धस्य प्रमेयसिद्धये प्रमाणान्युपादीयन्ते - इति स्थिते, तत्राहंप्रत्ययग्राह्यताऽस्तीति विवदमानान् सुखेनैव दूरीकर्तुम्, यत्र प्रमाणप्रमेयव्यवहार एव सुतरां न संभवति तत्र किमु वक्तव्यं प्रमेयत्वं नास्तीत्याशयेनैवमुच्यत इति बोध्यम् । **अत आहेति** । अतः प्रमेयत्वस्यानवबोधकार्यत्वात्, आत्मनि सुतरामसंभवात्, अप्रमेयत्वे युक्तिं प्रदर्शयितुमाहेत्यर्थः ॥

आत्मा न प्रमेयः, अव्यवहितस्वरूपत्वात् -

व्यवधीयन्त इति । बुद्धेरज्ञानापेक्षत्वात् व्यवहितत्वम् । तदपेक्षयैव तदुत्थानात् । देहस्य तु बुद्धीन्द्रियव्यवहितत्वम् । तदपेक्षयैव देहसिद्धेः । घटादीनां तु ततोऽपि व्यवहिततरत्वम् । बुद्धीन्द्रियदेहसापेक्षत्वात् तत्सिद्धेः - इत्येवं बुद्धिदेहघटादीनां अज्ञानादिभिर्व्यवहितत्वात्, न व्यवधानपरिहारमन्तरेण तेषां संसिद्धिः स्यादिति युक्तं तत्परिहारार्थं प्रमाणापेक्षा । प्रमाणापेक्षत्वाच्च तेषां प्रमेयत्वमिति युज्यत इति भावः । 'आत्मनस्तु' इति तुशब्दस्ततो वैलक्षण्यद्योतनार्थोऽत्र द्रष्टव्यः । आत्मनः केन व्यवधानम् ? न केनापि मनागपि ईषदपि व्यवहितत्वमुपपद्यते । कुतः ? आत्मत्वादेव । आत्मा नाम स्वरूपम् । न च स्वस्यैव स्वेन व्यवहितत्वं शक्यकल्पनम्, अन्येन वा ।

सत्येव हि प्रमाणप्रमेयव्यवहारे प्रमातुः प्रमेयाणां व्यवहितत्वं नाम, केनचिदपि देशेन, कालेन, वस्तुना वा । स तु व्यवहारो नात्मानं संस्पृशतीत्युक्तम् । अतो नैवात्मा आत्मनः केनचिद् व्यवधीयते, अत एव न व्यवधानापसारणापेक्षा तत्रेत्यभिप्रायः ॥९८॥

बुद्ध्यादीनां व्यवहितत्वात्, व्यवधानापनयनाय तत्र प्रमाण-मपेक्षितम् इत्युक्तम् । अथ तेषां प्रमाणव्यापारापेक्षत्वे हेत्वन्तरमपि विद्यत इत्याह - **स्वयमिति** । न हि बुद्धिदेहघटादयश्चैतन्य-प्रकाशयुक्ताः, येन स्वयमेवान्यनिरपेक्षं प्रकाशेरन् । अनवगमात्मानस्तु ते, अचेतनस्वभावाः । अनवगमात्मकत्वमेव कथमिति ? तदुपपाद-यति - **'मोहमात्रोपादानत्वात्' इति** । अज्ञानमात्रमेव हि तेषां स्वरूपम् । अज्ञानं चाचेतनमिति न स्वयं स्फुरणं तस्येत्यर्थः ॥

प्रमाणमन्तरेणेति । एषां बुद्ध्यादीनाम् प्रमाणमन्तरेण प्रमाणव्यापारं विना, असिद्धता अज्ञातत्वम् । स्वावभासकप्रमाणेन विषयीक्रियमाणा एवैते ज्ञाता भवन्ति नान्यथेत्यर्थः । तदेतत्कुतः ? **अनुभूतिफलार्थित्वात्** । यदा यदा हि प्रमाणम् एतान् व्याप्नोति, तदा अनुभवरूपेण वा चिद्व्याप्तं चिदाभासं च सदेव वा व्याप्नोति । प्रमाणान्ते तत्तदनुभूतिरूपेण आत्मचैतन्यमेव त्वभिव्यज्यते इति फलमिव भवतीति फलमित्युपचर्यत इत्यवोचाम (श्लो. २-९७) । अतस्तेषां स्वसिद्ध्यर्थं प्रमाणापेक्षास्ति । आत्मा पुनः स्वयं ज्ञः, नित्यचैतन्यस्वरूप एवेति किमपेक्षते ? न हि लोके घटादयः स्वप्रकाशनाय सूर्याद्यालोकमपेक्षन्त इति सूर्यादेरपि तदपेक्षा भवेदिति भावः । अत एवमपि सिद्धमात्मनोऽप्रमेयत्वमित्यभिप्रायः । यथा प्रमेयभूतघटादीनामनुभूतिफलार्थित्वम्, एवं नात्मन इत्येतद् **बृहद्वार्तिकेऽप्युक्तम्** 'आत्मनैवात्मविज्ञानं ज्ञेयज्ञात्रादिवर्जितम् । स्वयमेव फलात्मत्वात् फलं चास्मान्न भिद्यते ॥'

(बृ. वा. १-४-१४०१) इति । यत्तु केचित् कल्पयन्ति - घटादीन् प्रमेयान् धीवृत्तिस्तत्स्थचिदाभासश्चेति द्वावपि व्याप्नुतः ; तत्र धिया अज्ञानं नश्यति, आभासेन तु विषयः स्फुरतीति । तत् कल्पनामात्रम् । धीवृत्तिर्हि जायमानैव चिद्व्याप्ता चिदाभासा च जायते, तत्र वृत्तिमात्रेणाज्ञाननाश इति कथङ्कारं शक्यं विविच्य कल्पयितुम् ? यद्धि चिदाभासयुक्तवृत्तिरूपसाधनेन घटादेरज्ञाननाशेन स्फुरणं नाम सैव प्रमितिरवगतिशब्दवाच्या सा चात्मनोऽव्यतिरिक्तेति भाष्यवार्तिकयोरुभयोरपि सममेव संमतमिति यथाव्याख्यात एव श्लोकार्थ इति शिवम् ।।९९।।

---

१२. आत्मानात्मनोरितरेतराध्यासोऽविद्यानिमित्तः

(मूलम्)

वक्ष्यमाणेतरेतराध्याससिद्ध्यर्थम् उक्तव्यतिरेकानुवादः -

घटबुद्धेर्घटाच्चार्थाद्द्रष्टुर्यद्वद्विभिन्नता ।
अहंबुद्धेरहंगम्याद्दुःखिनश्च तथा दृशेः ।।१००।।

एवमेतयोरात्मानात्मनोः स्वतः परतः सिद्धयोः, लौकिकरज्जुसर्पाध्यारोपवदविद्योपाश्रय एवेतरेतराध्यारोप इत्याह -

अभ्रयानं यथा मोहाच्छशभृत्यध्यवस्यति ।
सुखित्वादीन् धियो धर्मांस्तद्वदात्मनि मन्यते ।।१०१।।

दग्धृत्वं च यथा वह्नेरयसो मन्यते कुधीः ।
चैतन्यं तद्वदात्मीयं मोहात् कर्तरि मन्यते ।।१०२।।

(क्लेशापहारिणी)

आत्मनः सर्वमेयवैलक्षण्यम् -

उक्तन्यायेनात्यन्तविविक्तयोरप्यात्मानात्मनोरविवेकनिमित्तः परस्पराध्यास इति वक्तुकामः पुनरपि तयोर्वैलक्षण्यमन्वारम्भेणानुवदतीत्याह - **वक्ष्यमाणेति ।।**

घटबुद्धेरिति ।। अर्थात् घटात् तद्विषयिण्या घटबुद्धेरपि द्रष्टुः प्रमातुर्यद्वद् विभिन्नता, तथा अहंगम्याद्दुःखिनः, तद्विषयकाहंबुद्धेरपि दृशेः तदवभासकसाक्षिचैतन्यस्य विभिन्नता व्यतिरिक्तत्वं वैलक्षण्यं पूर्वस्मिन् ग्रन्थे प्रसाधितम् इति शेषः ।।१००।।

अध्यासस्याविद्यानिबन्धनत्वम् -

एवमिति । यथा लौकिकरज्जुसर्पयोरत्यन्तविविक्तस्वभावयोरेव स्वार्थपरार्थयोः - तद्विवेकाग्रहनिबन्धनो यथा परस्पराध्यारोपो भवति 'अयं सर्पः' इति व्यवहारे । एवमात्मानात्मनोरपि यथाप्रदर्शितन्यायेन स्वतः परतः सिद्धयोरेव - अविद्याश्रयः, आत्माज्ञानाश्रयः, स्वार्थपरार्थयोरविवेकनिमित्त एवेतरेतराध्यारोपः इत्येतदाहेत्यर्थः । अविद्योपाश्रय इत्येतत् 'आत्मानवबोधाश्रयः' इतिवदेव व्याख्येयमिति न प्रस्मर्तव्यम् ।।

अभ्रयानमिति । यथा शशभृति चन्द्रे निश्चलेऽपि मोहात् अविवेकात्, अभ्राणां मेघानां यानं गमनमध्यवस्यति मिथ्यैवाध्यारोपणेन चन्द्रो यातीति निश्चिनोति, तद्वदेवात्मनि सुखित्वादीन् धियो धर्मान् मन्यते अभिमन्यते । अभूताभिनिवेशमात्रमेतत् इत्यर्थः ।।१०१।।

अथैतद्विपर्ययेण, अनात्मन्यप्यहङ्कारे आत्मधर्मं चैतन्यमध्यारोपयतीति दर्शयति - **दग्धृत्वमिति** । न ह्ययसि दग्धृत्वमस्ति मिथ्यामत्यारोपितव्यतिरेकेण, एवं चैतन्यमप्यहङ्कारे इत्यभिप्रायः ॥१०२॥

---

१३. आत्मज्ञानेनाविद्यानिवृत्तिः

(मूलम्)

सर्व एवायम् आत्मानात्मविभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपतितोऽविद्योत्सङ्गवर्त्येव, न परमात्मव्यपाश्रयः । अस्याश्चाविद्यायाः सर्वानर्थहेतोः कुतो निवृत्तिरिति चेत् तदाह -

दुःखराशेर्विचित्रस्य सेयं भ्रान्तिश्चिरन्तनी ।
मूलं संसारवृक्षस्य तद्बाधस्तत्त्वदर्शनात् ॥१०३॥

'तद्बाधस्तत्त्वदर्शनात्' इति कुतः संभाव्यत इति चेत्, अत आह - आगोपालाविपालपण्डितम् इयमेव प्रसिद्धिः -

अप्रमोत्थं प्रमोत्थेन ज्ञानं ज्ञानेन बाध्यते ।
अहिरज्ज्वादिवद् बाधो देहाद्यात्ममतेस्तथा ॥१०४॥

लौकिकप्रमेयवैलक्षण्यादात्मनः, नेहानधिगताधिगमः प्रमाणफलम् -

अविद्यानाशमात्रं तु फलमित्युपचर्यते ।
नाज्ञातज्ञापनं न्याय्यमवगत्येकरूपतः ॥१०५॥

यस्मादनवबोधमात्रोपादानाः प्रमात्रादयः, तस्मात् -

न विदन्त्यात्मनः सत्तां द्रष्टृदर्शनगोचराः ।
न चान्योन्यमतोऽमीषां ज्ञेयत्वं भिन्नसाधनम् ॥१०६॥

(क्लेशापहारिणी)

उत्तरश्लोकसंबन्धः -

सर्व एवेति । आत्मानात्मविभागो न सांख्यानामिव वास्तविकः । एष हि विभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपतित एव, प्रमाणगोचर एवेत्यर्थः । अज्ञातात्मन एव हि विभागोऽयं भातीत्यविद्योत्सङ्गवर्त्येव । अविद्याश्रित एवेति यावत् । प्रत्यक्षादीनि हि प्रमाणानि प्रमातृत्वं विना नात्मानं लभन्ते । प्रमातृत्वं चात्मानात्मनोरितरेतराध्यासनिबन्धनमित्युक्तम् । अतोऽविद्याश्रय एवायं विभागो न परमात्मव्यपाश्रयः । यथोक्तं **बृहद्वार्तिके** 'आत्मानात्मविभागोऽपि नायमात्मस्पृगीक्ष्यते । अज्ञातात्मैक-साक्षित्वादज्ञानोत्थं न वस्तुगम् ॥' (बृ. वा. १-४-७२४) इति । अस्याश्चाविद्यायाः कुतो निवृत्तिरिति चेत् **'तदाह'** । उत्तरश्लोके इति शेषः ॥

दुःखराशेरिति । स्पष्टार्थः श्लोकः ॥१०३॥

ज्ञानेनाज्ञानबाधो लोकसिद्धः -

अविद्योत्थस्य तत्त्वदर्शनेन बाध इति सुप्रसिद्धमेतदित्याह - **तद्बाध इति** ॥ प्रसिद्धिरेव तूत्तरश्लोकेन प्रदर्श्यत इत्याशयः ॥

अप्रमोत्थम् इति ॥ यथा अप्रमोत्थं ज्ञानम् मिथ्याज्ञानम्, प्रमोत्थेन ज्ञानेन सम्यग्ज्ञानेन - 'अहिरज्ज्वादिवत्' इति दृष्टान्तः । रज्ज्वज्ञानोत्थं अह्यादिज्ञानं रज्ज्वादिज्ञानेनैव हि बाध्यते । देहाद्यात्म-

मतेरपि तथा बाधः, आत्मन्यात्ममत्या शास्त्रजन्यया बाधः स्यादिति नासंभावनीयम् इत्यर्थः ।।१०४।।

आत्मज्ञानं नानधिगताधिगमः -

ननु अनधिगताधिगमयितृ प्रमाणमिति लोके प्रसिद्धम् । तद्वदिहापि किमात्मा प्रागनवगतः सन् ज्ञानेनावगतो भवति ? इत्याशङ्क्याह - **लौकिकेति** ।। तदिदमुत्तरश्लोकेन विशदीक्रियते इति शेषः ।।

अविद्यानाशमात्रम् इति । घटादेर्ह्यचेतनत्वात् तत्परिच्छित्तिरूपेण प्रत्ययावसाने जाता चैतन्याभिव्यक्तिः फलमित्युच्यते लोके । चिदाभासप्रत्ययेनैव विषयो ज्ञापित इति चाभिमन्यते लोकः । शास्त्रगम्ये आत्मनि पुनर्नित्यचैतन्यस्वरूपत्वान्न ज्ञापनमावश्यकम् । अविद्यानाशमात्रमेव त्वलमत्र । तावतैवात्मा ज्ञात इति व्यवहारो भविष्यतीत्यर्थः ।।

इदमप्यभ्युपगमवादेन । यतोऽनात्मविषयेऽप्यज्ञाननिवृत्तिरेवालं तदधिगमनाय । अत एव **माण्डूक्यभाष्ये** एवमुक्तम् - "येषां पुनस्तमोऽपनयव्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते तेषां छेद्यावयवसंबन्धवियोगव्यतिरेकेण अन्यतरावयवेऽपि छिदिर्व्याप्रियत इत्युक्तं स्यात् । यदा पुनर्घटतमसोर्विवेककरणे प्रवृत्तं प्रमाणमनुपादित्सिततमोनिवृत्तिफलावसानं छिदिरिव छेद्यावयवसंबन्धविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना तदा नान्तरीयकं घटविज्ञानं न तत् प्रमाणफलम्" (मां. भा. ७) इति । तस्मादङ्गीकृत्यैव मीमांसकमतमत्रोक्तं लोके घटादीनामनधिगताधिगमः प्रमाणफलमिति - इति बोध्यम् ।।१०५।।

प्रमात्रादीनां स्वव्यतिरिक्तज्ञेयत्वम् -

न केवलमवगत्येकरूपत्वादात्मा प्रमाणानधिगम्यः, किं तु द्रष्ट्रादेरात्मनैव ज्ञेयत्वाच्चेत्याह - **यस्मादिति** । अनवबोधमात्रोपादानाः द्रष्ट्रादयः प्रमात्रादयः, आत्माज्ञानमात्रस्वरूपाः उदाहृतमेव **तैत्तिरीयकवार्तिक**वाक्यम् 'आत्माग्रहातिरेकेण तस्या रूपं न विद्यते' (तै. वा. २-१७९) इति तदिहाप्यनुसर्तव्यम् । 'तस्मात्' इति 'न विदन्ति' इति श्लोकस्थेन संबध्यते ।

न विदन्तीति । अत एव ते नात्मनः सत्तां स्वयमेव वेदितुं शक्नुवन्ति । अचेतनत्वात् । अत एव च नाप्यन्योन्यं वेदितुं शक्नुवन्ति । अतोऽमीषां द्रष्टृदर्शनगोचराणां ज्ञेयत्वं भिन्नसाधनम् । स्वव्यतिरिक्तेनैवात्मना ते ज्ञायन्ते । तत्र कुत एतत् स्यात्, आत्मा स्वज्ञेयत्वेन निष्पन्नस्वरूपेण प्रमाणेन सिध्येदितीत्यभिप्रायः । यद्यपि माता मेयं मानेन करणेन वेत्तीति लोकप्रवादः, तथापि न माता नित्यविकारित्वात् स्वयमात्मानं वेदितुमलम् । नापि मानेन वेद्यः सः, मानस्य मेयविषयत्वात् । एवं च यदा द्रष्टुर्मातुरेवासिद्धिः, तत्सिद्ध्यपेक्षाणां दर्शनगोचराणां प्रमाणप्रमेयानां सुतरामसिद्धिः । न च दर्शनगोचरौ स्वयमेव स्वात्मानं जानीतः । नाप्यन्योन्यम् । स्वप्नसिद्धदर्शनगोचरवत् - इति वस्तुवृत्तपरीक्षणेन सिद्धमिदं 'न विदन्त्यात्मनः सत्ताम्' इत्यादीति मन्तव्यम् । एतेन 'द्रष्टा दर्शनेन दृश्यं वेत्ति' इति व्यवहारसिद्ध्यर्थमेव तत्साक्षी समपेक्षितः इति संभावितं भवति ।।१०६।।

१४. शोधितत्वंपदार्थस्याद्वैतता

(मूलम्)

द्रष्ट्रादेरसाधारणरूपज्ञापनायाह -

बाह्य आकारवान् ग्राह्यो ग्रहणं निश्चयादिमत् ।
अन्वय्यहमिति ज्ञेयः साक्षी त्वात्मा ध्रुवः सदा ।।१०७।।

सर्वकारकक्रियाफलविभागात्मकसंसारशून्य आत्मेति कारक-क्रियाफलविभागसाक्षित्वादात्मनः । तदाह -

ग्राहकग्रहणग्राह्यविभागे योऽविभागवान् ।
हानोपादानयोः साक्षी हानोपादानवर्जितः ॥१०८॥

(क्लेशापहारिणी)

साक्षिणो ग्राहकादिविलक्षणत्वम् -

अथेदानीं साक्ष्यात्मनः शोधिततत्त्वंपदार्थतां वक्तुं तद्भास्यग्राह्यादि-त्रयस्वरूपं तावदनुवदति तदाह - **द्रष्ट्रादेरिति** । द्रष्टृदर्शनदृश्याना-मित्येतत् ॥

बाह्य इति । बाह्यः, आध्यात्मिकाभ्यां ग्रहीतृग्रहणाभ्यां पराग्भूतः आकारवान् सामान्यविशेषवान् **ग्राह्यः** गोचरो विषय इति ज्ञेयः । ग्रहणं दर्शनं तु निश्चयादिमत् । **निश्चयादि** । निश्चयस्मरणसंशयादिरूपेण विभक्तं ज्ञानम् । अन्वयी तेषु निश्चयादिरूपेण जन्मविनाशवत्सु 'अहं निश्चिनोमि', 'अहं स्मरामि', 'अहं संशये' इति योऽहंरूपेणान्वेति स ग्रहीता द्रष्टा - इति ज्ञेयः । यस्त्वात्मा तेष्वागमापायिषु स्वयं ध्रुवः, स साक्षी ग्राह्यादित्रितयविलक्षण इत्यर्थः ॥१०७॥

साक्षिणो हानोपादानलक्षणसंसारराहित्यम् -

मातृमानमेयविभागसाक्षित्वात् यथा तद्विभागराहित्यमात्मनः, एवं कारकक्रियाफलविभागसाक्षित्वात् तद्विभागराहित्यमपीत्यधुना प्रदर्श्यत इत्याह - **सर्वेति** । 'आत्मेति' इतीतिशब्दस्तु सिध्यतीति शेषपूरणेन योजनीयः । लेखकप्रमादादागतो वा ॥

ग्राहकेति । ग्राहकग्रहणग्राह्यविभागो यत्र तत्रैव ग्राहकेण कस्यचिदर्थस्य हानमुपादानं वा, तत्फलभोक्तृत्वं वा, तत्रैव च

ग्राहकस्य हानोपादानतत्फलभोक्तृत्वरूपः संसारो भवेत् । तादृशविभागे ये हानोपादाने भवतः, तयोः साक्षी, स्वयं ग्राहकग्रहणादिविभागरहितश्च सः, हानोपादानवर्जितः । सर्वक्रिया-कारकफललक्षणसंसारशून्य इति सिद्धमित्यर्थः ॥

यद्वा - ग्राहकः केनचित्करणेन ग्राह्यं विषयं गृण्हाति, तत्र भोक्ता च भवतीति प्रसिद्धम् । अविभागवांस्त्वात्मा ग्राहकादिविभागरहित इति न ग्राहकाद्यवभासनमात्रेण तद्भोक्ता भवितुमर्हति । ननु तथापि ग्राहकादेर्हानमभावगमनं सुषुप्तादौ, पुनस्तदुपादानं च जागरितादौ - इति तद्धानोपादानयोः कर्ता किं न भवेत् ? इत्याशङ्क्याह - **हानोपादानयोः साक्षीति** । न ह्यात्मा हानोपादानयोः कर्ता भवति, यथा ग्राहको ग्रहणाग्रहणयोः । कुतः ? तत्साक्षित्वात् । स हि केवलं साक्षाद्द्रष्टा हानोपादानयोः, न तत्र करणद्वारेण व्यापारवान्, यथा ग्राहकः । नापि स्वतः, निर्व्यापारस्वभावत्वात् । अत एव हानोपादानवर्जितः । अपि च यथा हानकर्मत्वमुपादानकर्मत्वं च ग्राहकादेरवस्थाभेदेन, यथावर्णितनीत्या न तथा आत्मन इत्यतोऽपि हानोपादानवर्जितः सः । तस्मात्, हानोपादानसाक्षित्वादेव साक्षिणि ह्यसङ्गे न साक्ष्यहेयत्वादेः संसर्गसंभवोऽस्ति - इत्येवमपि व्याख्यायेत श्लोक इत्यनुसंधेयम् ॥१०८॥

(मूलम्)

ग्राहकादिनिष्ठैव **ग्राहकादिभावाभावविभागसिद्धिः** कस्मान्नेति चेत्, तदाह -

स्वसाधनं स्वयं नष्टो न नाशं वेत्त्यभावतः ।
अत एव न चान्येषामतोऽसौ भिन्नसाक्षिकः ॥१०९॥

ग्राहकादेरन्यसाक्षिपूर्वकत्वसिद्धेः स्वसाक्षिणोऽप्यन्यसाक्षिपूर्वक-

त्वात् अनवस्था इति चेत्, तन्न । साक्षिणो व्यतिरिक्तहेत्वनपेक्ष-त्वात् । अत आह -

धीवन्नापेक्षते सिद्धिमात्माऽन्यस्मादविक्रियः ।
निरपेक्षमपेक्ष्यैव सिद्ध्यन्त्यन्ये न तु स्वयम् ॥११०॥

(क्लेशापहारिणी)

ग्राहकादीनां साक्ष्यपेक्षयैव सिद्धत्वम् -

ननु ग्राहकादिविभागसिद्धिः, तद्धानोपादानसिद्धिश्च स्वत एवेति किं न स्यात्, येन तत्साक्षी तद्व्यतिरिक्त एवं समानीयेतेत्या-शङ्कावारणाय श्लोकान्तरोपादानम् इत्याह - **ग्राहकादि-निष्ठैवेति** । तदाह तत्राहेत्यर्थः ॥

स्वसाधनमिति । अत्र 'स्वयं न वेत्ति' इत्युभयान्वयीति गृहीत्वा एवं व्याख्येयम् - ग्राहकादि स्वसाधनं स्वयं न वेत्ति । कुतः ? अभावतः । स्वसिद्धेः पूर्वं स्वस्यैवाभावात्, इत्यर्थः । न हि कस्यचिदपि पूर्वं स्वस्यैव भावः शक्यसंभावनः । एवं स्वसिद्धिं स्वयमेव वेत्तीति चेत् कल्प्यते, सिद्धेः प्राक् स्वस्यैवाभावात्, न तद्वेदितृत्वं संभवतीत्यभिप्रायः । सिद्धं भूत्वा साधयिष्यतीति चेत् । न । तदा सिद्धत्वादेव साधनापेक्षांभावात् । तदेवं स्वसिद्धिं न स्वयं वेदितुमर्हतीति स्थितम् । एवं स्वयं नष्टो स्वनाशं न वेत्ति । अभावत एव । न ह्यभावः कस्यचित्साध्यस्य साधनं भवेदित्यर्थः । अत एव स्वसिद्धेः पूर्वं अन्येषां भावं न वेत्ति, स्वनाशात् परं तु नतरामिति स्पष्टम् । स्वस्य तदानीमभावादेव । तदेवं ग्राहकादिविभागसिद्धिः, तद्भावाभावसिद्धिर्वा, न ग्राहकादिनिष्ठम्, ग्राहकाद्यन्यत एव तत्सिद्धिरिति सिद्धस्तदतिरिक्तः साक्षीत्यर्थः ॥

यद्यपि साक्षिसिद्धिर्नानुमानादिप्रमाणान्तरायत्ता उपपत्त्यायत्ता

वा । प्रमाणोपपत्तीनामपि साक्षिरूपाधारेणैव प्राणधारणात्, स्वयंसिद्धस्य सर्वथा तदनपेक्षणाच्च । तथापि ग्राहकग्रहणयोरेव स्वयंसिद्धत्वमास्थाय साक्षिणं प्रतिक्षेप्तुमीहमानानां मीमांसकसौगतादीनां दूरीकरणार्थमेव युक्तिरियं प्रतानिता । ग्राहकस्याहंप्रत्ययगम्यत्वं स्वीकुर्वाणानां विज्ञानस्य स्वयंवेद्यत्वं स्वीकुर्वाणानां च पक्षे ग्राहकग्रहणयोरस्तित्वकाले स्वात्मनि क्रियानुपपत्तेः, स्वाभावकाले च सर्वथा ग्रहणासामर्थ्याच्चेति प्रबोधयितुमित्यनवद्यम् ।।१०९।।

ग्राहकादीनां साक्षिसिद्धत्वाङ्गीकारे नानवस्था -

ननु युक्तिमात्रमिदं साक्षिण्यपि सञ्चारयितुं शक्यते । अतः परापशकुनाय स्वनासिकाच्छेदोऽयम् । कथम् ? यथा ग्राह्या विषयाः स्वव्यतिरिक्तेन ग्राहकेण वेद्यन्ते, तथा चेद् ग्राहकादित्रयमपि स्वव्यतिरिक्तसाक्षिवेद्यमित्यङ्गीक्रियते, तर्हि ग्राहकवदेव साक्षिणोऽपि करणान्तरापेक्षत्वप्रसङ्गः । न चैतदिष्टं भवतः । किञ्चान्यत्, यथैव ग्राहकादेर्व्यतिरिक्तसाक्षिपूर्विका सिद्धिरिष्यते, तथैव ग्राहकादिसाक्षिणोऽपि स्वव्यतिरिक्तसाक्षिपूर्विकैव सिद्धिरिति प्राप्नोति । एवं तस्य तस्याप्यन्यान्यसाक्षिवेद्यत्वम्, तस्य च साक्षिणः करणान्तरापेक्षत्वं चेत्यनवस्थेत्यतोऽप्यनिष्टापत्तिः - इत्याशङ्क्य स्वयंसिद्धत्वादेव साक्षिणोऽन्यानपेक्षेत्येतदुपपादयितुमुत्तरः श्लोक इत्याह - **ग्राहकादेरित्यादिना** । अत आह - तस्मात् साक्षिणोऽन्यानपेक्षसिद्धिकत्वमुपपादयितव्यमितीत्यर्थः ।।

धीवदिति । बुद्धिः परिणामिनी, तत्साक्षी त्वात्मा कूटस्थः - इति बह्वीभिरुपपत्तिभिः प्रदर्शितम्, श्रुत्युदाहरणेन च । तत्र परिणामिनी परिणामित्वादेव स्वभावाभावौ वेदितुं नालमित्यपेक्षते स्वान्यतः सिद्धिमिति युक्तम् । आत्मा तु धीवदन्यस्मात् सिद्धिं नापेक्षते, यस्मादविक्रियोऽपरिणामी, कूटस्थोऽसौ इति यावत् । यत्तूच्यते तस्यापि

करणान्तरापेक्षा, स्वव्यतिरिक्तसाक्षिपूर्विकैव च सिद्धिः - इत्यनवस्था प्राप्नोतीति । तदसत् । न तावदस्ति नियमः, यत्र यत्रान्योऽन्येन गृह्यते, तत्र तत्र ग्राह्यग्राहकव्यतिरेकेण करणेनापि केनचिद् भाव्यमिति । अन्यथापि दर्शनात् । तद्यथा घटश्चक्षुषा दृश्यते आलोकेन करणेन । आलोकस्तु स्वव्यतिरिक्तचक्षुर्ग्राह्योऽपि न तथा करणान्तरमपेक्षते । तथा ग्राहकादेरपि साक्षिग्राह्यस्य करणान्तरानपेक्षत्वं भविष्यति । अतो न करणद्वारा अनवस्था । एवं साक्ष्यन्तरद्वारापि नास्त्यनवस्था । ग्राह्यस्वभावत्वादेव हि ग्राहकादेः साक्षिपूर्विका सिद्धिरङ्गीक्रियते, विकारित्वस्वाभाव्यात् । अनात्मत्वेन व्यवधीयमानत्वाच्च । साक्षी तु ग्राहक एव न जातुचिद् ग्राह्यः, अविक्रियः, न केनचिद्व्यवहितः । अतो नास्त्यस्यान्यापेक्षेति युक्तम् । नन्वेवं सर्वथान्यग्राह्यत्वाभावे, कथं तस्य सिद्धिः ? आत्मत्वादेवेति वदामः । आत्मनो ह्यप्रत्याख्येयस्वभावस्य स्वयंसिद्धत्वादेव नान्यतः सिद्ध्यपेक्षेति । तदेतत्सर्वमनुसंधायाह - **निरपेक्षमपेक्ष्यैव सिद्ध्यन्त्यन्ये न तु स्वयमिति ।।११०।।**

(मूलम्)

यतो ग्राहकादिष्वात्मभावोऽविद्यानिबन्धन एव, तस्मादन्वयव्यतिरेकाभ्यां विभज्यानात्मनः, स्वयम् -

उत्पत्तिस्थितिनाशेषु योऽवगत्यैव वर्तते ।
जगतोऽविकारयावेहि तमस्मीति न नश्वरम् ।।१११।।

स्वतःसिद्धात्मचैतन्यप्रतिबिम्बिताविचारितसिद्धिकात्मानवबोधोत्थेतरेतरस्वभावापेक्षसिद्धत्वात्, स्वतश्चासिद्धेरनात्मनो द्वैतेन्द्रजालस्य -

न स्वयं स्वस्य नानात्वं नावगत्यात्मना यतः ।
नोभाभ्यामप्यतः सिद्धमद्वैतं द्वैतबाधया ।।११२।।

(क्लेशापहारिणी)

आत्मनोऽवगत्येकस्वरूपत्वम् -

इदानीम् एतावता विचारेण सिद्धमर्थं निगमयितुं त्वंपदार्थस्य निष्कृष्टस्वरूपमाहोत्तरश्लोक इति संबन्धमाह - **यत इति** । 'अन्वयव्यतिरेकाभ्याम्' साक्ष्यन्वयसाक्ष्यव्यतिरेकाभ्यामित्यर्थः । अनात्मनः अविद्यानिबन्धनात्मभावालम्बनस्य ग्राहकादेः, विभज्य विविच्य । 'स्वयम्' इत्यस्य श्लोकस्थेन 'योऽवगत्यैव वर्तते' इत्यनेन संबन्धः । अन्वयव्यतिरेकाभ्यामित्यादेः पद्यगन्धितामालोक्य, अस्य सिद्धिग्रन्थशरीरे एवान्तर्भावः कर्तव्य इति **केचित्**, 'सार्धश्लोकं वाक्यम् । अस्य गाथासंज्ञकचरणषट्केनोपलक्षितत्वात्' इति च ।।

उत्पत्तीति । जगतः अनात्मभूतस्य ग्राहकादेः, उत्पत्तिस्थितिनाशेषु योऽविकारया अवगत्यैव कूटस्थचैतन्यरूपेणैव वर्तते सदा अवतिष्ठते, तम् अयमहमस्मीत्यवेहि विद्धि, न तु नश्वरं विकारिणं प्रमात्रादिरूपमनात्मानम् इत्यर्थः । यद्यपि प्रमात्रायत्तप्रमाणव्यापारेण जायतेऽवगतिः - इति लोके संव्यवहारः, तथापि प्रत्यक्षादिप्रमाणव्यापारजन्यबुद्धिवृत्त्यवसानेऽभिव्यज्यमानत्वादेव तादृशसंव्यवहारयोग्यत्वं नित्याया एव सत्या अवगतेः, तदेव च प्रमातुः पारमार्थिकं स्वरूपमित्यवोचाम प्राक्, तत्र प्रस्मर्तव्यम् । उक्तं च **सूत्रभाष्ये** - 'अहमेवेदानीं जानामि वर्तमानं वस्तु, अहमेवातीतमतीततरं चाज्ञासिषम्, अहमेवानागतमनागततरं च ज्ञास्यामि - इत्यतीतानागतवर्तमानभावेनान्यथाभवत्यपि ज्ञातव्ये न ज्ञातुरन्यथा भावोऽस्ति । सर्वदा वर्तमानस्वभावत्वात् । तथा भस्मीभवत्यपि देहे नात्मन उच्छेदो वर्तमानस्वभावादन्यथास्वभावत्वं वा न संभावयितुं शक्यम्' (सू. भा. २-३-७) इति । तदिहानुसंधातव्यम् । भुरिगनुष्टुप्त्वात् तृतीयपादेऽक्षराधिक्यं न दोषायेति मन्तव्यम् । न्यूनाधिकेनैकेन

निचृद्भुरिजौ' इति पिङ्गलाचार्योक्तेः । तद्धैतल्लोकवेदसाधारणमिति भरताचार्यवचनाच्चेति ॥१११॥

आत्मनोऽद्वैतत्वसिद्धिः -

अथैवं शोधितत्वंपदार्थस्याद्वैततत्त्वमयत्नेनैव सेत्स्यतीत्युत्तरश्लोकार्थः । तदाह - **स्वतःसिद्धेति** । 'आत्माऽनवबोधोत्थ' इत्येतत्पर्यन्तं 'द्वैतेन्द्रजालस्य' विशेषणं सप्तनवतितमश्लोकसंबन्धग्रन्थस्थ- 'स्वतःसिद्धानुदितानस्तमितकूटस्थात्मप्रज्ञानमात्रशरीरप्रतिबिम्बित' इत्यादिवद् व्याख्येयम् । एवम् अनवबोधोत्थत्वात्, इतरेतरस्वभावापेक्षसिद्धत्वाच्चेति 'स्वतश्चासिद्धेः' इत्यत्र हेतुद्वयमुपक्षिप्तम् । अनवबोधोत्थं रज्जुसर्पादिवत्, अतो न स्वतःसिद्धम् । इतरेतरापेक्षसिद्धं पितृत्वपुत्रत्वादिवत् । एवमुत्पत्तौ आत्माऽनवबोधापेक्षम्, स्थितौ इतरेतरस्वभावापेक्षम् द्वैतेन्द्रजालम् । ग्राहकापेक्षं ग्रहणं तदपेक्षश्च ग्राहकः । एवं ग्राह्यापेक्षं ग्रहणं ग्रहणापेक्षं ग्राह्यम् । एवं ग्राह्यग्राहकयोरपीतरेतराश्रयसिद्धिकत्वं बोध्यम् । **बृहद्वार्तिकेऽपीदमुक्तम्** - 'प्रमात्रादीह यत्किञ्चित् प्रत्यगज्ञानहेतुकम् । अन्योन्यापेक्षसिद्धित्वान्मिथ्या तदपि पूर्ववत् ।' (बृ. वा. १-४-४७७) इति । ननु तथापि ग्राहकादिशब्दप्रत्ययगोचरत्वात्, व्यवहारेऽर्थक्रियाकारित्वेनाचारोपयोगित्वाच्च स्याद् द्वैतस्य वस्तुसत्त्वमित्याशङ्क्य **'द्वैतेन्द्रजालस्य'** इति । ऐन्द्रजालिकनिर्मितमायाहस्त्यादावपि शब्दप्रत्ययगोचरत्वादीनां सत्त्वान्नैतदस्तित्वसाधकम् - इत्याशयः । **यथोक्तमभियुक्तैः** - 'उपलम्भात् समाचारान्मायाहस्ती यथोच्यते । उपलम्भात् समाचारादस्तिवस्तु तथोच्यते ॥' (गौ. का. ४-४४) इति ॥

द्वैतस्यैवंस्वभावत्वे किं फलतीत्यत आह - **न स्वयमिति** । व्याख्यातप्रायोऽयं श्लोकः 'न पृथङ् नात्मना' (२-४५) इत्यस्य

व्याख्यानेन । तत्राहङ्कारादिद्वैतमात्मनि कल्पितमित्युक्तम् ; इह तु तत एवाद्वैतं सिद्धमित्युच्यते अध्यायार्थोपसंजिहीर्षया - इति विशेषः । अक्षरयोजना तु ग्राहकादिद्वैतेन्द्रजालस्य स्वस्य नानात्वं न स्वयं सिद्धम् । नाप्यवगतिरूपेणात्मरूपेण । तद्रूपेण निरूप्यमाणस्य प्रतीत-रूपेणाविद्यमानत्वात् । नाप्युभाभ्याम् । एकस्यैव सत्यानृतोभय-रूपत्वानुपपत्तेः । यत एवम्, अतो द्वैतबाधया सर्पादिबाधेन रज्जुस्वरूप-वत् अद्वैतं सिद्धम् इति ।।११२।।

(मूलम्)

यथोक्तार्थप्रतिपत्तिद्रढिम्ने श्रुत्युदाहरणोपन्यासः -

नित्यावगतिरूपत्वात् कारकादिर्न चात्मनः ।
अस्थूलं नेति नेतीति न जायत इति श्रुतिः ।।११३।।

(क्लेशापहारिणी)

आत्मनः क्रियाकारकफलशून्यत्वे श्रुतिप्रमाणम् -

सर्वकारकक्रियाफलात्मकसंसारशून्य आत्मेति युक्तिभिः प्रसाधिते श्रुत्युदाहरणं प्रतिपत्तिदार्ढ्यार्थमित्याह - **यथोक्तेति** । द्रढिमा श्रौतसिद्धान्तत्वेन सर्वथा श्रद्धेयमेतदित्यध्यवसायः । 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८-७) इत्यवगतिरूपत्वे श्रुतिः । 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ....' (बृ. ४-५-१५) इति कारकादिरहितत्वे, 'अस्थूलमनणु ......' (बृ. ३-८-८) इति विरुद्धधर्मश्रुतिः 'नेति नेति' (बृ. २-६-३) इति च सर्वविशेषराहित्ये, 'न जायते ....' (का. १-२-१८) इति च सर्वभावविकाररहितकूटस्थस्वभावत्वे - इत्येवं श्रुतिरिह जागर्तीत्यर्थः ।।११३।।

(मूलम्)

सर्वस्यास्य ग्राहकादेर्द्वैतप्रपञ्चस्यात्मानवबोधमात्रोपादानस्य स्वयं सेद्धुमशक्यत्वादात्मसिद्धेश्चानुपादेयत्वात् -

आत्मनश्चेन्निवार्यन्ते बुद्धिदेहघटादयः ।
षष्ठगोचरकल्पास्ते विज्ञेयाः परमार्थतः ॥११४॥

कुतो न्यायबलादेवं निश्चितं प्रतीयते ? यस्मात् -

नित्यां संविदमाश्रित्य स्वतःसिद्धामविक्रियाम् ।
सिद्धायन्ते धियो बोधास्तांश्चाश्रित्य घटादयः ॥११५॥

(क्लेशापहारिणी)

आत्मव्यतिरेकेणानात्मा नाम नास्त्येव -

ग्राहकादिप्रतीतिर्मिथ्येत्युक्ते सत्यात्मवस्त्वतिरेकेण तस्यास्तित्वमपि मा शङ्कि केनचिदित्याशयेनोत्तरश्लोकप्रवृत्तिः । तदाह - **सर्वस्येति** । अविद्योपादानत्वात् अचेतनत्वम्, अत एव स्वयं सेद्धुमशक्यत्वमित्यस्तु । आत्मरूपेणास्ति खलु ग्राहकादेः सिद्धिरित्याशङ्क्याह - **आत्मसिद्धेश्चेति** । तदानीं तेषां प्रातीतिकरूपमेव न विद्यत इत्यनुपादेया सा । न हि ग्राहकादिरूपसिद्धौ अवगतिरूपेण तेषां सिद्धिरुपयुज्यत इति भावः ॥

आत्मनश्चेदिति । आत्मसत्तैव बुद्धिदेहघटादीनां सत्ता । ततश्चेत्ते निवार्यन्ते तद्व्यतिरेकेण निष्कृष्य निरूप्यन्ते तदा परमार्थतः ते षष्ठगोचरकल्पाः, पञ्चेन्द्रियार्थव्यतिरिक्त इवार्थस्ते निःस्वरूपा एव भवन्तीत्यर्थः ॥११४॥

आत्मनो व्यतिरेकेण बुद्ध्यादीनां षष्ठगोचरकल्पत्वमित्येतद-

सहमानः शङ्कते - **कुतो न्यायबलादिति** ।। पूर्वमेवासकृदुक्तं न्यायं स्मारयति - **यस्मादिति** श्लोकमवतार्य ।।

नित्यामिति । श्लोकः स्पष्टार्थः ।।११५।।

---

१५. श्रुत्युपदेशेन यथार्थज्ञानप्राप्तिः

(मूलम्)

यस्मान्न कयाचिदपि युक्त्या आत्मनः कारकत्वं क्रियात्वं फलत्वं चोपपद्यते, तस्मात् आत्मवस्तुयाथात्म्यानवबोधमात्रोपादानत्वात् - नभसीव रजोधूमतुषारनीहारनीलत्वाद्यध्यासः - यथोक्तात्मनि सर्वोऽयं क्रियाकारकफलात्मकसंसारोऽहंममत्वयत्नेच्छादिर्मिथ्याध्यास एवेति सिद्धम् । इममर्थमाह -

अहम्मिथ्याभिशापेन दुःख्यात्मा तच्छुशुत्सया ।
इतः श्रुतिं तया नेतीत्युक्तः कैवल्यमास्थितः ।।११६।।

तस्यास्य मुमुक्षोः श्रौताद् वचसः स्वप्ननिमित्तोत्सारितनिद्रस्येव इयं निश्चितार्था प्रमा जायते -

नाहं न च ममात्मत्वात् सर्वदाऽनात्मवर्जितः ।
भानाविव तमोऽध्यासोऽपन्हवश्च तथा मयि ।।११७।।

सोऽयमेवं प्रतिपन्नस्वभावम् आत्मानं प्रतिपन्नोऽनुक्रोशति -

यत्र त्वस्येति साटोपं कृत्स्नद्वैतनिषेधिनीम् ।
प्रोत्सारयन्तीं संसारमप्यश्रौषं न किं श्रुतिम् ।।११८।।

(क्लेशापहारिणी)

मुमुक्षोः श्रुत्युपदेश एव शरणम् -

प्रपञ्चमिथ्यात्वे निश्चयवत एव वाक्यार्थज्ञानं निरर्गलमिति स्फोरयन् तन्मिथ्यात्वं तावदुपसंहरति - **यस्मादिति** ।।

अहम्मिथ्याभिशापेनेति । अहंतदुपलक्षितममत्वयत्नेच्छादि-रूपेण मिथ्याभिशापेन मिथ्यारोपेण आत्मा दुःखी सन्, तच्छुशुत्सया तादृशमिथ्याभिशंसनशोधनेच्छया ; 'तद्बुभुत्सया' इति पाठान्तरापेक्षया अयमेव साधीयान् । श्रुतिम् इतः शरणं गतः तया 'नेति नेत्यात्मा' (बृ. ३-९-२६, ४-२-४, ४-४-२२, ४-५-१५) त्वं सर्वथा सर्वदैव सर्वविधानात्मसंसर्गरहित इत्युक्तः प्रायश्चित्तादिशुद्ध इव कैवल्यं नित्यशुद्धाद्वितीयभावम् आस्थितो भवतीत्यर्थः ।।११६।।

श्रुत्युपदेशेन प्रमोत्पत्तिः -

ननु श्रुतिरेव तावत् वास्तवी काल्पनिकी वा ? तस्या वास्तवत्त्वे नाद्वैतसिद्धिः, कल्पितत्वे तु ज्ञानजनकत्वानुपपत्तिः । कथं हि स्वयम-सती श्रुतिः सत्यं ज्ञानं जनयेत् ? - इत्याशङ्क्य मिथ्याभूतस्यापि सत्य-वस्तुप्रतिपत्तिहेतुत्वमुपपद्यत एवेति सदृष्टान्तमाह - **तस्यास्येति** । यथा स्वाप्नसिंहगर्जितादिना मिथ्याभूतेनैव उत्सारिता निद्रा यस्य तादृश-स्यास्य मुमुक्षोः, अनाद्यविद्यानिद्रात उत्थितस्य मिथ्याभूतादेव श्रौताद् वचसो निमित्तभूतात्, इयं प्रमा जायते । यथा स्वप्ननिद्रापि मिथ्यैव सती स्वाप्नगर्जितादिश्रवणेनापनीयते, तावन्मात्रेण च सुप्तः प्रबुध्यतेऽपि, एवमिहापि मिथ्याभूता अविद्या मिथ्याभूतश्रुतिवाक्यश्रवणेनापनीयते, श्रुतिरपि मिथ्यात्वेनाध्यवसीयते, श्रोता तु नित्यशुद्धबुद्धमुक्तस्वरूप एवावतिष्ठत इति न किञ्चिच्चित्रम् । तथा ह्याहुः **संप्रदायविदः** - 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं

बुध्यते तदा ।।' (मां. का. १-१६) इति । 'प्रमा जायते' इति तु श्रुति-प्रमाणजनितप्रत्ययान्ते प्रमितिस्वरूपानन्यभूतं चैतन्यमभिव्यज्यत इत्य-भिप्रायेण - इति संबन्धग्रन्थाशयः । एवं च सर्वप्रमाणव्यवहाराणामपि प्राग्ब्रह्मात्मत्वविज्ञानात् सत्यत्वं स्वप्नव्यवहारस्येव प्राक्प्रबोधात्, श्रौतस्य तु वचसस्तत्त्वमस्यादेरन्त्यप्रमाणत्वम् । अज्ञाननिवृत्तिपूर्वकं सकलप्रमाणव्यवहारबाधनादिति सूचितं भवतीति ध्येयम् ।।

कीदृशी प्रमा जायत इति प्रदर्शयति - **नाहमिति** । मयि नाहम्, न च मम ; अहंता ममता वा नैव जातुचिन्मम धर्माः । यतोऽहं सर्वदा कालत्रयेऽपि अनात्मवर्जितः, आत्मत्वादेव । न ह्यात्मनोऽनात्मधर्मता जातुचित् - इति भावः । कथं तर्हि अहंममतादीनामध्यासः, कथं वा 'नाहम्' इत्यादिरूपेण तत्प्रतिषेधो घटते ? तत्राह - **भानाविवेति** । यथा भानौ न जातुचिदपि रात्र्यहनी । अथ च तत्रोलूकादिभिः तमःसंबन्धोऽध्यस्यते, चक्षुष्मद्भिश्च पुरुषैस्तन्निषेधोऽनुभूयते, एवं मय्यात्मनि सर्वथा अनात्मतद्धेत्वज्ञानयोः संबन्धो न कदापि विद्यते, अथाप्यध्यस्यते नाहं वेद्मीति, तदपह्नवश्च क्रियते श्रुतिजन्य-ज्ञानेन । अतोऽप्राप्ताध्यासनिषेधोऽयमविद्याव्यवहारदृष्ट्यैवेति न दोष इत्यर्थः ।।११७।।

अथ वाक्यार्थप्रतिपत्तौ न केवलमतः परं सर्वाज्ञानसंबन्धा-भावज्ञानमनुवर्तते, किं तु नित्यबुद्धस्वरूपेऽप्येतावन्तं कालमीदृशं नित्यनिरस्ताज्ञानं तत्त्वं कथमहं न ज्ञातवान् इत्यात्मानमनु-क्रोशत्यपीत्याह - **सोऽयमिति** ।।

यत्र त्विति । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्र केन कं पश्येत्' (बृ. ४-५-१५) इति साटोपं संरम्भेण समस्तद्वैतसंसारं प्रोत्सारयन्तीं निषेधन्तीमपि श्रुतीं किं नाश्रौषं किमिति कर्णे न कृतवान् ? अहो धिङ्माम् ! - इत्यनुक्रोशतीत्यर्थः । यद्यप्यनुक्रोशादिकमपि नास्त्येव

विदुषः परमार्थतः, 'तत्र को मोहः कः शोकः' (ई. ७) इति श्रुतेः । तथाप्यनुक्रोशन्निव ब्रह्मात्मनिष्ठयैव कालं नयते, तस्येषदप्यविद्यातत्कार्यसंबन्धो न शङ्कनीयः इति मोक्षमाणजनप्ररोचनायैवेयं ज्ञानस्तुतिरिति ध्येयम् ॥११८॥

---

१६. अध्यायार्थोपसंहारः

(मूलम्)

इत्योमित्यवबुद्धात्मा निष्कलोऽकारकोऽक्रियः ।
विरक्त इव बुद्ध्यादेरेकाकित्वमुपेयिवान्　　॥११९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादशिष्य-
श्रीसुरेश्वराचार्यविरचितायां नैष्कर्म्यसिद्धौ
ससंबन्धोक्तौ द्वितीयोऽध्यायः

(क्लेशापहारिणी)

विद्याफलम् -

अथाध्यायार्थमुपसंहरति विद्याफलं जीवन्मुक्ततां प्रदर्शयन् - इत्योमितीति ॥ यथा जायापुत्राद्यभिमानाद्विरक्तस्ततो व्युत्थाय संन्यस्तसर्वकर्मा परमहंसपरिव्राजको भूत्वा निष्परिग्रह एकाकी चरति यथेच्छम्, एवमयमपि शोधितत्वंपदार्थः, बुद्ध्यादेर्विरक्तः, एकाकित्वमुपेयिवान्, क्रियाकारकफलरहितेऽद्वैते स्वात्मन्येवावस्थानं प्राप्नोतीत्यर्थः । **इत्योमिति** - इतीदं तु ओंकारोपलक्षितम्

अभिधानाभिधेयविभागातीतं नित्यनिरस्तसर्वाद्वैतं तत्त्वं स्वात्मत्वेन प्रतिपन्न इति सूचनार्थम् । तथा हि **संप्रदायविदः** 'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः । ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ॥' (गौ. का. १-२९) इति - इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरण-स्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येनभिक्षुणा प्रणीतायां नैष्कर्म्यसिद्धिव्याख्यायां क्लेशापहारिण्यां द्वितीयोऽध्यायः

॥ ॐ तत्सत् ॥

अथ तृतीयोऽध्यायः

(वेदान्तवाक्यार्थव्याख्यानम्)

१. अध्यायसंबन्धः

(मूलम्)

सर्वोऽयं प्रमितिप्रमाणप्रमेयप्रमातृलक्षणः, आब्रह्मस्तम्बपर्यन्तः मिथ्याध्यास एव - इति बहुशः उपपत्तिभिः अतिष्ठिपम्[1] । आत्मा च जन्मादिषड्भावविकारवर्जितः कूटस्थबोध एवेति स्फुटीकृतम् । तयोश्च मिथ्याध्यासकूटस्थात्मनोर्नान्तरेणाज्ञानं संबन्धः, अन्यत्र चोदनापरिप्रापितात् यथा 'इयमेवर्गग्निः साम' (छां. १-६-१) इति । तच्च अज्ञानं स्वात्ममात्रनिमित्तं न संभवतीति कस्यचित् कस्मिंश्चिद् विषये भवति - इत्यभ्युपगन्तव्यम् ।।

इह च पदार्थद्वयं निर्धारितम् आत्मा, अनात्मा च । तत्र अनात्मनस्तावत् नाज्ञानेन अभिसंबन्धः । तस्य हि स्वरूपमेवाज्ञानम् ; न हि स्वतोऽज्ञानस्य अज्ञानं घटते । संभवदपि अज्ञानस्वभावे अज्ञानं कमतिशयं जनयेत् ? न च तत्र ज्ञानप्राप्तिरस्ति । येन तत्प्रतिषेधात्मकम् अज्ञानं स्यात् । अनात्मनश्च अज्ञानप्रसूतत्वात् । न हि पूर्वसिद्धं सत् ततो लब्धात्मभावस्य सेत्स्यतः आश्रयस्य आश्रयि संभवति ।

1. 'अभिहितम्' पा

तदनपेक्षस्य च तस्य निःस्वभावत्वात् । एतेभ्य एव हेतुभ्यः, नाऽनात्मविषयम् अज्ञानं संभवति इति ग्राह्यम् । एवं तावत् नाऽनात्मनोऽज्ञानित्वम्, नापि तद्विषयम् अज्ञानम् ।।

पारिशेष्यात् आत्मन एवास्त्वज्ञानम् । तस्य 'अज्ञोऽस्मि' इत्यनुभवदर्शनात् । 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्' (छां. ७-१-३) इति श्रुतेः । न चात्मनोऽज्ञानस्वरूपता । तस्य चैतन्यमात्रस्वाभाव्यात् । अतिशयश्च संभवति ज्ञानविपरिलोपः ज्ञानप्राप्तेश्च संभवः । तस्य ज्ञानकारित्वात् । न च अज्ञानकार्यत्वम् । कूटस्थात्मस्वाभाव्यात् । अज्ञानानपेक्षस्य च आत्मनः स्वत एव स्वरूपसिद्धेः युक्तम् आत्मन एवाज्ञत्वम् । किंविषयं पुनस्तदात्मनोऽज्ञानम् ? आत्मविषयम् - इति ब्रूमः । ननु - आत्मनोऽपि ज्ञानस्वरूपत्वात्, अनन्यत्वाच्च, ज्ञानप्रकृतित्वादिभ्यश्च हेतुभ्यो नैवाज्ञानं घटते, घटत एव । कथम् ? अज्ञानमात्रनिमित्तत्वात् तद्विभागस्य, सर्पात्मतेव रज्ज्वाः ।।

तस्मात् तदपनुत्तौ द्वैतानर्थाभावः । तदपनोदश्च वाक्यादेव तत्पदपदार्थाभिज्ञस्य । अतो वाक्यव्याख्यानाय अध्याय[1] आरभ्यते ।।

(क्लेशापहारिणी)

अतीताध्यायार्थानुवादः -

अतीतानागतयोरध्याययोः संबन्धं दर्शयिष्यन् द्वितीयाध्यायगतं विषयं संगृण्हाति **'सर्वोऽयम्'** इत्यादिवाक्यद्वयेन । प्रमित्याद्यनात्मनो मिथ्याध्यासत्वम्, आत्मनः कूटस्थचैतन्यत्वं च अतीताध्यायस्य

---

1. 'अध्यायस्तृतीयोऽयम्' इति पाठान्तरम् ।।

समुदायार्थ इत्यर्थः । 'न विदन्त्यात्मनः सत्तां द्रष्टृदर्शनगोचराः' (२-१०६), 'ग्राहकग्रहणग्राह्यविभागे योऽविभागवान्' (२-१०८), 'न पृथङ् नात्मना सिद्धिः' (२-४५), 'अभूताभिनिवेशेन' (२-५१) - इत्यादिभिर्हि हेतुभिरात्मनः प्रमितिप्रमाणादिविभागासंस्पर्शः क्रिया-कारकफलात्मताभावश्च स्थापितः । अनात्मा चात्मानवबोधोत्थः, इतरेतरस्वभावापेक्षसिद्धः स्वतश्चासिद्धः - इत्यतो मिथ्याध्यास एवेति च । 'मिथ्याध्यास' इति मिथ्यैवाध्यस्त इत्यर्थः । अस्मिन् हि ग्रन्थे अध्यासशब्दो यथैवातस्मिंस्तद्बुद्धिरित्यर्थे तथैवाध्यस्यमानप्रातीतिक-पदार्थ इत्यर्थेऽपि बहुलं प्रयुज्यते । तद्यथा 'भानाविव तमोऽध्यासः' (२-११७), 'अध्यस्यात्मनि देहादीन् मूढस्तद्बुद्धिचेष्टते' (१-५९) इत्यादिस्थलेषु अध्यासशब्दार्थो अध्यसनम्, अध्यारोपः ; 'क्रियाकारक-फलात्मकसंसारोऽहंममत्वयत्नेच्छादि मिथ्याध्यास एव' (२-११६) इत्यादिस्थलेषु तु अध्यस्यमानपदार्थ एव तदर्थः । सर्वोऽयं मिथ्याध्यास एवेति बहुश उपपत्तिभिरतिष्ठिपम्, स्थापितवानहम् इत्यर्थः । 'अभिहितम्' इति पाठान्तरादाने तु प्रक्रमभङ्गवारणं फलम् । आत्मनः कूटस्थबोधरूपत्वं तु 'सदाऽविलुप्तसाक्षित्वम्' (२-३६), 'एष सर्वधियां नृत्तम् .... वीक्षते' (२-५८), 'सर्वधीव्यञ्जकः' (२-६६), 'अपश्यन् पश्यतीं बुद्धिम्' (२-७१), 'परिणामिधियां वृत्तम्' (२-८२), 'तस्माज्जगद्धियां वृत्तम्' (२-८९) - इत्यादिश्लोकैः स्फुटीकृतम् । तदिह द्वयमप्यनूद्यते वर्तिष्यमाणाध्यायस्य सङ्गतिं दर्शयितुमिति बोध्यम् ॥

आत्मानात्मनोः संबन्धोऽज्ञानकारितः -

अथ तृतीयाध्यायार्थं वाक्यव्याख्यानमवतारयितुं वाक्यार्थज्ञान-मात्रनिवर्त्यमज्ञानं तावदवतारयति - **तयोश्चेत्यादिना** । 'तयोश्च मिथ्याज्ञानकूटस्थात्मनोर्नान्तरेणाज्ञानं संबन्धः' न हि रज्जुसर्पयोः

रज्ज्वज्ञानमन्तरेण संबन्धो घटते । रज्ज्वज्ञानादेव हि तत्र सर्पमध्यस्यति । रज्जुज्ञानाभावकृतं सर्पत्वेन विकल्पनमेव हि, अध्यस्तसर्पस्य रज्ज्वा संबन्धो नाम । प्रत्येत्येव हि केवलं सर्प इति, न तु रज्ज्वां सर्पोऽस्ति वस्तुवृत्तेनेति । यथाहुर्वेदान्तवृद्धाः -

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ।। गौ. का. २-१७

इति । दृश्यते च व्यवहारे प्रमितिप्रमाणादिविभागलक्षणस्य द्वैतस्य संबन्धः कूटस्थ आत्मनि । अतोऽवश्यं संबन्धग्राहकाज्ञानम् अभ्युपेयम् इति भावः । नन्वध्यस्तास्पदयोः प्रमाणपरिप्रापितोऽपिसंबन्धो दृश्यते । तद्यथा 'इयमेवर्गग्निः साम' (छां. १-६-१) इत्यत्र श्रुतिप्रमाण-परिप्रापितैव ऋचि पृथिवीदृष्टिः, साम्नि च अग्निदृष्टिः ; तत् कथम् अज्ञानमेवाध्यासहेतुरिति ? नैष दोषः । न हि तत्र ध्याता ऋचं ऋक्त्वेनाजानन् पृथिवीत्वेन प्रत्येति रज्जुमिव सर्पत्वेन ; किं तर्हि श्रुति प्रमाणत्वेन गृह्णन्, ऋक्त्वेन ज्ञातायामेव ऋचि पृथिवीदृष्टिम् अध्यस्यति । तथा च तत्र दृष्टिक्षेप एव केवलम्, न तु अतस्मिन् भ्रान्त्या तद्बुद्धिः ; अत्र पुनः प्रमाणादिकं विकल्पमात्रम् आत्मनः कूटस्थताम-विजानन्नध्यस्यति अतदात्मकेऽप्यात्मनि । अतः साधूच्यते कूटस्थमि-थ्याध्यासयोरज्ञानमन्तरेण न संबन्ध इति - इत्यभिप्रायः । तदिदमा-त्मानात्मनोः सम्बन्धस्य मिथ्याज्ञानमात्रत्वात् तद्विवेकाभावलक्षणा-ज्ञानमात्रनिमित्तत्वं **भगवत्पादैरपि** सुस्पष्टमुद्घोषितं गीताभाष्ये -

"कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतः ? न तावद्, रज्ज्वेव घटस्य, अवयवसंश्लेषद्वारकः संबन्धविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति, आकाशवन्निरवयवत्वात् । नापि समवायलक्षणस्तन्तु-पटयोरिव, क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमात् इति । उच्यते - क्षेत्रक्षेत्रज्ञयोः विषयविषयिणोः भिन्नस्वभावयोः इतरेतर-

तद्धर्माध्यासलक्षणः संयोगः, क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः ; रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादिसंयोगवत् ।।'' (गी.भा. १३-२६) इति ।।

अज्ञानस्याश्रयविषयसापेक्षता -

तदेवं कूटस्थात्ममिथ्याध्यासयोः संबन्धसिद्ध्यर्थमज्ञानमवश्यमभ्युपगन्तव्यम् इत्युपपादितम् । अथेदानीं वाक्यज्ञानस्य ज्ञात्राश्रयत्वात् तद्बाध्याज्ञानस्यापि तदाश्रयत्वमिति युक्तं लोकानुसारतः । 'अयं सर्पः' इत्यज्ञानं यस्य, तस्यैव तद्बाधकं रज्जुज्ञानम् इति नियमदर्शनात् । अज्ञानविषयेण तु तद्व्यतिरिक्तेनैव केनचिद् भाव्यम् । न हि स्वात्मानमेव ज्ञातुं प्रयतते कश्चित्, किं तु, अज्ञातं स्वव्यतिरिक्तं ज्ञेयम् इति सुविदितमेतत् । अत्र पुनर्वाक्यार्थज्ञाने आत्मैव ज्ञाता स एव च ज्ञातव्यः - इत्यज्ञानाश्रयताविषयते तस्यैवेत्यापतति । तत्कथमेतदुपपाद्यताम् ? इति शङ्कयित्वा तदुपपादयितुमारभमाणोऽज्ञानस्याश्रयविषयसापेक्षत्वं तावदभ्युपगमयति - **तच्चाज्ञानमिति** । अज्ञानं स्वात्ममात्रनिमित्तं न संभवति । जानात्यभिधेयैव तावद् धात्वर्थक्रिया कर्तृस्था परविषया चेति प्रसिद्धमेतत् ; अतो ज्ञानाभावरूपमपि अज्ञानम् अनपेक्ष्य कञ्चिदाश्रयं विषयं न स्वात्ममात्रनिमित्तं स्वरूपलाभमाप्नुयादिति युक्तम् । तदेतदाह - कस्यचित् कस्मिंश्चिद्विषये भवतीत्यभ्युपगन्तव्यम् - इति । एतेन, यदाहुः **केचित्** 'द्वैतोपादानतया कल्पितमज्ञानं प्रकृतिमायादिशब्दवाच्यं विवक्षितं प्रकरणे' इति तद् ग्रन्थकर्त्रैव कण्ठरवेण निराकृतं भवति । न हि नामरूपबीजलक्षणा प्रकृतिः' कस्यचित् कस्मिंश्चित् विषये' भवति । किञ्च 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' (गी. १३-५) इति अव्यक्ताख्यप्रकृतेः क्षेत्रकुक्षिनिक्षिप्तत्वात्, तस्य चाव्यक्तस्य ज्ञेयत्वात्, न ज्ञात्राश्रयं तदित्यतोऽपि 'कस्यचित् कस्मिंश्चित् विषये' इति व्यवहृताज्ञानपदभाग्भवति वाद्यभ्युपगतमुपादानात्मकं

नामरूपबीजमिति स्पष्टम् । ग्रन्थकृदप्युक्तश्लोकमुदहार्षीद् द्वितीयाध्याये (२-४३) इति स्मर्तव्यम् । उपपादितमेतत् प्रथमाध्यायव्याख्यान एवेत्यास्तां तावत् । प्रकृतामेवाज्ञानगतां चिन्तां वितनुमः ॥

अनात्मा नाज्ञानाश्रयः -

भवत्वाश्रयविषयसापेक्षत्वमज्ञानस्य तथाप्यात्माश्रयविषयत्वं तस्य कथम् ? इत्याशङ्क्य तदुपपादयितुमारभते - **इह चेति** । न तावज्ज्ञानाज्ञानेच्छादयोऽनालम्ब्य कञ्चित् स्वार्थपदार्थं सत्तां प्रतीतिं वा अश्नुवन्ति । परार्थत्वात् तेषाम् । तथा विषयं कञ्चिद्व्याप्यैव तेषां स्थितिर्वक्तव्या । सकर्मकत्वस्वाभाव्यात् । तथा चोपपादितमधस्तात् । तथा च प्रकृतेऽज्ञानं प्रति आश्रयत्वं विषयत्वं च आत्मानात्मनोर्मध्ये कतरस्य संभावयितुं युक्तम् इति निर्धारणीयमित्याशयः ॥

भवतु तर्हि, अनात्मन एव द्वयमपीत्यत आह - **तत्रानात्मनस्तावत् इति** । आत्मानात्मनोर्मध्ये अनात्मनस्तदाश्रयत्वविषयत्वे न संभवत इति प्रथमम् उपपादयिष्यामः, तत ऊर्ध्वम् आत्मनि तत् संभवति वा न वा - इत्येतद् विप्रक्ष्याम इति तावच्छब्दादानेनाभिप्रेतम् । तत्राप्याश्रयत्वं प्रथमं निषेद्धुमारभते, सिद्धे ह्याश्रये अज्ञानस्य स्थितिस्तावदुपपादिता भवेदिति । **'तस्य हि'** इति । (१) आत्माज्ञानादेव हि स प्रथते, रज्ज्वज्ञानादिव सर्पः । अतः अज्ञानमेवानात्मनः स्वरूपम्, अज्ञानं विना स्वातन्त्र्येण तस्य भावाभावादिति भावः । यदुक्तं **तैत्तिरीयवार्तिके -**

न जानामीत्यविद्यैका नित्या तत्कारणं मता ॥तै. वा. २-१७६॥

अनात्मेतीह यद् भाति तदविद्याविजृम्भितम् ।
तस्मादविद्या साप्युक्ता विद्या त्वात्मैकरूपिणी ॥तै.वा. २-१७८॥

आत्माग्रहातिरेकेण तस्या रूपं न विद्यते ।
अमित्रवदविद्येति सत्येवं घटते सदा ॥तै.वा. २-१७९॥

इति च। ततः किम्? तत्राह - **न हि स्वतोऽज्ञानस्याज्ञानं घटत इति**। तमसस्तमआश्रयत्वं यथा न घटमानम्, तथैवेदमपीति भावः। तस्मान्नाज्ञानाश्रयत्वमनात्मनः संभवति। हेत्वन्तरमाह - **संभवदपीति**। (२) अज्ञानेन हि स्वाश्रये ज्ञानलोपसंशयविपर्यासान्यतमरूपोऽतिशयः क्रियते। न चानात्मा जातुचित् ज्ञाननाशमात्मनि वेदयते, कस्मिंश्चिद् विषये संशेते, विपर्यस्यतीति वा लोके दृष्टम् इति भावः। अस्ति हेत्वन्तरमपीत्याह - **न च तत्र ज्ञानप्राप्तिरस्तीति**। (३) तस्य ह्यज्ञानत्वं युक्तम्, यस्य जातुचित् ज्ञानप्राप्तिः संभाव्यते। न च घटादीन् प्रतिबोधयितुम्, प्रतिबोधनेन ज्ञानं संपादयितुं वा समीहन्ते प्रेक्षावन्तः। ननु ज्ञानप्राप्तिर्मास्तु घटादिषु, ततः किम्? - इत्यत्राह **'येन तत्प्रतिषेधात्मकमज्ञानं स्यात्'** ज्ञानप्रतिषेधात्मकत्वं ह्यज्ञानस्य, न च प्रतियोगिनो ज्ञानस्य जातुचिदपि प्राप्तिरस्ति घटादौ, तत्र का कथा ज्ञानाभावलक्षणाज्ञानाश्रयत्वस्येति भावः। अत्र ज्ञानप्रतिषेधात्मकत्वोक्तिरज्ञानस्य व्याकृतजगदुपादानभूताव्याकृतस्वरूपत्वमज्ञानस्येच्छतां पक्षं विरुणद्धीति स्मर्तव्यम्। चतुर्थं हेतुमाह - (४) **'अनात्मनश्चाज्ञानप्रसूतत्वात्' इति**। एतच्च 'तस्य स्वरूपमेवाज्ञानम्' इति हेतुविशदीकरणावसरे स्फुटितम्। अज्ञानप्रसूतत्वेऽप्यनात्मनः, तदाश्रयत्वं किं न स्यात् इति शङ्कमानमतिमन्दं प्रत्याह - **न हि पूर्वसिद्धमिति**। पूर्वमेव सिद्धमज्ञानम्, ततो जायमानस्य आश्रयीत्युपहास्यमेतत्, न हि अज्ञानादुत्पद्यमानं ततः पूर्वमेवाज्ञानाश्रयत्वेनापि वर्तते इत्यनुन्मत्तो ब्रूयादिति भावः। उत्पत्स्यमानाकारेणाश्रयत्वं मास्तु, आकारान्तरेण त्वनात्मनोऽज्ञानाश्रयत्वं किं न संभवेदिति शङ्कमानं व्युत्पादयति - **तदनपेक्षस्य च इति**। अज्ञानापेक्षैव हि स्वरूपप्राप्तिरनात्मनः। अतो नैवास्ति स आकारविशेषो यस्तत्प्रागपि संभाव्येताज्ञानाश्रयत्वेन। तस्मादपि नानात्मनोऽज्ञानाश्रयत्वमित्यर्थः॥

अनात्मा नाज्ञानविषयः -

ननु भवतु अज्ञानाश्रयत्वासंभवोऽनात्मनः यथोक्तहेतुभ्यः, विषयत्वं तु किं न स्यात् ? 'घटं न जानामीति' व्यवहारदर्शनाद्धि अज्ञानविषयत्वं तस्य संभवतीति युज्यते । तत्राह **'एतेभ्य एव हेतुभ्यः'** इत्यादि । (१) अनात्मनोऽज्ञानमात्रस्वरूपत्वात् न तस्याज्ञानविषयत्वम्, (२) अज्ञानस्य स्वस्मिन्नेवातिशयाधायकत्वासंभवात्, (३) अज्ञान-विषयकज्ञानोत्पत्त्यसंभवात् तत्प्रतिषेधात्मकाज्ञानविषयत्वानुपपत्तेः, (४) अज्ञानस्य स्वजन्यानात्मनः पूर्वमेव सिद्धस्यानात्मविषयकत्वा-संभवाच्च - इत्यर्थः । यद्यपि 'घटं न जानामि', 'अज्ञानं नष्टम्', 'इदानीं ज्ञातो घटः' - इति च व्यवहारे घटाद्यनात्मविषयम् अज्ञानम्, तत्परिहारेण ज्ञानोदयश्च उपलभ्येते, तथापि स्वप्नोपलब्धघटाज्ञान-तत्परिहारज्ञानवत् प्रतीतिमात्रं तदिति न तृतीयचतुर्थहेत्वोरसिद्धिरिति ध्येयम् ॥

आत्मन एवाज्ञानित्वम्, अज्ञानविषयत्वं च -

यथाप्रतिपादितमर्थं हेतूकृत्य अज्ञानस्याश्रयविषयविशेष-निर्धारणार्थम् वृत्तार्थं तावदुपसंहरति - **एवं तावदिति** । अत्रैतत् प्रकृतम् प्रमातृप्रमाणादिलक्षणस्य द्वैतस्य शुक्तिरजतादिवद-ध्यस्तत्वम्, आत्मनश्च नित्यचैतन्यरूपत्वं च पूर्वाध्यायनिर्णीतमनूद्य तयोः कः संबन्धः ? इत्येतन्निरूप्यम् इति प्रतिज्ञाय कूटस्थ-नित्यचैतन्ये विभाव्यमानस्य प्रमात्रादिविभागलक्षणद्वैतस्य मिथ्याध्यासमात्रत्वात् सत्यानृतयोर्न वास्तविकः कश्चन संबन्धोऽवकल्पत इत्यतः, अज्ञानत एव तयोः संबन्धः इति निर्णीतमिति । तत्राज्ञानम् नाज्ञानजन्यस्य मिथ्याध्यास-लक्षणस्यानात्मनः, नापि तद्विषयकं भवितुमर्हतीति युक्ति-भिरादर्शितम् । न चाज्ञानस्य आश्रयं विषयं वा अनपेक्ष्य

स्वरूपमात्रनिमित्तत्वं संभवतीत्युक्तम् । ततः परिशिष्ट आत्मैव तदाश्रयो विषयश्चेति बलादायातीत्याह - **पारिशेष्यात् इति ॥**

आत्मनोऽज्ञानाश्रयत्वोपपत्तिः -

न केवलं गत्यन्तराभावात् परिशिष्ट आत्मैवाश्रयत्वेन विषयत्वेन चाश्रीयते किं तूपष्टम्भकहेतुसद्भावाच्चेत्येतद्दर्शयितुमारभते - **तस्येत्यादिना** । (१) 'अज्ञोऽस्मि' इत्यनुभवस्तावदुपन्यस्यते । अनुभवस्य सर्वप्रमाणमूर्धन्यत्वात् । अनात्मनो घटादेरचेतनस्य 'अज्ञोऽहम्' इति मतेः संभावना नास्ति, अनुभवविरोधात् ; आत्मविषये तु 'अज्ञोऽस्मि' इति सार्वत्रिकानुभवबलादेव अज्ञानाश्रयत्वं संभाव्यते । अज्ञानपरिहारायैव हि सर्वोऽपि ज्ञानं संपादयितुमीहत इति । (२) श्रुतिश्चत्र मानमित्याह 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्' (छां. ७-१-३) इति नारदस्य चेतनस्य स्वानुभूतित एव स्वात्मविषयकाज्ञानं विज्ञाय तत्परिहारार्थमात्मविद्याप्रार्थना श्रूयते । न च नारदः संशेते, 'अहमज्ञो वा न वा' इति । अतोऽपि सिद्धमिदं यदज्ञानम् आत्माश्रयमित्यनुभववेद्यमिति इति भावः । प्रतिज्ञातं चेदं ग्रन्थकृता ग्रन्थारम्भे एव 'ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया' (१-७) इत्यत्र । अत्राधिकमपेक्षितं तद्व्याख्यानादधिगन्तव्यम् । अथानात्मनोऽज्ञानाश्रयत्वविषयत्वयोराश्रितयोर्ये दोषाः प्रसञ्जिता ते अत्र नावकाशं लभन्त इत्याह - **न चात्मनोऽज्ञानस्वरूपता** - इत्यादिना । (१) चैतन्यस्वरूपत्वादेवात्मनोऽज्ञानस्वरूपत्वानुपपत्तिः । अतस्तस्याज्ञानाश्रयत्वं संभवति । (२) अज्ञानकृतातिशयश्च संभवति, ज्ञानविपरिलोपलक्षणः, संशयादिलक्षणश्च । मेघावरणकृतभानुप्रकाशाभाववत् । (३) ज्ञानप्राप्तिसंभवोऽप्यस्ति, 'ज्ञातं मया' इत्यादिव्यवहारे अज्ञानविनाशकचैतन्याभासोत्पत्तिहेतुत्वात् । अतश्च 'इदानीं न जानामि' इति ज्ञानप्रतिषेधात्मकाज्ञानाश्रयत्वोपपत्तिः । (४) न चाज्ञानकार्यत्वम्, अनात्म-

वत् । कूटस्थनित्यचैतन्यस्वाभाव्यात्, तत्र कारणान्तरानपेक्षणात् । अज्ञानमनपेक्ष्यैव तत्प्रकाशकत्वेनापि स्वत एव सिद्धत्वादात्मनोऽज्ञानाश्रयत्वोपपत्तिः । तदेवम् अनुभवसिद्धम्, श्रौतव्यवहारसिद्धम्, बाधकहेतुरहितम्, साधकयुक्त्युपेतं च परिशेष्यन्यायसंभावितमज्ञानाश्रयत्वमात्मनः इत्यभिप्रायः ।।

आत्मनोऽज्ञानविषयत्वोपपत्तिः -

अथैवमाश्रयत्वोपपत्तावपि नात्मनोऽज्ञानविषयत्वमुपपद्यत इत्याक्षिपति - **'किंविषयम्'** इति । न हि य एवाज्ञानस्याश्रयः स एव तद्विषयोऽपीति घटते - 'अहमिदं न जानामि' इति खल्वात्मनो भिन्नस्यैवाज्ञानविषयत्वेन लोके प्रसिद्धेः - इति भावः । समाधत्ते - **आत्मविषयमिति** । 'मामप्यहं न ज्ञातवांस्तदा' ति सुप्तमत्तादीनां प्रतिबोधसमये व्यवहारदर्शनात् देहव्यतिरिक्तकर्तृभोक्त्रात्मवादिनापि 'अहं मनुष्यः' इत्याकारकात्मविषयाज्ञानकृतमिथ्याज्ञानस्य स्वीकार्यत्वात्, ज्ञानाभावकृतातिशयवत्त्वोपपत्तिः ; तद्विषयक ज्ञानोत्पत्तौ, तत्कृतातिशयश्चाज्ञानपरिहारलक्षण इत्युपपद्यते । अनात्मन इवाज्ञानापेक्षसिद्धिकत्वाभावेन स्वतःसिद्धरूपेणैव तस्याज्ञानविषयत्वसम्भवः - इत्येवमनवद्यमात्मन एवाज्ञानविषयत्वमिति इति भावः ।।

अज्ञानाश्रयत्वतद्विषयत्वे न वास्तविके -

अथैतदज्ञानाश्रयत्वं विषयत्वं च किं वास्तविकमेव, उताज्ञानकृतम् ? - इति विचिकित्सायां वास्तविकत्वे सर्वथापि निवृत्त्यनुपपत्तेरज्ञानकृतमेव तदिति स्वीकार्यमिति प्रतिपादयिष्यन् शङ्कामुत्थापयति - **नन्विति** ।।

आत्मनोऽपि नैवाज्ञानम् आश्रयित्वेन विषयित्वेन वा घटते । कुतः ? तस्य (१) **ज्ञानस्वरूपत्वात्** । ज्ञानाज्ञानयोस्तमःप्रकाशयो-

रिव विरुद्धस्वभावयोः संसर्गानुपपत्तेरिति भावः । (२) **अनन्यत्वाच्च** । न ह्यद्वितीयकूटस्थचैतन्यस्वभावात् अन्यत् संभवत्यज्ञानं नाम, यस्याश्रयो विषयो वा भवेदात्मा इत्यर्थः । इतश्च । (३) **ज्ञानप्रकृतित्वात्** । अज्ञाननिवर्तकप्रमाणज्ञानकारणत्वात् इत्यर्थः । न हि तमोनिवर्तकप्रकृष्टप्रकाशस्य भानोस्तमआश्रयत्वं विषयत्वं वा घटत इत्यभिप्रायः । (४) 'ज्ञानप्रकृतित्वादिभ्यश्च' इति 'आदि'शब्देन असंसर्गस्वाभाव्यादाकाशवत्, अज्ञानादिसर्वसाक्षित्वेन, स्वसाक्ष्यभूताज्ञानाश्रयत्वविषयत्वयोरनवक्लृप्तेः, कूटस्थनित्यस्वभावस्य च ज्ञानाज्ञानकृतविशेषानुपपत्तेः, अज्ञानादिसर्वानात्मव्यापकस्य चिद्रूपस्यात्मनः, स्वव्याप्याज्ञानकृतावरणासंभवाच्च - इत्यादयो हेतवो ग्रहीतव्याः ॥

अथ समाधत्ते - **घटत एवेति** । पूर्वपक्षी शङ्कते - **कथमिति** । परिहारमाह - **अज्ञानमात्रनिमित्तत्वात् तद्विभागस्य सर्पात्मतेव रज्ज्वाः** - इति । अयमाशयः । भवेदयमवष्टम्भो यदि वयं वास्तविकेनैव वृत्तेन आत्मन्यज्ञानाश्रयत्वं विषयत्वं चातिष्ठेमहि । अज्ञानमात्रनिमित्तस्त्वयम् अज्ञानाश्रयत्वादिविभागः, आत्मानात्मविभागश्च । न हि कल्पितम् अकल्पितस्य स्वभावो भवति सर्पात्मतेव रज्ज्वाः । तदुक्तं **संबन्धवार्तिके** -

ब्रह्माविद्यावदिष्टं चेन्ननु दोषो महानयम् ।
निरविद्ये च विद्याया आनर्थक्यं प्रसज्यते ॥सं.वा. १७५॥

इत्याशङ्क्य

नाविद्यास्येत्यविद्यायामेवासित्वा प्रकल्प्यते ।
ब्रह्मदृष्ट्या त्वविद्येयं न कथञ्चन युज्यते ॥सं.वा. १७६॥

यतोऽनुभवतोऽविद्या ब्रह्मास्मीत्यनुभूतिवत् ।
अतो मानोत्थविज्ञानध्वस्ता साप्येत्यथात्मताम् ॥सं.वा. १७७॥

इति च ॥

इहाप्युक्तं पूर्वस्मिन्नध्याये 'सर्व एवायमात्मानात्मविभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपतितोऽविद्योत्सङ्गवर्त्येव, न परमात्मव्यपाश्रयः ॥' (२-१०३) इति । अतः सर्वमनवद्यम् ॥

उपसंहारः -

अस्तु सर्वमेतदेवम्, प्रकृते किमायातम् ? - इत्यत आह - **'तस्मात्'** इति । तदेवम् आत्माश्रिताज्ञानमात्रनिमित्तत्वात् द्वैतानर्थस्य तदपनुत्तौ द्वैतानर्थाभावः । अज्ञाननिमित्तस्य हि द्वैतस्य विकल्पमात्रत्वात् मिथ्यात्वे सति तदपनोदोपपत्तिः । अज्ञानाश्रयत्वस्यापि यथोक्तविधया अज्ञानमात्रनिमित्तत्वात् अवास्तविकत्वे सिद्धे तस्याप्यपनोदोपपत्तिः । **'तदपनोदश्च वाक्यादेव'** ; न ह्यवास्तवं किञ्चिद् वास्तवम् अन्यदपनोदकमपेक्षते, तस्यावास्तवत्वज्ञापकं वाक्यमात्रं मुक्त्वा । न हि रज्ज्वां विकल्पितः सर्पसंबन्धः, तन्निमित्तमज्ञानं वा रज्जुसतत्त्वज्ञापकवाक्यादन्यदपनोदकमपेक्षते । तत्र वाक्यार्थज्ञानमेव कथमुत्पद्यताम् ? - इत्याशङ्क्याह **'तत्पदपदार्थाभिज्ञस्य'** इति । तस्मिन् वाक्ये यानि पदानि तत्, त्वम्, असि - इत्येतानि, ये च तेषामर्थाः, तेषाम् अभिज्ञस्य न वाक्यश्रवणादन्यत् अपेक्षितव्यमवशिष्यत इत्यर्थः । तत्पदस्य हि निर्विकारत्वम्, प्रमेयभूतद्रव्यादिधर्मासंपृक्तत्वम्, चिदात्मकत्वम् - इत्यादिशास्त्रप्रसिद्धस्वभावकम् अद्वितीयं जगत्कारणम् अर्थः ; त्वंपदस्य च देहादिसर्वात्माभासविलक्षणश्चैतन्यमात्रः प्रत्यगात्मा अर्थः । असिपदस्य च तयोरैक्यम् । यस्य ह्येते पदार्थाः अज्ञानसंशयविपर्ययलक्षणप्रतिबन्धाभावात् अभिज्ञाताः, तस्य वाक्यश्रवणमात्रादेव सकलमपि द्वैतमपनुद्यते रज्जुवाक्यश्रवणमात्रेणेव रज्जुसर्पः । पदार्थाभिज्ञता च संपादिता पूर्वाध्यायार्थनिश्चयेनेति वाक्यार्थाध्यवसितिमात्रमवशिष्टमिति तद्व्या-

ख्यानम् उत्तराध्यायार्थ इत्याह - **अतो वाक्यव्याख्यानाय अध्याय आरभ्यते इति ॥**

---

२. वाक्यादेवावाक्यार्थप्रतिपत्तिः

(मूलम्)

तत्र यथोक्तेन प्रकारेण तत्त्वमस्यादिवाक्योपनिविष्टपदपदार्थयोः कृतान्वयव्यतिरेकः -

यदा ना तत्त्वमस्यादेर्ब्रह्मास्मीत्यवगच्छति ।
प्रध्वस्ताहंममो नैति तदा गीर्मनसोः सृतिम् ॥१॥

यदैव तदर्थं त्वमर्थेऽवैति तदैव अवाक्यार्थतां प्रतिपद्यते गीर्मनसोः सृतिं न प्रतिपद्यते - इति कुत एतदध्यवसीयते ? यस्मात् -

तत्पदं प्रकृतार्थं स्यात् त्वंपदं प्रत्यगात्मनि ।
नीलोत्पलवदेताभ्यां दुःख्यनात्मत्ववारणे ॥२॥

एवं कृतान्वयव्यतिरेको वाक्यादेव अवाक्यार्थं प्रतिपद्यत इत्युक्तम् । अतस्तद्व्याख्यानाय सूत्रोपन्यासः -

सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यगात्मनाम् ॥३॥

(क्लेशापहारिणी)

वाक्यार्थज्ञानेनावाङ्मनसगोचरतत्त्वरूपेणावस्थानम् -

ननु वाक्यार्थप्रतिबन्धस्त्वंपदार्थविवेकात् अपनुद्यत - इत्युक्तम् ।

तथापि पदार्थसंसर्गस्यानिवारणात् कथं वाक्यमात्रात् निर्विशेषम् अवाक्यार्थं विजानीयादिति ? तत्प्रकारं विवृण्वन् आदौ वाक्यतद्गत-पदकृत्यं तावत् प्रतिजानीते द्वाभ्यां श्लोकाभ्याम् । तत्र द्वितीयाध्याया-र्थमनूद्य वाक्यार्थज्ञानफलमाह - **तत्रे**त्याद्यवतारिकापूर्वकम् **'गीर्मनसोः सृतिम्'** इत्यन्तेन श्लोकेन । पदपदार्थयोः कृतान्वयव्यतिरेकः पदस्य पदार्थस्य च विवेकं कृतवान् ब्रह्मात्मावगतिं यदा प्राप्नोति तदा गीर्मनसोः सृतिम् नैति इति योजना । अथवा 'पदविषये पदर्थविषये च कृतान्वयव्यतिरेकः' इति सप्तम्यन्ते एव पदे 'पदपदार्थयोः' इति समस्तपदावयवत्वेन ग्राह्ये । तत्र पदविषये अन्वयव्यतिरेकौ यथा 'तत्त्वमसि', 'अहं ब्रह्मास्मि' - इत्यादिवाक्येषु त्वम्, अहम् - इत्यादीनि पदानि संसारित्वेनावभासमानात्मपराणि, 'तत्', 'ब्रह्म' - इत्यादीनि तु प्रकृतजगत्कारणवस्तुपराणीति वाक्यसंदर्भपर्यालोचनया निर्धारण-फलकौ । पदार्थविषये तु त्वंपदार्थः, न देहादिः किं तु सर्वान्तर-प्रत्यगात्मभूतं चैतन्यमेव, तत्पदार्थस्तु निरस्तसर्वसंसारधर्मकं ब्रह्मसंज्ञकं वस्तु - इति सर्वत्र पदार्थानुगमेन निर्धारणफलकः ।।

एवं च वाक्ये ये तत्त्वंपदे, यौ च तयोरर्थौ, तयोः कृतान्वय-व्यतिरेकः सन् यदा 'ब्रह्मास्मीत्यवगच्छति' इति श्लोकस्थेन संबन्धः - इति प्रदर्शयितुं श्लोकं पठति - **यदेत्यादि** । यदा ना मुमुक्षुः पुरुषः, प्रध्वस्ताहंममः समनन्तरपूर्वाध्यायोक्तप्रकारेण, अहंममत्वयत्नेच्छादी-नाम् अनात्मतां मिथ्यात्वं च आकलय्य, तत्त्वमस्यादेर्वाक्यात् ब्रह्मा-त्मैकत्वबोधकात् 'अहं ब्रह्मास्मि' इत्यवगच्छति स्वस्य ब्रह्मात्मता-मनुभवति, तदा गीर्मनसोः सृतिं वाङ्मनसयोर्गोचरतां नैति, वाङ्मन-सव्यवहारातीतनिर्विशेषवस्त्वात्मनैवावतिष्ठते इत्यर्थः ।।१।।

वाक्यार्थज्ञानात् दुःखित्वानात्मत्ववारणम् -

प्रश्नमुत्थाप्य द्वितीयश्लोकेनोत्तरमाह - **यदैवेत्यादिना** । यदैव

तदर्थं त्वमर्थेऽवैति त्वंपदार्थभूते प्रत्यगात्मनि तत्पदार्थं निरस्तनिखिल-संसारधर्मकं शुद्धचैतन्यं जानाति, तदैवावाक्यार्थतां भेदसंसर्गरहितं निर्विशेषमेव वस्तु संपद्यते वाक्यार्थवेदिता इति कुतो निश्चीयते ? - इति प्रश्नः । उत्तरत्वेन श्लोकमवतारयति **'यस्मात्'** इति ॥

तत्पदम् इति । 'तत्त्वमसि' (छां. ६-८-७) इति वाक्ये हि तत्पदं प्रकृतार्थं स्यात् । अद्वितीयस्य परमार्थसत्यस्य प्रकृतस्य सदणिम्नः परमात्मनो वाचकं स्यात् । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इति प्रकृतत्वात्, 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति जगज्जन्मादिकारणत्वेन मध्ये परामृष्टत्वात्, इहापि 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इत्युक्त्वा 'तत्त्वमसि' (छां. ६-८-७) इति प्रकृतपरामर्श-पूर्वकमेवोपदेशात् इति भावः । **त्वंपदं 'प्रत्यगात्मनि'** । श्वेतकेतोः पितुरादेशवाक्यं श्रोतुं मन्तुं चोपस्थितस्य प्रतीचि पराग्भूताहङ्कारा-द्यनात्मापेक्षया सर्वान्तरभूते आत्मनि 'वर्तते' इति शेषः । ततश्च एताभ्यां समानाधिकरणाभ्यां दुःखित्वानात्मत्ववारणे भवतः - इत्यर्थः । तत्र दृष्टान्तः **'नीलोत्पलवत्'** इति । यथा 'नीलमुत्पलम्' इति वाक्ये नीलपदं सर्वनीलवस्तुषु वर्तमानम् उत्पलशब्दसांनिध्यात् अनुत्पलेभ्यो व्यावर्तते, उत्पलशब्दश्च नीलशब्दसाहचर्येण रक्तादिभ्यो व्यावर्तते - तथा च ताभ्यां अनुत्पलत्वरक्तत्वादिवारणे भवतः[1] - एवमेव प्रकृते तत्पदेन त्वंपदवाच्यं दुःखित्वम् त्वंपदेन च तत्पदगम्यमनात्मत्वं च व्यावर्तितं भवति इत्यर्थः । इत्थं चोभे अपि पदे चैतन्यमात्रं लक्षयत इति वाक्यात् अवाक्यार्थप्रतिपत्तिः संगच्छत इति भावः ॥२॥

वाक्यार्थविचारारम्भार्थं सूत्रोपन्यासः -

तत्त्वमसिवाक्ये तत्त्वंपदयोः सामानाधिकरण्यात् दुःखित्वानात्म-

1. 'वारणम्' इति पाठे तु 'भवति' इति व्याख्यानपदं नेयम् ॥

त्वयोर्वारणं भवति - इत्युक्तम् । अथ कथं तद्वारणम्, कथं वा वाक्यादेव अवाक्यार्थप्रतिपत्तिः ? इत्येतद् विशदयितुकामः, तत्र सूत्रभूतं श्लोकं तावदुपन्यस्यति 'सामानाधिकरण्यं च' इत्यादि । तदाह - **'एवम्' इति** ।।

सामानाधिकरण्यमिति । पदयोः सामानाधिकरण्यम् पदार्थयोर्विशेषणविशेष्यता, ततस्तत्त्वंपदार्थयोः पराभिन्नप्रत्यगात्मना लक्ष्यलक्षणसंबन्धः - इति संबन्धत्रयप्रतिपत्तिक्रमेण, यथोक्तावाक्यार्थप्रतिपत्तिः सेत्स्यतीति सूत्रश्लोकाभिप्रायः ।।३।।

---

३. श्रवणमनने विधिपरिप्रापिते

(मूलम्)

अस्मिन् सूत्रे उपन्यस्ते कश्चिच्चोदयति - योऽयं वाक्यार्थप्रतिपत्तौ पूर्वाध्यायेनान्वयव्यतिरेकलक्षणो न्यायः सर्वकर्मसंन्यासपूर्वकोऽभिहितः, किमयं विधिपरिप्रापितः, किं वा स्वरसत एवात्र पुमान् प्रवर्तत इति ? किञ्चातः ? शृणु । यद्यात्मवस्तुसाक्षात्करणाय विधिपरिप्रापितोऽयं न्यायः, तदा अवश्यम् आत्मवस्तुसाक्षात्करणाय व्यावृत्तशुभाशुभकर्मराशिः, एकाग्रमनाः, अन्वयव्यतिरेकाभ्यां यथोक्ताभ्याम् आत्मदर्शनं करोति । अपरिसमाप्यात्मदर्शनं ततः प्रच्यवमान आरूढपतितो भवति । यदि पुनः. यदृच्छात. प्रवर्तते, तदा न कश्चिद्दोषः इति । विधिपरिप्रापित इति ब्रूमः । यत आह -

शमादिसाधनः पश्येदात्मन्यात्मानमञ्जसा ।
अन्वयव्यतिरेकाभ्यां त्यक्त्वा युष्मदशेषतः ॥४॥

युष्मदर्थे परित्यक्ते पूर्वोक्तैर्हेतुभिः श्रुतिः ।
वीक्षापन्नस्य कोऽस्मीति तत्त्वमित्याह सौहृदात् ॥५॥

(क्लेशापहारिणी)

अन्वयव्यतिरेकपरिशीलनविषये शङ्का -

अत्रान्तरे वाक्यादवाक्यार्थप्रतिपत्तिः किं विशिष्टाधिकारिका, आहोस्वित् यदृच्छातो यस्य कस्यचिदपि भवति इति वादिविप्रतिपत्तेः संशयमुत्थाप्य विधिपक्षं स्वीकर्तुमाह - **'अस्मिन्' इति** । अयमत्र चोदकस्याभिप्रायः - 'मुक्तेः क्रियाभिः सिद्धत्वात्' (१-९), 'कर्मणोऽङ्गाङ्गिभावेन स्वप्रधानतयाऽथवा । संबन्धस्येह संसिद्धेः' (१-२०) केवलेन कर्मणा, ज्ञानसमुच्चितेन वा तेन, मुक्तिः स्यात् इति पूर्वपक्षम् उपन्यस्य तदुपस्थापितयुक्तिवाक्याभासनिरसनपूर्वकं सकल-संसारनिमित्ताज्ञानापनोदनहेतुत्वं तत्त्वमस्यादिवचस एवेति प्रथमाध्याये निरूपितम् । 'नाविरक्तस्य संसारान्निविवृत्सा ततो भवेत्' (२-६) इत्यारभ्य, 'न विना गुरुसंबन्धं वाक्यस्य श्रवणं भवेत् ॥ तथा पदपदार्थौ च न स्तो वाक्यमृते क्वचित् । अन्वयव्यतिरेकौ च तावृते स्तां किमाश्रयौ ॥ अन्वयव्यतिरेकाभ्यां विना वाक्यार्थबोधनम् । न स्यात्तेन विना ध्वंसो नाज्ञानस्योपपद्यते ॥' (२-७, ८, ९) इत्यन्तेन श्लोकचतुष्टयेन वाक्यार्थप्रतिपत्तिप्रयोजनः, अन्वयव्यतिरेकलक्षणो न्यायो मननापराभिधानः सर्वकर्मसंन्यासपूर्वकः इति च द्वितीयाध्यायेऽभिहितम् । तच्चेदं मननं किं स्वेच्छयैव येनकेनचित् कुतूहलिना ज्ञानार्थिनापि कर्तव्यम्, उत शास्त्रविहितेन प्रकारेण संन्यस्तसर्व-कर्मणैव ? - इतीदं निरूपणीयम् इति ॥

ननु पूर्वाध्याये सर्वकर्मसंन्यासं कृतवत एवात्राधिकार इति निर्णीतम् । न । ज्ञानस्याज्ञाननिवर्तनलक्षणदृष्टफलत्वात्, ज्ञानं प्रति च श्रवणमननयोः साधनत्वस्य लोके दृष्टत्वाच्च येनकेनचिदपि श्रवणादिकं कर्तुं शक्यत एवेति नात्र विधेरवकाशोऽस्ति इति शङ्कितुराशयः ।।

अत्र मण्डनानुयायी विमर्शप्रयोजनमाक्षिपति - **किञ्चातः ?** इति । अयं भावः । न वयम् अनेन संशयेन परिहृतेन प्रयोजनं संभावयामः । उभयथापि वाक्यार्थविचारणे प्रवृत्त्युपपत्तेः । अथवा विशिष्टसाधनमन्तरेणापि पदपदार्थान्वयव्यतिरेकयोः शक्यकरणत्वात्, शब्दश्रवणमात्रात् शब्दव्यापारज्ञानवतः वाक्यार्थप्रतिपत्त्युपपत्तेश्च न तत्र विधेरावश्यकतास्ति । तस्मात्, विदितपदपदार्थस्य वाक्यात् तत्त्वज्ञाने ज्ञातेऽपि द्रढीयसो मिथ्यादर्शनसंस्कारस्यानुवृत्तेस्तदभिभवाय, तदुच्छेदाय वा तत्त्वदर्शनाभ्यासो विधीयते 'मन्तव्यो निदिध्यासितव्यः' इति । अथवा तत्रापि विधिर्व्यर्थ एव । दृष्टा हि ज्ञानाभ्यासेन सम्यग्ज्ञानोत्पत्तिः, ततश्च मिथ्याज्ञानसंस्कारोच्छित्तिर्लोके । तस्मात्, न वाक्यमात्रादवाक्यार्थप्रतिपत्तिः, नापि विधिपरिप्रापितौ यथोक्तान्वयव्यतिरेकौ इति वयमुत्पश्याम इति ।।

चोदकस्तु विमर्शप्रयोजनमाह - **'शृणु'** इत्यादिना । यदि विधिपरिप्रापितोऽयं न्याय इति स्वीक्रियते तदा वाक्यार्थप्रतिपत्त्या आत्मवस्तुसाक्षात्करणाय व्यावृत्तशुभाशुभकर्मराशिः संन्यस्तसर्वकर्मा सन् एकाग्रमना ध्यानयोगमास्थितः, तद्बलेन लब्धपदार्थज्ञानः, अन्वयव्यतिरेकाभ्यां यथोक्ताभ्यां वाक्यादेवावाक्यार्थप्रतिपत्त्या आत्मदर्शनं करोति न तु तदनन्तरमपि वाक्यार्थज्ञानाभ्यासादिकमपेक्षते । फलस्यात्मदर्शनस्य प्राप्तत्वात् इत्यर्थः । तदेवं विधिपक्षे विधिवत्संन्यस्तसर्वकर्मणा आत्मदर्शनफलपर्यन्तं श्रवणमनने अनुष्ठातव्ये

भवत इति साधनत्वेनान्वयव्यतिरेकन्यायोऽवश्यानुसर्तव्यो भवति । ननु किमिति फलनिष्पत्तिपर्यन्तं मननानुष्ठानं कर्तव्यम् ? निवृत्तकुतूहलः, सम्यक् कर्मानुष्ठाने च प्रेरितो वा किमिति ततो न निवर्तेतेति ? अत आह - **अपरिसमाप्यात्मदर्शनमिति** । ततः संन्यासिकर्तव्यात् प्रच्यवमानः आरूढपतितो भवति । प्रत्यवैतीत्यर्थः । 'तद्भूतस्य तु नातद्भावः' (वे. सू. ३-४-४०) इति न्यायात् । न च कर्मानुष्ठानेच्छया निवृत्तिः ; कर्मणस्तं प्रति विहितत्वाभावात् । न च कुतूहलनिवृत्त्या निवृत्तिः । स्वाश्रमविहितव्यतिक्रमे दोषभाक्त्वप्रसङ्गात् इत्यभिप्रायः । अथान्यस्मिन् पक्षे किं स्यादिति ? तत्राह - **'यदि पुनर्यदृच्छातः'** इति । तदा अन्वयव्यतिरेकौ फलपर्यन्तावकृत्वापि निवर्तमानस्य न किञ्चिद्दुष्येत् । केवलरागप्रयुक्तत्वात् तत्प्रवृत्तेः - इति भावः ॥

अन्वयव्यतिरेकन्यायो विधिपरिप्रापितः -

तदेवं चोदकोऽन्वयव्यतिरेकानुष्ठानस्य विधिपरिप्रापितत्वपक्ष एव फलपर्यन्तत्वम् नान्यथेत्यतो निर्णेतव्योऽयं संशय इत्याह । न च विधिरस्ति, तदावश्यकता वा इति तु पूर्वपक्षिणो हृदयम् । अत्र सिद्धान्ती प्राह - **'विधिपरिप्रापित इति ब्रूमः'** इति । ननु प्रतिज्ञामात्रमिदम् इत्याशङ्क्य विध्युदाहरणार्थत्वेन श्लोकमवतारयति - **'यत आह' इति ॥**

शमादिसाधन इति । शमदमोपरतितितिक्षाश्रद्धासमाधानयुक्तः, आत्मानं परमात्मानम् आत्मनि स्वे प्रत्यगात्मनि पश्येत् । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति हि श्रुतौ शमादिमध्ये उपरतिशब्दवाच्यः संन्यासो विद्याङ्गत्वेन विहितोऽस्ति । यद्यप्यत्र 'पश्यति' इति वर्तमानापदेश एवोपलभ्यते, तथापि 'तस्मात्' इति प्रकृतप्रशंसापरिग्रहात् विधित्वं प्रतीयते । 'पश्येत्' इति च (बृ. मा.

४-२-२८) माध्यन्दिना विस्पष्टमधीयते इत्यभिप्रायः । यद्यपि च 'पश्येत्' इति विधिविभक्तिर्दर्शनसंबन्धिनी शब्दतः, तथापि आत्मदर्शनस्याविधेयत्वात् तत्साधनमेवात्र विधीयत इत्यध्यवसीयते 'यत्पश्येत् तच्छमादियुक्तो भूत्वेति' । यथोक्तं **बृहद्वार्तिके** 'अतोऽपुरुषतन्त्रत्वान्नात्मज्ञाने विधिर्भवेत् । अन्वयादिक्रिया त्वस्य तत्तन्त्रत्वाद्विधीयते ।। श्रवणं मननं तद्वत्तथा शमदमादि यत् । पुमाञ्शक्नोति तत्कर्तुं तस्मादेतद्विधीयते ।।' (बृ. वा. २-४-१२१, १२२) इति ।।

श्रवणादीनां विहितत्वे व्याख्यातॄणां विप्रतिपत्तिः -

अत्रेदमनुसन्धेयम् । **सूत्रभाष्ये** समन्वयसूत्रव्याख्यानप्रसङ्गेन "किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि ?" (सू. १-१-४) इति छायाशब्दोपादानात् श्रवणादीनां विधेयत्वमसंमतं भाष्यकाराणामिति प्रतीयते । तथा च केचिद् व्याख्यातारो वदन्ति 'अन्यतः प्राप्ता एव हि श्रवणादयो विधिस्वरूपैर्वाक्यैरनूद्यन्ते । न चानुवादोऽप्यप्रयोजनः । प्रवृत्तिविशेषकरत्वात् ।' (वा. भा. १-१-४, पा. १३०) इति 'मनननिदिध्यासनयोरपि न विधिः । तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात्' (वा. भा. १-१-४, पा. १५३) इति च । अन्ये तु भाष्यव्याख्यातारो मन्यन्ते 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इत्यमृतत्वसाधनम् आत्मदर्शनमनूद्य मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयते । एष एव च वेदान्तवाक्यविचारं विदधद् विधिः' (पं. वि. पा. १०४, १६८) इति । अत्र **वार्तिककारेण** तु 'तस्मादेतद् विधीयते' इति कण्ठरवेणैवोक्तम् । तत्र कथमत्रैकवाक्यता ? - इति भवति जिज्ञासूनां विशयः ।।

श्रवणादिविधिविषये सिद्धान्तः -

अत्रेत्थं नः प्रतिभाति । भाष्ये तावत् प्रतिपत्तिविधिविषयतयैव ब्रह्म समर्प्यते यूपाहवनीयाद्यलौकिकपदार्थवत् - इति वृत्तिकारमतनिराकरणप्रसङ्गेन ब्रह्मवस्तुज्ञानलक्षणा तावत् प्रतिपत्तिर्न विधेया वस्तुतन्त्रत्वादित्युक्त्वा 'किमर्थानि तर्हि' इतीयं शङ्का समुद्भाविता । तेन दर्शनलक्षणेन ज्ञानेन सह समभिव्याहारात् श्रवणादिज्ञानान्यपि न विधेयानि इत्येतावदुक्तम् । स्थानान्तरे तु "द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिताः तत्त्वाभिमुखीकरणप्रधानाः, न तत्त्वावबोधविधिप्रधाना भवन्ति" इति वस्तुतन्त्रज्ञानविधिं निरस्य तच्छेषेण "लोकेऽपि 'इदं पश्य', 'इदमाकर्णय', इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु' इत्युच्यते न 'साक्षाज्ज्ञानमेव कुरु' - इति" (सू. भा. ३-२-२१, पा. ३६२) । एवमनयोर्भाष्यवचनव्यक्त्योरर्थसमालोचनेन अयमत्र भगवतो अभिप्राय इत्यवसीयते, यत् ज्ञानस्याविधानेऽपि श्रवणादिविधानवाचोयुक्त्या वस्तुनि प्रणिधानं विधीयत एवेति । तथा हि "प्रत्ययावृत्तिः कर्तव्या । कुतः ? असकृदुपदेशात् । 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्येवञ्जातीयको हि असकृदुपेशः प्रत्ययावृत्तिं सूचयति" (सू. भा. ४-१-१) इत्यनेनैकार्थ्यं भवति । इत्थं च श्रवणादिविध्युक्तिस्तावद् ग्रन्थकृतो न भाष्यविरुद्धा । यत्तु व्याख्यातॄणां वचनम् 'अन्यतः प्राप्ता एव श्रवणादयः' इति, तदनादेयम् । न हि लोके यद् यथा प्राप्तम्, तत्तथैवातीन्द्रिये वेदान्तार्थेऽपि इति नियन्तुं शक्यते । उक्तो हि सम्बन्धोक्तौ ग्रन्थकृतैव विधिपक्षे विशेषः अनन्यप्राप्तः - 'अपरिसमाप्यात्मदर्शनं ततः प्रच्यवमान आरूढपतितो भवति' इति । एतदपि भाष्यकाराभिप्रायानुगुणम्, परिव्राजकधर्ममनूद्य हि प्राह भाष्यकृत् 'शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको

न विरोधी । ब्रह्मनिष्ठत्वमेव तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादीनि चेतरेषाम् । तद्व्यतिक्रमे च तस्य प्रत्यवायः' (सू. भा. ३-४-२०) इति । तस्मात्, विधिपक्ष एवात्र ज्यायान् । यत् पुनर्व्याख्यात्रन्तरमतम् - श्रवणविधिर्वेदान्तवाक्यविचारे प्रवर्तक इति । न तत्र मानं पश्यामः । न हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इतीदं वेदान्तवाक्यविचारस्य कर्तव्यकर्मतां प्रकृत्य प्रवृत्तम्, किं तर्हि, अमृतत्वसाधनम् आत्मदर्शनमेव, नान्यदिति वक्तुम् । तस्मात् 'पश्येत्' इत्यनेन श्रवणवन्मननमपि दर्शनार्थं विधिपरिप्रापितमेव, श्रुत्युक्तनयमनुसृत्य कर्तव्यमेव तत् । तेन हि अन्वयव्यतिरेकलक्षणेन युष्मदर्थः सर्वोऽपि परित्यक्तो भवतीत्याह - **'अन्वयव्यतिरेकाभ्याम्'** इत्यादि ।।४।।

कृतान्वयव्यतिरेकस्यैव वाक्योपदेशः -

अथ वाक्यकृत्यं विविच्य वक्तुं प्रारभते - **युष्मदर्थ इति** । युष्मदर्थे अहमादिदेहपर्यन्ते पूर्वोक्तैः अतीतानन्तराध्यायोक्तैर्हेतुभिः अनात्मतया परित्यक्ते सति वीक्षापन्नस्य अनिर्धारितस्वात्मतत्त्वं जिज्ञासमानस्य 'को नु खल्वहम् ?' इति वितर्कयतः श्रुतिः सौहृदात् स्वयमेव सुहृद्भूत्वा तदज्ञाननिरासाय 'तत् त्वम्' तदद्वितीयपरमानन्द-रूपस्त्वमसीत्याह इत्यर्थः ।।५।।

---

४. वाक्यनिरसनीयाज्ञानस्वरूपम्

(मूलम्)

अत्रापि चोदयन्ति साङ्ख्याः, शरीरेन्द्रियमनोबुद्धिषु अनात्मसु

आत्मेति निस्सन्धिबन्धनं मिथ्याज्ञानम् अज्ञानम् । तन्निबन्धनो हि आत्मनो अनेकानर्थसंबन्धः । तस्य च अन्वयव्यतिरेकाभ्यामेव निरस्तत्वात्, निर्विषयं तत्त्वमस्यादिवाक्यं प्राप्तम् । तस्मात् वाक्यस्य चैष महिमा योऽयमात्मानात्मनोर्विभाग इति । तन्निराकरणायेदम् उच्यते -

भेदसंविदिदंज्ञानं भेदाभावश्च साक्षिणि ।
कार्यमेतदविद्याया ज्ञात्मना त्याजयेद् वचः ।।६।।

(क्लेशापहारिणी)

साङ्ख्यचोद्यम् -

तत्त्वमसीति वाक्येनाध्यासकारणम् अज्ञानं निरसनीयम् - इति स्थितम् अतीते ग्रन्थे । तस्यास्याज्ञानस्य स्वरूपं निर्दिधारयिषुः साङ्ख्यचोद्यम् उत्थापयति - **अत्रापीति** । शरीरादिष्वनात्मसु आत्मबुद्धिरूपं निःसन्धिबन्धनम् - निरूढनिबिडं मिथ्याज्ञानमेवाज्ञानम् । न तु तादृशमिथ्याज्ञानव्यतिरिक्तमज्ञानं नामास्तीति भावः । तन्निबन्धनो हि अनात्मन्यात्मत्वबुद्धिलक्षणाभूताभिनिवेशनिमित्तो हि यस्मात् आत्मनः असङ्गस्य अनेकानर्थसंबन्धः, जननमरणादिसंसारसंबन्धः । तस्य च मिथ्याज्ञानस्य अन्वयव्यतिरेकाभ्यामेव साक्ष्यन्वयसाक्ष्यव्यतिरेकरूपाभ्यां निरस्तत्वात् निर्विषयं तत्त्वमस्यादिवाक्यं प्राप्तम् - न हि तेन निरसनीयम् अन्यदस्त्यज्ञानमवशिष्टं यदर्थस्तृतीय अध्यायः प्रारभ्येत । किं तर्हि वाक्यकृत्यमिति ? तत्राहुः साङ्ख्यानुयायिनः - **'तस्मात्'** इति । योऽयमात्मानात्मनोर्विभागः विवेकः, सोऽविवेकनिरासहेतुः, स एष वाक्यस्य महिमा । विवेक एव वाक्यकृत्यं नान्यदत्रावशिष्यत इति भावः । तदेवं साङ्ख्यचोदनमुद्भाव्य तदपाकरणार्थम् उत्तरश्लोक इत्याह - **तन्निराकरणायेत्यादि** ।।

अविद्याकार्यं ज्ञानविनाश्यम् -

भेदसंविदिति । इदंज्ञानम् अनात्मज्ञानम् भेदसंवित् क्रियाकारकफलभेदज्ञानम् इत्यर्थः । यदिदं भेदसंविद्रूपं ज्ञानम्, यश्च साक्षिणि भेदाभावलक्षणो धर्मः, तदेतदुभयमविद्यायाः कार्यम् । न हि वस्तुवृत्तेनैव भेदसंविद्विषयभूतम् अनात्मवस्तु, तत्साक्षित्वं चात्मनि कूटस्थरूपे नित्यदा स्थितम् । 'आत्मैवेदं सर्वम्' (छां. ७-२५-२) इत्यादिश्रुतिविरोधात् तादृशविभागस्य । तस्मात्, इदमनिदंविभागोऽयं निर्विभागे आत्मनि अविद्याकृत एवेत्यभ्युपगन्तव्यम् । 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' (बृ. ४-५-१५) इत्यादिश्रुतेः - इति भावः । तदेतदविद्याकार्यं केन निवर्त्यते ? तत्रोत्तरं तमेतं विभागं वचः तत्त्व-मस्यादिवाक्यं ज्ञात्मना अद्वितीयचैतन्यमात्रलक्षणज्ञस्वरूपावबोधनेन त्याजयेत् इत्यर्थः । इदमुक्तं भवति ; अनात्मायं भेदरूपः, आत्मा तु तत्साक्षित्वाद् भेदरहितः - इति योऽयमात्मानात्मनोर्विभागोऽन्वयव्यतिरेकाभ्याम्, सोऽप्यविद्याभूमावेव । उक्तं हि पूर्वाध्याये 'सर्व एवायम् आत्मानात्मविभागः, प्रत्यक्षादिप्रमाणवर्त्मन्यनुपतितोऽविद्योत्सङ्गवर्त्येव न परमात्मव्यपाश्रयः' (२-१०३) इति । तदेतदविद्याकार्यं तत्त्वमस्यादिवाक्यजन्यज्ञानेन निवर्त्यते । अतो नात्मानात्मविभागो वाक्यस्य कृत्यम्, न च निर्विषयत्वमेव वाक्यस्येति ॥६॥

(मूलम्)

'ज्ञात्मना त्याजयेद्वचः' इत्युपश्रुत्य आह कश्चित् । मिथ्याज्ञानव्यतिरेकेण आत्मानवबोधस्याभावात् किं वाक्येन निवर्त्यते ? अज्ञानं हि नाम ज्ञानाभावः ; तस्य च अवस्तुस्वाभाव्यात् कुतः संसारकारणत्वम् ? न हि असतः सज्जन्मेष्यते । 'कुतस्तु

खलु सोम्यैवं स्यादिति .... कथमसतः सज्जायेत' (छां. ६-२-२) इति श्रुतेरिति । अत्रोच्यते -

अज्ञात एव सर्वोऽर्थः प्राग्यतो बुद्धिजन्मनः ।
एकेनैव सता संश्च सन्नज्ञातो भवेत्ततः ॥७॥

सन्नज्ञातो भवेत्ततः इत्युक्तम् अधस्तनेन श्लोकेन । कोऽसौ सन्नज्ञातः ? - इत्यपेक्षायां तत्स्वरूपप्रतिपादनायाऽऽह-

प्रमित्सायां य आभाति स्वयं मातृप्रमाणयोः ।
स्वमहिम्ना च यः सिद्धः सोऽज्ञातार्थोऽवसीयताम् ॥८॥

(क्लेशापहारिणी)

पूर्वपक्षः - मिथ्याज्ञानव्यतिरेकेण अज्ञानं नास्ति -

अद्वितीयचैतन्याज्ञानकार्यं द्वैतम् - इत्यत्र **मीमांसकानुयायी** शङ्कान्तरमानयतीत्याह - **'ज्ञात्मना'** इति । **मिथ्याज्ञानव्यतिरेकेण आत्मानवबोधस्याभावात्'** इति । मिथ्याज्ञानमेव हि दुष्टकारणजन्यं मानेन निवर्त्यम् । अज्ञानं तु अभावरूपत्वान्न तथेति किं वाक्येन निवर्त्यताम् ? न किमपि निवर्त्यमस्तीति भावः । अथवा मिथ्याज्ञानव्यतिरिक्ताज्ञानम् अभ्युपगच्छता वाक्यस्य निर्विषयत्वमेवाभ्युपगतं भवतीति भावः । न चास्याज्ञानस्य द्वैतानर्थकारणत्वं घटत इत्याह - **'अज्ञानं हि'** इत्यादि । ज्ञानाभावस्य वस्तुत्वं नास्तीति न तस्य कारणत्वं कुत्रचिदित्यर्थः । तदुक्तं **भट्टपादैः** - 'अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः । वस्तुत्वाद् द्विविधस्यात्र संभवो दुष्टकारणात् ॥' (श्लो. वा. २-५४, पा. ४६) इति । तस्माद् वस्तुत्वान्मिथ्याज्ञानस्य संसारकारणत्वमभ्युपगम्येतापि, न त्वेवाज्ञानस्य तथात्वमित्यभिप्रायः । तत्र युक्तिमाह - **न ह्यसतः सज्जन्मेष्यते इति** । असतः सद्भावे सतश्च

असद्भावे नैव सदसद्विवेकः स्यादिति न कुत्रापि व्यवहारे विश्वासः स्यादित्यभिप्रायः । श्रुतिरप्येतदनुवदतीत्याह - **कुतस्त्विति** । असतः सज्जायेतेति कुतो भवेत् ? न कुतश्चित् प्रमाणादेवं सम्भवति । कथं केन प्रकारेण इदं संभाव्येत ? न ह्यत्र कश्चिद् दृष्टान्तोऽस्ति - इति श्रुतेरभिप्रायः ॥

परिहारः - अज्ञानमेव संशयमिथ्याज्ञानयोस्तत्त्वम् -

सिद्धान्ती चोद्यस्य परिहारत्वेन श्लोकमवतारयति - **अत्रेति** ॥

अज्ञात एवेति । अज्ञानस्य च प्रमित्यनुत्पत्तिरूपत्वात्, तदुत्पत्त्या बाध्यत्वोपपत्तिः । न चाज्ञानं विना मिथ्याज्ञानं संशयज्ञानं वा समुपजायते, येन तदतिरेकेण मिथ्याज्ञानमेवाज्ञानमित्याग्रहः स्यात् । न चाज्ञानबाधे सति मिथ्याज्ञानादिकम् अबाधितमवशिष्यते । मिथ्याज्ञानादिकं हि तदनुगताज्ञानबाधेनैव बाध्यत इति तस्याप्यज्ञानमेव तत्त्वमित्यवगम्यते । न चाज्ञानं न वस्तु, मिथ्याज्ञानं वस्तु - इति वाचोयुक्तिसमाश्रयणं युक्तं महताम् । वस्तुनो ज्ञानबाध्यत्वाभावादिति । तदेतत् सर्वमनुसंधायोक्तम् - 'अज्ञात एव सर्वोऽर्थः प्राग्यतो बुद्धिजन्मनः' इति । उक्तं च **बृहद्वार्तिके** - 'मित्युत्पत्तावनुत्पत्तिर्विरोधाद् बाध्यते यतः । तद्बाधे नाप्यपेक्षाऽस्ति मिथ्याधीबाधनं प्रति ॥ मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् । मूलध्वस्तौ हतं तच्चेन्मिथ्याधीः किं करोति नः ॥ अज्ञानं संशयत्वान्नो मिथ्याज्ञानात्तथैव च । तयोस्तत्त्वविवक्षायामज्ञानं तत्त्वमुच्यते' ॥ (बृ. वा. १-४-४३७, ४३८, ४४०) इति, 'किं भोः सदपि मानेन वस्तु साक्षान्निरस्यते । तस्मिन्निरस्ते किं शेषं यस्मिन् मानस्य मानता' ॥ (बृ. वा. १-४-४२३) इति । तस्मान्मिथ्याज्ञानव्यतिरेकेण नाज्ञानं नाम वस्त्वस्ति ज्ञाननिवर्त्यमिति वचनं साहसमात्रमिति भावः ॥

अज्ञातसत एव कारणत्वम् -

यत् पुनरुक्तम् - अज्ञानं नाम ज्ञानाभावः तस्य चावस्तुत्वात् कुतस्तस्य संसारकारणत्वमिति ? तत्राह - **एकेनैवेति** । अयमाशयः - सर्वो हि पदार्थः, न केवलमज्ञातः, किं तु संश्च, 'घटः सन्, पटः सन्' इति सत्सामानाधिकरण्येनैव ज्ञायमानत्वात् । न च घटादिषु सत्ता भिन्नभिन्ना प्रत्यभिज्ञायते । घटादिषुद्धिषु वस्तुसतत्त्वनिरूपणेन बाध्यमानास्तु 'नायं घटः, किं तु मृदेवैषा' इति तत्तत्कारणरूपेण निर्धारणे निश्चयबुद्धिषु जायमानासु च सद्बुद्धिर्न कदापि व्यभिचरति 'सन् घटः' इत्यत्रेव 'सती मृत्' इत्यत्रापि सत्सामानाधिकरण्यस्यैवानुवृत्तेः । न च घटादिकार्यसत्तातो मृदादिकारणसत्ता भिन्नेति विज्ञायते । तदेवं सर्वत्राप्यज्ञातत्वं सत्त्वं चेति स्थिते सर्वोऽपि पदार्थः एकेनैव सता सन् इति निश्चीयते । अस्त्वेतदपि ततः किमिति ? तत्राह - **'सन्नज्ञातो भवेत्ततः'** इति । अज्ञातत्वं सत्सामानाधिकरण्यम् अविमुञ्चत् सत एव धर्मो न तु घटादीनां मिथ्याज्ञातानामित्यवगम्यते इत्यर्थः । एवं च अज्ञानस्याभावात्मकस्य कथं कारणत्वम् ? - इत्याक्षेपः परिहृतो भवति । अज्ञातसत एव कारणत्वाभ्युपगमात् । यत् पुनरुक्तमज्ञानस्यावस्तुस्वभावत्वम्, तन्मिथ्याज्ञानस्यापि समानम् । न हि ज्ञानबाध्यस्य क्वचिदपि वस्तुत्वं संगच्छत - इति प्रत्युक्तम् । अपि च यथैव मिथ्याज्ञानादिकं प्रतीतरूपेणावस्त्वपि कारणभूतसदात्मना वस्त्वेव भवति, तथैवाज्ञानस्यापि वस्तुत्वम् अशक्यवारणम् - इति ध्येयम् । तदेवं 'सन्नज्ञातो भवेत्' इत्यनया वाचोयुक्त्या सर्वाक्षेपपरिहारः कृतो वेदितव्यः । उक्तं हि **बृहद्वार्तिके** 'मिथ्याज्ञानं कथं वस्तु न हि मिथ्येति वस्तुसत् । मिथ्या तद्वस्तु चेत्युक्तिर्महतामेव शोभते ।। (बृ. वा. १-४-४२५), 'अवस्त्वपि च वस्त्वेव वस्तुरूपात्तदन्यतः' (बृ. वा. १-४-४२८), 'मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात् सदात्मना । अज्ञानस्यापि

तेनैव सत्यत्वं केन वार्यते ॥' (बृ. वा. १-४-४४२), 'स्वतस्तु सत्यता साक्षान्नोभयोरपि विद्यते । अविचारितसिद्धत्वान्न स्वतः परतोऽपि ते ॥' (बृ. वा. १-४-४४४) इति ॥

अत्र मूलाज्ञानवादस्य नास्त्यवसरः -

केचित्त्वत्र अनाद्यग्रहणव्यतिरेकेण भावरूपा अनाद्यविद्या न विद्यते - इति शङ्काभिप्रायं कल्पयित्वा तदुत्तरत्वेन श्लोकमवतारयन्ति । तत्तु ग्रन्थाक्षरबाह्यमित्युपेक्ष्यम् । न हि चोद्यग्रन्थे 'मिथ्याज्ञानव्यतिरेकेण आत्मानवबोधस्याभावात्' इति, 'अज्ञानं नाम ज्ञानाभावः' इति च विस्पष्टोक्तिः, अग्रहणव्यतिरिक्तभावाविद्याक्षेपार्था इति वक्तुं पार्यते केनापि सचेतसा ग्रन्थाक्षराण्यनुसरता । न च 'अज्ञात एव सर्वोऽर्थः' इत्यादिश्लोकाक्षराणि भावाविद्यापरत्वं श्लोकस्य मन्यमानस्य अनुकूलानीति सङ्गच्छते । अज्ञानस्याभावत्वेऽपि अज्ञातसत एव संसारोत्पत्तिरवकल्पत इत्येवंपरतया तु सुव्याख्यानः श्लोकः, तथैव च व्याख्यातमस्माभिरिति । ननु **बृहद्वार्तिकेऽपि** 'अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् । अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥' (बृ. वा. १-४-३७१) इत्यज्ञानस्य द्वैतोपादान-कारणत्वं स्पष्टमुक्तम् । अतः द्वैतस्योपादानापेक्षस्य अभावेतर-कारणकत्वमेव ग्रन्थकृदभीष्टमिति प्रतीयते । मैवम्, द्वैतस्य इन्द्रजालसदृशत्वोक्त्या मिथ्याध्यासत्वमेवोक्तमिति । अध्यासस्या-वस्तुत्वात् उपादानादिकारणापेक्षा नैवास्ति । न च ग्रन्थकृता क्वचिदप्यध्यासोपादानत्वेन अज्ञानं समुपन्यस्तम्, प्रत्युताधस्ता-दस्माभिरुपपादितनीत्या मिथ्याज्ञानसंशयौ प्रत्यभावरूपाज्ञान-स्यैव कारणत्वमत्राप्युक्तमिति गम्यते । तेन च अज्ञानं समुपाश्रित्य ब्रह्मैव कारणम् इति अज्ञातब्रह्मण एव कारणत्वं प्रकृत-श्लोकाक्षरानुगुणमेवोच्यते इत्यवधेयम् । न हि भावाविद्यावादिभि-

रभ्युपगता अविद्या अध्यासोपादानमिति कुत्रापि वार्तिके कण्ठ-रवेणोक्तम् येन तत्परत्वेनायं वार्तिकश्लोको व्याख्यायेत । न चास्ति प्रकृतश्लोकेऽपि भावाविद्यापरामर्शः । यत् पुनः प्रकृतश्लोकव्याख्यानम् '**सुषुप्ति**दशायामेकेनैव सता सर्वस्य सत्त्वम्' इति, यदप्यस्यैव जाग्रद्दशायामपि **सर्वोऽप्यर्थः** स्वबुद्धिजन्मनः प्रागज्ञात इत्यर्थस्य संप्रतिपन्नत्वात्, तस्य सामान्याकारेणाज्ञातत्वेऽप्यज्ञाताकारस्य ज्ञातत्वायोगात्, अज्ञाताकारस्य चानुवादायोगात् '**ज्ञानाभावविलक्षण-भावरूपाज्ञानेनावृत**' इति, तदुभयं श्लोकानुपात्ताधिकावापदुष्ट-मित्यनादेयम् । ननु चाभावरूपाज्ञानस्यावरणत्वाभावेन भावाज्ञाने-नावृत इति व्याख्यातमिति चेत् ; वस्तुतत्त्वप्रकाशकत्वाभावमात्रेणापि तथा व्यपदेशोपपत्तेः । तथा हि **गीताभाष्यम्** - तामसो हि प्रत्ययः आवरणात्मकत्वात् अविद्या, विपरीतग्राहकः, संशयोपस्थापको वा, अग्रहणात्मको वा । विवेकप्रकाशभावे तदभावात् । तामसे चावरणात्मके तिमिरादिदोषे सति, अग्रहणादेरविद्यात्रयस्योप-लब्धेः' (गी.भा. १३-२) इति । तदेवं यथाश्रुतमेव व्याख्यातं मूलं वरमित्यलमतिप्रपञ्चेन ॥७॥

अज्ञातसतः स्वरूपम् -

अज्ञातसतः संसारोत्पत्तिरित्युक्तमधस्तात् । अथेदानीं तस्यास्य सतः स्वरूपनिर्दिधारयिषया प्रश्नान्तरापाकरणार्थं श्लोकारम्भः । तदाह - '**सन्नज्ञात**' इति ।

प्रमित्सायामिति । प्रमेयपरिच्छित्तिं प्रति प्रमाणव्यापारेच्छा प्रमित्सा । तस्यां प्रमित्सायां सत्यां प्रमातृप्रमाणयोः स्वमहिम्ना स्वयंप्रकाशसंविद्रूपेण यः सिद्धः, न तु प्रमातृप्रमाणव्यापारमपेक्षते स्वसिद्धौ, तत्प्रसादादेव प्रमात्रादेरपि सिद्धेः, स एवाज्ञातार्थो '**सन्नज्ञात**' इत्युक्तोऽस्माभिः - इत्यवसीयतां निश्चीयताम् इत्यर्थः । प्रमित्युत्पत्तेः

प्राक् तन्मात्रव्याप्तेरज्ञानस्य, तज्ज्ञाने सति तद्दृष्ट्या प्रमात्रादेरप्यभावाच्च इति भावः । यथोक्तं बृहद्वार्तिके - "न हि संविदनारूढः प्रमात्रादिः प्रसिध्यति । संविन्मात्रैकयाथात्म्यात् प्रमात्रादेरनात्मनः" बृ. वा. १-४-२८२) इति । "एष एवानवगतः स्वतोऽवगततत्त्वकः । एतावन्मात्र-संव्याप्तेरज्ञानादेः पुरा मितेः ॥" (बृ. वा. १-४-२९३) इति च । **केचित्तु** भवत्वेवम्भूतं भावाज्ञानम्, तस्य कथं प्रतीतिः ? - इति प्रश्नोत्तरत्वेन श्लोकमवतारयांबभूवुः । न तदुपादेयम् । अज्ञान-सतत्त्वस्याप्रकृतत्वात्, अज्ञानस्य चैतन्याश्रितत्वेन सिद्धेः संबन्ध-ग्रन्थाक्षरानारूढत्वात्, श्लोकाक्षरानारूढत्वाच्चेति यथाव्याख्यातमेवात्र ग्राह्यम् ॥८॥

---

५. वाक्यादवाक्यार्थप्रतिपत्तिप्रकारः

(मूलम्)

अत्र केचिदाहुः । यत्किञ्चिदिह वाक्यं लौकिकं वैदिकं वा तत् सर्वं संसर्गात्मकमेव वाक्यार्थं गमयति । अतः तत्त्वमस्यादिवाक्येभ्यः संसर्गात्मकं 'अहं ब्रह्म' इति विज्ञाय तावन्निदिध्यासीत यावत् अवाक्यार्थात्मकः प्रत्यगात्मविषयोऽवबोधः 'अहं ब्रह्म' इति समभिजायते, तस्मादेव विज्ञानात् कैवल्यम् आप्नोतीति । तन्निराकरणायेद-मुच्यते -

सामानाधिकरण्यादेर्घटेतरखयोरिव ।
व्यावृत्तेः स्यादवाक्यार्थः साक्षान्नस्तत्त्वमर्थयोः ॥९॥

(क्लेशापहारिणी)

वाक्यार्थनिदिध्यासनेनैव असंसर्गात्मकावबोध इति पूर्वः पक्षः -

एवं तावत् तत्त्वमस्यादिवाक्येन निवर्त्यस्याज्ञानस्य स्वरूपं कार्यं च निर्धारितम् । अथ वाक्यज्ञानमात्रात् अवाक्यार्थात्मकं ज्ञानं नोत्पद्यत एव, किं तु तदभ्यासादेव तदुत्पत्तिः - इति मतमुद्भाव्य परिहरति - **अत्रेति** । केचिदाहुरित्युक्तम् । किमाहुरित्याह - **यत्किञ्चिदिहेत्यादि** । कुत एतत् ? पदार्थसंसर्गस्यैव वाक्यार्थत्वात् । अस्त्वेवं ततः किमिति ? आह - **'अतः'** इत्यादि । निदिध्यासीत, वाक्यार्थज्ञानाभ्यासरूपं ध्यानं कुर्वीत यावत् अवाक्यार्थात्मकोऽवबोधो जायते । तस्मादेव विज्ञानात् कैवल्यमाप्नोतीति संबन्धः । 'विज्ञाय प्रज्ञां कुर्वीत' (बृ. ४-४-२१) इति श्रुतेः - इति भावः । यद्यपि वाक्यादहंब्रह्मेति विज्ञानं नोत्पद्यते इति प्रस्थानान्तरीयपक्ष इव वाक्यज्ञानं संसर्गात्मकम् अभ्यस्यतोऽवाक्यार्थात्मकं विज्ञानान्तरमुत्पद्यते - इत्येषोऽपि पक्षः प्रागेव निरस्तः 'सकृत्प्रवृत्त्या मृद्नाति' (१-६७) इत्यत्र, तथापि केन प्रतिपत्तिक्रमेण वाक्यादवाक्यार्थज्ञानं जायत इति प्रदर्शनार्थं पुनरप्यसौ परामृश्यत इत्यदोषः । श्लोकमवतारयति **'तन्निराकरणायेदमुच्यत'** इति ॥

वाक्यादेवावाक्यार्थप्रतिपत्तिः इति परिहारः -

सामानाधिकरण्यादेरिति । यत्तदुक्तं - सूत्रश्लोके 'सामानाधिकरण्यं च विशेषणविशेष्यता । लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यगात्मनाम्' (३-३) इति तदेतदिह 'सामानाधिकरण्यादेः' इति परामृश्यते, अवाक्यार्थप्रतिपत्तिक्रमप्रदर्शनार्थम् । एवं च तत्त्वंपदयोः सामानाधिकरण्यात् पदार्थयोश्च विशेष्यविशेषणभावात् घटाकाशतदितराकाशयोरिव, विरोधपरिहारार्थं विरुद्धांशव्यावृत्तेः, लक्ष्यलक्षणभावेन

आकाशमात्रमिव, अत्रापि तत्त्वमर्थयोर्विरुद्धांशव्यावृत्तेः, साक्षात् ज्ञानाभ्यासादिकं विनैव, नः अस्माकं पक्षे अवाक्यार्थः तदात्मकोऽवबोधः स्यात् इत्यक्षरयोजना ॥९॥

(मूलम्)

कुतोऽवाक्यार्थोऽवसीयते इति चेत्, तत्प्रतिपत्त्यर्थं विशेषणविशेष्ययोः सामर्थ्योक्तिः -

निर्दुःखित्वं त्वमर्थस्य तदर्थेन विशेषणात् ।
प्रत्यक्ता च तदर्थस्य त्वंपदेनास्य संनिधेः ॥१०॥

(क्लेशापहारिणी)

सामानाधिकरण्यं पदपदार्थयोः -

तत्र विशेष्यविशेषणभावात् विरुद्धांशयोः कथं व्यावृत्तिः ? - इति शङ्कासमाधानार्थत्वेन श्लोकमवतारयति - **'कुतः'** इति ॥

निर्दुःखित्वमिति । त्वमर्थस्य श्वेतकेतोः तदर्थेन तेजोऽबन्नतद्विकारलक्षणजगत्कारणभूतसद्ब्रह्मणा विशेषणात्, निर्दुःखित्वं दुःखित्वव्यावृत्तिर्दर्शिता भवति । अस्य तदर्थस्य यथोक्तसद्ब्रह्मणश्च त्वंपदेन संनिधेः, त्वंपदार्थेन प्रत्यगपरोक्षचैतन्येन विशेषणात् प्रत्यक्ता, पराक्त्वपारोक्ष्ययोर्व्यावृत्तिश्च दर्शिता भवति - इत्यर्थः । न ह्यन्यथा दुःखित्वनिर्दुःखित्वयोः प्रत्यक्त्वपराक्त्वयोर्वा सामानाधिकरण्येन विशेषणविशेष्यभावो घटते । दृष्टस्तु तत्त्वंपदयोरत्र सामानाधिकरण्येन प्रयोगः । तेनावगम्यते न विशिष्टार्थयोरेकत्वमत्र विवक्षितमिति - इति भावः ॥१०॥

(मूलम्)

उक्तं सामानाधिकरण्यं विशेषणविशेष्यभावश्च सङ्क्षेपतः । अथ लक्ष्यलक्षणव्याख्यानायाह -

कूटस्थबोधप्रत्यक्त्वमनिमित्तं सदात्मनः ।
बोद्धृताऽहंतयोर्हेतुस्ताभ्यां तेनोपलक्ष्यते ॥११॥

(क्लेशापहारिणी)

बोद्धृताहन्ताभ्यां कूटस्थबोधप्रत्यक्त्वयोर्लक्ष्यत्वम् -

तदेवं तत्त्वंपदयोः सामानाधिकरण्येन तदर्थयोर्विशेषण-विशेष्यभावेन च अनपेक्षितांशव्यावृत्तिः प्रदर्शिता । अथ सूत्रसूचितो लक्ष्यलक्षणभावो व्याचिख्यासित उत्तरश्लोकेनेत्याह **'उक्तम्' इति** । 'सङ्क्षेपत उक्तम्' इति तु, अस्य विस्तर उत्तरत्रागन्ता - इति संसूचनायेति द्रष्टव्यम् ॥

कूटस्थबोधेति । यथोक्तनीत्या त्वंपदार्थे दुःखित्वस्य व्यावृत्तौ, शिष्टांशेन बोद्धृताहंतारूपेण कूटस्थबोधप्रत्यक्त्वं लक्ष्यते । कथम् ? सदात्मनः सद्ब्रह्मात्मवस्तुनः कूटस्थबोधत्वम् अनिमित्तम् अनौपाधिकं स्वाभाविकं सत्, बोद्धृतायाः हेतुः, प्रमातृत्वे हेतुर्भवति । तथा तद्गतं प्रत्यक्त्वमपि अनिमित्तं सत् अहंताया हेतुर्भवति । न ह्यात्मनः कूटस्थ-बोधरूपस्य स्वतो बोद्धृत्वरूपपरिणामः, सर्वप्रत्यग्रूपस्य चाहंतापत्तिर्वा अन्तःकरणसंबन्धं विना घटते । न च केवलस्याहङ्कारस्य स्वाभाविक कूटस्थबोधप्रत्यग्रूपसद्ब्रह्मानुग्रहं विना आपेक्षिकमपि बोद्धृत्वम् अहन्ता वा । तस्मात्, यतः सदात्मनः बोधरूपत्वं प्रत्यक्त्वं च त्वंपदवाच्यस्य श्वेतकेतोर्बोद्धृताहंतयोर्हेतुः, तेन कारणेन ताभ्यां बोद्धृताहंताभ्यां कूटस्थबोधप्रत्यक्त्वम् उपलक्ष्यते । स एष लक्ष्यलक्षणभावो नाम - इत्यभिप्रायः ॥११॥

(मूलम्)

बुद्धेः कूटस्थबोधप्रत्यक्त्वनिमित्ते बोद्धृताप्रत्यक्त्वे ये त्वसाधारणे, तयोर्विशेषवचनम् -

बोद्धृता कर्तृता बुद्धेः कर्मता स्यादहं तथा ।
तयोरैक्यं यथा बुद्धौ पूर्वयोरेवमात्मनि ॥१२॥

(क्लेशापहारिणी)

बोद्धृत्वप्रत्यक्त्वयोः सहभावः -

लक्ष्यभूतयोर्बोद्धृत्वप्रत्यक्त्वयोः, लक्षणभूतबुद्धिगतबोद्धृत्वप्रत्यक्त्वयोश्च हेतुहेतुमद्भाव उक्तः । तत्र लक्षणगतयोर्बोद्धृत्वप्रत्यक्त्वयोरसाधारणं रूपं वक्ष्यामीत्यवतारिकामाह - **बुद्धेरिति** । आत्मनस्तावत् कूटस्थबोधेन बोद्धृत्वम्, सर्वान्तरत्वेन च प्रत्यक्त्वं निरुपचरितम् । तन्निमित्ते ये बुद्धेर्बोद्धृताप्रत्यक्त्वे, तयोर्बुद्धेरसाधारणयोः, विशेषवचनम् उत्तरश्लोके भविष्यतीत्यर्थः ॥

बोद्धृतेति । बुद्धेर्बोद्धृता नाम कर्तृता, स्वविषयाकारेण परिणामित्वं, स्वगतचिदाभासबलाद् विषयस्फोरणं च । तथा अहम् - अहन्तालक्षणप्रत्यक्त्वं च कर्मता अहंप्रत्ययविषयत्वम् । स चाहंप्रत्ययः बुद्धिमाश्रित्यैवात्मानं लभत इति यथा तयोः बोद्धृत्वाहमोः बुद्धौ ऐक्यम् एकस्मिन्नेव धर्मिणि सहभावः, एवं पूर्वयोरपि तद्धेतुभूतयोः कूटस्थबोधप्रत्यक्त्वयोः आत्मनि ऐक्यम् सहभावः - इत्यर्थः ॥१२॥

(मूलम्)

'यथा बुद्धौ पूर्वयोरेवमात्मनि' इत्यतिदेशेन बुद्धिसाधर्म्यविधानात्, नानात्वप्रसक्तौ तदपवादार्थमाह -

धर्मधर्मित्वभेदोऽस्याः सोऽपि नैवात्मनो यतः ।
प्रत्यग्ज्योतिरतोऽभिन्नं भेदहेतोरसम्भवात् ॥१३॥

भेदहेत्वसंभवं दर्शयन्नाह -

न कस्याञ्चिदवस्थायां बोधप्रत्यक्त्वयोर्भिदा ।
व्यभिचारोऽथवा दृष्टो यथाहंतद्विदोः सदा ॥१४॥

(क्लेशापहारिणी)

आत्मस्थबोद्धृत्वप्रत्यक्त्वयोर्न नानात्वम् -

एवं तर्हि आत्मगतबोद्धृत्वप्रत्यक्त्वयोरपि धीगतयोरिव नानात्वमित्याशङ्का समनन्तरोत्तरश्लोकेनापोद्यते । तदाह - **यथेत्यादि** । **'पूर्वयोः'** इति द्विवचनोपादानात् तयोः परस्परं नानात्वं प्राप्तम्, **'आत्मनि'** इत्यधिकरणवाचकशब्दोपादानात् धर्मधर्मिभेदः प्राप्तः । तत्र द्वितीयं तावत् प्रत्याह **धर्मधर्मित्वभेदोऽस्या इति** । अस्या बुद्धेः धर्मधर्मित्वभेदोऽस्ति बुद्धिर्धर्मिणी बोद्धृताहन्ते तु धर्मौ इति ; सोऽपि भेदः आत्मनो नैव भवति, आत्मा धर्मी बोद्धृताप्रत्यक्त्वे तु धर्मौ इति भेदो न मन्तव्यः - इत्यभिप्रायः । कुत एतत् ? तत्राह - **प्रत्यग्ज्योतिः**, प्रत्यगात्मचैतन्यम् अतः - बोधप्रत्यक्त्वयोः सकाशात् अभिन्नम् अनन्यस्वरूपम् । आत्मैव हि बोधप्रत्यक्त्वे इत्यर्थः । एतदेव कुतः ? तत्राह - **'भेदहेतोरसम्भवात्'** इति ॥१३॥

बुद्धिस्थबोद्धृत्वाहंतयोस्तु परस्परभेदः -

ननु हेतोरसंभव इति कुतो विज्ञायते, कश्चायं भेदहेतुरिति ? तद्दर्शयितुम् उत्तरः श्लोकः । तदाह - **'भेदहेत्वसंभवमिति'** ॥

न कस्याञ्चिदिति । अयं भावः । धर्माणां धर्मिणः सकाशात् भेदो हि धर्म्यन्तरसंक्रान्त्या अवगम्यते । न त्विह आत्मनः सकाशादन्यो धर्मी अस्ति यत्र कूटस्थबोधः प्रत्यक्त्वं वा दृश्यते । तस्माद् बोधप्रत्यक्त्वे न धर्मिण आत्मनः सकाशाद्भिन्ने, स्वरूपभूते एव तु तस्य वन्हेरिव दग्धृत्वप्रकाशकत्वे । न च बोधप्रत्यक्त्वयोः

परस्परं भिदा अस्ति । धर्माणां हि भिदा तदा विज्ञायते यदा ते परस्परं व्यभिचरन्ति । न तु तथा कस्याञ्चिदवस्थायां बोधः प्रत्यक्तां व्यभिचरति, किं तु तत्सहचरित एव वर्तते । एवं प्रत्यक्त्वमपि न जातुचिदपि बोधं व्यभिचरति, अपि तु बोधेन सहैव वर्तते । तदेवं बोधप्रत्यक्त्वयोर्धर्मिणः पृथग्भावादर्शनात्, परस्परव्यभिचारादर्शनाच्च न कथञ्चिदपि आत्मनि तयोर्भेदः संभवति । ननु कुत्रैवं धर्मधर्मिभेदो दृष्टः ?, तत्राह - **'यथाहंतद्विदोः सदा'** इति । बुद्धिधर्मभूतयोरहंताबोद्धृत्वयोः परस्परभेदो दृष्टः ; यतः अहमः कर्मता, तद्बोद्धुश्च कर्तृता - इति विषयविषयिरूपयोस्तयोर्भिदा दृष्टा सदैव । एवं बोद्धा बुद्धेर्न सदा कर्ता, नापि अहन्तैव सदा तत्कर्म भवति ; अहंव्यतिरिक्तममत्वेच्छाप्रयत्नादीनां विषयान्तराणां वा तत्कर्मत्वसम्भवात् । अतः बोद्धृत्वाहंतयोर्व्यभिचारोऽपि गम्यते । तस्मात्, बुद्धौ बोद्धृताप्रत्यक्त्वे यथा सह वर्तेते, तथा आत्मनि कूटस्थबोद्धृता प्रत्यक्ता च सह वर्तेते - इति हेतुहेतुमतोर्विवेकार्थमेव 'एवमात्मनि' (३-१२) इति वचनम्, न तु हेतुभूतयोः बोधप्रत्यक्त्वयोरात्मान्यत्वं परस्परभेदो वा विवक्षितः - इत्यभिप्रायः । **ये तु** बुद्धेरपीह बोद्धृतैव प्रत्यक्त्वं प्रतियोगिनोर्बोध्याकारबाह्याकारयोर्भेदात् भिन्नवद् व्यपदिश्यते - इति व्याचक्षते, ते ग्रन्थकृतैव निरस्ता वेदितव्याः । तेषां पक्षे पूर्वश्लोकतत्संबन्धोक्तिविरोधस्य प्रकृतश्लोकस्थदृष्टान्तोपन्यासविरोधस्य च स्फुटत्वात् । अपि च अहंप्रत्ययगम्य आत्मेति मीमांसकाः, मानसप्रत्यक्षगम्य आत्मेति चान्ये यदाहुः, तद्बोद्धृत्वाहंन्तयोः कर्तृकर्मभावमुररीकृत्यैवेति प्रसिद्धम् । तद्व्युदासेन तत्साक्षी सर्वान्तर आत्मेति सिद्धान्तप्रदर्शनायैवेह प्रयत्यते इति स्पष्टम् । अतोऽपि मूलासङ्गतम् एकीयव्याख्यानमित्यलमतिप्रपञ्चेन ॥१४॥

(मूलम्)

यस्मादज्ञानोपादानाया एव बुद्धेर्भेदो नात्मनः, तस्मात्, एतत् सिद्धम् -

कूटस्थबोधतोऽद्वैतं साक्षात्त्वं प्रत्यगात्मनः ।
कूटस्थबोधाद् बोद्ध्री धीः स्वतो हीयं विनश्वरी ॥१५॥

(क्लेशापहारिणी)

आत्मबुद्ध्योर्बोद्धृत्वे वैलक्षण्यम् -

तदेवं नित्यनिरस्तसमस्तभेदत्वे सिद्धे, बुद्धिगतबोद्धृताऽहन्तोपलक्षितस्यात्मनः, अद्वितीयसाक्षाद्बोद्धृता स्वतःसिद्धैव वाक्येन बोध्यत इति फलति । तदेतत् परस्ताद् व्याख्यास्यमानम् । तदर्थ एव च प्रकृतबोद्धृत्वप्रत्यक्त्वविवेक इति संबन्धकथनार्थम् उत्तरः श्लोक इत्याह - **यस्मादज्ञानोपादानाया एव** इति । आत्माज्ञानमात्रोपादानत्वात् बुद्धेः, बुद्धिभेदेनाविद्यकेन नात्मनि भेदः, स्वतस्तु नास्त्येव भेद इत्युपपादितम् । तस्मादेतत् सिद्धं यच्छ्लोके वक्ष्यते इति शेषः ॥

कूटस्थबोधत इति । प्रत्यगात्मनः कूटस्थबोधतः, बोधैकरूपत्वात्, अद्वैतम् अद्वितीयत्वं साक्षात्वं च सिद्धमित्यर्थः । बोधरूपेणैव तस्य प्रत्यक्ता, सा न ततो भिद्यते इत्युक्तम् । तस्मिंश्च बोधरूपे न द्वैतमनुभूयते, शक्यकल्पनं वा । न हि बोधः सांशः येन तत्र कर्तृकर्मता शङ्क्येत ; न च बोधो बोधेनैव बुध्यते इति कल्पयितुं शक्यते । न च द्वितीयं किञ्चिदस्ति येन सद्वितीयत्वं तस्य स्यात् । बुद्ध्यादेर्द्वितीयत्वेन शङ्क्यमानस्याज्ञानमात्रोपादानत्वात् । तस्मात् अद्वितीयत्वं बोधस्य । अत एव च साक्षात्त्वं च तस्य बोद्धृत्वस्य ; न ह्यस्ति द्वितीयं किञ्चित्, येन तन्मूलकं तद्बोद्धृत्वमिति कल्पयेम । बोधस्य बोधत्वादेव च साक्षात्त्वम् अङ्गीकर्तव्यम् । बोधसंबन्धादेव हि तदन्यत् बुध्यत इति ।

न च बोधस्य प्रकाशकोऽन्योऽस्ति बोधः शक्यसंभावनः । संभाव्यमानोऽपि हि द्वितीयबोधो नैतत् प्रकाशको भवेत् । न हि प्रदीपौ द्वौ प्रकाशस्वरूपौ सन्तौ परस्परस्योपकुरुत इति । तदेवं प्रत्यगात्मबोधस्य साक्षात्त्वम् अद्वितीयत्वं च तावत् सर्वसंप्रतिपत्त्या सिद्धम् । ननु बुद्धेरप्येवमेव स्यात्, तत्राह - **कूटस्थबोधात्** इति । कूटस्थबोधानुग्रहायत्तमेव हि तस्या धियो बोद्धृत्वं नाम, यथा वन्ह्यनुग्रहादेव दग्धृत्वमयःपिण्डस्य, न स्वतः । स्वतो हि यस्मात् इयं धीर्विनश्वरी, तस्मान्न तस्याः साक्षाद्बोद्धृत्वम् । नाप्यद्वितीयत्वं तद्बोद्धृत्वस्य । अत एव हि तस्यां भेद उपलभ्यते 'अहंतद्विदोः' इत्यवोचाम ॥१५॥

(मूलम्)

अथाधुना प्रकृतस्यैव परिणामिनः कूटस्थस्य च लक्षणमुच्यते -

विशेषं कञ्चिदाश्रित्य यत्स्वरूपं प्रतीयते ।
प्रत्यभिज्ञाप्रमाणेन परिणामी स देहवत् ॥१६॥

सामान्याच्च विशेषाच्च स्वमहिम्नैव यो भवेत् ।
व्युत्थायाप्यविकारी स्यात् कुम्भाकाशादिवत्तु सः ॥१७॥

(क्लेशापहारिणी)

कौटस्थ्यसंसारित्वयोर्वैलक्षण्यम् -

तदेवं परिणामिन्या बुद्धेर्बोद्धृताहन्ताभ्यां कूटस्थबोधप्रत्यग्रूपम् अद्वितीयं वस्तूपलक्ष्यते इत्युक्तम् (३-११) । अथेदानीं लक्षणभूतस्य परिणामिनः लक्ष्यस्य कूटस्थस्य च विवेकार्थं किं नाम परिणामित्वम्, किं च कूटस्थत्वम् ? - इति तावत् प्रदर्श्यते तल्लक्षणनिर्देशेन । तदाह - **अथाधुनेति** ॥

प्रथमं तावत् परिणामिलक्षणमाह - **विशेषम् इति** । कञ्चिद्

विशेषमाश्रित्य प्रत्यभिज्ञाप्रमाणेन यस्य स्वरूपं प्रतीयते यथा 'योऽहं बाल्ये पितरमन्वभूवम्, स एवाद्य स्थाविरे नप्तारमनुभवामि' इत्यवस्थाविशेषमाश्रित्य प्रत्यभिज्ञानेन स्वैक्यम्, सः देहवत् परिणामीत्यर्थः । एतेन देहस्यावस्थाभेदेऽपि यथैक्यप्रत्यभिज्ञानं परिणामिनः, तथा तदनुगतबुद्धेरपीत्युक्तं भवति ।।१६।।

अथेदानीं कूटस्थलक्षणमाह - **सामान्याच्चेति** । सामान्याच्च विशेषाच्च व्युत्थायापि तत्परित्यागेऽपि, तत्प्रत्याख्यानेऽपि इति यावत् । यः स्वमहिम्नैव भवेत्, अननुगतोऽव्यावृत्तश्च स्वरूपेणैव योऽवतिष्ठेत, स तु अविकारी कूटस्थः स्यात् । तत्र दृष्टान्तः **कुम्भाकाशादिवदिति** । कुम्भकरकादिष्वनुवृत्तमृत्सामान्यात्, परस्परव्यावृत्तेभ्यः कुम्भादिविशेषेभ्यश्च असंपृक्तः, तद्विलक्षणो य आकाशः, तद्वदित्यर्थः । आदिशब्देन नानाविधपात्रस्थितप्रतिबिम्बविलक्षणसूर्यादिर्गृह्यते । अथवा कुम्भाकाशवदिति दृष्टान्त एवं व्याख्येयः । यथा कुम्भाकाशः, करकाकाशः, गिरिगुहाकाशः - इत्यादिना विशेषरूपेण स्थित इव भासमानः, सर्वत्र तत्रानुगताकाश इति सामान्यरूपेण विभाव्यमानश्च वस्तुतः स्वरूपेणैव तिष्ठति । न हि घटाद्युपाधिभिः विशेषत्वं भजते, तेष्वनुगतः सामान्यरूपं वा तत्त्वतः ; घटाकाशादिविशेषरूपप्रत्याख्यानेऽपि न तस्मिन् किञ्चिद् रूपान्तरमस्ति । अतः सर्वथापि निःसामान्यविशेष एव स्वरूपेणैवावतिष्ठत इति, कूटस्थ एवाकाशः । एवमुपाधिवशात् सामान्यविशेषभावं भजमान इव लक्ष्यमाणः वस्तुतस्तूपाधिनिरपेक्षः स्वरूपेणैव सदा तिष्ठन् अविकारी कूटस्थ इति ज्ञेय इत्यर्थः ।।१७।।

(मूलम्)

आत्मनो बुद्धेश्च बोधप्रत्यगात्मत्वमभिहितम् । तयोरसाधारणलक्षणाभिधानार्थमाह -

बुद्धेर्यत् प्रत्यगात्मत्वं तत् स्याद्देहाद्युपाश्रयात् ।
आत्मनस्तु स्वरूपं तन्नभसः सुषिता यथा ॥१८॥

बोद्धृत्वं तद्वदेवास्याः प्रत्ययोत्पत्तिहेतुतः ।
आत्मनस्तु स्वरूपं तत्तिष्ठन्तीव महीभृतः ॥१९॥

(क्लेशापहारिणी)

बोद्धृत्वप्रत्यक्त्वयोः स्वरूपविवेकः -

अथाधुना परिणामिबुद्धेः कूटस्थात्मनश्च ये बोद्धृत्वप्रत्यगात्मत्वे हेतुहेतुमद्भावेनोपदिष्टे तयोः स्वरूपविवेकप्रदर्शनार्थं श्लोकद्वयम्, तदाह - **आत्मनो बुद्धेश्चेति** ॥

बुद्धेरिति । बुद्धेः प्रत्यगात्मत्वं यत् तद् देहाद्युपाश्रयम् । तदपेक्षयैव तस्याः प्रत्यक्त्वेन विभाव्यमानत्वात् । न तु निरुपचरित-प्रत्यगात्मत्वं तस्याः - इत्यभिप्रायः । आत्मनस्तु तत् प्रत्यगात्मत्वं न तद्वदापेक्षिकम्, किं तर्हि यथैव नभसः सुषिता स्वरूपभूता तथैव तत् प्रत्यक्त्वमात्मनः स्वरूपं न ततोऽन्यदित्यर्थः ॥१८॥

एवमेव बोद्धृत्वस्वरूपविवेकोऽपि कर्तव्य इत्याह - **बोद्धृत्व-मिति** । तद्वदेव यथा प्रत्यगात्मत्वम् पराग्भूतदेहाद्यपेक्षम् एवमेव बोद्धृत्वमपि अस्याः प्रत्ययोत्पत्तिहेतुतः, तत्तद्बुद्धिवृत्तिजन्मसापेक्षम् । ता हि बुद्धिवृत्तय आत्मबोधेन व्याप्ता तदाभासाश्च उत्पद्यन्ते इति बोधशब्दवाच्या भवन्ति, ताभिरेव तु बोद्धृत्वव्यपदेशो बुद्धेः । आत्मनस्तु तद् बोद्धृत्वं न बुद्धेरिव जनिलक्षणविक्रियाहेतुकम्, किं तर्हि स्वरूपभूतमेव । अत्र दृष्टान्तः **'तिष्ठन्तीव महीभृतः'** इति । यथा नित्यनिवृत्तगतयोऽपि 'पर्वतास्तिष्ठन्ति' इत्युपचर्यन्ते, न तु तेषां तथाऽ-वस्थानं गतिनिवृत्तिलक्षणविक्रियापेक्षम् अश्वादीनामिव, तद्वदेवेह नित्यबोधस्वरूप एव बोद्धेत्युपचर्यते इत्यर्थः ॥१९॥

(मूलम्)

तयोः कूटस्थपरिणामिनोः आत्मानवबोध एव संबन्धहेतुः, न पुनर्वास्तवः कश्चिदपि संबन्ध उपपद्यत इत्याह -

सम्यक्संशयमिथ्यात्वैर्धीरेवेयं विभज्यते ।
हानोपादानतामीषां मोहादध्यस्यते दृशौ ॥२०॥

कुतः कूटस्थात्मसिद्धिरिति चेत् । यतः -

न हानं हानमात्रेण नोदयोऽपीयता यतः ।
तत्सिद्धिः स्यात्तु तद्धीने हानादानविधर्मके ॥२१॥

एवम् -

आगमापायिहेतुभ्यां धूत्वा सर्वाननात्मनः ।
ततस्तत्त्वमसीत्येतद्धन्त्यस्मदि निजं तमः ॥२२॥

(क्लेशापहारिणी)

आत्मबुद्ध्योः संबन्धहेतुः आत्मानवबोध एव -

अथेदानीं लक्ष्यलक्षणभूतयोरात्मबुद्ध्योः संबन्धहेतुम् अज्ञानमनुवदति तस्य वाक्यज्ञाननिवर्त्यत्वप्रदर्शनार्थम् इत्याह - **तयोरिति** ॥

सम्यगिति । सम्यक्संशयमिथ्यात्वैः 'सम्यग्ज्ञानम्', 'संशयज्ञानम्', 'मिथ्याज्ञानम्' - इत्येवम् इयं धीरेव विभज्यते न त्वात्मस्वरूपभूतं ज्ञानम् । तस्यावगतिमात्रत्वेन सर्वत्राप्येकरूपेणैवावस्थितत्वात् इत्याशयः । कथं तर्हि संशयमिथ्याज्ञानयोर्हातव्यत्वं सम्यग्ज्ञानस्य चोपादेयत्वं लोके, 'छिद्यन्ते सर्वसंशयाः' (मुं. २.२.९) 'तत्र को मोहः कः शोकः' (ई. ७), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां. ८.७.९)

इत्यादिश्रुत्युपदेशश्च ? तत्राह - **हानोपादानतेति** । अमीषां सम्यक्त्वादीनां प्रत्ययगतानां हानोपादानता दृशौ कूटस्थचैतन्ये अध्यस्यते । अतः परमार्थतो न स्तः संशयमिथ्यात्वे हातव्ये न च सम्यक्त्वमुपादेयं कूटस्थचैतन्यलक्षणे आत्मबोधे । व्यवहारदृष्ट्यैव तु तथा व्यपदेशः, श्रुत्युपदेशाश्च इत्यभिप्रायः । उपदिष्टं हि **भगवत्पादैः** 'सम्यक्संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः । एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ॥' (उप. १८-१२१) इति ॥२०॥

'मोहादध्यस्यते' इति कथमवगम्यते, आत्मन एव ते हानतो-पादानते इति कुतो न स्यात् ? - इत्याशङ्क्य तत्परिहारार्थत्वेन श्लोकमवतारयति **'कुतः ?'** - इति । आत्मनः कूटस्थतासिद्धिः कुतः ? इति प्रश्नः ॥

न हानमिति । संशयमिथ्याधियोर्हानमात्रेण न हानं स्यात् आत्मचैतन्यस्य । नापि सम्यग्धीरुदिता इतीयता आत्मनोऽपि उदयः स्यात् । यतः तद्धीने हानोदयहीने हानादानविधर्मके आत्मचैतन्ये सत्येव तत्सिद्धिः स्यात् नैवान्यथा हानम् उदयो वा । क्वाचित्कयोस्तयोः साक्षिचैतन्ये कूटस्थरूपे स्थिते एव हि तत्सिद्धिः स्यात् । न हि स्वयमुदयास्तमयधर्मक आत्मा हानोपादानसाक्षी भवितुं प्रभवेत् - इत्यतः हानोपादानराहित्यलक्षणकूटस्थता सिद्धा आत्मनः - इत्य-भिप्रायः । तस्मात् संशयादीनां हानोपादानसिद्ध्यर्थमेव तावत् कूटस्थत्वमात्मन एष्टव्यमिति भावः । उक्तं हि द्वितीयाध्याये 'ग्राहक-ग्रहणग्राह्यविभागे योऽविभागवान् । हानोपादानयोः साक्षी हानोपादान-वर्जितः ॥ स्वसाधनं स्वयं नष्टो न नाशं वेत्त्यभावतः । अत एव न चान्येषामतोऽसौ भिन्नसाक्षिकः ॥ धीवन्नापेक्षते सिद्धिमात्माऽ-न्यस्मादविक्रियः । निरपेक्षमपेक्ष्यैव सिद्ध्यन्त्यन्ये न तु स्वयम् ॥' (२-१०८, १०९, ११०) इति ॥२१॥

संबन्धाज्ञानं वाक्यं विनाशयति -

तदेवं कूटस्थत्वपरिणामित्वाभ्यामत्यन्तभिन्नस्वभावत्वात् आत्मबुद्ध्योरज्ञानमेव संबन्धः, न वास्तवः कश्चिदन्य इत्यतः, तदेतदेवाज्ञानं वाक्यजन्यज्ञाननिवर्त्यमित्युपपन्नमिति वक्तुमुत्तरश्लोक इत्यभिप्रेत्याह - एवमिति ।।

'आगमापायिहेतुभ्याम्' इति ।। आदावन्ते च नास्तीत्यतः - इत्यर्थः । यद्धि आगन्तु तन्न स्वभावो भवितुमर्हति पूर्वमभावात् । यच्चान्तवत्, तदपि न स्वभावः, प्रध्वंसादूर्ध्वं न भवति यतः । इत्येताभ्यां हेतुभ्यां धूत्वा सर्वाननात्मनः दृष्टनष्टस्वाभाव्यान्मिथ्यात्वं निश्चित्य इति यावत् । उपलक्षणमेतत् दृश्यत्वात्, कर्मकर्तृत्वप्रसञ्जकत्वात्, परिणामित्वात्, परार्थत्वात् - इत्यादि द्वितीयाध्यायोक्तहेतुभ्यः - इत्यपि द्रष्टव्यम् । एवम् अन्वयव्यतिरेकन्यायावलम्बेन सर्वाननात्मनो निरस्य तदन्वपि अस्मदर्थे स्थितं निजं तमः स्वात्माज्ञानं ततः आत्मानात्मविवेकानन्तरम् 'तत्त्वमसि' इत्येतद् वाक्यं हन्ति बाधते इत्यर्थः । 'आगमापायहेतुभ्याम्' इति पाठे तु अन्वयव्यतिरेकाभ्याम् इत्येवार्थः ।।२२।।

(मूलम्)

इत्यादि पुनःपुनरुच्यते ग्रन्थलाघवाद् बुद्धिलाघवं प्रयोजकमिति । तत्र यद्यपि तत्त्वमस्यादिवाक्यात् उपादित्सिताद्वितीयात्मार्थवत् पारोक्ष्यसद्वितीयार्थः प्रतीयते, तथापि तु नैवासावर्थः श्रुत्या तात्पर्येण प्रतिपिपादयिषितः । प्रागप्येतस्य प्रतीतत्वात् इतीममर्थमाह -

तदित्येतत्पदं लोके बह्वर्थप्रतिपादकम् ।
अपरित्यज्य पारोक्ष्यमभिधानोत्थमेव तत् ।।२३।।

त्वमित्यपि पदं तद्वत् साक्षान्मात्रार्थवाचि तु ।
संसारितामसंत्यज्य सापि स्यादभिधानजा ॥२४॥

विरुद्धोद्देशनत्वाच्च पारोक्ष्यदुःखित्वयोरविवक्षितत्वम् इत्याह -

उद्दिश्यमानं वाक्यस्थं नोद्देशनगुणान्वितम् ।
आकाङ्क्षितपदार्थेन संसर्गं प्रतिपद्यते ॥२५॥

यत एतदेवम्, अतोऽनुपादित्सितयोरपि तत्त्वमर्थयोर्विशेषण-विशेष्यभावो भेदसंसर्गरहितावाक्यार्थलक्षणायैव - इत्युपसंहारः -

तदो विशेषणार्थत्वं विशेष्यत्वं त्वमस्तथा ।
लक्ष्यलक्षणसंबन्धस्तयोः स्यात्प्रत्यगात्मना ॥२६॥

कथं पुनरविवक्षितविरुद्धनिरस्यमानस्य लक्षणार्थत्वम् ?

लक्षणं सर्पवद्रज्ज्वाः प्रतीचः स्यादहं तथा ।
तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि तदाश्रयात् ॥२७॥

(क्लेशापहारिणी)

अत्र बुद्धिलाघवार्थं पुनरुक्तिराश्रिता -

नन्वन्वयव्यतिरेकन्यायेनानात्मनिरसनं विस्तरेणोक्तं पूर्वस्मिन्नेवाध्याये आत्मानात्मनोश्चाज्ञानमेव संबन्ध इति च । तदेव चात्राध्यायेऽपि पुनः पुनरुच्यते ग्रन्थगौरवमप्यनादृत्य ; तत्र को हेतुः ? इत्यत आह - **इत्यादि पुनः पुनरुच्यत** इति ॥ सकृदुच्यमाने यद्यपि ग्रन्थलाघवं सेत्स्यति, तथापि ग्रन्थलाघवादपि बुद्धिलाघवं विशेषेणापेक्षितव्यम् । विषयस्य बुद्ध्यारोपणार्थमेव हि ग्रन्थप्रणयनम् इति भावः । तस्मात्, बुद्धिलाघवमत्र प्रयोजकं पुनरुक्तौ इत्यर्थः । तदुक्तम्

आचार्यशबरस्वामिना 'न पुनरुक्तता महान् दोषः । बहुकृत्वोऽपि पथ्यं वेदितव्यं भवति । ग्रन्थभयेन पुनरुक्तं नेच्छन्ति । अर्थाग्रहणात्तु बिभ्यतः पुनः पुनरभिधीयमानं बहुमन्यन्त एव' (शा. भा. ४-२-१३) इति । न ह्येतादृशो दुर्बोधे सूक्ष्मविषये सकृदुक्त्यैव बुद्धेः प्रवेशो भवेन्मन्दधियामिति तदनुग्रहार्थं पुनरुक्तिः - इति वाक्यार्थः ।।

पदयोरविवक्षितार्थवारणप्रकारः -

तदेवं वाक्यादेवाज्ञाननिरसनं ततश्चावाक्यार्थप्रतिपत्तिः - इति स्थितम् । अथेदानीं वाक्यव्याख्यामारभमाणः, यत्तदुक्तं 'नीलोत्पलवदेताभ्यां दुःख्यनात्मत्ववारणे' (३-२) इति तदेतद् विवरीतुकाम आह - **तत्रेति** । 'तत्त्वमसि' इति वाक्ये यद्यपि प्रत्यगद्वयमेव वस्तु समुपदिदिक्षितम्, तथापि तत्त्वंपदाभ्यां मुख्यया वृत्त्या प्रतीयमानम् अर्थान्तरमप्यस्ति । तत्र तु नैव वाक्यस्य तात्पर्यमिति दर्शयितुम् उत्तरो ग्रन्थः प्रवर्तते । तदाह - **यद्यपीति** । तत्र तत्पदेन उपादित्सितोऽद्वितीयात्मार्थः ; मुख्यया तु वृत्त्या पारोक्ष्यमपि प्रतीयते । एवं त्वंपदेन उपादित्सितः प्रत्यगर्थः । मुख्यया तु वृत्त्या सद्वितीयत्वमपि प्रतीयते इत्यर्थः । तत्राद्वितीयप्रत्यगात्मवत् पारोक्ष्यसद्वितीयार्थोऽपि प्रतीयमानः किमिति नोपादित्सितत्वेन स्वीकार्य इति ? तत्राह - **प्रागप्येतस्य प्रतीतत्वात्** इति । प्राक् प्रतीतस्यैव प्रत्यायने हि वाक्यम् अनुवादमात्रं स्यादिति भावः । तदेतदुत्तरश्लोकद्वयेनोच्यत इत्याह - **इममिति** ।।

तदित्येतदिति । लोके 'तत्' इत्येतत् पदं पारोक्ष्यमपरित्यज्य पारोक्ष्यमपि अन्तर्भाव्य बह्वर्थप्रतिपादकम् । परामृष्टप्रकृतार्थः, बुद्धिस्थार्थः, प्रसिद्धार्थः - इत्येवमादिबह्वर्थप्रतिपादकत्वं तस्य दृष्टम् । तत्तु अभिधानोत्थमेव शब्दवाच्यार्थमात्रम् । न तावता पारोक्ष्यं वाक्येन प्रतिपिपादयिषितमपीति शक्यं प्रतिज्ञातुम् इत्यभिप्रायः । न हि पदात्

प्राक् प्रतीयमान एवार्थो वाक्येन प्रतिपाद्यः । विशेषार्थप्रतिपादनार्थं हि वाक्यप्रवृत्तिः - इति भावः ।।२३।।

त्वमित्यपीति । तद्वत् तत्पदवत् त्वमित्यपि पदम्, साक्षान्मात्रार्थवाच्येव संसारितामसंत्यज्य ; संसारितामपि ब्रूते । सापि तत्पदार्थभूतपारोक्ष्यमिव अभिधानजा मुख्यवृत्त्यैव शब्देन उच्यमाना । न तावन्मात्रेण वाक्यप्रतिपिपादयिषितत्वेन स्वीकर्तुं युक्ता इत्यभिप्रायः ।।२४।।

पदशक्त्या प्रागेव प्रतीयमानत्वात् पारोक्ष्यं संसारित्वं च न वाक्यविवक्षितम् इति स्थितम् । इतश्च तथेत्याह - **विरुद्धोद्देशनत्वाच्चेति** ।। परस्परविरुद्धोद्दिष्टार्थत्वाच्च पारोक्ष्यदुःखित्वयोर्न वाक्यप्रतिपाद्यत्वम् इत्यर्थः ।।

तत्र युक्तिमाह श्लोकः - **उद्दिश्यमानमिति** । वाक्यस्थम् उद्दिश्यमानं वस्तु त्वंपदार्थरूपं उद्देशनगुणान्वितम् उद्देशनावस्थायां प्रतीयमानसंसारित्वलक्षणगुणान्वितम् आकाङ्क्षितपदार्थेन विधीयमानेन जगत्कारणसद्ब्रह्मरूपेण पदार्थेन न संसर्गं प्रतिपद्यते, न संबध्यते । न एकमेवाद्वितीयं सद्ब्रह्म संसारित्वेनान्वितमिति युक्तं भवेत् । यत्र हि उद्दिश्यमानगुणः विधीयमानेन संबन्धमर्हति, यथा 'माणवकः कुशलः', 'नीलम् उत्पलम्' इत्यादिस्थले तत्र माणवकत्वनैल्यादीनामपि उद्दिश्यमानगुणानां विवक्षितत्वं स्यादपि, यत्र न तथा संबन्ध उपपद्यते, प्रत्युत विरुध्यते एव यथा 'शीतोऽग्निः' इत्यादिस्थले तत्र उद्देशनगुणस्य कथमिव विवक्षितत्वं स्यादिति भावः ।।२५।।

विशेषणविशेष्यभावो लक्षणार्थस्वीकाराय -

यद्येवम्, किमर्थं तर्हि 'तत्त्वमसि' इति विरुद्धार्थयोः पदयोः सामानाधिकरण्यम्, न हि तत्त्वमर्थयोर्वास्तविक एव विशेषणविशेष्यभावोऽवकल्पते येनैवमुपदिश्येत श्रुत्या ; कथञ्चैवं विरुद्धार्थमुपदिशन्ती

श्रुतिः प्रामाण्यमश्नुवीतेति ? तत्राह - **'यत एतदेवम्'** इति ॥ एवं विरुद्धोद्देशनत्वादेवावगम्यते अभिधानार्थैकदेशस्याविवक्षितत्वमिति, अविवक्षितार्थयोरपि विशेष्यभावेनोपप्रदर्शनं लक्षणार्थस्वीकारार्थमिति च । तदाह - **अनुपादित्सितयोरपि भेदसंसर्गरहितावाक्यार्थलक्षणायेति** । अस्यायमर्थः - न तत्त्वंपदार्थयोर्भेदो वा संसर्गो वा अत्र विवक्षितः, येन तत्त्वमसीत्येतत् वाक्यमित्यपि स्यात् इति । तत्र **केचिदाहुः** संसर्गो वाक्यार्थः - इति, **अपरे** तु भेदो वाक्यार्थः - इति । अन्ये पुनः 'राज्ञः पुरुषः' इतिवत् क्वचिद्भेदः, 'नीलमुत्पलम्' इतिवच्च क्वचित् पदार्थसंसर्गोऽपि वाक्यार्थो भवेदिति मन्यन्ते । तत्र ब्रह्मणि किं पदार्थता वाक्यार्थता वा ? - इति विकल्पने ब्रह्मव्यतिरेकेण प्रत्येतव्याभावात्, सर्वप्रत्ययवेद्यं ब्रह्म पदार्थोऽपि भवति । तत्र प्रपञ्चाभावस्तु शास्त्रेणैव प्रतिपाद्यते । प्रपञ्चपदार्थतदभावयोः प्रमाणान्तरसिद्धयोरेव संसर्गात् प्रपञ्चोपशमत्वप्रतिपत्तिरिति शास्त्रवाक्यैकवेद्यत्वं तस्येति वेदान्तैकदेशिनः **केचित्** । **अपरे** पुनः कारणसामान्यं सत्सामान्यं वा 'यतो वा इमानि भूतानि जायन्ते' इतीतरपदार्थैः संसर्गात् 'अस्थूलमनणु' इति भेदाच्च प्रमाणान्तरानधिगतविशेषस्वरूपमासादयद् वाक्यबोध्यं च भवतीत्याहुः । सिद्धान्ते तु तत्त्वंपदार्थयोरेकत्वान्न भेदः, असंसार्यद्वितीयचिन्मात्रबोधकत्वाच्च न संसर्गः । तथा च भेदसंसर्गरहितत्वान्न पदार्थोऽयमात्मा नापि वाक्यार्थः । अत एवायमवाक्यार्थ इति निर्दिश्यते । निवर्त्यभेदात्तु तत्त्वंपदयोर्भिन्नार्थबोधकत्वकल्पना, अनुपादित्सितयोरप्यद्वितीयप्रत्यगात्मलक्षणाय विशेष्यविशेषणभावस्य कल्पनीयत्वात् संसर्गकल्पना च भवेत् काल्पनिकीति च बोध्यम् । यथोक्तं **बृहद्वार्तिके** 'निवर्त्यभेदाद्भिन्नोऽर्थोऽमानित्वादेर्यथा तथा । ब्रह्माहमर्थयोर्ज्ञेयस्तयोरैकार्थ्यहेतुतः ॥' (बृ. वा. १-४-१४२९),

'एकैकरूपासंसर्गबोधमात्रस्वभावतः । विशेषणानां संप्राप्तिर्नाञ्जसी प्रत्यगात्मनि ।। विशेषणानां संबन्धो यतो न प्रत्यगात्मनि । लक्ष्यलक्षणता तस्मात् प्रतीच्यध्यवसीयते ।।' (बृ. वा. १-४-१४२६, १४२७) इति, 'भेदसंसर्गहीनत्वात् पदवाक्यार्थताऽऽत्मनः । दुःसंभाव्याऽत आत्माऽयमात्मनैवानुभूयते ।।' (बृ. वा. १-४-१४०८) इति च ।।

लक्षणाय विशेषणविशेष्यभावः - इत्युक्तम् । तद्विवरीतुं विशेषण-विशेष्यभावं तावद् विशदयति - **तद इति** । तदः तत्पदार्थस्य विशेषणार्थत्वं तथा त्वमः त्वंपदार्थस्य विशेष्यत्वम् । त्वंपदार्थं ह्युद्दिश्य तत्पदार्थोऽत्र विधीयते 'रामो धर्मात्मा' इतिवत् । ततो विरुद्धोद्देशनत्वात्, यथोक्तनीत्या त्वंपदार्थस्य तत्पदार्थेन संसर्गप्रतिपत्त्यनुपपत्तेः, इदं विशेष्यविशेषणभावेनोपस्थापनं तत्त्वमोर्नाभिधानोत्थसर्वार्थविशिष्ट-योरैक्यप्रतिबोधनाय किं तर्हि लक्षणया प्रत्यगात्ममात्रसमर्पणायैवेति गम्यते । तदाह **'लक्ष्यलक्षणसंबन्धः'** इत्यादिना । तत्पदेन श्रुत्युक्ता-द्वितीयसद्ब्रह्म लक्ष्यते, त्वंपदेन च प्रत्यगर्थो लक्ष्यते । तयोश्चैक्यम् असिपदेन बोध्यत इति अद्वितीयप्रत्यगात्मैवावाक्यार्थो वाक्येन समर्पितो भवतीत्यभिप्रायः ।।२६।।

तत्र लक्ष्यलक्षणभावमाक्षिपति - **कथं पुनरिति** ।। न हि 'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दार्थानाम् अविवक्षितत्वमस्ति । कथञ्चित् शैत्यं पावनत्वम् इत्येवमाद्यर्थानां तत्र द्योत्यमानत्वेन सर्वथा अविवक्षितत्वानुपपतेः । न विरुद्धत्वमाकाङ्क्षितपदार्थेन, नित्यं सहभावात् । न च निरस्यमानत्वं वाक्यार्थज्ञानलाभाय, उक्तविधया ग्राह्यत्वादेव । इह पुनरविवक्षितत्वं विरुद्धत्वं निरस्यमानत्वं चाङ्गी-क्रियते संसारित्वस्य, सद्वितीयत्वस्य च । तत्कथमिहेदृशस्य लक्षणार्थत्वं घटते ? - इत्याक्षेपार्थः ।।

एतत्परिहारार्थत्वेन श्लोकमुदाहरति - **लक्षणम् इति** । 'योऽसौ सर्पः सैषा रज्जुः' इत्यत्र यथा रज्ज्वाः सर्पत्वं अविवक्षितम्, केवलमभिधानोत्थत्वात् ; विरुद्धं च रज्ज्वा, तद्वारणायैव वाक्यप्रवृत्तेः ; निरस्यमानं च रज्जुत्वप्रतिपत्तौ तदपबाधध्रौव्यात्, अथ च रज्ज्वा लक्षणं स्यात् । एवम् अहमर्थोऽपि अविवक्षितो विरुद्धो निरस्यमानोऽपि लक्षणं स्यात् । तदाह - **तद्वाधेनैवेति** । 'तदाश्रयात्' इत्यनेन तु इदं विवक्षितम् - यथा सर्पाश्रयात् सर्पद्वारेणैव तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि श्रोता, एवमत्रापि श्रोता अहंद्वारेणैव तद्बाधेनैव वाक्यार्थं प्रतिपद्यत इत्यहमो लक्षणत्वं नानुपपन्नमिति । एवमविवक्षितत्वादिधर्मविशिष्टस्य तत्पदार्थस्यापि पारोक्ष्यादेर्लक्षणत्वं द्रष्टव्यम् । यद्यप्यद्वितीयप्रत्यगात्मा न पदार्थो नापि वाक्यार्थः, भेदसंसर्गरहितत्वात्, तथापि, अविवक्षितविरुद्धनिरस्यमानार्थमपि लक्षणत्वेनाश्रित्य, विवक्षितार्थप्रतिपत्तिर्भवतीत्येतावद् दृष्टान्तदार्ष्टान्तिकयोस्तौल्यमभिप्रेतमित्यदोषः ॥

अभिनववेदान्तिकृतचोद्यपरिहारः -

अत्र 'तत्त्वमसि' इति वाक्यादद्वितीयप्रत्यगात्मलक्षणावाक्यार्थ एव गम्यते इति रहस्यमजानन्तः **केचिदभिनववेदान्तिन** आक्षिपन्ति । न जातुचिदपि कस्मिंश्चिद्वाक्ये सर्वपदानामपि लक्षणार्थत्वं दृष्टचरम् । अतोऽयुक्तमिदं वाक्यार्थावगतिप्रकारवर्णनमिति । तत्तु वेदान्तैकसमधिगम्याद्वितीयात्मस्वरूपनिर्धारणाशक्तिकृतं मतमित्युपेक्ष्यास्ते । न ह्यत्र 'तत्त्वमसि' इत्यस्मिन् वाक्ये कथञ्चिदुभयपदलक्षणां स्वीकृत्यालौकिकमद्वैततत्त्वं प्रसाध्यते येन वाक्यधर्मपरीक्षणप्रकारे लोकदृष्टोदाहरणमानीयेत । श्रुत्यैव हीदमुपदिश्यते सद्ब्रह्म तेजआदिसृष्टिपूर्वकं स्वयमेव जीवेनात्मना अनुप्रविश्य नामरूपव्याकरणमकरोदिति । सैव च श्रुतिः, सृष्टस्य सर्वस्यापि जगतः, तत्प्रविष्टजीव-

रूपस्य च सदात्मत्वमेवावधारयितुं सर्वस्य च विकारस्य प्रतीतरूपेण वाचारम्भणत्वम्, जगतो जीवस्य च सदात्मनैव सत्यत्वं 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६-८-७) इति भूयोभूयस्तत्तदाशङ्कापनयनेनोपदिशति । अतो यदिदमुच्यते त्वंपदस्य दुःखित्वादिकं तत्पदस्य च पारोक्ष्यम् अविवक्षितत्वात् परित्याज्यम् अद्वितीयप्रत्यगात्मवस्त्वेव तु परिग्राह्यमिति, तेन तावदेवोच्यते यावदुक्तं भवति 'यत्तद् परं सद्ब्रह्म एकमेवाद्वितीयं सर्वं जगदिदं सृष्ट्वा जीवेनात्मना तदनुप्रविश्य वर्तते तदेवासि त्वं न दुःखी' इति । तथा च न तत्परोक्षं ब्रह्म, किं तु त्वमेव ; न त्वं संसारी, किं तु सदेवैकमद्वितीयं ब्रह्म - इति 'घटाकाशो महाकाशः, महाकाश एव घटाकाशत्वेन व्यवह्रियमाणः' इतिवत् वस्तुस्थितिमात्रस्यानुभवारोपणमेतत् । अवाक्यार्थस्यैव वाक्यार्थवद्व्यपदेशश्चेत्यलमतिविस्तरेण ।।२७।।

---

६. अन्वयव्यतिरेकज्ञानमेवावाक्यार्थ-प्रतिपत्तिकारणम्

(मूलम्)

इयं चावाक्यार्थप्रतिपत्तिः, अन्वयव्यतिरेकाभिज्ञस्यैव । यस्मात् -

यावद्यावन्निरस्यायं देहादीन् प्रत्यगञ्चति ।
तावत्तावत्तदर्थोऽपि त्वमर्थं प्रविविक्षति ।।२८।।

कस्मात् पुनः कारणात् देहाद्यनात्मत्वप्रतिपत्तावेव आत्मा तदर्थम्

आत्मत्वेनाभिलिङ्गते न विपर्यय इति ? उच्यते। प्रत्यगात्मानवबोधस्य अनात्मस्वाभाव्यात्, तदभिनिर्वृत्तश्चायं बुद्ध्यादिदेहान्तः ; तस्मिन् आत्मत्वम् अविद्याकृतमेव । आत्मत्वमिवानात्मत्वमपि साविद्यस्यैव। यतो निरविद्यो विद्वान् अवाक्यार्थरूप एव केवलोऽवशिष्यते। तस्मादुच्यते -

देहादिव्यवधानत्वात् तदर्थं स्वयमप्यतः।
पारोक्ष्येणैव जानाति साक्षात्त्वं तदनात्मनः ॥२९॥

यथोक्तार्थप्रतिपत्तिसौकर्याय दृष्टान्तोपादानम् -

प्रत्यगुद्भूतपित्तस्य यथा बाह्यार्थपीतता।
चैतन्यं प्रत्यगात्मीयं बहिर्वद्दृश्यते तथा ॥३०॥

यस्मादेवम् अतो विस्रब्धम् अवसीयताम् -

पदान्युद्धृत्य वाक्येभ्यो ह्यन्वयव्यतिरेकतः।
पदार्थांल्लोकतो बुद्ध्वा वेत्ति वाक्यार्थमञ्जसा ॥३१॥

कुतः पुनः सामान्यमात्रवृत्तेः पदस्य वाक्यार्थप्रतिपत्तिहेतुत्वमिति ? बाढम् -

सामान्यं हि पदं ब्रूते विशेषो वाक्यकर्तृकः।
श्रुत्यादिप्रतिबद्धं सद् विशेषार्थं भवेत् पदम् ॥३२॥

(क्लेशापहारिणी)

अन्वयव्यतिरेकाभिज्ञस्यैवावाक्यार्थज्ञानम् -

तदेवं सामानाधिकरण्यविशेषणविशेष्यभावलक्ष्यलक्षणसंबन्धज्ञानेनैव अविवक्षितपदार्थनिरासेन वाक्यादवाक्यार्थप्रतिपत्तिर्भवतीति

प्रतिपादितम् । अथेदानीं केवलम् अन्वयव्यतिरेकन्यायावलम्बनमात्रादियं प्रतिपत्तिः सिध्येत् इति भ्रान्तिमपनिनीषुरन्वयव्यतिरेकज्ञानस्य कृत्यं पूर्वोक्तमेव तावदनुवदति - **इयं चेति** । अन्वयव्यतिरेकाभिज्ञस्यैव तत्पूर्वकं संप्राप्तपदार्थज्ञानस्यैव इत्यर्थः । विनाप्यन्वयव्यतिरेकम् इयं कुतो न स्यात् ? इत्याशङ्क्य तज्ज्ञानस्यैव तदन्तरङ्गत्वादित्यभिप्रेत्य श्लोकमवतारयति - **यस्मात् इति** ॥

यावद् यावदिति । अयं मुमुक्षुः यावद् यावद् द्वितीयाध्यायप्रपञ्चितक्रमेण देहादीन् अहमन्तान् अनात्मत्वेन निरस्य प्रत्यगञ्चति अन्तर्गच्छति अन्तर्मुखो भवति, तावत् तावत् तदर्थोऽपि प्रागेतस्मादन्वयव्यतिरेकानुसरणात् पारोक्ष्यं गतः त्वमर्थं प्रविविक्षति, प्रवेष्टुमिच्छति तावत् तावत् प्रत्यगात्मन्येव तत्पदार्थप्रतीतिर्निराबाधा भविष्यति । तत्र तद्विरुद्धदेहादिबुद्धिबाधादेव - इत्यभिप्रायः ॥२८॥

बुद्ध्यादेरात्मत्वानात्मत्वयोरविद्याकृतत्वम् -

ननु चान्वयव्यतिरेकाभ्यां देहादीननात्मत्वेन निरस्यैव 'अहं ब्रह्मास्मि' इति प्रतिपद्यते नानिरस्य - इत्येतत् कुतः ? इत्याक्षिपति - **कस्मात् पुनः काराणादिति** । देहादीनामनात्मत्वेन प्रतिपत्तौ सत्यामेव आत्मा तदर्थमात्मत्वेन अभिलिङ्गते आश्रयते सद्ब्रह्मतादात्म्यं प्रतिपद्यते न विपर्यये न देहाद्यात्मत्वप्रतिपत्त्यनुवृत्तिदशायामपि ? तत्र परिहारः - **'प्रत्यगात्माऽनवबोधस्य'** इत्यादि अयमभिप्रायः - देहादिष्वात्मत्वबुद्धिर्हि प्रत्यगात्मानवबोधनिर्वृत्ता, शुक्त्यादिषु रजतादिबुद्धिरिव तदनवबोधकृता । अनवबोधश्च नात्मस्वभावः । तस्य आत्मचैतन्यभास्यत्वात्, आत्मज्ञाननिवर्त्यत्वाच्च । यावदेव हि नात्मा तथ्यतो विज्ञायते तावदेवानवबोधव्यवहारः । 'न ममात्मस्वरूपं बुद्ध्ये' इत्येवमादिरूपः । सा चैवाविद्या नाम, तन्निर्वृत्तत्वाच्च देहादेस्तद्बुद्धिरविद्येत्युक्तम् । तस्माद् रजतादिषु पुरोवर्तिवस्तुत्वबुद्धिर्यथा तदनवबोध-

निमित्तत्वादविद्यैव, मिथ्याबुद्धित्वात्, **तथैव** देहादिष्वप्यात्मत्व-बुद्धिरविद्यैव मिथ्याबुद्धित्वात् । तस्मात् यावद्देहादौ आत्मत्वबुद्धिस्तावत् आत्मानं यथावन्न जानातीति प्रसिद्धमेवेति । आत्मनो याथार्थ्यं च तदर्थता । तस्मात् देहादिष्वात्मत्वबुद्धिबाधेन, तेष्वनात्मत्वनिश्चये सत्येव आत्मानं तत्पदार्थभूतसद्ब्रह्मत्वेन निश्चिनुयादिति श्लिष्यत इति । तर्हि देहाद्यनात्मत्वनिश्चय एवालम् आत्मनस्तदर्थत्वेन निश्चये इत्याशङ्क्याह - **आत्मत्वमिवानात्मत्वमपीति** । देहादेरन्वयव्यतिरेकेणानात्मत्वनिश्चयोऽपि साविद्यस्यैव । यतोऽद्वितीयब्रह्मात्मानवबोध एवाविद्या, तत्कार्यं च देहादिरिति । कथमेतदवगम्यत इति ? तत्राह - **यत इति** । वाक्यादेव विद्वान् निरविद्योऽपबाधिताविद्यः सन् अद्वितीयप्रत्यगात्म-रूपावाक्यार्थरूप एव केवलोऽवशिष्यते । न हि 'रजतादन्यदेव किञ्चिदिदं वस्तु' इति ज्ञानमात्रतस्तदज्ञानापबाधो भवेत् । एवं 'देहादिव्यतिरिक्तरूपोऽहम्' इति ज्ञानमात्रान्नाविद्याया आत्यन्तिकोऽ-पबाधः स्यादिति भावः । तस्मात् अविद्यायाः सर्वथा निवृत्तावेव तदर्थप्रतिपत्तिर्निराबाधेत्युच्यते समनन्तरोत्तरश्लोकेनेत्याह - **तस्मादुच्यते इति** ।।

देहादीति । देहादिव्यवधानत्वात्, देहादिबुद्धिव्यवहितत्वादेव स्वयमपि स्वरूपभूतमपि तदर्थं तत्पदार्थमद्वितीयात्मानं पारोक्ष्येणैव जानाति ; तदनात्मनः, तत्स्वरूपाद्व्यतिरिक्तस्यैव देहादेरेव साक्षात्त्वं च जानाति । अथवा यत् तदर्थं पारोक्ष्येणैव जानाति तदेव अनात्मनो देहादेः साक्षात्त्वम् - इति योजना । तदापि स एवार्थः । एतदुक्तं भवति - यथा रजतादिदृष्टिव्यवहितत्वमेव पुरोऽवस्थिताया अपि शुक्तेः पारोक्ष्ये कारणम्, एवम् अनात्मभूतदेहादिबुद्धिरेव व्यवधानं स्वरूपभूत-स्यापि प्रत्यगात्मनः परोक्षत्वेनैव ज्ञाने । तस्मात्, देहादेरनात्मत्वं

तावन्निश्चेतव्यम्, पश्चाद्देहाद्यनात्मबुद्धिरप्यनात्मभूताज्ञानहानेन हातव्या स्वरूपविज्ञानार्थमिति ।।२९।।

ननु स्वरूपभूतस्यैव सतस्तदर्थगतात्मत्वस्य देहाद्यनात्मत्वाध्यासः कथं स्यात् ? शुक्त्यादिषु त्वनात्मभूतासु रजताद्यध्यासः स्यादपि कथञ्चिद्दोषवशात्, स्वरूपभूतस्यैव धर्मस्य तद्व्यतिरिक्तेऽनात्मन्यध्यास इति कथं सम्भावयाम इति ? तदेतद्दृष्टान्तेन संभावयिष्यामीत्याह - **यथोक्तार्थप्रतिपत्तिसौकर्यायेति** ।।

प्रत्यगुद्भूतपित्तस्येति । देहान्तरुत्पन्नपित्तस्य पुरुषस्य यथा तद्गतपीतताध्यासेन बाह्यार्थेषु पीततादृष्टिः, एवम्, प्रत्यगात्मीयं चैतन्यं स्वरूपभूतमप्यज्ञानवशात् बहिर्वत् बुद्ध्यादिदेहान्तानात्मगतमिव दृश्यते भ्रान्त्यैव । तस्माद्युष्मदर्थप्रत्यगर्थयोर्विवेकाभावाद्युज्यत एव प्रत्यक्स्फुरत्ताध्यासोऽपि बाह्यदेहादिष्वपीत्यभिप्रायः ।।३०।।

पदार्थज्ञस्यैव वाक्यादवाक्यार्थप्रतिपत्तिः -

तस्मात्, अन्वयव्यतिरेकाभ्यां पदार्थज्ञाने सति वाक्यादवाक्यार्थप्रतिपत्तिरिति सिद्धमित्युपसंहरति - **यस्मादिति** ।। विस्रब्धं सविश्वासम् अवसीयतां निश्चीयताम् इत्यर्थः ।।

पदानीति । वाक्येभ्यः पदानि उद्धृत्य इतरपदेभ्यो वियोज्य, अन्वयव्यतिरेकतः पदार्थान् लोकतो वृद्धव्यवहारतो बुद्ध्वा । तद्यथा गामानय, गां बधान, गां चारय - इत्यादिषु व्यवहारेषु गोपदान्वयेन 'गां बधान', 'अश्वं नय' इत्यादिषु गोपदव्यतिरेकेण च गोपदस्य सास्नादिमति शक्तिरिति तत्तद्वाक्यानुरूपक्रियान्वयव्यतिरेकाभ्यामवगम्यते । ततस्तात्पर्यानुगुणं वाक्यार्थं वेत्ति जिज्ञासुः - इति लोके दृष्टम् । तदिहापि लोकसिद्धन्यायेनैव अन्वयव्यतिरेकतो 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादिश्रुत्युपदिष्टपितापुत्रसंवाद-

लक्षणव्यवहारतस्तत्त्वंपदे उद्धृत्य पदार्थान् बुद्ध्वा तत्त्वमसिवाक्यगम्यम् अवाक्यार्थं विद्यादिति भावः ।।३१।।

पदस्य विशेषार्थसमर्पकत्वम् -

नन्वेवमपि वाक्यस्थतत्त्वंपदयोः सामान्यमात्रवाचकत्वात्, कथं वाक्यगम्याद्वितीयप्रत्यगात्मलक्षणवस्तुविशेषप्रतिपत्तिः स्यात् ? न हि तत्पदस्य त्वंपदस्य वा विशेषे शक्तिरवगता । न च वाक्यगतपदेभ्योऽनवगतोऽप्यर्थो वाक्यादवगतो भवेदिति शक्यशङ्कम् । पदसमूहस्यैव वाक्यत्वात् इत्याशङ्कते - **कुतः पुनरिति** ।। सामान्यवाचकत्वं पदस्याङ्गीकृत्यैव समाधानं श्लोकेन वक्ष्यत इत्याह - **बाढम् इति** ।।

सामान्यं हि । यद्यपि स्वतः पदं सामान्यवाचकम् आकृतिः शब्दार्थः, व्यक्तीनामानन्त्यात् संबन्धग्रहणानुपपत्तेरिति हि मीमांसका इति - तथापि वाक्ये स्वेतरशब्दैरन्वयसमये श्रुत्यादिप्रतिबद्धं सत्, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या (जै. सू. ३-३-१४) लक्षणप्रमाणकारणैर्नियन्त्रितं सत् विशेषार्थं भवेत्, अविवक्षितार्थं मुक्त्वा इति स्थितिः । यद्यप्यद्वितीयः प्रत्यगर्थः, न पदार्थो नापि वाक्यार्थः, न सामान्यं नापि विशेष इति यथोक्तलोकरीतिर्नोपयुज्यत इव श्रुत्यर्थनिर्णये, तथापि यथा लोके वाक्यस्थं पदं विवक्षितविशेषार्थज्ञापने पर्यवस्यति स्वेतरपदसाहचर्यवशात्, एवमत्रापि लोकबुद्धिमनुसरन्ती श्रुतिः नित्यसिद्धं जिज्ञासोरात्मानं प्रकृतपरामर्शकतत्पदेन सह प्रत्यक्षसन्निहितवाचित्वंपदस्य समभिहारेणावाक्यार्थमपि अद्वितीयप्रत्यगर्थत्वेन ज्ञापयति तेजआदिसृष्टिप्रवेशनामरूपव्याकरणस्वाप्ययाद्यध्यारोपेण यथोक्तान्वयव्यतिरेकप्रतिपत्तिसौकर्यकल्पनार्थमिति सर्वमिदमनवद्यम् ।।३२।।

७. वाक्यादेव साक्षादज्ञाननिवृत्तिः

(मूलम्)

अन्वयव्यतिरेकपुरःसरं वाक्यमेव सामानाधिकरण्यादिना अविद्यापटलप्रध्वंसद्वारेण मुमुक्षुं स्वाराज्ये अभिषेचयति । न त्वन्वयव्यतिरेकमात्रसाध्योऽयमर्थ - इत्याह -

बुद्ध्यादीनामनात्मत्वं लिङ्गादपि च सिद्ध्यति ।
निवृत्तिस्तावता नेतीत्यतो वाक्यं समाश्रयेत् ॥३३॥

न केवलमनुमानमात्रशरणोऽभिलषितमर्थं न प्राप्नोतीति, अनर्थं चाप्नोति इत्याह -

अनादृत्य श्रुतिं मोहादतो बौद्धास्तमस्विनः ।
आपेदिरे निरात्मत्वमनुमानैकचक्षुषः ॥३४॥

(क्लेशापहारिणी)

वाक्यादेवाज्ञानहानम्, न त्वन्वयव्यतिरेकमात्रात् -

तदेवम् अन्वयव्यतिरेकन्यायस्य वाक्यार्थप्रतिपत्त्यङ्गत्वादवश्याश्रयणीयत्वमुक्त्वा, अथेदानीम् अन्वयव्यतिरेकाश्रयणमात्रादवाक्यार्थप्रतिपत्तिरिति भ्रान्तिं निरस्यन्नाह - **अन्वयव्यतिरेकपुरस्सरमिति** ॥ वाक्यमेवान्वयव्यतिरेकपुरस्सरमविद्याध्वंसं करोतीत्युक्त्या श्रुतिरेव लोकबुद्धिमनुसरन्ती यथोक्तन्यायं प्रथमं समुपस्थाप्य तदनु साक्षात् स्वयमविद्यामुत्सारयति, न तु पुरुषमत्यभ्यूहितमन्वयव्यतिरेकमात्रं तत्रालमिति विवक्षितम् । तदेव स्फोरयति - **न त्विति** ॥

बुद्ध्यादीति ॥ यद्यपि बुद्ध्यादीनाम् अनात्मत्वं लिङ्गादपि सिद्ध्यति - बुद्धिर्नात्मा, दृश्यत्वात् इत्यादियुक्तिरत्र लिङ्गशब्देन

सूचिता - तथापि तावता एतादृशानुमानाश्रयणमात्रेण तेषां बुद्ध्यादीनां न निवृत्तिः स्यात्, न सत्यत्वं बाध्येत । तदध्यारोपनिमित्तस्याज्ञानस्यानिवृत्तेः - इत्यतो हेतोः, अज्ञाननिवृत्त्यर्थं तत्त्वमस्यादिवाक्यमेव समाश्रयेत् । न च श्रुतिसमर्पितोऽन्वयव्यतिरेकन्यायः केवलमनुमानं समर्पयति, न हि 'तस्मादेनं स्वपितीत्याचक्षते । स्वं ह्यपीतो भवति' (छां. ६-८-१) इत्यादिवाक्यमनुमानेन जीवस्य स्वाप्ययं साधयति ; किं तर्हि, जाग्रत्स्वप्नयोरिव सुषुप्तौ न सुखदुःखोपभोगोऽस्ति, न च 'अयमहमस्मि इमानीतराणि भूतानि' इति विशेषज्ञानम् ; तस्मात् सकलपुण्यापुण्यानन्वागतं निष्प्रपञ्चं सदात्मत्वमेव तत्र - इति जीवत्वस्य व्यतिरेकं आत्मत्वमात्रस्यान्वयं च साक्षादेव दर्शयति । अद्वितीयात्मत्वमेव च साक्षाद्दर्शयन्तमनुभवम् आधारीकृत्य, तत्पदार्थैकत्वमेव ज्ञापयति 'स्वं ह्यपीतो भवति' इति प्रसिद्धार्थक - हिशब्दादानेन । अतः श्रुत्युक्तानुभवानुसारियुक्तीनां महद्वैषम्यं लौकिकानुमानात् । तस्मात् साधूक्तम् अन्वयव्यतिरेकपुरःसरं वाक्यमेवाविद्यापटलप्रध्वंसीति इति ज्ञेयम् ।।३३।।

केवलानुमानाश्रयणे नैरात्म्यवाद एव -

अनुमानैकरूपयोरन्वयव्यतिरेकयोर्न केवलं नेष्टसाधकत्वम्, किं त्वनिष्टकारणत्वमपीत्यह - **न केवलमिति** ।।

अनादृत्येति ।। स्पष्टार्थः श्लोकः ।।३४।।

---

८. वाक्यप्रामाण्यम्

(मूलम्)

न चानादरे कारणमस्ति । यस्मात्, सर्वत्रैव अनादरनिमित्तं प्रमाणस्य

प्रमाणान्तरप्रतिपन्नप्रतिपादनं वा, विपरीतप्रतिपादनं वा, संशयितप्रतिपादनं वा, न वा प्रतिपादनम् इति । न चैतेषाम् अन्यतमद-(म ?) पि कारणमस्ति । यत आह -

मानान्तरानवष्टब्धं निर्दुःख्यात्मानमञ्जसा ।
बोधयन्ती श्रुतिः केन न प्रमाणमितीर्यते ॥३५॥

न च संशयितम्[1] अवगमयति । यतः -

सर्वसंशयहेतौ हि निरस्ते कथमात्मनि ।
जायेत संशयो वाक्यादनुमानेन युष्मदि ॥३६॥

अपि च -

यत्र स्यात् संशयो नासौ ज्ञेय आत्मेति पण्डितैः ।
न यतः संशयप्राप्तिरात्मनोऽवगतित्वतः ॥३७॥

अनवबोधकत्वं तु दूरोत्सारितमेव । यत आह -

बोधेऽप्य[2]नुभवो यस्य न कथञ्चन जायते ।
तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥३८॥

(क्लेशापहारिणी)

वाक्ये अप्रामाण्यशङ्का नास्ति -

एवं तावत् श्रुतिवाक्यार्थप्रतिपत्तिप्रतिबन्धनिरासार्थम् अन्वयव्यतिरेकाश्रयणस्य आवश्यकता समुपपादिता । अथेदानीं वाक्यस्याज्ञाननिरसने सामर्थ्यं प्रदर्शयितुमुपक्रमते - **न चेति** ॥ अयं भावः ।

---

1. 'संशयितव्यम्' इति मुद्रितपुस्तकपाठः ॥ 2. 'बोध्येऽपि' इति पाठोऽसाधुः ॥

वाक्यं हि न प्रत्यक्षादिवत् स्वात्मनोऽन्यत् प्रमेयम् अज्ञातं ज्ञापयति तद्विषयीकरणेन, नापि स्वर्गादिबोधकवाक्यमिव वाक्यमित्येव कारणात् श्रद्धेयार्थं बोधयति, किं तु, अतद्धर्मनिवर्तनादेव केवलम् आत्मनि प्रमाणमिति व्यपदिश्यते । अथापि कर्मवाक्येन समं प्रामाण्यं दर्शयितुमिदमुच्यते यद् वाक्येऽप्रामाण्यप्रसक्तिरेव तावन्नास्ति । कर्मवाक्येऽपि खलु परोक्षवस्तुबोधके इदमेव प्रामाण्यं नाम यदनधिगताबाधितार्थबोधकत्वम् ; तदिहाप्यस्त्येवेति नास्त्यप्रामाण्यशङ्कावकाश इति । तदुक्तं **बृहद्वार्तिके** - 'न च वेदोक्तितो वेदः श्रद्धेयार्थ इहेष्यते । किं त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात् ॥' (बृ. वा. २-४-३२५) इति । तदेतद् व्याख्यातुम् अप्रामाण्यकारणानि तावत् परिगणयति श्रुतौ तदसंभवस्पष्टनाय **यस्मादिति** । एतेषामप्रामाण्यकारणानामन्यतममपि प्रकृतवाक्ये नास्तीति बोधयितुमुत्तरग्रन्थस्य प्रवृत्तिरित्याह - **यत आह इति** ॥

वाक्यस्य नानुवादकत्वं विपरीतबोधकत्वं वा -

तत्र तावन्मानान्तराधिगतानुवादित्वं विपरीतप्रतिपादकत्वं च नास्तीत्येतत् स्फुटयति **मानान्तरेति** ॥ निर्दुःख्यात्मानमसंसारिणं प्रत्यक्षादिमानान्तरानवष्टब्धं अञ्जसा अवैपरीत्येन बोधयन्ती । अद्वैतत्वेन बाधशङ्काविधुरं बोधयन्ती इति यावत् । केन हेतुना, अप्रमाणमितीर्यते ? नात्र कोऽपि हेतुरस्तीत्यभिप्रायः ॥३५॥

नापि संशयितप्रतिपादकत्वम् -

ननु मास्त्वनुवादकत्वं विपरीतबोधकत्वं वा । संशयितप्रतिपादनादेवाप्रामाण्यम् इत्यस्तु । तत्राह - **न चेति** । एतत्स्पष्टीकरणार्थम् उत्तरश्लोक इत्याह - **यतः इति** ॥

सर्वसंशयहेतौ इति ॥ अनुमानेन अन्वयव्यतिरेकलक्षणेन

पदार्थज्ञानफलकेन सर्वसंशयहेतौ निरस्ते सति, आत्मनि वाक्यात् कथं संशयो जायेत ? - इति योजना । संशयो हि द्विकोटिकः 'एवं वा, एवं वा' इति ; स चानात्मभूतदेहादिबुद्ध्यन्तेषु आत्मबुद्धिनिरासेन प्रागेव वाक्यप्रवृत्तेर्निरस्तः, स मृत इवामृतसेकेन कथं केन हेतुना वाक्यप्रवृत्तेरूर्ध्वमपि जायेत ? - इत्यभिप्रायः ।।३६।।

तदेवं वाक्यप्रवृत्तिस्वभावपर्यालोचनया संशयावकाशो नास्तीत्युक्तम् । अथेदानीं वाक्यगम्यात्मस्वभावपर्यालोचनयापि नास्ति तदवकाश इत्युपपादयन्नाह - **अपि चेति ।।**

यत्रेति ।। यस्मिन्नर्थे संशयः स्यात् नासौ आत्मा इति पण्डितैर्ज्ञेयः । कुतः ? **यतः** - यत्कारणम् । आत्मनोऽवगतित्वतः अवगतिस्वरूपत्वात् संशयप्राप्तिरेव न संभवति । सर्वसंशयमिथ्याप्रतिपत्तिनिरासेनैव हि वस्तुविषयकावगतिर्जायते लोके । न चावगतेऽपि वस्तुनि संशयप्राप्तिः शङ्क्या । अवगतेरवगतित्वस्यैव विघातप्रसङ्गात् इत्यभिप्रायः । उपलक्षणमेतत् । अद्वितीयावगतिरूपत्वाच्च प्रत्यगात्मनः - इति द्रष्टव्यम् । न ह्यद्वितीये द्विकोटिकसंशयस्य संभवोऽस्ति । तथा च श्रुतिरात्मन्यवगते सर्वसंशयोच्छित्तिं दर्शयति - 'छिद्यन्ते सर्वसंशयाः' (मुं. २-२-९) इति ।।३७।।

नतराम् अबोधकत्वम् -

तदेवमनुवादकत्वविपरीतबोधकत्वसंशयितबोधकत्वानां निरासेऽप्यबोधकत्वरूपमप्रामाण्यं स्यादित्याशङ्कमानम् उपहसन्नाह समनन्तरोत्तरश्लोक इत्याह - **'अनवबोधकत्वम्'** इत्यादिना **'यत आह'** इत्यन्तेन ।।

बोधेऽपीति ।। 'तत्त्वमसि' इति नित्यबोधस्वरूप एव ह्यात्मा समुपदिश्यते । तत्र 'बोधेऽपि अनुभवेऽपि, बोधोऽनुभवो न जातः' इति वदन् दीपे प्रकाशो नास्तीति वदन्निव व्याहतवचाः । न हि अनुभवे

प्रकाशरूपे अनुभवप्रकाशः कर्तव्य इत्याकाङ्क्षास्तीति । एवं वाक्यज्ञाने अनुवादकत्वविपरीतबोधकत्वादिसर्वाप्रामाण्यकारणाभावे, किमित्यन्वयव्यतिरेकोऽप्याश्रीयते ? - इति तु न शङ्क्यम् । यतोऽज्ञानसंशयादिप्रतिबद्धयोः पदार्थयोर्न कस्यचिदपि वाक्येन तत्त्वविज्ञानं जायते । निरस्ते तु प्रतिबन्धे न विपरीतबोधकत्वादिशङ्कासंभवः - इत्येतावत्तु इह प्रतिपादितम् । तथा हि **भाष्यकारवचनम्** - "तत्र येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां तत्त्वमसीत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थ(ज्ञान)स्य - इत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः" (सू.भा. ४-१-२) इति । कथं तर्हि शास्त्रस्यावबोधकत्वव्यपदेशः इति शङ्कमानस्योत्तरं प्रागेव दत्तं द्वितीयाध्याये 'अविद्यानाशमात्रं तु' (२-१०५) इत्यत्र । तदीदृशे बोधेऽप्यनवबोधकत्वं वदन्तं जडं यदि शास्त्रं नावबोधयति, तदा नैष शास्त्रापराधः ; न ह्यन्धस्य रूपादर्शने भानोरपराधः शङ्कनीयो भवतीति भावः ।।३८।।

---

९. श्रुत्यनुगृहीतोऽन्वयव्यतिरेकन्यायः

(मूलम्)

अन्वयव्यतिरेकपुरःसरं वाक्यमेवावाक्यार्थरूपं आत्मानं प्रतिपादयति - इत्यस्य पक्षस्य द्रढिम्ने श्रुत्युदाहरणम् उपन्यस्यति -

जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ।
स आत्मा तत्परं ज्योतिः शिरसीदं वचः श्रुतेः ।।३९।।

यथा 'तत्सत्यं स आत्मा तत्त्वमसि' इत्यस्य शेषत्वेन अन्वयव्यति-

रेकश्रुतिर्यथा 'य एषोऽक्षिणि पुरुषो दृश्यते' (छां. ८-७-४) इत्याद्या 'अथ यो वेदेदं जिघ्राणि' (छां. ८-१२-४) इत्यन्ता, तथा 'अहं ब्रह्मास्मि' (बृ. १-४-१०) इत्यस्य शेषः -

अहमः प्रत्यगात्मार्थो निरस्ताशेषयुष्मदः ।
बम्भणीति श्रुतिर्न्याय्या योऽयमित्यादिनाऽसकृत् ॥४०॥

कथं पुनरयमर्थोऽवसीयते अहंव्याजेन अत्रात्मार्थो बुबोधयिषित इति ? यतः -

एष आत्मा स्वयंज्योती रविसोमाग्निवाक्षु सः ।
इतेष्वस्तं दृगेवास्ते भासयंश्चित्तचेष्टितम् ॥४१॥

निर्णेनेक्ति च पृष्टो मुनिः -

आत्मनैवेत्युपश्रुत्य कोऽयमात्मेत्युदीरिते ।
बुद्धेः परं स्वतो मुक्तमात्मानं मुनिरभ्यधात् ॥४२॥

यस्माच्चाऽऽत्मा अत्र अहंव्याजेन प्रत्यङ्मात्रो जिग्राहयिषितः, तस्मात् अहंवृत्तिस्वरूपस्य विलयेनैव वाक्यार्थावगमाय कारणत्वं प्रतिपद्यते - इतीममर्थमाह -

अहंवृत्त्यैव तद् ब्रह्म यस्मादेषोऽवगच्छति ।
तत्स्वरूपलयेनातः कारणं स्यादहङ्कृतिः ॥४३॥

(क्लेशापहारिणी)

श्रुत्यनुगृहीतान्वयव्यतिरेकन्यायस्य उदाहरणानि -

यद्यप्यन्वयव्यतिरेकन्यायस्य पदार्थशोधनद्वारेण अवाक्यार्थप्रतिपत्त्यङ्गता उक्ता, तथापि न यस्य कस्यचित् तर्कस्य तथात्वम्,

किं तु श्रुत्यनुगृहीतस्यैवेत्यभिप्रायेण, 'अन्वयव्यतिरेकपुरःसरं वाक्यमेव' इत्याद्युक्तम् । तदेतद् विवरीतुमुत्तरग्रन्थसंदर्भ इत्याह - **अन्वयव्यतिरेकेति** ॥

जिघ्राणीति ॥ 'अहमिमं गन्धं जिघ्राणि' इति 'अहम्' इति प्रमातारम् कर्तृत्वभोक्तृत्वादिविशेषेण विक्रियमाणम्, 'इमं गन्धम्, इति विषयं च विक्रियावन्तम्, जिघ्राणीति घ्राणक्रियाकरणप्रमितिं च कालादिपरिच्छेदवर्तीं, योऽविक्रिय एवावतिष्ठमानः वेत्ति नित्य-वेदनस्वरूपः । स एव 'स आत्मा तत्त्वमसि' इत्यत्रोक्तः - इतीदं वचः श्रुतेः शिरसि वेदान्ते दृश्यते 'अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्' (छां. ८-१२-४) इत्यादिरूपम् इत्यर्थः । अत्र हि त्वंपदार्थस्य अनात्मभूतप्रमातृत्वादिभ्यो विविच्यैव तत्पदार्थेनैक्यमुक्तम् इति भावः । तदेव चात्मनः परंज्योतिःस्वरूपम् - इति प्रतिपादयद् वचः 'एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणा-भिनिष्पद्यते' (छां. ८-१२-३) इति श्रुतेः शिरसि दृश्यते इत्यभिप्रायः । तत्र हि शरीरादिव्यावृत्तस्यैव त्वंपदार्थस्य परंज्योतिष्ट्वमुच्यते - इति भावः ॥३९॥

छन्दोगानां तत्त्वमैक्यवाक्यशेषत्वेन अन्वयव्यतिरेकश्रुतिरुदाहृता । तदभिप्रायमनूद्य वाजसनेयिनामपि तां वक्तुकाम आह - **यथेति** ॥ 'तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७) इति त्वंपदार्थस्य तत्पदार्थरूपताम् आचक्षाणस्य वाक्यस्य शेषत्वेन अन्वयव्यतिरेकश्रुतिः 'य एषोऽक्षिणि' इत्याद्या 'अथ यो वेदेदं जिघ्राणि' इत्यन्ता यथा, तथा 'अहं ब्रह्मास्मि' (बृ. १-४-१०) इत्यस्याप्यैक्यपरवाक्यस्य शेषः, अन्वयव्यतिरेकोपदेश उदाह्रियते समनन्तरश्लोकेन - इत्यर्थः । सर्वत्रापि श्रुत्यनुगृहीत एवास्त्यन्वयव्यतिरेकलक्षणस्तर्कः एवंविधे स्थले - इति भावः । यद्यपि 'य एषोऽक्षिणि' (छां. ८-७-४) इत्येतत् प्रजापतिवाक्यं

'य आत्माऽपहतपाप्मा' (छं. ८-७-१) इत्यस्य शेषः, 'अथ यो वेदेदं जिघ्राणि' (छां. ८-१२-४) इति च 'परंज्योतिरुपसंपद्य' (छां. ८-१२-३) इत्यस्य, यद्यपि च 'तत्त्वमसि' इति वाक्यशेषत्वेन 'अन्नमयं हि सोम्य मनः' (छां. ६-६-५), 'स्वप्नान्तं मे विजानीहि' (छां. ६-८-१) इत्यादिवचनानि तत्तत्प्रकरणस्थान्येव त्वंपदार्थविवेकाय शक्योदाहरणानि, तथापि तत्त्वमैक्यपरवाक्यशेषत्वेन अन्वयव्यतिरेकप्रदर्शनं श्रुत्यैव क्रियते इत्येतावदत्र विवक्षितम् इति न दोषः ॥

अथ 'अहं ब्रह्मास्मि' (बृ. १-४-१०) इति वाजसनेयकगतैक्यपरवाक्यशेषतया श्रुत्यनुगृहीतमन्वयव्यतिरेकवाक्यमुदाजिहीर्षुराह - **अहम इति** ॥ निरस्ताशेषयुष्मदः व्यावर्तितसकलानात्मांशस्य अहमः प्रत्यगात्मा अर्थः इति न्याय्या युक्त्युपेता श्रुतिः, **योऽयमित्यादिना** 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' (बृ. ४-३-७) इत्यादिवाक्येन असकृत् बम्भणीति तात्पर्येण वक्ति - इत्यर्थः । अत्र हि 'योऽयम्' इति आत्मानं प्रत्यक्षेण निर्दिश्य, अनात्मभूतबुद्ध्यादिभ्यो वैलक्षण्यं प्रदर्श्यत इति भावः । 'असकृत्' इत्यनेन 'स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि' (बृ. ४-३-७), 'तद्यथास्मिन्नाकाशे' (बृ. ४-३-१९) इत्यादिवचनजातम् अन्वयव्यतिरेकोदाहरणार्थमुपसंगृहीतं वेदितव्यम् ॥४०॥

'अहमः प्रत्यगात्मा लक्ष्यार्थः' इत्युक्तमधस्तात् । तत्कथमवगम्यते ?- इति पृच्छति - **कथं पुनरिति** ॥ अत्र अहंव्याजेन अहङ्कारं निमित्तीकृत्य प्रत्यगात्मा बुबोधयिषित इति कथमवगम्यते ? अथवा 'योऽयमित्यस्मिन्' वाक्यशेषे अहंशोधनद्वारेण प्रत्यगात्मा बुबोधयिषित इति कथमवसीयते ? - इति प्रश्नः । प्रश्नोत्तरत्वेन श्लोकमवतारयति - **'यतः'** इति ॥

एष इति ॥ एष आत्मा स्वयंज्योतिः, सः रविसोमाग्निवाक्षु ज्योतिःषु अस्तमितेषु चित्तचेष्टितं चित्तप्रचारजातं सर्वमपि भासयन्

दृगेव साक्षिरूप एव आस्ते 'इति वचनात्' इति शेषः । इदमुक्तं भवति । 'योऽयमात्मा' इत्यत्र बुद्ध्यादिसाक्षी प्रत्यगात्मैव विवक्षितः प्रतिपत्तव्यः । पूर्वोत्तरालोचनात् । पूर्वस्मिन् ग्रन्थे तावत् - 'अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि किञ्ज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति' (बृ. ४-३-६) इति सर्वबाह्यान्तरज्योतिषामस्तमयेऽपि आत्मज्योतिःसत्तायाः प्रश्नप्रतिवचनाभ्यां निर्णीतत्वात् वागादिसर्वेन्द्रियसाक्ष्येवात्मा निर्णिनीषित इति गम्यते - इति श्लोकार्थः । इदमुपलक्षणम्, उत्तरत्रापि 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' (बृ. ४-३-१४) इति दर्शनादित्यपि द्रष्टव्यम् ।।४१।।

किं च योऽयमित्यस्मिन्नेव वाक्ये शुद्धत्वंपदार्थस्य दर्शितत्वादेवेत्थमवसेयम् इत्याह - **निर्णेनेक्ति चेति** ।। आत्मनः परिशुद्धत्वम् आविर्भावयति सर्वानात्मपरिमार्जनेनेत्यर्थः ।।

आत्मनैवेति ।। 'आत्मनैवायं ज्योतिषाऽऽस्ते' (बृ. ४-३-६) इति याज्ञवल्क्यवचनमुपश्रुत्य कोऽयमात्मा ? कतमोऽयं देहेन्द्रियप्राणमनोबुद्धिषु यस्त्वयोक्तः यज्ज्योतिषाऽऽस्तेऽयं पुरुष इत्युक्तम् ? - इत्यभिप्रायेण 'कतम आत्मा' (बृ. ४-३-७) इति जनकेनोदीरिते पृष्टे सति मुनिर्याज्ञावल्क्यः बुद्धेः परं स्वतो मुक्तमात्मानं सर्वसाक्षिणम् 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिःपुरुषः' (बृ. ४-३-७) इत्यनेन वाक्येन अभ्यधात् इत्यर्थः । अत्र हि 'विज्ञानमयः' इति देहाद्व्यावृत्तिः, 'प्राणेषु' इति इन्द्रियेभ्यः, प्राणेभ्यश्च । 'हृद्यन्तः' इति बुद्धेः । हृच्छब्देन बुद्धिरुच्यते तत्स्थत्वात् ; 'हृदि' इति बुद्धेराधारत्वनिवृत्त्यर्थमन्तरित्युक्तम् । तदेवं देहादिव्यतिरिक्तः बुद्धितद्वृत्तिभ्योऽपि यः परः प्रत्यगात्मतया स्वयं भाति स एवात्मेति प्रत्यायनाय 'ज्योतिः' इत्युक्तम् । तथा च सर्वावभासकत्वात् न केनापि स्वविषयभूतेन परिच्छिन्नोऽ-

यमित्यतः स्वतोमुक्तस्वरूप आत्मा - इति अहंपदार्थशोधनपरमिदं वचनमिति सिद्धम् इत्यभिप्रायः ।।४२।।

स्वरूपविलयेनैव अहंकृतेः वाक्यार्थावगमः -

अत्र च अहंवृत्तेर्लक्षणत्वेन स्थितौ लक्ष्यभूताद्वयात्मनो न सिद्धिः, सद्वितीयत्वप्रसङ्गात् ; तदभावे तु नतराम्, लक्षणाभावादेव - इत्याक्षिप्य 'लक्षणं सर्पवद्रज्ज्वाः' (३-२७) इत्युक्तं स्मारयन्, 'अहं ब्रह्मास्मि' इति वाक्यार्थज्ञाने अहंवृत्तेः कारणत्वं स्वरूपविलयेनैवेत्यर्थकत्वेनोत्तरश्लोकमवतारयति - **यस्माच्चेति** ।।

अहंवृत्त्यैवेति ।। यस्मादेष मुमुक्षुः अहंवृत्त्यैव द्वारभूतया तद्ब्रह्म अवगच्छति यथावत् प्रतिपद्यते, अतः तदद्वितीयत्वप्रतिपत्तौ अहङ्कृतिः तत्स्वरूपलयेन - अहंरूपलये-नैव कारणं स्यात् । 'मत्स्वरूपलयेनैव' इति पाठेऽप्ययमेवार्थः ।४३।।

---

१०. कृतान्वयव्यतिरेकस्य न वाक्यार्थे विरोधप्रतीतिः

(मूलम्)

अत एव च यः प्रतिज्ञातोऽर्थो 'नाहंग्राह्ये न तद्धीने' (२-५) इत्यादिः, स युक्तिभिरुपपादित इति कृत्वा उपसंह्रियते -

गृहीताहंपदार्थश्चेत् कस्माज्ज्ञो न प्रपद्यते ।
प्रत्यक्षादिविरोधच्चेत् प्रातीच्युक्तिर्न युष्मदि ।।४४।।

पूर्वस्यैव श्लोकार्थस्य विस्पष्टार्थमाह -

पराञ्च्येव तु सर्वाणि प्रत्यक्षादीनि नात्मनि ।
प्रतीच्येव प्रवृत्तं तत् सदसीति वचोऽञ्जसा ॥४५॥

तस्मात्, प्रमातृप्रमाणप्रमेयेभ्यो हीयमानोपादीयमानेभ्यो, अन्वय-व्यतिरेकाभ्यां मुञ्जेषीकावत् अशेषबुद्धिविक्रियासाक्षितया आत्मानं निष्कृष्य तत्त्वमस्यादिवाक्येभ्योऽपूर्वादिलक्षणम् आत्मानं विजानीयात् । तदेतदाह -

अहं दुःखी सुखी चेति येनायं प्रत्ययोऽध्रुवः ।
अवगत्यन्त आभाति स म आत्मेति वाक्यधीः ॥४६॥

(क्लेशापहारिणी)

गृहीताहंपदार्थस्य न विरोधप्रतीतिः -

तदेवं वाक्यादद्वयप्रत्यगात्मप्रतिपत्तेरुपपन्नत्वात् नास्त्यत्र सिद्धान्ते कोऽपि विरोध इत्युपसंहरति - **अत एव चेति** ।। 'नाहंग्राह्ये न तद्धीने न प्रत्यङ् नापि दुःखिनि । विरोधः सदसीत्यस्माद्वाक्याभिज्ञस्य जायते ।।' इति द्वितीयाध्यायादौ (२-५) योऽर्थः प्रतिज्ञातः स युक्तिभिरुपपादित इति कृत्वा उपसंह्रियत इत्यर्थः ।।

गृहीतेति ।। गृहीतः अहंपदार्थः प्रत्यगात्मत्वेन येन तादृशश्चेत् ज्ञः प्रतिपत्ता कस्माद् वाक्यार्थं न प्रपद्यते ? तत्र न किमपि कारणं पश्याम इत्यर्थः । शङ्कते - **प्रत्यक्षादिविरोधाच्चेदिति** । अहमः संसारित्वस्य प्रत्यक्षादिसिद्धत्वात् तद्विरोधात् वाक्यार्थाप्रतिपत्तिः स्यात् इति चेत् इत्यर्थः । तत्र परिहारः - उक्तिः तत्त्वमस्यादिवाक्यं प्रतीचि प्रत्यगात्मनि वर्तते न तु युष्मदि अहमि परागर्थे । प्रत्यक्षादिस्तु युष्मदि वर्तते न प्रत्यगात्मनि - इत्यतो भिन्नविषयत्वात् न कोऽप्यनयोः प्रमाणयोर्विरोध इत्यर्थः ।।४४।।

विरोधाभावमेव स्पष्टयत्युत्तरश्लोक इत्याह - **पूर्वस्यैवेति** ।। विस्पष्टार्थम् विस्पष्टतार्थम् इत्यर्थः ।।

पराञ्च्येव त्विति ।। प्रत्यक्षादीनि सर्वाणि प्रमाणानि तु पराञ्च्येव । 'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराक्पश्यति नान्तरात्मन्' (का. २-१-१) इति श्रुतेः । तत् सदसीति वचस्तु प्रतीच्येव अञ्जसा तात्पर्येण प्रवृत्तम् । ततो न विरोधः कश्चिदिति भावः ।।४५।।

वाक्यात् हेयोपादेयविलक्षणस्य आत्मनो ज्ञानम् -

तस्मात्, वाक्यार्थमेवम् अविरोधेनैव प्रतिपद्येतेत्याह - **तस्मा-दिति** ।। हानोपादानयोग्येभ्यः, प्रमात्रादिभ्यः । हानोपादानरहितमात्मानं मुञ्जादिवेषीकां विविच्य तत्त्वमस्यादिवाक्येभ्यः । अपूर्वादिलक्षणम् आत्मानं विजानीयात् । 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म' (बृ. २-५-१९) इति श्रुत्युक्तलक्षणं निर्विशेषप्रत्यगात्मानं विद्यात् इत्यर्थः । न हि तत्त्वमस्यादिवाक्येषु त्वंपदार्थत्वेन प्रमातृरूपं पराग्वस्तु विवक्षितं येन विरोधः स्यादपीत्यभिप्रायेणोक्तम् **'अशेष-बुद्धिविक्रियासाक्षितया'** - इति । अत्रार्थे श्लोकमवतारयति - **तदेतदाहेति** ।।

अहं दुःखीति ।। 'अहं दुःखी', 'अहं सुखी' इत्यादिप्रकारः, अयम् अध्रुवः अस्थिरः यत आगमापायी प्रत्ययः, अवगत्यन्तः प्रमित्यन्तः । प्रमातृप्रमाणप्रमेयप्रमितिलक्षणः इत्येतत् । येन साक्षिप्रकाशेन आभाति स म आत्मा - इति वाक्याधीः । तदुक्तं **बृहद्वार्तिके** 'मातृमानप्रमेयार्थांश्चागमापायिनः सदा । वीक्षते योऽविलुप्ताक्षः स आत्माऽनन्यमानगः ।।' (बृ.वा. ४-४-४६७) इति । अयं भावः - साक्ष्यन्वयसाक्ष्यव्यतिरेकाभ्यां हि 'अहं दुःखी' 'अहं सुखी' - इति च प्रत्ययो हि अहमः सुखित्वदुःखित्वरूप-

परिणामेनैव तदा तदा जायते, नश्यति च । अतः स प्रत्ययः आगमापायित्वात् अध्रुवः । अत एवात्रहमः सुखित्वादि-प्रत्ययज्ञातृत्वमनुपपन्नम्, स्वपरिणामस्य स्वेनैव ज्ञेयत्वायोगात् । तदयमध्रुवः प्रत्ययोऽहमः परिणामरूपोऽवगम्यते, येन ध्रुवेण एतदुभयसाक्षिभूतेन स एव मम आत्मा अवगतिस्वरूपः इति 'अहं ब्रह्मास्मि' वाक्यार्थस्य ज्ञानं भवतीति । तदेतदुक्तं **गीताभाष्ये** 'दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिः 'अहमिदं भोक्ष्ये', 'पश्यामीदम्', 'शृणोमीदम्,' 'सुखमनुभवामि', 'दुःखमनुभवामि', 'एतदर्थमिदं करिष्ये', 'इदं जानामि' - इत्याद्या अवगतिनिष्ठा अवगत्य-वसानैव' (गी. भा. ९-१०) इति तदेवंभूतं साक्षितत्त्वमेव सद्ब्रह्मेति बोध्यत इति गम्यते मधुनद्यादिदृष्टान्तश्रुतिभ्य इति भावः ।।४६।।

---

११. अभिधाश्रुतेरपि प्रामाण्यम्

(मूलम्)

प्रमाणान्तरानवष्टब्धं निरस्ताशेषकार्यकारणात्मकद्वैतप्रपञ्चं सत्य-ज्ञानानन्दलक्षणम् आत्मानम् 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादि-वाक्यं संशयितमिथ्याज्ञानाज्ञानप्रध्वंसमुखेन साक्षादपरोक्षात् करत-लन्यस्तामलकवत् प्रतिपादयत्येव इत्यसकृदभिहितम् । तत्र केचिदाहुः - तत्त्वमस्यादिवाक्यैर्यथावस्थितवस्तुयाथात्म्या-न्वाख्याननिष्ठैः, न यथोक्तोऽर्थः प्रतिपत्तुं शक्यते, अभिधाश्रुति-त्वात् तेषाम् । न हि लोके अभिधाश्रुतेः, प्रमणान्तरनिरपेक्षाया 'नद्यास्तीरे फलानि सन्ति' इत्यादिकायाः प्रामाण्यमभ्युपगतम् ।

अतो नियोगमुखेनैव अभिधाश्रुतेः प्रामाण्यं युक्तम्, प्रमाणान्तर-निरपेक्षत्वात् नियोगस्य ॥

अस्य परिहारार्थम् अशेषप्रत्यक्षादिप्रमेयत्वनिराकरणद्वारेण अतीन्द्रियार्थविषयत्वादभिधाश्रुतेः प्रामाण्यं सुप्तपुरुषप्रबोधक-वाक्यस्येव वक्तव्यम् इत्ययमारम्भः -

नित्यावगतिरूपत्वादन्यमानानपेक्षणात् ।
शब्दादिगुणहीनत्वात् संशयानवतारतः ॥४७॥

तृष्णानिष्ठीवनैर्नात्मा प्रत्यक्षाद्यैः प्रमीयते ।
प्रत्यगात्मत्वहेतोश्च स्वार्थत्वादप्रमेयतः ॥४८॥

(क्लेशापहारिणी)

अभिधाश्रुतेः अप्रामाण्यशङ्का, तत्परिहारश्च -

एवमनवद्ये स्थितेऽपि वाक्यार्थज्ञानमार्गे केचिदत्र कुचोद्यमवतारयन्ति ; तन्निरसितुं वृत्तार्थं तावदनुवदति - **'प्रमाणान्तरानवष्टब्धम्'** इत्यादिना । अथात्र कथं तेषाम् चोद्यम् ? - तदाह - तत्त्वमस्यादिवाक्यानि सिद्धवस्तुतत्त्वमनुवदन्ति नैवापूर्वं प्रमाणान्तरानवगतम् अवाक्यार्थं समर्पयितुं शक्नुवन्ति । कुत एतत् ? अभिधाश्रुतित्वात् तेषाम् । तेषां वस्तुस्वभावान्वाख्यानपरत्वादेवेत्यर्थः । अभिधाश्रुतेरपि किमिति प्रामाण्यं न स्यात् ? तत्राह - **न हीति** । 'नद्यास्तीरे फलानि सन्ति' इत्येतद् वाक्यं प्रमाणान्तरसिद्धानुवादित्वे यथार्थबोधकं भवेत् ; अथ प्रमाणान्तरनिरपेक्षं तत्, न तावन्मात्रेणावितथमिति श्रद्धेयं भवेद् अनाप्तवाक्यत्वात् । तस्मात्, अभिधाश्रुतेः सापेक्षत्वात्, नानधिगतार्थाधिगमयितृत्वमस्तीत्यतः प्रामाण्यार्थम् 'अहं ब्रह्मास्मि इति धारयेत्' इत्याद्यध्याहारेण नियोगद्वारेणैव प्रामाण्यं युक्तमभ्युपगन्तुम् इति

नियोगवादिनां मतम् । अस्य चोद्यस्य परिहाराय परो ग्रन्थ आरभ्यत इत्याह - **अस्येति** ।। अत्र प्रत्यक्षादिप्रमेयत्वनिराकरणं वाक्यस्य सापेक्षत्वशङ्कावारणार्थम्, अतीन्द्रियविषयत्वप्रदर्शनं तु तत्र श्रुतेरेव लब्धावकाशत्वोपपादनार्थम् इति ध्येयम् । सुप्तपुरुषप्रबोधननिदर्शनं पुनर्वाक्यस्य प्रमेयसंस्पर्शाभावेऽपि प्रमाजनकत्वसामर्थ्यसंभावनार्थमित्यग्रे (३-१०५) स्थास्यति । तदेवम् अभिधाश्रुतेरपि प्रामाण्योपपादनार्थमुत्तरो ग्रन्थ इत्याह - **इत्ययमारम्भ इति** ।।

आत्मनः प्रत्यक्षाद्यविषयत्वे हेतवः -

तत्र प्रत्यगात्मनः प्रमाणान्तराविषयत्वं तावदाह श्लोकद्वयेन **'नित्यावगतिरूपत्वात्', 'तृष्णानिष्ठीवनैः' इति च** ।। स्वयं नित्यावगतिरूपत्वात्, 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्' (बृ. ४-३-३०) इत्यादिश्रुतेः, अत एवान्यमानानपेक्षणात् । अवगत्यर्थं हि मानव्याप्त्यपेक्षा - इति भावः । शब्दादिगुणहीनत्वात्, 'अशब्दम्' (का. १-३-१५) इत्यादिश्रुतेः । शब्दादियुक्तं हि श्रोत्रादिविषयभूतं सत् प्रत्यक्षादिप्रमेयं भवेदिति भावः । **संशयानवतारतः** 'अहं वा नाहं वा', 'अस्मि वा न वा' - इत्याकारकसंशयस्य संशयितुः प्रमातुरपि परमार्थस्वरूपभूतत्वात् । 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-१) इति श्रुतेः । पराग्वस्तुष्वेव हि देशकालादिव्यवहितेषु अस्ति नास्तीत्यादिसंशयग्रस्तेषु तत्त्वनिर्णयार्थं प्रमित्सेति प्रमाणव्यापारविषयत्वं भवेदिति भावः । स्वार्थत्वात् । अत एव प्रत्यगात्मत्वहेतोश्च ; प्रमातुर्व्यतिरिक्तं हि स्वसिद्धये प्रमाणयोग्यं भवेत्, न प्रमातुः स्वरूपमेव ; प्रमाणस्यापि तदात्मकत्वात्, तद्गोचरत्वाच्च । 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा

सर्वान्तरः (बृ. ३-४-२) इति श्रुतेः । न हि स्वात्मानं स्वयमेव शक्नुयाद्गोचरयितुम् इति भावः । स्वार्थत्वाच्च । 'अयमात्मा ब्रह्म सर्वानुभूः' (बृ. २-५-१९) इति श्रुतेः । परार्थं हि वस्तु स्वार्थेन तदसंहतेन केनचित् प्रमाणादिना निश्चितं सदुपभुज्यते इति भावः । तदेवं नित्यावगतिरूपत्वादिस्वार्थत्वान्तेभ्यो हेतुभ्यः, यथावस्थितरूपोऽप्यात्मा न प्रमेयः । अप्रमेयत्वत एव तृष्णानिष्ठीवनैः कामप्रेरणयैव लब्धवृत्तिभिः प्रत्यक्षाद्यैः । प्रमित्सोर्हि प्रमाणव्यापार इत्याशयः । तैरीदृशैः प्रमाणैर्न प्रमीयते । अतो न वाक्यस्याभिधाश्रुतित्वेऽपि प्रत्यक्षाद्यपेक्षा इत्यभिप्रायः ॥४७॥४८॥

(मूलम्)

श्रुतिरपि इममर्थं निर्वदति -

दिदृक्षितपरिच्छिन्नपराग्रूपादिसंश्रयात् ।
विपरीतमतो दृष्ट्या स्वतोबुद्धं न पश्यति ॥४९॥

न्यायसिद्धमतो वक्ति दृष्टेर्द्रष्टारमात्मनः ।
न पश्येः प्रत्यगात्मानं प्रमाणं श्रुतिरादरात् ॥५०॥

(क्लेशापहारिणी)

आत्मनोऽप्रमेयत्वे श्रुतिप्रमाणम् -

अत एव श्रुतिरप्यात्मनः प्रमाणाविषयतामाहेति वदच्छ्लोकम् अवतारयति - **श्रुतिरपीति** ॥

श्रुतेरभिप्रायं तावद् वर्णयति - **दिदृक्षितेति** । अतः प्रत्यक्षादीनां तृष्णानिष्ठीवनत्वादेव बहिर्विषयत्वात् दिदृक्षितात् दृश्यात्, परिच्छिन्नात् देशकालवस्तुपरिच्छेदवतः, पराग्भूतात्, रूपादिसंश्रयात् विपरीतं दृग्रूपम्, अनन्तम्, प्रत्यग्भूतम्, रूपादिहीनम् । सर्वप्रमेयस्वभाव-

विलक्षणम् इत्येतत् । ईदृशं स्वतोबुद्धं नित्यचैतन्यस्वरूपं प्रत्यक्षरूपया दृष्ट्या न कश्चिदपि पश्यतीत्यर्थः ।।४९।।

इत्येवंहेतोः श्रुतिः किं वक्ति ? - इत्येतदुत्तरत्वेन श्लोकमाह - **न्यायसिद्धम् इति** ।। पूर्वश्लोकोपवर्णितयुक्तिसिद्धं प्रमाणभूता श्रुतिः, आदरात् तात्पर्येणैवं वक्ति । कथम् ? आत्मनः दृष्टेर्दृष्टारं नित्यया दृष्ट्या व्याप्तारं प्रत्यगात्मानं न पश्येः । तव लौकिकदृष्टेः कर्मभूतायाः द्रष्टारं स्वकीयया नित्यया दृष्ट्या व्याप्तारं न पश्येः ; द्रष्टुं न शक्नुयाः । सा हि लौकिकी दृष्टिः बाह्यरूपमात्रव्यञ्जने अधिकृता स्वात्मनोऽपि स्वरूपदृष्ट्या व्याप्तारं व्याप्तुं न कदाचिदपि प्रभवेत् इत्यभिप्रायः ।।५०।।

(मूलम्)

अनुमानाविषयत्वे अन्यदपि कारणमुच्यते -

प्रत्यक्षस्य पराक्त्वान्न संबन्धग्रहणं यतः ।
आत्मनोऽतोऽनुमित्याऽस्यानुभवो न कथञ्चन　　।।५१।।

(क्लेशापहारिणी)

लिङ्गाभावात् आत्मा नानुमेयः -

यद्यपि प्रत्यक्षाविषयत्वे समुदाहृतदिदृक्षितपरिच्छिन्नत्वादिरूपवैलक्षण्यलक्षणो हेतुरेवालम् अनुमानाविषयत्वोपपादनाय, तथापि तत्र हेत्वन्तरमप्युच्यते आगामिश्लोकेनेत्याह - **अनुमानेति** ।।

तमेव हेत्वन्तरमाह श्लोकेन - **प्रत्यक्षस्येति** ।। न हि लिङ्गलिङ्गिसंबन्धज्ञानं विना अनुमितिर्भवति । लिङ्गं तु प्रत्यक्षग्राह्यं पराग्भूतम् । न च पराक्प्रतीचोः कश्चन संबन्धः समस्ति । ततश्चाप्यात्मनोऽनुमित्या न कथञ्चन अनुभवः स्यात् इत्यक्षरयोजना ।।५१।।

(मूलम्)

एवमयं प्रमातृप्रमाणप्रमेयव्यवहारः सर्व एव पराचीनविषय एव, न प्रतीचीनमात्मानम् अवगाहयितुमलम् । एवं च सति, अनेनैव यथोक्तोऽर्थोऽवसातुं शक्यत इत्याह -

प्रमाणव्यवहारोऽयं सर्व एव पराग्यतः ।
सुविचार्याप्यतोऽनेन युष्मद्येव दिदृक्षते ॥५२॥

(क्लेशापहारिणी)

प्रमाणैरात्मान्वेषणं विफलम् -

अनुमानविषयत्वे अपहस्तिते सकलेतरप्रमाणविषयत्वमपि निराकृतमेव भवति । न्यायस्य तुल्यत्वात् इत्यभिप्रेत्य उपसंहरति - **एवमयमिति** ॥ यथोक्तोऽर्थः वाक्येतरप्रमाणानधिगम्यत्वमात्मनः ॥

प्रमाणव्यवहार इति ॥ यतः सर्वोऽयं प्रमाणव्यवहारः प्रमाणव्यापारः पराग्विषय एव, अतः प्रमाणसाधनोऽयं पुरुषः सुविचार्यापि अन्वयव्यतिरेकं कृत्वापि प्रत्यक्षादिना युष्मद्येव अनात्मन्येव आत्मानं दिदृक्षते द्रष्टुमिच्छति । सा च दिदृक्षा विफला । उक्तहेतोरेवेति भावः ॥५२॥

(मूलम्)

यस्माद् लौकिकप्रत्यक्षादिप्रमाणानधिगम्योऽहंब्रह्मास्मीति वाक्यार्थः, तस्मात् -

अन्वयव्यतिरेकाभ्यां निरस्याऽऽप्राणतो यतेः ।[1]
वीक्षापन्नस्य कोऽस्मीति सदसीति श्रुतिर्जगौ ॥५३॥

---

1. 'यतः' इत्यतोऽयमेव पाठो वरीयान् । तथा हि अवतरणिकावाक्यस्थेन 'यस्मात्' इत्यनेन गतार्थता वार्यते । 'यतेः' इत्यस्य यतमानस्य जिज्ञासोरित्यर्थो बोध्यः ॥

(क्लेशापहारिणी)

श्रुतिवाक्यैकगम्य आत्मा -

अत एवाभिधाश्रुतेस्तत्त्वमस्यादिवाक्यस्यैवात्र प्रामाण्यमित्याह - **यस्मादिति** ।। तस्मात् 'सदसीति श्रुतिर्जगौ' इति श्लोकस्थेन संबन्धः ।।

अन्वयव्यतिरेकाभ्यामिति ।। आप्राणतः प्राणान्तम् अन्वय-व्यतिरेकाभ्यां निरस्यापि कोऽस्मीति वीक्षापन्नस्य यतेः कृते श्रुतिः तद् भूमब्रह्मैव त्वमसीति जगौ आचचक्षे अतः तस्या एवात्राज्ञाननि-रसनसामर्थ्यमिति भावः ।।

अत्रेदमवधेयम् - नारदसनत्कुमारसंवादव्याजेन श्रुतिः, नामादि-प्राणान्तम् अनात्मविशेषमेव उत्तरोत्तरं भूयस्त्वेनोपदिश्य पूर्वपूर्वं निरस्यन्ती अन्तिमपर्यायगतस्य प्राणस्य सर्वात्मकतामुपदिदेश । तमात्मत्वेनाभिमन्यमानो नामाद्याशान्तमतीत्य वर्तमानत्वात् अतिवादी भवतीति प्राणब्रह्मज्ञं तुष्टाव । जिज्ञासुस्तावतैव परितुष्टस्तदात्मत्वे-नैवावस्थितो मा भूदिति प्राणादपि भूयानस्त्यात्मा परमार्थतो भूमा इति विजिज्ञापयिषया स्वत एव तमाख्यातुं प्रववृते 'एष तु वा अतिवदति यस्सत्येनातिवदति' (छां. ७-२६-१) इत्यादिना । किं नु स्याददः सत्यं नाम ? - इति जिज्ञासमानं क्रमक्रमेण कृतिनिष्ठाश्रद्धा-मतिविज्ञानद्वारेणाधिगन्तव्यं तत् सुखरूपं भूमाख्यं ब्रह्मोपदिदेश । तमेव च भूमानम् अहंशब्दलक्ष्यत्वेन शुद्धात्मत्वेन चान्ते (छां. ७-२५-१, २) वर्णयांबभूव - इति स्थितिः । तमिममेवानात्मनिरसनप्रकारं परामृश्य प्रागप्युक्तम् 'नामादिभ्यः परो भूमा निष्कलोऽकारकोऽक्रियः । स एवात्मवतामात्मा स्वतःसिद्धः स एव नः ।। (२-५७) इति । अत्र 'सदसीति श्रुतिर्जगौ' इत्युक्तिस्तु सर्वत्रापि ब्रह्मात्मैकत्वोपदेशस्थले 'तत्त्वमसि' इत्यत्रेव सन्मात्र एव निर्विशेषः परमात्मा जिज्ञासोरात्मत्वेन

विवक्ष्यत इति स्फोरणाय । 'तदसीति' इति पाठेऽप्ययमेवाभिप्रायः ॥५३॥

---

१२. अन्वयव्यतिरेकन्यायसंक्षेपः

(मूलम्)

सोऽयम् अन्वयव्यतिरेकन्याय एतावानेव (?) यदवसानो वाक्यार्थस्तदभिज्ञस्य 'अहं ब्रह्मास्मि' इत्याविर्भवति, द्रष्टृदृश्यविभागेन आगमापायिसाक्षिविभागेन च श्रुत्यभ्युपगमतः सङ्क्षिप्योच्यते -

दृश्यत्वाद् घटवद्देहो देहवच्चेन्द्रियाण्यपि ।
मनश्चेन्द्रियवज्ज्ञेयं मनोवन्निश्चयादिमत् ॥५४॥

(क्लेशापहारिणी)

द्रष्टृदृश्यविभागन्यायसारः -

तदेवं प्रमाणान्तराविषयत्वादात्मनः, वाक्यमेवाभिधाश्रुतिरपि तत्र प्रमाणमित्युपपादितम् । वाक्यार्थज्ञानाङ्गत्वेन श्रुत्यभ्युपगतान्वयव्यतिरेकन्यायमनुसर्तव्यं पूर्वोक्तमेव पुनरपि सङ्क्षिप्यानुवदति किञ्चिदाशङ्कान्तरं परिहरिष्यन् - **सोऽयमिति** ॥ 'सः' पूर्वाध्याये विस्तरेण त्वंपदार्थविवेकोदयार्थम् (२-११प्रभृति ९५तमश्लोकपर्यन्तम्) वर्णितः । 'अयम्' पुनरप्यस्मिन्नध्याये वाक्यार्थव्याख्यानप्रसङ्गेन (३-१०प्रभृति ३-४३तम श्लोकपर्यन्तम्) निर्दिष्टः अन्वयव्यतिरेकन्यायः, एतावानेव एतावत्पर्यन्त एवं ; यदवसानः,

यत्पर्यवसाने उद्भवन् 'अहं ब्रह्मास्मि' इति वाक्यार्थस्तदन्वय-व्यतिरेकाभिज्ञस्य भवति । पदार्थज्ञाननान्तरीयकं वाक्यार्थज्ञानम् इत्युक्तं भवति । सोऽयम् द्रष्टृदृश्यविभागेन, आगमापायिसाक्षिविभागेन श्रुत्य-भ्युपगमतः, श्रुत्यभ्युपगमानुसारेण इदानीं सङ्क्षिप्य उच्यते इत्यर्थः । अथवा 'एतावानेव' इत्यधिकं पाठम् अनादृत्य यदवसाने वाक्यार्थ आविर्भवति, तदभिज्ञस्य, सोऽयमन्वयव्यतिरेकन्यायः पूर्वाध्याये विस्तृतः अस्मिन्नध्याये च प्रत्यवमृष्टः द्रष्टृदृश्यविभागेन, आगमापायि-साक्षिविभागेन च श्रुत्यभ्युपगमतः सङ्क्षिप्योच्यते इत्येवाक्षरयोजना कृता सुखावबोधकारिणी । पूर्वत्रापि हि श्रुत्यनुगृहीतोऽन्वयव्यतिरे-कन्यायः द्विप्रकार एव प्रदर्शितः । अध्यारोपापवादन्यायमाश्रित्य ; स्मारितश्च संबन्धग्रन्थे - "(१) अज्ञानोत्थबुद्ध्यादिकर्तृत्वोपाधि-मात्मानं परिगृह्यैव अन्वयव्यतिरेकाभ्याम् अहं सुखी दुःखी च इत्यहङ्कारादेरनात्मधर्मत्वमुक्तम् । ...... (२) अथेदानीम् अविद्या-परिकल्पितं साक्षित्वमाश्रित्य कर्तृत्वाद्यशेषपरिणामप्रतिषेधार्थमाह" (२-५८) इत्यत्र । तदेव पुनरिहसङ्क्षिप्योच्यतेऽन्वारम्भेण वाक्यस्य निर्विषयत्वशङ्कापरिहारार्थमिति विशेषः ॥

तत्र द्रष्टृदृश्यविभागेनान्वयव्यतिरेकौ तावद् दर्शयति **दृश्यत्वा-दिति** ॥ घटवद् दृश्यत्वात्, देहो दृग्रूपादात्मनो व्यतिरिक्तः, देहवच्च इन्द्रियाण्यप्यात्मव्यतिरिक्तान्येव । इन्द्रियवन्मनश्च अनात्मैव, दृश्यत्वा-देव, मनोवत् निश्चयादिवृत्तिमदन्तःकरणं बुद्ध्याख्यमपि अनात्मरूप-मेव । दृश्यत्वाविशेषादित्यर्थः ॥५४॥

(मूलम्)

तथा सकलकार्यकारणागमापायिविभागसाक्षित्वेनापि -

प्रागसद् याति पश्चात् सत् सच्च यायादसत्तथा ।
अनात्माभिजनं तत्स्याद्विपरीतस्त्वयं दृशिः ॥५५॥

(क्लेशापहारिणी)

आगमापायिसाक्षिविभागन्यायसारः -

अधुना द्वितीयोऽन्वयव्यतिरेकप्रकार उच्यत इत्याह - **तथेति** ।। सकलकार्यकारणागमापायिसाक्षिविभागेनापि । अन्वयव्यतिरेकौ उच्येते इति शेषः ।।

प्रागिति ।। अनात्माभिजनम्, अनात्मवंश्यम् ; अनात्मकार्यम् इति यावत् । कार्यं प्राक् असत् । स्वरूपेणेति शेषः, कारणरूपेणास्तित्वाभ्युपगमात् । पश्चात् सत् । सच्च भूत्वा प्रध्वंसादूर्ध्वं तथैव असत्त्वं यायात् । एवं मृदादिकारणस्यापि स्वकारणव्यतिरेकेणानुपलब्धेः, सत्त्वप्रतीतिर्मृषैव जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं चानुपलब्धेः - इति द्रष्टव्यम् । तदेवं सर्वत्रानात्मनि कार्यकारणभावेन प्रतीयमानम् व्यभिचरद्रूपमेव ; आगमापायित्वात् ; जन्मनः आगमवत्त्वं नाशाच्चापायवत्त्वमिति सार्वजनीनमेतत् इत्यर्थः । अयम् आत्मा तु अनात्मनः सकाशाद् विपरीतः, आगमापायित्वरहितः, यतोऽयं दृशिः, तत्साक्षी । आगमापायि-साक्षित्वादेव तस्य कूटस्थनित्यत्वसिद्धिरित्यर्थः । 'स्वयं दृशिः' इति पाठे, अनन्यायत्तचैतन्यस्वरूपः, न तु घटादिवत् परप्रकाश्य-त्वमात्रेण लब्धसत्ताकः इत्यर्थः ।।५५।।

(मूलम्)

तत्र घटादीनां दृश्यानाम् अनात्मत्वं द्रष्ट्रात्मपूर्वकं प्रत्यक्षेणैव प्रमाणेनोपलभ्य, अनात्मनश्च असाधारणान् धर्मान् अवधार्य, तैर्दृश्यत्वागमापायादिभिर्धर्मैः शरीरेन्द्रियमनोनिश्चयादि-वृत्तीरनात्मतया व्युदस्य, अहंवृत्तिमतोऽपि दृश्यत्वाविशेषात् द्रष्टृपूर्वकत्वमवसीयते । तदेतदाह -

घटादयो यथा लिङ्गं स्युः परम्परयाहमः ।
दृश्यत्वादहमप्येवं लिङ्गं स्याद्द्रष्टुरात्मनः ॥५६॥

(क्लेशापहारिणी)

प्रकरणार्थसंक्षेपः -

अथेदानीं 'दृश्यत्वाद् घटवत्' (३-५४) इत्यत्रोक्तमन्तःकरणस्यानात्मत्वमवष्टभ्य, अहंप्रत्ययगम्यस्याप्यनात्मत्वमुच्यते । तदाह - **तत्रेति** ॥

घटादय इति ॥ घटादयो विषयाः, यथा परम्परया देहेन्द्रियमनोबुद्धिपरम्परया द्रष्टुरहमो दृश्यत्वात् लिङ्गं स्युः, 'देहोऽयं द्रष्टृपूर्वकः, दृश्यत्वात् घटवत्', 'इन्द्रियाणि द्रष्टृपूर्वकाणि, दृश्यत्वात्, देहवत्' इत्येवमादिरीत्या इत्यर्थः । एवम् अहमपि द्रष्टुरात्मनो लिङ्गं स्यात् । अहंप्रत्ययगम्यः स्वव्यतिरिक्तद्रष्टृपूर्वकः, दृश्यत्वात्, बुद्ध्यादिवत् - इत्यनुमाने इत्यर्थः ॥५६॥

---

१३. आत्मा वाक्यैकगम्यः

(मूलम्)

ननु द्रष्टृदर्शनदृश्यानां जाग्रत्स्वप्नसुषुप्तेषु आगमापायदर्शनात् यत्साक्षिकौ तेषामागमापायौ, स आगमापायविभागरहित आत्मा यथा यन्निबन्धनौ जगतः प्रकाशाप्रकाशौ, स प्रकाशाप्रकाशविभागरहितः सूर्य इति । यदा चैवम्, तदा वाक्यावगम्यस्यार्थस्य अनुदितानस्तमितविज्ञानमात्रस्वभावस्य, अनुमानेनैव प्रतिपन्नत्वात् पुनरपि वाक्यस्य निर्विषयत्वप्रसङ्गः । नैष दोषः । लिङ्ग-

व्यवधानेन तत्प्रतिपत्तेः । ननु साक्षादपरोक्षात् आत्मस्वभावेन अनात्मनो हानोपादानयोः संबन्धग्रहणात्, कम् अतिशयं वाक्यं कुर्यात् ?

मैवं वोचः । लिङ्गाधीनत्वात् तत्प्रतिपत्तेः । न हि लिङ्गव्यवधानेनाऽऽत्मप्रतिपत्तिः साक्षात्प्रतिपत्तिर्भवति । 'यमेवैष वृणुते तेन लभ्यः' (का. १-२-२३, मु. ३-२-३) इति श्रुतेः । अत आह -

लिङ्गमस्तित्वनिष्ठत्वान्न स्याद् वाक्यार्थबोधकम् ।
सदसद्व्युत्थितात्मायमतो वाक्यात् प्रतीयते ॥५७॥

(क्लेशापहारिणी)

अनुमानेन न साक्षात्प्रतिपत्तिरात्मनः -

नन्वेवं द्रष्ट्रादीनामागमापायित्वेन तत्साक्षिणोऽन्वयव्यतिरेकाभ्यामेव निष्कर्षे सिद्धे, वाक्यस्य निर्विषयत्वमेव प्राप्नोतीति शङ्कते - **नन्विति** ।। द्रष्ट्रादीनामागमः जाग्रत्स्वप्नयोः । जाग्रति तावत् तत्त्वेन, स्वप्ने च तदाभासत्वेन । तदपायः सुषुप्ते, स्वरूपव्यभिचारात् । एवं च द्रष्ट्राद्यागमापाययोर्यः साक्षी स आगमापायविभागरहितो भवितुमर्हति तन्निबन्धनत्वात् तेषामागमापायप्रतीतेरिति श्लिष्यते । अत्र दृष्टान्तः सूर्यः । यत्स्वरूपभूतप्रकाशसंबन्धतद्वियोगनिबन्धनौ जगतः प्रकाशाप्रकाशौ स प्रकाशाप्रकाशविभागरहितो नित्यप्रकाशः सूर्य इति दृष्टम् । तद्वदेवात्रापि, आत्मन आगमापायराहित्यं सिध्यतीति भावः । यदा चैवं युक्तिरनवद्येत्यनुमन्यते, तदा, अनुमानेनैव यथोक्तेन, आत्मस्वभावे अनुदितानस्तमितविज्ञानमात्रत्वेन निर्धारिते वाक्यस्य निर्विषयत्वमेव पुनरपि प्रसज्यते । यथा मिथ्याज्ञानव्यतिरेकेणाज्ञानाभावात् तत्प्रसङ्ग

आपादितः पूर्वम् (३-६ श्लोकस्य संबन्धोक्तौ) एवमेवानुमानेनैव, साक्षिस्वरूपस्य शक्यनिर्धारणत्वात् वाक्यस्य विषयाभावप्रसङ्ग इहापाद्यत इति पुनःशब्दार्थः ।।

परिहारमाह सिद्धान्ती - **नैष दोषः** इति । वाक्यस्य निर्विषयत्वप्रसङ्गरूपो दोषो नास्ति । कथम् ? लिङ्गव्यवधानेनात्मप्रतिपत्तेः । न हि, अनुमानेन आत्मनः साक्षात्प्रतिपत्तिः समस्तीत्याशयः । एतदेव विशदीकर्तुं शङ्कामुत्थापयति - **नन्विति** । अनात्मनो हानं सुषुप्ते, उपादानं च जाग्रत्स्वप्नयोरिति हानोपादानयोः साक्ष्यत्वेन, आत्मनश्च तत्साक्षित्वेन साक्षादेव साक्षिसाक्ष्यसंबन्धग्रहणात्, इतोऽपि कमतिशयम् आत्मज्ञाने वाक्यं कुर्यात् ? इयमेव हि साक्षात्प्रतिपत्तिर्नामाऽऽत्मनः - इति भावः । समाधत्ते - **मैवं वोचः** इति । कुतः ? लिङ्गाधीनत्वात् तत्प्रतिपत्तेः । अयमाशयः - अनात्मनो हि प्रकाशाप्रकाशौ साक्षात् प्रतिपद्येते नात्मनः । यथा पर्वते धूम एव लिङ्गं साक्षात् प्रतिपद्यते, न तु तत्संबद्धो वन्हिरपि, तद्वत् अत्रापि आत्मप्रतिपत्तिर्न साक्षाद् भवति, किं तु लिङ्गद्वारैव । इदं पूर्वमप्युक्तम् 'बुद्ध्यादीनामनात्मत्वं लिङ्गादपि च सिध्यति । निवृत्तिस्तावता नेतीत्यतो वाक्यं समाश्रयेत् ।।' (३-३३) इति । सदसद्विलक्षणात्मप्रतिपत्तिस्तु समपेक्षिता, सा च वाक्याद् भवति - इति स्वाशयमाविष्कर्तुं पुनरिहाप्युच्यत इति न पौनरुक्त्यम् । साक्षात्कारश्च मोक्षार्थमेष्टव्यः । 'यमेवैष वृणुते तेन लभ्यः' (का. १-२-२३) इति श्रुतेः । अत्र हि श्रुतौ निरन्तरेणानन्यवरणेन आत्मा लभ्यः । 'तस्यैष आत्मा विवृणुते तनूं स्वाम्' तमेव त्वात्मा स्वस्वरूपाविष्कारेणानुगृण्हाति - इत्युच्यते । उक्तार्थे श्लोक आगामीत्याह - **अत आहेति** ।।

लिङ्गमिति ।। अस्तित्वनिष्ठत्वात् अस्त्यात्मा द्रष्ट्राद्यागमापायसाक्षी इत्यात्मसद्भावमात्रे पर्यवसानात् न लिङ्गं वाक्यार्थबोधकं

स्यात् । कीदृशं तर्ह्यात्मानं वाक्यमवबोधयतीति ? तत्राह - **सदसद्व्युत्थितात्मायम्** इति । भावाभावविकल्पशून्यो निर्विशेष आत्मा वाक्यादेव प्रतीयते, तत एवाहमीदृश इति साक्षान्मतिर्जायत इत्यर्थः । न ह्यवस्थात्रयव्यतिरिक्तत्वमात्रबोधकम् 'अस्त्यात्मा अवस्थात्रयातीतः' इत्याकारकं ब्रह्मात्मज्ञानं भवति इत्याशयः । यथोक्तं **संबन्धवार्तिके** 'जाग्रत्स्वप्नसुषुप्तेभ्यो यदि नामातिरेकतः । व्यक्तिभ्यो गोत्ववद्दृष्टं ब्रह्मत्वेऽस्य किमागतम् ॥' (सं. वा. ८५६) इति । अतोऽस्त्यन्यदपि कार्यं वाक्यव्यापारेणेत्यभिप्रायः ॥५७॥

(मूलम्)

ननु यदि व्यावृत्तसदसद्विकल्पजालं वस्त्वभीष्टं वाक्याद् भवतः, तथापि तूत्सार्यते वाक्यविषया तृष्णा । यस्मात्, अन्तरेणापि वाक्यश्रवणं निरस्ताशेषविकल्पम् आगोपालाविपालपण्डितं सुषुप्ते वस्तु सिद्धम् । अतो नार्थो वाक्यश्रवणेन ॥

नैतदेवम् । किं कारणम् ? सर्वानर्थबीजस्य आत्मानवबोधस्य सुषुप्ते संभवात् । यदि हि सुषुप्ते अज्ञानं नाभविष्यत्, अन्तरेणापि वेदान्तवाक्यश्रवणमननिदिध्यासनानि 'अहं ब्रह्मास्मि' इत्यध्यवसायात् सर्वप्राणभृतामपि स्वरसत एव सुषुप्तप्रतिपत्तेः सकलसंसारोच्छित्तिप्रसङ्गः । न च कैवल्यात् पुनरुत्थानं न्याय्यम् । अनिर्मोक्षप्रसङ्गात् । न च 'अन्य एव सुषुप्तः, अन्य एवोत्थितः' इति शक्यं वक्तुम् 'नाद्राक्षमहं सुषुप्तेऽन्यत् किञ्चिदपि' इति उत्थितस्य प्रत्यभिज्ञादर्शनात् । तस्मात्, अवश्यं सुषुप्ते अज्ञानमभ्युपगन्तव्यम् ।

ननु यदि तत्र अज्ञानमभविष्यत्, रागद्वेषघटाज्ञानादिवत्

प्रत्यक्षमभविष्यत् । यथेह लोके 'घटं न जानामि' इत्यज्ञानम् अव्यवहितं प्रत्यक्षम् । अत्रोच्यते । न । अभिव्यञ्जकाभावात् । कथमभिव्यञ्जकाभाव इति चेत्, शृणु -

बाह्यां वृत्तिमनुत्पाद्य व्यक्तिः स्यान्नाहमो यथा ।
नर्तेऽन्तःकरणं तद्वद् ध्वान्तस्य व्यक्तिराञ्जसी ॥५८॥

(क्लेशापहारिणी)

सुषुप्ते निर्विशेषवस्तुज्ञानं नास्ति -

पुनरपि वाक्यस्य निर्विषयतामेव प्रकारान्तरेण चोदयति **नन्विति** ।। यद्यन्वयव्यतिरेकानुमानात् आत्मास्तित्वमात्रं सिध्यति, न तु व्यावृत्तसदसद्विकल्पजालं सर्वविकल्पशून्यम् आत्मवस्तु, तच्च वाक्यादेव सिध्यतीति मन्यसे तदर्थं च यदि वाक्यविषया तृष्णा भवतो भवति, तथापि तु सा तृष्णा प्रकारान्तरेणोत्सार्यते अपनीयते । कथमित्यत आह - **यस्मादिति** । 'आगोपालाविपालपण्डितम्' इति विद्वदविदुषोः सिद्धिः समाना इत्यभिप्रायेण । न हि गोपालादयः स्वप्नेऽति कृतवाक्यश्रवणाः, अथ च तेषां निरस्ताशेषविकल्पम् आत्मवस्तु सिद्धम् इति कृतं वाक्यश्रवणेनेत्यर्थः ।।

तदेतत् प्रतिवक्ति सिद्धान्ती **नैतदेवमिति** ।। इदमत्राकूतम् । सुषुप्ते निर्विकल्पं वस्तु सिद्धम् इति ब्रुवतः कोऽभिप्रायः ? किं निर्विकल्पात्मवस्तु सुषुप्तेऽस्तीति, किं वा तादृशं वस्तु वाक्यश्रवणं विनैव सर्वेषामपि तत्र सुनिश्चितमस्तीति ? यदि तावत् निर्विकल्पं वस्तु तत्रास्तीति, अत्यल्पं तदुच्यते यतः सर्वत्र सर्वदापि निर्विकल्पवस्त्वेव वस्तुतोऽस्ति न द्वितीयमण्वपीत्येवाऽभ्युपगम्यते वेदान्तिभिः । तत्प्रतिपादनार्थमेव हि सर्वेषां वेदान्तानाभारम्भ इति ते वदन्तीति । अथ तादृशं वस्तु तत्रैव निश्चीयत इति । तदसत् । किं कारणम् ?

सर्वानर्थबीजस्य आत्माऽनवबोधस्य सुषुप्ते संभवात् । ननु कथं तत्र तत्संभवः ? तत्राह - **यदि हीति** । नहि कश्चिदपि सुषुप्ते 'अहं ब्रह्मास्मि' इत्यध्यवस्यति ; तेन अवश्यमज्ञानसद्भावस्तत्राभ्युपगन्तव्यो भवतीत्यर्थः । न चाध्यवसायसाधनानि श्रवणादीनि सुषुप्ते सन्ति । तत्र श्रवणं वेदान्तवाक्यस्य, तदर्थनिश्चयार्थमनुरूपस्तर्को मननम्, ताभ्यां श्रवणमननाभ्यामनुसञ्जातः स्वायत्तानुभव एव निदिध्यासनं नाम । तथा हि श्रुतिः 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इति श्रवणादीनि विधत्तेऽध्यवसायकारणत्वेनेति भावः । नन्वध्यवसायोऽप्यभ्युपगम्यताम् अन्तरेणैव श्रवणादिसाधनम् - इत्यनुभवानारूढमेवाभ्युपयन्तं प्रत्याह - **सर्वप्राणभृतामपीति** । सर्वेषामपि शास्त्रचोदनां विनैव सुषुप्तिप्रतिपत्तेः, तन्मात्रेण सकल-संसारोच्छित्तिप्रसङ्गः, संसारहेतोरज्ञानस्य विनाऽऽयासमपायात् इति भावः । ततश्च सुप्तमात्र एव कैवल्यं प्राप्नुयात् इत्यभिप्रायः । अस्तु कैवल्यमपीति वैयात्याद् वदन्तं प्रत्याचष्टे - **न च कैवल्यादिति** । यदि हि कैवल्यं प्राप्तानां पुनः सुषुप्तादुत्थानं स्यात् तर्हि न कस्यचिदा-त्यन्तिकी मुक्तिः स्यादित्याह - **अनिर्मोक्षप्रसङ्गादिति** । ततश्च मोक्षशास्त्रवैयर्थ्यमेव प्रसज्येतेति भावः । ननु च सुषुप्तिं गतस्य मुक्तिरेवेति न तस्य पुनरुत्थानं भवति । तस्माच्च अन्य एवायं सुषुप्तादुत्थित इति कल्प्यते । तथा च नोक्तप्रसङ्ग इति । तत्राह - **न चेति** । 'न च शक्यं वक्तुम्' इत्युक्तम् । तत्कुतः ? - इत्याह **'नाद्राक्षमहं सुषुप्तेऽन्यत्किञ्चिदपीति उत्थितस्य प्रत्यभिज्ञादर्शनात्'** इति । तथा च प्रत्यभिज्ञाबलादेकत्वावगमात् तद्विरुद्धमन्यत्वकल्पनम् इति भावः । तथा हि **बादरायणीयं सूत्रम्** 'स एव तु कर्मानुस्मृति-शब्दविधिभ्यः' (ब्र. सू. ३-२-९) इति । अज्ञानसाधनमुपसंहरति **तस्मादिति** ॥

अन्तःकरणाभावात् सुषुप्तौ अज्ञानानभिव्यक्तिः -

अथाक्षेप्ता सौषुप्ताज्ञानवादेऽनिष्टं प्रसञ्जयति - **ननु यदीति** । यथा घटाज्ञानं प्रत्यक्षं भवति 'घटं न जानामि' इति यथा वा रागद्वेषौ 'अत्राहं रक्तः', 'इदमहं द्वेष्मि' इति, एवं सुषुप्तेऽपि अभविष्यत् इत्यर्थः । 'अव्यवहितम्' इति विशेषणं तु प्रत्यभिज्ञादिव्यपेक्षाराहित्यद्योतनार्थम् । न हि स्वाज्ञानं स्वस्यैव जातुचिद् व्यवहितानुभवयोग्यं भवेत्, येन कालव्यवधानमपेक्षेत - इति भावः ।।

सिद्धान्ती तु प्रत्यक्षानुभवाभावे कारणमाह - **अत्रोच्यते** इति । नाज्ञानमत्र सुषुप्ते प्रत्यक्षं भवति । कुतः ? अभिव्यञ्जकाभावात् । न हि चक्षुर्वृत्त्यादिव्यञ्जकाभावे रूपादेः प्रत्यक्षमभिव्यक्तिर्भवेत् । एवमत्रापीति भावः । अभिव्यञ्जकाभावमेव आक्षेपसमाधानत्वेन श्लोकमवतारयन् स्फोरयति - **'कथम्' इत्यादिना, 'शृणु' इत्यन्तेन ।।**

बाह्यामिति ।। यथा स्वरूपतः स्थितस्यापि अहमः, बाह्यां वृत्तिं घटाद्याकाराम् अनुत्पाद्य न व्यक्तिः स्यात् 'अहमिदं जानामि' इति, एवम् अभिव्यञ्जकम् अन्तःकरणम् ऋते न ध्वान्तस्य अज्ञानस्य आञ्जसी अव्यवहितप्रत्यक्षरूपा व्यक्तिर्भवति । उभयत्राप्यभिव्यञ्जकसापेक्षत्वस्य समानत्वात् इत्यभिप्रायः ।।

सुषुप्तौ अभ्युपगताज्ञानं ज्ञानाभावलक्षणमेव -

इदमत्रानुसंधेयम् - सुषुप्तौ सर्वानर्थबीजत्वेनाभ्युपगतम् अज्ञानं किंरूपम् ? - इतीदं निरूप्यम् । यतोऽत्र ज्ञानाभावसंशयमिथ्याज्ञान-तत्संस्कारेभ्यो व्यतिरिक्तं भावरूपम् अवस्थात्रयेऽपि दण्डायमानम् यत्किञ्चिदेव अव्यक्तादिशब्दवाच्यम् सुषुप्ताववतिष्ठते, तदेव च सर्वस्याप्यध्यासस्योपादानकारणमिति व्याख्यानप्रस्थानान्तरमनुरुन्धानाः **केचिद**भिप्रयन्ति । सोऽयमविद्योपादानभेदवादः प्रागेव ग्रन्थसंबन्धे, अस्मिंश्चाध्याये (३-७) निराकृतोऽस्माभिरिति न पुनस्तस्योज्जी-

वनाशा अत्र भवति । कथं पुनरज्ञानस्याभावमात्ररूपस्य सुषुप्तादुत्थाने कारणत्वमुपपद्यत इति ? अत्र ब्रूमः । नेह वार्तिकप्रस्थाने जाग्रत्स्वप्नयोः सुषुप्तस्य च उपादानोपादेयभावेन कार्यकारणभावः क्वचिदप्याश्रितः, अतः सुषुप्तादुत्थाने किमप्युपादानकारणं मृग्यमिति ग्रन्थकाराशयाननुगुणमेतत् । यावद्धि नात्माज्ञानं वाक्येन निवर्त्यते, तावत् अवस्थात्रयवानहम् इति मिथ्याज्ञानमनुवर्तत एव, तत्र कोऽयमुपादानकारणान्वेषणे वृथा श्रमः ? तथा ह्युक्तं **बृहद्वार्तिके** 'नास्य स्वापः प्रबोधो वा कुतः स्वप्नस्य संभवः । प्रत्यक्स्वभाव एवास्य जाग्रत्स्वप्नसुषुप्तयः ।। सुप्तः प्रबुद्ध इत्येवं स्वप्नं पश्यति चेति यः । विकल्प एष भूतानामविद्यारात्रिशायिनाम् ।।' (बृ. वा. २-१-२६४, २६५) इति ।।

किञ्च, सुषुप्ते सत्संपत्तिं ब्रुवाणा श्रुतिः, संपत्तिज्ञानाभावे एकत्वमेव कारणम् - इत्याह मधुदृष्टान्तेन, न तु भावरूपाज्ञानसत्त्वम् । तद् यथा 'यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां रसं गमयन्ति ।। ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति ।।' (छां. ६-९-१, २) इति ; सद्रूपत्वज्ञानाभावमेव च सुषुप्तादुत्थाने निमित्तमिति चाह श्रुतिः 'त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा मशको वा यद्यद्भवन्ति तदा भवन्ति' (छां. ६-९-३) इति । भाष्यकारश्चैवमर्थत्वेनैव श्रुतिं व्याकरोत् 'यस्माच्चैवम् आत्मनः सद्रूपत्वम् अज्ञात्वैव सत्सम्पद्यन्ते, अतस्ते इह लोके यत्कर्मनिमित्तां यां यां जातिं प्रतिपन्ना आसुर्व्याघ्रादीनाम्, व्याघ्रोऽहं सिंहोऽहम् इत्येवम् ते तत्कर्मज्ञानवासनाङ्किताः सन्तः सत्प्रविष्टा अपि तद्भावेनैव पुनराभवन्ति पुनः सत आगत्य' ।।

(छां. भा. ६-९-३) इति । अतो ज्ञानाभावलक्षणाज्ञानवादेऽपि सर्वं सङ्गच्छत इति नात्राश्रुतचरं भावाज्ञानमाह्वातव्यमिति ।।५८।।

---

१४. अहंज्ञात्रोर्विवेके आक्षेपसमाधाने

(मूलम्)

कश्चिदतिक्रान्तं प्रतिस्मृत्य 'दृश्यत्वादहमप्येवं लिङ्गं स्याद् द्रष्टुरात्मनः' (३-५६) इति निर्युक्तिकम् अभिहितम् - इत्याह । किं कारणम् ? अहंतज्ज्ञात्रोर्विवेकाप्रसिद्धेः । यथा इह घटदेवदत्तयोः ग्राह्यग्राहकत्वेन स्फुटतरो विभागः प्रसिद्धो लोके, न तथा इह अहंतज्ज्ञात्रोर्विभागोऽस्ति । तस्मात्, असाध्वेतदभिहितमिति । अत्रोच्यते -

दाह्यदाहकतैकत्र यथा स्याद् वन्हिदारुणोः ।
ज्ञेयज्ञातृकतैवं स्यादहंज्ञात्रोः परस्परम्　　।।५९।।

(क्लेशापहारिणी)

अहंज्ञात्रोः एकत्र प्रतीतिः नायुक्ता -

एवं तावत् अहङ्कारस्य, स्वज्ञातारमात्मानं प्रति लिङ्गत्वमुक्तं दृश्यत्वाविशेषाद् घटादिवदिति । अन्वयव्यतिरेकमात्राद् न कथञ्चिदपि वाक्यमन्तरेण निर्विकल्पात्मप्रतिपत्तिरस्तीत्युक्तं प्रसङ्गागताक्षेपपरिहारेण । अथ प्रकृतमेवाहङ्कारलिङ्गत्वमधिकृत्य शङ्कान्तरमुद्भाव्य व्यपनीयत इत्याह - **कश्चिदिति** ।। यथेह लोके घटदेवदत्तयोः 'अहं घटं गृण्हामि' इति स्फुटतरो विभागोऽनुभूयते घटस्य ग्राह्यत्वेन

पराक्त्वम्, देवदत्तस्य ग्राहकत्वेन प्रत्यक्त्वं च, न तथेह दार्ष्टान्तिके अहंतज्ज्ञात्रोर्विभागोऽनुभूयते । 'अहमेव मां जानामि' इति ह्यनुभवः, न त्वहमो व्यतिरिक्तः कश्चिज्ज्ञाता स्फुटतरं विभक्तोऽस्ति घटाद्व्यतिरिक्त इव । अतो 'दृश्यत्वादहमप्येवम्' इति न साधूक्तमिति शङ्का । न हि स्वयमेव स्वस्यैव लिङ्गम्, स्वयमेव च स्वस्माद्विभक्तो ज्ञाता इति च श्लिष्टं भवेत् - इति भावः ।।

सिद्धान्ती तु शङ्कापरिहारार्थं श्लोकमवतारयन्नाह - **अत्रोच्यते** इति ।।

दाह्यदाहकतैकत्रेति ।। अयमाशयः - नायमस्ति नियमः, कर्तृकर्मणोः स्फुटतरविभागप्रसिद्ध्यैव भाव्यं सर्वत्रेति । वन्हिदारुणोः, दहनक्रियाकर्तृकर्मणोरुभयोरप्येकत्रैव दर्शनात् । तस्मात्, अहंज्ञात्रोर्ज्ञेयत्वेन ज्ञातृत्वेन च पृथग्विभागस्य अप्रसिद्धावपि तयोर्ज्ञेयज्ञातृभावो न विरुद्धः । दृष्टान्तबलेनैव प्रत्यवतिष्ठमानस्य दृष्टान्तबलेनैव परिहारोऽयमभिप्रेतः । सुषुप्तादावहङ्कार-व्यभिचारोऽपि हीह शक्य उदाहर्तुम् । उक्तं चेदम् 'आत्मनश्चेदहं धर्मः' (२-३२) इत्यत्रेत्यनुसंधेयम् ।।५९।।

(मूलम्)

एवं तावदविद्योत्थस्य अन्तःकरणस्य बाह्यविषयनिमित्तरूपा-वच्छेदाय अहंवृत्तिर्व्याप्रियते । तया अवच्छिन्नं सत् कूटस्थप्रत्य-गात्मोपादानावबोधरूपस्य अव्यवधानतया विषयभावं प्रतिपद्यत इति । तत्र तयोर्ज्ञात्रहन्तारूपयोरवभासकावभास्यत्वसंबन्धव्यति-रेकेण नान्यत् संबन्धान्तरम् उपपद्यते । अहंतारूपं तु आत्मसात्कृत्वा अहंकञ्चुकं परिधाय उपकार्यत्वापकार्यत्वक्षमः सन्[1] बाह्यविषयेण

1. 'उपकार्यत्वोपकारकत्वक्षमः सन्' इति मुद्रितपाठ एवं परिवर्तितः ।।

उपकारिणा अपकारिणा वा आत्मात्मीयं संबन्धं प्रतिपद्यते - तदभिधीयते -

इदंज्ञानं भवेज्ज्ञातुर्ममज्ञानं तथाहमः ।
अज्ञानोपाधिनेदं स्याद्विक्रियातोऽहमो मम ॥६०॥

(क्लेशापहारिणी)

इदंज्ञानं ज्ञातुः, ममज्ञानं तु अहमः -

एवं तावदहंतज्ज्ञात्रोर्विवेकं प्रसाध्याथेदानीम् अहंधर्मवत् ज्ञातृत्वमप्याविद्यकमेवेत्येतज्ज्ञापयिष्यन् आत्मनो ज्ञातृत्वाहंत्वरूपयोरुपाधिभेदप्रयुक्तत्वं तावद्दर्शयिष्यामीत्याह - **एवं तावदिति** ॥ अविद्योत्थस्यान्तःकरणस्य अहंवृत्तिः बाह्यविषयनिमित्तरूपावच्छेदाय व्याप्रियते । बाह्यो विषयः शब्दादिः तन्निमित्तं यद्रूपम्, तत्तदाकारेण परिणामः ; तेन रूपेण अवच्छेदाय शब्दादिरूपपरिच्छित्त्यै व्याप्रियते । बाह्यविषयलक्षणं यन्निमित्तम् तद्रूपात्वच्छेदाय - इति वा योजना । वर्णितरीत्या विषयपरिच्छेदमात्रम् अहंवृत्तिव्यापारफलं चेत्, तस्य ज्ञातृत्वं कथं भवेत् ? न हि जडस्याहमः ज्ञानप्रकाशवत्त्वं समस्ति, तत्राह - **तयावच्छिन्नं सदिति** । बाह्यविषयलक्षणशब्दादिनिमित्तविशेषणमेतत् । उक्तविधया अहंवृत्त्या परिच्छिन्नं सद् बाह्यं वस्तु, कूटस्थप्रत्यगात्मोपादानावबोधरूपस्य, ज्ञातुः इत्यर्थः । स हि ज्ञाता कूटस्थप्रत्यगात्मतदज्ञानचिदाभासैर्नेद्यः । यथोक्तं **बृहद्वार्तिके** 'चिदाभासैकमात्रेण तमः सिद्धिर्न मातृतः । संवित्तन्मोहचिद्बिम्बैः प्रात्यक्ष्यं कर्तृरूपिणः ॥' (बृ. वा. ३-४-१०५) इति । स एव च ज्ञानादिवृत्त्याश्रयः । तदुक्तम् 'स्मृतिर्निश्चितिसंशीतिरागादिहिरुगात्मसु । अहंरूपेण योऽन्वेति स प्रमाता परो मतः' (बा. वा. ३-४-१०६) इति । अहंवृत्तेरव्यवधानतया ज्ञातृविषयत्वात्, तदवच्छिन्नबाह्यविषयरूपस्यापि

तद्विषयत्वम् इति भावेनोक्तम् अवबोधरूपस्याव्यवधानतया विषयभावं प्रतिपद्यत इति । 'अहमिदं जानामि' इति घटादिबाह्यवस्तुज्ञानम् अहंवृत्तिद्वारा ज्ञातुरव्यवहितप्रत्यक्षं भवतीत्युक्तं भवति ॥

ज्ञातुरहंविषयकं ज्ञानमपि संबन्धान्तरद्वारकमेव किं न स्यात्, अव्यवहितमेवेति कुतोऽवसीयते ? इत्याशङ्क्य यथा अहंवृत्तिर्बाह्यवस्तुरूपपरिच्छेदाय इन्द्रियादिद्वारेण निर्गतैव व्याप्रियते संबन्धान्तरनिदानं च भवति, नैवमत्राहङ्कारकर्मको विशेषरूपेण परिच्छेदोऽपेक्षितः, किं तु तदवभासकत्वमात्रं तद्विषयीकरणम् । अतो वैषम्यम् इति भावेनाह - **तत्र तयोरिति** । तत्र ज्ञात्रहन्तासंबन्धज्ञातृबाह्यविषयसंबन्धयोर्मध्ये पूर्वत्र ज्ञात्रहन्तयोरवभासकावभास्यत्वसंबन्धमन्तरेण नान्यः संबन्ध उपपद्यत इत्यर्थः । किं तर्हि तत् संबन्धान्तरं ज्ञातृबाह्यविषययोः यदर्थमहंवृत्तिर्द्वारीक्रियते ? तत्राह - **अहंतारूपं त्विति** । स एव ज्ञाता अहंतारूपम् आत्मसात्कृत्वा तदध्यासेन तत्तादात्म्यं गत्वा अहंकञ्चुकं परिधाय अहंप्रत्ययाश्रयस्तद्विषयश्च भूत्वा उपकार्यत्वापकार्यत्वक्षमः सन् - न ह्यहमुपाधिमन्तरेण इष्टानिष्टत्वबुद्धिर्बहिर्विषयेषु भवति; यथोक्तं **शारीरकभाष्ये** 'तेनैव ह्यहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते तत्फलं च स एवाश्नाति' (सू. भा. १-१-४) इति - यदैव चैवमुपकार्यत्वापकार्यत्वयोग्यो भवति तदैव, बाह्यविषयेणोपकारिणा अपकारिणा वा आत्मात्मीयं संबन्धं स्वस्वामिभावसंबन्धम् 'अहम्, मम' इत्याकारकं प्रतिपद्यते । तदेतदुत्तरश्लोकेनोच्यत इत्याह - **तदभिधीयत इति** ॥

इदं ज्ञानमिति ॥ ज्ञातुः अहंविषये इदंज्ञानं भवेत्, तथा अहमः, तस्यैव अहङ्कारापन्नस्य ममज्ञानं भवेत् । किं पुनरेवं ज्ञानद्वैविध्ये प्रयोजकमिति ? उच्यते - अज्ञानोपाधिना अहंवियुक्तकेवलाज्ञानरूपोपाधिना चिदाभाससहितेन, ज्ञातृत्वेन - इत्यर्थः । अज्ञाननिमित्तं

ज्ञातृत्वं ज्ञेये इदमाकारवत्त्वमपेक्षते । विक्रियातः, अहमस्तत्त-द्विषयकृतसुखदुःखभोगरूपविकारेण ममज्ञानम् 'ममेदमुपकारि', 'ममेदमपकारि' इत्याकारकं ज्ञानं स्यादित्यर्थः ।।६०।।

(मूलम्)

एकस्यैव ज्ञातुः, अन्तर्बाह्यनिमित्तभेदात् अभिन्नेऽपि विषये 'इदम्', 'मम' - इति ज्ञानद्वैरूप्यं जायत इत्युक्तम् । अत्र उपक्रिय-माणापक्रियमाणस्यैव ज्ञातुर्विषये ममप्रत्ययो भवति । विपर्यये च इदंप्रत्ययः - इति कथमवगम्यते ? अवगम्यताम् अन्वय-व्यतिरेकाभ्याम् । तत् कथमिति ? आह -

अनुपक्रियमाणत्वान्न ज्ञातुः स्यादहं मम ।
घटादिवदिदं तु स्यान्मोहमात्रव्यपाश्रयात् ।।६१।।

(क्लेशापहारिणी)

एकत्रैव अज्ञानोपाधिकेन इदंज्ञानम्, अहङ्कारेण तु ममज्ञानम् -

उक्तविषये प्रमाणं विवक्षुः, वृत्तग्रन्थाभिप्रायानुवादसमर्थं प्रश्न-मुत्थापयति - **एकस्यैवेति** ।। एकस्यैव ज्ञातुः, अन्तर्बाह्यनिमित्तभेदात् अन्तरज्ञानोत्थज्ञातृत्वनिमित्तात्, बहिश्चाहंरूपस्वीकारेण अहमो विकाररूपनिमित्तात् इत्यर्थः । अज्ञानतो ज्ञातृत्वमापन्नस्यैव ह्यहंविकारतो भोक्तृत्वं भवतीति अज्ञानोपाधेरान्तरत्वम् अहंविकारस्य च बाह्यत्वम् इति ज्ञेयम् । अभिन्नेऽपि घटादौ विषये अज्ञानोत्थकेवलज्ञातृत्वोपाधिना हेतुना इदंज्ञानम्, अहंविकारोपाधिना च ममज्ञानम् इति ज्ञानद्वैरूप्यं जायते, द्विधाभिन्नं ज्ञानम् उत्पद्यते इत्युक्तम् इत्यर्थः ।।

सत्यमुक्तम्, अतः किम् ? तत्राह - **अत्रेति** । अत्र इदंममज्ञानयोर्मध्ये घटादौ ममप्रत्ययः, उपक्रियमाणापक्रियमाणस्यै-वाहंकञ्चुकस्य सतो ज्ञातुर्भवति, विपर्यये च उपक्रियमाणत्वादिराहित्ये

सति केवलाज्ञानोपाधिमत्वे तु इदंप्रत्ययः - इति कथमवगम्यते ? - इति प्रश्नः । यद्यप्यहङ्कारे 'इदम्' इत्युल्लिखितेदंप्रत्ययगम्यत्वं नैवास्ति, तथापि पूर्वश्लोकसंबन्धोक्त्यभिहितरीत्या ज्ञात्रवभास्यत्वमेवात्रेदंप्रत्ययविषयत्वमिति प्रश्नप्रतिवचनयोर्विवक्षितम् । घटादौ तु 'अयं घटः' इत्युल्लिखितेदंप्रत्ययगम्यत्वमपि भवति, वृत्तिपरिच्छिन्नत्वात् - इत्यदोषः ॥

उत्तरमाह सिद्धान्ती - **अवगम्यतामन्वयव्यतिरेकाभ्यामिति** । उपकार्यत्वादिसत्त्वे ममबुद्ध्यन्वयः, तदभावे च तद्व्यतिरेकः इत्यतः यथोक्तार्थोऽवगम्यत इत्यर्थः । श्लोकमवतारयति प्रश्नोत्थापनपूर्वकम् - **तत्कथमिति ? आह** - इति ॥ अस्य प्रश्नस्योत्तरं श्लोकेनाहेत्यर्थः ॥

अनुपक्रियमाणत्वादिति ॥ ज्ञातुः अहङ्कारेणानुपक्रियमाणत्वात् । उपलक्षणमिदम्, अनपक्रियमाणत्वाच्च - इत्यपि द्रष्टव्यम् । तस्य घटादिवन्न मम स्यात्, ममज्ञानविषयो न भवतीत्यर्थः । मोहमात्रव्यपाश्रयात् अज्ञानमात्रोपाधिकत्वात्, इदं तु स्यात्, यथोक्तरीत्या इदंज्ञानविषयत्वमेव तस्य स्यादित्यर्थः । मोहमात्रेत्यनेन उपक्रियमाणत्वादिरेव व्यावर्त्यते न तूपाध्यन्तरम्, चिदाभासव्यपाश्रयस्यापीष्टत्वात् इति ध्येयम् । तदेवम् उपक्रियमाणत्वापक्रियमाणत्वयुक्तत्वादेव ज्ञातुर्घटादौ ममताज्ञानं भवतीत्यन्वयः, तद्वियुक्तत्वात्त्वहङ्कारे न ममताज्ञानम्, किं तर्हि, इदंताज्ञानमेवेति व्यतिरेकश्च स्फुट इति भावः ॥६१॥

(मूलम्)

मोहतत्कार्याश्रयत्वात्, ज्ञातृत्वविक्रिययोः पूर्वत्र इदंममज्ञानाश्रयः प्रदर्शितः । अथाधुना तद्व्यतिरेकेण व्यतिरेकप्रदर्शनार्थमाह -

विक्रियाज्ञानशून्यत्वान्नेदं न च ममात्मनः ।
उत्थितस्य सतो ज्ञानं नाहमज्ञासिषं यतः ॥६२॥

(क्लेशापहारिणी)

इदंममविवेकः - व्यतिरेकप्रदर्शनम् -

इदंममज्ञानयोर्ज्ञातृत्वाहंविक्रिये एव प्रयोजके इत्यन्वयमुखेनोक्तं व्यतिरेकमुखेन द्रढयति । तदाह - **मोहतत्कार्याश्रयत्वादिति** ।। ज्ञातृत्वस्य मोहाश्रयत्वात्, विक्रियायाः, मोहकार्यान्तःकरणाश्रयत्वाच्च, ज्ञातृत्वे सतीदंज्ञानान्वयः, अहंविक्रियायां च सत्यां ममज्ञानान्वयश्च पूर्वत्र 'इदंज्ञानम्' इत्यादिग्रन्थे प्रदर्शित इत्यर्थः । अथोत्तरश्लोके किं प्रदर्श्यते ? तदाह - **अथाधुनेति** । अथेदानीं तद्व्यतिरेकेण तयोर्ज्ञातृत्वाहंविक्रिययोर्व्यतिरेकेण यथोक्तज्ञानयोर्व्यतिरेकप्रदर्शनार्थम् आहेत्यर्थः ।।

विक्रियाज्ञानशून्यत्वादिति ।। अत्र विक्रियाशब्देन विषयभोगकृतसुखदुःखानुभवरूपो विकारो विवक्षितः, ज्ञानशब्देन च ज्ञातृत्वम् । प्रकृतत्वात् । अथवा विक्रियाशून्यत्वात्, अज्ञानशून्यत्वाच्च इत्येव छेदः । अस्मिंस्तु पक्षे, अज्ञानोत्थज्ञातृत्वोपाधिशून्यत्वात् इत्यर्थः । **सुषुप्तौ** अहङ्कारगतविक्रियाभावात् न ममज्ञानम् ज्ञातृत्वाभावाच्च नेदं ज्ञानं भवतीत्यर्थः । ननु तत्रावस्थायाम् इदंज्ञानम्, ममज्ञानं वा नास्तीति कथं गम्यते, तत्राह - **यतः**, 'नाहमज्ञासिषं किञ्चिदपि सुषुप्ते' इति सुप्तोत्थितस्य ज्ञानं भवति । न त्विदमहमज्ञासिषमिति । न च ज्ञातृत्वाहन्ताशून्यमात्मस्वरूपमेव नास्तीति, सुषुप्तौ सर्वविधज्ञानाभावेन आत्मापि तत्र नासीदेवेति वा शङ्कितुं शक्यते, ज्ञातृत्वाहंताशून्यसाक्षिस्वरूपस्यैवात्मनस्तत्र सत्त्वात् । उक्तपरामर्शस्यैव तत्र मानत्वात् । तदुक्तं **बृहद्वार्तिके** 'निष्क्रियश्चेतनः साक्षी सक्रियोऽचेतनः पराङ् । व्यावृत्तश्च प्रमात्रादेः सिद्धः साक्षी सुषुप्तगः ।। न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते । नावेदिषं सुषुप्तेऽहमिति धीः किंबलाद् भवेत् ।। बुद्ध्यादेः प्रविलीनत्वाद्देहादेश्च जडत्वतः ।

लोष्टादेरिव नैव स्यान्नाज्ञासिषमितीक्षणम् ।। (बृ. वा. ३-४-१०२, १०३, १०४) इति ।।

अत्रैकदेशीयव्याख्यानम् -

अत्र **केचित्** विक्रियाशून्यत्वात् अज्ञानशून्यत्वाच्च - इति व्याख्याय, ननु कथमज्ञानशून्यत्वम्, सुषुप्तेऽप्यज्ञानस्य साधितत्वात् ? - इति च शङ्कामुत्थाप्य तत्र अज्ञोऽहम्' इति स्फुटतरव्यवहाराभावात्तथोच्यत इति समादधुः । तदिदमसंबद्धमानीय कुचोद्यतत्परिहारान्वेषणमिति नः प्रतिभाति । यत्कारणम् अज्ञानान्वये इदंज्ञानान्वयो नैवात्र प्रकृतः, किं तु ज्ञातृत्वान्वये तदन्वयः । अतस्तद्व्यतिरेक एवात्र प्रदर्शनीयो नाज्ञानव्यतिरेकः । सुषुप्तौ सिषाधयिषितस्य साक्षित्वस्याप्यज्ञानकल्पितत्वात्, अत एव हि **द्वितीयाध्याये** (२-५८) ज्ञातृत्वोपाधिमात्मानमाश्रित्याहङ्कारस्यानात्मत्वं प्रतिपाद्य तदन्वविद्यापरिकल्पितं साक्षित्वमाश्रित्य ज्ञातृत्वाद्यपि प्रतिषिद्धम् । 'अज्ञानोपाधिनेदं स्यात्' इति तु अहङ्कारवियुक्तकेवलाज्ञानोत्थज्ञातृत्वग्रहणार्थम्, न पुनस्तस्यैवेदंज्ञानप्रयोजकत्वावधारणार्थम् - इत्यन्यदेतत् । अपि च, अज्ञानव्यतिरेकार्थमुदाहृतस्य सुषुप्तस्यापि 'न किञ्चिदज्ञासिषम्' इति सुप्तोत्थितपरामर्शोदाहरणेनापि अज्ञानान्वय एव भवति न त्वज्ञानव्यतिरेक इत्यहो मूलोच्छेदिव्याख्यानकौशलम् ! तस्मात्, मूलग्रन्थसंदर्भानालोचनादेव व्याख्यातॄणामत्राज्ञानान्वयव्यतिरेकविचारावतरणम्, ग्रन्थे व्याहतवचनदोषोद्भावनं चेति नायं पन्थाः । तस्मात्, अहंविक्रियाज्ञातृत्वयोरेव व्यतिरेकोऽत्र दिदर्शयिषितः, तथैव च व्याख्यातमस्माभिरित्यलं पल्लवितेन ।।६२।।

---

१५. श्रुत्यनुगृहीतान्वयव्यतिरेकोपसंहारः

(मूलम्)

आत्मानात्मविवेकस्य इयत्ताप्रदर्शनार्थमाह -

वाक्यप्रत्यक्षमानाभ्यामियानर्थः प्रतीयते ।
अनर्थकृत्तमोहानिर्वाक्यादेव सदात्मनः ॥६३॥

(क्लेशापहारिणी)

अन्वयव्यतिरेकस्य इयत्तादर्शनम् -

प्रमात्रन्तसर्वानात्मविविक्तसाक्षिसिद्धिपर्यन्तमेवान्वयव्यतिरेकफलम् इत्युपसंहरन्, उत्तरश्लोकमवतारयति - **आत्मानात्मेति** ॥

वाक्यप्रत्यक्षमानाभ्याम् इति । वाक्यम् अन्वयव्यतिरेकानुग्राहकम् 'य एषोऽक्षिणि पुरुषः' (छां. ८-७-४), 'अथ यो वेदेदं जिघ्राणीति' (छां. ८-१२-४), 'योऽयं विज्ञानमयः प्राणेषु' (बृ. ४-३-७) - इत्यादि प्रागुदाहृतम् ; प्रत्यक्षं चान्वयव्यतिरेकाभ्याम् आत्मानात्मविवेकरूपम् अनुभवनम् । ताभ्याम् इयानर्थः सर्वानात्मविविक्तः साक्ष्यात्मा प्रतीयते विज्ञायते । अत ऊर्ध्वं सदात्मनः अद्वितीयप्रत्यगात्मनः, अनर्थकृत्तमोहानिः, अनर्थानां प्रमातृताप्रमुखानां कर्तृ यत् तमः, तस्य हानिः, विनिवृत्तिः, वाक्यादेव भवति । न तु तत्रान्वयव्यतिरेकन्यायः प्रगल्भत इत्यर्थः ॥६३॥

---

१६. वाक्यादेव तमोहानिः

(मूलम्)

द्वितीयाध्यायादौ श्रोतृचतुष्टयमुपन्यस्तम् । तत्र कृत्स्नानात्मनिवृत्तौ

सत्यां यः प्रत्यगात्मन्यवाक्यार्थतां प्रतिपद्यते, स क्षपिताशेषान्तराय-हेतुरिति न तं प्रति वक्तव्यं किञ्चिदपि अवशिष्यते । योऽपि वाक्यश्रवणमात्रादेव प्रतिपद्यते, तस्यापि अतीन्द्रियशक्तिमत्त्वात् न किञ्चिदप्यपेक्षितव्यमस्ति । यश्च श्रावितत्त्वमस्यादिवाक्यः स्वयमेवान्वयव्यतिरेकौ कृत्वा तदवसान एव वाक्यार्थं प्रतिपद्यते असावपि यथार्थं प्रतिपन्न इति पूर्ववदेवोपेक्षितव्यः । यः पुनः, अन्वव्यतिरेकौ कारयित्वापि पुनः पुनर्वाक्यं श्राव्यते यथाभूतार्थ-प्रतिपत्तये, तस्य कृतान्वयव्यतिरेकस्य सतः कथं वाक्यं श्राव्यत इति ? उच्यते -

नवसङ्ख्याहृतज्ञानो दशमो विभ्रमाद् यथा ।
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥६४॥

(क्लेशापहारिणी)

वाक्यार्थश्रावणे अधिकारी -

अथ वाक्यादविद्याहानिं वक्तुकामः, तत्र वाक्यार्थश्रावणे विषयभूतं विशिष्टाधिकारिणं निर्देष्टुं द्वितीयाध्यायादौ (२-२, ३) उक्तं श्रोतृ-चतुष्टयं तावदनुस्मारयति - **द्वितीयाध्यायादाविति** ॥ तत्र यथास्मारितेषु चतुर्षु (१) यः कृत्स्नानात्मनिवृत्तौ सत्याम् अनात्मन्य-शेषेणानृतत्वेनानात्मत्वेन च बाधिते सति प्रत्यगात्मनि सर्वान्तरे एव स्वात्मनि अवाक्यार्थत्तां प्रतिपद्यते वाक्यागोचरनिर्विशेषाद्वयात्मत्वं प्रतिपद्यते, स क्षपिताशेषान्तरायहेतुः, न तस्यात्मज्ञानप्रतिबन्धः समस्ति इत्यतः न तं प्रति वक्तव्यं किञ्चिदपि अवशिष्यते ; कृतकृत्यः सः इति न तत्र वाक्येन कर्तव्यमस्ति । (२) योऽपि सकृद् वाक्यश्रवणमात्रादेव पिशाचकवत् अवाक्यार्थतां प्रतिपद्यते, तस्यातीन्द्रियशक्तिमत्त्वात्,

प्रत्यक्प्रवणबुद्धित्वात् विनैव श्रवणाभ्यासम् आत्मतत्त्ववेदनं भवत्येवेत्यतः, न किञ्चित् सकृच्छ्रवणात् अन्यत्र अपेक्षितव्यमस्ति (३) यश्च श्रावितत्त्वमस्यादिवाक्यः, श्रुत्यनुगृहीतान्वयव्यतिरेकानुसंधानमनपेक्ष्य तर्कपूर्वकं प्रतिपद्यते, असावपि विनैवाधिकं यत्नं यथार्थं प्रतिपन्नः ज्ञातवान् इत्यतः पूर्ववदेव, पूर्वोदीरितपुरुषद्वयवदेव उपेक्षितव्यः, न यत्नान्तरं कर्तव्यं तत्कृते इत्यर्थः ।।

तदेवम् उत्तममध्यमाधिकारिणोः कृतपदार्थविवेकत्वाद् वाक्यार्थप्रतिपत्तौ न कोऽपि प्रतिबन्धोऽवशिष्यत इति तौ प्रति नैव यत्नः कार्यः । (४) यः पुनरन्वयव्यतिरेकौ श्रुत्यनुगृहीतनीत्या कारितोऽपि न वाक्यार्थं प्रतिपद्यते, बहिर्मुखत्वादेव, तस्य वाक्येन किं क्रियत इत्येतदधुना उच्यते समनन्तरश्लोकेनेत्याह - **कथं वाक्यं श्राव्यत इति ? उच्यते** - इति । अत्र कथं श्राव्यत इति श्रावणप्रकारो न पृच्छ्यते, वाक्यश्रवणं कृत्वा, श्रुत्यनुगृहीतान्वयव्यतिरेकप्रसादाल्लब्धात्मानात्मविवेकज्ञानत्वात्, किं तर्हि, तस्य विषये कोऽपरः प्रतिबन्धोऽवशिष्यते, येन तस्य पुनरपि वाक्यश्रावणमपेक्ष्येत ? - इति प्रश्नाभिप्रायः । अवशिष्टं प्रतिबन्धं दृष्टान्तमुखेनोद्घाटयितुमेव समनन्तरश्लोक इति भावेनाह - **उच्यत इति** ।।

वाक्यार्थकृत्ये दृष्टान्तः -

नवसङ्ख्याहृतज्ञान इति ।। यथा प्रकृतदशसङ्ख्यापूरणं स्वात्मानमेव बाह्यनवसङ्ख्येयजनगणनव्यासक्तत्वात् नवसङ्ख्यापहृतसम्यग्ज्ञानः, तान् नवसङ्ख्याकान् वीक्षमाणोऽपि तत एवाऽऽत्मनो दशमत्वसिद्धावपीत्यर्थः । 'दशमोऽस्मि' इति न वेत्ति, विभ्रमात् । वस्तुतस्तु तस्य दशमत्वसिद्धौ नान्यत् किमप्यपेक्षितव्यमस्ति इत्यभिप्रायः । यथा लोकप्रसिद्धाख्यायिकायाम् दश माणवकाः अतिमन्दबुद्धयो नदीं तीर्त्वा सर्वे वयं पारं तीर्णा वा न वा - इति संशयानाः प्रत्येकं

स्वातिरिक्तानेव नव बाह्यान् माणवकान् गणयन्तः दशमं त्ववीक्षमाणाः शोचन्ति स्म 'नष्टो दशमः कश्चिदस्माकं मध्ये' इति । तत्र दशमस्य वस्तुतो बाह्यान् नव वीक्षमाणस्यैव स्वस्मिन् दशमत्वेन शक्य-निर्धारणेऽपि 'अहमस्मि दशमः' इति ज्ञानं न जातम्, एवमत्रापि बाह्यानात्मापहृतज्ञानत्वादेवात्मन्यात्मत्वमतिर्न जातेति भावः ॥६४॥

(मूलम्)

अथ दृष्टान्तगतमर्थं दार्ष्टान्तिकार्थे समर्पयिष्यन्नाह -

अपविद्धद्वयोऽप्येवं तत्त्वमस्यादिना विना ।
वेत्ति नैकलमात्मानं नान्वेष्यं चात्र कारणम् ॥६५॥

(क्लेशापहारिणी)

दार्ष्टान्तिकेन समन्वयः -

अथेति ॥ दृष्टान्तगतमर्थं प्रकृते दार्ष्टान्तिके संगमयत्युत्तर-श्लोकेन ॥

अपविद्धद्वयोऽपि इति ॥ अन्वयव्यतिरेकाभ्यां निवृत्तद्वैतोऽपि, एवम् आख्यायिकागतदशमवत् एकलम् अद्वितीयमात्मानं तत्त्वमस्यादिना वाक्येन श्रावितेन विना न वेत्ति । नित्यनिवृत्ताविद्यस्यापि वाक्यादेवाविद्यानिवृत्तिरपेक्ष्यते इत्यर्थः । ननु कथमपविद्धद्वय इति सहसैवोच्यते ? यावता कृतान्वयव्यतिरेकस्याप्यात्मनः सकाशात् अविद्यातदुत्थान्तःकरणादिकं द्वितीयमस्त्येवेत्यवधारितम् । अविद्या हि सर्वानर्थबीजभूता सुषुप्तेऽप्यस्तीत्युक्तम् (३-५८), तदुत्थज्ञातृत्वा-हन्तादिरूपं च द्वैतं जाग्रत्स्वप्नयोः । तत् कथमपविद्धद्वयत्वम्, कथं वा वाक्यज्ञानात् तन्निवृत्तिरिति ? अथ कथञ्चिन्निवृत्ताविद्य एवासौ, अतोऽपविद्धद्वयोऽपीत्युच्यते, ततः कथं निवर्त्याविद्याया अभावेऽपि वाक्यज्ञानापेक्षेति ? तत्राह - **नान्वेष्यं तत्र कारणमिति** । कारणं

विनैव दशमत्वोपदेशकवाक्याकाङ्क्षणवत् अस्यापि वेदान्तवाक्योपदेशकाङ्क्षणम् इत्यभिप्रायः ॥६५॥

(मूलम्)

'नान्वेष्यं चात्र कारणम्' इत्युक्तम् । तत् कस्मात् ? - इति चोदिते प्रत्याह अन्वेषणासहिष्णुत्वात् । तत् कथमिति ? आह -

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी ।
सहते न विचारं सा तमो यद्वद्दिवाकरम् ॥६६॥

(क्लेशापहारिणी)

अविद्याया विचारासहिष्णुत्वम् -

अविद्या स्वविषये कञ्चिदपि विचारं न सहते । अत्यल्पमिदं पृच्छ्यते कथं निवृत्तद्वयोऽप्यविद्यानिवृत्तिं काङ्क्षत इति - इति वक्तुं प्रश्नोत्तरत्वेन श्लोकमवतारयति - **नान्वेष्यमिति** ॥

सेयमिति ॥ सेयमविद्या भ्रान्तिर्निरालम्बा, न किञ्चिदपि स्वरूपत्वेन आलम्बते बालकल्पिततमःपिशाचवत् इत्यर्थः । सर्वन्यायविरोधिनी । अविद्यमानैव कथं प्रतीयते ? तमःस्वभावा च सती कथं स्वप्रकाशमात्मानम् आश्रयत्वेन विषयत्वेन चालम्बते ? कथं च तस्या नित्यनिवृत्ताया निवृत्तिः ? निवृत्ता च सा कुत्र गच्छति ? - इत्यादिविचाराघातं नैव सहते । न ह्येतस्याः लोकसिद्धपदार्थान्तरस्येव स्वरूपस्थितिकार्यनिवृत्त्यादिकं युक्तिबद्धम् इत्यर्थः । अतः साधूक्तमिदं सा न विचारं सहत इति । तत्र दृष्टान्तः - तमो यद्वद् प्रकाशस्वरूपं दिवाकरम्, उदितमात्रे सूर्ये यथा तमः, तथैव विचारावतारमात्रेण सा प्रणश्यतीत्यर्थः ॥

प्रत्यग्दृष्ट्या अविद्या नास्त्येव -

अयमत्राशयः - सर्वमिदम् अविद्यातदुत्थसद्भावादिकथनं पराग्भूतप्रमातृदृष्ट्यैव, प्रत्यग्भूतसाक्षिदृष्ट्या तु नैवाविद्या तत्कार्यं वा अवस्थात्रयेऽपि दृश्यते। प्रत्यग्दृष्टिरेव तु परमार्थदृष्टिः, तदवल्मब्यैव च वाक्येन सर्वमपि द्वैतं निवर्त्यते। तथा चोक्तं **बृहद्वार्तिके** 'पराक्प्रवणया दृष्ट्या धीस्थो ज्ञोऽज्ञानमात्मनि। व्योमकार्ष्ण्यादिवत्तज्जं सम्भावयति न स्वतः॥ नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते। प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु॥ न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः। कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक्॥ न भूतकालस्पृक् प्रत्यङ् न चागामिस्पृगीक्ष्यते। स्वार्थदेशः परार्थोऽर्थो विकल्पस्तेन स स्मृतः॥' (बृ. वा. १-४-२९८-३०१) इति। एवम् अवस्थात्रयवत्त्वलक्षणं द्वैतमप्यस्य वस्तुतो नास्त्येव। यदप्युक्तं तत्रैव 'नास्य स्वापः प्रबोधो वा कुतः स्वप्नस्य सम्भवः। प्रत्यक्स्वभाव एवास्य जाग्रत्स्वप्नसुषुप्तयः॥' (बृ. वा. २-१-२६४) इति। अतः सर्वमिदमनवद्यमिति॥६६॥

(मूलम्)

तस्याः खल्वस्या अविद्याया भ्रान्तेः सम्यग्ज्ञानोत्पत्तिद्वारेण निवृत्तिः -

बुभुत्सोच्छेदिनी चास्य सदसीत्यादिना दृढम्।
प्रतीचि प्रतिपत्तिः स्यान्नासौ मानान्तराद् भवेत् ॥६७॥

(क्लेशापहारिणी)

वाक्यादेव अज्ञाननाशः स्यात् -

तदीदृश्या अविद्याया निवृत्तौ न कथमपि मानान्तरापेक्षणमित्यतो वाक्यजन्यमेव सम्यग्ज्ञानं तद्बाधकमित्याह **तस्याः खल्विति**॥

बुभुत्सोच्छेदिनीति ।। प्रामाण्यविघातकहेतूनामसत्त्वात् वाक्यज्ञाने जाते जिज्ञासापरिसमाप्तिरवश्यंभाविनीत्यर्थः । नासौ प्रतिपत्तिः मानान्तराद् पराग्विषयात् भवेत् - इत्यत्र हेतुसमर्पकं साभिप्रायं 'प्रतीचि' इति विशेषणमात्मनः । 'सदसीत्यादिना' इति तु आप्तवाक्यादिमानान्तरापेक्षवाक्यान्तरव्यावृत्त्यर्थम् ।।६७।।

(मूलम्)

कथं पुनर्वाक्यं प्रतिपादयत्येवेति चेत् दृष्टान्तोक्तिः -

जिज्ञासोर्दशमं यद्वन्नवातिक्रम्य ताम्यतः ।
त्वमेव दशमोऽसीति कुर्यादेवं प्रमां वचः ।।६८।।

(क्लेशापहारिणी)

दशमवाक्यवदेव वाक्यस्य प्रतिपादकत्वम् -

प्रामाण्यविघातकहेत्वभावमेव स्पष्टयन् प्रश्नमुत्थाप्य वाक्यस्य अवबोधकत्वं तावद्दशमवाक्यसाम्यकथनेनैव स्पष्टयति **कथं पुनरिति ?** प्रतिपादयत्येवेत्यवधारणं न जातुचिदप्यबोधकत्वमित्यभिप्रायेण ।।

जिज्ञासोरिति ।। यद्वन्नव माणवकान् स्वातिरिक्तान् अतिक्रम्य अदशमत्वेन निराकृत्य 'को नु दशमः ?' इति ताम्यतः, क्लिश्यतः, दशमं जिज्ञासोः 'त्वमेव दशमोऽसि' इति वचः सावधारणं जिज्ञास्वात्मस्रोतस्तया बुद्धिं प्रवर्तयत् वस्तुतन्त्रं च ज्ञानं जनयद् तस्य दशमत्वे प्रमां कुर्यादेव, एवं तत्त्वमसीति वचोऽपि जिज्ञासोरात्मनि प्रमां कुर्यादेवेत्यर्थः ।।६८।।

(मूलम्)

सा च तत्त्वमस्यादिवाक्यश्रवणजा प्रमा, उत्पन्नत्वादेव । न च 'नैवम्' इति प्रत्ययान्तरं जायते । तदेतद् दृष्टान्तेन प्रतिपादयति -

दशमोऽसीति वाक्योत्था न धीरस्य विहन्यते ।
आदिमध्यावसानेषु न नवस्वस्य संशयः ॥६९॥

एवं तत्त्वमसीत्यस्माद् द्वैतनुत्प्रत्यगात्मनि ।
सम्यग्ज्ञाततत्वमर्थस्य जायेतैव प्रमा दृढा ॥७०॥

(क्लेशापहारिणी)

वाक्यज्ञानस्याबाध्यत्वमपि दशमवाक्यज्ञानवदेव -

सा चेति ॥ ननु उत्पन्नापि प्रमा पुनर्द्वैतज्ञानेन बाध्येत ; अनेकजन्मानु-भववासनावशात् अविद्या पुनरपि कदाचिदुद्भवेत् । तत्राह - **न चेति** ॥ बाधकज्ञानस्य बाध्येन पुनर्बाधशङ्कायोगात् इति भावः । यथोक्तं **बृहद्वार्तिके** 'बाध्याऽविद्या कथं विद्यां बाधिकां बाधते वद । दाहकस्य न दाहोऽस्ति वन्हेर्दाह्येन वस्तुना ॥ विद्यमानाऽप्यविद्येयं विद्यां चेन्नावधीत् पुरा । ध्वस्ता बाधिष्यतेऽविद्या विद्यामित्यत्र का प्रमा ॥' (बृ. वा. ४-४-९१६, ९१७) इति । तदेतद् दृष्टान्तेन सङ्गमयतीत्याह - **तदेतदिति** ॥

अत्र संबन्धवाक्ये वाक्यश्रवणजा प्रमा, उत्पन्नत्वादेव - इत्येतदन्तम् एकं वाक्यम्, पूर्वस्मिन् श्लोके 'प्रमां कुर्यात्' इत्येतत्प्रतिज्ञोपपादकत्वेन हेतुसमर्पकम् । उत्पन्नत्वादेव अबोधकत्वलक्षणः अप्रामाण्यहेतुर्नास्ति वाक्यस्य - इत्यर्थकमेतत् । 'न च नैवम् इति' इति संशयेन विपरीतप्रत्ययेन वा न बाध्यत्वमस्ति संजातज्ञानस्येत्यभिप्रायेण ॥

दशमोऽसीतीति, एवमिति च ॥ दशमोऽहमित्येव मतिर्दशमवाक्येन जायते । अस्य माणवकस्य नवसु स्वव्यतिरिक्तेषु यः कश्चित् दशमो भवेदिति कदाचिदपि संशयो न जायत इति संशयो विपरीतबोधकत्वं वा नास्ति वाक्यस्य । एवं तत्त्वमसिवाक्यस्यापीत्यर्थः ।

तदेतदुक्तं **भगवत्पादैरपि** - 'अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा। तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशयः ॥' (उप. १८-१०३) इति ॥६९॥७०॥

(मूलम्)

प्रत्यगात्मनि प्रमा उपजायत इत्युक्तम्। तत्र चोद्यते[1]। किं यथा घटादिप्रमेयविषया प्रमा कर्त्रादिकारकभेदानपह्नवेन जायते तथैव, उत अशेषकारकग्रामोपमर्देन कर्तुः प्रत्यगात्मनि - इति ? उच्यते -

प्रत्यक्ताऽस्य स्वतोरूपं निष्क्रियाकारकाफलम्।
अद्वितीयं तदिद्धा धीः प्रत्यगात्मेव लक्ष्यते ॥७१॥

(क्लेशापहारिणी)

वाक्यज्ञानं कारकग्राममुपमृद्यैव जायते -

'वाक्यात् प्रत्यगात्मनि प्रमा जायते' इत्युक्तत्वात् प्रमातृप्रमाणप्रमेयविभागो मा शङ्कीत्याशयवानाऽऽचष्टे - **प्रत्यगात्मनीति** ॥ उच्यते 'अस्य चोद्यस्य परिहारः समनन्तरश्लोकेन' इति शेषः ॥

आत्मनः प्रत्यक्ता स्वतः, बुद्धेस्तु तद्दीप्तत्वात् -

प्रत्यक्तेति ॥ अस्यात्मनः प्रत्यक्तैव स्वतोरूपम्, तच्च रूपम्, निष्क्रियाकारकाफलम् अद्वैतम् ; प्रमातृप्रमाणप्रमेयप्रमितिविभागस्तु तदज्ञानोत्थ मिथ्याध्यास एव इति भावः। यथोक्तं **बृहद्वार्तिके** 'निर्निमित्तं प्रमात्रादेः प्रत्यग्रूपमनात्मनः। सनिमित्तं पराग्रूपमात्मनो मोहहेतुतः ॥'

[1. प्रत्यगात्मप्रमोत्पत्त्यनन्तरम् कारकाणि सर्वाणि यथापूर्वम् अनुपमृदितानि चेत् अद्वैतसिद्धिः न भवति। अथ प्रमाणप्रमेयप्रमातृविभागो बाधितश्चेत् प्रमा उत्पन्ना - इत्येतत् कथमिति आक्षेपगर्भितः प्रश्नः।] *इयं टिप्पणी अनुसन्धानार्थं प्रकाशकैरायोजिता।*

(बृ. वा. १-४-१४९९) इति । अतोऽत्राद्वैतात्मज्ञानमुत्पद्यमानं न क्रियाकारकफलभेदानपह्नवेन उत्पत्तुमर्हति । अन्यथा प्रमातृत्वस्याप्यवशेषे शुद्धप्रत्यक्त्वस्यैवासिद्धेरिति भावः । अत एवात्र शास्त्राचार्यादिद्वैतमप्युपमृद्यत एवेति मन्तव्यम् । यदप्युक्तं तत्रैव 'प्रत्यगज्ञानहेतूत्थशास्त्राचार्यादिसाधनः । तद्विरुद्धमथैकात्म्यं प्रत्यपद्यत मायया ॥' (बृ. वा. १-४-६०४) इति । ननु यथास्यात्मनः प्रत्यक्ता स्वतोरूपम्, एवमन्तःकरणस्यापि प्रत्यक्तैव स्वतोरूपमिति विभाव्यते, नेत्याह - **तदिद्धा धीः प्रत्यगात्मेव लक्ष्यत** इति ।। उक्तमेतत् प्रागेव 'कूटस्थबोधप्रत्यक्त्वमनिमित्तं सदात्मनः । बोद्धृताहंतयोर्हेतुः' (३-११) इति । तदिद्धा चैतन्याभासदीप्ता धीः देहाद्यपेक्षया प्रत्यगात्मेव लक्ष्यते, न तु परमार्थतः प्रत्यक्त्वं तस्याः । उपपादितं हि ज्ञेयत्वमस्याः प्राक् 'दाह्यदाहकतैकत्र' (३-५९) इत्यादिना इति भावः ।।७१।।

(मूलम्)

यस्मादेवम् -

विपश्चितोऽप्यतस्तस्यामात्मभावं वितन्वते ।
दवीयस्स्विन्द्रियार्थेषु क्षीयते ह्युत्तरोत्तरम् ।।७२।।

(क्लेशापहारिणी)

बुद्ध्यादिषूत्तरोत्तरम् आत्मभावः क्षीयते -

यतो धियः प्रत्यक्ताभास आत्मचिदाभासकृतः, तत एव विवेचनासमर्थाः वादिनस्तत्रात्मत्वमतिं कुर्वते । अतो मुमुक्षुणा आत्मानात्मविवेके जागरूकेण भाव्यमित्युपदिशत्युत्तरश्लोक इति भावेन तमवतारयति - **यस्मादेवम् इति** ।।

विपश्चितोऽपीति ।। तदेतत् प्रश्नपूर्वकं व्याख्यातं गीताभाष्ये "अथ किमिदं संसारिणामिव 'अहमेवम्' (अहमेवेदम् ?), 'ममैवेदम्'

इति पण्डितानामपि ? शृणु, इदं तत् पाण्डित्यं यत् क्षेत्र एवाऽत्मदर्शनम्'' (गी. भा. १३-२, पा. १९४) इति । एवं तर्हि कथम् इन्द्रियादिष्वपि आत्ममतिस्तत्तादृशी न निःसन्धिबन्धनेति ? तत्राऽऽह - **दवीयःस्विति** । बुद्धिमनइन्द्रियदेहेष्वात्मचैतन्याभासत्वं यद्यपि समानम्, तथापि मनआदिषु उत्तरोत्तरं व्यवधानेन दवीयस्त्वात् आत्मबुद्धिविभ्रमः ईषदीषत् क्षीयते । स्थूलबुद्धयस्तु पुत्रादिष्वपि अत्यन्तबाह्येषु तन्मतिं कुर्वत एवेति प्रत्यक्षं लोके इत्यर्थः । अतो बुद्धेः प्रत्यक्ता न स्वत इत्यवगम्यत इत्यभिप्रायः ।।७२।।

---

१७. वाक्ये कर्तृत्वादेर्बाधार्थमनुवादः

(मूलम्)

आह - यदि वाक्यमेव यथाभूतार्थावबोधकम्, अथ कस्य हेतोः अविद्योत्थापितस्य कर्तृत्वादेरुपदेश इति ? उक्ते प्रतिविधीयते -

भ्रान्तिसिद्धमनूद्यार्थं तत्तत्त्वं भ्रान्तिबाधया ।
अयं नेत्युपदिश्येत यथैवं तत्त्वमित्यपि ।।७३।।

(क्लेशापहारिणी)

जीवत्वमनूद्य तदसीति तद्बाधः -

अथ तत्त्वमस्यादिवाक्ये त्वंपदार्थस्य निष्ठां निर्दिधारयिषुराक्षेपमुत्थापयति - **आहेति** ।। यदि वाक्यमेव प्रमाणान्तरावेद्यम् अद्वितीयात्मानं बोधयतीत्युच्यते, प्रत्यक्षादिसिद्धकर्तृत्वादिकं तु आविद्यकमेवेति च, अथ तर्हि नार्थस्त्वंपदादानेन । तत्र हि पदे अविद्योत्थापित-

कर्तृत्वादिरेव प्रतीयते, न चासौ बुबोधयिषितोऽर्थः ; न हि श्रुत्युपदिष्टो जातुचिदाविद्यको भवेत् - इति भावः । शङ्कापरिहारार्थमुत्तरश्लोकमवतारयति - **उक्ते प्रतिविधीयत इति** ।।

भ्रान्तिसिद्धमिति ।। भ्रान्तिमात्रसिद्धं स्थाणुपुरुषादिकम् अर्थमनूद्य तत्तत्त्वं स्थाणुत्वादिकं 'नायं पुरुषः स्थाणुरेव तु' इति यथा उपदिश्येत, एवम् त्वमित्यनेन भ्रान्तिसिद्धं जीवत्वम् अनूद्य भ्रान्तिबाधया तत्तत्त्वम् अद्वितीयप्रत्यगात्मत्वम् उपदिश्यते इत्यर्थः । **यथाहुर्भगवत्पादाः** - 'सिद्धादेवाहमित्यस्माद् युष्मद्धर्मो निषिध्यते । रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ।। (उप. १८-४) इति ।।७३।।

(मूलम्)

इममर्थं दृष्टान्तेन बुद्धौ आरोहयति -

स्थाणुः स्थाणुरितीवोक्तिर्न नृबुद्धिं निरस्यति ।
व्यनुवादात् तथैवोक्तिर्भ्रान्तिं पुंसो न बाधते ।।७४।।

(क्लेशापहारिणी)

बाधार्थमनुवादे दृष्टान्तः -

भ्रान्त्यनुवादाभावे तु तत्त्वमात्रोपदेशेन भ्रान्तिनिरासो न भवेत् इत्येतदपि दृष्टान्तमुखेन स्फुटयितुमुत्तरश्लोकः । तदाह - **इममर्थमिति** ।।

स्थाणुरिति ।। 'स्थाणुः स्थाणुः' इत्युक्तिः श्रोतुः स्थाणुगतां पुरुषबुद्धिं न निरस्यति । तत्र हि श्रोता स्थाणुः स्थाणुरिति ज्ञातमेव, किमित्ययम् अत्यन्तं प्रसिद्धमर्थम् अनुवदतीति वक्तारम् उपेक्षेतैव, न तु पुरोऽवस्थिते पुरुषबुद्धिं मुञ्चति । कुतः ? व्यनुवादात् । 'नायं पुरुषः' इति भ्रान्तिसिद्धमनूद्यानिषेधात् । तथैव 'सद्ब्रह्म' इत्युक्तिः पुंसः श्रोतुरधिकारिणः 'संसार्यहम्' इति भ्रान्तिं न बाधते, 'त्वम्' इत्यनूद्य

'तदसि'इत्यनुक्तत्वात् इत्यर्थः । अत्र त्वंपदमनुच्चार्य 'तदसि' इत्येतावन्मात्रोक्तौ न संसारित्वनिवृत्तिरित्युच्यत इति न भ्रमितव्यम्, यावता 'तदसि' इति वाक्यस्यापि 'तत्त्वमसि' इति वाक्यादविशेषार्थकत्वमस्त्येव । अतः, त्वंपदवाच्यार्थभूतकर्तृत्व-भोक्तृत्वादिरूपमविद्याप्रत्युपस्थापितसंसारित्वमनूद्य तत्परमार्थं ज्ञापयतैव वाक्येन भ्रान्तिबाधः स्यान्नान्यथा - इत्येव विवक्षितमिति बोध्यम् ।।७४।।

(मूलम्)

यस्मात् श्रोतृप्रसिद्धानुवाद्येव त्वमिति पदम्, तस्मात् उद्दिश्यमान-स्थत्वाद् दुःखित्वादेरविवक्षितत्वमेव । विधीयमानत्वे हि सति विरोधप्रसङ्गः, न तु विधीयमानानूद्यमानयोः - इति । स्वप्रधान-योर्हि पदयोर्विरोधाशङ्का, सामान्यालिङ्गितत्वात् तयोः, न विपर्यये -

अनालिङ्गितसामान्यौ न जिहासितवादिनौ ।
व्युत्थितौ तत्त्वमौ तस्मादन्योन्याभिसमीक्षणौ ।।७५।।

(क्लेशापहारिणी)

तत्त्वमर्थयोः न विरोधः -

एवं तावत्, अविद्याप्रत्युपस्थापितस्य कर्तृत्वदुःखित्वादेरनुवादेन तद्बाधया तत्तत्त्वविजिज्ञापयिषया तदुपदेशः सङ्गच्छत इत्युक्तम् । अथेदानीं तत्त्वंपदयोः सामानाधिकरण्ये सति तदर्थयोर्विशेष्यविशेषण-भावेन, अविवक्षितार्थानां बाध्यत्वं विवक्षितार्थानां च बाधकत्वं निरूपयितुं प्रक्रमते । तत्र कथं दुःखित्वादेरविवक्षितत्वमित्यत्राऽऽह - **यस्मादिति** ।। यस्मात् दृष्टान्तगतपुरुषपदवत् त्वमितिपदं श्रोतृप्रसिद्धा-

नुवाद्येव, तस्मात् उद्दिश्यमानत्वंपदार्थस्थत्वात् दुःखित्वादिभ्रान्तिबाधेन तत्तत्त्वस्योपदिदिक्षितत्वात् दुःखित्वादेरविवक्षितत्वमेव । तदेतदुक्तम् प्रागेव 'उद्दिश्यमानं वाक्यस्थम्' (३-२५) इति श्लोकसंबन्धवाक्ये ; तथा च न तस्य असंसारित्वप्रतिपादनेन विरोधः । विधीयमानत्वे हि दुःखित्वस्य विरोधप्रसङ्गः ; दुःखि चासंसारि च - इति विप्रतिषिद्ध-मिति । न तु विधीयमानानूद्यमानयोरसंसारित्वदुःखित्वयोर्विरोध-प्रसङ्गः । विधीयमानानूद्यमानयोः स्थाणुत्वपुरुषत्वयोर्यद्वत् । इतिशब्दो हेतौ । इत्यतः, तत्त्वंपदार्थयोर्विशेष्यविशेषणभावो न विरुध्यत इत्यर्थः । अत एवाविवक्षितार्थहानात् पदयोः सामानाधिकरण्यं न विरुध्यते । तत् कथमिति ? तत्राह - **स्वप्रधानयोर्हि** इति । कुत एतत् ? **सामान्या-लिङ्गितत्वात्** । अश्वो महिषः इति हि पदसामानाधिकरण्यं न घटते ; तदेतत् कस्य हेतोः ? स्वस्ववाच्यभूताश्वत्वमहिषत्वरूपसामान्याभ्याम् आलिङ्गितत्वात् पदयोः । तदपरित्यागात् इत्यर्थः । तथा च सामान्यार्थापरित्यागेन अश्वत्वमहिषत्वरूपसामान्यद्वयस्य न कुत्राप्ये-कस्मिन् वस्तुनि संभव इति पदयोः सामानाधिकरण्यं विरुध्यते । न विपर्यये तद्वैपरीत्येन सामान्यार्थपरित्यागेन तद्गतविशेषमात्रं वदतोः सामानाधिकरण्यं घटत एव । तद्यथा 'सिंहो देवदत्तः' इत्यत्र सिंहत्व-सामान्यवाचकस्य सिंहपदस्य देवदत्तपदेन पुरुषत्ववाचकेन सह सामानाधिकरण्ये विरुध्यमानेऽपि सिंहगतक्रौर्यादिविशेषमात्रवादिना सिंहशब्देन देवदत्तशब्दसामानाधिकरण्यं न विरुध्यते । देवदत्ते क्रौर्यादेः सम्भावितत्वात् । एवमिहापि स्वप्रधानयोः यद्यपि तत्त्वंपदयोः-कर्तृत्वदुःखित्वरूपसामान्यालिङ्गितस्य त्वंपदस्य पारोक्ष्यरूप-सामान्यालिङ्गितस्य च तत्पदस्य-स्वप्रधानत्वाद् विरोधः सामानाधि-करण्येऽभ्युपगम्यमाने, तथापि तद्गतविशेषार्थमात्रस्य अद्वितीय-प्रत्यगात्मत्वस्य स्वीकारे नास्ति कोऽपि विरोधः - इत्यभिप्रायः ॥

तदेतमर्थं श्लोकेन संगृण्हाति - **अनालिङ्गितसामान्यौ** इत्यादिना । यस्मान्न जिहासितवादिनौ, अत एवानालिङ्गितसामान्यौ, प्रतिपिपादयिषितविशेषार्थमात्रपरत्वात्, सामान्यार्थात् व्युत्थितावेव तं परित्यज्यैव अन्योन्यसमीक्षणौ परस्पराकाङ्क्षिणौ भवतः इत्यर्थः ।।७५।।

(मूलम्)

अपास्तसामान्यार्थत्वात्, अनुवादस्थत्वात्, विधीयमानेन च सह विरोधात्, दुःखित्वादेरस्तु कामं जिहासितार्थयोरसंसर्गः । यथोपन्यस्तदोषविरहात् तत्त्वमर्थयोः संसर्गोऽस्तु नीलोत्पलवदिति चेत्, नैवमप्युपपद्यते । यस्मात् -

तदर्थयोस्तु निष्ठात्मा द्वयपारोक्ष्यवर्जितः ।
नाद्वितीयं विनात्मानं नात्मा नित्यदृशा विना ।।७६।।

(क्लेशापहारिणी)

तत्त्वंपदार्थकः केवल आत्मा -

अथाविवक्षितदुःखित्वादिनिरासेऽपि तत्त्वंपदार्थयोर्विशेषण-विशेष्यभावेन संसर्गो दुर्वार इत्याक्षिपति - **अपास्तसामान्यार्थत्वा-दिति** ।। त्वंपदार्थान्तर्गतसामान्यमात्रत्वात् बाधनार्थमनूद्यमानेऽर्थ-जातेऽन्तर्भावात्, विधीयमानेनाद्वितीयप्रत्यगात्मत्वरूपेणार्थेन सह विरोधाच्च, तत्त्वमसिवाक्ये अपास्तस्य बाधितस्य अनुवादस्थस्य विरुद्धस्य च दुःखित्वादेर्न तत्पदार्थभूतेन अद्वितीयात्मना संसर्गः ; एवं यथोक्तहेतुभ्य एव परोक्षत्वस्यापि तत्पदार्थस्य न त्वंपदार्थभूतेनापरोक्षप्रत्यगात्मना संसर्गः - इत्यस्तु कामम्, तयोरर्थयोर्जिहासितत्वात् ; तथापि तु परिशिष्टयोस्तत्त्वंपदार्थयोः - त्वंपदार्थस्य अपरोक्षप्रत्यगात्मनः, तत्पदार्थस्याद्वितीयत्वस्य च -

नीलोत्पलवत् 'अद्वितीयोऽसौ अपरोक्षः प्रत्यगात्मा' इति विशेषण-विशेष्यभावः किं न स्यात् ? यथोपन्यस्तदोषविरहात्, न ह्यत्र दुःखित्वपरोक्षत्वादेरिव अपास्तसामान्यार्थत्वादयो हेतवः सन्ति, येन-संसर्गः प्रतिबध्येत - इति भावः । तदेतत्प्रतिवक्ति - **नैव** मित्यादिना ।।

तदर्थयोस्त्विति ।। तदर्थयोः तत्त्वंपदार्थयोस्तु जिहासितहानादूर्ध्वं परिशिष्यमाणयोः द्वयपारोक्ष्यवर्जितः 'आत्मैव' निष्ठा पर्यवसानम् । य एव हि त्वंपदार्थभूतः आत्मा, स एव तु तत्पदार्थोऽपि । कथम् ? तत्राह - **'नाद्वितीयं विना'** इत्यादि । तत्पदार्थभूतम् अद्वितीयत्वम् आत्मानं विना न पृथगस्ति, नापि त्वंपदार्थ आत्मा, नित्यदृशा विना तत्पदार्थभूतेन 'तदैक्षत' इत्यादिना निर्दिष्टेनाद्वितीयसद्ब्रह्मणा विना पृथगस्ति । अद्वितीयापरोक्षनित्यचैतन्यात्मैव हि उभयोरपि पदयो-रवशिष्यमाणोऽर्थः । न तु 'सिंहो देवदत्त' इत्यादाविव जिहासितहाना-दूर्ध्वं द्वावर्थौ परस्परभिन्नाववशिष्येते, ययोः संसर्गोऽप्याकाङ्क्ष्येत - इति भावः ।।७६।।

(मूलम्)

अत्राऽऽह - किमिह जिहासितम्, किं वा उपादित्सितमिति ? उच्यते - प्रत्यगर्थात्माभिधायिनस्त्वंपदात् उभयं प्रतीयते 'अहं दुःखी', 'प्रत्यगात्मा' च । तत्र च प्रत्यगात्मनः 'अहं दुःखी'त्यनेन अभिसंबन्ध आत्मयाथात्म्यानवबोधहेतुक एव । अतोऽहमर्थः, अनर्थोपसृष्टत्वात्, अज्ञानोत्थत्वाच्च हेयः - इति प्रत्यक्षहेतोरव-सीयते । तदर्थे किं हेयम्, किं वा उपादेयम् इति नावध्रियते । तत इदमभिधीयते -

पारोक्ष्यं यत्तदर्थे स्यात्तद्धेयमहमर्थवत् ।
प्रतीचेवाहमोऽभेदः पारोक्ष्येणाऽऽत्मनोऽपि मे ।।७७।।

(क्लेशापहारिणी)

तदर्थे पारोक्ष्यम्, त्वमर्थे चाहमर्थो हेयः -

यद्यपि पारोक्ष्यदुःखित्वे तत्त्वंपदार्थयोर्जिहासितांशत्वेनासकृदुक्ते, तथापि पुनरप्यत्र प्रश्नोत्तरमुखेनानूद्येते अधिकविवक्षया - **अत्राऽऽहेति** ।। त्वंपदं प्रत्यगात्माभिधायि ; तस्यार्थत्वेन अहमर्थः, प्रत्यगात्मत्वं चेत्येतदुभयमपि प्रतीयते । तत्र साक्ष्यस्य अहमः, तद्धर्मस्य दुःखित्वस्य च साक्षिधर्मत्वम् आत्मयाथात्म्यानवबोधं विना न घटते । अतः अहमर्थो दुःखरूपानर्थसंबन्धित्वात् नोपादेय इति श्रुत्युपदेश्यो भवितुमर्हति ; प्रागेवोपपादितरीत्या अज्ञानोत्थत्वाच्च तत्त्वावबोधकश्रुतिबोध्यं न भवितुमर्हतीति प्रत्यक्ष एव हेतुरहमो हेयत्वनिर्धारणे, तद्वैपरीत्यं च प्रत्यगात्मन उपादेयत्वनिर्धारणे इत्यर्थः । एतावत्तु पूर्वमधिगतमेव 'भ्रान्तिसिद्धम्' (३-७३) इति श्लोकेन । अथ तदर्थे किं हेयं किं वा उपादेयमिति नावध्रियते ; प्रमाणान्तरानवसितत्वात् हेयांशस्येति भावः । **तत इदमभिधीयते** इति श्लोकमवतारयति । तदवधारणार्थम् इति शेषः ।।

पारोक्ष्यम् इति ।। तदर्थे तत्पदार्थे यत् पारोक्ष्यम् तद् हेयं स्यात्, अहमर्थवत् । त्वंपदार्थे यथा अहमो हेयत्वम् तथा - इत्यर्थः । कुतः ? प्रतीचा इव अहमोऽभेदः, यथा प्रत्यगात्मना अहंसंसर्गोऽज्ञानहेतुकः, तथा आत्मनोऽपि मे साक्षात्प्रत्यगात्मरूपस्यापि मे मम पारोक्ष्येण अभेदोऽज्ञानहेतुक एव । न हि 'तत्सत्यं स आत्मा' इति श्रुत्युपदिश्यमानं सद्ब्रह्म 'सदेव सोम्येदमग्र आसीत्' इति परोक्षेणोपक्रम्यत इत्येतावता परोक्षं भवेत् - इति भावः । अयमाशयः - 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रम्य श्रुतिः ब्रह्मणोऽद्वितीयनिर्विशेषस्वरूपत्वमेव विवक्षति, न तु आसीदिति परोक्षत्वमप्यवधारयतीति गम्यते 'सदेव', 'एकमेवाद्वितीयम्' - इति च सावधारणनिर्देशात् । 'आसीत्' इति तु

इदंशब्दाभिधेयस्य जगतः सावधारणं सदभिन्नत्वमाहाव्याकृताव-स्थायाम्, इदानीं विभाव्यमानस्य व्याकृतरूपस्याविद्याकृतत्वं स्पष्टयितुम् - इत्यविरोधः । अतः पारोक्ष्यं हेयमेवेति ।।७७।।

(मूलम्)

कथं पुनस्तदर्थोऽद्वितीयलक्षणः प्रत्यगात्मोपाश्रयं सद्वितीयत्वं दुःखित्वं (च ?) निरन्वयम् अपनुदति ? उच्यते - न चैतयोर्निवर्तकनिवर्त्यभावं वयं ब्रूमः ; कथं तर्हि, त्वमर्थे प्रत्यगात्मनि प्रागनवबुद्धाद्वितीयता, साऽनेनावबोध्यते । अतोऽनवबोधनिरासेन तदुत्थस्य सद्वितीयत्वस्य त्वमर्थस्थस्य, परोक्षत्वस्य च तदर्थ-स्थस्य निरसनात्, न वैयधिकरण्यादिचोद्यस्यावसरोऽस्तीति । तदिदमभिधीयते -

तत्त्वमर्थेन संपृक्तो नानात्वं विनिवर्तयेत् ।
नापरित्यक्तपारोक्ष्यं त्वं तदर्थं सिसृप्सति ।।७८।।

(क्लेशापहारिणी)

पदार्थयोः न बाध्यबाधकभावः -

एवं तावत् तत्त्वंपदार्थयोर्विशेषणविशेष्यभावेन त्वंपदार्थगतस्या-हमः, तत्पदार्थगतस्य पारोक्ष्यस्य च व्यावर्त्यत्वं गम्यत इत्युक्तम् । तत्राऽऽक्षिपति पूर्वपक्षी - **कथं पुनरिति** ।। सद्वितीयत्वं दुःखित्वं च, सद्वितीयत्वरूपमेव वा दुःखित्वं प्रत्यगात्माश्रयम् ; अद्वितीयता पुनः सद्ब्रह्माश्रया । तत् कथं तत्पदार्थज्ञानेन पदार्थान्तरभूतत्वंपदार्थगतं सद्वितीयत्वं निरस्यते ? न हि रज्जुज्ञानेन शुक्तिरजतं निवर्त्यते - इत्या-क्षेपः । सिद्धान्ती त्वाह - **न चैतयोरिति** । न हि वयमेकपदार्थज्ञानेन पदार्थान्तरगतं किञ्चिन्निवर्त्यत इति ब्रूमः । कथं तर्हि सद्वितीयत्वादेर्हेय-

त्वमुक्तमिति ? उच्यते - तत्त्वंपदसामानाधिकरण्यपदार्थविशेषण-विशेष्यताप्रभावेण तत्त्वंपदार्थज्ञानेन तत्तद्गताज्ञानमेव तु बाध्यते ततश्च तत्तत्कार्यं निवर्तते । तथा च सति तदर्थस्य पारोक्ष्यं त्वमर्थस्य सद्वितीयत्वं च निवर्तत इति ब्रूमः - इत्यभिप्रायः । **अतो न वैयधिकरण्यादिचोद्यस्यावसरोऽस्तीति** । यद्विषयकं यज्ज्ञानम्, तदधिकरणकारोप एव तज्ज्ञानेन बाध्यत इति स्थितिः । इह पुनस्तदर्थ-विषयकं ज्ञानं त्वंपदार्थगतं सद्वितीयत्वं निरस्यति, त्वंपदार्थज्ञानं च तदर्थगतं पारोक्ष्यं निरस्यतीत्युच्यते, अतो वैयधिकरण्यम् - इति चोद्यं वैयधिकरण्यचोद्यम् । न तस्यावसरोऽस्त्यत्र । यथैव सामानाधिकरण्यप्र-भावेण विशेष्यविशेषणतासंबन्धप्रभावेण च पदसंबन्धात् प्रागपि स्थितमेवोत्पले नैल्यं प्रागुल्लिख्यानवबुद्धं नीलपदेनावबोध्यते, एवमिहापि बोध्यम् । दृष्टान्तस्तु अनवबुद्धबोधनांशमात्रे ग्राह्यः, न त्विह नीलोत्पलवत् पदार्थद्वयम्, तत्संसर्गो वा पदसामानाधिकरण्येन विवक्ष्यत इति मन्तव्यम् । अद्वितीयप्रत्यगात्मैव हि पदद्वयेनापि बोध्यते भ्रान्तिसिद्धसद्वितीयत्वपारोक्ष्ययोर्निरसनेन - इति भावेनोक्तं 'न वैयधि-करण्यादिचोद्यस्यावसरोऽस्ति' इति । आदिशब्देन वैयधिकरण्य-दोषपरिहारार्थं तत्पदेनैव त्वंपदार्थोऽपि बोध्यते इत्युच्यते चेत् तत्त्वंपदयोः पर्यायतापत्तिः, ततश्च पदद्वयप्रयोगवैयर्थ्यम् ; तत्परिहारार्थम् एकपद-मात्रादाने तु वाक्यत्वाभावप्रसङ्गः - इत्यादि चोद्यानि संगृह्यन्ते । उक्तेऽर्थे श्लोकमवतारयति - **तदिदमभिधीयत इति** ।।

तत्त्वमर्थेनेति ।। विधीयमानस्तदर्थः, उद्दिश्यमानेन त्वमर्थेन संपृक्तः, विशेषणविशेष्यभावेन संबद्धः सन् तदज्ञाननिवर्तनेन तद्गतं नानात्वं सद्वितीयत्वं विनिवर्तयेत्, बाधेत । एवं त्वमर्थो अपरित्यक्तपारोक्ष्यं तदर्थं न सिसृप्सति, न तत्संबन्धमश्नुते ; किं तर्हि, तत्संबन्धेन तद्गतमज्ञानं निवर्तयन् तद्गतपारोक्ष्यं परित्याजयति - इत्यभिप्रायः ।।७८।।

(मूलम्)

कस्मात् पुनः कारणात् तदर्थोऽद्वितीयलक्षणः त्वमर्थेन प्रत्यगात्मना अपृथगर्थः सन् अविद्योत्थं सद्वितीयत्वं निहन्तीति ? उच्यते । विरोधात्, तदुच्यते -

संसारिताद्वितीयेन पारोक्ष्यं चाऽऽत्मना सह ।
प्रासङ्गिकं विरुद्धत्वात् तत्त्वम्भ्यां बाधनं तयोः ॥७९॥

(क्लेशापहारिणी)

विरोधार्थकस्य बाधनम् -

नन्वेवमपि तदर्थस्त्वंपदार्थेन सहैकीभावाय प्रवृत्तः, न तु कस्यचिन्निषेधनाय । तत् कथं तेन त्वमर्थगता सद्वितीयता निवर्त्येत ? इत्याक्षिपति - **कस्मात्पुनरिति** ॥ अपृथगर्थः सन् एकमेवार्थम् अद्वितीयप्रत्यगात्मरूपं तात्पर्येणावबोधयितुं संबद्धः सन् इत्यर्थः । कस्मात् कारणात् अविद्योत्थं सद्वितीयत्वं निहन्ति ? यदि हि सद्वितीयतानिषेधार्थमपि व्याप्रियेत, तर्हि वाक्यं भिद्येत इति भावः । सिद्धान्ती तु विरोधादेव तद्धतिः । ज्ञानस्य हि स्वोत्पत्तिमात्रेण स्वविरोध्यज्ञाननिबर्हणं स्वभावः इत्याह - **उच्यते, विरोधात् इति** । एवमर्थे श्लोक इति तमवतारयति - **तदुच्यते इति** ॥ तस्मादुच्यत इत्यर्थः ॥

संसारितेति ॥ संसारिता तावत् प्रासङ्गिकी, त्वंपदप्रयोगाद् भ्रान्तिप्रसक्ता, न तु विवक्षिता । एवं पारोक्ष्यमपि तत्पदप्रयोगात् प्रसक्तं न तु विवक्षितम् । एवं च विरुद्धत्वात् - संसारितायाः प्रासङ्गिक्याः प्रतिपिपादयिषितेनाद्वितीयत्वेन विरुद्धत्वात्, पारोक्ष्यस्य च प्रासङ्गिकस्य प्रतिपिपादयिषितेन आत्मत्वेन विरुद्धत्वात्, तयोः संसारिता-पारोक्ष्ययोः, तत्त्वम्भ्यां तदर्थत्वमर्थाभ्यां बाधनं सङ्गच्छत इत्यर्थः ॥७९॥

(मूलम्)

तत्त्वमर्थयोस्तु बाधकत्वे अन्यदपि कारणम् उच्यते -

अज्ञातपुरुषार्थत्वाच्छ्रौतत्वात् तत्त्वमर्थयोः ।
स्वमर्थमपरित्यज्य बाधकौ स्तां विरुद्धयोः　　॥८०॥

(क्लेशापहारिणी)

विरुद्धार्थबाधे हेत्वन्तरम् -

तदेवं तत्त्वमर्थौ बाधकौ, संसारितापारोक्ष्ये बाध्ये इत्यत्र विरोधः कारणम् इत्युक्तम् । अथ तत्त्वमर्थावेव बाधकौ इत्यत्र किं विनिगमकम् ? वैपरीत्येनैव बाध्यबाधकभावः किं न स्यात् ? - इत्याशङ्कामुत्थाप्य तत्परिहारसमर्पकत्वेनोत्तरश्लोकमवतारयति - **तत्त्वमर्थयोस्त्विति ॥**

अज्ञातपुरुषार्थत्वादिति ॥ तत्त्वमर्थयोरद्वितीयत्वप्रत्यक्त्वयोः अज्ञातपुरुषार्थत्वात् तौ बाधकौ, न बाध्यौ । अज्ञातं हि प्रतिपादनीयं वाक्येन, फलवच्च । ज्ञातस्यैव प्रतिपादने अनुवादत्वेन, निष्फलस्य तु प्रतिपादने अधिकार्यभावेन च श्रुतेरप्रामाण्यप्रसङ्गात् । अत्र त्वमर्थस्याद्वैतत्वं तदर्थस्य च प्रत्यगात्मत्वं चाज्ञातम्, प्रमाणान्तरेणानवगतम् ; पुरुषार्थत्वं च तज्ज्ञानस्यास्ति ; तेन सर्वक्लेशप्रहाणात्, नित्यसुखप्राप्तेश्च । तदेवम्, अज्ञातत्वात् पुरुषर्थत्वात्, तत्त्वमर्थयोः प्रत्यगात्मत्वाद्वितीयत्वयोः, तयोरेव च श्रौतत्वात् तावेव स्वविरुद्धयोः संसारित्वपरोक्षत्वयोरनूद्यमानयोर्निष्फलयोर्बाधकौ इति युक्तम् इत्यर्थः । अतो न वैपरीत्येन बाध्यबाधकभावः शक्यशङ्क इति भावः ॥८०॥

१८. तत्त्वमस्यादिवाक्यैः प्रसङ्ख्यानं न विधीयते

(मूलम्)

एवं तावद् यथोपक्रान्तेन प्रक्रियावर्त्मना न प्रत्यक्षादिप्रमाणान्तरैर्विरोधगन्धोऽपि संभाव्यते । यदा पुनः सर्वप्रकारेणापि यतमाना नैवेमं वाक्यार्थं संभावयामः, प्रत्यक्षादिप्रमाणान्तरविरोधत एव, तस्मिन्नपि पक्षे उच्यते -

प्रत्यक्षादिविरुद्धं चेद् वाक्यमर्थं वदेत् क्वचित् ।
स्यात्तु तद्दृष्टिविध्यर्थं योषाग्निवदसंशयम् ॥८१॥

(क्लेशापहारिणी)

प्रत्यक्षादिविरुद्धं चेद्वाक्यं उपासनार्थम् -

तदेवं प्रत्यक्षाद्यविरोधेनैव वाक्यादवाक्यार्थप्रतिपत्तिर्भवति इत्येतत् प्रतिपादितं वाक्यव्याख्यानग्रन्थेन । अथाधुना वाक्यज्ञानं नैव जायते प्रत्यक्षादिविरोधाद् वाक्यज्ञानस्य, अतः प्रसङ्ख्यानेन ज्ञानं सम्पादयेत् इति वाक्यार्थं स्वीकुर्वाणानां मतं निराचिकीर्षुस्तत्र पातनिकां करोति - **एवं तावदिति** ॥ प्रत्यक्षादिप्रमाणान्तरावगतं संसारित्वादि न विवक्ष्यते, अद्वितीयप्रत्यगात्मैव तु लक्ष्यार्थतया विवक्ष्यते - इत्येवम् उपक्रान्तेन वर्त्मना, अन्वयव्यतिरेकपुरःसरं वाक्यमेवावाक्यार्थरूपमात्मानं प्रतिपादयति ; अन्वयव्यतिरेकमात्रान्नावाक्यार्थप्रतिपत्तिः, किं तर्हि, अविचारितसिद्धाज्ञानव्यपोहनेन तत्त्वमस्यादिवाक्यमेव दशमवाक्यवत् अद्वितीयप्रत्यगात्मत्वं बोधयति, वाक्यस्थपदयोः सामानाधिकरण्यम्, तदनु तदर्थयोर्विशेषणविशेष्यता, ततः परं पदार्थयोरद्वितीय-

प्रत्यगात्मनश्च लक्ष्यलक्षणभावः - इत्येतदुपक्रान्तं प्रक्रियावर्त्म वाक्यव्याख्यानमार्गः, तेन प्रदर्शितम् । अतः प्रत्यक्षादिप्रमाणैः श्रुतिवाक्यं नैव विरुध्यते, भिन्नविषयत्वात् श्रुतेः प्रमाणान्तराणां च - इत्युपपादितं भवतीत्यर्थः ।।

अथ प्रसङ्ख्यानविधिमतं शङ्कयति - **यदा पुनरिति** । प्रसङ्ख्यानवादिनो हि मतमेतत् यद् वाक्यजन्यं ज्ञानं नैव स्वार्थं निष्प्रत्यूहं समर्पयितुमलं स्वोत्पत्तिमात्रेण, प्रत्यक्षादिरूपप्रबलप्रमाणान्तराहितसंसारित्ववासनया प्रतिबन्धादिति । तदाह - **नैवेमं वाक्यार्थं सम्भावयामः, प्रत्यक्षादिप्रमाणान्तरविरोधादेवेति** । अभ्युपगम्यापि विरोधं वाक्यस्य गतिरुच्यते उत्तरश्लोकेनेत्याह - **तस्मिन्नपि पक्षे उच्यते** इति ।।

प्रत्यक्षादिविरुद्धं चेदिति ।। प्रमाणान्तरविरुद्धमेवार्थं चेद् वाक्यं क्वचिद् वदेत्, तर्हि वस्तुनिष्ठमित्येव तावन्न स्यात् तत्, विरुद्धव्याहारत्वेन अप्रामाण्यप्रसङ्गात् तस्य, किं तु तद् योषाग्निवत् 'योषा वाव गौतमाग्निः' (छां. ५-८-१) इत्यत्रेव दृष्टिविध्यर्थं स्यात् । योषिति अग्निदृष्टिः कर्तव्या इति हि तत्रार्थः कर्तव्यः, न हि स्त्रियां अग्नित्वं वस्तुत एवास्तीति । तस्मात् यत्र क्वचित् वाक्ये प्रत्यक्षादिविरुद्धम् उच्यत इव, तत्र दृष्टिविधानमेव कल्प्यते ; न हि विवेकिभिस्तत्रापि योषित्यग्नित्वज्ञानोदयार्थं प्रसङ्ख्यानं विधीयत इति विरुद्धं कल्प्येत - इति भावः ।।८१।।

(मूलम्)

यदा तु तत्त्वमस्यादिवाक्यं सर्वप्रकारेणापि विचार्यमाणं न क्रियां कटाक्षेणापि वीक्षते, तदा प्रसङ्ख्यानादिव्यापारो दुःसम्भाव्य इति । तदुच्यते -

वस्त्वेकनिष्ठं वाक्यं चेन्न तस्य स्यात् क्रियार्थता ।
वस्तुनो ह्येकरूपत्वाद् विकल्पस्याप्यसम्भवः ॥८२॥

(क्लेशापहारिणी)

वस्तुबोधकं वाक्यं न क्रियापरम् -

अत्रापि तर्हि तदर्थदृष्टिविधिपरमेव वाक्यमित्यस्तु, तत्राह - **यदा त्विति** ॥ न तावदिह योषाग्निवाक्यवदिदं वाक्यं शक्यं दृष्टिविधानपरत्वेन नेतुम् । दृष्टफलत्वात् । तत्र हि वाक्यशेषे 'तद्य इत्थं विदुः' (छां. ५-१०-१, २) इति तद्दृष्ट्यधीनफलमुपासकानां ब्रह्मलोकप्राप्तिरित्युच्यते 'स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः' इत्युपसंहारात् । इह पुनः सद्ब्रह्मण एव तेजआदिस्रष्टृत्वं तस्यैव तत्र प्रवेशं च दर्शयित्वा 'तत्त्वमसि' इति सिद्धवद् दृष्टमेव सदात्मभावमुपदिशतीति वैषम्यम् । न च दृष्टिविधानपक्षे 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२) इति ज्ञानोपायोपदेशः संगच्छते, दृष्टिविधानेनैव वेदनसिद्धेः । न चोपदेशानन्तरं किञ्चिदनुष्ठेयमिहोपदिश्यते प्राप्तव्यं वा ; 'तद्धास्य विजज्ञौ' (छां. ६-१६-३) इति विज्ञानप्राप्तिमात्रेण परिसमाप्तिदर्शनात् । तस्मात् सूक्तमेतत् यत्तत्त्वमस्यादिवाक्यं सर्वप्रकारेणापि विचार्यमाणं न क्रियां कटाक्षेणापि वीक्षत इति । नन्वस्त्वेवं किमतः ? - इत्यत आह - **तदा प्रसङ्ख्यानादिव्यापारो दुःसंभाव्य इति** । यद्यपि प्रसङ्ख्यानमतमेवात्र निराकरणायोपात्तम्, तथापि क्रियाविधिमात्रे शक्यातिदेशनोऽयं न्याय इति मत्वा आह - **'प्रसङ्ख्यानादिव्यापार'** इति । प्रसङ्ख्यानादि इत्यादिपदेन - (१) वाक्यजन्यं ज्ञानं तद्भावनोपचयान्निःशेषमज्ञानमपनयति, (२) यद्यपि तत्त्वमसिवाक्यजन्यं ज्ञानं संसृष्टात्मकत्वान्न ब्रह्मात्मवस्तुयाथात्म्यावगाहि भवेत्, तथापि तदेवाभ्यासाद् विज्ञानान्तरमुत्पादयत्यवाक्यार्थबोधकम् - इति चैवमादिपक्षा अप्यनुष्ठेयक्रियानुप्रवेशद्वारेण तत्त्व-

मस्यादेः प्रामाण्यमीप्सन्तोऽत्र संगृहीता भवन्ति । उक्तार्थे श्लोकमवतारयति - **तदुच्यत इति** ।।

वस्त्वेकनिष्ठमिति ।। वाक्यं वस्तुमात्रे तात्पर्यवदिति चेदभ्युपगम्यते, तर्हि न तस्य क्रियार्थता संभवति । अयमाशयः - वाक्यगतानां पदानाम् अद्वितीयप्रत्यगात्मनि निश्चिते समन्वयेऽवगम्यमाने न क्रियापरत्वकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति । ननु वाक्यं वस्तुपरमित्यपि भवतु, पक्षे प्रसङ्ख्यानादिविधायकमपीति च ; उदितानुदितहोमविधिवाक्यवत् । तत्र को दोषः ? इत्याशङ्क्याह - **वस्तुनो ह्येकरूपत्वात् इति** ।। अयमाशयः । क्रियायां हि पुरुषतन्त्रायां विकल्पः संभवति एवं वा करोति, अनेवं वा इति ; न तु वस्तुनि । एकरूपत्वात् तस्य । न ह्येकस्मिन्नेव वस्तुनि स्थाणुर्वा पुरुषो वा इति तत्त्वज्ञानं भवति । तथा प्रकृतेऽपि अद्वयात्मकं वस्तु चेत् तस्यैकरूपत्वात् नित्यसिद्धैकस्वभावत्वात् न प्रसङ्ख्यानादिव्यापारायत्ता तत्सिद्धिः, प्रसङ्ख्यानादिव्यापारसाध्यं चेत् तन्न नित्यसिद्धम् ; न तु एकरूपं वस्तु नित्यसिद्धं व्यापारसाध्यं चेत्यर्धवैशसं भवतीति । अतः सूक्तं वस्तुमात्रनिष्ठं चेद् वाक्यं तस्य न क्रियार्थतापि स्यादिति । यद्यपि देवतादिवस्तुप्रमेयकं वाक्यम् उपासनादिक्रियापरमपि दृष्टम् । तथापि न तद् देवतैकनिष्ठम्, किं तर्हि उपासनादिक्रियानिष्ठम्, तच्छेषतयैव तु देवतां समर्पयतीति भावेन 'वस्त्वेकनिष्ठं चेत्' - इत्युक्तमिति ध्येयम् ।।८२।।

(मूलम्)

भिन्नविषयत्वाच्च न प्रमाणान्तरविरोधः । कथम् ? उच्यते -

अपूर्वाधिगमं कुर्वत् प्रमाणं स्यान्न चेन्न तत् ।
न विरोधस्ततो युक्तो विभिन्नार्थावबोधिनोः ।।८३।।

(क्लेशापहारिणी)

प्रमाणानां प्रमाणान्तरविरोधो नास्ति -

यत्र प्रमाणान्तरविरुद्धं वाक्यं तत्र दृष्टिविधानार्थता तस्य कल्प्या इत्युक्तमधस्तात्, प्रसङ्ख्यानवादव्यावृत्त्यर्थम् । प्रसङ्ख्यानवादी हि प्रत्यक्षादिविरुद्धत्वात् तत्त्वमस्यादिवाक्यम् उत्पन्नमात्रं न स्वार्थे प्रमामुत्पादयतीत्यतः प्रसङ्ख्यानविधिं कल्पयति । तत्र विरोधाभ्युपगमेऽपि दृष्टिविधानकल्पनं स्यात् न प्रसङ्ख्यानविधिकल्पनमित्युक्तम् । अथाभ्युपगमवादं परित्यज्य उपक्रान्तेन प्रक्रियावर्त्मना 'न प्रत्यक्षादिप्रमाणान्तरैर्विरोधगन्धोऽपि सम्भाव्यत' इति यत् प्रतिज्ञातम्, तदेवानुसृत्य वाक्यप्रत्यक्षयोर्विरोध एव नास्ति, कुतस्तदालम्ब्य प्रसङ्ख्यानकल्पनमित्याशयेनाऽऽह - **भिन्नविषयत्वाच्चेति** ।। तदेव कथमित्येतच्छङ्कामुत्थाप्य तदपनोदाय श्लोकमवतारयति - **कथम् ?** इति, **उच्यते** इति च ।।

अपूर्वाधिगममिति ।। अनधिगतार्थस्याधिगमयित्रेव हि प्रमाणं नाम, न चेत् अपूर्वार्थं अधिगमयति न तत् प्रमाणम् । एवं च प्रमाणानां प्रत्येकं स्वस्वविषयाधिगमे एव व्यापारात् विभिन्नार्थावबोधिनोः शब्दप्रत्यक्षयोः विरोधो न युक्तः । प्रत्यक्षं हि शब्दरूपादिपराग्विषयम् ; शब्दश्चाद्वितीयप्रत्यगात्मविषयः । तत्र कुतो विरोध ? - इति भावः ।।८३।।

(मूलम्)

य एवमपि भिन्नविषयाणां विरोधं वक्ति, सोऽत्रापि विरोधं ब्रूयात् -

नायं शब्दः कुतो यस्माद्रूपं पश्यामिचक्षुषा ।
इति यद्वत्तथैवायं विरोधोऽक्षजवाक्ययोः ।।८४।।

(क्लेशापहारिणी)

प्रमाणानां भिन्नविषयत्वमेव -

उक्तमविरोधं दृष्टान्तेन स्पष्टयति - **य एवमपीति ।।**

नायं शब्द इति ।। 'तथैवायं विरोधः' इति । शब्दश्रवणरूप-दर्शनयोर्भिन्नविषययोर्यथा विरोधो मुधैव विकल्प्यते, तथैवायं शब्दप्रत्यक्षयोरित्यर्थः ।।८४।।

(मूलम्)

प्रमाणानां सतां न विरोधः श्रोत्रादीनामिव भिन्नविषयत्वात् । ययोश्चाभिन्नविषयत्वं तयोराखुनकुलयोरिव प्रतिनियत एव बाध्य-बाधकभावः स्यात् । अतस्तदुच्यते -

प्रत्यक्षं चेन्न शाब्दं स्याच्छाब्दं चेदक्षजं कथम् ।
प्रत्यक्षाभासः प्रत्यक्षे ह्यागमाभास आगमे ।।८५।।

(क्लेशापहारिणी)

अभिन्नविषययोस्तु एकतरः प्रमाणाभासः -

प्रत्यक्षादीनां प्रमाणानां न विरोधः भिन्नविषयत्वादित्युक्तम् । प्रमाणाभासानां तु यथार्थप्रमाणबाध्यत्वमभ्युपगम्यत एवास्माभि-रपीत्यन्यदेतत् । तथा च तत्त्वमसीति वाक्यस्य प्रत्यक्षाद्यबाध्यत्वं सुस्थमित्याशयवानाह - **प्रमाणानां सताम्** इति ।। **ययोश्चाभिन्न-विषयत्वमिति** । प्रमाणप्रमाणाभासयोरिति शेषः । तत्र हि पूर्वां मतिं बाधित्वैवोत्तरा जायत इति प्रमाणाभासत्वं बाध्यस्येति श्लिष्यत इत्यर्थः । उक्तेर्थे श्लोकमवतारयति - **अतस्तदुच्यत इति ।।**

प्रत्यक्षं चेदिति ।। न हीन्द्रियजन्यं शब्देन जन्यते, न च चोदनानिमित्तं धर्मज्ञानं प्रत्यक्षादिनिमित्तैरपि जन्यते - इत्यभिप्रायः ।

तथा च **जैमिनीयं सूत्रम्** - 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्' इति (जै. सू. १-१-४) अनुमानादीनामपि प्रत्यक्षपूर्वकत्वात् शब्दमात्रनिमित्तेऽर्थे अनिमित्तम् इत्यपि द्रष्टव्यम् । इदमुक्तं भवति । यच्छब्देन बोध्यते न तत्प्रत्यक्षादिना बोध्यते बाध्यते वेति । यस्मात् प्रत्यक्षे विषये नागमः क्रमते । तस्य प्रत्यक्षसिद्धवादित्वे अनुवादकत्वप्रसङ्गात् ; तस्मात् यन्निरूपित-प्रत्यक्षसिद्धम्, नागमस्य तत्र प्रामाण्यं भवेत् । अतः प्रत्यक्षविरुद्ध आगमः आगमाभास एव । एवं प्रमाणभूते आगमे न प्रत्यक्षं क्रमत इति । तस्यापि तत्राभासत्वमेवेत्यर्थः । यथोक्तम् **उपदेशसाहस्र्याम्** - 'प्रत्यक्षादीनि बाधेरन् कृष्णलादिषु पाकवत् । अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम् ।।' (उप. १८-१८५) इति । तस्मात्, यत्र यत्र विरोध इव प्रमाणयोः, तत्र प्रत्यक्षयोरेव द्वयोः, आगमजन्ययोरेव द्वयोर्ज्ञानयोः विरोधः । तत्र यत्र प्रत्यक्षमेव ज्ञानद्वयम्, तत्र एकस्य प्रत्यक्षाभासत्वमिति बाध्यत्वम् । यथा शुक्तिकायामध्यारोपितरजतस्य । यत्र तु आगम-जन्यमेव ज्ञानद्वयम्, तत्रैकस्य दुर्बलस्यागमाभासत्वं बाध्यत्वं चेत्यन-वद्यम् । अत्रोत्तरार्धे छन्दोभङ्गो भुरिगनुष्टुब्लक्षणाङ्गीकारेण प्रतिसमाधेयः ।।८५।।

(मूलम्)

न च प्रतिज्ञाहेतुदृष्टान्तन्याय इह संभवति शब्दादीनां प्रत्येकं प्रमाणत्वात् । अत आह -

स्वमहिम्ना प्रमाणानि कुर्वन्त्यर्थावबोधनम् ।
इतरेतरसाचिव्ये प्रामाण्यं नेष्यते स्वतः ।।८६।।

(क्लेशापहारिणी)

न च संभूयकारित्वं प्रमाणानाम् -

नन्वेकविषयत्वेऽपि किमिति प्रत्यक्षस्य आगमस्य वा प्रमाणाभासत्वमास्थेयम् ? परस्परसहायकत्वेन सम्भूयकारित्वे विषयप्रतीतिदार्ढ्यमेव लभ्यते इति किं न स्यात् इत्याशङ्क्याऽऽह - **न चेति** ।। परार्थानुमाने 'पर्वतो वन्हिमान्' इति प्रतिज्ञा, 'धूमवत्त्वात्' इति हेतुना वन्हिः साध्यते, 'महानसवत्' इति दृष्टान्तेन लिङ्गलिङ्गिसंबन्धो नियमेनास्तीति निदर्शितो हेतुः साध्यसमर्पणे समर्थ इति स्थितिः । तत्र यथा प्रतिज्ञादयोऽन्योन्यापेक्षया पक्षस्य साध्यवत्त्वज्ञापने समर्था भवन्ति, एवं प्रकृतेऽपि शब्दप्रत्यक्षादयोऽप्यन्योन्यसहायाः प्रत्यगात्मतत्त्वमवबोधयन्ताम् इति शङ्कायामाह न चासौ न्याय इह संभवति । कुतः ? **शब्दादीनां प्रत्येकं प्रमाणात्वात्** । शब्दादयो हि स्वं स्वं प्रमेयं स्वातन्त्र्येणैव समर्पयन्तः प्रमाणतामश्नुवते । प्रतिज्ञादयस्तु सम्भूयैवानुमानाख्यं प्रमाणं समर्पयन्तीति वैषम्यमिति भावः । एतस्मिन्नर्थे श्लोकमवतारयति - **अत आहेति** ।।

स्वमहिम्नेति ।। प्रत्यक्षादीन्यपि प्रमाणानि स्वमहिम्ना अर्थावबोधनं कुर्वन्ति । इतरसाहाय्यनिरपेक्षमेव स्वमर्थम् अवबोधयदेव हि प्रमाणं नाम । प्रतिज्ञाहेतुदृष्टान्तन्यायमनुसृत्य इतरेतरसाचिव्येनैव प्रमाणानि स्वं स्वं विषयमवबोधयन्तीति पक्षे तु स्वतःप्रामाण्यं नेष्यत एवेति स्यात् । अयमाशयः - प्रसङ्ख्यानवादिनः प्राहुः "शब्दयुक्तिप्रसङ्ख्यानैरात्मना च मुमुक्षवः । पश्यन्ति मुक्तमात्मानं प्रमाणेन चतुष्पदा ।।"[1] इति । तत्र दूषणमेतत् न प्रत्येकं प्रामाण्यं स्यात् शब्दादेर्भवतः पक्षे चतुर्भिरपि पादैः संभूय प्रतिज्ञादिन्यायेन प्रमितिर्जन्यते इति वदतः । तच्चानिष्टम्, यतः प्रमाणं नाम स्वत एवान्यनिरपेक्षं स्वविषयावबोधकमिति । न च भवन्मतेऽपि पादास्ते मेयोपलब्धये

1. शास्त्रप्रकाशिकासंबन्धवार्तिकटीकाकारेण आनन्दज्ञानेन (सं.वा. ८१०) समुदाहृतोऽयं श्लोकः कुत्रत्य इति न विज्ञायते ।।

संहन्यन्ते, किं तु मित्युत्पत्तय एव । तदेतदुक्तं **संबन्धवार्तिके** "न संभूय यतः पादास्तैलवर्त्यग्नयो यथा । मितेः स्वरूपलाभाय न तु मेयोपलब्धये ॥" (सं. वा. ८११) इति ॥८६॥

(मूलम्)

न च सुखदुःखादिसंबन्धोऽवगत्यात्मनः प्रत्यक्षादिभिः प्रमाणैर्गृह्यते येन विरोधः प्रत्यक्षादिप्रमाणैरुद्घाट्यते । कथम् ? शृणु -

दुःखितावगतेश्चेत्[1] स्यान्न प्रमीयेत सात्मवत् ।
कर्मण्येव प्रमा न्याय्या न तु कर्तर्यपि क्वचित् ॥८७॥

(क्लेशपहारिणी)

वस्तुतो नैवास्ति दुःखितादिरात्मनः -

अहं दुःखीति प्रत्यक्षजेन ज्ञानेन सदसीति वाक्योत्थं ज्ञानं विरुध्यते इति शङ्कामुत्थाप्य भिन्नविषयत्वादक्षजागमजयोर्ज्ञानयोर्न विरोधोऽस्तीति परिहार उक्तः । वस्तुतस्तु सुखित्वदुःखित्वादेरात्मधर्मत्वं नैव प्रमाणसिद्धम् इतीदानीं विरोधशङ्का व्यपनीयत इत्याह - **न चेति** ॥ दुःखित्वमनात्मधर्म इति कथं ज्ञायते ? - इत्याशङ्कां परिहरन् श्लोकमवतारयति - **कथमिति शृण्विति च** ॥

दुःखित्वज्ञानेनप्रत्यक्षजेनागमजन्यं[2] ज्ञानं विरुध्यते इत्येतत् प्रसंख्यानवादिनो मतं निराकृतं प्रमाणवृत्तनिरूपणद्वारेण । भिन्नविषयत्वात् प्रत्यक्षागमयोर्न विरोधसंभवः, समानविषययोस्तु बाध्यबाधकत्वं स्यादेवेत्यतः आगमजन्यज्ञानेन सर्वं द्वैतं बाध्येतैवेति न दोषः - इति । सर्वमिदं प्रत्यक्षादिप्रमाणैरात्मनः सुखदुःखादिसंबन्धोऽस्तीति गम्यते इत्यभ्युपगम्य । वस्तुतस्तु तस्य स्वाऽऽत्मधर्मत्वं न केनापि

1. 'अवगतिः' इति पाठो न साधुः ॥

2. अत्र सम्बन्धोक्तेः व्याख्यानद्वयमस्ति - प्रकाशकः

प्रमाणेन गृह्यत इति परमसिद्धान्तमाह - **न चेति** ।। 'अवगत्यात्मनः' इति साभिप्रायं विशेषणम् । अवगतेः कदापि केनचिद्ग्राह्यत्वायोगात् । न हि धर्मिणोऽग्राह्यत्वे तद्धर्माणां ग्राह्यत्वं संभवति, संबन्धाग्रहणात् इत्यभिप्रायः । अभिप्रायमजानन् पृच्छति **कथमिति** । एतदुत्तरत्वेन श्लोकमवतारयति - **शृण्विति** ।।

दुःखितेति ।। दुःखिता यद्यवगतेः धर्मः स्यात् सा न केनचित् प्रमाणेन प्रमीयेत आत्मवदेव । आत्मा प्रमातृरूपो न तावत् स्वेन ग्राह्यः, कर्मकर्तृत्वविरोधात् ; नाप्यनात्मना प्रमाणेन । कुतः ? कर्मण्येव हि पराग्विषये प्रमा न्याय्या, न तु कर्तर्यपि प्रमातरि क्वचित् । लोकेऽपि हि प्रमाता प्रमेयपरिच्छित्तये प्रमाणान्यादत्ते, स्वयं तु प्रमाणव्यापारात् प्रागेव सिद्धः इति स्थितिः ; किमु वक्तव्यं नित्यावगतिरूपः प्रत्यगात्मा न केनचिदपि प्रमाणेन प्रमीयते इति । इत्थं च आत्मनोऽविषयत्वे सति न केनचित् प्रमाणेन तस्य प्रमेयता शक्यकल्पना स्यात् । अत एव तस्य दुःखित्वादिसंबन्धः केनचित् प्रमाणेन गृह्यत इति दुर्भणमित्यभिप्रायः । उपलक्षणमेतत् । आत्मज्ञानान्तत्वाच्च सर्वप्रमाणव्यवहारस्य इत्यपि द्रष्टव्यम् । प्रमातृत्वमेव ह्यात्मनो निवर्तयत्यागमः । तत्र कुत एव प्रमाणव्यापाराशङ्केति ।।८७।।

(मूलम्)

अभ्युपगमेऽपि च प्रसङ्ख्यानशतेनापि नैव त्वं सम्भावितदोषान्मुच्यसे । अत आह -

प्रमाणबद्धमूलत्वाद्दुःखित्वं केन वार्यते ।
अग्न्युष्णवन्निवृत्तिश्चेन्नैरात्म्यं ह्येति सौगतम् ।।८८।।

(क्लेशापहारिणी)

वास्तवं नैव प्रसंख्यानादिना बाध्यते -

अपि चाभ्युपगमेऽपि दुःखित्वादेरात्मधर्मत्वस्य न कश्चिल्लाभः प्रसङ्ख्यानवादिनः, प्रत्युत अनिष्टप्राप्तिरपीत्याह - **अभ्युपगमेऽपीति** ।। उक्तार्थोपपादकं श्लोकमवतारयति - **अत आहेति** ।।

प्रमाणबद्धमूलत्वादिति ।। प्रमाणेन रूढमूलत्वात् आत्मस्वभावभूतं सत् दुःखं केन प्रसङ्ख्यानेन तदन्येन वा उपायेन वार्यते निवर्त्यते ? न केनापि निवर्त्येतेत्यर्थः । तत्र दृष्टान्तः - **अग्न्युष्णवदिति** ।। न ह्यग्नेः स्वभावभूतम् औष्ण्यं केनाप्युपायेन निवर्त्येत । अथ तस्यापि कथञ्चित् निवृत्तिश्चेत् भविता सहैव धर्मिणाग्निना निवृत्तिः स्यात् । एवम् आत्मनश्चेत् स्वभावभूतं दुःखित्वं निवर्त्यत इति कल्प्येत, तर्हि सहैवाऽत्मना निवर्त्येत ; तथा हि सौगतं सुगतानुयायिमतं नैरात्म्यम् एति । न चैतदिष्टं भवत इति भावः । तदेतदुक्तं **संबन्धवार्तिकेऽपि** - 'आत्मा कर्त्रादिरूपश्चेन्मा काङ्क्षीस्तर्हि मुक्तताम् ।। न हि स्वभावो भावानां व्यावर्त्येतौष्ण्यवद्रवेः । स्वभावाद् विनिवृत्तोऽर्थो निःस्वभावः खपुष्पवत् ।। नाविनश्यन् यतो वन्हिर्व्यावर्त्येतौष्ण्यतः क्वचित् ।।' (सं. वा. ५५-५७) इति ।।८८।।

(मूलम्)

अथ मतम् -

निराकुर्यात् प्रसङ्ख्यानं दुखित्वं चेत् स्वनुष्ठितम् ।
प्रत्यक्षादिविरुद्धत्वात् कथमुत्पादयेत् प्रमाम् ।।८९।।

(क्लेशापहारिणी)

प्रत्यक्षविरुद्धं प्रसंख्यानं न प्रमाणम् -

ननु सम्यगनुष्ठितं प्रसङ्ख्यानं प्रत्यक्षावगतमपि दुःखित्वं विनिवर्तयेदिति यो वैयात्याद् वदेत् तं प्रति श्लोकान्तरमवतारयति - **अथ मतमिति** ।।

निराकुर्यादिति ।। यदि नाम प्रत्यक्षविरुद्धमपि ज्ञानम् उत्पादयेत् प्रसङ्ख्यानम्, तर्हि भावनामात्रफलत्वात् नैव तज्ज्ञानं यथार्थं भवेदित्यभिप्रायः । अथ प्रमाणमेव प्रसङ्ख्यानमित्यभिनिवेशः, तर्हि यथैव शास्त्रं प्रत्यक्षविरोधान्न प्रमामुत्पादयति, एवमेव प्रत्यक्षविरोधादेव प्रसङ्ख्यानमपि नैव प्रमामुत्पादयेत् इत्यपि द्रष्टव्यम् ।।८९।।

(मूलम्)

ननु प्रसङ्ख्यानं नाम तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्ध्याम्रेडनमभिधीयते । तच्चानुष्ठीयमानं प्रमितिवर्धनया परिपूर्णां प्रमितिं जनयति न पुनरैकाग्र्यवर्धनया ; यथा अशेषाशुचिनीडे स्त्रीकुणपे कामिनीति निर्वस्तुकः पुरुषायासमात्रजनितः प्रत्यय इति ।। तन्न, यतः -

अभ्यासोपचयाद्बुद्धेर्यत् स्यादैकाग्र्यमेव तत् ।
न हि प्रमाणान्यभ्यासात् कुर्वन्त्यर्थावबोधनम् ।।९०।।

अभ्यासोपचिता कृत्स्नं भावना चेन्निवर्तयेत् ।
नैकान्तिकी निवृत्तिः स्याद्भावनाजं हि तत्फलम् ।।९१।।

(क्लेशापहारिणी)

प्रसंख्यानं न ज्ञानफलम् -

अथ प्रसङ्ख्यानवादी पुनः प्रत्यवतिष्ठते - **नन्विति** ।। प्रसङ्ख्यानं शब्दयुक्त्याम्रेडनं तयोरभ्यासः । तच्च प्रमितिवर्धनया परिपूर्णां प्रमितिं जनयति, न पुनरैकाग्र्यवर्धनया इति । ऐकाग्र्यवर्धनायां निदर्शनम् '**यथाशेषाशुचिनीडे**' इति । स्त्रीकुणपे हि 'कमनीयेयम्' इति प्रत्ययो निर्वस्तुकः विकल्पमात्रम् । यस्मात् पुरुषायासमात्रजनितः सः, न तु वस्तुतन्त्र इत्यर्थः । इह पुनः प्रसङ्ख्यानं 'शब्दयुक्तिप्रसङ्ख्यानैः'

इति प्रागुदाहृतनीत्या पादचतुष्टयात्मकप्रमाणांशः ; तत्रैकैकस्मात् पादात् प्रमितेर्वृद्धिरित्यभ्युपगम्यत इति विशेषः । तत्र शब्दस्तत्त्व-मस्यादिः परोक्षज्ञानजनकः ; युक्तिरन्वयव्यतिरेकन्यायानुसरणम् ; प्रसङ्ख्यानं तु तदुभयाभ्यासरूपं निदिध्यासनशब्दवाच्यम् ; आत्मा च पादत्रितयजन्योऽनुभवः, विगलितसंसर्गपारोक्ष्यरूपः । एवं चतुष्पान्मानैकत्वं बोध्यत इति न कोऽप्यत्र दोषः । ऐकाग्र्यवर्धनया हि पूर्वश्लोकोक्तदूषणं लब्धप्रसरं भवेदिति भावः । तदेतन्निरासार्थत्वेन श्लोकद्वयमवतारयति - **तत्र, यतः** - इति ।।

अभ्यासोपचयादिति ।। प्रसङ्ख्यानं नामाभ्यासः । न च प्रमाणस्याभ्यासात् प्रमेये अतिशयो जायते । शब्दयुक्त्यादीनां प्रत्येकं प्रमाणत्वे प्रत्येकमेव स्वस्वप्रमेयसिद्धौ स्वान्यसहायत्वं किमर्थम् ? संभूयैव प्रमाणत्वे प्रत्येकं प्रमितिवृद्धिरिति न सङ्गच्छते इत्यादिकं दूषणं संबन्धवार्तिकानुसारेण अनुसंधेयम् । तस्मात्, बुद्धेरुपचयाद् यत् स्यात् तदैकाग्र्यमेव भावनारूपमेव, न प्रमितिरूपमित्यर्थः ।।९०।।

नन्वस्तु भावनैवैषा इति । ततोऽपि किम् ? इत्यत आह **अभ्यासोपचितेति** ।। कृत्स्नं दुःखित्वम् अभ्यासोपचिता भावनैव निवर्तयेच्चेत्, सा निवृत्तिः, नैकान्तिकी स्यात् । नात्यन्तिकी नियमेन पुनरावृत्तिरहितैवेति न स्यात् । हि यस्मात् तत्फलं दुःखनिवृत्तिरूपं भावनाजं तदा स्यात् ; न च भावना वस्तुतत्त्वं स्पृशतीति भावः ।।९१।।

(मूलम्)

अपि चाह -

दुःख्यस्मीत्यपि चेद्ध्वस्ता कल्पकोट्युपबृंहिता ।
स्वल्पीयोऽभ्यासजा स्थास्न्वी भावनेत्यत्र का प्रमा ।।९२।।

ननु शास्त्रात् स्थास्नुत्वं भविष्यति । नैवम् । यथावस्थितवस्तु-

याथात्म्यावबोधमात्रकारित्वात् शास्त्रस्य । न हि पदार्थशक्त्याधानकृच्छास्त्रम् । प्रसिद्धं च लोके -

भावनाजं फलं यत् स्याद्यच्च स्यात्कर्मणः फलम् ।
न तत् स्थास्न्विति मन्तव्यं द्रविडेष्विव सङ्गतम् ॥९३॥

(क्लेशापहारिणी)

भावनाजं फलं न स्थास्नु -

भावनाजन्यफलस्यानैकान्तिकत्वे युक्तिरुत्तरश्लोकेनोच्यत इत्याह - **अपि चाहेति** ॥

'दुःख्यस्मी'ति ॥ कल्पकोटिभिरुपबृंहिता अनादिकालेनोपचिता 'दुःख्यस्मी'ति भावना प्रसङ्ख्यानेन भावनात्मकेन ध्वस्ता चेत् स्वल्पीयोऽभ्यासजा अत्यल्पकालानुष्ठितशब्दयुक्त्यभ्यासजन्या भावना स्थास्न्वी न विनश्यतीत्यत्र का प्रमा ? न तत्र प्रमाणं संभावयाम इत्यर्थः ॥९२॥

शास्त्रमेव तस्य स्थास्नुत्वे प्रमाणमिति शङ्कयति - **नन्विति** ॥ 'न च पुनरावर्तते' (छां. ८-१५-१) इति शास्त्रप्रामाण्यादेव भावनाजन्यस्यापि फलस्य स्थायित्वं भविष्यतीति चेन्मन्यसे इत्यर्थः । परिहरति - **नैवमिति** ॥ तत्र हेतुमाह - **यथावस्थितेति** ॥ सिद्धवस्तुव्यञ्जकं मानम्, न पदार्थशक्त्याधानकृत् । अतः शास्त्रमपि न कृतकस्य नित्यतामाधातुमलमित्यभिप्रायः । 'नास्त्यकृतः कृतेन' (मुं. १-२-१२) (इति न्यायोपबृंहितश्रुतिविरोधात्, अनावृत्तिश्रुतिर्भावनाजन्यस्य नित्यतां बोधयितुं न शक्नोति । तस्याः ब्रह्मज्ञानद्वारेणाप्यनावृत्तिज्ञापनपरत्वोपपत्तेः । 'इह न पुनरावृत्तिः' (बृ. मा. ६-१-१८), 'इमं मानवमावर्तं नावर्तन्ते' (छां. ४-१५-५) इति विशेषणदर्शनात् वा कालान्तरे आवृत्तिरेव श्रुत्या बोध्यत इत्यपि

शक्यमनावृत्तिश्रुतिव्याख्यानं कर्तुम् इति भावः । अपि च दृष्टमेव लोके भावनाजन्यस्यानित्यत्वम् । तद्विरोधादपि न शास्त्रान्नित्यत्वमेष्टव्यं तस्येत्यस्मिन्नर्थे श्लोकमवतारयति - **प्रसिद्धं चेति** ।।

भावनाजमिति ।। श्लोकः स्पष्टार्थः ।।९३।।

(मूलम्)

यद्यपि प्रत्यक्षादिप्रमाणोपात्तमात्मनो दुःखित्वम्, तथापि तत्त्वमस्यादिवाक्योत्थप्रत्यय एव बलीयान् इति निश्चयः । अव्यभिचारिप्रामाण्यवाक्योपात्तत्वात् । प्रमेयस्य च स्वत एव निर्दुःखित्वसिद्धेः । प्रत्यक्षादेस्तु व्यभिचारित्वात् सम्भावनायाश्च पुरुषपरिकल्पनामात्रावष्टम्भत्वाच्चेति ।।

निर्दुःखित्वं स्वतःसिद्धं प्रत्यक्षादेश्च दुःखिता ।
को ह्यात्मानमनादृत्य विश्वसेद् बाह्यमानतः ।।९४।।

संबन्धार्थ एव -

अपि प्रत्यक्षबाधेन प्रवृत्तिः प्रत्यगात्मनि ।
पराञ्चि खानीत्येतस्माद् वचसो गम्यते श्रुतेः ।।९५।।

(क्लेशापहारिणी)

वाक्यप्रत्यक्षयोर्विरोधे वाक्यस्य प्राबल्यम् -

प्रत्यक्षादिविरुद्धत्वे शास्त्रस्य दौर्बल्यमङ्गीकृत्य दृष्टिविधानार्थत्वं तस्य कल्पनीयमित्युक्तम् 'प्रत्यक्षादिविरुद्धं चेत्' (३-८१) इत्यत्र । दुःखित्वं प्रत्यक्षादिसिद्धं चेत् प्रसंख्यानेन तत्रैव निवर्त्येत इति चोक्तम् 'प्रमणबद्धमूलत्वात्' (३-८८) इत्यत्र । अथेदानीं पुनरपि प्रत्यक्षादीनां परस्परविरोधाङ्गीकारपक्षेऽपि वाक्योत्थप्रत्यय एव तद्बाधको

भविष्यतीत्युच्यते हेत्वन्तरावष्टम्भेन । तदाह - **यद्यपीति** ।। वाक्योत्थ-प्रत्यय एव बलीयानिति कुतः ? - इत्यत आह - **अव्यभिचारि-प्रामाण्यवाक्योपात्तत्वादिति** । अपौरुषेयत्वेनासम्भावितदोषत्वात् अप्रामाण्यकारणाभावाच्चेति भावः । उक्तं हि 'विप्लवते हि खल्वपि कश्चित् पुरुषकृतात् वचनात् प्रत्ययः । न तु वेदवचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्ति' (शा. भा. १-१-२) इति । इतश्च वाक्यप्रत्ययस्य प्राबल्यम् इत्याह - **प्रमेयस्य चेति** । न केवलं प्रमाणस्य निर्दुष्टत्वात् ; किं तर्हि प्रत्यग्दृष्ट्या निरूप्यमाणस्याऽऽत्मनः स्वत एव दुःखिसाक्षित्वात् निर्दुःखित्वं सिद्ध्यतीत्यतोऽपीत्यर्थः । एतच्चोक्तं **द्वितीयाध्याये** । 'दुःखिनः साक्षिताऽयुक्ता साक्षिणो दुःखिता तथा' (२-७६) इत्यत्र । ननु प्रत्यक्षादेरपि प्रमाणत्वात् कथं तस्य दौर्बल्यम् ? तत्राह - **प्रत्यक्षादेस्तु व्यभिचारित्वादिति** । उक्तं हि **वृत्तिकारेण** 'तस्य निमित्तपरीष्टिः' (जै. १-१-३) इति सूत्रव्याख्यानावसरे 'शुक्तिका हि रजतवत् प्रकाशते यतः । तेन प्रत्यक्षं व्यभिचरति । तन्मूलाच्चानुमानादीन्यपि' इति । ननु वाक्यस्यापि व्यभिचारित्वं संभाव्यते लौकिकवचनसाम्यात् इत्यत आह - **सम्भावनायाश्चेति** । न हि पौरुषेयवाक्यसाम्यादपौरुषेयस्यापि तत्सम्भावनं युक्तं भवेत् इति भावः । तदप्युक्तम् **आचार्येण शबरस्वामिना** 'न ह्यन्यस्य वितथभावेऽन्यस्य वैतथ्यं भवितुमर्हति । अन्यत्वादेव । न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुमर्हति । अपि च पुरुषवचनसाधर्म्याद् वेदवचनं वितथ-मित्यनुमानं व्यपदेशात् अवगम्यते । प्रत्यक्षस्तु वेदवचनेन प्रत्ययः' (शा. भा. १-१-२) इति ।।

तत्र प्रमेयस्वभावपर्यालोचनया वचनस्य प्राबल्यमुपन्यस्यति श्लोकेन - **निर्दुःखित्वमिति** ।। न ह्यात्मानुभवात् प्रबलतरं

बाह्यमानमिति युक्तिमत् । प्रमाणानामप्यात्मानुभवादेव सिद्धे-रित्यर्थः ।।९४।।

इदानीं प्रत्यक्षस्य सदोषत्वं श्रुत्यैव दर्शितमिति श्रुत्यर्थापत्त्यापि वचसः प्राबल्यं कथयति श्लोकः । तदाह - **संबन्धार्थ एवेति** ।। पूर्वश्लोकसंबन्धग्रन्थस्थो योऽर्थः, वाक्योत्थप्रत्यय एव प्रत्यक्षादे-र्बलीयानिति, तस्मिन्नेवार्थे प्रमाणमुच्यत इत्यर्थः ।।

अपि प्रत्यक्षबाधेनेति ।। प्रत्यक्षबाधेनापि प्रत्यगात्मनि वचसः प्रवृत्तिः इत्येतत् 'पराञ्चि खानि' (का.) इत्येतस्मात् श्रुतिवचनाद् गम्यते ; इन्द्रियाणां पराग्विषयत्वकथनपूर्वकम् आत्मज्ञानकारणत्वा-भावम् उद्घोष्य तेभ्यो व्यावृत्यैव प्रत्यग्दर्शनं कर्तव्यमिति सुस्पष्ट-मुपदेशात् इत्यर्थः । 'पराञ्चि खानि व्यातृणत् स्वयम्भूस्तस्मात् पराक्पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तच-क्षुरमृतत्वमिच्छन् ।।' (का. २-१-१) इति हि श्रुतिः ।।९५।।

---

१९. प्रत्यक्षविरोधपरिहारः

(मूलम्)

अभ्युपगम्यैवमुच्यते न तु प्रमाणं सत् प्रमाणान्तरेण विरुध्यत इत्यसकृदवोचाम । यत्रापि वाक्यप्रत्यक्षयोर्विरोधाशङ्का तत्रापि पुरुषमोहवशादेव सा जायते न तु परमार्थत इति । अत आह -

प्रमां चेज्जनयेद् वाक्यं प्रत्यक्षादिविरोधिनीम् ।
गौणीं प्रत्यक्षतां ब्रूयान्मुख्यार्थासंभवाद् बुधः ।।९६।।

तस्यार्थस्य सुखप्रतिपत्त्यर्थमुदाहरणम् -

अग्निः सम्यगधीतेऽसौ जहासोच्चैश्च मञ्चकः ।
यथा तद्वदहंवृत्त्या लक्ष्यतेऽनर्हयापि सः ॥९७॥

(क्लेशापहारिणी)

वाक्यविरुद्धत्वाभासे प्रत्यक्षं गौणमेव -

यद्यपि तत्र तत्रैवं प्रत्यक्षविरोधमभ्युपगम्यैव वाक्यस्य प्रामाण्यं साध्यते, तथापि नास्माकमत्र निर्भरः । प्रमाणं सत् प्रमाणान्तरेण नैव विरुध्यते, स्वविषयशूरत्वात् प्रमाणानाम् इति परमसिद्धान्तमेवावलम्ब्याऽऽह - अभ्युपगम्येति ॥ यद्यपि 'अपूर्वाधिगमं कुर्वत् प्रमाणं स्यात् ' (३-८३) इत्यादिग्रन्थैरसकृदुक्तमेतत् पूर्वमपि, तथापि यत्रापि वाक्यप्रत्यक्षयोर्विरोधाशङ्का मोहवशाज्जायते, तत्र प्रत्यक्षस्य गौणत्वेनापि प्रवृत्तिसम्भवात् नास्ति वस्तुवृत्तेन विरोध इति वक्तुमयमारम्भः - इति न पुनरुक्ततेति द्रष्टव्यम् ॥

'प्रमां चेत्' इत्यादिश्लोकः स्पष्टार्थः ॥९६॥

गौणार्थस्य सुखप्रतिपत्त्यर्थं दृष्टान्त आनीयते श्लोकेनेत्याह - तस्यार्थस्येति ॥

अग्निरिति ॥ यथा 'अग्निरसौ सम्यगधीते' इत्यत्र अग्नेरचेतनत्वात् अध्येतृत्वानुपपत्त्या अग्निशब्देन गौण्या वृत्त्या माणवको लक्ष्यते, यथा च 'मञ्चक उच्चैर्जहास' इत्यत्र मञ्चकस्याचेतनत्वात् हासकर्तृत्वानुपपत्त्या, मञ्चकशब्देन तत्स्थः पुरुषो लक्ष्यते, तद्वत् अहंवृत्त्यापि अनात्मभूतया ब्रह्मात्मत्वानर्हयापि स प्रत्यगात्मा लक्ष्यते - इत्यर्थः ॥९७॥

(मूलम्)

कस्मात् पुनः कारणात् साक्षादेव आत्मा नाभिधीयते किमनया

कल्पनयेति ? तत्राऽऽह -

त्वमित्येतत् विहायान्यन्न वर्त्माऽऽत्मावबोधने।
समस्तीह त्वमर्थोऽपि गुणलेशेन वर्तते ॥९८॥

(क्लेशापहारिणी)

अहंवृत्त्यैव आत्मा ज्ञेयः -

अहंवृत्तेः साक्षादात्मधर्मत्वाभावेऽपि तस्या एवात्मस्वरूपोपदेशार्थमादाने कारणमुत्तरश्लोकेनोच्यते । तत् प्रदर्शयितुं पातनिकां करोति प्रश्नोद्भावनेन - **कस्मादिति** ॥ कस्मान्नाभिधीयते साक्षाद्वाचकशब्दान्तरेण, किमित्यनर्हयापि अहंवृत्त्या लक्ष्यते ? - इति प्रश्नार्थः । प्रश्नोत्तरत्वेन श्लोकमवतारयति - **तत्राहेति** ॥

त्वमित्येतदिति ॥ आत्मज्ञापने त्वमित्येतत् अहंविशिष्टात्मवाचकं पदं विहाय अन्यद् वर्त्म मार्गान्तरम् न समस्ति, पदान्तरं साक्षादात्माभिधायकं नान्यत् संभवतीत्यर्थः । अत्र हेतुस्त्वनुपदमेव वक्ष्यत इति भावः । यदि पदान्तरं नास्ति, तर्हि त्वंपदमेव कुतो गृह्यत इति ? तत्राह - **त्वमर्थोऽपीति** । त्वंपदार्थभूता अहंवृत्तिरपि गुणलेशेन आत्मलक्षणत्वे समर्था वर्तते । उक्तं हि गुणलेशवत्त्वं तस्मिन् **द्वितीये** 'प्रत्यक्त्वादतिसूक्ष्मत्वादात्मदृष्ट्यनुशीलनात्' (२-५५) इति । तस्मात् पदान्तरस्य साक्षादात्मवाचकस्य अभावात्, अहंवृत्तेर्लक्षणया वृत्त्या तत्समर्पणे शक्तत्वाच्च त्वंपदमेवात्र गृह्यत इत्यभिप्रायः ॥९८॥

(मूलम्)

कस्मात् पुनर्हेतोर्ह्यहमित्येतदपि गुणलेशेन वर्तते, न पुनः साक्षादेवेति ? विधूतसर्वकल्पनाकारणस्वाभाव्यादात्मनः । अत आह -

व्योम्नि धूमतुषाराभ्रमलिनानीव दुर्धियः ।
कल्पयेयुस्तथा मूढाः संसारं प्रत्यगात्मनि ॥९९॥

(क्लेशापहारिणी)

अहंवृत्तिरपि गुणलेशेनैव -

प्रत्यग्वाचित्वाद् यदि त्वंपदमहंपदं वा गृह्यते, तर्हि तत एव प्रत्यगात्मवाच्यपि साक्षात् तदिति स्वीक्रियताम्, किं लक्षणावृत्त्याश्रयणायासेनेति शङ्कते - **कस्मात् पुनरिति** ॥ परिहरति - **विधूतेत्यादिना** ॥ विकल्पनाकारणं जातिद्रव्यगुणक्रियासंबन्धान्यतरलक्षणं शब्दप्रवृत्तिनिमित्तम् ; स्वभावत एव तद्राहित्यादात्मनो न केनापि शब्देन वाच्यत्वमस्ति । अत उच्यते - **गुणलेशेन वर्तत** इतीत्यभिप्रायः । एतस्मिन्नर्थे श्लोकमवतारयति - **अत आहेति** ॥

व्योम्नीति ॥ यथा धूमादिसंबन्धं व्योम्नि कल्पयन्ति बालाः, तथा प्रत्यगात्मस्वभावानभिज्ञा मूढा अपि त्वमहंशब्दवाच्यं संसारं तस्मिन् कल्पयन्ति । तस्मात्, यथा धूमादिसंसर्गनिषेधमुखेनाऽऽकाशस्वरूपं प्रत्याययन्ति विवेकिनः तथा अहंशब्दवाच्यसंसारित्वनिषेधेन प्रत्यगात्मस्वरूपं प्रत्याययितुं तत्र त्वमहमादिपदानि प्रयुञ्जते गुणलेशनिमित्तेन, न त्वहंशब्दप्रवृत्तिनिमित्तमपि विवक्षन्तीत्यभिप्रायः ॥९९॥

(मूलम्)

ननु सर्वकल्पनानामध्यात्मन्यत्यन्तासम्भवे समाने, अहंवृत्तौ कः पक्षपाते हेतुः येन वृत्त्यन्तराणि विधूयाहंवृत्त्यैव आत्मा उपलक्ष्यत इति ? उच्यते -

चिन्निभेयमहंवृत्तिः प्रतीचीवाऽऽत्मनोऽन्यतः ।
पूर्वोक्तेभ्यश्च हेतुभ्यस्तस्मादात्माऽनयोच्यते ॥१००॥

वृत्तिभिर्युष्मदर्थाभिर्लक्ष्यते चेद्दृशिः परः ।
अनात्मत्वं भवेत् तस्य वितथं च वचः श्रुतेः ।।१०१।।

यथोक्तेन -

अनेन गुणलेशेन ह्यत्यहंकर्तृकर्मया ।
लक्ष्यतेऽसावहंवृत्त्या नाञ्जसाऽत्राभिधीयते ।।१०२।।

नाञ्जसाऽत्राभिधीयत इति को हेतुरिति चेत् -

षष्ठीगुणक्रियाजातिरूढयः शब्दहेतवः ।
नात्मन्यन्यतमोऽमीषां तेनाऽऽत्मा नाभिधीयते ।।१०३।।

(क्लेशापहारिणी)

अहंवृत्तेरपि लक्षणत्वे हेतुः -

ननु यथैवायमात्मा अहंशब्दप्रवृत्तिनिमित्तरहितः, तथैव प्राणेन्द्रियदेहकलादिशब्दप्रवृत्तिनिमित्तरहितः । तत् कस्मात् हेतोरहंवृत्त्यैवोपलक्ष्यते, न तु वृत्त्यन्तरेणापीत्याशङ्कते - **नन्विति** ।। शङ्कापरिहाराय श्लोकमवतारयति - **उच्यत** इति ।।

चिन्निभेयमिति ।। इयं ह्यहंवृत्तिः चिन्निभा चिदाभासा यतोऽतः आत्मनोऽन्यतः स्वस्मादन्यस्मादनात्मनः, स्वान्यापेक्षया इति यावत् । प्रतीचीव भाति । एतदुक्तं प्रागेव - 'तदिद्धा धीः प्रत्यगात्मेव लक्ष्यते' (३-७१) इति । न केवलं चिन्निभत्वात्, किं तर्हि, पूर्वोक्तेभ्यश्च द्वितीयाध्यायोक्तेभ्यो हेतुभ्यः 'नाज्ञासिषमिति प्राह' (२-५४) 'प्रत्यक्त्वादतिसूक्ष्मत्वात्' (२-५५), 'आत्मना चाविनाभावम्' (२-५६) इति परिगणितेभ्यो हेतुभ्यः, स्वेतरापेक्षया प्रतीचीव भाति । तस्मात् आत्मा अनया वृत्त्या उच्यते लक्ष्यते इत्यर्थः ।।१००।।

युष्मद्वृत्त्या उच्यमाने दोषः -

वृत्तिभिरिति ।। अहंवृत्तिं विहाय युष्मदर्थाभिः पराग्वस्तुविषयाभिर्वृत्तिभिः परो दृशिः परमात्मा लक्ष्यते चेत् तद्वाचकाः शब्दा यदि लक्षणार्था गृह्येरन् इत्यर्थः । तर्हि गङ्गायां घोष इत्यादिस्थले इव लक्ष्यार्थस्य तस्य अनात्मसंबद्धत्वात् अनात्मत्वमेव स्यात्, तथा च तद्वादिन्याः श्रुतेर्वचः वितथम् अयथार्थं च स्यात् । तस्मात्, 'अयम्', 'असौ', 'सः' - इत्याद्यभिधानोपलक्ष्याभिरन्याभिर्वृत्तिभिर्नोपलक्ष्यते परमात्मा उपनिषत्सु इत्यर्थः । इदमत्र बोध्यम् - सर्ववेदान्तेषु प्रत्यक्त्वेन वेद्यतैव प्रदर्श्यते परमात्मनः अहमिति, न बहिर्वेद्यता 'असावयम्' इति, बाह्यपदार्थप्रकाशकवृत्तिभिर्हि प्राधान्यतः अनात्मैव बोध्यत इति कृत्वेति । तेन 'तत्त्वमसि', 'अयमात्मा ब्रह्म' - इत्यादिवाक्येषु श्रोतृप्रत्यगात्मत्वेनैव ब्रह्मणो विवक्षणात्, 'अहम् ' इत्यस्मच्छब्दानादानेऽपि न दोषः । यद्यपि अहंवृत्तेरप्यनात्मत्वमस्त्येव तथापि तस्य स्वान्यापेक्षया प्रत्यक्त्वादात्मानात्मोभयोपरागात्, केवलबाह्यविषयत्वाशङ्काहेतोरभाव इति बोध्यम् ।। १०१।।

अहंवृत्तिरपि न मुख्यवृत्त्या -

उपपादितम् अहंवृत्तेरात्मोपलक्षणार्हत्वमुपसंहरन्, यत्तदुक्तम् 'अभिधाश्रुतेः प्रामाण्यं सुप्तपुरुषबोधकवाक्यस्येव वक्तव्यमित्ययमारम्भः' (३-४७) इति, तन्निरूपणाय बीजावापं करोति - **यथोक्तेनेति** ।। 'गुणलेशेन' इति श्लोकस्थेनास्य संबन्धः ।।

अनेनेति ।। अनेन यथोक्तेन प्रत्यक्त्वादिरूपेण गुणलेशेन अत्यहंकर्तृकर्मया परित्यक्ताहंशब्दवाच्यार्थान्तर्गताहंवृत्त्याश्रयविषयतया ; केवलप्रत्यक्तामात्रावबोधिन्या इति यावत् । ईदृश्या अहंवृत्त्या असौ प्रत्यगात्मा लक्ष्यते, न तु अञ्जसा मुख्यवृत्त्या अभिधीयते इत्यर्थः ।।१०२।।

शब्दप्रवृत्तिनिमित्ताभावात् लक्षणाश्रयणम् -

न केवलम् अहंवृत्तिवाचकेन शब्देन, अपि तु न केनचिदपि शब्देनाभिधातुं शक्यम् आत्मतत्त्वम् । अतोऽपि लक्ष्यत्वमेवाश्रयणीयमिति वक्तुं प्रश्नमुत्थाप्य तदुत्तरत्वेन श्लोकमवतारयति - **नाञ्जसेति** ।।

षष्ठीति ।। षष्ठी षष्ठ्यर्थः संबन्धः, यथा धनी, गोमान् इत्यादौ धनादिसंबन्धः शब्दप्रवृत्तिनिमित्तम् । नात्मनि कस्यचित् संबन्धोऽस्ति ; एकत्वात् । नापि गुणवत्त्वम्, येन नीलादिशब्दैरुच्येत, उत्पलादिवत् । नापि क्रियावत्त्वम्, येन पाचकादिवत् क्रियाद्वारेणोऽच्येत । नापि जातिः, येन गोत्वाश्वत्वादिमत्त्वनिमित्तेन गवादिशब्दैरुच्येत । नापि रूढिः, जलाकाशादिवत्, सर्वव्यवहारातीतत्वात् । अतः सूक्तममीषां शब्दप्रवृत्तिहेतूनाम् अन्यतमोऽपि नात्मन्यस्तीत्येतेनापि कारणेन आत्मा अहंवृत्त्या नाञ्जसाऽभिधीयते इतीत्यर्थः । न च तर्हि आत्मशब्दवाच्यत्वमपि न स्यात् तस्येति शङ्क्यम् । अभ्युपगमात् । तेनापि परागर्थस्यैवाभिधीयमानत्वात् ; यथोक्तं **छान्दोग्यभाष्ये** - 'देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत् परिशिष्टं तत् अवाच्यमपि प्रत्याययति' (छां. भा. ७-१-३) इति । तदेतदिहापि अनुपदमेव स्फुटयिष्यतीत्यास्तां तावत् ।।१०३।।

---

२०. शब्दादात्मनि सम्यग्ज्ञानोत्पत्तिप्रकारः

(मूलम्)

यदि शब्दोऽभिधानाभिधेयत्वसंबन्धाङ्गीकारेण नात्मनि वर्तते, कथं शब्दात् 'अहं ब्रह्मास्मि' इति सम्यग्बोधोत्पत्तिः ? उच्यते -

असत्ये वर्त्मनि स्थित्वा निरुपायमुपेयते ।
आत्मत्वकारणाद् विद्मो गुणवृत्त्या विबोधिताः ॥१०४॥

(क्लेशापहारिणी)

कल्पितस्यापि लक्षणत्वसंभवः -

यदि केनचित् शब्देन नाभिधीयते परमात्मतत्त्वम्, तर्हि वाक्यार्थोऽपि न स्यादित्याशङ्कते - **यदीति** ॥ न हि सर्वथा अवाच्यस्य केनचिल्लक्ष्यत्वमपि दृष्टं क्वचित् । तथा च लक्ष्यलक्षण-भावस्यैवाभावे सति कथं शब्दात् वाक्यलक्षणात्, अहं ब्रह्मास्मीति सम्यग्बोधोत्पत्तिः ? इति शङ्कार्थः । श्लोकेनैतत् प्रत्युच्यत इत्याशयेनाऽऽह - **उच्यत इति** ॥

असत्ये वर्त्मनीति ॥ अपरमार्थे एवाहंवृत्तिरूपे मार्गे स्थित्वा, निरुपायं केनचित् साधनेनाप्रतिबोधनीयमप्यात्मतत्त्वम् उपेयते प्राप्यत इवेत्यर्थः । कथं प्रापकसाधनाभावेऽपि तदुपेयेत ? तत्राऽऽह - **आत्मत्वकारणात्** । नित्याप्तस्वरूपत्वात् । गुणवृत्त्या प्रत्यक्त्व-ज्ञापनपरया अहंवृत्त्यैव लक्षणाभासया विबोधिताः सन्तो विद्मः । न हि येन केनापि शब्देन वाच्यस्यैव लक्ष्यत्वम्, लक्ष्यसंबन्धस्यैव लक्षणत्वम् इति वा नियमोऽस्ति कल्पितस्यापि स्वास्पदभूतवस्तूप-लक्षणत्वसंभवात् । उक्तं चेदं प्राक् 'लक्षणं सर्पवद् रज्ज्वाः' (३-२७) इत्यत्रेति सर्वमवदातम् ॥१०४॥

(मूलम्)

कथं पुनरभिधानमभिधेयेनानभिसंबद्धं सदनभिधेयेऽर्थे प्रमां जनयतीति ? शृणु, यथानभिसंबद्धमप्यनभिधेये अर्थे अविद्यानिराकरणमुखेन बोधयतीत्याह -

शयानाः प्रायशो लोके बोध्यमानाः स्वनामभिः ।
सहसैव प्रबुद्ध्यन्ते यथैवं प्रत्यगात्मनि ॥१०५॥

न हि नाम्नास्ति संबन्धो व्युत्थितस्य शरीरतः ।
तथापि बुद्ध्यते तेन यथैवं तत्त्वमित्यतः ॥१०६॥

यथा च -

बोधाबोधौ नभोऽस्पृष्टा कृष्णधीनीडगौ यथा ।
बाध्येतरात्मकौ स्यातां तथेहाऽऽत्मनि गम्यताम् ॥१०७॥

(क्लेशापहारिणी)

अभिधानं असंबद्धमपि बोधयेत् -

शङ्कते **कथं पुनरिति** ॥ यद्यहंशब्दस्य अभिधानाभिधेय-संबन्धाङ्गीकारेण वृत्तिर्नास्त्येवाऽऽत्मनि, तर्हि आत्माऽनभिसंबद्ध एव शब्दस्तत्र प्रमां जनयतीत्युक्तं भवति । न चैतद् घटते । न हि काञ्चिद् वृत्तिमनाश्रित्य शब्दस्य कुत्रचित् बोधकत्वं दृष्टचरम् इति भावः । सिद्धान्ती तु स्वात्मनो नित्यावगतिरूपत्वात्, नाबुद्धबोधनमिह काङ्क्षितम्, किं तु अविद्यानिराकरणमात्रम् इत्याह - **शृणु यथेति** ॥ यद्यप्येतत् 'अविद्यानाशमात्रं तु फलमित्युपचर्यते' (२-१०५) इत्यत्रोक्तमेव प्राक्, तथाप्यनभिसंबद्धमप्यनभिधेयेऽर्थस्य बोधक-मस्तीति उपपादयितुं पुनरप्युच्यत इति न दोषः ॥

शब्दस्य स्वानभिसंबद्धप्रतिपाद्यगताविद्यानिराकरणशक्तिरस्तीत्यत्र दृष्टान्तमाह श्लोकद्वयेन - **शयाना इति, न हि नाम्ना** - इति च । न हि शरीराद्व्युत्थितस्य - शरीराभिमानाद् व्युत्थाय स्थितस्य - सुषुप्तस्य नाम्ना संबन्धग्रहणम् अस्ति । अथ च तेन शब्देन स्वासंबद्धेनैव निमित्तभूतेन निद्रां हित्वा बुध्यते यथा, एवं तत्त्वं

वाक्यादपि बुध्यते अविद्यानिराकरणमुखेन इत्यभिप्रायः ।।१०५।।१०६।।

आत्मनि ज्ञानाज्ञानाश्रयत्वं तद्विषयत्वं वा नास्त्येव वस्तुतः ; अतो वाक्यात् अज्ञाननिरासेन आत्मनि कश्चिद्विशेषः स्यादिति शङ्काया अपि नावसरोऽस्तीति सदृष्टान्तमाह - **यथा चेति** ।। तथा इत्यनेन श्लोकस्थेनास्य संबन्धः ।।

बोधाबोधाविति ।। यथा कृष्णधीनीडगौ कृष्णबुद्धिविषयौ बोधाबोधौ 'आकाशः कृष्णः' इत्यबोधः, 'नीरूपः सः, न कृष्णः' इति बोधश्च - इत्येतौ यथा नभोऽस्पृष्ट्वा तत्र कमपि विशेषमनापाद्यैव यथा बाध्यबाधकात्मकौ स्याताम्, तथा इह आत्मनि 'अहं दुःखी', 'नाहं दुःखी' इत्येतौ बोधाबोधावपि बाध्यबाधकौ स्याताम् इति गम्यतामित्यर्थः । उक्तं हि **सूत्रभाष्ये** - "न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति । यथा कश्चित् संतमसे पतितां काञ्चिद् रज्जुम् अहिं मन्यमानो भीतो वेपमानः पलायते, तं चापरो ब्रूयात् 'मा भैषीः, नायमही रज्जुरेव' इति, स च तदुपश्रुत्य अहिकृतं भयमुत्सृजेत् वेपथुं पलायनं च ; न त्वहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद् विशेषः स्यात् । तथैवेदमपि द्रष्टव्यम्" (सू. भा. १-४-६) इति ।।१०७।।

(मूलम्)

'असत्ये वर्त्मनि स्थित्वा' इत्युपश्रुत्य अतिविस्मितो महता सम्भ्रमेण कश्चिच्चोदयति -

नासन्नुपायो लोकेऽस्ति परमार्थविनिश्चये ।
नासल्लिङ्गाद्धि बाष्पादेः कश्चिदग्निं प्रपद्यते ।।१०८।।

इत्येवं चोदयेद् योऽपि जोषयेत्तं घटादिना ।
सदसद्भ्यां विभक्तोऽसौ पर्यायश्च न चानयोः ।।१०९।।

(क्लेशापहारिणी)

मिथ्योपायेनापि सत्यबोधनं भवति -

मिथ्याभूतस्यापि उपायत्वं भवतीत्युक्तमधस्तात् (३-१०४) । तदेव द्रढयितुकामश्चोदनामुत्थाप्य परिहरति श्लोकद्वयेन । तदाह - **'असत्ये वर्त्मनि स्थित्वा' इत्युपश्रुत्येत्यादिना ।।**

नासन्निति ।। असत्यं सत्यनिश्चये नोपायो भवितुमर्हति । न हि बाष्पादिर्धूमाभासः अग्निनिश्चयेऽनुमितौ लिङ्गं भवति लोके - इति शङ्कितुरभिप्रायः ।।१०८।।

'इत्येवम्' इति ।। 'इत्येवम्' इत्यादिपरिहारग्रन्थाभिप्रायस्तु - असतो नोपायत्वमिति कोऽर्थः ? किं सतो नियमेनोपायत्वं सर्वत्रेति, किं वा मिथ्याभूतस्योपायत्वं नास्त्येवेति ? तत्र नाद्यः कल्पः क्षोदक्षमः, घटादीनामपि सत्यत्वेनाभिमतानाम्, अग्निनिश्चायनेऽनुपायत्वात् ; नापि द्वितीयः, प्रतिबिम्बादेरपि बिम्बादिनिश्चायकोपायत्वात् । यत् पुनर्धूमाभासाद् बाष्पादेर्नाग्निनिश्चयः - इति, तत्तु बाष्पादेर्नियमेनाग्निसंबन्धाभावकृतम्, न तु तदसत्यत्वकृतम् । किं च यत्रापि घटादिः सत्यमेव स्वकारणाद्यनुमितौ लिङ्गमित्यभिनिवेशः, तत्रापि लिङ्गं न वस्तुतः सत्, मृदादिस्वकारणव्यतिरेकेणानुपलब्धेः । व्यपदेशमात्रं हि घट इति, मृद एव तथा व्यवह्रियमाणत्वात् । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४) इति श्रुतेः । न चासन्नेव घटः शशविषाणादिवत्, जलाहरणाद्यर्थक्रियाकारित्वदर्शनात् । तस्मात् सदसद्भ्यां विभक्तस्य मिथ्यारूपस्यैवोपायत्वं त्वयाप्यभ्युपेयमित्यतोऽस्थाने चोद्यमेतदिति ।।१०९।।

(मूलम्)

एवं कुचोद्यमुन्मूल्य अथेदानीं प्रकृतमभिधीयते । प्रकृतं च अनभिधेये कथमभिधाश्रुतिरविद्याध्वंसि आत्मनि ज्ञानं जनयतीति ।

तत्रैव कारणान्तरमुच्यते -

अतिदुःस्थोऽप्रबोधोऽत्र ह्यात्मैवास्य प्रबुद्धता ।
निमित्तमात्राद् व्येत्येषो नासाग्रे बदरं यथा ॥११०॥

अनुदितानस्तमितकूटस्थबोधमात्रस्वाभाव्यादात्मनो दुःसंभाव्योऽविद्यासद्भावः इति चेत्, न ; अविद्याप्रसिद्ध्यैव तत्सद्भावसिद्धेः, उलूकनिशावत्, इत्यत इदमुच्यते -

अहो धाष्ट्र्यमविद्याया न कश्चिदतिवर्तते ।
प्रमाणं वस्त्वनादृत्य परमात्मेव तिष्ठति ॥१११॥

यस्मादविद्याप्रसिद्ध्यैवाविद्यासद्भावसिद्धिः, अत आत्मवस्तुवृत्तानुरोधेन न कथञ्चनापि तत्सम्भावनाप्यस्ति, अत[1] आह -

ज्ञानं यस्य निजं रूपं क्रियाकारकवर्जितम् ।
सम्भावनाप्यविद्यायास्तत्र स्यात् केन हेतुना ॥११२॥

(क्लेशापहारिणी)

अविद्याया अविद्यासिद्धत्वादेव निवृत्त्युपपत्तिः -

तदेवमसतोऽपि वाक्यस्य आत्मप्रतिपत्त्युपायत्वं प्रसाध्य प्रसङ्गागतचिन्तामुत्सृज्य प्रकृतामविद्यानिवृत्तिचिन्तामेवानुवर्तयतीत्याह - **एवमिति** ॥ असत्यात् सत्यविनिश्चयो न संभवतीत्येतत् शुष्कतर्कमात्रावष्टम्भेन समुत्थापितत्वात् कुचोद्यम् । तस्योन्मूलनं तु परमार्थदृष्ट्यवलम्बनेन सर्वस्याप्युपायस्य मिथ्यात्वप्रदर्शनेनेति स्पष्टम् । अथाधुना प्रकृतमेव अनभिधेये वाक्यस्याविद्याध्वंसि-

1. 'यतः' इत्यतो वरमेष पाठ आश्रितः ॥

ज्ञानजनकत्वं कथमित्येतदेवानुवर्तयिष्यता तत्रैव कारणान्तरं सुप्तपुरुषबोधकवाक्योदाहरणादन्यत् उपपादकं कारणम् - अविद्याया अविद्यामात्रप्रसिद्धत्वरूपम् उच्यते - समनन्तरश्लोकेनेत्याह - **तत्रैवेत्यादिना ।।**

अतिदुःस्थ इति ।। अत्रात्मनि अप्रबोधोऽतिदुःस्थः । अविचार-दशायामेव प्रतीयमानत्वात् । अतस्तन्निरासो वाक्येन ईषत्कर इति भावः । हि यस्मात् आत्मैवास्य प्रबुद्धता, न हि सा केनापि कारण-व्यापारेणोत्पादयितव्या, किं त्वस्य स्वभाव एव, नित्यप्रबोधरूपत्वमेव ह्यस्य स्वरूपम् इत्यर्थः । अत निमित्तमात्रात् वाक्येन ज्ञापनमेव केवलं निमित्तीकृत्य, तावतैव एषोऽप्रबोधो व्येति । तत्र दृष्टान्तः **'नासाग्रे बदरं यथा'** इति । यथा नासाग्रे अतिदुःखेन स्थापितं बदरम् ईषत्कम्पादिकं निमित्तीकृत्यापगच्छति एवम् । वाक्योपदेशनिमित्तप्रत्यग्दृष्टिमात्रेण तिरोभवतीत्यर्थः ।।११०।।

अतिदुःस्थत्वमेवाऽऽक्षेपपरिहारव्याजेन स्पष्टयति - **अनुदितान-स्तमितेति ।।** कूटस्थनित्यचैतन्यस्वरूपे अत्यन्तासम्भावितैवाविद्या, कुतस्तस्या निवृत्त्यपेक्षा ? - इत्याक्षेपः, परिहारस्तु सत्यमेवं परमार्थ-दृष्ट्या ; अविद्यादृष्ट्यैव तु तत्सिद्धिः, अतो न दोष इति । तदाह - **अविद्याप्रसिद्धयैवेति** । तत्र दृष्टान्तः **उलूकनिशावदिति** । यथा प्रचण्डभानुकिरणप्राग्ऽप्यन्हि निशात्वमुलूकानाम्, एवं कूटस्थ-प्रकाशेऽप्यविद्याबद्धदृष्टीनाम् अविद्याश्रयविषयत्वम् । अतो विद्याविद्या-दृष्टिविभागेनोभयमप्युपपद्यत इति भावः । तदुक्तं **संबन्धवार्तिके** ब्रह्माविद्यावदिष्टं चेन्ननु दोषो महानयम् । निरविद्ये च विद्याया आनर्थक्यं प्रसज्यते । नाविद्यास्येत्यविद्यायामेवासित्वा प्रकल्प्यते । ब्रह्मदृष्ट्या त्वविद्येयं न कथञ्चन युज्यते ।।' (सं. वा. १७५, १७६) इति ।।

अहो धाष्ट्र्यमविद्याया इति ।। प्रमाणं वस्तु स्वयं प्रमाणभूतं प्रमातृप्रमाणप्रमेयानां प्रमाभासस्य चावभासकं नित्यसिद्धानुभवरूपम्

आत्मवस्तु अनादृत्य तस्मिन्नप्यवस्तुताम् आपाद्य स्वयं परमात्मेव परमार्थवस्त्विव तिष्ठति विभाव्यते मूढैः - इत्यहो अविद्याया धाष्ट्र्यम् ! इत्यर्थः । तदेतदुक्तं **बृहद्वार्तिके** 'यत्प्रसादादविद्यादि सिध्यतीव दिवानिशम् । तमप्यपन्हुतेऽविद्या नाज्ञानस्यास्ति दुष्करम् ।।' (बृ. वा. ४-३-७४) इति ।।१११।।

वस्तुतस्तु अविद्या नैव विद्यते प्रत्यगात्मदृष्ट्या निरूप्यमाणेत्याह - **यस्मादिति** ।।

ज्ञानं यस्य निजं रूपम् इति ।। यस्यात्मनः क्रियाकारकवर्जितं ज्ञानं निजं रूपम्, तत्रात्मनि केन हेतुना कथङ्कारं स्यादज्ञानम् ? अज्ञानं ज्ञानस्य धर्मः इत्येतदतीवोपहास्यम् इति भावः । तदुक्तं **बृहद्वार्तिके** - 'स्वतो बुद्धं स्वतः शुद्धं स्वतो मुक्तं निरात्मिका । अविचारितसंसिद्धिरविद्याऽऽलिङ्गते कथम् ।।' (बृ. वा. ४-३-७५) इति । न चैवं वाक्यनिरस्याविद्याया असद्भावे शास्त्रप्रणयनानर्थक्यम् इति शङ्क्यम् । पराग्दृष्ट्या तत्सद्भावस्यापन्होतुमशक्यत्वात् ; यया तु प्रत्यग्दृष्ट्या तस्या असम्भावितत्वमवसीयते, तस्यास्तु वाक्यैकसम्पादनीयत्वात्, तत्पूर्वं वस्तुतः स्थितेनापि परमात्मस्वरूपज्ञानेन प्रमाणसाहाय्यमन्तरा तस्या अनिरस्यत्वात् । यथोक्तं **बृहद्वार्तिके** - 'तस्मान्न वास्तवं रूपं तद् ध्वान्ताद्यपनोदकृत् । तस्मिन् सत्येव मोहादि व्युत्पत्तेः प्रागभूद्यतः ।। प्रमाणारूढमेवैतद्धन्त्यविद्याद्यशेषतः । ब्रह्मविद्भिरतो यत्नात् प्रमाणमिह संश्रितम् ।।' (बृ. वा. १-४-३१४, ३१५) इति ।।११२।।

---

२१. अविद्यायाः शास्त्रैकमानेन निवृत्तिः

(मूलम्)

सोऽयम् एवमनुदितानस्तमितावगतिमात्रशरीर आत्मापि सन्,

अविचारितप्रसिद्धाविद्यामात्रव्यवहित एव अतथेवेक्ष्यते यतः, अतः -

अनुमानादयं भावाद्व्यावृत्तोऽभावमाश्रितः ।
ततोऽप्यस्य निवृत्तिः स्याद् वाक्यादेव बुभुत्सतः ॥११३॥

भाववदभावादपि निवृत्तिरनुमानादेव किमिति न भवति ? - इति चेत्, शृणु -

न व्यावृत्तिर्यथा भावाद् भावेनैवाविशेषतः ।
अभावादप्यभावत्वाद्व्यावृत्तिर्न तथेष्यते ॥११४॥

यतो नानुमानेन व्याविद्धाशेषक्रियाकारकफलात्मनि स्वाराज्ये अभिषेक्तुं शक्यते, तस्मात् -

अविद्यानिद्रया सोऽयं प्रसुप्तो दुर्विवेकया ।
भावाभावव्युदासिन्या श्रुत्यैव प्रतिबोध्यते ॥११५॥

अत्राह - अनुदितानस्तमितविज्ञानात्ममात्रस्वरूपत्वात्, दुःसंभाव्या अविद्येति । नैतदेवम् । कुतः ? यत आह -

कुतोऽविद्येति चोद्यं स्यान्नैव प्राग् हेत्वसंभवात् ।
कालत्रयापरिच्छित्तेर्न चोर्ध्वं चोद्यसंभवः ॥११६॥

(क्लेशापहारिणी)

तत्त्वमस्यादिवाक्यस्य प्रामाण्यम् -

पूर्वश्लोकोक्तार्थमेवानूद्य वाक्यैर्निवर्त्यत्वमविद्याया उपसंहरिष्यन्नाह - 'सोऽयम्' इति ॥ कूटस्थचिन्मात्र एव सन् उदयास्तमययुक्तज्ञानाद्याश्रय इव लक्ष्यते यतः, अतः प्रामातृरूपत्वमेवाऽऽत्मनो यथार्थ-

त्वेन गृहीत्वा प्रमाणादेव केनचित् स्वरूपं निश्चेतुमीहते । वस्तुतस्तु अविचारितसिद्धाविद्यामात्रव्यवहितस्वरूपत्वात् शास्त्रवाक्यमात्रात् तस्य स्वरूपे निष्ठा भवेत् नान्यतः - इति वक्तुमुत्तरश्लोकप्रवृत्तिरित्यर्थः ।।

अनुमानादिति ।। अन्वयव्यतिरेकलक्षणादनुमानात् अयं जिज्ञासुः भावात्, स्थूलसूक्ष्मशरीरलक्षणात् व्यावृत्तः, अभावम् 'नाहं देहेन्द्रियादिस्वरूपः' इत्येवंरूपम् आश्रितः । तस्मात्, अस्य बुभुत्सतः 'को न्वहमस्मि' इति वीक्षापन्नस्य ततोऽप्यभावात् निवृत्तिः वाक्यादेव स्यात्, नान्यस्मात् प्रमाणात् इत्यर्थः ।।११३।।

अभावादपि नानुमानेन व्यावृत्तिः -

अथ देहादिव्यतिरिक्तज्ञानादपि व्यावृत्तिरनुमानादेव किं न स्यात् इति शङ्कामुत्थापयति - **भाववदित्यादिना** ।। यद्यप्यन्वयव्यतिरेकन्यायानुसरणेनैवैषा व्यावृत्तिर्न सिद्ध्यतीत्यत्र हेतुः 'प्रत्यगात्मत्वहेतोश्च स्वार्थत्वादप्रमेयतः' (३-४८), 'प्रमाणव्यवहारोऽयम्' (३-५२), 'लिङ्गमस्तित्वनिष्ठत्वात्' (३-५७) इत्यादिभिः श्लोकैरसकृदभिहितः, तथापि भङ्ग्यन्तरेण तदभिधानार्थं शङ्कात्र समानीयत इत्यदोषः । शङ्कापरिहारत्वेन श्लोकमवतारयति - **शृण्विति** ।। **न व्यावृत्तिरिति** ।। यथा भावात् देहाद्यात्मभावलक्षणात् भावेनैव 'एतत्स्वरूपोऽहम्' इति भावरूपत्वबोधकप्रमाणेनैव न व्यावृत्तिर्भवति । कुतः ? **अविशेषतः** व्यावर्तकस्यापि भावत्वाविशेषात् - इत्यर्थः । न हि प्रमेयकुक्षिमध्यासीनस्य देहेन्द्रियादिष्वेवाहंममाभिमानवतः 'तन्मध्यपतित एव कश्चिदहम्' इति ज्ञानेन तादृशदेहाद्यात्मभावनिवृत्तिः स्याज्जातुचित् ; 'एतत्सङ्घातविविक्त एवाहं परलोकसंबन्धित्वात्' इत्याकारकज्ञानेनैव तु शास्त्रजनितेन तादृशं ज्ञानं निवर्त्यत इति प्रसिद्धं वेदविदाम् । एवमेव अभावादपि 'देहादिविलक्षणोऽहम्' इत्यस्मादपि तथैव 'तस्मादपि शरीरविलक्षणादपि

विलक्षणोऽहं भवितुमर्हामि अमुकहेतोः' इत्याकारकानुमानेनैव व्यावृत्तिर्नेष्यते ; कुतः ? अभावत्वाविशेषात् व्यावर्त्यव्यावर्तकयोः । न हि 'भावरूपादेतस्माद् विलक्षणोऽहम्' इति बुद्ध्या यथा पूर्वभावबुद्धिबाधः, तथा 'एतद्विलक्षणादपि रूपाद् विलक्षणरूपोऽहम्' इत्यनया तत्पूर्वतनबुद्धेर्बाधो भवेत्, अभावे विशेषाभावात् बाध्यबाधककल्पनानुपपत्तेरित्यभिप्रायः ।।११४।।

आत्मबोधः श्रुत्यैव, नानुमानेन -

फलितमुपसंहरति - **यत इति** ।। श्लोकमवतारयति - **तस्मादिति** ।। **अविद्यानिद्रयेति** । सोऽयं प्रमाता अविद्यानिद्रया स्वरूपतिरस्कारिण्या दुर्विवेकया मानान्तरेण विवेक्तुमशक्यया प्रसुप्तः भावाभावरूपान् स्वप्नान् पश्यन्, भावाभावव्युदासिन्या भावाभावविलक्षणाद्वितीयप्रत्यगात्मबोधिन्या तत्त्वमस्यादिरूपया श्रुत्यैव प्रतिबोध्यते । अत्रेदमनुसन्धेयमभियुक्तवचनम् - 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ।।' (गौ. का. १-१६) इति । एतदुक्तं पूर्वमेव 'कार्यमेतदविद्याया ज्ञात्मना त्याजयेत् वचः' (३-६) इति ; उपसंहृतम् त्विदानीं वाक्यव्याख्यानान्ते निगमनार्थम् इति विशेषः ।।११५।।

अविद्या सम्भावना -

वाक्यनिवर्त्याविद्यायाः अज्ञदृष्ट्या स्वानुभवसिद्धतां प्राज्ञदृष्ट्या निःस्वभावतां च पुनरपि प्रकारान्तरेणाह आक्षेपोत्थापनपूर्वकम् - **अत्राहेति** ।। कूटस्थविज्ञानात्ममात्रस्वरूपत्वात् आत्मनः, दुःसंभाव्या अविद्या तस्मिन् इत्याक्षेपः । परिहारमाह - **'नैतदेवम्'** इति । **'कुतः ?'** इति प्रश्नः । उत्तरत्वेन श्लोकमवतारयति - **यत आहेति** ।।

कुतोऽविद्येति चोद्यमिति ।। प्राक् विद्योत्पत्तेः पूर्वं नैवेदं चोद्यं भवति । कुतः ? हेत्वसम्भवत् । न ह्यविद्यावान् 'अनुदितानस्तमित-

विज्ञानस्वभावोऽहम्' इति जानीते इत्यर्थः । यदुक्तं **संबन्धवार्तिके** 'अविद्यावानविद्यां तां न निरूपयितुं क्षमः ।' (सं. वा. १७९) इति । न च विद्योत्पत्तेरूर्ध्वं चोद्यसंभवः। कुतः ? कालत्रयापरिच्छित्तेः । न हि कालत्रयेऽप्यविद्यासद्भावं वात्मनि परिच्छिनत्ति विद्वान् इत्यर्थः । तदप्युक्तं तत्रैव - 'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यति ।।' (सं. वा. १८३) इति ।।११६।।

(मूलम्)

यस्मात् तत्त्वमस्यादिवाक्यमेव आत्मनोऽशेषाम् अविद्यां निरन्वयम् अपनुदति, तस्मात् -

अद्धातममनादृत्य प्रमाणं सदसीति ये ।
बुभुत्सन्तेऽन्यतः कुस्तेतेऽक्ष्णापि रसवेदनम् ।।११७।।

एवम् अप्रतिहताम् 'अहं ब्रह्म' इति प्रमां तत्त्वमस्यादिवाक्यं कुर्वदपि न प्रतिपादयति चेत् अभिमतम्, न कुतश्चनापि प्रतिपत्तिः स्यात् । अत आह -

इदं चेदनृतं ब्रूयात् स्यात् प्रमामवगतावपि ।
न चान्यत्रापि विश्वासो ह्यवगत्यविशेषतः ।।११८।।

न च उपादित्सितात् वाक्यार्थात् वाक्यार्थान्तरं कल्पयितुं युक्तम् । यस्मात् -

न चेदनुभवोऽतः स्यात् पदार्थावगतावपि ।
कल्प्यं विध्यन्तरं तन्न ह्यन्योऽर्थोऽवगम्यते ।।११९।।

न च यथाभिमतोऽर्थो यथोक्तेन न्यायेन नावसीयते । कोऽसौ न्याय इति ? आह -

नामादिभ्यो निराकृत्य त्वमर्थं निष्परिग्रहः ।
निःस्पृहो युष्मदर्थेभ्यः शमादिविधिचोदितः ॥१२०॥

भङ्क्त्वा चान्नमयादींस्तान् पञ्चानात्मतयार्गलान् ।
अहं ब्रह्मेति वाक्यार्थं वेत्ति चेन्नार्थ ईहया ॥१२१॥

न चेदेवमुपगम्यते वाक्यस्य प्रमाणस्य सतः अप्रामाण्यं प्राप्नोति, तदाह -

यदर्थं च प्रवृत्तं यद् वाक्यं तत्र न चेच्छ्रुतम् ।
प्रमामुत्पादयेत् तस्य प्रामाण्यं केन हेतुना ॥१२२॥

(क्लेशापहारिणी)

स्थिते वाक्यप्रामाण्ये प्रमाणान्तरं न मृग्यम् -

तदेवमन्वयव्यतिरेकपूर्वकं वाक्यमेव निरन्वयमविद्यां निवर्तयतीति तदेव प्रमाणम् आत्मावबोधे इति स्थितम् । तदेतदर्थात् सिद्धं प्रामाण्यं स्थूणानिखननन्यायेन प्रतिष्ठापयितुम् उत्तरग्रन्थः प्रवर्तते । **यस्मादिति** । तत्र स्थिते वाक्यप्रामाण्ये आत्मावबोधाय प्रमाणान्तरं साधनान्तरं वा न मृग्यमिति तावदाह - **अद्धातममिति** ॥ स्फुटतमं साक्षादेव प्रमितिजनकं सदसीतिवाक्यरूपं प्रमाणम् अनादृत्य येऽन्यतः अनुमानादिना प्रसङ्ख्यानादिना वा आत्मानं बुभुत्सन्ते ते अक्ष्णापि रसवेदनं कुर्युः । असाधनेनापि ज्ञानप्राप्त्याकाङ्क्षित्वात् इति भावः ॥११७॥

अवगतिवाक्ये अविश्वासो न कार्यः -

स्थाने स्यादयमुपहासो यदि तावत् तथ्यतोऽद्धातमं प्रमाणं स्याद् वाक्यम्, तदेव त्वद्यापि न सिद्धम् इति वदन्तं प्रतिबोधयितुमारभते समनन्तरग्रन्थ इत्याह - **एवमिति** ॥ यदि वाक्यं प्रमाणभूतमपि न

प्रतिपादयति तर्ह्यतिप्रसङ्गः इत्यस्मिन्नर्थे श्लोकमवतारयति - **अत आहेति** ।।

इदं चेदिति ।। वाक्यमप्रमाणमिति शङ्कमानः प्रष्टव्यः - किं वाक्यं विपरीतबोधकत्वात् तत्त्वं न प्रतिपादयतीत्युच्यते, किं वा पदार्थावगतौ जातायामपि वाक्यात् साक्षादनुभवो न जायत इति प्रसङ्ख्यानादिविधिः कल्पनीय इत्यभिप्रायः, आहोस्वित् प्रमां नैवोत्पादयतीति ? तत्र नाद्य इत्युत्तरश्लोकेनाह - **इदं चेदिति** ।। इदं तत्त्वमसीति वाक्यम् अवगतौ सत्यामपि अनृतं ब्रूयात् चेत्, अन्यत्रापि प्रसङ्ख्यानादिबोधकत्वेनाभिमतात् वेदवाक्याज्जातायामपि अवगतौ न विश्वासः स्यात्, कुतः ? **अवगत्यविशेषतः** । न हि वाक्यजन्यावगतेः कस्याश्चिद्भ्रान्तित्वम्, कस्याश्चित् प्रमात्वमिति विशेषः कल्पयितुं शक्यते इति भावः । यद्वा अन्यत्रापि प्रत्यक्षादिना जातायामप्यवगतौ न विश्वासः स्यात् । इदं प्रमेयमवगतं वा न वा - इति संशयोऽपि जायेत । कुतः ? अवगत्यविशेषतः । तथा च सर्वप्रमाणप्रमेयव्यवहारलोपः प्रसज्येतेति भावः । न च संशेते कश्चित् अवगतौ जातायामपि । तथा च किमपराद्धं प्रकृतेन वाक्यप्रमाणेन, अवगतिजनकत्वे दृष्टेऽपीति भावः । इदं च प्रौढिवादमाश्रित्येति मन्तव्यम्, न ह्यद्वितीयात्मावगतौ जातायामविद्यानिवृत्तिफलं न दृश्यते, बाधकज्ञानान्तरस्यावकाशो वा समस्तीति ।।११८।।

ऐकात्म्यमेवात्रोपादित्सितोऽर्थः -

न च द्वितीयः कल्पः इत्यभिप्रायेण द्वितीयश्लोकमवतारयति - **न चोपादित्सितादिति** ।। स हि वाक्ये उपादित्सितोऽर्थो यद्विषये वाक्यगतानां पदानां निश्चितः समन्वयोऽवगम्यते । इह च 'तत्त्वमसि' इति वाक्ये ब्रह्मात्मविषये निश्चितः समन्वयः । अतो ब्रह्मात्मत्वमेवोपादित्सितोऽर्थो भवितुमर्हतीत्यभिप्रायः ।।

न चेदिति ।। न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुम् । 'तद्धास्य विजज्ञौ' (छां. ६-१६-३) इत्यादिश्रुतिभ्यः । अवगतिसाधनानां च श्रवणादीनां विधानाच्च इति शेषः । न ह्यन्योऽर्थो वाक्यादवगम्यते, येन प्रसङ्ख्यानादिविधिः कल्प्यः स्यात् ; लिङादीनामन्यतमस्याप्यश्रवणात्, विनापि लिङाद्यध्याहारं वाक्यार्थावगतेर्जायमानत्वाच्च । न च निश्चितायामवगतौ जायमानायामपि अर्थान्तरकल्पना न्याय्या, श्रुतहान्यश्रुतकल्पनादोषप्रसङ्गात् - इत्यभिप्रायः ।।११९।।

वाक्यार्थज्ञाने सति कार्यं न विद्यते -

ननु वाक्यं यद्यप्यैकात्म्यपरम्, तथापि नैव केवलेन तेन श्रुतेनानुभवो जायते । तस्मात् सदसीति फलमुक्त्वा तदनुभवार्थमेव साधनं विधीयते । तामेतामाशङ्कां परिहरन्नाह - **न चेति ।।** यथाभिमतोऽर्थः, आत्मानुभवः, यथोक्तेन न्यायेन अन्वयव्यतिरेकलक्षणेन नावसीयते - इति च नेत्यर्थः । न्यायस्य वाक्यार्थज्ञानोपायत्वमेवोपपादयितुं प्रश्नपूर्वकं श्लोकद्वयम् अवतारयति **'कोऽसौ न्याय'** इति ।।

नामादिभ्य इति ।। भङ्क्त्वा चेति च ।। शमादिविधिचोदितः, 'शान्तो दान्तः' (बृ. मा. ४-२-२८) इत्यादिना विहितं साधनमनुतिष्ठन्, निष्परिग्रहः, त्यक्तकर्मतत्साधनः सन्, भूमविद्याग्रन्थोक्तप्रकारेण नामादिभ्यः प्राणान्तेभ्यस्त्वमर्थं निराकृत्य व्यावर्त्य, युष्मदर्थेभ्यः अनात्मभूतेभ्यो निस्पृहः ; साध्यसाधनलक्षणं सर्वं परित्यज्य इत्येतत् । अन्नमयादीन् पञ्च कोशान् अर्गलान् आत्मप्रतिपत्तिप्रतिबन्धभूतान् अनात्मतया विनिश्चित्य भङ्क्त्वा । सर्वप्रतिबन्धराहित्येनावगतपदार्थः सन् इति यावत् । 'अहं ब्रह्म' इति वाक्यार्थं वेत्ति चेत् । कस्यचिदेव पुरुषधौरेयस्य यथोक्तलक्षणसाधनसंपन्नस्य तदीदृशं वाक्यार्थवेदनं लभ्यम् इत्याशयेन 'चेत्' इत्याह । तदित्थं वाक्यार्थमनुभवतः, ईहया

प्रसङ्ख्यानादिव्यापारेण नार्थः ; कृत्यं नावशिष्यत इत्यर्थः ।।१२०-१२१।।

प्रमाणं वाक्यम् अवबोधयत्येव -

अथ मतं यथोक्तं वाक्यं नैवानुभवमुत्पादयतीति, तस्मिन् पक्षे अनिष्टमाह - **न चेदिति** ।।

यदर्थमिति ।। प्रमाणस्य हि सतो वाक्यस्य प्रमोत्पादनमेव हि प्रामाण्यं नाम । तदिहं ब्रह्मात्मैकत्वप्रतिपादनार्थं प्रवृत्तं वेदान्तवाक्यं तत्र प्रमां नोत्पादयति चेत् तर्हि केन हेतुना कस्यचिदपि वाक्यस्य प्रामाण्यं स्यात् ? एवं हि सर्ववाक्यस्य स्वार्थबोधनाय प्रवृत्तस्य तत्र प्रमाऽनुत्पादकत्वमेव प्रसजेत् । तथा च वाक्यप्रामाण्यप्रतिषेधाय प्रवृत्तमपि तव वाक्यं न कुर्यात् प्रतिषेधम् इत्यनिष्टप्रसङ्गः । तस्मात् यदर्थं प्रवृत्तं यद्वाक्यं तत्र तत् प्रमामुत्पादयत्येवेत्यवश्यमभ्युपगन्तव्यम् । न चास्ति बाधकं प्रमाणमत्रेत्यवोचाम । अतो दूरनिरस्तमबोधकत्वं वाक्यस्येत्यभिप्रायः ।।१२२।।

---

२२. प्रसङ्ख्यानाभ्युपगमे दोषः

(मूलम्)

अथ मन्यसे -

जानीयाच्चेत् प्रसङ्ख्यानाच्छब्दः सत्यवचाः कथम् ।
पारोक्ष्यं शब्दो नः प्राह प्रसङ्ख्यानात्त्वसंशयम् ।।१२३।।

न च युक्तिशब्दावृत्तिलक्षणात् प्रसङ्ख्यानात् यथावत्प्रतिपत्तिर्भविष्यतीति सम्भावयामः। यस्मात् -

युक्तिशब्दौ पुराप्यस्य न चेदकुरुतां प्रमाम्।
साक्षादावर्तनात् ताभ्यां किमपूर्वं फलिष्यति ॥१२४॥

अथैवमपि प्रसङ्ख्यानमन्तरेण प्राणान् धारयितुं न शक्नोषीति चेत्, श्रवणादावेव सम्पादयिष्यामः कथम्?

प्रसङ्ख्याने श्रुतावस्य न्यायोऽस्त्वाम्रेडनात्मकः।
ईषच्छ्रुतं सामिश्रुतं सम्यक् श्रुत्वाऽवगच्छति ॥१२५॥

ननु प्रसङ्ख्यानविधिमनभ्युपगच्छतः पारमहंसी चर्या बौद्धादिचर्यावत् अशास्त्रपूर्विका प्राप्नोति ; ततश्च आरूढपतितत्वं न स्यात्। अशेषकर्मणां च निवृत्तिर्न प्राप्नोतीति ॥ उच्यते -

त्वमर्थस्यावबोधाय विधिरप्याश्रितो यतः।
तमन्तरेण ये दोषास्तेऽपि नायान्त्यहेतवः ॥१२६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादशिष्य-
श्रीसुरेश्वराचार्यविरचितायां नैष्कर्म्यसिद्धौ
ससंबन्धोक्तौ तृतीयोऽध्यायः

(क्लेशापहारिणी)

प्रसंख्यानवादे दोषः -

'अथ मन्यसे' इति वाक्यप्रामाण्यमभ्युपगम्यापि प्रसङ्ख्यानादेवानुभवप्राप्तिमातस्थुषो वादिनो मतमनुवर्ण्य तत्र दोषाविष्करणा-

यारम्भः । तन्मतं हि समनन्तरोत्तरश्लोके, ततः परेण च निराक्रियत इति ।

जानीयाच्चेत् इति ।। उत्थापितशङ्कानुवर्णनमिदम् । सत्यं वाक्यं प्रमाणमिति, तत्रावजानीमहे । सकृच्छ्रुतौ तु न ब्रह्मात्मत्वप्रतीतिरुपपद्यत इति प्रसङ्ख्यानात्तदर्थं जानीयात् श्रोता इत्युत्पश्यामः - इति मन्यसे चेत् इत्यर्थः । तदा शब्दः, 'तत्त्वमसि' इत्यादिलक्षणः सत्यवचाः कथम् ? - इति परिहारः । चेच्छब्दोऽसम्भाविततामाह । न हि प्रसङ्ख्यानं प्रमाणमिति संभवति । शब्दाद्यावृत्तिरूपं हि तत्, न त्वावृत्तेः ज्ञापकत्वलक्षणं प्रामाण्यं सम्भवि - इति भावः । अथ चाभ्युपगम्य ब्रूमः - **शब्दः सत्यवचाः कथम् ?** - इति । न हि तदा शब्दस्तत्त्वमसीति सिद्धवदुपदेशरूपः प्रमोत्पादकः स्यात्, 'प्रसंख्यानेन तत्त्वं भविष्यसि' इत्याकारकेण हि तेन तदा भाव्यम् । एतदर्थकत्वेन वा 'तत्त्वमसि'वाक्यं परिणेयं स्यात् । तस्मात्, प्रसङ्ख्यानवादे ध्रुवं शास्त्रस्याप्रामाण्यमिति भावः । तथा ह्युपदिष्टं **भगवत्पादैः** - 'सिद्धो मोक्षोऽहमित्येव ज्ञात्वाऽऽत्मानं भवेद्यदि । चिकीर्षुर्यः स मूढात्मा शास्त्रं चोद्घाटयत्यपि ।।' (उप. १८-२०९) इति । न हि शब्दस्य प्रामाण्ये तदावृत्तिः कारणमिति कल्पयितुं शक्यम् । प्रत्यक्षादिषु तथाऽदृष्टेः - इत्यभिप्रायः ।।

अत्र प्रसङ्ख्यानवादी शङ्कते - **'पारोक्ष्यं शब्दो नः प्राह'** इति । न भवता अस्मदभिप्रायः सम्यग् व्यज्ञायि, यतः शब्दः सत्यवचा एवास्मन्मतेऽपि । कथम् ? यतः पारोक्ष्येण यदेव स प्राह, तदेव तु प्रसङ्ख्यानात् तत्साहाय्यात् असंशयं प्राह । तदेवं स्थिते कथमयमुपालम्भः शोभते 'शब्दः सत्यवचाः कथम् ?' इति ? तस्मात्, अस्मत्पक्षे नास्ति कश्चिद्दोष इत्यभिप्रायः । अथवात्र प्रकारान्तरेण श्लोकाक्षरयोजना कर्तव्या - पारोक्ष्यं शब्दो नः प्राह, स एव तु

प्रसङ्ख्यानात् असंशयं प्राह । अतो जिज्ञासुः प्रसंख्यानादेव तत्त्वं जानीयात् इति चेन्मन्यसे, तदा शब्दः सत्यवचाः कथम् ? न हि तदानीं 'तत्त्वमसि' इति सिद्धवदुपदेशः कार्यः, किं तु प्रसंख्यानात् तत्त्वं भविष्यसीति वक्तव्यं भवेत् - इत्यभिप्रायः । एवं हि **भगवत्पादैर**प्यनूदितं प्रसङ्ख्यानवादिमतम् - 'सदेव त्वमसीत्युक्ते नात्मनो मुक्तता स्थिरा । प्रवर्तते प्रसञ्चक्षामतो युक्त्याऽनुचिन्तयेत् ॥ सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत् । अपेक्षतेऽत एवान्यदवोचाम द्वयं हि तत् ॥' (उप. १८-९, १०) इति ॥१२३॥

अभ्युपगम्य प्रसङ्ख्यानात् तत्त्वप्रतिपत्तिम् एतदुक्तं 'शब्दः सत्यवचाः कथम् ?' इति । न तु तत् सम्भाव्यम् इत्याह - **न चेति** ॥ असम्भाव्यत्वोपपादनार्थं श्लोकमवतारयति - **यस्मादिति** ॥

युक्तिशब्दाविति ॥ साक्षात् प्रमां नाकुरुताम् इत्यन्वयः । न हि शब्देनानुमानेन वा परोक्षतया अवगतो वन्हिः श्रुत्यनुमानाभ्यासादपरोक्षो भवन् दृष्टचरः - इति भावः । तदेतदुक्तं **भगवता सूत्रभाष्यकारेणापि** 'न हि सकृत् प्रयुक्ताभ्यां शास्त्रयुक्तिभ्यामनवगतो विशेषः शतकृत्वोऽपि प्रयुज्यमानाभ्यामवगन्तुं शक्यते' (सू. भा. ४-१-२) इति ॥१२४॥

विधेरभ्युपगमेपि श्रवणादावेव -

एवं तावत् प्रसङ्ख्यानं न श्रुतिविहितं नापि तस्मात् प्रमोत्पत्तिः सम्भाविता - इति बह्वीभिरुपपत्तिभिः साधितम् । अथ क्वचित् कथञ्चित् प्रसङ्ख्यानेन भाव्यम् इत्यभ्युपगन्तव्यम्, अन्यथा 'आवृत्तिरसकृदुपदेशात्' (वे. सू. ४-१-१) इति **बादरायणीयं सूत्रं** निरवकाशं स्यात् इति काशं कुशं वा अवलम्ब्य प्रसंख्यानं सिषाधयिषुं प्रत्याह -

अथैवमपीति ।। प्राणान् धारयितुं न शक्नोषि इति चेत् 'वस्तुस्थितिः' - इति शेषः । 'न शक्नोमि' इति पाठान्तरे नाध्याहार-क्लेशः । श्रवणादावेव श्रवणमननयोरेव प्रसङ्ख्यानं संपादयिष्यामः इत्यर्थः । श्लोकमवतारयति, कथं तत्र वा तत्संपादनमिति विशद-यितुम् - **कथमिति** ।।

प्रसंख्याने इति ।। प्रसङ्ख्याने यो न्यायः, आम्रेडनात्मकः अभ्यासलक्षणः त्वया अभ्युपगम्यते, सः अस्य साधकस्य श्रुतौ श्रवणे अस्तु भवतु, अभ्युपगम्यताम् । यतोऽस्मिन् पक्षे ईषच्छ्रुतं सामिश्रुत्वा, सामिश्रुतं च सम्यक् श्रुत्वा अवगच्छतीति दृष्टानुसारेण कल्पितं भवति । तदुक्तं **सूत्रभाष्ये** 'दृयन्ते हि सकृच्छ्रुतात् वाक्यात् मन्दप्रतीतं वाक्यार्थम् आवर्तयन्तः, तत्तदाभासव्युदासेन सम्यक् प्रतिपद्यमानाः' (सू. भा. ४-१-२) इति । युक्तश्चायम् आवृत्त्यभ्युपगमः, दृष्टफल-त्वात् श्रवणादेः । उक्तं चैतदपि **सूत्रभाष्ये** - 'दर्शनपर्यवसानानि हि श्रवणादीनि, आवर्त्यमानानि दृष्टार्थानि भवन्ति । यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि, तद्वत् ।' (सू. भा. ४-१-१) इति । अत एव प्रसङ्ख्यानाभ्युपगमे न कश्चिदपि दोषो भविष्यतीत्यभिप्रायः ।।

वार्तिकप्रस्थाने निदिध्यासनस्वरूपम् -

अत्र 'श्रवणादावेव' इति संबन्धवाक्ये श्रवणमननयोरेव ग्रहणम्, न निदिध्यासनस्यापि ; **वार्तिकप्रस्थाने** 'अपरायत्तबोधोऽत्र निदिध्या-सनमुच्यते' (बृ. वा. २-४-२१७) इति निदिध्यासनस्य वाक्यार्थज्ञाना-त्मकत्वाभ्युपगमात् । यद्यपि भाष्यप्रस्थाने निदिध्यासनमप्यावर्त-नीयत्वेनोपदिष्टम् 'अपि च उपासनम्, निदिध्यासनं च - इत्यन्तर्णीता-वृत्तिगुणैव क्रिया अभिधीयते' (सू. भा. ४-१-१) इति, तथापि तत्र वाक्यार्थज्ञानलाभात् पूर्वभूतं रत्नपरीक्षणादिष्विव तत्त्वनिश्चयार्थम् अनुष्ठीयमानं मानसं प्रयत्नं निदिध्यासनशब्दवाच्यमङ्गीक्रियत इति न

भाष्यवार्तिकयोः सिद्धान्तांशे विरोधः । न हि श्रवणादावपि ज्ञानं विधीयत इति कस्यचिदपीष्टम् । तदुक्तं भाष्ये "लोकेऽपि 'इदं पश्य इदमाकर्णय' इत्येवञ्जातीयकेषु निर्देशेषु प्रणिधानमात्रं कुर्वित्युच्यते न साक्षात् ज्ञानमेव कुर्विति" (सू. भा. ३-२-२१) इति । न च वार्तिकप्रस्थानेऽपि ध्यानस्य ज्ञानहेतुत्वं वार्यते ; तथा ह्यत्रापि 'ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते । निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः' (बृ. वा. २-४-२३३) इत्युक्त्वा तच्छेषेण 'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम् । स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम् ॥' (बृ. वा. २-४-२३४) इत्युक्तम् । अधिकं त्वत्र **प्रक्रियाप्रत्यभिज्ञातोऽ-धिगन्तव्यम्** । तस्मात् सुष्ठूक्तं श्रवणादावेवाभ्यासो विधीयते, न वाक्यज्ञाने इति । उक्तं चेदं कण्ठरवेण **बृहद्वार्तिके** 'अतोऽपुरुषतन्त्र-त्वान्नात्मज्ञाने विधिर्भवेत् । अन्वयादिक्रिया त्वस्य तत्तन्त्रत्वाद्विधीयते ॥ श्रवणं मननं तद्वत्तथा शमदमादि यत् । पुमान् शक्नोति तत्कर्तुं तस्मादेतद् विधीयते ॥' (बृ. वा. २-४-१२१, १२२) इतीत्य-लमतिप्रपञ्चेन ॥१२५॥

विध्यनभ्युपगमेऽपि पारमहंसी चर्या सिद्ध्यति -

इदानीं श्रवणादिविधौ लाभान्तरमप्यस्तीति प्रदर्शयिष्यन् प्रति-वादिनः शङ्कां तावदुत्थापयति - **नन्विति** ॥ यदा हि प्रसङ्ख्याने विधिरभ्युपेयते तदा कृतसर्वकर्मसंन्यासः साधको यावदनुभवं प्रसङ्ख्यानं नियमेनानुतिष्ठति, अपरिसमाप्य चात्मदर्शनं ततः प्रच्यवमान आरूढपतितो भवतीति पारमहंसी चर्या शास्त्रैकसंवेद्या भविष्यति । तथा हि पारमर्षं सूत्रम् - 'तद्भूतस्य तु नातद्भावः' (वे. सू. ३-४-४०) इत्यादि । यदा पुनः प्रसङ्ख्यानविधिर्नाभ्युपेयते, ततः स्वच्छन्दवृत्तिरेव सर्वकर्मसंन्यासो भविष्यति इत्यभिप्रायः । न च तस्मिन् पक्षे सर्वकर्मसंन्यासस्यावसरः, 'यावज्जीवमग्निहोत्रं जुहोति' (?)

इत्यादिश्रुतिचोदितानां कर्मणां संन्यासे प्रत्यवायप्राप्तिप्रसङ्गश्च इत्याह - **अशेषकर्मणां च निवृत्तिर्न प्राप्नोतीति** । तमिमम् आक्षेपं परिहरिष्यन् श्लोकमवतारयति - **उच्यते इति** ।।

-**त्वमर्थस्येति** ।। 'शमादिसाधनः पश्येत्' (३-४) इति श्लोकसंबन्धोक्तौ उक्तमेवेदं यत् त्वंपदार्थविवेकाय संन्यासो विहित इति । तत् स्मर्तुमर्हसीत्यभिप्रायः । उपदिष्टं चैतत् **भगवत्पादैः** 'त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । साधनत्वं व्रजत्येव शान्तो दान्तानुशासनात् ।। (उप. सा. १८-२२२) इति, 'यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः । पदार्थज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ।। (उप. सा. १८-२२९) इति च ।।

तदेवं कृतपदार्थविवेकस्य तत्त्वमस्यादिवाक्यादेव प्रमाणात् अशेषाविद्यानिवृत्तिद्वारा अवाक्यार्थप्रतिपत्तिरित्येतत्प्रतिज्ञातं सर्वथापि निरवद्यमित्युपसंहृतमिति सर्वं शिवम् ।।१२६।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण
श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
नैष्कर्म्यसिद्धिव्याख्यायां क्लेशापहारिण्यां तृतीयोऽध्यायः

।। ॐ तत्सत् ।।

अथ चतुर्थोऽध्यायः

(प्रकरणार्थसंक्षेपः)

१. अध्यायसंबन्धः

(मूलम्)

पूर्वाध्यायेषु यद् वस्तु विस्तरेणोदितं स्फुटम् ।
सङ्क्षेपतोऽधुना वक्ष्ये तदेव सुखवित्तये ॥१॥

सङ्क्षेपविस्तराभ्यां हि मन्दोत्तमधियां नृणाम् ।
वस्तूच्यमानमेत्यन्तःकरणं तेन भण्यते ॥२॥

(क्लेशापहारिणी)

उत्तरग्रन्थसंबन्धः -

एवं तावत् प्रथमाध्याये स्वतःसिद्धात्माज्ञाननिरसनद्वारेण सर्वानर्थनिवारकं नित्यानन्दप्रापकं च वेदान्तवाक्यजन्यज्ञानमेव केवलमिति, कर्मणां तु तत्रारादुपकारकत्वमेव न तु साक्षाद्धेतुत्वमिति च प्रतिपादितम् । द्वितीये च वाक्यज्ञानप्रतिबन्धनिरासार्थं त्वंपदार्थविवेकाय द्विविधान्वयव्यतिरेकलक्षणो न्यायः प्रदर्शितः । तृतीये पुनः, दशमवाक्यदृष्टान्तेन सर्वप्रमाणान्तराविरुद्धमात्माऽपरोक्षज्ञानं वाक्यादेवोत्पद्यते, न तज्ज्ञानप्राप्त्यनन्तरं कार्यान्तरमवशिष्यत इत्येतत् प्रतिष्ठापितम् । अथेदानीं सर्वमप्येनं प्रकरणार्थं सङ्क्षेपेणोपसंहर्तुम्, यच्च तदादौ प्रतिज्ञातम् स्वसंप्रदायस्य चोदितप्रमाणकत्वमस्तीति (१-२) तदाविष्करणाय श्रीमच्छङ्करभगवत्पादश्रीगौडपादाचार्ययोः संमति-

मुदाहर्तुं चाध्याय आरभ्यते । तत्रादौ तावत् वृत्ताध्यायत्रयार्थस्य सङ्क्षेपकथनं प्रतिजानीते पूर्वाध्यायेष्विति ।।

सङ्क्षेपविस्तराभ्यामिति ।। विस्तरेणोक्तत्वान्मन्दधियः प्रकीर्णरूपमर्थं न निश्चेतुं प्रभवन्ति, तस्यैव त्वेकत्र पुञ्जीकृत्य कथने सुखेन वेदितुं पारयन्तीति तदर्थं सङ्क्षिप्य कथनम् - इति श्लोकद्वयार्थः ।।१-२।।

---

२. वृत्तग्रन्थार्थः संक्षेपतः

(मूलम्)

आत्माऽनात्मा च लोकेऽस्मिन् प्रत्यक्षादिप्रमाणतः ।
सिद्धस्तयोरनात्मा तु सर्वत्रैवात्मपूर्वकः ।।३।।

अनात्मत्वं स्वतःसिद्धं देहाद्भिन्नस्य वस्तुनः ।
ज्ञातुरप्यात्मता तद्वन्मध्ये संशयदर्शनम् ।।४।।

असाधारणांस्तयोर्धर्मान् ज्ञात्वा धूमाग्निवद् बुधः ।
अनात्मनोऽथ बुद्ध्यन्तान् जानीयादनुमानतः ।।५।।

इदमित्येव बाह्येऽर्थे ह्यहमित्येव बोद्धरि ।
द्वयं दृष्टं यतो देहे तेनायं मुह्यते जनः ।।६।।

(क्लेशापहारिणी)

निर्णेतव्यो विषयः -

संदिग्धं सप्रयोजनं च विचारमर्हति - इति न्यायात्, लोके देहादिषु संदिग्धार्थत्वं प्रदर्शयिष्यन् सर्वसंप्रतिपन्नमर्थं तावदनुवदति - **आत्माऽ-**

नात्मा चेत्यादिश्लोकद्वयेन । प्रत्यक्षादिप्रमाणतः आत्मानात्मानौ लोके तावत् सिद्धौ । तत्र अनात्मा तावत् प्रमेयत्वेन सुप्रसिद्धः । प्रत्यक्षादि-प्रमाणानां तत्रैव स्वभावतः प्रवृत्तेः । आत्मा तु 'येन मया एते पदार्थाः प्रमीयन्ते सोऽहं प्रमाणप्रवृत्तेः पूर्वमेव स्वतःसिद्धः' इति परिशीलनेन प्रमातृत्वेन निश्चयात् सिद्धः । तदाह '**तयोरनात्मा तु सर्वत्रैवाऽऽत्म-पूर्वकः**' इति ॥

अथेदानीं संशयितमर्थं विविच्य दर्शयितुम् अनात्मजातं द्वैधा राशीकृत्य निश्चितराशिं तावन्निर्दिशति - **अनात्मत्वमिति** ॥ देहा-द्भिन्नस्य पराचो घटादेर्वस्तुनः अनात्मत्वं स्वतःसिद्धम् ; न तत्र यत्नः आस्थेयः । न हि जातु कश्चिदपि संदिग्धे 'किमयं घटोऽहमेव, किं वा मत्तो भिन्नः ?' इति । स्फुटतरं स्वात्मविविक्तत्वेनैव बहिर्दर्शनात् इति भावः । एवं ज्ञातुरप्यात्मता स्वतःसिद्धा । तत्रापि न जातुचिदपि संशयो भवति - 'अहं वा नाहं वा' इतीति सुप्रसिद्धमेतत् । सिद्धस्य हि ज्ञातु-ज्ञेयसतत्त्वनिश्चयाय प्रवृत्तिरिति । कुत्र तर्हि संशयस्थानत्वम् ? तदाह - **'मध्ये' इति** ॥ देहादिबुद्ध्यन्ते वस्तुनि तु किमयमात्मा अनात्मा वा इति संशयो वर्तते ; तत्र हि ममप्रत्ययगोचरत्ववद् अहंप्रत्ययगोचरत्वमपि लोके दृष्टम् इत्यभिप्रायः ॥३-४॥

देहादिषु संशये बीजम् -

केन तर्हि प्रमाणेन तत्र निर्णयः कर्तव्यः, कुतो वा कारणात् तत्र संशयः ? कुतस्तत्रापि बाह्यघटादिष्विव स्फुटतरमनात्मत्वं यत्नं विनैव न विज्ञायते ? - इति प्रश्नत्रयापाकरणायोत्तरश्लोकद्वयम् । तत्र प्रथम-प्रश्नस्य निर्णयमाह - **असाधारणान् इति** ॥ स्थूलत्वम्, दृश्यत्वम्, अचेतनत्वम्, आगमापायित्वम्, व्यभिचरत्स्वरूपत्वं च - इत्यादयोऽ-नात्मनोऽसाधारणा धर्माः । तथा सूक्ष्मत्वम्, दृग्रूपत्वम्, चेतनत्वम्, कूटस्थनित्यत्वं चेत्यादयश्च आत्मनोऽसाधारणा धर्माः । तान् ज्ञात्वा

धूमाग्निवत् धूमेन अग्निमिव अनात्मधर्मवत्त्वात् बुद्ध्यन्ता अनात्मान एवेति अनुमानतो जानीयात् निश्चिनुयात्, तद्विविक्तः प्रत्यगात्मा इति च । तत्र यद्यपि ज्ञाता अहंप्रत्ययगोचरत्वेनैव प्रथते व्यवहारे, ततोऽपि विविच्यैव प्रत्यगात्मा विज्ञेयः - इति द्रष्टव्यम् । उक्तं हि प्रागेव 'दृश्यत्वागमापायित्वादिभिर्धर्मैः शरीरेन्द्रियमनोनिश्चयादिवृत्तीरनात्मतया व्युदस्य, अहंवृत्तिमतोऽपि दृश्यत्वाविशेषात् द्रष्टृपूर्वकत्वमवसीयते' (३-५६) इति ।।५।।

'मध्ये संशयदर्शनम्' इत्युक्तम् । तत्र संशयबीजमाह - **इदमित्येवेति** ।। देहे स्थूले, सूक्ष्मे च बुद्ध्यन्ते द्वयं दृष्टम् 'अहम्', 'मम' इति च बुद्धिद्वयमपि दृष्टम् इत्यर्थः । यद्यपि 'अहं देहः' इत्यादिरूपा बुद्धिर्न दृष्टा, तथापि 'अहं मनुष्यः', 'स्थूलः', 'कृशः', 'काणो', 'बधिरो', 'बुद्धिमान्', 'जडः' - इत्यादिरूपेण देहद्वयतादात्म्यबुद्धिर्दृष्टैवेति न विरोधः । तेन बुद्धिद्वयगोचरत्वदर्शनेन हेतुना अयं जनः मुह्यते आत्मत्वेनानात्मत्वेन वा देहादीन् निश्चेतुमसमर्थो भवतीत्यर्थः ।।६।।

(मूलम्)

केन पुनर्न्यायेन आत्मानात्मनोरश्वमहिषयोरिव विभागः क्रियत इति ? उच्यते -

न्यायः पुरोदितोऽस्माभिरात्मानात्मविभागकृत् ।
तेनेदमर्थमुत्सार्य ह्यहमित्यत्र यो भवेत् ।।७।।

विद्यात् तत्त्वमसीत्यस्माद् भावाभावदृशं सदा ।
अनन्तरमबाह्यार्थं प्रत्यक्स्थं मुनिरञ्जसा ।।८।।

(क्लेशापहारिणी)

आत्मानात्मविवेके न्यायः -

अथ विभागक्रमं पृच्छति - **केन पुनरिति** । उत्तरत्वेन श्लोकद्वयमवतारयति - **उच्यत इति** ।।

न्याय इति ।। विद्यादिति च ।। आत्मानात्मविभागकृन्न्यायः । द्रष्टृदृश्यविभागेन, आगमापायितत्साक्षिविभागेन चान्वयव्यतिरेकलक्षणः पुरा द्वितीये विस्तरशः, तृतीये च सङ्क्षिप्य अस्माभिरुदितः । तेन न्यायेन अहमित्यत्र इदमर्थम् अनात्मांशम् उत्सार्य परित्यज्य, यः परिशिष्टो भवेत् तं भावाभावदृशम् भावाभावोभयसाक्षिणम्, अनन्तरमबाह्यार्थम् अखण्डैकरसं प्रत्यक्स्थम् निरुपचरितप्रत्यगात्मस्वरूपे स्थितं तत्त्व-मसीत्यतो वाक्यात् निरवशेषमविद्यानिरासपूर्वकं विद्यात् 'अनुमानादयं भावात्' (३-११३), 'न व्यावृत्तिर्यथा भावात्' (३-११४) इत्युपपादितनीत्या पुनर्मननशीलः वाक्यादेव अञ्जसा विद्यात् । वाक्यमेवावाक्यार्थज्ञानसाधनम्, न तत्रान्वयव्यतिरेकानुसरणं प्रगल्भते, न च प्रसङ्ख्यानादिकं वाक्यज्ञानातिरिक्तं किञ्चिदप्यपेक्ष्यते इति भावः ।।७-८।।

(मूलम्)

उच्यतां तर्हि कया तु परिपाट्या वाक्यार्थं वेत्तीति । उच्यते । अन्वयव्यतिरेकाभ्याम् -

त्यक्तकृत्स्नेदमर्थत्वात् त्यक्तोऽहमिति मन्यते ।
नावगच्छाम्यहं यस्मान्निजात्मानमनात्मनः ।।९।।

अथ शरीरादिबुद्धिपर्यन्तः स सर्वोऽनात्मैवेति प्रमाणाद् विनिश्चित्य किमिति बुभुत्सातो नोपरमते ? शृणु -

अनुच्छिन्नबुभुत्सश्च प्रत्यग्हेतोरनात्मनः ।
डोलायमानचित्तोऽयं मुह्यते भौतवन्नरः ।।१०।।

(क्लेशापहारिणी)

कृतपदार्थविवेकस्य मनःस्थितिः -

अथ वाक्यात् प्रत्यगात्मप्रतिपत्तिक्रमं दिदर्शयिषुः कृतान्वयव्यतिरेकस्य त्वंपदार्थविवेकवतो मनसः स्थितिं तावद् वर्णयिष्यति । इदानीं तावत् तदर्थं वाक्यार्थज्ञानमुद्दिश्य प्रश्नमुत्थापयति - **उच्यतां तर्हीति** ।। पुरोदितन्यायेनानात्मानमुत्सार्य वाक्यात् प्रत्यगात्मानं विद्यात् इत्युक्तम् । तदेव वाक्यार्थज्ञानं कया परिपाट्या भवतीति जिज्ञासोरयं प्रश्नः । तदुत्तरत्वेन श्लोकमवतारयति **उच्यत इति** । संबन्धग्रन्थस्थस्य 'अन्वयव्यतिरेकाभ्याम्' इत्यस्य श्लोकान्तःस्थितेन 'त्यक्तकृत्स्नेदमर्थत्वात्' इत्यनेनान्वयः ।

त्यक्तेति ।। कृत्स्नः देहादिबुद्ध्यन्त इदमर्थः । पूर्वमहमर्थत्वेन शङ्कितः, इदानीमन्वयव्यतिरेकाभ्याम् अनात्मतया निश्चित्य त्यक्तः, येन सोऽयं त्यक्तकृत्स्नेदमर्थः । तस्मात् अयं मुमुक्षुः, त्यक्तोऽहम् इति मन्यते । तत्र हेतुः - अहमनात्मनः सकाशात् विविक्तं निजात्मानं स्वात्मानं नावगच्छामि यस्मात्, तस्मात् अहमेवानात्मतया त्यक्त - इति मन्यते । अतः को नु स्यामहम् ? किं ममाऽऽत्मा कश्चिदपि नास्त्येव ? - इति वीक्षापन्नो भवति । अत एव तस्य वाक्यात् प्रतिपत्तिरपेक्ष्यत इति भावः ।।९।।

तमिममभिप्रायं विशदयन्, तदर्थं प्रश्नमुद्भावयति **अथेति** ।। श्लोकेनैवोत्तरं वक्ष्यामीत्याह - **शृण्विति** ।।

अनुच्छिन्नबुभुत्सश्चेति ।। यस्मान्निजात्मानं नावगच्छामीति वीक्षापन्नः, अत एव प्रत्यग्हेतोः, प्रत्यगात्मप्रतिपत्तिहेतोः, प्रत्यगात्मानं प्रतिपित्सुः - इति यावत् । अनुच्छिन्नबुभुत्सः, अपरिसमाप्तजिज्ञासः, को न्वस्मि - इति इतस्ततो डोलायमानचित्तः, संशयग्रस्तान्तःकरणः,

भौतवत् भूतगृहीत इव मुह्यते मूढो भवति । पर्याकुलितचित्तो भवतीत्यर्थः ॥१०॥

(मूलम्)

अविलुप्तविज्ञानात्मन आत्मत्वादेव नित्यसान्निध्यात् बुभुत्सुः किमिति न प्रतिपद्यत इति ? यस्मात् -

यैरद्राक्षीत् पुराऽऽत्मानं यमनात्मेति वीक्षते ।
दृष्टेर्द्रष्टारमात्मानं तैः प्रसिद्धैः प्रमित्सति ॥११॥

कस्मात् पुनर्हेतोः पराचीनाभिः शब्दाद्यवलेहिनीभिः, बुद्धिभिः, आत्मानम् अनात्मवन्न वीक्षते इति ? उच्यते -

चक्षुर्न वीक्षते शब्दमतदात्मत्वकारणात् ।
यथैवं भौतिकी दृष्टिर्नात्मानं परिपश्यति ॥१२॥

प्रत्यक्षादिप्रमाणस्वाभाव्यानुरोधेन तावत् तददर्शनकारणमुक्तम् । अथ प्रमेयस्वाभाव्यानुरोधेन प्रतिषेध उच्यते -

धीविक्रियासहस्राणां हानोपादानधर्मिणाम् ।
सदा साक्षिणमात्मानं प्रत्यक्त्वान्नाहमीक्षते ॥१३॥

क्व पुनरियं विवेकबुद्धिः ? किमात्मनि, उतानात्मनीति ? किञ्चातः ? यद्यात्मनि कूटस्थत्वव्याघातः, अनात्मदर्शित्वात् ; अथानात्मनि, तस्याप्यचैतन्यान्न विवेकसंबन्धः इति । उच्यते - 'दाह्यदाहकतैकत्र' - इत्युक्तपरिहारात् -

बुद्धावेव विवेकोऽयं यदनात्मतया भिदा ।
बुद्धिमेवोपमृद्नाति कदली तत्फलं यथा ॥१४॥

सोऽयमतत्त्वे तत्त्वदृक् -

अनुमानप्रदीपेन हित्वा सर्वाननात्मनः ।
संसारैकावलम्बिन्या तदभावं धियेप्सति ॥१५॥

योऽयम् अन्वयव्यतिरेकजो विवेकः, आत्मानात्मविभागलक्षणः, अनात्मस्थः, स्थाणौ संशयावबोधवत् प्रतिपत्तव्यः ; अयथा-वस्तुस्वाभाव्यात्, मृगतृष्णिकोदकप्रबोधवदिति । अत आह -

संसारबीजसंस्थोऽयं तद्धिया मुक्तिमिच्छति ।
शशो निमीलनेनेव मृत्युं परिजिहीर्षति ॥१६॥

अस्यार्थस्य द्रढिम्ने श्रुत्युदाहरणम् -

इममर्थं पुरस्कृत्य श्रुत्या सम्यगुदाहृतम् ।
यच्चक्षुषेति विस्रब्धं न दृष्टेरिति च स्फुटम् ॥१७॥

(क्लेशापहारिणी)

वीक्षापन्नस्य आत्माप्रतिपत्तौ हेतुः -

अथ नित्यचैतन्यस्वभावत्वात्, आत्मत्वेन नित्यप्राप्तत्वाच्च नास्त्येव तदप्रतिपत्तिकारणम् इति शङ्कयति - **अविलुप्तविज्ञानात्मन इति** ।। श्लोकेन परिहारं विवक्षुस्तमवतारयति - **यस्मादिति** ।।

यैरिति ।। यं देहादिबुद्ध्यन्तम् अन्वयव्यतिरेकाभ्यामिदानीम् अनात्मेति मन्यते तं यैः प्रमाणैः पूर्वमनात्मानमद्राक्षीत्, तैरेव प्रसिद्धैः प्रत्यक्षादिभिः प्रमेयमात्रावभासनक्षमैः दृष्टेर्द्रष्टारं सर्वप्रमाणसाक्षिणं परमार्थतः तेषामप्यात्मानं प्रमित्सति । तस्मादेव न प्रतिपद्यते इत्यर्थः ।।११।।

तत्र तैरेव प्रमाणैः किमिति न प्रमीयत आत्मा इत्याशङ्कायां

हेतुरुक्त एव दृष्टेर्द्रष्टारमिति विशेषणेन । उक्तं हि श्रुत्यैव 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. ३-४-२) इत्यादिना । लौकिक्या दृष्टेः, उत्पत्तिविनाशवत्याः द्रष्टारं स्वकीयया नित्यया दृष्ट्या व्याप्तारं न पश्येः । असौ हि लौकिकी दृष्टिः कर्मभूता रूपोपरक्ता रूपाभिव्यञ्जिका नात्मानं स्वात्मना व्याप्तारं प्रत्यञ्चं व्याप्तुं शक्नोति । तस्मात् तं प्रत्यगात्मानं दृष्टेदृष्टारं न पश्येः इति श्रुत्यर्थः । अथ प्रकारान्तरेणापि उत्तरं वक्ष्यामीति प्रश्नमुत्थापयति - **कस्मात् पुनरिति** । उत्तरत्वेन श्लोकमवतारयति - **उच्यते इति** ।।

चक्षुरिति ।। यथा चक्षुः शब्दं न वीक्षते अतदात्मत्वकारणात् स्वात्मत्वाभावात् शब्दस्य - इत्यर्थः । एवं भौतिकी दृष्टिः प्रमाणभूता यस्मात् भौतिकी भूतैरारब्धा भूतान्येव द्रष्टुं शक्ता, नात्मानं सा परिपश्यति, तस्य अभौतिकत्वात् इत्यर्थः ।।१२।।

उत्तरश्लोकेन हेत्वन्तरमुच्यत इत्याह - **प्रत्यक्षादीति** ।। भौतिकं प्रमाणम् अभौतिकमात्मानं न द्रष्टुं प्रभवेदिति प्रमाणस्वाभाव्यमनुरुध्योक्तम् ; अथ प्रमेयस्वभावं प्रमेयत्वेनाभिमतस्यात्मनः स्वभावम् अनुरुध्य तद्दर्शनप्रतिषेध उच्यत इत्यर्थः ।।

धीविक्रियासहस्राणामिति ।। सकलबुद्धिवृत्त्युदयास्तमयसाक्षित्वात् निरुपचरितप्रत्यक्त्वमात्मनः । अतस्तं स्वस्यापि साक्षिणम् अविषयत्वादेव अहम् अन्तःकरणं नेक्षते न द्रष्टुं शक्नोतीत्यर्थः ।।१३।।

विवेकबुद्धिर्बुद्धावेव -

एवं तावदन्वयव्यतिरेकन्यायस्यावधिम् आत्मानात्मविवेकं प्रदर्श्य अथैतद्विवेकस्याश्रयं निर्णिनीषुराक्षेपमुत्थापयति - **क्व पुनरिति** ।। यदीयं विवेकबुद्धिरात्मनः, यदि वा अनात्मनः, किं ततः स्यादिति विचारप्रयोजनं पृच्छति - **किञ्चातः ?** इति । उभयथापि सिद्धान्ते दोषमेव पश्यामीत्याहाक्षेप्ता - **यद्यात्मनीति** । अयमभिप्रायः,

अनात्मानं विशिष्य पश्यतस्तावत् तत्परिच्छेदार्थं तदाकारेण परिणामो वाच्यः । तथा च कूटस्थत्वं व्याहन्येतेति स्फुटो दोषः । एवमात्मानात्मानौ विषयीकृत्य तद्विवेकलक्षणविशेषाकारपरिणामे स्वात्मनोऽपि स्वात्मनैव विषयीकरणं दोषः स्यादित्यपि द्रष्टव्यम् । अथ मतमनात्मन्येवायं विवेक इति । तस्यापि न विवेकः सम्भवति । कुतः ? अचैतन्यात् । न ह्यचेतनस्य तस्य आत्मानात्मदर्शनम्, तद्विवेको वा न व्याहन्यत इत्यर्थः । सिद्धान्ती तु 'दाह्यदाहकतैकत्र' (३-५९) इत्यत्रोक्तं परिहारं स्मारयन्नेव यथोक्तोभयविधदोषं परिहरतीत्यर्थकं श्लोकमवतारयति - **उच्यत** इत्यादिना । 'दाह्यदाहकतैकत्र इत्युक्तपरिहारात्' इत्यस्य 'बुद्धावेव विवेकोऽयम्' इत्यन्तेन संबन्धः । न चैवम् अनात्मपक्षोक्तदोषः । विवेको ह्ययं वृत्तिरूपो बुद्धावेव भवति । ज्ञानं तु तत्र स्वाभाससमर्पकमात्मन एव - इति सर्वदोषातङ्कनिवारणात् । यथोपदिष्टं **भगवत्पादैः** 'बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः । ग्राहका इव भासन्ते दहन्तीवोल्मुकादयः ॥' (उप. १८-७१) इति ॥

बुद्धावेवेति ॥ यत् यस्मात् विवेकात् अनात्मतया भिदा 'नायमात्मा' इति विवेचनं भवति, सोऽयं विवेकः, बुद्धावेव भवति । स च बुद्धिमेव स्वप्रसवित्रीमपि उपमृद्नाति अनात्मतया असत्यामापादयति । तत्र दृष्टान्तः - **'कदलीं तत्फलं यथा'** इति । यथा जातमात्रं फलं स्वजननीं कदलीं नाशयति एवमिदं विवेकरूपं फलमपि जातमात्रमेव बुद्धिमनात्मतया निरस्यतीत्यर्थः । अत्रायं **गीताभाष्यवाक्यार्थो**ऽनुसन्धेयः - "यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य अविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया 'उपलब्धा' आत्मा कल्प्यते, एवमेव आत्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्यया असत्यरूपयैव परमार्थतोऽविक्रिय एवाऽऽत्मा विद्वान् उच्यते" (गी. भा. २-२१) इति । एवं च अध्यारोपदृष्ट्या आत्मा विवेकीति व्यवह्रियत इति सर्वमनवद्यम् ॥१४॥

केवलानुमानेन नात्मैकत्वम् -

तदेवं प्रासङ्गिकमाक्षेपं परिहृत्य प्रकृतामेव चिन्तामनुवर्तयते - **सोऽयमिति** ।। कृतान्वयव्यतिरेकोऽप्यज्ञ एव, यावत् वाक्येनात्मैकत्वं न विजानातीति हि प्रकृतम् । सोऽयम् अनुमानेन अनात्मानं निरस्य स्थितः, अतत्त्वे आत्मानात्मविवेकरूपे तत्त्वदृक् लब्धपरमार्थदृष्टिः इत्यर्थः ।।

अनुमानप्रदीपेनेति ।। अन्वयव्यतिरेकलक्षणेन अनुमानप्रदीपेन सर्वान् देहादिबुद्ध्यन्तान् अनात्मनः हित्वा संसारैकावलम्बिन्या धिया द्वैतमात्राश्रयया बुद्ध्या तदभावं संसाराभावम् ईप्सति आप्तुमिच्छति । अनुमानेन भावादभावं प्राप्तः, तस्मादपि व्यावृत्तिमनुमानेनैव प्राप्तुमीहते । न च सा वाक्यं विना प्राप्या इत्यत उक्तम् 'अतत्त्वे तत्त्वदृक्' इति ।।१५।।

अज्ञानाश्रय एवायं विवेकः -

ननु किमित्यात्मानात्मविवेकेन सहितापि बुद्धिः संसारावलम्बिनीत्युपालभ्यते ? न हि वाक्यादात्मनि कश्चिदतिशयः क्रियते यतस्तदपेक्षा स्यादपि इत्याशङ्क्याह - **योऽयमिति** ।। योऽयमनात्मस्थः अनात्मानमपरित्यज्यैव तिष्ठतीति । स च संशयावबोधवत् 'स्थाणुर्वा पुरुषो वा' इतिवद् द्विकोटिकत्वात्, अनिश्चयरूपः प्रतिपत्तव्यः । अयथावस्तुस्वाभाव्यात् यथावस्तुस्वाभाव्यम् आत्मनोऽद्वितीयत्वम्, तद्विपरीतत्वात् नानारसवस्तुप्रदर्शकत्वात् ; मृगतृष्णिकोदकप्रबोधवत् अयथार्थश्च इति प्रतिपत्तव्यः । अतोऽज्ञानाश्रय एवायं विवेको नाम इत्याहोत्तरः श्लोक इत्यभिप्रायेण तमवतारयति - **अत आहेति** ।।

संसारबीजसंस्थोऽयम् इति ।। संसारस्य बीजम् अज्ञानम् तस्मिन् संस्थितोऽयम् आत्मानात्मविभागदर्शी । अज्ञानेनैव हि अद्वितीयम् अविक्रियं च स्वात्मानम् आत्मानात्मरूपेण द्वेधा विभक्तं पश्यति,

विवेकविज्ञानं च बुद्धिवृत्तिलक्षणं स्वात्मन इति भ्राम्यति । तद्धिया संसारैकविषययैव विवेकलक्षणया बुद्ध्या मुक्तिं प्राप्तुमिच्छति । अतोऽयं यथा शशो नेत्रनिमीलनमात्रेण व्याधभयं ततो मृत्युं च परिजिहीर्षति, एवं ज्ञानचक्षुर्निमीलनरूपेणाज्ञानेनैव संसारमृत्युं परिजिहीर्षतीत्यनुकम्प्यः इत्यर्थः ॥१६॥

अत्र श्रुतिप्रमाणम् -

अस्यार्थस्येति ॥ अन्वयव्यतिरेकादिधियैव नात्मज्ञानमित्यर्थस्येत्यर्थः ॥

इममर्थं पुरस्कृत्य यथास्माभिरुक्तं तथा सर्वप्रमाणागोचरत्वमात्मनः स्वीकृत्य श्रुत्या सम्यगेवेदं सम्यक् स्फुटम् उदाहृतम् । किं तदुदाहृतमिति ? आह - **यच्चक्षुषेति** ॥ 'यच्चक्षुषा न पश्यति' (के. १-७), 'न दृष्टेर्द्रष्टारं पश्येः' (बृ. ३-४-२) इति च अज्ञानोत्थप्रत्यक्षाद्यगोचरत्वम् आत्मन आह - इत्यर्थः ॥१७॥

३. वाक्यस्यैवात्मैकत्वबोधकत्वम्

(मूलम्)

बुद्ध्यन्तमपविद्ध्यैवं कोऽन्वहं स्यामितीक्षितुः ।
श्रुतिस्तत्त्वमसीत्याह सर्वमानातिगामिनी ॥१८॥

(क्लेशापहारिणी)

अतीताध्यायार्थसंक्षेपोपसंहारः -

तृतीयाध्यायार्थं सङ्क्षिप्योपसंहरति - **बुद्ध्यन्तमिति** ॥ तदेवं देहादिबुद्ध्यन्तम् अन्वयव्यतिरेकन्यायद्वयेनापविद्ध्य अनात्मतया

निराकृत्य 'यद्यपि देहादिबुद्ध्यन्तव्यतिरिक्त एवाहमिति ज्ञातम्, तथापि कोऽन्वहं स्याम्' इतीक्षितुः, वीक्षापन्नस्य सर्वमानातिगामिनी प्रत्यक्षादीनि बाह्यप्रमेयविषयाणि सर्वाण्यपि अतीत्य सकलप्रमेयविलक्षणेऽपि अद्वितीयप्रत्यगात्मन्यविषयेऽपि गन्तुं शीलं यस्याः सा श्रुतिः 'तत्त्वमसि' इत्याह, भावाभावविलक्षणं विशेषस्वरूपं ज्ञापयतीत्यर्थः ।।१८।।

---

४. अभियुक्तवचनसंवादः

(मूलम्)

एष सङ्क्षेपतः पूर्वाध्यायत्रयस्यार्थ उक्तः । सोऽयं न्याय्योऽपि वेदान्तार्थः शास्त्राचार्यप्रसादलभ्योऽपि अनपेक्षितशास्त्राचार्यप्रसादः, अनन्यापेक्षसिद्धस्वभावत्वात् कैश्चित् श्रद्दधानैर्न प्रतीयते । तेषां संग्रहार्थम् अभिमतप्रामाण्योदाहरणम् -

भगवत्पूज्यपादैश्चाप्युदाहार्येवमेव तु ।
सुविस्पष्टोऽस्मदुक्तोऽर्थः सर्वभूतहितैषिभिः ।।१९।।

(क्लेशापहारिणी)

भगवत्पाददिवचनोदाहरणे हेतुः -

अथेदानीं वर्तिष्यमाणग्रन्थस्य वृत्तेन संबन्धं वक्तुमारभते - **एष इति** ।। वृत्तं स्मारयति संक्षेपतः **पूर्वाध्यायत्रयार्थ** इति । यद्यपि, अध्यायत्रयोक्तं ज्ञानकर्मसमुच्चयवादखण्डनम्, आत्मनोऽहंप्रत्ययविषयत्वखण्डनम्, प्रसङ्ख्यानादिवादखण्डनं चेत्यादिकं नात्र संगृहीतम्, तथापि न तत्र परमं तात्पर्यमिति न सोऽध्यायत्रयार्थः ;

तत्त्वमस्यादिवाक्यादेव सर्वानर्थहेत्वज्ञानप्रहाणम् इत्येतावानेव तु विवक्षितः प्रकरणार्थः इति स एवात्र संक्षेपेणोक्त इत्यवधेयम् । अथ वर्तिष्यमाणग्रन्थस्य तात्पर्यमाह - **सोऽयमिति** ।। अयं वेदान्तार्थः वाक्यज्ञानेन सर्वानर्थनिरसनपूर्वकं निरतिशयानन्दरूपस्वात्मन्यवस्थानलक्षणः न्याय्योऽपि वर्णितरीत्या सार्वत्रिकानुभवानुसारियुक्त्युपेतोऽपि कैश्चिन्मन्दप्रज्ञैः श्रद्दधानैः परप्रत्ययनेयबुद्धिभिः न प्रतीयते न विश्वस्यते । न सांप्रदायिकयुक्तियुक्तोऽयम् इति मत्वा नाद्रियत इत्यर्थः । तथा शास्त्राचार्यप्रसादलभ्योऽपि अनपेक्षितशास्त्राचार्यप्रसादोऽयमर्थः । 'नावेदविन्मनुते तं बृहन्तम्' (तै. ब्रा. ३-१२-९-७), 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३-९-२६) इत्यादिश्रुतिभ्यः । शास्त्रप्रसादेन लभ्योऽयम् न पुरुषमत्यभ्यूहमात्रेण, 'नैषा तर्केण मतिरापनेया' (का. १-२-९) इति श्रुतेः । आचार्यप्रसादलभ्यश्च 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२), 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' (गी. ४-३४) इति च श्रुतिस्मृतिभ्याम् । न तु असम्प्रदायविदा येनकेनचित् तार्किकेण प्रोक्तः सुज्ञानाय भवेदित्यर्थः । एतादृशोऽपि अस्य अर्थस्य तज्ज्ञानस्य च अनन्यापेक्षसिद्धस्वभावत्वात्, स्वयंसिद्धनित्यचैतन्यस्वरूपपरमात्मानन्यस्वाभाव्यात्, अनपेक्षितशास्त्राचार्यप्रसादत्वम् । न हि शास्त्रप्रसादेन आचार्यप्रसादेन वा अयमर्थः प्रागसिद्धः सन् नूत्नतया निष्पाद्यते, किं तु स्वयंसिद्ध एव सन् अविद्यामात्रव्यवहितत्वात् शास्त्रेणाचार्येण च अविद्याध्यारोपितातद्धर्मनिरसनपूर्वकं विज्ञाप्यते इत्यभिप्रायः । योऽयमेतादृशो न्यायोपेतः स्वयंसिद्धस्वभावश्च वेदान्तार्थः सर्वथा नातिशङ्कनीय एवास्माभिः प्रकरणेनानेन प्रतिपादितः, श्रद्दधानैः 'अभिनवोऽयम् कश्चित् सिद्धान्तो नास्मद्गुरुसंप्रदायावगत' इति शङ्कमानैः ; अभियुक्तोक्त्या अस्य दृढीकरणम् अपेक्षमाणैरिति यावत् । न प्रतीयते न विश्वस्यते इत्यपि

स्यात् । तेषामपि संग्रहार्थम् आवर्जनेनास्मत्प्रकरणार्थे श्रद्धोत्पादनार्थम्, तदभिमतप्रामाण्यमप्युदाह्रियत इत्यभिप्रायः ।।

भगवत्पूज्यपादैरिति श्लोकः सुगमार्थः ।।१९।।

(मूलम्)

किं परमात्मन उपदेशः, उत अपरमात्मन इति ? किञ्चातः ? यदि परमात्मनः, तस्योपदेशमन्तरेणैव मुक्तत्वात् निरर्थक उपदेशः । अथापरमात्मनः, तस्यापि स्वत एव संसारस्वभावत्वान्निष्फल उपदेशः । एवम् उभयत्रापि दोषवत्त्वात् । अत आह -

अविविच्योभयं वक्ति श्रुतिश्चेत् स्याद् ग्रहस्तथा ।
इति पक्षमुपादाय पूर्वपक्षं निशात्य च ।।२०।।

तच्चेदम् अविवेकात् स्वतो विविक्तात्मने 'तत्त्वमसि' इत्युपदिष्टम् ।

युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ।
यतोऽनभिज्ञे वाक्यं स्याद् बधिरेष्विव गायनम् ।। २१।।

तस्य च युष्मदस्मद्विभागविज्ञानस्य का युक्तिरुपायभावं प्रतिपद्यते ? शृणु -

अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च ।
स्यादेतदहमित्यत्र युक्तिरेवावधारणे ।।२२।।

कथं तौ युक्तिरिति ? अत्राह -

नाद्राक्षमहमित्यस्मिन् सुषुप्तेऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति ।।२३।।

एवं विज्ञातवाच्यार्थे श्रुतिलोकप्रसिद्धितः ।
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ॥२४॥

तत्र त्वमितिपदं यत्र लक्षणया वर्तते सोऽर्थ उच्यते -

अहंशब्दस्य या निष्ठा ज्योतिषि प्रत्यगात्मनि ।
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ॥२५॥

(क्लेशापहारिणी)

अविविक्तात्मतत्त्वस्यैव श्रोतृत्वम् इत्यत्र भगवत्पादसंमतिः -

भगवत्पादैः कथमयमर्थ उदाहारि - ? इति शङ्कायाम् **उपदेश-साहस्र्याम्** उपस्थापितं पूर्वपक्षमाह - **किं परमात्मन इति** ॥ एवं हि तत्रोक्तम् - 'अर्थी दुःखी च यः श्रोता स त्वध्यक्षोऽथवेतरः । अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम् ॥ कर्ताध्यक्षः सदस्मीति नैव सद्ग्रहमर्हति । सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ॥' (उप. १८-७६, ७७) इति । एवं पूर्वपक्षे आत्मनि अनात्मनि वा उप-देशाङ्गीकारे उभयत्रापि दोषवत्त्वात्, उपदेशानर्थक्यप्राप्तिदोष-तादवस्थ्यात्, नैवोपदेशः संभवतीति वाक्यशेषः । **अत आह** - अत्र परिहारमाह सिद्धान्तीति श्लोकमवतारयति -

अविविच्येति ॥ उभयम् आत्मानम् अनात्मानं च अविविच्य विवेकाभाववन्तमेवोद्दिश्य प्रवृत्तं चेत्, इदं तत्त्वमसीति वचः अर्थवत् स्यात् इत्युदाहृतस्य भगवत्पादीयश्लोकार्धस्यार्थः । तच्छेषत्वेन पठ्यते - 'अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि । प्रत्ययान्वयिनिष्ठत्व-मुक्तदोषः प्रसज्यते ॥' (उप. १८-७८) इति । अस्मदर्थप्रत्यय्य-हङ्कारं विविच्यैव तन्निष्ठत्वं त्वंपदस्य वदेद्यदि तदा उक्त दोषः, अचेतनत्वात् तस्य श्रोतृत्वाभावः, 'अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम् । अचितित्वस्य तुल्यत्वादन्यस्मिन् ग्राहके सति ॥' (उप.

१८-७४) इत्यत्रोक्तः, प्रत्ययग्राहकाभावो वा प्रसज्यते इति तदर्थः । तथा च 'बुद्धावेव विवेकोऽयम्' (४-१४) इत्यत्रास्माभिरप्युक्तम् इति भावः । इति पक्षम् उपादाय चिदाभासानङ्गीकारिपूर्वपक्षं निशात्य च 'भगवत्पूज्यपादैश्चाप्युदाहारि' इत्यनेन पूर्वश्लोकगतेन संबन्धः । अत्र आत्मानात्माविवेककारणं चिदाभासमनभ्युपगच्छतां पक्ष एव पूर्वपक्षः । तथा ह्युपक्रमे - 'बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः । ग्राहका इव भासन्ते दहन्तीवोल्मुकादयः ।।' (उप. १८-७१) इति प्रत्ययानां ग्राहकाभासत्वमूरीकृत्यैष विचारः प्रवर्तितः । पूर्वपक्षे अन्वय्येवाहङ्कारो ग्राहक इत्यभ्युपगतम्, सिद्धान्तिना तु तस्याप्यचितिमत्त्वात् न स्वत एव ग्राहकत्वम्, नाप्यध्यक्षसांनिध्यात् - इत्युक्त्वा तदनन्तरमेव वाक्यश्रोतुरप्यसिद्धिरस्मिन् पूर्वपक्षे इति वक्तुं यथावर्णितः 'अर्थी दुःखी च यः श्रोता' इति श्लोकस्थो विकल्प उपन्यस्तः । अत एव च समनन्तरोत्तरश्लोके पठिष्यति 'त्वमित्यध्यक्षनिष्ठश्चेदहमध्यक्षयोः कथम् । संबन्धो वाच्य एवात्र येन त्वमिति लक्षयेत्' (उप. १८-७९) इति । आभासानङ्गीकर्तृमते हि संबन्धाभावदोषः प्रसज्यत इत्यलमतिप्रपञ्चेन ।।२०।।

तदेवमविविक्तोभयरूपस्यैव श्रोतृत्वम् इत्यत्र भगवत्पादसंमतिरभिहिता । अथेदानीं उपदेशः कस्मिन्नधिकारिणि प्रमितिजनक इत्यत्रापि तत्सम्मतिं विवक्षुराह **तच्चेति** ।। इदमविवेकात् इदमः सकाशात् अविवेकापन्नात् 'अयमहमस्मि' इत्येवंरूपात् स्वतः स्वस्मात् आत्मनः ; चिदाभासयुक्तात् अहंप्रत्ययिनः सकाशादिति यावत् । तस्मात् विविक्तः साक्ष्यन्वयसाक्ष्यव्यतिरेकाभ्यां विभज्य निश्चितः आत्मा येन तादृशे अधिकारिणे उपदिष्टम् - इत्यर्थः ।

आत्मानात्मविवेकवत एवायमुपदेश इत्यत्र भगवत्पादोक्तिमुदाहरति - **'युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः'** (उप. १८-९०)

इति । कुतः पुनरेतदेवम् ? उपदेशोऽपि खल्वज्ञस्यैव युज्यते इत्याशङ्क्य प्रतिवक्ति - **यतोऽनभिज्ञ इति** । आत्मानात्मविभागानभिज्ञे, त्वंपदार्थविवेकाभाववति वाक्यं बधिरेष्विव गायनम् न फलदं स्यात् । यथा बधिरो गानमेव न तावच्छृणोतीति गानरसं न शक्नुयाद्वेदितुम्, एवं त्वंपदार्थमेवाजानन् कथमपि न शक्नुयात्तस्य तत्पदार्थभावं बोद्धुमित्यर्थः । यत्पुनराशङ्कितम्, उपदेशोऽपि खल्वज्ञस्यैव युज्यत इति तत्परिहृतम् विवेकोऽप्यनात्मस्थ एवेति 'संसारबीजसंस्थोऽयम्' इति श्लोकेनेति भावः ॥२१॥

अन्वयव्यतिरेकविषयेऽपि भगवत्पादसंमतिः -

अथेदानीं युष्मदस्मद्विभागज्ञाने अन्वयव्यतिरेकन्यायानुसरणमेव उपाय इत्यत्रापि भगवत्पादवाक्यसम्मतिमुदाहर्तुं प्रश्नमुद्भावयति - **तस्य चेति** ॥

उत्तरत्वेन श्लोकमेवावतारयति - **शृण्विति** ॥

अन्वयव्यतिरेकौ हीति ॥ अस्य **उपदेशसाहस्रीश्लोकस्य** (उप. १८-९६) अयमभिप्रायः - 'इदमहम्' इति इदमहमोः सामानाधिकरण्येन प्रयोगे पदस्य पदार्थस्य च अन्वयव्यतिरेकौ युक्तिरेव स्यात्, न तु तन्मात्रेण वाक्यं विना अद्वितीयप्रत्यगात्मरूपविशेषार्थज्ञानं भवतीति । तद्यथा 'अहं मनुष्यः', 'अहमन्धः' 'अहमिच्छामि', 'अहं निश्चिनोमि' इत्यादौ मनुष्यादिपदव्यतिरेकेऽपि अहंपदान्वयात् मनुष्यादिपदवाच्यदेहादीनामपि पदार्थानां व्यतिरेकात् अहंपदवाच्यस्यापि देहादिव्यति-रिक्तत्वमवधार्यते इति । एवं 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति सुप्तोत्थितपरामर्शात्, अहंज्ञातृत्वरहितेऽप्यात्मन्यहंपदप्रयोगात्, अहंप्रत्ययसाक्षिण्यपि तस्य पदस्य वृत्तिरस्तीति विज्ञायते । तदेवं पदपदार्थान्वयव्यतिरेकौ अहंपदार्थस्य सतत्त्वनिर्धारणे युक्तिः । एवं तत्पदार्थान्वयव्यतिरेकावपि तदर्थनिर्धारणे

युक्तिः । तद्यथा 'सदेव सोम्येदमग्र आसीत्' इति वाक्यात् सन्मात्रं तदर्थ इति गम्यते । 'तदैक्षत' इति वाक्ये सत एवान्वयात् ईक्षणकर्तृत्वव्यपदेशं दृष्ट्वा तदेव सत् चित्स्वरूपमिति निर्धार्यते । एवं 'सता सोम्य तदा संपन्नो भवति' इत्यतो जीवानां संपत्तिस्थानं सदिति गम्यते । तथा 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६-८-४) इत्येतद्वाक्यात् जगज्जन्मादिकारणं इत्यादिकमूह्यम् ।।२२।।

तत्राऽऽत्मान्तःकरणयोर्विशिष्यान्वयव्यतिरेकौ भगवत्पादैरपि प्रदर्शितौ इति वक्तुं श्लोकमवतारयति - **कथमिति** ।।

नाद्राक्षमिति ।। 'सुषुप्तेऽन्यन्मनागपि स्वल्पमपि नाद्राक्षम्' इति स्वां स्वरूपभूतां दृष्टिं चैतन्यं न वारयति, प्रत्ययमेव तु निषेधति । तदेवमस्मिन् परामर्शे अविलुप्तदृष्टिरूपमात्मानमन्वयेन लुप्तदृष्टिं च व्यतिरेकेणावगन्तुं शक्यत इति भावः । अस्मिन् भगवत्पादीये श्लोके (उप. १८-९७) प्रत्ययशब्दं **केचिदित्थं व्याचक्रुः** - 'प्रतीयत इति व्युत्पत्त्या प्रमातृप्रमाणप्रमेयादिरूपः सर्व एव विशेषो गृह्यत' इति । वयं तु पूर्वापरग्रन्थार्थसमालोचनया प्रत्ययशब्देनात्र प्रत्यय एव ग्रहीतव्य इति मन्महे, वाक्यशेषे तथैवावधारणात् । एवं हि समनन्तरोत्तरश्लोकः 'स्वयंज्योतिर्न हि द्रष्टुरित्येवं संविदोऽस्तिताम् । कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम् । स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक् ।।' (उप. १८-९८) इति । अयमभिप्रायः - 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' (बृ. ४-३-१४), 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ. ४-३-२३) इति च ब्रुवती श्रुतिः सुषुप्तावपि आत्मचैतन्यस्य अस्तिताम्, तस्य कौटस्थ्यं च स्वयमेवाह, प्रत्ययस्य तु 'यद्वै तन्न पश्यति' इत्यनेन लुप्ततां च स्वयमेवाह ; अतोऽत्र प्रत्ययावगती पृथक्कृत्य दर्शिते इति गम्यत इति । प्रत्ययादितरस्य प्रमेयस्य तु नास्तित्वं पृथगेव श्रुत्या प्रोक्तम् 'न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्' (बृ. ४-३-२३) इति । ततो द्वितीयं विभक्तं नास्ति, यदि हि तद् विद्येत तर्हि पश्येत्

इत्यर्थः । तस्मात् 'स्यादेतदहमित्यत्र युक्तिरेवावधारणे' इति प्रक्रमात् । 'प्रत्ययस्य तु लुप्तताम्' इति च विशिष्य प्रत्ययस्यैव वाक्यशेषे ग्रहणाच्च अहंपदार्थे युष्मदंशाद् विविच्य कूटस्थात्मनिर्धारणार्थमेवेदमुदाहरणमिति युक्तमुत्पश्यामः ।।२३।।

कृतान्वयव्यतिरेकस्यैवैकत्वोपदेश इत्यत्रापि भगवत्पादसंमतिः -

अथेदानीं यत्तदुक्तमस्माभिः नान्वयव्यतिरेकमात्रेण कृतार्थता किं तु कृतान्वयव्यतिरेकः श्रुत्यैव प्रतिबोध्यत (३-११५) इति, तत्रापि भगवत्पादसंमतिं वक्ष्यामीति श्लोकमुदाहरति - **एवमिति** ।। अस्य श्लोकस्य (उप. १८-९९) अयमर्थः - एवं विज्ञातः वर्जनीयतया वाच्यार्थः, अहमर्थः तत्पदार्थश्च येन तादृशे सति पुरुषे, इदं ज्ञानं व्यतिरेकानुसारिणः । अन्वयानुसारेण विवेचिततत्त्वंपदार्थे इत्यपि द्रष्टव्यम् । एवं चान्वयव्यतिरेकाभ्यामवगतपदार्थे इत्यर्थः फलिष्यति । अथवा विज्ञातवाच्यार्थे इत्यस्यैव वाच्यार्थविवेकपूर्वकमवगतपदार्थे इत्यभिप्रायोऽवसेयः । **श्रुतिलोकप्रसिद्धितः** इति । लोकप्रसिद्धिस्तावदुदाहृतैव सुषुप्तपरामर्षरूपा । श्रुतिप्रसिद्धिश्च 'अत्रायं पुरुषः स्वयंज्योतिः' (बृ. ४-३-९, १४) 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ. ४-३-२३) इत्यादिवाक्यज्ञानजन्या । तदेवं श्रुतिलोकप्रसिद्धितः एवमवगततत्त्वंपदार्थे पुरुषे सति श्रुतिः, श्रोतुर्मोहापनुत्तये अविद्यानिरसनपूर्वकं जिज्ञासापरिसमाप्त्यर्थं 'तत्त्वमसि' इत्याह - इत्यर्थः । 'विज्ञातवाक्यार्थे' इति पाठस्तु नादरणीयः । न हि श्रुतिलोकप्रसिद्धितो वक्यार्थविज्ञानम् इत्याञ्जसं भवेदिति । यस्तु **केषाञ्चिदभ्यूहः** 'विज्ञातावान्तरवाक्यार्थे' इत्यर्थः इति । स प्रकृतहानाप्रकृतकल्पनाप्रसञ्जक इत्युपेक्ष्यः । प्रकृतो हि अन्वयव्यतिरेकाभ्यां पदार्थविवेकः, नावान्तरवाक्यार्थ इति । अतो यथास्वीकृत एव पाठः साधीयानित्युत्पश्यामः ।।२४।।

अथ यत्तदुक्तम् 'अहंवृत्त्या लक्ष्यतेऽनर्हयापि सः' (३-९७) इत्यादिना । तथैव त्वंपदलक्ष्यत्वमात्मनो भगवत्पादैरप्युक्तम् इति दर्शयितुं श्लोकावतरणिका **तत्र त्वमिति पदमिति** ।। 'अहंशब्दस्य' (उप. १८-१०१) इति भगवत्पादीयश्लोकस्यायमर्थः । अहंशब्दस्य या प्रत्यगात्मनि लक्षणया निष्ठा पर्यवसानम् सैव 'सदसि' इत्येवंवाक्ये त्वंपदार्थस्य उक्ता विवक्षितेति । सदभिन्नत्वंपदार्थज्ञाने फलं विमुक्तता । एतल्लक्ष्यार्थाज्ञानादेव वाक्यार्थो न ज्ञायते लोकैरिति भावः ।।२५।।

(मूलम्)

अन्यच्चान्वयव्यतिरेकोदाहरणम् -

छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते ।
तथा शिष्टेन सर्वेण येन येन विशेष्यते ।।२६।।

विशेषणमिदं सर्वं साध्वलङ्करणं यथा ।
अविद्याध्यासतः सर्वं ज्ञात आत्मन्यसद् भवेत् ।।२७।।
तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम् ।
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः ।।२८।।
ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ।
अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत् ।।२९।।
दृश्यत्वादहमित्येष नात्मधर्मो घटादिवत् ।
तथान्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः ।।३०।।

(क्लेशापहारिणी)

अन्वयव्यतिरेकोदाहरणान्तरम् उपदेशसाहस्रीतः -

भगवत्पादीयं वाक्यान्तरमप्यस्त्यन्वयव्यतिरेकन्यायं यथोक्तं

दर्शयदिति वक्तुं **विशेषापोहप्रकरणगतान्** श्लोकानुदाहरति - **अन्यच्चेति** ।।

'छित्त्वा' (उप.सा. ६-१) श्लोकस्यायमर्थः - यथा छित्त्वा त्यक्तेन हस्तेन आत्मा न स्वयं विशेष्यते तथा शिष्टेन हस्तातिरिक्तेनापि सर्वेण । येन येनाङ्गैर्विशेष्यते, तेन तेन स्वयं नात्मा विशेष्यत इति ।।२६।।

त्यक्तहस्तदृष्टान्तेन किमवगम्यत इत्यत्रोच्यते भगवत्पादैः - **विशेषणमिदमिति** ।। तदिदं सर्वं विशेषणं साध्वलङ्करणं यथा । यथा प्रजापतिनोपदिष्टप्रकारेण आगन्तुकसाध्वलङ्कारादिवत् शरीरादीनामपि छायाकरत्वाविशेषात्, अनात्मत्वे दृढीकृतेऽपि शिष्ययोर्विपरीतनिश्चयो नापगतः, एवम् अविद्याध्यासतः सर्वम् अविद्यया अध्यस्तमपि आत्मन एवेदम् इति सर्वत्र मतिर्भवति । ज्ञाते त्वात्मनि - यथा इन्द्रस्य प्राग्भाविता सशरीरत्वबुद्धिर्ज्ञानात्परमपगता, अमृतस्याशरीरस्यात्मनोऽधिष्ठानमात्रं शरीरम् असदेवेति च निश्चयोऽभूत् तथा - सर्वमिदम् असद् भवेद् इत्यर्थः ।।२७।।

तस्मादिति ।। उक्तन्यायं सर्वेष्वपि अध्यारोपितविशेषणेष्वतिदिशति - तस्मात् सर्वं विशेषणं छित्त्वा त्यक्तेन हस्तेन तुल्यम्, नैवात्मधर्म इत्यर्थः । तस्मात् ज्ञः आत्मा सर्वविशेषणैर्मुक्तः इति सिद्धम् इत्यर्थः ।।२८।।

ज्ञातैवात्मा इति ।। उपदेशसाहस्रीत उद्धृतोऽयं (उप.सा. ६-४) श्लोकः स्पष्टार्थः । ज्ञेयम् अनात्मत्वेनोत्सृज्य, केवलः शुद्ध आत्मा ज्ञातेत्येव ग्राह्यः । 'अविज्ञातो विज्ञाता' (बृ. ३-७-२३) इति श्रुतेः । एतेन द्रष्ट्रन्वयदृश्यव्यतिरेकवत् साक्ष्यन्वयसाक्ष्यव्यतिरेकावपि सिध्यत इत्याह - **'अहमित्यपि यत् ग्राह्यम्'** इति ।। अहमित्यत्रापि ग्राह्यांशः त्यक्तहस्तवदेवानात्मा इति सिद्धमित्यर्थः ।।२९।।

अत्रैव **नान्यदन्यत्प्रकरणस्थं** श्लोकम् (उप.सा. १५-१६)

उदाहरति - **दृश्यत्वादिति** ।। स्पष्टार्थः श्लोकः । अयमेव ह्यर्थ इहापि 'घटादयो यथा लिङ्गम्' (३-५६) इत्यत्र प्रदर्शित इत्याशयः ।।३०।।

(मूलम्)

सर्वन्यायोपसंग्रहः -

नित्यमुक्तत्वविज्ञानं वाक्याद् भवति नान्यतः ।
वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ।।३१।।
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ।।३२।।
सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्माद् यथैवं प्रत्यगात्मनि ।।३३।।

(क्लेशापहारिणी)

सर्वन्यायोपसंग्रहः -

किं बहुना ? प्रकरणार्थः सर्व एवैकत्र प्रदर्शितोऽस्ति पूज्यपादैरित्याह **सर्वन्यायोपसंग्रह** इति ।। अस्मिन्नर्थे श्लोकत्रिकं **तत्त्वमसिप्रकरणस्थम्** उदाहरति - **नित्यमुक्तत्वविज्ञान-मित्यादि** ।। श्लोकाः (उप.सा. १८-१९०, १९१, १९२) स्पष्टार्थाः ।।३१।।३२।।३३।।

(मूलम्)

वीक्षापन्नस्योदाहरणम् -

नवबुद्ध्यपहाराद्धि स्वात्मानं दशपूरणम् ।
अपश्यन् ज्ञातुमेवेच्छेत् स्वमात्मानं जनस्तथा ।।३४।।

अविद्याबद्धचक्षुष्ट्वात् कामापहृतधीः सदा ।
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा ॥३५॥

(क्लेशापहारिणी)

वीक्षापन्नस्योपदेश इत्यत्र भगवत्पादसंमतिः -

येयं वाक्यादद्वितीयात्मप्रतिपत्तिः, सा स्वतःसिद्धात्मवस्त्वज्ञान-निरसनमात्रेण तत्त्वावबोधिनी दशमवाक्यार्थप्रतिपत्तिवत् । नातो वाक्य-श्रवणानन्तरं कार्यान्तरे नियोगोऽत्र इति यदस्मिन् प्रकरणेऽभिहितम् तत्र भगवत्पादीयं सम्मतिमुदाहरिष्यन् आत्मानात्मविभागानन्तरं को न्वहमस्मीति वीक्षापन्नस्य श्रुत्युपदेशो भवतीत्यत्र तावत् तदुक्तिमुदा-हरति - **वीक्षापन्नस्येति** ॥ 'नवबुद्ध्यपहाराद्धि', 'अविद्याबद्ध-चक्षुष्ट्वात्' (उप. १७४, १७५) इति श्लोकद्वयं निगदव्याख्या-तम् ॥३४॥३५॥

(मूलम्)

सोऽयमेवम् अविद्यापटलावगुण्ठितदृष्टिः सन् कथमुत्थाप्यत इत्याह -

यथा स्वापनिमित्तेन स्वप्नदृक् प्रतिबोधितः ।
करणं कर्म कर्तारं स्वाप्नं नैवेक्षते स्वतः ॥३६॥
अनात्मज्ञस्तथैवायं सम्यक् श्रुत्यावबोधितः ।
गुरुं शास्त्रं तथा मूढं स्वात्मनोऽन्यं न पश्यति ॥३७॥

(क्लेशापहारिणी)

श्रुत्यैव निःशेषाविद्यानिवृत्तिः -

अविद्याप्रतिबद्धज्ञानचक्षुष्ट्वात् कामेन विक्षिप्तचित्तः सन् दशमवत् नित्यविविक्तमेवापि सन्तं न विजानातीत्युक्तम् । अथेदानीं दशमवाक्येन

दशमज्ञानं यथा नवभ्यो विविक्तत्वेन निश्चयः, यथा चोपदेष्टुपदेश्योपदेशादिविभागः परमार्थ एव तत्र, न तथा प्रकृतात्मज्ञाने, किं तु अन्यादृश एवेति विवरीतुकामः श्लोकान्तरमवतारयति - **सोऽयमिति** ।। अविद्याकृतदृष्टित्वात् द्वैतमेव सत्यत्वेन पश्यन् ततः कथम् उत्थाप्यते केन प्रकारेण प्रतिबोध्यत इतीति प्रश्नः । श्लोकद्वयेनोत्तरमाह - **यथेत्यादिना** ।

यथेति ।। अनात्मज्ञ इति च ।। स्वापनिमित्तेन 'यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति' (बृ. ४-३-२०) इत्याद्युपवर्णितप्रकारेण अविद्याकृतेनभयेन, हस्तिव्याघ्रचोरादिदर्शननिमित्तेन प्रतिबोधितः स्वप्नदृक् स्वाप्नं कर्तृकरणकर्मलक्षणं द्वैतं स्वात्मनो विविक्तं नैव वीक्षते, तथैवायम् अनात्मज्ञः, अनाद्यविद्यया सुप्तः श्रुत्या तत्त्वमस्यादिकया सम्यक् अज्ञानापबाधेन अवबोधितः स्वाप्नकर्त्रादिस्थानीयं गुर्वादिकं नैव स्वात्मनः कूटस्थाद्वितीयात् अन्यं ततः प्रविभक्तं पश्यति । तं प्रति शास्त्रशिष्यलक्षणो विकल्पोऽत्यन्ताय निवर्तते इत्यभिप्रायः । तथा **ह्यभियुक्तवचनम्** - 'विकल्पो विनिवर्तेत कल्पितो यदि केनचित् । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ।।' (गौ.का. १-१८) इति ।।३६।।३७।।

---

५. श्रुत्यैव निःशेषमविद्यानिवृत्तिरित्यत्र वृद्धसंमतिः

(मूलम्)

स किं सकलसंसारप्रविविक्तमात्मानं वाक्यात् प्रतिपद्यत उत

नेतीति ? अत्र ब्रूमः । कूटस्थावगतिशेषमात्रत्वं[1] प्रतिपत्तेः, अत आह -

दण्डावसाननिष्ठः स्याद्दण्डसर्पो यथा तथा ।
नित्यावगतिनिष्ठं स्याद्वाक्याज्जगदसंशयम् ॥३८॥

कुत एतत् ? यस्मात् -

पश्यन्निति यदाऽऽहोच्चैः प्रत्यक्त्वमजमद्वयम् ।
अपूर्वानपरानन्तं त्वमा तदुपलक्ष्यते ॥३९॥

तत्त्वमस्यादिवाक्योत्थविज्ञानेनैव बाध्यते । यस्मात् -

अस्माद्यदपरं रूपं नास्तीत्येव निरूप्यते ।
अन्यथाग्रहणाभावाद्बीजं तत्स्वप्नबोधयोः ॥४०॥

अस्यार्थस्य द्रढिम्न उदाहरणम् -

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥४१॥
अन्यथागृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥४२॥

तथा भगवत्पादीयमुदाहरणम् -

सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
आत्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाभवम् ॥४३॥
एवं गौडैर्द्राविडैर्नः पूज्यैरयमर्थः प्रभाषितः ।
अज्ञानमात्रोपाधिः सन्नहमादिदृगीश्वरः ॥४४॥

1. 'शेषमात्रत्वात्' इत्यत एष पाठः साधीयान् ॥

(क्लेशापहारिणी)

समस्तस्यैवापि प्रपञ्चस्य आत्मस्वरूपत्वं ज्ञानिनः -

न केवलं गुर्वादिविकल्पः किं त्वखिलमेव जगत् तत्त्वमस्यादि-वाक्यज्ञानात्परम् आत्मैवास्य भवति - इति प्रतिपादयितुम् आक्षेप-मुद्भावयति - **स किमिति** ।। यदि वाक्यात् सकलसंसारविविक्तमात्मानं प्रतिपद्यते, तर्हि सद्वितीयत्वं तस्य ; अथ न प्रतिपद्यते, तर्हि वैयर्थ्यमेव वाक्योपदेशस्य - इत्युभयथापि दोष एवेत्याक्षेप्तुरभिप्रायः । परिहारमाह - **अत्र ब्रूमः** इति । कूटस्थावगतिमात्रत्वात् प्रतिपत्तेरिति । नात्मनः संसारप्रविविक्तत्वं प्रतिपद्यते, नाप्यप्रतिपत्तिः ; किं तर्हि, अद्वितीयकूट-स्थावगतिरूपत्वमेव प्रतिपत्तेः इत्यभिप्रायः । तथा च ज्ञातृज्ञेयज्ञान-विभागशून्यं नित्यनिवृत्तप्रपञ्चमात्मानं प्रतिपादयतो वाक्यस्याप्रामाण्यं न शक्यशङ्कम् इत्यभिप्रायः । अत्रार्थे श्लोकमवतारयति - **अत आहेति** ।।

दण्डावसाननिष्ठ इति ।। यथा दण्डज्ञानात् दण्डसर्पो दण्डावसाननिष्ठः स्यात् - दण्डरूपेणैव पर्यवस्य तिष्ठति न तु विकल्पितस्वरूपेण, एवं जगत्सर्वम् आत्मनि विकल्पितम् 'ऐतदात्म्य-मिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७) इत्यादिवाक्यज्ञानात् असंशयं नित्यावगतिनिष्ठं **स्यात्** कूटस्थावगति-मात्रस्वरूपात्मरूपेणैवावतिष्ठते, न तस्य तस्मात् प्रविविक्तत्वं प्रणाशो वा इत्यर्थः । **तथा चोक्तमभियुक्तैः** - 'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः । मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।।' (गौ. का. १-१७) इति । **भगवत्पादैर**प्युक्तम् अविद्यामात्रमेव संसारो नित्यं कूटस्थावगतिरूपात्मनैवात्मवानिति 'रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः । अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा ।।' (उप. १८-४६) इत्यत्र ।।३८।।

वाक्यात् जगत् सर्वमेव नित्यावगतिनिष्ठं स्यात् न पृथगवतिष्ठते इति **कुत एतत् ?** - इति प्रश्नपूर्वकं वाक्यस्थत्वंपदार्थस्वरूपं विशदयति - **यस्मादिति** ।। 'उपलक्ष्यते' इति श्लोकस्थेनास्य संबन्धः ।।

पश्यन्निति ।। 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येत्' (बृ. ४-३-२३) इति यत् प्रत्यक्त्वं सर्वान्तरम् अजं सर्वविकाररहितम् अद्वयम् स्वतो विभक्तद्वैतरहितम् उच्चैः प्राह श्रुतिः (बृ. २-५-१९), अपूर्वं कारणरहितम् अनपरं कार्यरहितम् अनन्तरं देशकालादिपरिच्छेदरहितं च तदेव वस्तु त्वमा तत्त्वमसीवाक्ये उपलक्ष्यते । अतस्तादृशे कूटस्थाद्वितीयतत्त्वमात्र एव जगत् पर्यवस्यति वाक्यार्थज्ञानेन इत्यवगम्यत इत्यभिप्रायः ।।३९।।

ननु च यथोदाहृतश्रुत्या सुषुप्ते स्वत एव तादृशं वस्तु सिद्धमित्युच्यते चेत् किं तत्त्वमस्यादिवाक्यस्य कृत्यमवशिष्यते ? तत्राह - **तत्त्वमस्यादिवाक्योत्थविज्ञानेनैव बाध्यते इति** । अविद्याकल्पितं द्वैतम् इति शेषः । किं कारणं पुनः सुषुप्तस्वरूपप्रतिपादकश्रुतिज्ञानेनैव तन्न बाध्यत इति ? तत्राह - **यस्मात्** इति ।। 'नास्तीत्येव निरूप्यते' इत्यनेन श्लोकस्थेनास्य संबन्धः ।।

अस्मादिति ।। अस्माद् अवगतिरूपात् यदपरं रूपं प्रमात्रादिद्वैतयुक्तं तन्नास्तीत्येव न तत् सुषुप्तेऽस्ति इत्येतावन्मात्रं निरूप्यते श्रुत्या । तत्र तदभावे कारणमाह - **अन्यथाग्रहणाभावादिति** । 'न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्' इति हि श्रुतिः । ग्रहणाभावश्चाग्रहणं नाम । तदत्र सुषुप्तौ 'न पश्यति' इति यदुरीकृतम्, तदेव स्वप्नप्रबोधयोरन्यथाग्रहणलक्षणयोर्बीजम् । एवं च सुषुप्तपरिक्षामात्रेण नात्मनोऽज्ञानातिरिक्तत्वसिद्धिः, न हि तत्राग्रहणस्याप्यपबाधकं ज्ञानं समस्ति येन तावन्मात्रेण कृतार्थता भवेत् जिज्ञासोः - इति भावः ।।४०।।

अविद्यानिवृत्त्यैवाऽऽत्मबोध इत्यत्र गौडपादसंमतिः -

अथ केवलात् सुषुप्तनिरूपणात्, न निष्प्रपञ्चावगमः, किं तर्हि वाक्यादेव । सुषुप्तावस्थायामप्यनर्थबीजस्य अग्रहणस्य सत्त्वात् - इति यत्तत्प्रकरणे (३-५८) उक्तम्, तत्राप्यभियुक्तसम्मतिमुदाहरिष्यामीति श्लोकद्वयमवतारयति - **कार्यकारणबद्धौ तावित्यादिना ॥**

तत्र 'कार्यकारणबद्धौ' (गौ. का.१-११) इत्यस्य गौडपादीय-श्लोकस्य तावदयमर्थः - कार्यम् अन्यथाग्रहणम् । कारणम् अग्रहणम् । ताभ्यां कार्यकारणाभ्यां तौ यथावर्णितौ विश्वतैजसौ बद्धौ, प्राज्ञस्तु कारणबद्धः अग्रहणमात्रेण बद्धः, न तु कार्यबद्धः विश्वतैज-साविव । तत्त्वाप्रतिबोधमात्रमेव हि प्राज्ञत्वे निमित्तमिति । तावेतौ कार्यकारणबन्धौ कार्ये[1] अवस्थात्रयसंपर्करहिते, तुर्ये, चतुर्थे, निर्विकल्पे, परमार्थात्मनि न संभवत इत्यर्थः । यथा त्वत्र प्राज्ञशब्दवाच्यस्यापि सुषुप्तात्मनोऽज्ञत्वं सर्वज्ञत्वं च दृष्टिभेदेन, तथा **माण्डूक्यरहस्य-विवृत्तौ** वर्णितं तत्तत एवाधिगन्तव्यम् । न तत् प्रकृतोपयोगीत्यतो नेह प्रपञ्च्यते । प्रकृतं तु सुषुप्तात्मा कारणाज्ञानबद्ध इतीति स्मर्तव्यम् ॥४१॥

य एवायमात्मा उभयविधबन्धयुत इव भाति संसारावस्थायाम्, स एव तु परमार्थतत्त्वबोधे सति नित्यासंसारी तुरीय इति निश्चीयते इति बोधयन्तीं कारिकाम् (१-१५) उदाहरति - **अन्यथागृण्हातः इति ।** स्वप्नजागरितयोः परमार्थात्मानमन्यथागृण्हातः रज्जुमिव सर्पत्वेन वैपरीत्येन सप्रपञ्चात्मत्वेन विभावयतः स्वप्नो भवति । यद्यपि तयोरवस्थयोः कारणाज्ञानमप्यस्ति निद्राख्यम्, तथापि गुणभूतं तदिति अन्यथाग्रहणरूपः स्वप्न एव तत्र विपर्यास इत्युक्तम् । सुषुप्तौ पुनः तत्त्वाग्रहणरूपा निद्रैव केवला विपर्यासः । तयोः स्थानयोर्विपर्यासे

1. कार्ये इति प्रथमाद्विवचनम्, विकल्पौ इत्यर्थः । (प्रकाशकः)

यथोक्तलक्षणे क्षीणे वाक्यात् तत्त्वप्रतिबोधतो बाधिते सति तुरीयं पदमश्नुते, तदा तत्र उभयलक्षणं[1] कार्यकारणरूपं बन्धमपश्यन् स्वात्मनि निश्चितो भवतीत्यर्थः ।।

'विपर्यासे क्षीणे' इत्युक्तेः सुषुप्तौ कारणाज्ञानसत्त्वम्, स्वप्नजागरितयोः कार्याज्ञानसत्त्वं च विपर्यासमात्रेणेति वाक्यार्थज्ञाने सति तदपबाधनेन तुरीयनिश्चयोपपत्तिरिति ध्येयम् ।।४२।।

अविद्यानिवृत्तिविषये भगवत्पादसंमतिः -

यथा गौडपादाचार्याणाम्, एवं भगवत्पादानामपि संमतिरस्ति सुषुप्ते वाक्यज्ञानापनोद्याग्रहणसत्त्वे इति दर्शयन् **उपदेशसाहस्रीस्थं** श्लोकम् (१७-२६) उदाहर्तुमुपक्रमते - **तथेति** ।।

सुषुप्ताख्यमिति ।। 'तमः' 'अज्ञानम्' इति च पर्यायौ । तमसेव हि आत्मस्वरूपविवेकाभावलक्षणेन निमित्तभूतेनाज्ञानेन विविधमात्मानं विकल्पयन् संसरति लोकः इति । तस्यैवाज्ञानस्य सुषुप्तम् इत्याख्या ; 'निद्रातत्त्वमजानतः' इति कारिकाप्रामाण्यात् । तदेतदज्ञानं स्वप्नबोधयोर्बीजम् । सममेव हि तयोरवस्थयोरुभयोरपि अन्यथाग्रहणं स्वात्मन इति । अत एव **वेदान्तसंप्रदायविदः** स्थानयोरुभयोरपि वस्तुतः स्वप्नत्वमेवेत्यास्थितवन्तः 'स्वप्नजागरीते स्थाने ह्येकमाहुर्मनीषिणः । भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ।।' (गौ.का. २-५) इति । तदेवमन्यथाग्रहणबीजभूताया निद्रायाः संसारहेतुभूतायाः कदा नु निवृत्तिः ? - इत्याकाङ्क्षायामाह - **आत्मबोधप्रदग्धं सदिति** तत् सुषुप्ताख्यं बीजम् आत्मबोधप्रदग्धं वेदान्तवाक्यजनितात्मैकत्व-ज्ञानेन बाधितं सत् अभवं स्यात्, न पुनः प्रादुर्भवेत् ; अन्यथाग्रहणे निमित्तं न भवेदित्यर्थः । तत्र दृष्टान्तः **'बीजं दग्धं यथाभवम्'** इति । स्मर्यते हि

---

1. प्रथममुद्रणे त्रुटितम् अपेक्षितं तु - प्रकाशकः ।

'बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः । ज्ञानदग्धैस्तथाक्लेशैर्नात्मा संबध्यते पुनः' (मो. ध. २११-१७) इति ॥

तमोऽज्ञानमिति न भावरूपमज्ञानम् -

अत्र केचित् - 'तमः' इति विशेषणेन अज्ञानस्य भावरूपत्वमुच्यते ; तस्य च बीजत्वं स्वप्नप्रबोधयोरुपादानत्वम् - इति प्रक्रियान्तरमभ्यूहन्ति । तदयुक्तम् ; अत्रैव समनन्तरपूर्वश्लोके **भगवत्पादैः** सुषुप्तस्य स्वप्नाभावलक्षणत्वेनोद्घोषणात् 'दृष्टं जागरितं विद्यात् स्मृतं स्वप्नं तदेव तु । सुषुप्तं तदभावं च स्वमात्मानं परं पदम्' (उप. १७-२५) इति । **उपनिषद्यपि** तथैव लक्षितत्वात् सुषुप्तस्य 'यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्' (मां. ५) इति । **सूत्रकारेण च** 'तदभावो नाडीषु तच्छ्रुतेरात्मनि च' (वे. सू. ३-२-७) इति स्वप्नाभावत्वेनैव निर्देशात् । यदि हि भावलक्षणा काचिदविद्या सुषुप्ते स्थिता इति मतं स्यात् श्रुतेः, सूत्रकारस्य, भाष्यकारस्य वा, तर्हि किमिति स्वप्नाभावत्वेनैव सर्वत्र सुषुप्तिलक्षणं प्रणीयत इति प्रष्टव्यास्ते भावाविद्यापक्षपातिनो वावदूकाः । कारिकायामपि 'द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः (गौ.का. १-१३) इति ग्रहणाभावस्यैव प्राज्ञोपाधित्वेन कथनात् ; **कारिकाभाष्येऽपि** 'तत्त्वाग्रहणान्यथाग्रहणाभ्यां बीजफलभावाभ्याम्, तत्त्वाप्रतिबोधमात्रमेव हि बीजं प्राज्ञत्वे निमित्तम्' (गौ.का.भा. २-२२) इति चाग्रहणत्वेनैव वर्णनाच्च । अभावलक्षणस्याप्यज्ञानस्यानर्थविनिपातहेतुत्वेन तमःशब्दवाच्यत्वमुचितमेव । 'सर्पान् कुशाग्राणि तथोदपानं ज्ञात्वा मनुष्याः परिवर्जयन्ति । अज्ञानतस्तत्र पतन्ति केचिज्ज्ञाने फलं पश्य यथा विशिष्टम् ॥' (शान्ति. २०१-१७) इत्यादिस्मृतिप्रामाण्यात् । बीजशब्दस्तु कारणवाचीति सुप्रसिद्धम् ।

तस्मात् कारिकास्विवोपदेशसाहस्र्यामपि द्वैतोपादानलक्षणभावाविद्यावादो नाकाङ्क्षितव्यः सुधीभिरित्यलमतिप्रपञ्चेन ।।४३।।

गौडपादभगवत्पादवाक्योदाहरणस्य उपसंहारः -

सौषुप्ताज्ञानविषयकसम्मत्युदाहरणमुपसंहरति - एवमिति ।। एवं गौडैर्गौडपादाचार्यैर्द्राविडैश्च भगवत्पादाचार्यैश्च माण्डूक्यकारिकासु, उपदेशसाहस्र्यां च नः पूज्यैरयमर्थः प्रकाशितः । कोऽयमर्थ इति ? आह - अज्ञानमात्रोपाधिः सन् ईश्वरः सर्वसाक्षी परमात्मा अहमादिदृग्भवति ; निरस्ताज्ञानस्तु प्रपञ्चोपशमः शान्तः शिवोऽद्वैत एवावतिष्ठत इत्येषोऽर्थ इति ।।४४।।

---

६. उभयविधाज्ञानमप्यनात्मधर्म एव

(मूलम्)

तत्रान्यथाग्रहणवत् अन्यथाग्रहणबीजमग्रहणम् अनात्मधर्म एवेत्याह -

इदं ज्ञानमहं ज्ञाता ज्ञेयमेतदिति त्रयम् ।
योऽविकारो विजानाति परागेवास्य तत्तमः ।।४५।।

यत एतदेवम्, अतस्तस्यैव बीजात्मनस्तमसः, चित्तधर्मविशिष्टस्य स्वकार्यद्वितीयाभिसंबन्धो, न त्वविकारिण आत्मन इत्याह दृष्टान्तेन -

रूपप्रकाशयोर्यद्वत् सङ्गतिर्विक्रियावतः ।
सुखदुःखादिसंबन्धश्चित्तस्यैवं विकारिणः ।।४६।।

तदेतदन्वयव्यतिरेकाभ्याम् दर्शयिष्यन्नाह -

सम्प्रसादेऽविकारित्वादस्तं याते विकारिणि ।
पश्यतो नात्मनः किञ्चिद् द्वितीयं स्पृशतेऽण्वपि ॥४७॥

(क्लेशापहरिणी)

अज्ञानं नात्मधर्मः -

तदेवमवस्थासु तिसृष्वप्यज्ञानम् अग्रहणान्यथाग्रहणान्यतररूपं समस्तीति कृतान्वयव्यतिरेकस्य वाक्यादेवाज्ञानबाधः - इत्ययं प्रकरणार्थोऽभिमतवचनोदाहरणेन समर्थितः । अथेदानीं येयमभ्युपगमिता अज्ञानानुवृत्तिः सर्वत्र, सेयमनात्मन एव अज्ञानदृष्ट्या, प्रत्यगात्मदृष्ट्या तु न कस्यचिदपि ; अत एवास्य वाक्यान्निवृत्तिरुपपद्यते इत्येतत्, प्रदर्शयिष्यन्नाह - **तत्रेति** ॥ अग्रहणमपि अनात्मधर्म एव, अज्ञानोपादिकप्रमातृधर्म एव । अथवा अन्तःकरणधर्म एव, अन्तःकरणोपाधिनिमित्तमेव हि प्रमातृत्वमात्मनः, तद्द्वारेण च प्रमातृधर्मत्वव्यवहारश्चाज्ञानस्येति । न तु प्रत्यगात्मन इत्यर्थः । 'इत्येतदाहोत्तरः श्लोकः' इति शेषः ॥

इदं ज्ञानमिति ॥ ज्ञातृज्ञेयज्ञानविभागं यः स्वयम् अविकारो विजानाति स्वचैतन्यप्रकाशेनावभासयतीत्यर्थः । अस्य प्रत्यगात्मनः तत् यस्यास्तित्वमेतावत्पर्यन्तमुपपादितं तत्तमः अज्ञानं परागेव बहिरेव न तद्धर्मः - इत्यर्थः । अयमाशयः - ज्ञातृज्ञानज्ञेयक्षेत्रे एवाज्ञानस्यावकाश इत्यतो न तत्साक्षिणस्तत्सम्भवतीति ॥

अत्रैकदेशिनां मतं तन्निरासश्च -

अत्र **केचित्** श्लोकाभिप्रायं शङ्कान्तरसमाधानत्वेन वर्णयन्ति । कथम् ? 'तम आसीत्', 'आसीदिदं तमोभूतम्' इति श्रुतिस्मृतिप्रसिद्धस्य जगद्बीजस्याज्ञानस्य परमेश्वरशक्तितया तदभेदात् कथं तस्य

ज्ञाननिवर्त्यत्वमिति ? - इति शङ्का । तमःशब्दवाच्यमज्ञानम् आत्मनः स्वरूपं धर्मो वा न भवति, जडत्वात्, दृश्यत्वाच्च । आत्मशक्तित्व-व्यपदेशस्तु अस्य सत्ताप्रतीत्योस्तत्परतन्त्रत्वादेव - इति समाधानम् । सैषा प्रस्तुतमनादृत्याप्रस्तुतप्रक्रिया । न ह्यज्ञानस्य जगद्बीजत्वं प्रति-पाद्यत्वेन प्रस्तुतम्, ज्ञानादित्रयसाक्षिभूतपरमेश्वरस्य शक्तित्वं वा अज्ञानस्य, येनेदं व्याख्यानं संस्यात् । इदं तु प्रस्तुतम् यत् सुषुप्तिनिरूपणमात्रेणाप्यज्ञानस्य न निवृत्तिरस्तीत्यतो वाक्यज्ञानं तत्रापेक्षितव्यमिति । कथं तर्हि वाक्यज्ञानाद्वा तन्निवृत्तिः ? - इत्या-काङ्क्षायां प्रत्यगात्मदृष्ट्या न कुत्राप्यज्ञानं समस्ति, चित्तधर्म-युक्तप्रमातृदृष्ट्यैव तु तदात्मनीति विभाव्यते । अतो वाक्यं ज्ञानादिकं पराग्भूतं साक्ष्यत्वेन बहिर्भूतं ज्ञापयत्, प्रमात्राश्रितमप्यज्ञानम् अतद्धर्मत्वेन ज्ञापयतीति परिहार उच्यते । एवमेवेह ग्रन्थव्याख्यानं सङ्गतमिति पूर्वापरवाक्यसमालोचनेनावगम्यते । उक्तं चैवं **बृहद्वार्तिकेऽपि** - ''नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते । प्रत्यक्-प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ।।' (बृ. वा. १-४-२९९), इति । यद्यप्येवं वास्तवेन वृत्तेनाज्ञानं सर्वथापि नास्त्येवात्मनि, तथापि 'नाहं वेद्मि' इत्यनुभवादविद्या दृष्टेति न तदस्तित्वं वारयितुं शक्यते । न चात्मवृत्तमात्रमज्ञाननाशकम्, किं तर्हि वाक्यप्रमाणारूढमेवेति वाक्य-मेष्टव्यं भवति । तदप्युक्तं **तत्रैव** - 'तस्मान्न वास्तवं वृत्तं तद् ध्वान्ताद्यपनोदकृत् । तस्मिन् सत्येव मोहादिव्युत्पत्तेः प्रागभूद्यतः ।। प्रमाणारूढमेवैतद्धन्त्यविद्याद्यशेषतः । ब्रह्मविद्भिरतो यत्नात् प्रामाण्यमिह संश्रितम् ।।' (बृ. वा. १-४-३१४, ३१५) इति । यत्पुनः, अज्ञानस्य परमेश्वरशक्तित्वमिति तदभेदात् कथं तस्य ज्ञाननिवर्त्यत्वमिति, न तच्चोद्यमत्रावतरति । अज्ञानकल्पितस्य मायाशब्दवाच्यस्यापि गौण्या वृत्त्या अज्ञानशब्दवाच्यत्वाभ्युपगमात् वार्तिकप्रस्थाने 'अनात्मेतीह

यद्भाति तदविद्याविजृम्भितम् । तस्मादविद्या साप्युक्ता विद्या त्वात्मैकरूपिणी ।।' (तै. वा. २-१७८) इति । 'नामरूपादिना येयमविद्या प्रथतेऽसती । माया तस्याः परं सौक्ष्म्यं मृत्युनैवेति भण्यते ।।' (बृ. वा. १-२-१३५) इति । **सूत्रभाष्ये तु** स्पष्टमेव लिखितमस्ति 'मुक्तानां च न पुनरुत्पत्तिः । कुतः ? विद्यया तस्या बीजशक्तेर्दाहात् ।' 'अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः' (सू. भा. १-४-३), 'अव्यक्ता हि सा माया' (सू. भा. १-४-३) इति च मायाया अविद्याकल्पितत्वम्' अविद्या ह्यव्यक्तम्' (सू. १-४-३) इति चाविद्याया तत्कल्पकत्वं च विभज्य दर्शयद्भि**र्भगवत्पादैः** । प्रकृते तु बीजशक्तिविचारो नास्त्येवेति तदानयनमिह सर्वथा अप्रस्तुतम् । अतो यथाव्याख्यात एव श्लोकः सङ्गत इति ध्येयम् ।।४५।।

द्वैतसंबन्धः सर्वोऽपि चित्तस्यैव -

ननु सुखदुःखादिवत् सर्वोऽपि द्वैतसंबन्ध आत्मन एवेति युक्तम् । तत्राह - **यत एतदेवम् इति** ।। बीजात्मनस्तमस एव चित्तधर्मविशिष्टस्य स्वकार्यद्वितीयाभिसंबन्धः । अज्ञातात्मन एव चित्ताद्यनात्मरूपेणावभासः इत्यर्थः । अतः तस्यैव च चित्तस्य सुखदुःखादिसंबन्ध इत्यभिप्रायकं श्लोकमवतारयति - **इत्याह दृष्टान्तेनेति** ।।

रूपप्रकाशयोरिति ।। रूपप्रकाशौ विषयभूतौ यथा यद्वत् विक्रियावता चक्षुषैव संबद्धौ, न त्वविकारिणा आत्मना, एवं सुखदुःखादयोऽपि विकारिणश्चित्तस्यैव भवितुमर्हन्ति । नाविकारिण आत्मनः - इत्यर्थः । 'कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' (बृ. १-५-३) इति श्रुतेः सुखदुःखाद्युपलक्षणार्थत्वात् इति भावः ।।४६।।

तत्र सुषुप्तिर्दृष्टान्तः -

उत्तरश्लोकस्यानेन संबन्धमाह - **तदेतदिति** ।। जागरिते विकारिणि सति सुखदुःखसंबन्धो दृष्ट इत्यन्वय उक्तः, अथाधुना असति तस्मिन् न सुखदुःखादिसंबन्ध इति व्यतिरेकं वक्तुमारम्भ इत्यभिप्रायः ।।

संप्रसादे इति ।। सुषुप्तौ विकारिणि चित्ते अस्तं याते, अदर्शनं गते अवशिष्टस्य आत्मन अविकारित्वात् पश्यतोऽपि साक्षिणि स्थितेऽपि पश्यन्तमप्यात्मानं न किञ्चित् स्पृशते स्पृशतीति षष्ठीं द्वितीयार्थत्वेन स्वीकृत्य स्पृशते इत्यस्य आत्मनः आत्मसंबन्धि किञ्चिदपि न स्पृशति तस्य तदानीमद्वितीयत्वात् तत्संबन्धिनोऽभावादेवेति योजनेन वा - अर्थो वर्णनीयः । नास्त्येव तस्य द्वितीयसंबन्ध इत्यभिप्रायः । स्पृशते इत्यपाणिनीयः प्रयोगः कथञ्चित् समाधेयः । अत्र 'इदंज्ञानं भवेज्ज्ञातुर्ममज्ञानं तथाहमः' (३-६०) इत्यनेन समानार्थकः पूर्वः श्लोकः, अयं तु 'विक्रियाज्ञानशून्यत्वात्' (३-६२) इत्यनेन तुल्यार्थक इत्यनुसंधेयम् ।।४७।।

---

७. आत्मनः नित्याद्वैतत्वम्

(मूलम्)

सोऽयं कूटस्थज्ञानमूर्तिरात्मा -

यथा प्राज्ञे तथैवायं स्वप्नजागरितान्तयोः ।
पश्यन्नप्यविकारित्वाद् द्वितीयं नैव पश्यति ।।४८।।

(क्लेशापहारिणी)

अवस्थात्रयेऽपि अद्वितीय एवात्मा -

सोऽयमिति ।। चैतन्यरूपेणाविक्रिय एव सर्वं द्वैतम् अवभासयन् सोऽयं कूटस्थज्ञानमूर्तिरात्मा[1] पश्यन्नपि नैव पश्यति इति श्लोकस्थेन संबन्धः ।

यथा प्राज्ञे इति ।। वस्तुतोऽयं यथा प्राज्ञे प्राज्ञावस्थायां सुषुप्तौ तथैव स्वप्नजागरितयोः ज्ञानाज्ञानादिविकारसंबन्धरहित एवेति अविकारित्वात् प्रमातुरिव विकाराभावेन नित्यकूटस्थचैतन्यस्वरूपत्वात् पश्यन्नपि द्वितीयं नैव पश्यति । अहङ्काररूपोपाधिसंपर्कादेव तु तयोरवस्थयोर्द्वैतदर्शीति भ्रान्त्या विभाव्यते लोकैः, वस्तुवृत्तेन तु सर्वसाक्षित्वात् अज्ञानसंस्पर्शाभावाच्च अद्वितीयचैतन्यस्वरूप एवावतिष्ठते इत्यभिप्रायः ।।४८।।

---

८. ज्ञानफलम्

(मूलम्)

एवं ज्ञानवतो नास्ति ममाहंमतिसंश्रयः ।
भास्वत्प्रदीपहस्तस्य ह्यन्धकार इवाग्रतः ।।४९।।

तत्र दृष्टान्तः -

आ प्रबोधाद्यथाऽसिद्धिर्द्वैतादन्यस्य वस्तुनः ।
बोधादेवमसिद्धत्वं बुद्ध्यादेः प्रत्यगात्मनः ।।५०।।

स एष विद्वान् हानोपादानशून्यम् आत्मानम् आत्मनि पश्यन् -

---

1. अयं भागः प्रथममुद्रणे त्रुटितस्सन् इदानीं संयोजितः - प्रकाशकः ।

सर्वमेवानुजानाति सर्वमेव निषेधति ।
भेदात्मलाभोऽनुज्ञा स्यान्निषेधोऽतत्स्वभावतः ॥५१॥

(क्लेशापहारिणी)

ज्ञानिनो ममाहंमत्यभावः -

एवमिति ॥ एवं कूटस्थाद्वयचैतन्यरूपमात्मानं स्वात्मत्वेन विजानतः किं फलमित्याह - अहंसंबन्धशून्यत्वात् एवंविदुषो नास्ति अहंममेति नैसर्गिकव्यवहारसंस्पर्शः । तत्र दृष्टान्तः - **भास्वत्प्रदीपहस्तस्य** पुरुषस्य अग्रतः यथा अन्धकारो न विद्यते, एवम् अज्ञानादिसर्वसाक्षिणोऽस्य नैवाज्ञानकृताहंममबुद्धिसंश्रय इत्यभिप्रायः ॥४९॥

ज्ञानाज्ञानावस्थयोर्वैलक्षण्यम् -

ज्ञानाज्ञानावस्थयोरत्यन्तवैलक्षण्यादेवं युज्यत इति वक्तुं व्यतिरेकदृष्टान्त इत्याह - **तत्रेति** ॥

आ प्रबोधात् इति ॥ यावदात्मज्ञानोदयः तावत् 'ज्ञातृस्वरूप एवाहम्' इति नैसर्गिकबुद्धेरनुवृत्तेः द्वैतात्, ज्ञातृज्ञानज्ञेयलक्षणात् विभागात् अन्यस्य परमार्थवस्तुनः यथा असिद्धिः, अविद्याया एव प्रमाणबुद्ध्या स्वीकारात् ; एवं बोधादूर्ध्वं बुद्ध्यादेः ज्ञानादिद्वैतस्य प्रत्यगात्मनः सकाशात् अन्यत्वेनासिद्धत्वम् अविद्यायाः सर्वथा विनष्टत्वात् इत्यभिप्रायः । तदेतदुक्तं **बृहद्वार्तिके** 'यथोच्छिन्नात्ममोहस्य निन्होतुरपि निन्हुतिः । एवं प्रागात्मसंबोधादद्वयैकात्म्यनिन्हुतिः ॥ काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः । या निशा सर्वभूतानामित्यवोचत् स्वयं हरिः ॥' (बृ. वा. १-४-३१२, ३१३) इति ॥५०॥

विदुषो व्यवहारः -

विदुषो नास्ति द्वैतमित्युक्त्या तस्याचार्यत्वमपि न सिद्ध्येदित्याशङ्क्य परिहारत्वेन श्लोकान्तरमवतारयन्नाह - **स एष विद्वानिति** ॥

हानोपादानशून्यम् आत्मानम् अद्वितीयमेव पश्यन् परमार्थदृष्ट्या 'सर्वमेव निषेधति', व्यवहारदृष्ट्या 'सर्वमेवानुजानाति' इति श्लोकस्थेन संबन्धः करणीयः ।।

सर्वमेवेति ।। यथा लोके शुक्तितत्त्वं विजानन्नपि 'शुक्तिका रजतवदवभासते' इति व्यवहर्तुं शक्नोति बाधितानुवृत्त्या, एवमयमपि सर्वमेव भेदस्य स्वरूपलाभम् अनुजानाति, स्वस्य तु दृष्ट्या नित्यनिर्भेदस्वभावतः मद्व्यतिरिक्तं न किञ्चिदप्यस्तीत्यपि व्यवहरतीत्यदोष इत्यभिप्रायः ।।५१।।

९. प्रकरणार्थोपसंहारः

(मूलम्)

सर्वस्योक्तत्वात्, उपसंहारः -

परमार्थात्मनिष्ठं यत् सर्ववेदान्तनिश्चितम् ।
तमोऽपनुद्धियां ज्ञानं तदेतत् कथितं मया ।।५२।।

एतावदिहोक्तम् -

नेहात्मविन्मदन्योऽस्ति न मत्तोऽज्ञोऽस्ति कश्चन ।
इत्यजानन् विजानाति यः स ब्रह्मविदुत्तमः ।।५३।।

(क्लेशापहारिणी)

इदमेव ज्ञानमज्ञानबाधकम् -

अथेदानीं प्रकरणमुपसंहरति **सर्वस्येति** ।। विवक्षितस्य ज्ञानस्य सपरिकरम् उक्तत्वात्, प्रकरणोपसंहारः क्रियते आगामिश्लोकेनेत्यर्थः ।।

परमार्थात्मनिष्ठमिति ।। कल्पितात्मा, परमार्थात्मा चेति दृष्टिभेदेन द्वौ आत्मानौ । तदत्र कल्पितात्मनिषेधेन परमात्मनिष्ठम्,

परमात्मन्येव पर्यवस्यत् यत् सर्ववेदान्तनिश्चितम्, सर्वैर्वेदान्तैः यन्निश्चितम्, तात्पर्येण बोधितम् आत्मैकत्वज्ञानम्, तदेतत् कथितं मया । तत्र कथं कल्पितात्मा निराकृतः, ज्ञानं वा कथं परमार्थात्मनिष्ठम् ? तत्राह - **तमोपनुद् धियामिति** ।। व्यवहारदृषट्या अनेकजीवानां परिदृश्यमानत्वात्, बुद्धिवृत्तीनामानन्त्याद् वा बहुवचनम् । अन्तःकरणसंबन्धि यत् तमः, आत्माज्ञानम्, तन्निरसनद्वारा ज्ञानस्य परमार्थात्मैकनिष्ठत्वं भवेत् । तमोऽपनोदने हि सति अनेकजीवा वा, तदन्तःकरणविशेषा वा, तदाश्रितं तमो वा नावशिष्यते । परमार्थात्माभिन्नावगतिरूपेणैव तत्रैव प्रशाम्यति । यथा चैतत् तथा प्रतिपादितमस्मिन् प्रकरणे इत्यभिप्रायः । 'तमोऽपनुद् हि यज्ज्ञानम्' **इति पाठे** तु अज्ञानस्य अत्यन्तापनोदनसमर्थं यद् ज्ञानं तदेतत् कथितं मयेत्यर्थः ।।५२।।

सर्वे विभागाः आत्मनि कल्पिताः -

प्रकरणार्थं संगृह्य दर्शयितुमुत्तरः श्लोक इत्याह - **एतावदिहोक्तमिति** ।।

नेहात्मविदिति ।। मदन्यः आत्मविन्नास्तीह लोके । न च मत्तोऽन्योऽज्ञोऽस्ति । विद्याविद्याविभागस्य, विद्वदविद्वद्विभागस्य च मय्येव विकल्पितत्वात्, ज्ञातृज्ञानज्ञेयविभागस्यैव मय्यभावाच्च - इति भावः । ननु एवं ब्रह्म विदितं चेत्, तर्हि ज्ञातृज्ञानज्ञेयविभागास्तित्वं प्रसज्यते, न विदितं चेत् कथमिदं प्रतिज्ञायते ब्रह्म ज्ञातमिति ? तत्राऽऽह - **'इत्यजानन् विजानाति यः स ब्रह्मविदुत्तमः'** इति । अयमाशयः । अद्वितीयानुभवः स्वयमेव प्रथते, न तु कर्तृकर्मविभागेन, ज्ञानव्यापारेण वा । व्यवहारदृष्ट्या तु यत् अद्वितीयब्रह्मात्माभासयुक्ताया बुद्धिवृत्तेर्जन्म 'अनुभवात्मकोऽहम्' इति, तस्या मिथ्याभूतत्वान्न द्वैतावहत्वमिति । तदुक्तम् **भगवत्पादैः** 'दृशिरेवानुभूयेत स्वेनैवानुभवात्मना । तदा-

भासतया जन्म धियोऽस्यानुभवः स्मृतः ।।' (उप. १८-२०५) इति । **गौडपादाचार्याश्चाहुः** - 'अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते । ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ।।' (गौ. का. ३-३३) इति । अतो न विरोधः ।।५३।।

---

१०. आत्मज्ञानी न प्रवृत्तिनिष्ठः नापि निवृत्तिनिष्ठः

(मूलम्)

एवमात्मानं ज्ञात्वा किं प्रवर्तितव्यम्, उत निवर्तितव्यम्, आहोस्वित् मुक्तप्रग्रहतेति ? उच्यते -

ज्ञेयाभिन्नमिदं यस्माज्ज्ञेयवस्त्वनुसार्यतः ।
न प्रवृत्तिं निवृत्तिं वा कटाक्षेणापि वीक्षते ।।५४।।

कुत एतज्ज्ञेयाभिन्नमिति ? यतः -

प्रागात्मबोधाद् बोधोऽयं बाह्यवस्तूपसर्जनः ।
प्रध्वस्ताखिलसंसार आत्मैकालम्बनः श्रुतेः ।।५५।।

एवम् अवगतपरमार्थतत्त्वस्य न शेषशेषिभावः ; तत्कारणस्य उत्सारितत्वात् इत्याह -

वास्तवेनैव वृत्तेन निरुणद्धि यतो भवम् ।
निवृत्तिमपि मृद्नाति सम्यग्बोधः प्रवृत्तिवत् ।।५६।।

सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम् ।
ध्वान्तमात्रनिरासेन न ततोऽन्यान्यथामतिः ॥५७॥

देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ।
नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्त्यतः ॥५८॥

सम्यग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः ।
सकृन्निवृत्तेर्बाध्यस्य किं कार्यमवशिष्यते ॥५९॥

(क्लेशापहारिणी)

ज्ञानिनो न कार्यम् -

अथ ज्ञानिनो व्यवहारं कथमिति निर्णेतुकामः प्रश्नमुत्थापयति - **'एवमात्मानं ज्ञात्वा' इति ॥ मुक्तप्रग्रहतेति ।** यथेष्टचेष्टा - इत्यर्थः । उत्तरत्वेन श्लोकमवतारयति - **उच्यते इति ॥**

ज्ञेयाभिन्नमिति ॥ ज्ञातुर्ज्ञानस्य ज्ञेयब्रह्माभिन्नत्वात् पूर्वोदितेन न्यायेन नित्यनिवृत्तकर्मणस्तस्य न प्रवृत्तिर्न वा निवृत्तिः, प्रागेव न यथेष्टचेष्टता इत्यर्थः ॥५४॥

बोधे ज्ञानं आत्मैकालम्बनम् -

ज्ञेयाभिन्नत्वाज्ज्ञानस्य, ज्ञेयस्य च नित्यनिवृत्तकर्मत्वात् न प्रवृत्तिनिवृत्ती संभवतो ज्ञानिन इत्युक्तम् । अथ ज्ञानस्य ज्ञेयाभिन्नत्वमेव कथमिति शङ्कामुत्थापयति - **कुत एतदिति ॥** परिहारत्वेन श्लोकमवतारयति - **यत इति ॥**

प्रागात्मबोधादिति ॥ आत्मबोधात् प्राक् अयं बोधः बाह्यवस्तूपसर्जनः । इन्द्रियाणां स्वभावत एव बहिःप्रवृत्तेः, 'पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्' (का. २-१-१) इति श्रुतेः । तस्मादेव बाह्यवस्तूपसर्जनत्वहेतोः, रागद्वेषप्रेरितो जनः

प्रवृत्तिनिवृत्तिवशगो भवतीति भावः । बोधादूर्ध्वं तु प्रध्वस्ताखिलसंसारत्वात्, निवृत्तनिखिलद्वैतत्वात् कुतः प्रवृत्तिं वा निवृत्तिं वा अवलम्बेत ? यतोऽयं आत्मैकालम्बनस्तदा । तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते' (बृ. २-४-१४) इति, 'यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत् तत्केन कं पश्येत् तत्केन कं शृणुयात् तत्केन कं अभिवदेत् तत्केन कं मन्वीत' (बृ. २-४-१४) इत्यादिश्च । अत आत्मैकालम्बनं ज्ञानमिति युक्तमुक्तं ज्ञेयाभिन्नमिदं ज्ञानमिति - इति भावः ।।५५।।

ज्ञाने सति न निवृत्तिरपि -

अत एवायं ज्ञानी न प्रवृत्त्यादिशेषो भवतीत्याह - **एवमवगतपरमार्थतत्त्वस्येति** ।। एतदभिप्रायकं श्लोकमवतारयति - **इत्याहेति** ।।

वास्तवेनैव वृत्तेनेति ।। सम्यग्बोधो वस्तुवृत्तमनुरुध्यैव जायते, आत्मवस्तुस्वभावश्चायं यन्नित्यनिरस्ताविद्याकामकर्मलक्षणकूटस्थचैतन्यरूपत्त्वम् । अतः प्रवृत्तिवन्निवृत्तिमपि मृद्नाति बाधते 'नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन' (गी. ३-१८) इति स्मृतेः - इत्यभिप्रायः ।।५६।।

ज्ञाने सति अज्ञानत्रयस्यापि नाशः -

नन्वनादिकालप्रवृत्ता निरूढनिबिडा अविद्या पुनरपि प्रवृत्तिमुत्पादयेत्, तत् कथं सा विद्यया आगन्तुक्या निरुध्येतेत्याशङ्क्याह - **सकृदात्मप्रसूत्यैवेति** ।। विद्याविद्ययोर्बाध्यबाधकभाव एव संबन्ध इति सकृदुत्पन्न एव सम्यग्बोधो प्रवृत्तिनिवृत्त्यात्मकम् अखिलमपि भवं संसारं ध्वान्तमात्रनिरासेन अज्ञानसामान्यापनयनेन निवर्तयेत्, यथा सकृदुत्पन्न एव सावित्रः प्रकाशो निखिलं शार्वरं तमो निवारयेत् तथा ।

न हि बाध्यबाधकयोर्योगो भवति तयोः शक्तिस्तु कुण्ठिता भवेत् इति युक्तम् - इति भावः । यथोक्तं **बृहद्वार्तिके** 'बाध्यबाधकयोर्योगः स्वशक्त्यनपहारतः । योऽन्यथा सङ्गतिं ब्रूते चर्मवत् वेष्टयेत् स खम्' (बृ.वा. १-४-२५५) इति - इत्यभिप्रायः । अथ अज्ञाननिवृत्तावपि तत्कार्यभूतं मिथ्याज्ञानमनुवर्तेत, तत्राह - **न ततोऽन्याऽन्यथामतिः** इति । अज्ञानमिथ्याज्ञानयोः कार्यकारणसंबन्धेन नित्यमविनाभावात् अज्ञाननाशेऽपि मिथ्याज्ञानानुवृत्तिप्रत्याशा न कार्या इति भावः । तदुक्तं **बृहद्वार्तिके** 'यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु । कारणेतररूपेण तयोरव्यभिचारतः ।। (बृ.वा. १-४-३८६) इति । इदमुपलक्षणं संशयस्यापि । तदप्युक्तं हि **बृहद्वार्तिके** 'अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम् । अज्ञानं कारणं तत्र कार्यत्वं परिशिष्टयोः ।। (बृ. १-४-१३६८) इति । यदप्याशङ्क्यते कैश्चित् अविद्याया अनादिकालप्रवृत्तत्वात् सैव विद्यामप्यागन्तुकीं बाधेत, अथवा निवृत्तायामप्यविद्यायां तत्संस्कारोऽपबाधेत विद्यामिति, अतो ज्ञानाभ्यास एषितव्यः कृत्स्नशोऽविद्यानिवृत्तय इति । तत्र पूर्वमेव परिहार उक्तः - 'बाधितत्वादविद्याया विद्यां सा नैव बाधते । तद्वासनानिमित्तत्वं यान्ति विद्यास्मृतेर्ध्रुवम् ।।' (१-३८) इति । अतः साधूक्तमिदम् 'सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम्' इति - इति ज्ञेयम् ।।५७।।

आत्मा ज्ञानाज्ञानसंस्पर्शरहितः -

अथैवमाशङ्क्येत केनचित् नाखिलं भवं निरोद्धुमुत्सहेत ज्ञानम् । यत्कारणमनाद्यनन्तयोर्देशकालयोः सम्भाव्यमानानामज्ञानानां नास्तीयत्ता । तद् यदि नाम ज्ञानमज्ञानं बाधेत तथाप्यनादिकालकृतानां कर्मणाम्, आगामि काले करिष्यमाणत्वेन सम्भाव्यमानानां च न युक्तो नाशः कल्पयितुम् इदानीमुत्पन्नेन ज्ञानेनेति । तत्राह - **देशकालाद्य-**

संबन्धादिति ।। देशकालनिमित्तादीनामानन्त्येऽपि तेषां मोहकार्यतः, अविद्ययैव प्रत्युपस्थापितत्वात्, परमार्थात्मनश्च सर्वसाक्षिणो देश-कालादिसंबन्धासंभवात्, अज्ञानस्य चाज्ञानप्रसिद्ध्यैव प्रसिद्धेः, अज्ञानं ज्ञानेनादग्धम्, ज्ञानं वा बाधकमनुत्पन्नं न समस्ति । तदेवं नित्यमेव ज्ञानाज्ञानसंस्पर्शरहित आत्मा इत्यतो यथोक्तं चोद्यं नैवावतरत्यत्रे-त्यभिप्रायः ।।५८।।

अज्ञानादिदाहान्न ज्ञानिना कृत्यम् -

सम्यग्ज्ञानशिखिप्लुष्टेत्यादि ।। तदेवं वाक्यश्रवणेन सम्यग्ज्ञाने संजाते अज्ञानस्य निरवशेषतया निवृत्तिः, नित्यनिवृत्ताज्ञानत्वे-नैवात्मनोऽवगम्यमानत्वात् अज्ञानकार्यस्य च मिथ्याज्ञानादेः, तत्प्रत्युप-स्थापितसकलद्वैतस्य च बाधितत्वात्, वस्तुवृत्तेन निष्कर्मात्मत्वेनात्मानं विज्ञातवतः किं कार्यमवशिष्यते ? न किमपीत्यर्थः । तथा हि **भागवती-स्मृतिः** - 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ।।' (गी. ३-१७) इति । **अभियुक्तैरप्युक्तम्** - 'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् । सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत् ।।' (सू.भा. १-१-४) इति ।।५९।।

---

११. व्यवहारदृष्ट्या निवृत्तिनिष्ठत्वं ज्ञानिनः

(मूलम्)

वास्तवेनैव वृत्तेन अविद्यायाः प्रध्वस्तत्वात् न किञ्चिदवशिष्यत इत्युक्तः परिहारः । अथापरः साम्प्रदायिकः -

निवृत्तसर्पः सर्पोत्थं यथा कम्पं न मुञ्चति ।
विध्वस्ताखिलमोहोऽपि मोहकार्यं तथात्मवित् ॥६०॥

यतः प्रवृत्तिबीजमुच्छिन्नम्, तस्मात् -

तरोरुत्खातमूलस्य शोषेणैव यथा क्षयः ।
तथा बुद्धात्मतत्त्वस्य निवृत्त्यैव तनुक्षयः ॥६१॥

अथालेपकपक्षनिरासार्थमाह -

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥६२॥

कस्मान्न भवति ? यस्मात् -

अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः ।
धर्मकार्ये कथं तत् स्याद्यत्र धर्मोऽपि नेष्यते ॥६३॥
प्रत्याचक्षाण आहातो यथेष्टाचरणं हरिः ।
यस्य सर्वे समारम्भाः प्रकाशं चेति सर्वदृक् ॥६४॥

(क्लेशापहारिणी)

आत्मविदः बाधितानुवृत्त्या कर्तृत्वम् -

नन्वेवं ज्ञानिनः सर्वथा प्रवृत्त्यभावे परानुग्रहार्थम् उपदेशेऽपि प्रवृत्तिर्न स्यात् ; तथा च 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२) इति श्रुतिरुपरुध्येत, आचार्यस्यैव कस्यचिदप्यभावात् - इत्याशङ्क्य परिहारं वक्तुं वृत्तमनुद्रवति - **वास्तवेनैव वृत्तेनेति** ॥ वस्तुवृत्तेन न कस्यापि शरीरेन्द्रियसङ्घातसंयुक्तत्वमस्ति मिथ्याज्ञानकृतं तदभिमानं मुक्त्वा । तस्मात्, वास्तवेन वृत्तेन 'नित्यप्रध्वस्ताविद्योऽहम्' इति ज्ञानिदृष्ट्या न

तस्य कार्यमवशिष्यत इत्युक्तम् । तथापि व्यवहारदृष्ट्या ज्ञानिनोऽपि बाधितमिथ्याज्ञानानुवृत्तिर्विद्यत एव । यथोक्तं **सूत्रभाष्ये** - 'बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित् कालं शरीरं ध्रियते न वा ध्रियत इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं च अपरेण प्रतिक्षेप्तुं शक्येत ?' (सू.भा. ४-१-१५) इति । 'तस्मात् मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्' (सू.भा. १-१-४) इति च **भाष्यम्** । **श्रुतिश्च** भवति - 'तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४-४-७) इति । तदेवं वास्तवेन वृत्तेनाशरीरस्यापि व्यवहारदृष्ट्या सशरीरत्वस्याप्युपपत्तिरिति संप्रदायः । तदेनं संप्रदायमनुसृत्य यथोक्तशङ्कायाः परिहार उच्यते आगामिश्लोकेनेत्याह - **अथापरः सांप्रदायिकः** इति ।।

निवृत्तसर्प इति ।। सर्पज्ञाने बाधितेऽपि निवृत्तसर्पभ्रान्तिः पुरुषो यथा कम्पं न मुञ्चति, कञ्चित् कालम् कम्पोऽनुवर्तत एव, एवं विध्वस्ताखिलमोहोऽपि आत्मवित् मोहकार्यं कर्तृत्वं न विमुञ्चति, बाधिताविद्योऽपि कर्मणि प्रवर्तत एवेत्यर्थः ।।

अत्र मतान्तरं तद्दूषणं च -

अत्र यथा मोहो बाधितः, एवं मोहकार्यमपि बाधितमेवानुवर्तत इति न तेन विदुषः कश्चिदर्थोऽनर्थो वा शक्यशङ्क इत्यवधेयम् । तथा च यदाहात्र **मण्डनः**, "जातेऽपि तत्त्वदर्शने, अनाहिते च पटौ संस्कारे, द्रढीयसि च मिथ्यादर्शनजे संस्कारे निश्चया अपि मिथ्यार्था भवन्ति । यथा दिङ्मूढस्याननुसंहिताप्तवचसः प्रागिव प्रवृत्तिदर्शनात् ; तथा प्रमितरज्जुभावाया अपि रज्ज्वाः प्रमाणाननुसन्धाने सर्पभ्रान्त्या

भयदर्शनम् । तस्मात्, जातेऽपि प्रमाणात् तत्त्वदर्शने, अनादिमिथ्यादर्शनाभ्यासपरिनिष्पन्नस्य द्रढीयसः संस्कारस्याभिभवाय, उच्छेदाय वा, तत्त्वदर्शनाभ्यासं मन्यन्ते । तथा च 'मन्तव्यो निदिध्यासितव्यः' इत्युच्यते" (ब्र. सि. १-३, पा. ३५) इति, तदनादेयम् । न हि अज्ञानं तत्कार्यं वा वस्तुतो विद्यमानमेव तत्त्वज्ञानेन निवर्त्यते, येन तत्संस्कारानुवृत्तिः शङ्क्येत । 'नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्त्यतः' (४-५८) इति हि स्थितिः । न च सम्यग्ज्ञानम् अभ्यासेन कञ्चिदतिशयं लब्ध्वा अज्ञानं नाशयति, किं तु वस्तुस्वरूपबोधनेनैव । अतोऽत्र प्रसङ्ख्यानवादिमतनिरासेनैव मण्डनतदनुयायिमतमपि निरस्तमेव वेदितव्यम् । व्यवहारदृष्ट्यैव तु प्रारब्धकर्मशेषम् अङ्गीकृत्येहोच्यते 'मोहकार्यं न मुञ्चत्यात्मवित्' इति - इति सन्तोष्टव्यम् । एवं च **कैश्चिदादृतः सद्योमुक्तिजीवन्मुक्तिविवेकोऽपि नात्र करणीयः ।** ज्ञानसमकालमेव परमात्मन्यवस्थानं हि सद्योमुक्तिर्नाम, न तु ज्ञानलाभे सद्यः शरीरपातः । जीवतोऽपि व्यवहारदृष्ट्या प्रारब्धवशात् कार्यकरणसङ्घातानुवृत्तौ, यत् आयुःशेषातिवाहनम्, लोकसंग्रहार्थं प्रवृत्तिर्वा, सैव जीवन्मुक्तिरिति व्यपदिश्यत इत्यलमतिप्रपञ्चेन ।।६०।।

तस्य निवृत्तिस्तूपचारतः -

अथैवमभ्युपगतं कर्म प्रवृत्तिरूपम्, निवृत्तिरूपं वा ? - इत्यत्र विनिगमकमाह - **यतः प्रवृत्तिबीजमुच्छिन्नं तस्मात् इति** ।। प्रवृत्तिबीजम् अविद्याकामादिकम्, तस्य सम्यग्ज्ञानेनोच्छिन्नत्वात् तस्य न प्रवृत्तिः संभवतीति भावः । श्लोकमवतारयति - **तस्मादिति** ।।

तरोरुत्खातमूलस्येति ।। स्पष्टार्थः श्लोकः । अत्र प्रवृत्ताविव निवृत्तावपि कारणं न गवेषणीयम् निष्कर्मात्मस्वभावत्वादेव विदुषः । उक्तं हि **गीताभाष्ये** 'अथैवं सति फलार्थित्वात् अविद्यावान् प्रवर्तते । विदुषः पुनः अविक्रियात्मदर्शिनः फलार्थित्वाभावात् प्रवृत्त्यनुपपत्तौ

कार्यकरणसङ्घातव्यापारोपरमे निवृत्तिरुपचर्यते; (गी. भा. १३-२, पा. १९४) इति ।।६१।।

अलेपकपक्षनिरासः -

अथ यदाहुः **केचिद्** वावदूकाः, ज्ञानिनः सर्वथा कर्मलेपासम्भवात्, प्रतिषिद्धसेविनोऽपि तस्य न किञ्चिद् हीयत इति, तमिमम् अलेपकपक्षं निरसितुमुत्तरग्रन्थः । तदाह - **अथेति** ।।

बुद्धाद्वैतसतत्त्वस्येति ।। अद्वैततत्त्वज्ञानिनोऽपि यदि स्वैराचरणम् तर्हि श्वविड्वराहादिजन्तुतुल्यमेव स्यात् तस्य जीवनम् । न तु तदिष्यते केनचिदपीत्यर्थः ।।६२।।

अथ यथेष्टाचरणमपि किं न स्याद्विदुषः इत्याशङ्क्य प्रत्याह श्लोकान्तरेण । तदाह - **कस्मान्न भवति ? यस्मादिति** ।।

अधर्मादिति ।। अधर्माद् हि शास्त्रमप्युल्लङ्घ्य यथेष्टाचरणे प्रवृत्तिजनकमज्ञानं जायते समुद्भवति । ज्ञानं तु धर्मकार्यम् । धर्मेण हि पापमपनुदतीति तेन चित्तशुद्धिस्ततो ज्ञानम् - इति स्थितिः । 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते'[1] (मो. ध. २७०-३८) इति स्मृतेः । तत्त्वज्ञाने जाते 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति' (गी. १८-४९) इत्युक्तदिशा धर्मोऽपि नेष्यते, सर्वधर्मान् परित्यज्यैव हि भगवच्छरणो ज्ञानमवाप्नोतीति । तस्मान्नात्र यथेष्टाचरणप्रसक्तिरित्यभिप्रायः ।।६३।।

अत्र भगवत्सम्मतिमाह - **प्रत्याचक्षाण इति** ।। 'यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः । ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ।।' (गी. ४-१९) इति श्लोकेन लोकसंग्रहार्थं जीवनमात्रार्थं वा ज्ञानिनः सर्वाणि कर्माणि भवेयुः । कामसङ्कल्प-

1. शारीरकभाष्ये (३-४-२६) उदाहृतोऽयं श्लोकः । मुद्रितमहाभारतकोशे तु उत्तरार्धे किञ्चित् पाठान्तरमुपलभ्यते ।।

वर्जितत्वादेव न तस्य यथेष्टचेष्टाप्रसङ्ग इत्याह । 'प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव । न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ।।' (१४-२२) इत्यनेन च गुणत्रयव्यापारे न विदुषो रागद्वेषौ इत्याह । तथा च नेदृशस्य स्वैराचरणं संभवि - इति भावः ।।६४।।

---

१२. मुमुक्षोरपि न यथेष्टाचरणम्, किं पुनर्मुक्तस्य

(मूलम्)

तिष्ठतु तावत् सर्वप्रवृत्तिबीजघस्मरं ज्ञानम्, मुमुक्ष्ववस्थायामपि न संभवति यथेष्टाचरणम् । तदाह -

> यो हि यत्र विरक्तः स्यान्नासौ तस्मै प्रवर्तते ।
> लोकत्रयविरक्तत्वान्मुमुक्षुः किमितीहते ।।६५।।

तत्र दृष्टान्तः -

> क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ।
> मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ।।६६।।

यतोऽवगतपरमार्थतत्त्वस्य यथेष्टाचरणं न मनागपि घटते, मुमुक्षुत्वेऽपि च, तस्मात् -

> रागो लिङ्गमबोधस्य चित्तव्यायामभूमिषु ।
> कुतः शाड्वलता तस्य यस्याग्निः कोटरे तरोः ।।६७।।

(क्लेशापहारिणी)

अत्र भगवत्पादसम्मतिः -

योहि मोक्तुमिच्छति, तस्यापि नास्ति सम्भवो यथेष्टाचरणस्य, किमु वक्तव्यं मुक्तस्य ज्ञानिन इत्याह **भगवत्पादीयं श्लोकद्वयम्** उदाहरन् - **तिष्ठतु इति** ।। प्रथमं श्लोकमवतारयति **तदाहेति** ।। यो हीति । क्षुधयेति च । निगदव्याख्यातौ **उपदेशसाहस्त्रीगतौ** (१८-२३१, २३२) श्लोकौ ।।६५।।६६।।

चित्ते रागश्चेत् ज्ञानं न जातम् -

उपसंहरति - **यत इति** ।। **राग इति** ।। चित्तविहारक्षेत्रभूतेषु विषयेषु रागः, अज्ञानस्य लिङ्गम् । दृष्टान्तेन ज्ञानिनो रागाभावे कारणमाह - **कुत** इति । यस्य तरोः कोटरे अग्निः, तस्य शाड्वलता कुतः स्यात् ? यद्यपि 'शाद्वलः शादहरिते' इत्यमरः तथापि सर्वेषु मुद्रितकोशेषु मूर्धन्यमध्य एव दृश्यत इत्यतः सोऽपि सप्रमाणकः स्यात् इत्युन्नीयते । एवं ज्ञानाग्निना भस्मीक्रियमाणं कर्म यस्मिन् ज्ञानिचित्ते तत्र अज्ञानकार्यभूतरागस्य कुतोऽवकाशः स्यादिति भावः ।।६७।।

---

१३. ज्ञानिनो निवृत्तिधर्मोऽपि स्वभावत एव

(मूलम्)

सकलपुरुषार्थसमाप्तिकारिणोऽस्यात्मावबोधस्य कुतः प्रसूतिरिति ? उच्यते -

अमानित्वादिनिष्ठो यो यश्चाद्वेष्ट्रादिसाधनः ।
ज्ञानमुत्पद्यते तस्य न बहिर्मुखचेतसः ॥६८॥

उत्पन्ने आत्मविज्ञाने किम् अविद्याकार्यत्वात् प्रवृत्तिवत् निवृत्त्यात्मकामानित्वादयो निवर्तन्त उत नेति ? नेति ब्रूमः । किं कारणम् ? निवृत्तिशास्त्राविरुद्धस्वाभाव्यात्परमात्मनः, न तु नियोगवशात् । कथं तर्हि शृणु -

उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥६९॥

(क्लेशापहारिणी)

बहिर्मुखचेतसो ज्ञानं नोत्पद्यते -

मुमुक्षूणामेवेन्द्रियलोलुपत्वं तावन्नास्ति कुतः पुनर्मुक्तस्य ज्ञानिन इत्युक्तम् । किं पुनः कारणं मुमुक्षूणां बाहिर्मुख्यं नास्ति, किं च कारणं ज्ञानिनो निवृत्त्येकपरत्वम् - इत्येतद् विशदयितुमिच्छन् मुमुक्षूणां तावत् ज्ञानैककाङ्क्षित्वात् निवृत्तिधर्मपरता इति दर्शयितुं ज्ञानसाधनगतं प्रश्नमुत्थापयति - **सकलपुरुषार्थेति** ॥ अत्यन्ताय दुःखनिवृत्तिः सुखप्राप्तिश्च खलु परमपुरुषार्थः । तत्र दुःखस्य च परम्परया आत्मानवबोध एव निदानमिति नित्यसुखस्य चात्मस्वभावस्य आत्माऽनवबोध एव पिधानम् - इत्यतश्च तस्योच्छित्तौ अशेषपुरुषार्थपरिसमाप्तिः - इत्युक्तं ग्रन्थारम्भे । आत्माऽनवबोधनिवृत्तिश्च आत्माऽवबोधादेव भवतीति तत्काङ्क्षित्वं मुमुक्षूणामिति कृत्वा प्रश्नः । उत्तरत्वेन श्लोकमवतारयति - **उच्यते इति** ॥

अमानित्वादीति ॥ अमानित्वादिसाधनगणस्त्रयोदशाध्याये गीतासु परिपठितः (गी. १३-७ प्रभृति ११तमश्लोकपर्यन्तम्),

तस्मिन् सत्यात्मविज्ञानेऽधिकारो भवति । उपसंहृतं हि अन्ते 'एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥' (गी. १३-११) इति । अद्वेष्टृत्वादिगुणाश्च तत्रैव द्वादशाध्याये अक्षरोपासकधर्म-वर्णनप्रसङ्गेन परिपठिताः (गी. १२-१३ प्रभृति १९ तमश्लोकपर्यन्तम्) । पर्यन्ते चोक्तम् - 'ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते । श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥' (१२-२०) इति । तेन च, तस्मादिदं धर्म्यामृतं मुमुक्षुणा यत्नतोऽनुष्ठेयम् अक्षरज्ञानावाप्त्या भगवतः प्रियं धाम जिगमिषुणा इत्युक्तं भवति । तस्मात् अमानित्वादिनिष्ठस्य, अद्वेष्टृत्वादि-साधनवतश्च ज्ञानमुत्पद्यते न बहिर्मुखचेतसो विषयलालसस्येति गम्यत इति भावः ॥६८॥

निवृत्तिधर्मो ज्ञानिनोऽयत्नतो भवति -

तदेवं मुमुक्षोर्ज्ञानार्थित्वात् न बाहिर्मुख्यं भवेदित्युपपादितम् । अथेदानीम् उत्पन्नात्मविज्ञानस्य निवृत्तिनिष्ठत्वादेव ज्ञाननिष्ठत्वं सिध्यति नान्यथा - इत्यतस्तस्य सुतरामसंभवः स्वैराचारस्येति दर्शयन्नाह - **उत्पन्ने आत्मविज्ञाने इति** ॥ निवृत्तिशास्त्राविरुद्ध-स्वभावत्वात्, निवृत्तिशास्त्रे यानि लक्षणानि प्रदर्श्यन्ते तत्स्वभाव एव परमात्मा, तदभिन्नश्चासौ । तस्मात्, यद्यपि न शास्त्रनियुक्तो निवृत्तिधर्मान् सेवते, तथापि स्वभावत एवायं निवृत्तिनिष्ठो भवतीत्यभिप्रायः । एतदेव विवरीतुमाह - **न नियोगवशात्, कथं तर्हि** ? - इति प्रश्नोत्तरत्वेन श्लोकमवतारयति - **शृण्विति** ॥

उत्पन्नात्मप्रबोधस्य तु इति ॥ तुशब्दो मुमुक्षुतो वैलक्षण्य-द्योतनार्थः । 'न तु साधनरूपिणः' इति । **यथा मुमुक्षोः** - इति शेषः । उक्तं हि **गीताभाष्ये** - 'सर्वत्रैव हि अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि, तान्येव साधनान्युपदिश्यन्ते । यत्न-

साध्यत्वात्' (गी. भा. २-५५) इति । अद्वेष्टृत्वादय इत्युपलक्षणम् अमानित्वादयश्च - इत्यपि द्रष्टव्यम् ।।६९।।

---

१४. ग्रन्थश्रवणाधिकारी

(मूलम्)

यत एतदेवम्, अतः -

इमं ग्रन्थमुपादित्सुरमानित्वादिसाधनः ।
यत्नतः स्यान्न दुर्वृत्तः प्रत्यग्धर्मानुगो ह्ययम् ।।७०।।

न दातव्यश्चायं ग्रन्थः -

नाविरक्ताय संसारान्नानिरस्तैषणाय च ।
न चायमवते देयं वेदान्तार्थप्रवेशनम् ।।७१।।
ज्ञात्वा यथोदितं सम्यग्ज्ञातव्यं नावशिष्यते ।
न चानिरस्तकर्मेदं जानीयादञ्जसा ततः ।।७२।।
निरस्तसर्वकर्माणः प्रत्यक्प्रवणबुद्धयः ।
निष्कामा यतयः शान्ताः जानन्तीदं यथोदितम् ।।७३।।

(क्लेशापहारिणी)

ग्रन्थेऽधिकारी -

यस्मादेवं ज्ञानिनः परमात्मस्वभावनिष्ठत्वात्, मुमुक्षोश्च ज्ञानार्थित्वात् अमानित्वादिसाधनगणो नियमेन लक्षणत्वेन साधनत्वेन च अपेक्षणीयः, तस्मादेव इमं ग्रन्थं नैष्कर्म्यसिद्धिविषयकम् उपादित्सुः

श्रवणेन स्वीचिकीर्षुः, न दुर्वृत्तः स्यात्, यत्नेन अमानित्वादिसाधनं च संपादयेत् । हि यस्मात् अयम् अधिकारी प्रत्यग्धर्मानुगः प्रत्यग्धर्मान् अनुगन्तुमुद्युक्तः । संसारिधर्ममुत्सृज्य प्रत्यगात्मस्वरूपमधिगन्तुं प्रवृत्तो हि, अतः तदनुगुणं च साधनगणमेव संपाद्य ग्रन्थं पिपठिषेत् इत्यर्थः ।।७०।।

ग्रन्थेऽनधिकारी -

आचार्यस्याप्ययमेव नियमो यदुत यथोदिताधिकारिगुणवते एव ग्रन्थ उपदेष्टव्य इतीत्याह - **न दातव्यश्चेति** ।। अविरक्ताय संसारात् इहामुत्रार्थभोगविरागरहितायेत्यर्थः । नानिरस्तैषणाय एषणात्रयाद-व्युत्थिताय इत्यर्थः । साध्यसाधनविलक्षणो हि परमात्मा वेदान्तार्थः । अतः नानिरस्तैषणाय अत्र प्रवेशो देयः । न चायमवते योगशास्त्र-परिपठितमानससाधनशून्याय, अथवा अमानित्वादिसाधनरहिताय-इत्यर्थः ।।७१।।

निष्कामाः संन्यासिन एव जानीयुः -

कुतश्चैष ग्रन्थो यथोक्तसाधनवते देयः, न यस्मैकस्मैचिदिति ? तत्राह - **ज्ञात्वेति** ।। अस्मिन् प्रकरणे यथोदितं आत्मतत्त्वं ज्ञात्वा तदूर्ध्वं ज्ञातव्यं नावशिष्यते । एतस्मिन् विदिते सर्वं विदितं भवतीत्यर्थः । **न चानिरस्तकर्मेति** । क्रियाकारकफलविलक्षणं हीदमात्मतत्त्वम्, तस्मात् असंन्यस्तकर्मा नैतज्जानीयात् इति यतः, ततः यथोक्तसाधनरहिताय न दातव्योऽयं ग्रन्थः - इत्यर्थः । 'नाविरतो दुश्चरितात् नाशान्तो नास-माहितः । नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ।।' (का. १-२-२४) इति श्रुतेः ।।७२।।

अत एव सर्वकर्मसंन्यासपूर्वकम् अन्तर्मुखचित्ताः वेदान्त-श्रवणतत्परा एव जानीयुरिमं यथोक्तं प्रकरणार्थमित्याह - **निरस्त-सर्वकर्माण इति** ।। शास्त्रोक्तं कर्म तु चित्तशुद्ध्यर्थं संसारासारता-

ज्ञानद्वारा वैराग्योत्पादनार्थं चेति प्रथमाध्याये (५२तमश्लोक-संबन्धोक्तौ) समुदीरितसाधनसोपानानुसन्धानेन विज्ञेयम् ।।७३।।

---

१५. ग्रन्थोपसंहारः

(मूलम्)

श्रीमच्छङ्करपादपद्मयुगलं संसेव्य लब्ध्वोचिवान्
ज्ञानं पारमहंस्यमेतदमलं स्वान्तान्धकारापनुत् ।
मा भूदत्र विरोधिनी मतिरतः सद्भिः परीक्ष्यं बुधैः
सर्वत्रैव विशुद्धये मतमिदं सन्तः परं कारणम् ।।७४।।

सुभाषितं चार्वपि नाऽमहात्मनां
दिवाकरो नक्तदृशामिवामलः ।
प्रभाति भात्येव विशुद्धचेतसां
निधिर्यथापास्ततृषां महाधनः ।।७५।।

विष्णोः पादानुगां यां निखिलभवनुदं शङ्करोऽवाप योगात्
सर्वज्ञं ब्रह्मसंस्थं मुनिगणसहितं सम्यगभ्यर्च्य भक्त्या ।
विद्यां गङ्गामिवाहं प्रवरगुणनिधेः प्राप्य वेदान्तदीप्तां
कारुण्यात्तामवोचं जनिमृतिनिवहध्वस्तये दुःखितेभ्यः ।।७६।।

(क्लेशापहारिणी)

गुरोः प्राप्तमेवात्र निबद्धम् -

अथेदानीं प्रकरणमुपसंहरन् अत्रोक्तार्थस्य सम्प्रदायागतत्वमाह

श्रद्धालूनां संग्रहार्थम् । वेदान्तार्थविदुष प्रार्थयते स्वोक्तग्रन्थे सारासार-विवेचनेन परीक्षणं कर्तव्यमिति - **श्रीमदित्यादिना** ।। स्पष्टार्थः श्लोकः ।।७४।।

तत्र ग्रन्थे दोषैकदृशः, विद्यमानमपि ग्रन्थगुणं न बहुमन्यन्ते तान् दुराराध्यान् प्रति न किञ्चिद् वक्तव्यम् ; गुणलुब्धानां सहृदयानां तु प्रकरणोक्ता अमूल्यविचारविशेषाः स्वत एव हृदयङ्गमा भवेयुरित्यतः परिशुद्धचित्तानां सविधे परीक्षणायैवेदं प्रकरणं समर्पितमस्ति मयेत्याह - **सुभाषितमिति** ।। उलूकादिनक्तदृग्दृष्टान्तो योगसूत्रस्थितसर्वरत्नोप-स्थानसिद्धिदृष्टान्तश्च यथोक्तार्थस्फुटनार्थौ ।।७५।।

अथेदं प्रकरणं मुमुक्षूणामुपकारायैव विरचितम् न ख्यातिला-भाद्यर्थमित्यतो मुमुक्षुभिरादर्तव्यमित्याह - **विष्णोरिति** ।। यथा महादेवो विष्णोः पादात् विनिःसृतां गङ्गां योगैश्वर्यबलात् लोकोपकारार्थम् अवाप जटाजूटे धृतवान्, तथैव यां विद्यां विष्णोः परमं पदं दर्शयन्तीं शङ्करोऽस्मद्गुरुः योगादवाप । तं शङ्करं परमार्थविज्ञानेन सर्वज्ञं ब्रह्मनिष्ठं शिष्यभूतमुनिगणसहितं भक्त्या सम्यगभ्यर्च्य तस्मात् प्रवर-गुणनिधेर्महाकारुणिकात्, सर्ववेदान्तप्रकाशितामिमां ब्रह्मविद्यां प्राप्य संसारदुःखितेभ्यः मुमुक्षुभ्यः कारुण्यादेव केवलं - कथं नु खल्वमी सर्वसंसारदुःखविमुक्ता भवेयुरित्यनुकम्पया - अवोचम् इत्यर्थः ।।७६।।

---

१६. गुरुनमस्क्रिया

(मूलम्)

वेदान्तोदरवर्ति भास्वदमलं ध्वान्तच्छिदस्मद्धियो
दिव्यं ज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित् ।

यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
प्रोत्सार्याविरकार्षीद्गुरुगुरुः पूज्याय तस्मै नमः ।।७७।।

(क्लेशापहारिणी)

अथ गुरुभक्तेर्विद्यां प्रति परमाङ्गत्वं दर्शयितुं प्रकरणारम्भे इव तदन्तेऽपि स्वकृतां नमस्कारक्रियां शिष्यशिक्षार्थं श्लोकेन निबध्नाति - **वेदान्तोदरवर्तीति** ।। वेदान्तप्रमाणैकलभ्यम्, अत एवान्त्यप्रमाणजन्यत्वात् दोषविधुरं अतीन्द्रियविषयमपि परमार्थतत्त्वं नियमेन प्रकाशयत् ज्ञानं - संसारबीजम् अस्मद्बुद्धिगतम् अज्ञानम् अनुभवानुसारितर्केणैवाशेषतोऽपसार्य विवृतवान् तस्मै गुरूणामपि सर्वेषां गुरवे पूज्याय नमः, मम नमस्कारोऽस्तु इत्यर्थः । निचृच्छार्दूलविक्रीडितमेतदिति छन्दःशास्त्रज्ञा वदन्ति ।।७७।।

---

१७. संबन्धोक्त्युपसंहारः

(मूलम्)

संबन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातासौ भवेद् ध्रुवम् ।।७८।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादशिष्य-श्रीसुरेश्वराचार्यविरचितायां नैष्कर्म्यसिद्धौ ससंबन्धोक्तौ चतुर्थोऽध्यायः

(क्लेशापहारिणी)

अथ नैष्कर्म्यसिद्धिप्रकरणस्थश्लोकानां संबन्धं कथं सुखं

विजानीयुरिति व्याख्यातॄणां कृते समनुगृहीतां संबन्धोक्तिमुपसंहरति - **संबन्धोक्तिरिति**।।७८।।

वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासिनो यां सुसुखं विशन्ति ।
नैष्कर्म्यसिद्धिस्तु मयापि दृष्टा श्रीशङ्कराचार्यवरप्रसादात् ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां नैष्कर्म्यसिद्धिव्याख्यायां क्लेशापहारिण्यां चतुर्थोऽध्यायः

।। ॐ तत्सत् ।।

१. श्लोकानां वर्णानुक्रमणिका

अत्र दत्ताः सङ्ख्याः प्रकृतग्रन्थगतानामध्यायश्लोकानां परामर्शिकाः । '(वा)' इत्येतत् तत्तच्छ्लोको **बृहदारण्यकवार्तिके**ऽपि पठित इति सूचयति । '(उ)' इति च **उपदेशसाहस्री**-ग्रन्थेऽपि श्लोकोऽस्तीति सूचयति ; '(गौ)' इति तु श्रीगौडपादकृत**माण्डूक्यकारिका**स्वस्तीति सूचयति ॥

प्रतीकम्	अ. श्लो.
अकुर्वतः क्रियाः काम्याः	१-१०
अग्निः सम्यगधीतेऽसौ	३-९७
अज्ञात एव सर्वोऽर्थः	३-७
अज्ञातपुरुषार्थत्वात्	३-८०
अज्ञानमनिराकुर्वद् (वा)	१-६५
अज्ञानहानमात्रत्वात् (वा)	१-२४
अतः सर्वाश्रमाणां तु	१-९९
अतः सर्वाश्रमाणां हि	१-२१
अतिदुःस्थोऽप्रबोधोऽत्र	३-११०
अतीतानागतेहत्यान्	२-७०
अत्राभिदध्महे दोषान्	१-२३
अथाध्यात्मं पुनर्यायात्	१-७६
अद्धातममनादृत्य	३-११७
अधर्माज्जायतेऽज्ञानं	४-६३
अधिचोदनं य आम्नायः	१-९१
अनात्मज्ञस्तथैवायं	४-३७
अनात्मत्वं स्वतःसिद्धं	४-४
अनादृत्य श्रुतिं मोहात्	३-३४
अनालिङ्गितसामान्यौ	३-७५
अनुच्छिन्नबुभुत्सश्च	४-१०
अनुत्सारितनानात्वं	१-६८
अनुपक्रियमाणत्वात्	३-६१
अनुमानप्रदीपेन	४-१५
अनुमानादयं भावात्	३-११३
अनेन गुणलेशेन	३-१०२
अन्तरेण विधिं मोहात्	१-१६
अन्यथा गृण्हतः स्वप्नो (गौ)	४-४२
अन्यस्यान्यात्मताप्राप्तौ	१-७१
अन्वयव्यतिरेकाभ्यां	२-९
अन्वयव्यतिरेकाभ्यां	३-५३
अन्वयव्यतिरेकाभ्यां (उ)	४-३२
अन्वयव्यतिरेकौ हि (उ)	४-२२
अपविद्धद्वयोऽप्येवं	३-६५
अपश्यन् पश्यतीं बुद्धिम्	२-७१
अपहारो यथा भानोः	२-४९
अपि प्रत्यक्षबाधेन	३-९५
अपूर्वाधिगमं कुर्वत्	३-८३
अप्रमोत्थं प्रमोत्थेन	२-१०४
अभूताभिनिवेशेन	२-५१
अभ्यासोपचयात् बुद्धेः	३-९०

प्रतीकम्	अ. श्लो.
अभ्यासोपचिता कृत्स्नं	३-९१
अभ्रयानं यथा मोहात् (वा)	२-१०१
अमानित्वादिनिष्ठो यः	४-६८
अमुह्यमानो मुह्यन्तीं	२-७३
अयथावस्त्वविद्या स्यात् (वा)	१-५६
अलब्ध्वातिशयं यस्मात्	१-२
अवगत्यात्मनो यस्मात्	२-९५
अवस्थादेशकालादि-	२-८९
अविक्रियस्य भोक्तृत्वं	२-६३
अविद्यानाशमात्रं तु	२-१०५
अविद्यानिद्रया सोऽयं	३-११५
अविद्याबद्धचक्षुष्ट्वात् (उ)	४-३५
अविविच्योभयं वक्ति (उ)	४-२०
असत्ये वर्त्मनि स्थित्वा	३-१०४
असाधारणांस्तयोर्धर्मान्	४-५
अस्तु वा परिणामोऽस्य	२-८४
अस्माद्यदपरं रूपं	४-४०
अहंवृत्त्यैव तद्ब्रह्म	३-४३
अहंशब्दस्य या निष्ठा (उ)	४-२५
अहं दुःखी सुखी चेति	३-४६
अहं धर्मस्त्वभिन्नश्चेत्	२-२८
अहमः प्रत्यगात्मार्थः	३-४०
अहंममत्वयत्नेच्छाः	२-२२
अहंमिथ्याभिशापेन	२-११६
अहो धार्ष्ट्यमविद्यायाः	३-१११
आगमापायिनिष्ठत्वात्	२-३५
आगमापायहेतुभ्यां	३-२२
आत्मनश्चेदहं धर्मः	२-३२
आत्मनश्चेन्निवार्यन्ते	२-११४
आत्मना चाविनाभावं	२-५६
आत्मनैवेत्युपश्रुत्य	३-४२
आत्मानात्मा च लोकेऽस्मिन्	४-३
आप्रबोधाद् यथाऽसिद्धः	४-५०
आम्नायस्य क्रियार्थत्वात्	१-१७
आम्रादेः परिणामित्वात्	२-३४
आरुरुक्षोर्मुनेर्योगं	१-५१
आर्तमन्यद् दृशेः सर्वं	२-४२
इति हृष्टधियां वाचः	१-२२
इत्येवं चोदयेद्योऽपि	३-१०९
इत्योमित्यवबुद्धात्मा	२-११९
इदं चेदनृतं ब्रूयात्	३-११८
इदं ज्ञानमहं ज्ञाता	४-४५
इदं ज्ञानं भवेज्ज्ञातुः	३-६०
इदमित्येव बाह्येऽर्थे	४-६
इमं ग्रन्थमुपादित्सुः	४-७०
इमं प्राश्निकमुद्दिश्य	२-५९
इममर्थं पुरस्कृत्य	४-१७
उत्पत्तिस्थितिनाशेषु	२-१११
उत्पत्तिस्थितिभङ्गेषु	२-७९
उत्पन्नात्मप्रबोधस्य	४-६९

प्रतीकम्	अ. श्लो.
उत्पाद्यमाप्यं संस्कार्यं (वा)	१-५३
उद्दिश्यमानं वाक्यस्थं	३-२५
ऊर्ध्वं गच्छति धूमे खं	२-६२
ऋते ज्ञानं न सन्त्यर्थाः	२-९७
एकेन वा भवेन्मुक्तिः	१-२५
एवं गौडैर्द्राविडैर्नः	४-४४
एवं चंक्रम्यमाणोऽयं	१-४२
एवं ज्ञानवतो नास्ति	४-४९
एवं तत्त्वमसीत्यस्मात्	३-७०
एवं विज्ञातवाच्यार्थे (उ)	४-२४
एवमेतद्धिरुग्ज्ञेयं	२-४४
एष आत्मा स्वयंज्योतिः (वा)	३-४१
एष सर्वधियां नृत्तं	२-५८
ऐकात्म्याप्रतिपत्तिर्या	१-७
कर्मणोऽङ्गाङ्गिभावेन	१-२०
कर्मप्रकरणाकाङ्क्षि (वा)	१-६३
कर्माज्ञानसमुत्थत्वात्	१-३५
कल्पितानामवस्तुत्वात्	२-५०
काम्यकर्मफलं तस्मात्	१-११
कार्यकारणबद्धौ तौ (गौ)	४-४१
कुतोऽविद्येति चोद्यं स्यात्	३-११६
कुर्वन्नेवेह कर्माणि	१-१८
कूटस्थबोधतोऽद्वैतं	३-१५
कूटस्थबोधप्रत्यक्त्वं	३-११
कृत्स्नानात्मनिवृत्तौ च	२-२
क्षयो नित्येन तेषां चेत्	१-८२
क्षुधया पीड्यमानोऽपि (उ)	४-६६
खानिलाग्न्यब्धरित्र्यन्तं	१-१
गुरूक्तो वेदराद्धान्तः	१-५
गृहीताहंपदार्थश्चेत्	३-४४
ग्राहकग्रहणग्राह्य-	२-१०८
घटबुद्धेर्घटाच्चार्थात्	२-१००
घटादयो यथा लिङ्गं	३-५६
घटादिवच्च दृश्यत्वात्	२-१९
चक्षुर्न वीक्षते शब्दम्	४-१२
चण्डालबुद्धेर्यद्द्रष्टृ	२-८८
चतुर्भिरुह्यते यत्तत्	२-२०
चिन्निभेयमहंवृत्तिः	३-१००
छित्त्वा त्यक्तेन हस्तेन (उ)	४-२६
जानीयाच्चेत् प्रसङ्ख्यानात्	३-१२३
जिघ्राणीममहं गन्धं (वा)	३-३९
जिज्ञसोर्दशमं यद्वत्	३-६८
ज्ञातैवाऽऽत्मा सदा ग्राह्यो (उ)	४-२९
ज्ञात्वा यथोदितं सम्यक्	४-७२
ज्ञानं यस्य निजं रूपं	३-११२
ज्ञानात् फले ह्यवाप्तेऽस्मिन्	१-९०
ज्ञेयाभिन्नमिदं यस्मात्	४-५४
तत्त्वमर्थेन सम्पृक्तो	३-७८
तत्त्वमस्यादिवाक्यानां	१-९८
तत्पदं प्रकृतार्थं स्यात्	३-२

प्रतीकम्	अ. श्लो.
तथा पदपदार्थौ च	२-८
तदर्थयोऽस्तु निष्ठात्मा	३-७६
तदित्येतत् पदं लोके	३-२३
तदेतदद्वयं ब्रह्म	२-९३
तदो विशेषणार्थत्वं	३-२६
तद्वत् सूक्ष्मे तथा स्थूले	२-१७
तमोऽङ्गत्वं यथा भानोः	१-७९
तमोऽभिभूतचित्तो हि	२-३१
तरोरुत्खातमूलस्य	४-६१
तस्मात् त्यक्तेन हस्तेन (उ)	४-२८
तस्माद्दुःखोदधेर्हेतोः	१-३७
तस्मान्मुमुक्षुभिः कार्यं	१-५०
तस्यैवं दुःखतप्तस्य	१-४५
तृष्णानिष्ठीवनैर्नात्मा	३-४८
त्यक्तकृत्स्नेदमर्थत्वात्	४-९
त्वमर्थस्यावबोधाय	३-१२६
त्वमित्यपि पदं तद्वत्	३-२४
त्वमित्येतद्विहायान्यत्	३-९८
दग्धाखिलाधिकारश्चेत्	१-४०
दग्धृत्वं च यथा वह्नेः	२-१०२
दण्डावसाननिष्ठः स्यात्	४-३८
दशमोऽस्मीति वाक्योत्था	३-६९
दाह्यदाहकतैकत्र	३-५९
दिदृक्षितपरिच्छिन्न-	३-४९
दुःखराशेर्विचित्रस्य	२-१०३
दुःखितावगतेश्चेत् स्यात्	३-८७
दुःखी यदि भवेदात्मा (वा)	२-७६
दुःख्यस्मीत्यपि चेद्ध्वस्ता (वा)	३-९२
दुरितक्षपणार्थत्वात्	१-२६
दृगेका सर्वभूतेषु	२-४७
दृश्यत्वादहमित्येषः (उ)	४-३०
दृश्यत्वाद्घटवद्देहो	३-५४
दृश्याः शब्दादयः क्लृप्ताः	२-४६
दृश्यानुरक्तं तद्द्रष्टृ	२-५३
दृष्टेर्द्रष्टारमात्मानं	२-९२
देशकालाद्यसंबन्धात् (वा)	४-५८
देहादिव्यवधानत्वात्	३-२९
द्रष्टापि यदि दृश्यायाः	२-४०
द्रष्टृत्वं दृश्यता चैव	२-३९
द्रष्टृत्वेनोपयुक्तत्वात्	२-२७
द्विषन्तीमद्विषन्नात्मा	२-७२
धर्मधर्मित्वभेदोऽस्याः	३-१३
धर्मिणश्च विरुद्धत्वात्	२-३८
धावेदिति न दानार्थे	१-९७
धीवन्नापेक्षते सिद्धिं	२-११०
धीविक्रियासहस्राणां	४-१३
न कस्याञ्चिदवस्थायां	३-१४
न कृत्स्नकाम्यसंत्यागो	१-८१
न ख्यातिलाभपूजार्थं	१-६
न चाध्यात्माभिमानोऽपि	१-७५

प्रतीकम्	अ. श्लो.
न चामुमुक्षोरस्तीह	२-७
न चेदनुभवोऽतः स्यात्	३-११९
न तावद्योग एवास्ति	१-९५
न परीप्सां जिहासां वा	१-३०
न पृथङ् नात्मना सिद्धिः	२-४५
न प्रकाशक्रिया काचित् (वा)	२-६७
नरकाद्भीर्यथास्याभूत्	१-४६
नराभिमानिनं तस्मात्	१-९६
नर्ते स्याद्विक्रियां दुःखी (वा)	२-७७
नवबुद्ध्यपहाराद्धि (उ)	४-३४
नवसङ्ख्याहृतज्ञानो (वा)	३-६४
न विदन्त्यात्मनः सत्तां	२-१०६
न व्यावृत्तिर्यथा भावात्	३-११४
न स्वयं स्वस्य नानात्वं	२-११२
न हानं हानमात्रेण	३-२१
न हि नाम्नास्ति संबन्धो	३-१०६
नाज्ञासिषमिति प्राह	२-५४
नात्मना न तदंशेन	२-२६
नाद्राक्षमहमित्यस्मिन् (उ)	४-२३
नामादिभ्यः परो भूमा	२-५७
नामादिभ्यो निराकृत्य	३-१२०
नायं शब्दः कुतो यस्मात्	३-८४
नालुप्तदृष्टेर्दृश्यत्वं	२-४१
नाविरक्तस्य संसारात्	२-६
नाविरक्ताय संसारात्	४-७१
नासन्नुपायो लोकेऽस्ति	३-१०८
नाहंग्राह्ये न तद्धीने	२-५
नाहं न च ममात्मत्वात्	२-११७
नित्यमुक्तत्वविज्ञानं (वा. उ)	४-३१
नित्यानुष्ठानतश्चैनं	१-१३
नित्यां संविदमाश्रित्य	२-११५
नित्यावगतिरूपत्वात्	२-११३
नित्यावगतिरूपत्वादन्यः	३-४७
नियमः परिसङ्ख्या वा	१-८८
निरपेक्षश्च सापेक्षां	२-७५
निरस्तसर्वकर्माणः	४-७३
निराकुर्यात् प्रसङ्ख्यानं	३-८९
निर्दुःखित्वं त्वमर्थस्य	३-१०
निर्दुःखित्वं स्वतःसिद्धं	३-९४
निवृत्तसर्पः सर्पोत्थं	४-६०
निवृत्तायामहंबुद्धौ	२-३०
निषिद्धकाम्ययोस्त्यागः	१-२८
नेहात्मविन्मदन्योऽस्ति	४-५३
नोष्णिमानं दहत्यग्निः	२-२३
न्यायः पुरोदितोऽस्माभिः	४-७
न्यायसिद्धमतो वक्ति	३-५०
पदान्युद्धृत्य वाक्येभ्यो	३-३१
परमात्मानुकूलेन	१-७२
परमार्थात्मनिष्ठं यत्	४-५२
पराञ्च्येव तु सर्वाणि (वा)	३-४५

प्रतीकम्	अ. श्लो.
परिणामिधियां वृत्तं	२-८२
परिहृतावाप्तयोर्बोधात्	१-३४
परीक्ष्य लोकानित्याद्या	१-८७
पश्यन्निति यदाहोच्चैः	४-३९
पापापनुत्तये वाक्यात्	१-८३
पाप्मनां पाप्मभिर्नास्ति	१-८४
पारंपर्येण कर्मैवं	१-५२
पारोक्ष्यं यत्तदर्थे स्यात्	३-७७
पूर्वाध्यायेषु यद्वस्तु	४-१
प्रत्यक्तास्य स्वतोरूपं	३-७१
प्रत्यक्त्वादतिसूक्ष्मत्वात्	२-५५
प्रत्यक्प्रवणतां बुद्धेः	१-४९
प्रत्यक्षं चेन्न शाब्दं स्यात्	३-८५
प्रत्यक्षस्य पराक्त्वान्न	३-५१
प्रत्यक्षादिविरुद्धं चेत्	३-८१
प्रत्यगुद्भूतपित्तस्य	३-३०
प्रत्यर्थं तु विभिद्यन्ते	२-८६
प्रत्याचक्षाण आहातो	४-६४
प्रमाणतन्निभेष्वस्याः	२-७८
प्रमाणबद्धमूलत्वात्	३-८८
प्रमाणमन्तरेणैषां	२-९९
प्रमाणव्यवहारोऽयं	३-५२
प्रमाणैश्चावगम्यत्वात्	२-३७
प्रमां चेज्जनयेद्वाक्यं	३-९६
प्रमित्सायां य आभाति	३-८
प्रसंख्याने श्रुतावस्य	३-१२५
प्रागनात्मैव जग्धं सत्	२-१२
प्रागसद्याति पश्चात्सत्	३-५५
प्रागात्मबोधात् बोधोऽयं	४-५५
प्राप्तव्यपरिहार्येषु	१-३३
प्रामाण्याय न बाहुल्यं	१-८६
बलवद्धि प्रमाणोत्थं	१-३६
बाधितत्वादविद्यायाः	१-३८
बाध्यबाधकभावाच्च (वा)	१-५५
बाह्य आकारवान् ग्राह्यः	२-१०७
बाह्यां वृत्तिमनुत्पाद्य	३-५८
बुद्धाद्वैतसतत्त्वस्य	४-६२
बुद्धावेव विवेकोऽयं	४-१४
बुद्धिजन्मनि पुंसश्च	२-६१
बुद्धेरनात्मधर्मत्वं	२-९६
बुद्धेर्यत्प्रत्यगात्मत्वं	३-१८
बुद्ध्यन्तमपविद्ध्यैवं	४-१८
बुद्ध्यादीनामनात्मत्वं	३-३३
बुभुत्सोच्छेदिनी चास्य (वा)	३-६७
बुसव्रीहिपलालांशैः	२-१५
बृहस्पतिसवे यद्वत् (वा)	१-५७
बोद्धृता कर्तृता बुद्धेः	३-१२
बोद्धृत्वं तद्वदेवास्याः	३-१९
बोधात् प्रागपि दुःखित्वं	२-९०
बोधाबोधौ नभोऽस्पृष्ट्वा (वा)	३-१०७
बोधेऽप्यनुभवो यस्य	३-३८
ब्रह्मात्मा वा भवेत्तस्य	१-६९

प्रतीकम्	अ. श्लो.
ब्राह्मण्याद्यात्मके देहे	१-३९
भगवत्पूज्यपादैश्च	४-१९
भङ्क्त्वा चान्नमयादींस्तान्	३-१२१
भयान्मोहावनद्धात्मा	१-३२
भावनाजं फलं यत्स्यात् (वा)	३-९३
भिन्नाभिन्नं विशेषैश्चेत्	१-७८
भेदसंविदिदंज्ञानं	३-६
भ्रान्तिसिद्धमनूद्यार्थं	३-७३
मन्यसे तावदस्मीति	२-१३
महाभूतान्यहङ्कारः	२-४३
मानान्तरानवष्टब्धं	३-३५
मित्रोदासीनशत्रुत्वं	२-४८
मुक्तेः क्रियाभिः सिद्धत्वात्	१-९
मुक्तेः क्रियाभिः सिद्धत्वादिति	१-८०
मृत्स्नेभके यथेभत्वं (वा)	१-५९
मोहापिधानभङ्गाय	१-७०
यत्कर्मको हि यो भावो	२-२४
यत्नतो वीक्षमाणोऽपि	१-१५
यत्र त्वस्येति साटोपं	२-११८
यत्र यो दृश्यते द्रष्टा	२-२५
यत्र स्यात्संशयो नासौ	३-३७
यत्सिद्धाविदमः सिद्धिः	१-४
यथा जात्यमणेः शुभ्रा (वा)	२-६४
यथा प्राज्ञे तथैवायं	४-४८
यथा विशुद्ध आकाशे	२-६८
यथा स्वापनिमित्तेन	४-३६
यदर्थं च प्रवृत्तं यत्	३-१२२
यदवस्था व्यनक्तीति	२-६५
यदा ना तत्त्वमस्यादेः	३-१
यदा सर्वे प्रमुच्यन्ते	१-४४
यद्धि यस्यानुरोधेन (वा)	१-६२
यद्यद् विशेषणं दृष्टं	२-९४
यद्यात्मधर्मोऽहङ्कारो	२-३३
यावद् यावन्निरस्यायं	३-२८
यावत्यश्चेह विद्यन्ते	१-१४
युक्तिशब्दौ पुराप्यस्य	३-१२४
युष्मदर्थे परित्यक्ते	३-५
युष्मदस्मद्विभागज्ञे (उ)	४-२१
येनैवास्या भवेद्योगः	२-८१
यैरद्राक्षीत्पुराऽऽत्मानं	४-११
योऽयं स्थाणुः पुमानेषः	२-२९
यो हि यत्र विरक्तः स्यात् (उ)	४-६५
रागो लिङ्गमबोधस्य	४-६७
रिपौ बन्धौ स्वदेहे च	२-१८
रूपप्रकाशयोर्यद्वत्	४-४६
लक्षणं सर्पवद्रज्ज्वाः	३-२७
लिङ्गमस्तित्वनिष्ठत्वात्	३-५७
लिप्सतेऽज्ञानतो लब्धं	१-३१
वर्चस्कं त्वन्नकार्यत्वात्	२-११
वर्चस्के संपरित्यक्ते	२-१६

प्रतीकम्	अ. श्लो.
वर्तमानमिदं याभ्यां	१-१२
वर्षातपाभ्यां किं व्योम्नः	२-६०
वस्त्वेकनिष्ठं वाक्यं चेत्	३-८२
वाक्यप्रत्यक्षमानाभ्यां	३-६३
वाक्यश्रवणमात्राच्च	२-३
वाक्यैकगम्यं यद्वस्तु	१-८९
वास्तवेनैव वृत्तेन	४-५६
विक्रियाज्ञानशून्यत्वात्	३-६२
विदेहो वीतसन्देहो (वा)	१-५८
विद्यात्तत्त्वमसीत्यस्मात्	४-८
विनाऽज्ञानप्रहाणेन	२-१०
विपश्चितोऽप्यतस्तस्याम्	३-७२
विरहय्य क्रियां नैव	१-१९
विशेषं कञ्चिदाश्रित्य	३-१६
विशेषणमिदं सर्वं (उ)	४-२७
विष्णोः पादानुगां यां	४-७६
वृत्तिभिर्युष्मदर्थाभिः	३-१०१
वेदान्तोदरवर्ति भास्वदमलं	४-७७
वेदान्तोदरसंगूढं	१-३
वेदावसानवाक्योत्थं	१-८
व्यवधीयन्त एवामी	२-९८
व्युत्थिताशेषकामेभ्यो	१-४८
व्योम्नि धूमतुषाराभ्र -	३-९९
शब्दाद्याकारनिर्भासाः	२-६९
शब्दाद्याकारनिर्भासाः	२-९१
शमादिसाधनः पश्येत्	३-४
शयानाः प्रायशो लोके	३-१०५
शिर आक्रम्य पादेन	२-१४
शुद्ध्यमानं तु तच्चित्तम्	१-४७
शुभैः प्राप्नोति देवत्वं	१-४१
श्रावितो वेत्ति वाक्यार्थं	२-१
श्रीमच्छङ्करपादपद्मयुगलं	४-७४
श्रुतयः स्मृतिभिः साकं	१-८५
श्रुतिश्चेमं जगादार्थं	१-४३
षट्सु भावविकारेषु	२-८५
षष्ठीगुणक्रियाजाति -	३-१०३
संक्षेपविस्तराभ्यां हि	४-२
संबन्धोक्तिरियं साध्वी	४-७८
संसारबीजसंस्थोऽयं	४-१६
संसारिताऽद्वितीयेन	३-७९
सकृत्प्रवृत्त्या मृद्नाति (वा)	१-६७
सकृदात्मप्रसूत्यैव (वा)	४-५७
सदाविलुप्तसाक्षित्वं	२-३६
सदेवेत्यादिवाक्येभ्यः (उ)	४-३३
सन्निपत्य न च ज्ञानं (वा)	१-५४
समस्तव्यस्तभूतस्य (वा)	१-७३
सम्प्रसादेऽविकारित्वात्	४-४७
सम्यक्संशयमिथ्यात्वैः	३-२०
सम्यग्ज्ञानशिखिप्लुष्ट- (वा)	४-५९
सर्वजात्यादिमत्त्वेऽस्य	१-७४
सर्वधीव्यञ्जकस्तद्वत्	२-६६
सर्वप्रमाणासंभाव्यो	१-९३

प्रतीकम्	अ. श्लो.	प्रतीकम्	अ. श्लो.
सर्वमेवानुजानाति	४-५१	सुभ्रूः सुनासा सुमुखी	२-५२
सर्वसंशयहेतौ हि	३-३६	सुषुप्ताख्यं तमोऽज्ञानं (उ)	४-४३
सर्वाकारां निराकारः	२-७४	सेयं भ्रान्तिर्निरालम्बा	३-६६
सर्वोऽयं महिमा ज्ञेयो	२-४	स्थाणुः स्थाणुरितीवोक्तिः	३-७४
साध्यसाधनभावोऽयं (वा)	१-२७	स्थाणुं चोरधियाऽऽलाय (वा)	१-६०
सामानाधिकरण्यं च (वा)	३-३	स्थाणोः सतत्त्वविज्ञानं (वा)	१-६१
सामानाधिकरण्यादेः (वा)	३-९	स्थूलं युक्त्या निरस्यैवं	२-२१
सामान्यं हि पदं ब्रूते	३-३२	स्मृतिस्वप्नप्रबोधेषु	२-८३
सामान्याच्च विशेषाच्च	३-१७	स्वमनोरथसंक्लृप्त -	१-१००
सामान्येतररूपाभ्याम्	१-७७	स्वमहिम्ना प्रमाणानि	३-८६
सावशेषपरिच्छेदिन्यत एव	२-८७	स्वरूपलाभमात्रेण (वा)	१-६४
सुखदुःखादिभिर्योगः	१-९४	स्वर्गं यियासुर्जुहुयात्	१-९२
सुखदुःखादिसंबद्धां (वा)	२-८०	स्वसाधनं स्वयं नष्टो	२-१०९
सुभाषितं चार्वपि नाऽमहात्मनां	४-७५	हितं संप्रेप्सतां मोहात्	१-२९
		हेतुस्वरूपकार्याणि (वा)	१-६६

२. प्रमाणवचनानामाकरग्रन्थानुक्रमणिका

अत्र दत्ताः संख्याः कंसचिन्हान्तर्गताः तत्तद्ग्रन्थस्याध्यायादिसूचिन्यः, पंक्त्यन्ते दत्ताः नैष्कर्म्यसिद्धिश्लोकसंख्याः । उपदेशसाहस्र्याः श्लोकसंख्या तु मैसूरु प्राच्यपुस्तकागारे (Mysore Oriental Library) मुद्रापितगद्यपद्यात्मकपुस्तकस्येति ज्ञेयम् ॥

	नै.श्लो.
ईशावास्योपनिषदि -	
कुर्वन्नेवेह कर्माणि (२)	१-१८
उपदेशसाहस्र्यां पद्यबन्धरूपायाम् -	
अन्वयव्यतिरेकाभ्याम् (१८-१९१)	४-३२
अन्वयव्यतिरेकौ हि (१८-९६)	४-२२
अविद्याबद्धचक्षुष्ट्वात् (१८-१७५)	४-३५
अविविच्योभयं वक्ति (१८-७८)	४-२०
अहंशब्दस्य या निष्ठा (१८-१०१)	४-२५
(मुद्रितोपदेशसाहस्र्यां 'अहंशब्दस्य निष्ठा या' इति पाठः)	
एवं विज्ञातवाच्यार्थे (१८-९९)	४-२४
('विज्ञातवाक्यार्थे' इति मुद्रितस्तु अपपाठः)	
क्षुधया पीड्यमानोऽपि (१८-२३२)	४-६६
छित्त्वा त्यक्तेन हस्तेन (६-१)	४-२६
(मुद्रितपुस्तकस्थः 'विशिष्यते' इत्येष अपपाठः)	
ज्ञातैवात्मा सदा ग्राह्यो (६-४)	४-२९
तस्मात्त्यक्तेन हस्तेन (६-२)	४-२८
दृश्यत्वादहमित्येष (१५-१६)	४-३०
नवबुद्ध्यपहाराद्धि (१८-१७४)	४-३४
नाद्राक्षमहमित्यस्मिन् (१८-९७)	४-२३
नित्यमुक्तत्वविज्ञानं (१८-१९०)	४-३१
युष्मदस्मद्विभागज्ञे (१८-९०)	४-२१
(श्लोकार्धमात्रमुदाहृतम्)	
यो हि यत्र विरक्तः स्यात् (१८-२३१)	४-६५
('यस्माद्विरक्तः' पा.)	

नै.श्लो.

विशेषणमिदं सर्वं (६-३) ४-३७

सदेवेत्यादिवाक्येभ्यः (१८-१९२) ४-३३

सुषुप्ताख्यं तमोऽज्ञानम् (१७-२६) ४-४३
('सुषुप्त्याख्यम्' पा.)

कठोपनिषदि -

न जायते म्रियते वा (१-२-१८) २-११३

पराञ्चि खानि (२-१-१) ३-९५

यमेवैष वृणुते (१-२-२३) ३-५७

विमुक्तश्च विमुच्यते (२-२-१) १-५२

केनोपनिषदि -

यच्चक्षुषा न पश्यति (२-७) ४-१७

छान्दोग्योपनिषदि -

अथ यो वेदेदं जिघ्राणीति (८-१२-४) ३-४०

इयमेवर्गग्निः साम (१-६-१) ३-अव.

कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेत (६-२-२) ३-७

तत्त्वमसि (६-८-७, ...) १-९१, १-९८, २-१, ३-अव., ३-२२, ३-२३, ३-४६, ३-४७, ३-६५, ३-६९, ३-७०, ३-८२, ३-९०, ३-११७, ३-११८, ४-८, ४-१८, ४-२१, ४-२४, ४-४०

तत्सत्यं स आत्मा तत्त्वमसि (६-८-७, ...) ३-४०

य ऐषोऽक्षिणि पुरुषो दृश्यते (८-७-४) ३-४०

सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित् (७-१-३) ३-अव.

सदेव :... (६-२-१) ४-३३

गौडपादकारिकासु -

अन्यथा गृह्णतः स्वप्नः (१-१५) ४-४२

कार्यकारणबद्धौ तौ - (१-११) ४-४१

जैमिनीयसूत्रेषु -

आम्नायस्य क्रियार्थत्वात् (१-२-१) १-१७

नै.श्लो.

न्यायवार्तिके -

वर्षातपाभ्यां किं व्योम्नः (३-१-५, प.पा. ३५५) २-६०
(इयं बौद्धकारिकेति वार्तिके परामृष्टा)

बृहदारण्यकोपनिषदि -

अपूर्वम् (२-५-१९) ३-४६, ४-३९
अस्थूलम् (३-८-८) २-११३
अहं ब्रह्मास्मि (१-४-१०) २-२, २-१८, २-२८, २-५४, ३-४०, ३-४७, ३-५३, ३-५८, ३-१०८, ३-१२१
आत्मनैवायं (४-३-६) ३-४२
आत्मा वा अरे द्रष्टव्यः (२-४-५, ४-५-६) १-८८
आत्मेत्येवोपासीत (१-४-७) १-८८
आर्तमन्यत् (अतोऽन्यदार्तम्) (३-७-२३) २-४२
इति नु (कामयमानः) (४-४-६) १-४४
देवो भूत्वा देवानप्येति (४-१-२, ...) १-६७
न दृष्टेर्द्रष्टारं पश्येः (३-४-२) २-९२, ३-४०, ४-१७
न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते (४-३-२३) २-३४
नेतिनेति (२-३-६, ३-९-२६, ४-२-४, ४-५-१५) १-५२, २-११३, १-५८
पश्यन् वै तत्र पश्यति (४-३-२३) ४-३९
ब्रह्मैव सन् ब्रह्माप्येति (४-४-६) १-५२
यत्र त्वस्य (सर्वमात्मैवाभूत् ....) (४-५-१५) २-११८
यदा सर्वे प्रमुच्यन्ते (४-४-७) १-४४
योऽयं (विज्ञानमयः प्राणेषु) (४-३-७) ३-४०
विज्ञातारमरे केन विजानीयात् (२-४-१४) २-९२
विज्ञाय प्रज्ञां कुर्वीत (४-४-२१) १-६७
शान्तो दान्तः (४-४-२३) ३-४

शारीरके -

अथातो ब्रह्मजिज्ञासा (१-१-१) १-९१
जन्माद्यस्य यतः (१-१-२) १-९१

नै.श्लो.

भगवद्गीतासु -

अद्वेष्टृत्वादीनि (१२-१३.....१९) ४-६९

अमानित्वादीनि (१३-७.....११) ४-६८

आरुरुक्षोर्मुनेर्योगं (६-३) १-५१

प्रकाशं च (१४-२२) ४-६४

महाभूतान्यहङ्कारः (१३-५) २-४३

यस्य सर्वे समारम्भाः(४-१९) ४-६४

महाभारते मोक्षधर्मेषु -

कामबन्धनमेवेदम् (२५१-७) १-४४

मुण्डकोपनिषदि -

परीक्ष्य लोकान् (१-२-१२) १-८७

यमेवैष वृणुते (३-२-३) ३-५७

३. नैष्कर्म्यसिद्धौ उदाहृताः वार्तिकश्लोकाः

अत्र वार्तिकपाठ एव दत्तः । सिद्धौ श्लोकानुक्रमणिकायां (वा.) इति संज्ञया सूचितश्लोकेन वार्तिकश्लोको तुलनीयः पाठान्तरोऽपि यः कश्चिदस्ति वा न वा इति निर्णयाय, यतस्तुल्यार्थक एव श्लोको नैष्मर्म्यसिद्धौ वार्तिके च शब्दान्तरैरपि निबद्धः क्वचिद् दृश्यते ।।

		नै.श्लो.
अज्ञानमनिराकुर्वञ्ज्ञानमेव न सिध्यति । विपन्नकारकग्रामं ज्ञानं कर्म न ढौकते ।।	३-३-६९	१-६५
अज्ञानहानं नो मुक्तिः तस्याः कर्म न साधनम् । न हि कर्म तमो हन्ति तमसीवोत्थितं तमः ।।	३-३-३७	१-२४
अग्रयानं यथाऽज्ञानाच्छशभृत्यध्यवस्यति । क्रियाकारकवद्बुद्धि तथा तत्साक्षिणीक्षते ।।	४-३-४१८	२-१०१
अयथावस्त्वविद्या स्याद्विद्यैतस्या विरोधिनी । समुच्चयस्तयोरेवं रविशार्वरयोरिव ।।	३-३-६१	१-५६
उत्पाद्यमाप्यं संस्कार्यं विकार्यं चैषणाफलम् । तस्मिन्नेवंविधे कः स्यात् संतोषो विदुषामपि ।।	४-४-११०५	१-५३
एष आत्मा स्वयंज्योती रविसोमाग्निवाक्षु यः । यातेष्वस्तं दृशैवास्ते भासयंश्चित्तचेष्टितम् ।।	४-३-११२	३-४१
कर्मप्रकरणाकाङ्क्षि ज्ञानं कर्मगुणो भवेत् । यद्धि प्रकरणे यस्य तत्तदङ्गं प्रचक्षते ।।	४-४-११२५	१-६३
जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः । स आत्मा तत्परंज्योतिः शिरसीदं वचः श्रुतेः ।।	१-४-७१६	३-३९
दुःखी यदि भवेदात्मा कः साक्षी दुःखिनो भवेत् । दुःखिनः साक्षिताऽयुक्ता साक्षिणो दुःखिता तथा ।।	१-४-५६०	२-७६
दुःख्यस्मीत्यपि चेद् ध्वस्ता कोटिकल्पोपबृंहिता । अल्पीयोऽभ्यासजा साध्वी भावनेत्यत्र का प्रमा ।।	१-४-१५३८	३-९२
देशकालाद्यसंबन्धात् देशादेर्मोहकार्यतः । नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्त्यतः ।।	१-१-१४५२	४-५८

		नै.श्लो.
न प्रकाशक्रिया काचिदस्य स्वात्मनि विद्यते । उपचारात् क्रिया सास्य यः प्रकाश्यस्य संनिधिः ।।	४-३-८९२ ४-३-१४६०	२-६७
नर्ते स्याद् विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ।।	१-४-५६१ ४-३-३९६	२-७७
नवसङ्ख्याहृतज्ञानो दशमो विभ्रमाद् यथा । न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ।।	सं. वा. २११	३-६४
नित्यमुक्तत्वविज्ञानं वाक्यादेवाञ्जसा भवेत् । वाक्यार्थस्य च विज्ञानं पदार्थस्मृतिपूर्वकम् ।।	२-४-१११	४-३१
पराञ्च्येव तु सर्वाणि प्रत्यक्षादीनि नात्मनि । प्रतीच्येव प्रवृत्तं तत्सदसीति वचोऽञ्जसा ।।	१-४-५६४	३-४५
बाध्यबाधकभावाच्च पञ्वास्योरणयोरिव । एकदेशानवस्थानान्न समुच्चयता तयो ।।	३-३-५९	१-५५
बुभुत्सोच्छेदिनैवास्य सदसीत्यादिना दृढा । प्रतीचि प्रतिपत्तिः स्यात् प्रत्यगज्ञानबाधया ।।	सं. वा. २१३	३-६७
बृहस्पतिसवे यद्वत् क्षत्रियो न प्रवर्तते । ब्राह्मणत्वानहंमानी विप्रो वा क्षत्रकर्मणि ।।	३-३-६३	१-५७
बोधाबोधौ चितेर्नस्तः कूटस्थज्ञप्तिमात्रतः ।।	२-१-१२६	
भावनाजं फलं यत्स्याद्यच्च स्यात्कर्मणः फलम् । न तत्स्थास्न्विति मन्तव्यं पण्यस्त्रीगमनं यथा ।।	४-४-७७७	३-९
मृत्स्नेभके यथेभत्वं शिशुरध्यस्य वल्गति । अध्यस्यात्मनि देहादीन् मूढस्तद्वद् विचेष्टते ।।	३-३-६५	१-५९
यथा जात्यमणेः शुद्धा ज्वलन्ती निश्चला शिखा । संनिध्यसंनिधानेषु घटादीनामविक्रिया ।।	४-३-८९०	२-६४
यद्धि यस्याविरोधेन स्वभावमनुवर्तते । तत्तस्य गुणभूतं स्यान्न प्रधानाद् गुणो यतः ।।	३-३-६८	१-६२
विदेहो वीतसन्देहो नेति नेत्येव बोधितः । देहाद्यनात्मदृक् तद्वत् तत्क्रियां वीक्षतेऽपि न ।।	३-३-६४	१-५८

		नै.श्लो.
संनिपत्य न च ज्ञानं कर्माज्ञानं निरस्यति । साध्यसाधनभावत्वादेककालानवस्थितेः ।।	३-३-५८	१-५४
सकृत् प्रवृत्त्या मृद्नाति क्रियाकारकरूपभृत् । अज्ञानमागमज्ञानं साङ्गत्यं नास्त्यतोऽनयोः ।।	३-३-७१	१-६७
सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम् । ध्वान्तमात्रनिरासेन न ततोऽन्याऽन्यथा मतिः ।।	१-४-१४५१	४-५७
समस्तव्यस्तभूतस्य ब्रह्मण्यवसितात्मनः । ब्रूत कर्मणि को हेतुः सर्वानन्यत्वदर्शिनः ।।	५-१-१०६	१-७३
समग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः । सकृन्निवृत्तेर्बाध्यस्य किं कार्यमवशिष्यते ।।	१-४-१४५५	४-५९
साध्यसाधनबुद्धिर्नो वचनात् पारलौकिकी । न चाश्रौषं श्रुतेर्वाक्यात् कर्म मोक्षफलं क्वचित् ।।	३-३-५३	१-२७
सामानाधिकरण्यं च विशेषणविशेष्यता । लक्ष्यलक्षणसबन्धः पदार्थः प्रत्यगात्मनाम् ।।	३-५-१८५	३-३
सामानाधिकरण्यादेर्घटेतरखयोरिव । व्यावृत्तेः स्यादवाक्यार्थः साक्षान्नस्तत्त्वमर्थयोः ।।	३-५-१८६	३-९
सुखदुःखादिसंबद्धां यथा दण्डेन दण्डिनम् । राधको वीक्षते बुद्धिं साक्षी तद्वदसंहतः ।।	१-४-५६२	२-८०
स्थाणुं चोरधियाऽऽलाय भीतो यद्वत्पलायते । बुद्ध्यादिभिस्तथात्मानं भ्रान्तोऽध्यारोप्य चेष्टते ।।	३-३-६६	१-६०
स्थाणोः सतत्त्वविज्ञानं यथा नाङ्गं पलायने । आत्मनस्तत्त्वविज्ञानं तद्वन्नाङ्गं क्रियाविधौ ।।	३-३-६७	१-६१
स्वरूपलाभमात्रेण यत्त्वविद्यां निहन्ति नः । न तदङ्गं प्रधानं वा ज्ञानं स्यात् कर्मणः क्वचित् ।।	४-४-११२६	१-६४
हेतुस्वरूपकार्याणां प्रकाशतमसोरिव । मिथो विरोधतो नातः सङ्गतिर्ज्ञानकर्मणोः ।।	३-३-७०	१-६६

४. नैष्कर्म्यसिद्धौ उदाहृताः उपदेशसाहस्रीश्लोकाः

		नै.श्लो.
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् । एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ।।	१८-१९१	४-३२
अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च । स्यादेतदहमित्यत्र युक्तिरेवावधारणे ।।	१८-९६	४-२२
अविद्याबद्धचक्षुष्ट्वात् कामापहृतधीः सदा । विविक्तं दृशिमात्मानं नेक्षते दशमं यथा ।।	१८-१७५	४-३५
अविविच्योभयं वक्ति श्रुतिश्चेत् स्याद् ग्रहस्तथा । अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि ।।	१८-७८	४-२०
अहंशब्दस्य निष्ठा या ज्योतिषि प्रत्यगात्मनि । सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ।।	१८-१०१	४-२५
एवं विज्ञातवाच्यार्थे श्रुतिलोकप्रसिद्धितः । श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ।।	१८-९९	४-२४
क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति । मृष्टान्नध्वस्ततृड् जानन् नामूढस्तज्जिघत्सति ।।	१८-२३२	४-६६
छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते । तथा शिष्टेन सर्वेण येन येन विशेष्यते ।।	६-१	४-२६
ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः । अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत् ।।	६-४	४-२९
तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम् । अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः ।।	६-२	४-२८
दृश्यत्वादहमित्येष नात्मधर्मो घटादिवत् । तथाऽन्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः ।।	१५-१६	४-३०
नवबुद्ध्यपहाराद्धि स्वात्मानं दशपूरणम् । अपश्यन् ज्ञातुमेवेच्छेत् स्वमात्मानं जनस्तथा ।।	१८-१८४	४-३४

		नै.श्लो.
नाद्राक्षमहमित्यस्मिन् सुषुप्तेऽन्यन्मनागपि । न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति ॥	१८-१७४	४-२३
नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः । वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥	१८-१९०	४-३१
युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः । ममेदं प्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः ॥	१८-९१	४-२१
यो हि यत्र विरक्तः स्यात् नासौ तस्मै प्रवर्तते । लोकत्रयाद् विरक्तत्वात् मुमुक्षुः किमितीहते ॥	१८-२३१	४-६५
विशेषणमिदं सर्वं साध्वलङ्करणं यथा । अविद्याध्यासतः सर्वं ज्ञात आत्मन्यसद्भवेत् ॥	६-३	४-२७
सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् । दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥	१८-१९२	४-३३
सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः । आत्मबोधप्रदग्धं स्यात् बीजं दग्धं यथाऽभवम् ॥	१७-२६	४-४३

५. क्लेशापहारिण्यामुदाहृताः बृहदारण्यकवार्तिकश्लोकाः

(पत्रपार्श्वसंख्या क्लेशापहारिण्याः)

		पत्रपार्श्वम्
अज्ञातत्वं न मानेभ्यो ज्ञातत्वं तत्कृतं यतः । तैरप्यज्ञातता चेत् स्यात् काऽतिशीतिर्मितेर्भवेत् ।।	१-४-२९५	२६, २८४
अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम् । अज्ञानं कारणं तत्र कार्यत्वं परिशिष्टयोः ।।	१-४-१३६८	४६१
अज्ञानं संशयत्वान्नो मिथ्याज्ञानात्तथैव च । तयोस्तत्त्वविवक्षायामज्ञानं तत्त्वमुच्यते ।।	१-४-४४०	२८४
अज्ञानानुपमर्देन व्याकृतिर्याऽस्य जायते । स्वप्नविज्ञानवन्नासौ सत्यमेयव्यपाश्रया ।।	१-२-१३२	१८
अतोऽपुरुषतन्त्रत्वान्नात्मज्ञाने विधिर्भवेत् । अन्वयादिक्रिया त्वस्य तत्तन्त्रत्वाद्विधीयते ।।	२-४-१२१	२७८, ४१६
अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते । पूर्वयोरवधित्वेन तदुपन्यास इष्यते ।।	२-४-२१७	८६, ४१५
अवस्त्वपि च वस्त्वेव वस्तुरूपात्तदन्यतः ।।	१-४-४२८	२८५
अविद्या पूर्ववच्चेत् स्यात् सम्यग्ज्ञातेऽपि वस्तुनि । भूयोऽपि सा मृतेरूर्ध्वं नेष्यतीत्यत्र का प्रमा ।।	....	७०
अविद्यावानविद्यां तां न निरूपयितुं क्षमः । वस्तुवृत्तमतोऽपेक्ष्य नाविद्येति निरूप्यते ।।	सं.वा. १७९	४०७
अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् । अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ।।	१-४-३७१	२८६
आत्मनैवात्मविज्ञानं ज्ञेयज्ञात्रादिवर्जितम् । स्वयमेव फलात्मत्वात्फलं चास्मान्न भिद्यते ।।	१-४-१४०१	२३८
आत्मा कर्त्रादिरूपश्चेन्मा काङ्क्षीस्तर्हि मुक्तताम् ।।	सं. वा. ५५	
आत्मानात्मविभागोऽपि नायमात्मस्पृगीक्ष्यते । अज्ञातात्मैकसाक्षित्वादज्ञानोत्थं न वस्तुगम् ।।	१-४-७२४	२४२

		प.पा.
आम्रे निमित इत्यादि ह्यापस्तम्बस्मृतेर्वचः । फलवत्त्वं समाचष्टे नित्यानामपि कर्मणाम् ।।	सं. वा. ९७	१२४
उक्तं च न्यायमापेक्ष्य नियमोऽत्यन्तदुर्लभः । विधेर्दौर्बल्यसिद्ध्यर्थमतो भाष्यकृदुक्तवान् ।।	१-४-९२१ प्रभृति ९३१ पर्यन्तम्	१३०
(अत्र ज्ञाने विधिः निराकृतः, परिसङ्ख्याविधिरपि निराकृतोऽत्र)		
उपासनं च यत्किञ्चित् विद्याप्रकरणे श्रुतम् । तदप्यैकात्म्यविज्ञानयोग्यत्वायैव कल्पते ।।	सं. वा. ३२९	८६
एकैकरूपासंसर्गबोधमात्रस्वभावतः । विशेषणानां संप्राप्तिर्नाञ्जसी प्रत्यगात्मनि ।।	१-४-१४२६	३०६
एष एवानवगतः स्वतोऽवगततत्त्वकः । एतावन्मात्रसंव्याप्तेरज्ञानादेः पुरा मितेः ।।	१-४-२९३	२८८
ऐकात्म्याज्ञानविध्वंसव्यतिरेकेण नेष्यते । ऐकात्म्यविज्ञानफलं प्राप्तमेव हि तत्स्वतः ।।	२-४-२३५	८५
काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः । या निशा सर्वभूतानामित्यवोचत् स्वयं हरिः ।।	१-४-३१३	४५५
किं भोः सदपि मानेन वस्तु साक्षान्निरस्यते । तस्मिन् निरस्ते किं शेषं यस्मिन् मानस्य मानता ।।	१-४-४२३	२८४
क्लृप्तानामपि रज्ज्वादौ कल्पितान्तरसंश्रयाद् । क्लृप्तान्तरापनुत्तिः स्याद्यथा तद्वदिहात्मनि ।।	२-१-१७५	२०३
चिदाभासैकमात्रेण तमःसिद्धिर्न मातृतः । संवित्तन्मोहचिद्बिम्बैः प्रात्यक्ष्यं कर्तृरूपिणः ।।	३-४-१०५	३४७
जाग्रत्स्वप्नसुषुप्तेभ्यो यदि नामातिरेकतः । व्यक्तिभ्यो गोत्ववद् दृष्टं ब्रह्मत्वेऽस्य किमागतम् ।।	सं. वा. ८५६	३४०
ततः शेषेण वचनाद् तथा तद्य इहेत्यतः । अनारब्धफलेहानां गम्यते संस्थितिस्ततः ।।	सं. वा. ९५	१२३
तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यति ।।	सं. वा. १८३	४०७

		प.पा.
तस्मान्न वास्तवं रूपं तद्ध्वान्ताद्यपनोदकृत् । तस्मिन् सत्येव मोहादि व्युत्पत्तेः प्रागभूद्यतः ॥	१-४-३१४	४०३, ४५१
तस्मिन्नपहतध्वान्तेऽप्यविद्या स्वानुभूतितः । स्वानुभूतिर्न वेद्मीति प्रागैकात्म्यप्रबोधतः ॥	१-४-२१६	२३५
दर्शनस्याविधेयत्वात् तदुपायो विधीयते । वेदान्तश्रवणं यत्नादुपायस्तर्क एव च ॥	२-४-२१३	१८६
ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते । निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ॥	२-४-२३३	८६, ४१६
न च वेदोक्तितो वेदः श्रद्धेयार्थ इहेष्यते । किं त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात् ॥	२-४-३२५	३१७
न चाविद्यासमुच्छित्तिः ज्ञानोत्पत्त्यतिरेकतः ॥	२-४-१९५	८५
न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते । नावेदिषं सुषुप्तेऽहमिति धीः किंबलाद्भवेत् ॥	३-४-१०३	३५१
न भूतकालस्पृक् प्रत्यङ् न चागामिस्पृगीक्ष्यते । स्वार्थदेशः परार्थोऽर्थो विकल्पस्तेन स स्मृतः ॥	१-४-३०१	२१५, ३५८
न संभूय यतः पादास्तैलवर्त्यग्नयो यथा । मितेः स्वरूपलाभाय न तु मेयोपलब्धये ॥	सं.वा. ८११	३८१
न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः । कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥	१-४-३००	३५८
न हि संविदनारूढः प्रमात्रादिः प्रसिध्यति । संविन्मात्रैकयाथात्म्यात् प्रमात्रादेरनात्मनः ॥	१-४-२८२	२८८
न हि स्वभावो भावानां व्यावर्त्येतौष्ण्यवद्रवेः । स्वभावाद्विनिवृत्तोऽर्थो निःस्वभावः खपुष्पवत् ॥	सं.वा. ५६	३८४
नाविद्यास्येत्यविद्यामेवासित्वा प्रकल्प्यते । ब्रह्मदृष्ट्या त्वविद्येयं न कथञ्चन युज्यते ॥	सं. १७६	२६९, ४०२
नास्य स्वापः प्रबोधो वा कुतः स्वप्नस्य संभवः । प्रत्यक्स्वभाव एवास्य जाग्रत्स्वप्नसुषुप्तयः ॥	२-१-२६४	३४४, ३५८

		प.पा.
नाविनश्यन् यतो वह्निर्व्यावर्त्येतौष्ण्यतः क्वचित् । न च कर्त्राद्यनिर्मुक्तौ मुक्तिः संभाव्यतेऽन्यतः ।।	सं.वा. ५७	३८४
नियमार्थो विधिरयमिति भाष्यकृतो वचः । अभ्युपेत्यापि वक्ष्यामीत्येवमेतत् समञ्जसम् ।।	....	१३०
निर्निमित्तं प्रमात्रादेः प्रत्यग्रूपमनात्मनः । सनिमित्तं पराग्रूपमात्मनो मोहहेतुतः ।।	१-४-१४९९	३६१
निवर्त्यभेदाद्भिन्नोऽर्थोऽमानित्वादेर्यथा तथा । ब्रह्माहमर्थयोर्ज्ञेयस्तयोरैकार्थ्यहेतुतः ।।	१-४-१४२९	३०५
निष्क्रियश्चेतनः साक्षी सक्रियोऽचेतनः पराङ् । व्यावृत्तश्च प्रमात्रादेः सिद्धः साक्षी सुषुप्तगः ।।	३-४-१०२	३५१
नेतीत्यस्थूलमित्यादिवाक्याद् योऽर्थोऽवगम्यते । योगिप्रत्यक्षगम्योऽयं न तत् प्रत्यक्त्वहेतुतः ।।	२-४-१७१	१३
नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते । प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ।।	१-४- २९९	३५८, ४५१
पराक्प्रवणया दृष्ट्या धीस्थो ज्ञोऽज्ञानमात्मनि । व्योमकाष्र्ण्यादिवत्तज्ज्ं संभावयति न स्वतः ।।	१-४-२९८	३५८
परागर्थप्रमेयेषु या फलत्वेन संमता । संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ।।	सं.वा. १५९	२३४
पुंव्युत्पत्तिप्रधानत्वादन्वयादेरदोषता । न त्वन्वयादिनैवेह वस्तुतत्त्वस्य संस्थितिः ।।	२-१-१६७	२०३
प्रत्यगज्ञानहेतूत्थशास्त्राचार्यादिसाधनः । तद्विरुद्धमथैकात्म्यं प्रत्यपद्यत मायया ।।	१-४-६०४	३६२
प्रमाणमप्रमाणं च प्रमाभासं च यद्भवेत् । चैतन्याकारमेवैतत्प्रथते सर्वमेव तत् ।।	२-४-१२४	२१७
प्रमाणारूढमेवैतद्धन्त्यविद्याद्यशेषतः । ब्रह्मविद्भिरतो यत्नात्प्रमाणमिह संश्रितम् ।।	१-४-३१५	४०३, ४५१
प्रमाता च प्रमाणं च प्रमेयो निश्चितिस्तथा । यत्सान्निध्यात् प्रसिध्यन्ति तत्सिद्धौ किमपेक्षते ।।	१-४-८७०	२२

प.पा.

प्रमात्रादीह यत्किञ्चित् प्रत्यगज्ञानहेतुकम् ।
अन्योन्यापेक्षसिद्धित्वान्मिथ्या तदपि पूर्ववत् ॥ १-४-४७७ २५१

बाध्यबाधकयोर्यस्मात् संबन्धः सकृदेव तु ।
संबन्धोत्तरकाले तु तत्स्मृत्योरेव संगतिः ॥ ४-४-९१४ प्रभृति ९५८ पर्यन्तम्

(एभिः श्लोकैः बाधिताऽविद्या विद्यां नैव बाधते इति विस्तरशः प्रतिपादितम्)

बाध्यबाधकयोर्योगः स्वशक्त्यनपहारतः ।
योऽन्यथा सङ्गतिं ब्रूते चर्मवद्वेष्टयेत् स खम् ॥ १-४-२५५ ४६१

बाध्याऽविद्या कथं विद्यां बाधिकां बाधते वद ।
दाहकस्य न दाहोऽस्ति वह्नेर्दाह्येन वस्तुना ॥ ४-४-९१६ ३६०

बुद्ध्यादेः प्रविलीनत्वाद्देहादेश्च जडत्वतः ।
लोष्टादेरिव नैव स्यान्नाज्ञासिषमितीक्षणम् ॥ ३-४-१०४ ३५१

ब्रह्माविद्यावदिष्टं चेन्ननु दोषो महानयम् ।
निरविद्ये च विद्याया आनर्थक्यं प्रसज्यते ॥ सं.वा. १७५ २६९, ४०२

भेदसंसर्गहीनत्वात्पदवाक्यार्थतात्मनः ।
दुःसंभाव्याऽत आत्माऽयमात्मनैवानुभूयते ॥ १-४-१४०८ ३०६

मातृमानप्रमेयार्थांश्चागमापायिनः सदा ।
वीक्षते योऽविलुप्ताक्षः स आत्माऽनन्यमानगः ॥ ४-४-४६७ ३२६

मित्युत्पत्तावनुत्पत्तिः विरोधाद्बाध्यते यतः ।
तद्बाधे नाप्यपेक्षाऽस्ति मिथ्याधीबाधनं प्रति ॥ १-४-४३७ २८४

मिथ्याज्ञानं कथं वस्तु न हि मिथ्येति वस्तु सत् ।
मिथ्या तद्वस्तु चेत्युक्तिर्महतामेव शोभते ॥ १-४-४२५ २८५

मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात्सदात्मना ।
अज्ञानस्यापि तेनैव सत्यत्वं केन वार्यते ॥ १-४-४४२ २८६

मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् ।
मूलध्वस्तौ हतं तच्चेन्मिथ्या धीः किं करोति नः ॥ १-४-४३८ २६, २८४

मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् ।
मूलध्वस्तौ हतं तच्चेन्मिथ्या धीः किं करोति नः ॥ १-४-४३८ २६, २८४

		प.पा.
यतोऽनुभवतोऽविद्या ब्रह्मास्मीत्यनुभूतिवत् । अतो मानोत्थविज्ञानध्वस्ता साप्येत्यथाऽऽत्मताम् ॥	सं.वा. १७७	२६९
यत्प्रसादादविद्यादि सिध्यतीव दिवानिशम् । तमप्यपह्नुतेऽविद्या नाज्ञानस्याऽस्ति दुष्करम् ॥	४-३-७४	४०३
थोच्छिन्नात्ममोहस्य निह्नोतुरपि निह्नुतिः । एवं प्रागात्मसंबोधादद्वयैकात्म्यनिह्नुतिः ॥	१-४-३१२	४५५
यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु । कारणेतररूपेण तयोरव्यभिचारतः ॥	१-४-३८६	२६, ४६१
यावत्त्वागमतः सक्षान्न वेत्त्यात्मानमद्वयम् । अन्वयाद्यात्मबोधार्थं तावत्तत्केन वार्यते ॥	२-१-१७३	२०३
विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम् । स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम् ॥	२-४-२३४	८६, ४१६
विद्यमानाप्यविद्येयं विद्यां चेन्नावधीत्पुरा । ध्वस्ता बाधिष्यतेऽविद्या विद्यामित्यत्र का प्रमा ॥	४-४-९१७	३६०
विशेषणानां संबन्धो यतो न प्रत्यगात्मनि । लक्ष्यलक्षणता तस्मात्प्रतीच्यध्यवसीयते ॥	१-४-१४२७	३०६
श्रवणं मननं तद्वत् तथा शमदमादि यत् । पुमान् शक्नोति तत्कर्तुं तस्मादेतद्विधीयते ॥	२-४-१२२	२७८, ४१६
सर्वमात्मेत्यतः पश्येदात्मानात्मविभागवित् । आत्मा द्रष्टव्य इत्युक्त्या ह्येषोऽर्थोऽत्राभिधीयते ॥	२-४-२११	१८६
सुप्तः प्रबुद्ध इत्येवं स्वप्नं पश्यति चेति यः । विकल्प एष भूतानामविद्यारात्रिशायिनाम् ॥	२-१-२६५	३४४
स्मृतिनिश्चितिसंशीतिरागादिदिहिरुगात्मसु । अहंरूपेण योऽन्वेति स प्रमाता परो मतः ॥	३-४-१०६	३४७
स्वतो बुद्धं स्वतः शुद्धं स्वतो मुक्तं निरात्मिका । अविचारितसंसिद्धिरविद्याऽऽलिङ्गते कथम् ॥	४-३-७५	४०३

		प.पा.
स्वतस्तु सत्यता साक्षान्नोभयोरपि विद्यते । अविचारितसिद्धत्वान्न स्वतः परतोऽपि ते ॥ ('सिद्धित्वात्' इति मुद्रितकोशे)	१-४-४४४	२८६
मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् । मूलध्वस्तौ हतं तच्चेन्मिथ्याधीः किं करोति नः ॥	१-४-४३८	,,
अवस्त्वपि च वस्त्वेव वस्तुरूपात्तदन्यतः ॥	१-४-४२८	२८५
न भूतकालस्पृक् प्रत्यङ् न चागामि स्पृगीक्ष्यते । स्वार्थदेशः परार्थोऽर्थः विकल्पस्तेन स स्मृतः ॥	१-४-३०१	३५८

---

६. क्लेशापहारिण्यामुदाहृताः तैत्तिरीयवार्तिकश्लोकाः

		प.पा.
अनात्मेतीह यद्भाति तदविद्याविजृम्भितम् । तस्मादविद्या साप्युक्ता विद्या त्वात्मैकरूपिणी ॥	२-१७८	२३६, २६४, ४५२
आत्माग्रहातिरेकेण तस्या रूपं न विद्यते । अमित्रवदविद्येति सत्येवं घटते सदा ॥	२-१७९	२३६, २४४, २६४
न जानामीत्यविद्यैका नित्या तत्कारणं मता । स्वप्रसिद्ध्यैव सा सिध्येन्निशोलूकीव वासरे ॥	२-१७६	२३६, २६४

---

७. क्लेशापहारिण्यामुदाहृताः उपदेशसाहस्त्रीश्लोकाः

		प.पा.
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् । एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ।।	१८-१९१	१५६
अन्वयव्यतिरेकोक्तिः तद्विवेकाय नान्यथा । त्वंपदार्थविवेके हि पाणावर्पितबिल्ववत् ।।	१८-१८२	१४८
अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम् । अचितित्वस्य तुल्यत्वादन्यस्मिन् ग्राहके सति ।।	१८-७४	४३३
अर्थी दुःखी च यः श्रोता स त्वध्यक्षोऽथवेतरः । अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम् ।।	१८-७६	४३३
अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा । तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशयः ।।	१८-१०३	३६१
अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि । प्रत्ययान्वयिनिष्ठत्वमुक्तदोषः प्रसज्यते ।।	१८-७८	४३३
इदमंशोऽहमित्यत्र त्याज्योऽनात्मेति पण्डितैः । अहं ब्रह्मेति शिष्टोऽशो भूतपूर्वगतेर्भवेत् ।।	६-६	२००
कर्ताऽध्यक्षः सदस्मीति नैव सद्ग्रहमर्हति । सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ।।	१८-७७	४३३
तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः । व्यज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमित्यतः ।।	१८-१८१	१४८
त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । साधनत्वं व्रजत्येव शान्तोदान्तानुशासनात् ।।	१८-२२२	४१७
त्वमित्यध्यक्षनिष्ठतश्चेदहमध्यक्षयोः कथम् । संबन्धो वाच्य एवात्र येन त्वमिति लक्षयेत् ।।	१८-७९	४३४
दुःखी स्याद्दुःख्यहंमानात् दुःखिनो दर्शनान्न वा । संहतेऽङ्गादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ।।	६-९	२१६
दृशिरेवानुभूयेत स्वेनैवानुभवात्मना । तदाभासतया जन्म धियोऽस्यानुभवः स्मृतः ।।	१८-२०५	४५७

		प.पा.
दृष्टं जागरितं विद्यात् स्मृतं स्वप्नं तदेव तु । सुषुप्तं तदभावं च स्वमात्मानं परं पदम् ।।	१७-२५	४४८
नित्यमुक्तत्वविज्ञानं वाक्याद् भवति नान्यतः । वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ।।	१८-१९०	१५६
नौस्थस्य प्रातिलोम्येन नगानां गमनं यथा । आत्मनः संसृतिस्तद्वत् ध्यायतीवेति हि श्रुतिः ।।	५-३	२०८
प्रत्यक्षादीनि बाधेरन् कृष्णलादिषु पाकवत् । अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम् ।।	१८-१८५	३८०
बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते । तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते ।।	१८-६५	१९५
बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः । ग्राहका इव भासन्ते दहन्तीवोल्मुकादयः ।।	१८-७१	४२७, ४३४
यथाऽऽत्मबुद्धिचाराणां साक्षी तद्वत् परेष्वपि । नैवापोढुं न वाऽऽदातुं शक्यस्तस्मात् परेऽह्यहम् ।।	७-२	२१०
यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः । पदार्थज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ।।	१८-२२९	४१७
यद्धर्मा यः पदार्थो न तस्यैवेयात् स कर्मताम् । न ह्यात्मानं दहत्यग्निः तथा नैव प्रकाशयेत् ।।	१६-१३	१६५
युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ।।	१८-९०	४३४
रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः । अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा ।।	१८-४६	४४४
विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः । अशेषबुद्धिसाक्षित्वात् बुद्धिवच्चाल्पवेदना ।।	७-३	२१०, २१३
सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत् । अपेक्षतेऽत एवान्यदवोचाम द्वयं हि तत् ।।	१८-१०	४१४
सदेव त्वमसीत्युक्ते नात्मनो मुक्तता स्थिरा । प्रवर्तते प्रसंचक्षामतो युक्त्यानुचिन्तयेत् ।।	१८-९	४१४

		प.पा.
सम्यक्संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः । एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ।।	१८-१२१	३००
सिद्धो मोक्षोऽहमित्येव ज्ञात्वाऽऽत्मानं भवेद्यदि । चिकीर्षुर्यस्स मूढात्मा शास्त्रं चोद्घाटयत्यपि ।।	१८-२०९	४१३
सिद्धादेवाहमित्यस्मात् युष्मद्धर्मो निषिध्यते । रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ।।	१८-४	३६४
स्वयंज्योतिर्न हि द्रष्टुरित्येवं संविदोऽस्तिताम् । कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम् ।। स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक् ।।	१८-९८	४३६

———

८. प्रमेयाणाम् अक्षरानुक्रमणिका

संकेतविवरणम् - अत्र **स्थूलाक्षरेण** मुद्रापिताः शब्दाः पर्यायाः । विवरणे **कृष्णाक्षरैरंकितः शब्दो** वर्णमालानुसारेण तत्तत्स्थाने अवलोकनीयः, यत्र तद्गतविशेषोऽधिगन्तव्यः इति सूचयति । अत्रत्याः संख्याः, तत्तदध्यायस्य श्लोकानां च सूचकाः । अध्यायसंख्यानन्तरं तिर्यग्रेखा श्लोकसंख्यारम्भसूचिनी । संबन्धोक्तिगता अपि शब्दास्तत्तच्छ्लोकसंख्ययैव संगृह्य सूचिताः ॥

अकर्त्रात्मबोधः - आत्मा न कर्तृत्वस्वभाववान् इति ज्ञानम् । एष वेदान्तिनामेव सिद्धान्तः, मुक्तेः क्रियाभिरेव सिद्धिः - इत्याद्यभ्युपगन्तृभिर्नाङ्गीक्रियते ॥ १-८१.

अकारक (ब्रह्मात्मा) - कर्तृकर्मादिविभागरहितो ब्रह्मात्मा । अकारकब्रह्मात्मवित् न विधिचोद्यः ; अकारकभूमात्मैव सर्वेषामात्मा । अवगतिरूपत्वात् आत्मा अकारकः ॥ १-५७, २-५७, ११३.

अक्रमदृक् - आत्मा बुद्धिवृत्तीः सर्वा युगपदेव पश्यतीव, न तु यथा बुद्धिर्विषयान् क्रमेण पश्यति तथा ॥ २-६९, ८२.

अक्षजम् - प्रत्यक्षम् । प्रत्यक्षवाक्यजन्यज्ञानयोर्न विरोधः ॥ ३-८४

अग्रहणम्, अनवबोधः - ग्रहणाभावलक्षणा **अविद्या, अज्ञानम्** । द्वैतं प्रति कारणम् अन्यथाग्रहणवत्, अन्यथाग्रहणबीजमपि अनात्मधर्मः, नात्मधर्मः ॥ ४-४५.

अङ्गम् - गुणभूतम् । आत्मज्ञानं न कर्मणोऽङ्गम्, प्रधानं वा, १-६१, ६४, ६५, ७९ ; कर्मप्रकरणे स्थितम् कर्मकारकादिज्ञानं कर्माङ्गं भवेत्, १-६३.

अङ्गाङ्गिभावः - ज्ञानस्य कर्माङ्गत्वम्, कर्मणो वा ज्ञानाङ्गत्वं भवेत् इति मीमांसकानुगामिनः । १-२० ; तत्र कर्त्रात्मज्ञानम् उपासनं वा ज्ञानशब्दवाच्यम्, न त्वात्मज्ञानम् ॥

अचोद्यस्वाभाव्यम् - अनियोज्यस्वभावत्वम् । क्रियाकारकफलरहितब्रह्मात्मनि परिसमाप्तज्ञानस्य अचोद्यत्वात् कर्मविधीनां कुण्ठता ॥ १-५७.

अज्ञातज्ञापनम् - विषयाणाम् अज्ञातानां प्रमाणैर्ज्ञापनं भवेत् । आत्मनस्तु नित्यावगतिरूपत्वात् नैतस्मिन्विषये अज्ञातज्ञापनम्, किं तु अविद्यानाशमात्रं फलमित्युपचर्यते ॥ २-१०५.

अज्ञानम् - ज्ञानाभावः । अज्ञानम्, अग्रहणम्, अनवगमः, अनवबोधः, अप्रतिपत्तिः, अप्रबोधः अविद्या, तमः, ध्वान्तम्, भ्रान्तिः, मोहः इति पर्यायाः । वार्तिकप्रस्थाने ज्ञानप्रतिषेध एव मुख्यवृत्त्या अज्ञानशब्दवाच्यः, ३-१ । अत्र भूमिका द्रष्टव्या । अज्ञानमात्माश्रयम्, आत्मविषयं च, ३-१ ; नित्यसुखरूपमात्मानं पिधाय (१-१, ७०) मिथ्याद्वैतं विक्षिपत्यज्ञानम् ; तथा च सर्वानर्थकारणमिदम् (अवतरणिका) ; अज्ञाननाश एव मुक्तिः, १-७, १-२४ ; अज्ञानसमुत्थं कर्म न तन्नाशकम्, ज्ञानमेव तु, १-३५, ३७ ; अज्ञानं यद्यप्यभावरूपम्, तथा च न तस्य संसारकारणत्वमुपपद्यते, तथाप्यज्ञातार्थस्य अनर्थहेतुत्वमुपपन्नम्, ३-७ ; अज्ञानं सुषुप्तेऽप्यस्ति, ३-५८ ; अज्ञानविद्वत्तौ ज्ञानस्य साधकतमत्वम्, १-५४ ; उत्पन्नमात्रमेव ज्ञानमज्ञाननिवर्तकम्, १-५४, ६५, ६७.

अज्ञानविजृम्भितम् - अज्ञानविजृम्भितम्, अज्ञानोत्थम्, अज्ञानोपादानम्, अज्ञाननिमित्तम् इति पर्यायाः । अहङ्कारोऽज्ञानविजृम्भितः, २-४६ ; बुद्ध्यादेः कर्तृत्वम् अज्ञानोत्थम्, २-५८ ; बुद्धिरज्ञानोपादाना, ३-१५ ; अत्र बुद्धेरुपादानकारणम् अज्ञानम् इति तु न भ्रमितव्यम् ।।

अज्ञोऽस्मि - अज्ञोऽस्मीत्येव अनुभवात् अज्ञानमात्माश्रयमेव, आत्मविषयकमेव च ; अत्राश्रयाश्रय्यादिविभागोऽपि अज्ञाननिमित्तः, ३-१ (क्लेशापहारिणी) ।।

अतीन्द्रियविषयम् - वाक्यम् अभिधाश्रुतिरपि अतीन्द्रियविषयत्वात् प्रमाणम् ३-४७ ।।

अत्यन्तोच्छित्तिः - आत्मानवबोधस्य अत्यन्तोच्छित्तौ अशेषपुरुषार्थसिद्धिः (अव.) ।।

अद्वयम्, अद्वितीयम् - द्वितीयरहितम्, अद्वयं ब्रह्म विविधं विकल्प्यते, २-९३ ; आत्मनोऽद्वितीयत्वम् आत्मत्वादेव सिध्यति, आत्मनो हि द्वितीयो मिथ्यानात्मैवेति, २-९६ ; तत्त्वमसिवाक्ये तत्पदस्यार्थोऽद्वितीयचैतन्यमेव, तच्चात्मानं विना न संभवति, ३-७६ ; तेनार्थेन संपृक्तस्त्वमर्थो नानात्वं मुञ्चति, ३-७८.

अद्वेष्टृत्वादिसाधनानि - भगवद्गीतास्वनुक्रान्तानि । तद्वानेव आत्मज्ञानेऽधिकारी, ४-६८ ; ज्ञानिनस्तु ते गुणाः स्वभावत एव लक्षणानि, न तु साधनरूपिणः, ४-६९.

अद्धातमम् (प्रमाणम्) - तत्त्वमसिवाक्यम् । स्पष्टतमं प्रमाणं वेदान्तवाक्यम् अनाद्रियमाणानां आत्मज्ञानं नैवोदीयात्, ३-११७.

अध्यारोपणम् - विकल्पनम् । बुद्ध्यादीन् आत्मनि विकल्प्य अज्ञः प्रवर्तते, १-६०.

अध्यासः - (१) कल्पनम्, अध्यारोपणम् । अनात्मरहिते आत्मनि अनात्माध्यासः,

तन्निषेधश्च सूर्ये अन्धकाराध्यासनिषेधाविवैव २-११७ ; रागद्वेषयोः शुभाशुभाध्यासनिबन्धनत्वम् (अव.) ; मूढो देहादीन् आत्मनि अध्यस्य विचेष्टते, १-५९ ; बुद्धेः सुखित्वादीन् आत्मनि, आत्मीयं च चैतन्यं कर्तरि अध्यस्यन्ति ; (**इतरेतराध्यासशब्दं** पश्यत) ।।

(२) अध्यस्तपदार्थोऽपि **अध्यासशब्दवाच्यः**, सर्वोऽपि संसारः आत्मनि मिथ्याध्यास एव, २-११६.

अनन्वयः - अन्वयविपरीतः, व्यतिरेकः । अहङ्कारो नात्मधर्मः, अनन्वयात्, २-३२.

अनभिधेयः - षष्ठीगुणक्रियाजातिरूढीनां शब्दप्रवृत्तिनिमित्तानाम् अभावात्, आत्मा केनापि शब्देनानभिधेयः, ३-१०३ ; अनभिधेयेऽप्यात्मनि अविद्यानिराकरणमुखेन शब्दः प्रमां जनयति, ३-१०५, १०६.

अनर्थः - संसारः । अज्ञानादेव अनर्थः ; मिथ्याज्ञानमात्रनिबन्धन एव संसारानर्थः - इति **सांख्यमतं** न साधु, ३-६.

अनवगमः - अज्ञानम् । बुद्ध्यादीनामनात्मत्वं स्वयमनवगमात्मत्वात्, अनवगमात्मकत्वं च मोहमात्रोपादानत्वात्, २-९९ ; अत्र मोहमात्रोपादानत्वं नाम अज्ञानमात्रस्वरूपत्वम् (क्ले.) ।।

अनवबोधः - **अज्ञानम्** । अनवबोध एव अनर्थहेतुः (अव.) स एव कर्मप्रवृत्तिहेतुः, १-३० ; अपुरुषतन्त्रं (वस्तुतन्त्रमेव) ज्ञानं एतन्नाशकृत् । (**पुरुषतन्त्रशब्दं** पश्यत) कूटस्थात्मप्रज्ञान- मात्रशरीरप्रतिबिम्बिताविचारितसिद्धात्मानवबोधाश्रय एव संसारः, २-९७ ; प्रत्यगात्मानवबोधस्य अनात्मस्वाभाव्यम्, ३-२९ ; प्रत्यगात्मनो दुःखित्वे सद्वितीयत्वे च हेतुरात्मानवबोध एव, ३-७७, ७८ ; उत्पन्नात्मबोधस्यापि रागद्वेषादयोऽनवबोधोत्थाः प्रत्यया आविर्भवन्तीति शङ्का न साध्वी, १-३८.

अनधिगतवस्तुपरिच्छेदः, अज्ञातज्ञापनम् - यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवम् ऐकात्म्यवाक्यानामपि अनधिगतवस्तुपरिच्छेदसाम्यात्, १-९१ ; आत्मनोऽवगत्येकरूपत्वात्, न तत्रानधिगताधिगमः प्रमाणफलम्, अविद्यानाशमात्रं तु, २-१०५.

अनागमापायि - आगमापायरहितं सुखम् आत्मस्वरूपमेव, (अव.) ।।

अनागमिक (प्रमाणानि) - वेदान्तेतरप्रत्यक्षादिप्रमाणानि, (अव.) ।।

अनात्मकम् - सारभूतस्वरूपरहितं द्वैतम्, २-४४.

अनात्मा - नात्मा, बुद्ध्यादिदेहान्तः, २-१५, १९ ; अनात्मा नाज्ञानस्य आश्रयः, विषयो वा, अज्ञानस्वरूपत्वादिहेतुभ्यः, ३-१ ; अनात्मभूतं द्वैतेन्द्रजालम् आत्मानवबोधोत्थम्, २-११२ ; अनात्मभूता बुद्धिवृत्तयो घटादयश्च नित्यसिद्धसंविदाश्रयेणैव सिद्ध्यन्ति, २-११५ ; अनात्मा आगमापायी, ३-२२ ; देहस्यानात्मत्वम्, २-१९, २० ; सूक्ष्मदेहस्याहंममत्वादेरनात्मत्वम्, २-२२, २३, २४ ; ३-५६ ; आत्मानात्मविवेको बुद्धावेव, ४-१४ ; बुद्ध्यादेरनात्मत्वं निश्चितवतोऽपि न मनःसमाधानम्, ४-९, १०.

अनादिः - संसारस्य अनादित्वात् पूर्वोपचितानां कर्मणाम् इयत्ता नास्ति, १-८१.

अनारब्धफलम् - अनारब्धफलस्याशुभस्य कर्मणः प्रायश्चित्तैर्निवृत्तिः, १-८१.

अनुदितानस्तमितः - अनुदितानस्तमितकूटस्थविज्ञानमात्रस्वरूपम्, २-९७, ३-५७, १११, ११३, ११६ ; अनुदितानस्तमितविज्ञानरूपेऽप्यात्मनि अविद्या, ३-११६.

अनुभवः - आत्मानुभवसिद्धा अविद्या, १-७ ; न वयं प्रमाणबलेन ऐकात्म्यं प्रतिपद्यामहे, ऐकात्म्यस्य स्वत एव अनुभवमात्रात्मकत्वात्, १-८९ ; आत्मनोऽनुभवस्वरूपत्वात्, तार्किकाणां सर्वेषामप्यनुभवमात्रशरणत्वात्, अनुभवस्वरूपबोधकवेदान्तसिद्धान्ते नाविश्वासकारणम्, २-५९ ; अनुभवमात्रस्वरूपोऽयमात्मा धीव्यञ्जक इत्युपचर्यते, २-६६ ; अनुभवमुत्पादयदपि वाक्यं नोत्पादयतीति न शक्यं वक्तुम्, ३-११८ ; यत्र वाक्यतोऽनुभवो न स्यात् तत्र विधिः कल्प्यः, ३-११९ ; बुद्ध्यादीनां सिद्धिरनुभवफलमपेक्षते, अनुभवरूपत्वादात्मा स्वसिद्धौ न किमप्यपेक्षते, १-९८ ; अनुभवैकरूपत्वात् अविद्यानाशमात्रमेव त्वात्मविषये फलमित्युपचर्यते, २-१०५..

अनुमानम्, अनुमितिः - **अन्वयव्यतिरेकन्यायः** । अनुमानादौ, 'नाहं बुद्ध्यादिः' इति अभावबुद्धिरुदेति, तस्या अपि निवृत्तिरनुमानेनैव न भवति, वाक्यादेव तु, ३-११३, ११४, ११५ ; अहंप्रत्ययग्राह्यम् आत्मनः प्रत्यक्षरूपमपि, भ्रान्तिरेव २-२४ ; प्रत्यक्षस्य पराक्त्वात् प्रत्यक्षोपजीव्यनुमानेनापि नात्मानुभवो भवेत्, ३-५१.

अनैकान्तः - अनियतो हेतुः । वाक्यश्रवणादेव ज्ञानमिति नानैकान्तिको हेतुः, २-४ ; अहं ब्रह्मेति श्रुतेरहमोऽनात्मधर्मत्वम् इति अयुक्तम् इति चेत् । न । 'गौरोऽहम्' इत्यनात्मसंबन्धस्यापि दृष्टत्वात् अहंसामानाधिकरण्यम् अनैकान्तिको हेतुः, २-२८.

अन्तःकरणम् - अविद्योत्थस्य अन्तःकरणस्य बाह्यविषयावच्छेदाय अहंवृत्तिर्व्याप्रियते, ३-६० ; अन्तःकरणमज्ञानस्य व्यञ्जकम्, ३-५८.

अन्तर्बाह्यनिमित्तभेदः - अज्ञानलक्षणान्तरनिमित्तेन इदंज्ञानं भवति, उपक्रियापक्रियमाणस्यैव ज्ञातुर्विषये ममप्रत्ययो भवति, ३-६१.

अन्यथाग्रहणम् - अग्रहणमेवास्य बीजम्, ४-४०, ४३ ; अग्रहणम् अन्यथाग्रहणं चेत्युभे अपि अनात्मधर्म एव, ४-४५.

अन्वयव्यतिरेकौ - अन्वयव्यतिरेकन्यायः श्रुत्यनुगृहीतः । वाक्यस्थपदतदर्थौ ऋते अन्वयव्यतिरेककथा नास्ति । अन्वयव्यतिरेकाभ्यां विना वाक्यार्थबोधनं नास्ति, २-८, ९ ; बुद्ध्यादिकर्तृत्वमाश्रित्य अहङ्कारादेरनात्मत्वं द्रष्टृदृश्यान्वयव्यतिरेकन्यायेनावसेयम्, अविद्याकल्पितं साक्षित्वमाश्रित्य साक्षिसाक्ष्यान्वयव्यतिरेकन्यायेन कर्तृत्वादिपरिणामप्रतिषेधः कार्यः, २-५८ ; ग्रहीतृग्रहणादिरूपस्य संसारस्य अनात्मत्वे निश्चित एव वाक्यार्थज्ञानम्, २-९७, ३-५४ ; अन्वयव्यतिरेकन्यायो विधिपरिप्रापितः, ३-४.

अन्वेषणासहिष्णुत्वम्, अविचारसिद्धत्वम् - निरालम्बत्वादविद्या न विचारसहा, ३-६६.

अपरतन्त्रम् - स्वतन्त्रं सुखम् आत्मस्वरूपमेव, तस्य च, अनवबोध एव पिधानम् (अव.)

अपरिणामी - परिणामिबुद्धीनाम् अक्रमदृक् अविकारी आत्मा, २-८३.

अपविद्धद्वयः - नित्यनिरस्तद्वैतोऽप्यात्मा वाक्यज्ञानं विना नात्मानं वेत्ति, दशमवत्, ३-६५.

अपहारः - यथा सूर्यस्य स्वरूपं जलपात्रैः नापह्रियते, न च तत्क्रिया - तदाकृति - तद्देशावाप्तिः, एवं चिदाभासयुक्तैर्बुद्धिभिर्न स्वरूपमात्मनोऽपह्रियते न च तत्क्रियादिमत्त्वमापाद्यते, २-४९.

अपूर्वविधिः - अप्राप्तस्य विधानम् । 'आत्मेत्येवोपासीत', 'आत्मा वा अरे द्रष्टव्यः' - इत्यादीनां न ज्ञानविधित्वम्, अपुरुषतन्त्रत्वात् ज्ञानस्य ; विध्यभ्युपगमेऽपि, अयं नियमविधिरिति परिसंख्याविधिरिति वा भवेत् , यस्मात् अनात्मापह्नवेनैव परमात्मोपासनं दर्शनं वा कार्यमित्युच्यते श्रुत्या, १-८८.

अप्रतिपत्तिः - अज्ञानम्, ऐकात्म्याप्रतिपत्तिरेव संसारकारणम्, अविद्या, १-७.

अप्रबोधः - अज्ञानम् । आत्माऽप्रबोधोऽतिदुःस्थः - यतः प्रतिबुद्धत्वमेवात्मनः स्वरूपम् - वाक्यज्ञाननिमित्तमात्राद् व्येति, ३-११०.

अप्रमोत्थम् - अज्ञानकार्यम् । अज्ञानजनितं मिथ्याज्ञानं सम्यग्ज्ञानेन बाध्यत इति प्रसिद्धं लोके ; तस्मात्, आत्मज्ञानेन आत्मविषयं मिथ्याज्ञानं बाध्यत इति युक्तमेव, २-१०४.

अप्रामाण्यकारणम् - अनुक्त-संशयितोक्त-दुरुक्तानि वाक्यस्य अप्रामाण्ये कारणम् १-५ ;

श्रुतौ अप्रमाण्यकारणं नास्ति, ३-३५..... ३८ ; श्रुतेरप्रामाण्यकारणाभावात् न ज्ञानार्थं साधनान्तरं मृग्यम्, ३-११७....११८.

अभिधानाभिधेयसंबन्धः - वाच्यवाचकसंबन्धः । आत्मनि शब्दप्रवृत्तिनिमित्तानामभावात्, नाभिधानाभिधेयसंबन्धेन तं श्रुतिर्वक्ति, ३-१०४ ; असत्यमाश्रित्यैव सुप्तबोधकवाक्येनेव शब्दार्थसंबन्धाभावेऽपि आत्मा इति कारणादेव श्रुत्या तं विद्मः, ३-१०४, १०५, १०६.

अभिधाश्रुतिः - वस्तुबोधकं वाक्यम् । तत्त्वमस्यादिवाक्यैः परमात्मतत्त्वं प्रतिपत्तुं न शक्यते, अभिधाश्रुतित्वात् तेषाम् ; अभिधाश्रुतेश्च प्रमाणान्तरापेक्षाध्रौव्यात् इति शङ्का न समीचीना । अभिधाश्रुतेरपि तत्त्वमसिवाक्यस्य सुप्तपुरुषप्रबोधकवाक्यवत् प्रामाण्योपपत्तेः, ३-४७.

अभूतप्रादुर्भावः - वाक्यस्य आकाङ्क्षापरिपूर्तये अभूतप्रादुर्भावफलैव क्रिया अभ्युपगन्तव्येति न नियमः । अविक्रियस्य, अद्वैतस्य स्वयंप्रकाशस्य आत्मनो विजिज्ञापयिषितत्वात् वेदान्ते 'असि', 'अस्मि' - इत्यादिक्रियापदम् अभ्युपगतमस्त्येव, १-९७.

अभूताभिनिवेशः - द्वितीये पदार्थे असत्यपि अनात्मवित् अविद्यमानाभिनिवेशः आत्मानं वञ्चयति, २-५१.

अमानित्वादीनि - भगवद्गीतासु त्रयोदशाध्याये परिपठितानि ज्ञानसाधनानि । अमानित्वादिनिष्ठ एव ज्ञानाधिकारी, अतः ग्रन्थमुपादित्सुस्तं गुणगणमभ्यसेत्, ४-६८, ७०.

अलेपकपक्षः - ज्ञानी यथेष्टाचरणोऽपि न तत्फलेन लिप्यते इति वादः । तन्निरासः, ४-६२....६७.

अलौकिकम् - यदि निवृत्तिशास्त्रं नाभ्युपगम्यते, तदा हताः स्युः कर्मत्यागिनः, अलौकिकप्रमाणोपात्तकर्मत्यागात्, १-२९.

अवगतिः - अनुभवः । प्रतिविषयं बुद्धयो भिद्यन्ते, अवगतिस्तु न भिद्यते, यतस्ताः सर्वा बुद्धयश्चिन्निभा एव, २-८६ ; साहङ्कारं विश्वम् आगमापायि, अवगतिरूपात्मनस्तु न भेदस्पर्शः, २-९५ ; अवगत्येकरूपत्वात् आत्मनः, तदविद्यानाशमात्रं तु ज्ञानफलम्, नाज्ञातज्ञापनम्, २-१०५ ; द्वैतस्य स्वयं वा अवगतिरूपेण वा नानात्वं न सिद्धम्, २-११२, ११३ ; अवगतिरूपे आत्मनि संशयावकाशो नास्ति, ३-३७ ; नित्यावगतिरूपत्वत् आत्मा बाह्यविषयैः प्रत्यक्षाद्यैर्न प्रमीयते, ३-४७, ४८ ; अवगतिरूपस्यात्मनो दुःखित्वं चेत्, आत्मवदेव न प्रमीयेत, ३-८७ ; अवगत्यन्तः प्रत्ययो येनाभाति, स म आत्मा इति वाक्यज्ञानम्, ३-४६ ;

अवगतौ सत्यामपि वाक्यम् अप्रतिपादकमिति चेत् न कुतश्चन प्रमाणात् प्रतिपत्तिः स्यात् ३-११८.

अवबोधः - ज्ञानम् । प्रमाणानि स्वत एवार्थावबोधनं कुर्वन्ति, नेतरेतरसाचिव्येन, ३-८६ ; त्वमर्थावबोधाय विधिरप्याश्रीयते, ३-१२६.

अवभास्यावभासकः संबन्धः - ज्ञात्रहन्तयोरेष संबन्धः, ३-६०.

अवस्तु - कल्पितानाम् अवस्तुत्वात् विरुद्धधर्माणामपि कल्पितानाम् एकत्र संभवः, २-५० ; अज्ञानस्याभावत्वात् अवस्तुत्वम्, तस्य च संसारकारणत्वं नास्तीति शङ्का न युक्तम्, अज्ञातस्यैव सतः कारणत्वाभ्युपगमात्, ३-७.

अवाक्यार्थः - वाक्याविषयः आत्मा । यदा तत्पदार्थः त्वमर्थे अवैति, तदा अवाक्यार्थतां प्रतिपद्यते, ३-२ ; वाक्यादेव अवाक्यार्थप्रतिपत्तिः, ३-३, ३-९, ३-३९.

अविकारि, अविक्रियम् - आम्रादिवन्न परिणामि ब्रह्म, किं तु अविकारि, २-३४ ; अविक्रियस्याप्यात्मनो भोक्तृत्वं भ्रान्त्या, २-६३ ; अविक्रिय एवात्मा परिणामिनीं बुद्धिं विषयीकरोति, २-७१, ७७ ; आत्मचैतन्येनाव्याप्तः प्रत्ययो नास्ति बुद्धिप्रत्ययः, इत्यतोऽविकारी सः २-८३ ; आत्मनोऽवगतिः अविकारा, २-१११ ; नित्यामात्मनः संविदमाश्रित्य धियो बोधाः सिध्यन्ति, २-११५ ; सामान्यविशेषाभ्यां व्युत्थायापि अविकारी आत्मा, ३-१७.

अविचारितसिद्धम् - अविचारसिद्धम्, विचारासहम् । द्वैतवस्तु अविचारसिद्धम् (अव.) ; आत्मानवबोधोऽविचारितसिद्धः, २-९७ ; अविचारितप्रसिद्धा अविद्या, ३-११३.

अविद्या - अज्ञानम् - ऐकात्म्याप्रतिपत्तिलक्षणा अविद्यैव संसारबीजम्, १-७ ; आत्मज्ञानं शास्त्रशिष्याचार्याद्युपादायैव आत्मानं लभते, नोत्पन्नं सत् अविद्यानिवृत्तौ किमप्यपेक्षते, १-३६ ; नाविद्या विद्यां बाधते, तद्वासनास्तु विद्यास्मृतिमुत्पादयन्ति, १-३८ ; अविद्यान्वये संसारस्याप्यन्वयः, १-३९, ४१, ४२ ; कर्म तु पारम्पर्येण अविद्यानिवृत्तये, १-५२ ; विद्याविद्ययोर्विरोधः, १-५६ ; विद्या आत्मलाभमात्रेणाविद्यां निहन्ति, १-६४, ४-५७ ; अविद्ययैव देहस्यात्मत्वम्, २-१२ ; आत्मा भेदरहितः, अनात्मा तु भेदवान् - इति विभागोऽपि अविद्ययैव, ३-६ ; निरालम्बनादविद्या न विचारसहा, ३-६६ ; कूटस्थबोधरूपेऽप्यात्मनि अविद्याप्रसिद्ध्यैवाविद्या, ३-१११ ; ज्ञानरूपेऽप्यात्मनि अविद्यायाः संभावनापि नास्ति, ३-११२ ; अविद्यानिद्रया प्रसुप्तः श्रुत्यैव प्रतिबोध्यते, ३-११५ ; कुतोऽविद्या ? - इति चोद्यम् अविद्यावस्थायां तदुच्छित्तेरूर्ध्वं वा न संभवति, ३-११६.

अविद्याकामकर्माणि - संसारकारणानि, १-४२.

अविद्याकार्यम् - प्रवृत्तिनिवृत्ती अविद्याकार्यमेव, ४-६९.

अविद्याकृतम्, अविद्याकल्पितम्, अविद्योत्थम्, अविद्याकार्यम् । देहादावात्मत्वम् अविद्याकृतम्, ३-२९ ; साक्षित्वम् अविद्यापरिकल्पितम्, २-५८ ; अन्तःकरणम् अविद्योत्थम्, ३-६० ; अविद्योत्थापितं कर्तृत्वादि, ३-७३ ; आत्मानात्मविभागोऽविद्योत्सङ्गवर्ती, २-१०३ ; आत्मज्ञानमपि अविद्योपदानम्, १-३६ ; अविद्योपाश्रय एव आत्मानात्मनोरितरेतराध्यासः, २-१०१.

अविद्याग्रन्थिः - ग्रन्थिवद् दृढीकृतो मिथ्याज्ञानवासनाराशिः ; सद्गुरोस्तद्भेदनसामर्थ्यम्, १-२.

अविद्यानिवृत्तिः, अविद्योच्छेदः - विद्यया निरपेक्षया अविद्यानिवृत्तिः १-३६ ; वाक्यार्थज्ञानादविद्योच्छेदः, १-५२.

अलुप्तसाक्षी - आत्मनः सदाविलुप्तसाक्षित्वं स्वतःसिद्धम्, २-३६ ; अलुप्तदृष्टेरात्मनो न दृश्यत्वम्, २-४१ ; अविलुप्तैकदर्शनः सर्वधियां वृत्तीर्विक्षते, २-५८.

अव्यभिचारि - बाधविधुरम् । सर्वस्मिन् व्यभिचारिणि आत्मवस्त्वेव अव्यभिचारि, २-७५,७९.

अव्यभिचारिप्रामाण्यम् - अव्यभिचारिप्रामाण्यवाक्योपात्तत्वात् प्रत्यक्षसिद्धदुःखित्वबुद्धेरपि तत्त्वमस्याद्युत्थप्रत्यय एव बलीयान्, ३-९४.

अशेषपुरुषार्थः - अनर्थनिवृत्तिः, अर्थप्राप्तिश्च ; मोक्षः । अज्ञानोच्छित्तौ भवति (अव.) ॥

असंसर्गः - असंबन्धः । वेदान्तवाक्यजनितं अहं ब्रह्म - इति ज्ञानं संसर्गात्मकत्वात् न यथार्थम्, तदेव अभ्यस्यतः असंसर्गात्मकं विज्ञानं जायते इति मतं न सम्यक् १-६७, ३-९ ; वेदान्तवाक्ये तत्त्वमर्थयोरसंसर्गः, ३-७६.

असत् - अभावरूपम् । अनुभवात्मनोऽपि विक्रियाभ्युपगमे, अनित्यः स्यात् आत्मा, अनभ्युपगमे असत्समः स्यात् - इति न सम्यक् ; भ्रान्त्या भोक्तृत्वोपपत्तेः, २-६०, ६३ ; ज्ञानात् पूर्वम् अन्यदेहोत्थं दुःखं नास्ति, ज्ञानादूर्ध्वं तु स्वगतमपि असत्, २-९०.

असल्लिङ्गम् - असद्रूपात् लिङ्गात् बाष्पादेः अग्न्यनुमानं नास्ति ; तस्मात् नासत्यात् सत्यप्रतिपत्तिर्भवेत् इति चोद्यं न सम्यक् । उपायस्य सदसद्भ्यां भिन्नत्वोपलब्धेः, ३-१०८, १०९.

अस्यस्मीत्यादिक्रिया - पदानि क्रियापदं मुक्त्वा न संहन्यन्ते, अतः आत्मज्ञानविधायकं वाक्यं नास्तीति विधिवादिनां मतं न साधु, क्रियापदं विनापि वाक्यं समस्त्येव ; अभ्युपगम्यापि क्रियाकाङ्क्षाम् 'असि', 'अस्मि' इत्यादिक्रियापदम् वेदान्तिभिरप्यभ्युपगम्यत एव, १-९७.

अहम् - (१) अहंप्रत्ययगम्य एवात्मा इत्यभ्युपगच्छतामपि मीमांसकानां मते वेदान्तसिद्धान्ते इव कर्मसु प्रवृत्तिर्नोपपद्यते, १-९२, ९३, ९४, ९५.

(२) अहङ्कारो नात्मधर्मः, कर्मत्वेनोपलभ्यत्वात्, अपायित्वात्, स्वात्मन्येव कर्मकर्तृत्वानुपपत्तेश्च, २-२२ .... २६ ; 'अहं ब्रह्म' इति वाक्यप्रमाणात् आत्मधर्मो न भवत्यहङ्कारः, 'गौरोऽहम्' इत्यपि वाक्यप्रयोगदर्शनात्, २-२८ ; अहङ्कारो नात्मधर्मः, मुक्तिसुषुप्त्योर्नास्तित्वात्, २-३२ ; अहंपदेन ब्रह्म लक्ष्यते, २-५४, ५६ ; ३-१०२ ; अहङ्कारादिः कल्पित एवात्मनि, आत्मनः पृथग्वा आत्मरूपेण वा असिद्धेः, २-४५ ; अहमः द्रष्टृत्वेन दृश्यत्वेन च प्रतीतेः, तस्मिन्नात्मत्वभ्रान्तिः, २-४६ ; अहङ्कार एव मूलम् अनर्थस्य आत्मानात्मोपरागात्, २-५३ ; अहङ्कारभेदादेवात्मनि भेदबुद्धिः २-४७ ; अहङ्कारनाशे आत्मनोऽद्वैतत्वम्, २-५३ ; आगमापायित्वात् मिथ्यात्वमस्य, २-९५ ; अहंबुद्धेः अहंप्रत्ययगम्यदुःखिनश्च सकाशाद् व्यतिरिक्त आत्मा, २-१०० ; अहंज्ञात्रोः ज्ञेयज्ञातृत्व-संबन्धः, ३-५९ ; अहंप्रत्यगात्मनोः लक्ष्यलक्षणसंबन्धः, रज्ज्वाः सर्पवत् अहं लक्षणं भवेत्, ३-२३, २७.

अहंममत्वयत्नेच्छाः - अनात्मान एते, विषयत्वात्, आगमापायित्वाच्च, २-२२ ; अहंममत्वयोरात्मनि सर्वदा नास्तित्वं श्रुतिवाक्यात् ज्ञायते, २-११७.

अहंव्याजः - अहंव्याजेन परमात्मैव 'अहं ब्रह्मास्मि' इति वाक्येन बुबोधयिषितः ३-४१ ; अहंकारः स्वरूपलयेन ब्रह्मावगमे कारणम्, ३-४३.

आ

आगमः - शास्त्रम्। वेदान्तागमवाक्यादेव सम्यग्ज्ञानम् (अव.) ; आगमज्ञानम् उत्पन्नमात्रमेवाज्ञानं निरस्यति, नाभ्यासं तस्यापेक्षते, १-६७ ; अहङ्कारादिद्वैतस्य आत्मन्यसत्त्वे आगमोऽस्ति, २-४२, ४३ ; प्रत्यक्षागमयोर्विरोधो नास्ति, तत्रैकस्य प्रमाणत्वे इतरस्याभासमात्रत्वम्, ३-८५ ; लौकिकम् आगमिकं वा सम्यग्ज्ञानम्, न प्रवृत्तिनिमित्तम्, १-२९.

आगमापायि - अहङ्कारो यद्यात्मधर्मः, तर्हि तस्यागमापायित्वात् आत्मनोऽनित्यत्वं प्राप्नोति, २-३५ ; आगमापायित्वादेव अहङ्कारादि मिथ्यास्वभावकम्, २-९५ ; दृश्यत्वागमापायादिधर्मैः शरिरेन्द्रियमनोनिश्चयादिवृत्तीनामनात्मतया व्युदासः कर्तव्यः,

३-५६ ; आगमापायहेतुभ्याम् अनात्मनो निरस्य, वाक्यमज्ञानं हन्ति, ३-२२ ; द्रष्टृदृश्यविभागेन आगमापायिसाक्षिविभागेन च द्वेधा अन्वयव्यतिरेकन्यायः प्रवर्तते, ३-५४ ; द्रष्टृदर्शनदृष्यानां जाग्रत्स्वप्नसुषुप्तेषु आगमापायदर्शनात् यत्साक्षिकौ तौ आगमापायौ स एव आत्मा इति प्रतिपत्तिः लिङ्गाधीनत्वात् न साक्षात्प्रतिपत्तिः, ३-५७.

आगोपालाविपालपण्डितम् - अज्ञानं प्रमाणजन्यज्ञानेन बाध्यत इति आगोपालाविपालपण्डितप्रसिद्धम्, २-१०४ ; सुषुप्ते निर्विकल्पकं वस्त्वस्तीति सर्वेषां सिद्धमित्यसत्, यस्मात् तत्र आत्माऽनवबोधोऽस्ति, ३-५८.

आत्मप्रज्ञानमात्रशरीरप्रतिबिम्बितम्, आत्मचैतन्यप्रतिबिम्बितम् - आत्मन्यध्यस्तः ग्रहीत्रादिः संसारः न साङ्ख्यानामिव प्रकृतिव्यपाश्रयः, किं तु आत्मप्रज्ञानमात्रप्रतिबिम्बिताज्ञानमात्राश्रयः, २-९७.

आत्मवस्तु - आत्मज्ञानम् आत्मवस्तुस्वरूपमात्राश्रयादेव अविद्यातत्कार्यप्रध्वंसि, १-३६ ; अन्वयव्यतिरेकन्यायः आत्मवस्तुसाक्षात्करणाय विधिपरिप्रापितः, ३-४ ; **आत्मवस्तुवृत्तानुरोधेन** नाविद्यासंभावनापि, ३-११२.

आत्मविज्ञानम्, आत्मज्ञानम् - आत्मनित्वादिनिष्ठस्य अद्वेष्टृत्वादिसाधनवतश्च ज्ञानमुत्पद्यते, ४-६८ ; अमानित्वाद्वेष्टृत्वादयो उत्पन्नात्मज्ञानस्य अयत्नतो भवन्ति, ४-६९.

आत्मा - आत्माज्ञानत एव दुःखम्, आत्मरूपसुखमपि आत्मानवबोधपिहितम् (अव.) ; अविद्या आत्मानुभवसंश्रया, १-७ ; वाक्योत्थात्मज्ञानमेव मोहं (अविद्याम्) नाशयति, १-८ ; नानारसस्य ब्रह्मणः जिज्ञास्वात्मत्वे अनात्मत्वे वा अङ्गीक्रियमाणे न **समुच्चयसिद्धिः**, १-६९, ७०, ७१ ; **अहङ्कारस्यात्मधर्मत्वे** न तस्योपलभ्यत्वं स्यात्, २-२२, २३ ; नात्मा अहंप्रत्ययग्राह्यः, २-२४.... ४३ ; द्वैतस्य आत्मरूपेण, तद्व्यतिरेकेण वा असिद्धिः, २-४५ ; अहङ्कारनिमित्तैव आत्मनि भेदबुद्धिः, २-४७ ; अविक्रियस्यापि आत्मनो भोक्तृत्वम् अहंबुद्धिभ्रान्त्या, २-६३ ; आत्मनि अखिलमपि जगत् भूत्वा विलीयते, २-६८ ; आत्मनः कूटस्थत्वात् न दुःखित्वम्, २-७१... ७७ ; आत्मनि दृष्टं सर्वमपि विशेषणं तदनन्वयात् न तद्धर्मः, २-९४ ; आत्मनो न केनापि व्यवहितत्वं आत्मत्वादेव, अविद्यामात्रव्यवहितस्तु सः, २-९८, ३-११३ ; आत्मा धीवदन्यस्मात् सिद्धिं नापेक्षते, २-११० ; आत्मैव अज्ञानदृष्ट्या अज्ञानस्याश्रयः, विषयश्च, ३-१ ; आत्मज्ञानम् उत्पद्यमानं पुरुषार्थसिद्धौ न रूपान्तरं साधनान्तरं वा अपेक्षते, १-३६ ; 'अहं गन्धं जिघ्राणि' इति ग्रहीत्रादीन् यो गृह्णाति, स आत्मा, ३-३९ ;

आत्मनोऽवगत्यैकरूपत्वात्, निर्गुणत्वात्, प्रत्यगात्मत्वाच्च न प्रत्यक्षादिभिर्गृह्यते, ३-४७, ४८ ; अनात्मा सर्वत्रापि आत्मपूर्वकः, ४-३ ; ज्ञातुरात्मत्वं स्वतःसिद्धम्, देहाद्भिन्नस्य अनात्मत्वमपि स्वतःसिद्धम् ; मध्ये तु संशयः । अतः देहादिबुद्ध्यन्तान् तदसाधारणधर्मज्ञानेन अनात्मत्वेन विजानीयात्, ४-४, ५.

आत्मविशुद्धिः - चित्तशुद्धिः । नित्यनैमित्तिककर्मानुष्ठानेनात्मशुद्धिः, १-५०.

आत्मात्मीयसंबन्धः - अहंकञ्चुकं परिधायैव ज्ञाता उपकारिणा अपकारिणा वा बाह्यविषयेण आत्मात्मीयसंबन्धमश्नुते, ३-६०.

आत्मानात्मानौ - आत्मा अनात्मा च लोके प्रत्यक्षादिप्रमाणतः सिद्धौ, ४-३ ; ऐकात्म्यम् अप्रमेयं स्वतःसिसिद्धं च, यस्मादनुभवमात्रात्मकं तत्, १-८९ ; असाधारणधर्मज्ञानेन आत्मानात्मानौ विविच्य जानीयात्, ४-५ ; आत्मानात्मनोः स्वतः परतः सिद्धयोः रज्जुसर्पाध्यारोपवत् इतरेतराध्यारोपः २-१०१, १०२ ; अन्वयव्यतिरेकाभ्याम् आत्मानात्मविवेकमात्रं जायते, ३-६३ ; आत्मानात्मविभागोऽविद्योत्सङ्गवर्त्येव, २-१०३, ३-६ ; विभागज्ञानं वेदान्तवाक्येन निवर्त्यते, ३-६.

आत्मैकत्वम् - ऐकात्म्यम्, आत्मैकत्वे ज्ञाते दुःखित्वं सर्वथा नास्ति, २-९०.

आब्रह्मस्तम्बपर्यन्तम् - आब्रह्मस्तम्बपर्यन्तैः प्राणिभिः दुःखस्य जिहासितत्वात् सुखस्य च प्रेप्सितत्वात्, तदेतदुभयमपि आत्मानवबोधनिवृत्त्या, (अव.) ; आब्रह्मस्तम्बपर्यन्तः संसारः ग्रहीतृग्रहणादिरूपोऽनात्मैव, २-९७ ; आब्रह्मस्तम्बपर्यन्तः प्रमाणप्रमेयादिर्मिथ्याध्यास एव, ३-१.

आभासः - आत्मनोऽहंप्रत्ययत्वम् आभास एव, २-२६ ; आगमप्रत्यक्षयोरेकविषयत्वेन विरोधे अन्यतरस्य आभासत्वम्, ३-८५ ; वाक्यस्य दृष्टिविधानार्थं वा प्रत्यक्षागमयोर्विरोधे, ३-८१ ; आत्मनि क्रियाकारकफलात्मकः संसार आभासमात्रम्, २-५१.

आम्नायः - आम्नायस्य सर्वस्यापि क्रियार्थत्वमिति जैमिनिमतं पूर्वपक्षिमते, १-१७ ; विधिवाक्यानां स्वार्थे प्रामाण्यमिव ऐकात्म्यवाक्यानामपि तथैवेति जैमिन्यभिप्रायः इति सिद्धान्तिमतम्, १-९१.

आरब्धफलम् - आरब्धकर्मणः भोगादेव क्षयः, १-१२ ; एतद्वेदान्तिनामपि सम्मतम्, १-८१.

आरूढपतितः - **अन्वयव्यतिरेकन्यायस्य** विहितत्वात् अपरिसमाप्य आत्मदर्शनं ततः प्रच्यवमानो आरूढपतितो भवति, ३-४ ; त्वमर्थस्यावबोधाय विधिरप्याश्रीयते, अतः परमहंसस्य प्रसङ्ख्यानमनभ्युपगच्छतोऽपि पक्षे अपरिसमाप्य ज्ञानं विचारात् प्रच्यवमानः आरूढपतितः स्यादेव, ३-१२६.

इ - ऐ

इतरेतराध्यासः - आत्मानात्मनोरितरेतराध्यासोऽविद्योपाश्रयः, २-१०१, १०२.

इदंज्ञानम् - इदंज्ञानं ज्ञातुः स्यात्, ममज्ञानं तु अहमः, ३-६० ; ज्ञातुरहङ्कारः मम इति न ज्ञायते, इदम् इत्येव तु स्यात्, ३-६१ ' सुषुप्ते तु अहंविक्रियायाः इदंज्ञानस्य चाभावात् न ज्ञातृत्वं नाप्यहंकञ्चुकवत्त्वमात्मनः, ३-६२.

इदमर्थः - इदमर्थस्यानात्मनोऽन्वयव्यतिरेकाभ्यां त्यागे आत्मज्ञानाभावात् अहमेव त्यक्तः इत्यज्ञो मन्यते, ४-९.

ईश्वरार्पितकर्माणि - एभिश्चित्तं शुद्ध्यति, १-४७.

उपासना - 'अहं ब्रह्मास्मि' इति ज्ञानस्याहन्यहन्युपासीनस्य अज्ञानम् अपगच्छतीति मतम्, तत्खण्डनं च, १-६७.

उलूकनिशा - अविद्याप्रसिद्ध्यैव सिद्धसद्भावाया अविद्याया दृष्टान्तः, ३-१११.

एककालानवस्थितिः - ज्ञानकर्मणोः साध्यसाधनभावात् एककालानवस्थितिः, १-५४ ; तयोर्बाध्यबाधकभावादेव न समुच्चयः, १-५५.

एकलः, एकाकी - अद्वितीयात्मा, २-१८, ३-६५.

एकाग्रमनाः - आत्मवस्तुसाक्षात्करणाय व्यावृत्तशुभाशुभकर्मराशिः एकाग्रमनाः, अन्वयव्यतिरेकाभ्यां दर्शनं करोति, ३-४.

ऐकाग्र्यम् - भावना । अभ्यासोपचयात् बुद्धेरैकाग्र्यमेव स्यात्, न प्रमितिवर्धना, ३-९०.

ऐकात्म्यम् - ऐकात्म्याप्रतिपत्तिरेव, अविद्या, १-७ ; ऐकात्म्यम् अनुभवमात्रस्वरूपम्, न प्रमाणाकाङ्क्षि, १-८९ ; ऐकात्म्यवाक्यानामपि विधिवाक्यवत् स्वार्थे प्रामाण्यम्, १-९१ ; ऐकात्म्यपक्षे इव कर्मवादिपक्षेऽपि अदृष्टार्थकर्मप्रवृत्तिर्दुर्लक्ष्या, १-९२ .... ९६ ; ऐकात्म्यज्ञानिनः कोपो न विद्यते, २-१८ ; परिणामवादिसांख्यप्रक्रिययापि ऐकात्म्यं सिध्यति, श्रौत्या तु प्रक्रियया सुतरां सिध्यति, २-८५, ८६.

क

कर्त्रादि - प्रत्यगात्मविषये जायमाना प्रमा कर्त्रादिकारकभेदापह्नवेनैव जायते, ३-७१ ; यथैव प्रतिबोधितः स्वप्नदृक् स्वाप्नकर्तृकर्मकरणानि न पश्यति, तथैव श्रुत्या अवबोधितोऽज्ञो गुरुशास्त्रशिष्यान् स्वात्मनोऽन्यात्र पश्यति, ४-३६, ३७.

कर्मक्रिया - कर्म मोहं न नाशयति अज्ञानोत्थत्वात् कर्मणः, कर्माज्ञानयोर्न विरोधो यतः, १-८. ३५, ३७ ; कर्मवादिनां पूर्वः पक्षः, १-९....२१ ; परिहृतपरिहारः, प्राप्तप्राप्तिश्च ज्ञानादेव, न कर्मणा मोहमात्रान्तरायत्वात् तयोः १-३४ ; उत्पाद्यमाप्यं संस्कार्यं विकार्यं च कर्मफलम्, मुक्तिस्तु नैवंविधा, अतो न कर्म तत्साधनम्, १-३३, ५३ ; कारकाद्यभिमान्येवाविद्यावान् कर्म कृत्वा तत्फलमश्नुते, १-४१ , ९६ ; ज्ञानकर्मणोः साध्यसाधनसंबन्धवत्त्वात्, परस्परविरोधाच्च समुच्चयो न घटते, १-५४...६६ ; नानारसब्रह्मवादिनामपि पक्षे न समुच्चयः, १-६८...७८ ; भ्रान्तिविज्ञानप्रयुक्तैव कर्मसु प्रवृत्तिः, १-२९, अविद्याकामकर्मनिमित्त एव संसारः, १-४२ ; कर्म पारम्पर्येण ज्ञानद्वारा अविद्यानिवृत्तये, १-४७...५२.

कर्मकर्तृभावः - एकस्यैव आत्मनः कर्मकर्तृत्वम् - अहंप्रत्ययाश्रयत्वं तद्विषयत्वं च अनुपपन्नम्, २-२१....२७.

कल्पना - वस्तुयाथात्म्यानवबोधात्, स्त्रीदेहे विविधकल्पना, २-५२ ; अहङ्कारादिरात्मत्वेन कल्पितः २-४५ ; अवस्तुभूतविरुद्धधर्माणामपि एकत्र कल्पना, २-५०.

कामः - कामादेव संसारः १-४२, ४३, ४४ ; कामत्यागेन बुद्धिः प्रत्यगात्मप्रवणं भवति. १-४८.

काम्यकर्माणि - काम्यनिषिद्धयोस्त्यागात् नित्यकर्मानुष्ठानमात्रेण मुक्तिरिति मतं न साधु, काम्यादीनां पृथक्फलवत्त्वात् कर्मणो मोक्षसाधनत्वे प्रमाणाभावाच्च, १-२६, २७.

कारकाणि - आत्मज्ञानम् उत्पन्नमात्रमेव अविद्यातदुत्पन्नकारकग्रामप्रध्वंसि, कर्म पुनः स्वात्मोत्पत्तौ उत्पाद्यं च शास्त्राद्यपेक्षम्, न च कारकनिःस्पृहं फलदानसमर्थम्, १-३६.

कार्यकरणसङ्घातः - देहेन्द्रियसंहतिः । सङ्घातव्यतिरेकाव्यतिरेकदर्शिनोः प्रत्यक्षत एव वैलक्षण्यमुपलभ्यते, २-२०.

कार्यकारणभावः - तत्त्वमस्यादिवाक्यम्, निरस्तकार्यकारणम् आत्मानं प्रतिपादयति, ३-४७, कार्यकारणागमापायिसाक्षिविभागेन आत्मा विविच्यते, - ३-५५.

कालत्रयापरिच्छित्तिः - अविद्या सह कार्येण कालत्रयेऽपि आत्मनि न विद्यते, २-५३, ३-११६.

कालान्तरफलदायि - कर्मणः कालान्तरे फलदायित्वात् विधिमन्तरेण तन्न कार्यम्, उत्पत्तिकाल एव फलदायिनि ज्ञाने नैवम्, १-९०.

कूटस्थः - अविकारी । कूटस्थ आत्मा न द्वैतं स्पृशति, २-६९ ; कूटस्थावबोधमन्तरेण बुद्धेरेवाविर्भावतिरोभावौ न सिध्यतः, २-८२ ; दृशेः कूटस्थरूपत्वात् कल्पितपरिणामो भवति, २-८४ ; बुद्धेः परिणामित्वम् आत्मनश्च कूटस्थत्वम्, २-८६ ; मिथ्याध्यासकूटस्थात्मनोरज्ञानमेव, संबन्धः, ३-१ ; परिणामिकूटस्थयोर्लक्षणभेदः, ३-१६, १७ ; कूटस्थपरिणामिनोः, अनवबोध एव संबन्धः, ३-२० ; कूटस्थ आत्मा हानादानविधर्मकः, ३-२१ ; कूटस्थबोध आत्मनः स्वाभाविकः, ३-१५, १११.

केवलात्मा - अविद्याकल्पितबुद्ध्यादिकर्तृत्वोपाधिमात्मानं परिगृह्यैव अन्वयव्यतिरेकन्यायः प्रवर्तते, केवलात्माभ्युपगमे अशक्यत्वात्, फलाभावाच्च, २-५८.

कैवल्यम् - अद्वितीयत्वम् । अहङ्कारताद्यध्यासेन आत्मा दुःखी ; नेति नेतीति श्रुत्या बोधितस्तु कैवल्यम् प्राप्तः, २-११६ ; 'अहं ब्रह्म' इति विज्ञानं संसर्गात्मकम्, तन्निदिध्यासनेन अवाक्यार्थकमात्मज्ञानमुत्पद्यते तेनैव कैवल्याप्तिरिति केषाञ्चित् पूर्वः पक्षः, ३-९ ; सुषुप्ते निर्विकल्पकात्मवस्तुसिद्धिरिति केषाञ्चिन्मतं न सम्यक्, तत्राज्ञानस्य सम्भवात्, ३-५८.

क्रियाकारकफलानि - आगमज्ञानं सकृदुत्पत्त्यैव क्रियाकारकरूपमज्ञानं नाशयति, १-६७ ; क्रियाकारकफलरूप आभासः परमार्थं न स्पृशति, २-५१ ; क्रियाकारकफलविभागसाक्षित्वात् तच्छून्य आत्मा, २-१०८ ; अज्ञानमात्रनिमित्तत्वात् क्रियाकारकफलात्मकः संसारो मिथ्याभास एव, २-११६ ; नामादिप्राणान्तेभ्यः परो यो भूमा अक्रियाकारकः, स एव सर्वेषामात्मा, २-५७ ; अनुमानेन क्रियाकारकफलरहिते आत्मनि प्रतिष्ठापयितुं न शक्यते जीवः, ३-११५.

क्रियापदम् - वाक्यम् अवश्यं क्रियापदम् अपेक्षेत, विधिबोधकमेव क्रियापदमपेक्ष्यते इति तु न नियमः, 'असि', 'अस्मि' इत्यादिनाऽपि अलम्, १-९७.

क्षणप्रध्वंसिनी, क्षणभङ्गुरा - परिणामिनी बुद्धिः, अन्तःकरणम्, २-६९, ७४, ८२.

ग

गीर्मनसोः सृतिः - तत्त्वमस्यादिवाक्यार्थज्ञो वाङ्मनसयोरगोचरो भवति, ३-१.

गुणः - अङ्गभूतः । गुणो न प्रधानविनाशि, १-६२ ; कर्मप्रकरणस्थं ज्ञानं कर्मगुणः, स्यात्, न तु अविद्याहन्तृ आत्मज्ञानं गुणो गुणी वा भवेत् कर्मणः, १-५४, ६३, ६४ ; (गौणी वृत्तिः) अहङ्कारो गुणलेशेन आत्मनो लक्षणं भवति, ३-९८, ९९, १०२, १०४ ; वाक्यं प्रत्यक्षविरोधिनीं प्रमां जनयति चेत्, तदा प्रत्यक्षता गौणी, ३-९६.

गुरुः - अविद्याग्रन्थिभेदी, १-२ ; गुर्वनुशिक्षयैव प्रकरणमिदं प्रणीतम्, १-५ ; ज्ञानेन प्रतिबुद्धो गुरुशास्त्रादिकं न पश्यति, ४-३७.

ग्रहीतृग्रहणग्राह्यगृहीतयः - अविद्याकल्पिता एते अनात्मैव, २-९७ ; बाह्य आकारवान् ग्राह्यः ग्रहणं बुद्ध्यादि, अहम् अन्वयी ग्राहकः, साक्षी त्वात्मा कूटस्थः, २-१०७ ; एकस्य धर्मिणो न ग्राह्यग्राहकत्वम्, २-२७ ; ग्राहकादीनां विभागे योऽविभागवान् स एव साक्षी, २-१०८ ; ग्राहकादिनिष्ठैव ग्राहकादिभावाभावसिद्धिरिति न युक्तम्, २०-१०९ ; अविद्याकल्पितत्वात् ग्राहकादिनैवास्ति आत्मव्यतिरेकेण, २-११४.

घ

घटः, कुम्भः - घटबुद्धेर्घटाच्च यथा आत्मा भिन्नः, तथा अहंबुद्धेरहमश्च आत्मा भिन्नः, २-१०० ; जात्यमणिशिखा स्वरूपेणावस्थितैव घटादीन् 'व्यनक्ति', 'न व्यनक्ति' - इति तु तस्याः सान्निध्यासान्निध्यापेक्षया, २-६४, ६५ ; घटप्रत्ययो यथा न घटकर्म, एवं नाहमः कर्म द्रष्टा, २-२४ ; अवगत्यात्मनोः - कुम्भवदेव-आगमापायित्वात् साहङ्कारं सर्वं मिथ्या अनात्मा, २-९५ ; यथा बुद्धिदेहघटादयो व्यवधीयन्ते तथा नात्मा आत्मनो व्यवधीयते, २-९८ ; बुद्धिदेहघटादय आत्मव्यतिरेकेण न सन्त्येव, २-११४, ११५ ; घटाकाशमहाकाशवत् सामानाधिकरण्यादिसत्त्वात् तत्त्वमर्थयोर्विरोधव्यावृत्तेः अवाक्यार्थः स्यात्, ३-९ ; यथा घटाकाशादयः सामान्यविशेषभावं परित्यज्य स्वरूपेणाकाश एव, एवम् आत्मापि, ३-१७ ; सुषुप्तौ अज्ञानं सदपि घटाद्यज्ञानं न प्रत्यक्षं भवति, व्यञ्जकभूतान्तःकरणाभावात्, ३-५८ ; घटादिः सदसद्भ्यां विभक्तोऽपि स्वकारणज्ञाने उपायभूतः,३-१०९.

च

चतुर्विधम् - चुतर्विधं कर्मकार्यम् । मुक्तौ तस्यासम्भवः, १-२४.

चितिः, चैतन्यम् - चितेरन्तःकरणाश्रयो भेदः, २-४८ ; आत्मनश्चैतन्यं मोहात् अहङ्कर्तरि मन्यते, २-१०२.

चित्तम् - सर्वकर्मसंन्यासात् परं योगाभ्यासः, ततश्चित्तस्य प्रत्यक्प्रवणता, १-५२.

चिन्निभः - सर्वा अपि बुद्धयश्चिन्निभाः, अवगतेस्तु न ताभ्यो भेदः २-८६ ; अहंवृत्तिः चिन्निभा, अतः अनया आत्मा लक्ष्यते, ३-१००.

चिरन्तनी भ्रान्तिः - अनाद्यविद्या । तत्त्वदर्शनात् तस्या बाधः, २-१०३.

चोदनाविधिः - प्राप्तात्मावबोधस्य अचोद्यस्वाभाव्यात् तस्मिन् सर्वचोदनानां कुण्ठता, १-५७.

जैमिनिः - आम्नायस्य क्रियार्थत्वात् आनर्थक्यमतदर्थानाम् - इति जैमिनिः, १-१७ ; जैमिनेः सर्वस्यैवाम्नायस्य क्रियार्थत्वमिति न मतम्, १-९१ ; जैमिनिमतेऽपि अज्ञस्यैव कर्मसु प्रवृत्तिः, १-९२...९६.

ज्ञानम् - सुषुप्तात् उत्थितस्य 'नाहमज्ञासिषम्' इति परामर्शजन्मदर्शनात् तत्र इदंज्ञानं वा ममज्ञानं वा नास्तीति गम्यते, ३-६२ ; ज्ञानकर्मणोरङ्गाङ्गिभावेन समुच्चयात् मोक्ष इति केषाञ्चित् मतम्, १-२० ; तत्त्वमस्यादिवाक्यज्ञानं दीर्घकालमुपासीनस्य भावनोपचयान्निश्शेषमज्ञाननाशः इत्येके ; वाक्यजन्यज्ञानं संसृष्टात्मकत्वात् नाज्ञाननिरासि, एतदेवाभ्यस्यतोऽन्यदेव ज्ञानमुत्पद्यते तदेव त्वज्ञाननिवर्तकमित्यपरे ; वाक्यजन्यज्ञानेनैव निरन्वयमज्ञानं विनश्यतीति सिद्धान्तः, १-६७ ; निरुपपदो ज्ञानशब्दः प्रायेण वाक्यजन्यज्ञानस्यैव वक्ता ; बोधः, अवबोधः, प्रबोधः तत्त्वदर्शनम्, विद्या, सम्यग्ज्ञानम् इति पर्यायशब्दाः ।। १-३४, ३७, ३८, ५२, ५४, ६५, ६८.

ज्ञानम् - आत्मस्वरूपभूतं चैतन्यम् । ज्ञानं विना अर्था न सन्ति, ज्ञानं तु तान् ऋतेऽप्यस्ति इत्येवं आत्मज्योतिर्विवेकः कार्यः, २-९७.

ज्ञानकारी, ज्ञानप्रकृतिः - अन्तःकरणादिषु ज्ञानाभासोत्पत्तिकारणभूत आत्मा, ३-१

ज्ञानी - ज्ञानवान्, ज्ञानवादिन्यपि अयं शब्दः प्रयुक्तः, १-१२, १९.

ज्ञेयज्ञातृकता - बोध्यबोधकभावः, अहङ्कारस्य ज्ञातुश्च संबन्धः, ३-५९.

ज्योतिः - अन्तःकरणाद्यवभासकं चैतन्यम्, २-८८, ८९, ९७.

त

तत्पदार्थः - तत्त्वमसिवाक्ये तत्पदस्यार्थः, अद्वितीयत्वम् ; पारोक्ष्यं तु अविवक्षितम्, प्रत्यगात्मनः पारोक्ष्यानुपपत्तेः, ३-७७...७९.

तत्त्वमस्यादिवाक्यम् - 'तत्त्वमसि' 'अहं ब्रह्मास्मि' - इत्यादिवाक्यं जीवब्रह्मणोरभेदस्य वक्तृ,

चित्तस्य प्रत्यक्प्रावण्ये वाक्यज्ञानेनाविद्यानाशः, १-५२ ; एतादृशवाक्यस्य न कर्मार्थकता, १-९१ ; वाक्यस्य स्वतःसिद्धार्थबोधकत्वात् न क्रियार्थता, १-९८, ३-८२ ; अज्ञाननाशकं ज्ञानं वाक्यादेव, २-१, ३-१ ; वाक्यार्थं श्रावितोऽपि त्वंपदार्थानभिज्ञत्वात् न वेत्ति, २-१ ; अन्वयव्यतिरेकाभ्यां विना वाक्यार्थज्ञानं न भवेत्, २-९ ; मानान्तराविषयं निर्दुःख्यात्मानं बोधयतीत्यतो वाक्यं प्रमाणम्, ३-३५ ; अभिधाश्रुतिरपि वाक्यं सुप्तपुरुषप्रबोधक-वाक्यवत् आत्मानं गमयेत्, ३-४७ ; अद्वितीयोऽपि जनो दशमवत् आत्मानं विना कारणं न वेत्ति, ३-६५ ; भ्रान्तिसिद्धमर्थम् अनूद्य तत्तत्त्वं बोधयदिव वाक्यं तत्त्वमस्यादिवाक्यमपि कर्तृत्वाद्यनुवादेन तत्त्वं बोधयति, ३-७३ ; स्पष्टतमं प्रमां कुर्वदपि वाक्यमनादृत्य तस्य प्रसंख्यानादिकार्यपरत्वं न कल्पनीयम्, ३-११७, ११९.

तमः - अन्धकारः, अज्ञानं च । कर्म नाज्ञानं निवर्तयति, न हि तमस्युत्थितं तमो नाशयेत्, १-२४ ; ज्ञातृज्ञानादिकं योऽविकारेण वेत्ति, तस्य तमः (अग्रहणमपि) बाह्यमेव, ४-४५.

त्वंपदार्थः - त्वंपदार्थज्ञानाभावात् तत्त्वमस्यादिवाक्यार्थज्ञानं न जायते, २-१ ; त्वंपदार्थाज्ञाना-पनयाय द्वितीयोऽध्यायः, २-१ ; द्वितीयाध्यायोक्तप्रकारेण 'अहम्' इत्यत्र य इदमंशः तं निरस्य भावाभावविलक्षणम् आत्मानं वाक्याद् विद्यात्, ४-७, ८ ; तत्पदं प्रकृतार्थम्, त्वंपदं प्रत्यगात्मवाचि, ३-२ ; तदर्थेन संपृक्तं त्वंपदं नानात्वं परित्यजति, त्वंपदसामानाधि-करण्येन तत्पदं च पारोक्ष्यं त्यजति, ३-७८ ; त्वंपदेन प्रतीतं संसारित्वम् अद्वितीयेन विरुध्यते, पारोक्ष्यं चात्मना विरुध्यते - इत्यतस्तयोर्बाधनं भवेत्, ३-७९.

द

दुःखम् - आत्माऽनवबोधादेव दुःखम्, (अव.) ; आत्मनो दुःखित्वे नास्ति साक्षी, दुःखी तु न साक्षी, २-७६ ; त्वमर्थस्य तदर्थेन विशेषणात् निर्दुःखित्वं ज्ञायते, ३-१०.

दृक्, दृशिः - दृगेकैव सती दृश्यैरुपाधिभिरनेकवद् भाति, २-४७ ; घटादिवदेव दृशे-र्दृश्यत्वात् देहस्याप्यनात्मता, २-१९ ; अहङ्कारोऽपि दृशेर्विषयत्वात् अनात्मैव, २-३७ ; द्रष्टुरप्यन्या दृशिर्नास्ति, २-३९.

दृश्यम् - देहो दृश्यत्वादनात्मा, २-१९ ; अहं न द्रष्टृकर्मकः, द्रष्टुः कर्तृत्वात्, २-२४, २५ ; अहङ्कारोऽपि दृश्यत्वादनात्मा, ४-३० ; द्रष्टृत्वं दृश्यता च एकस्मिन्नेकदा न भवति, २-३९ ; द्रष्टापि दृश्याया बुद्धेः कर्म चेद् भवेत्, युगपदेव उभयोर्दृष्यत्व-

मित्यनिष्टं स्यात्, अलुप्तदृष्टेर्दृश्यत्वं कथमपि न संभवति, २-४०, ४१ ; दृश्यैरुपाधिभिर्दृशेरनेकत्वमिव भवति, २-४७.

दृष्टान्तः - अस्मिन् प्रकरणे उपात्ताः कतिचन दृष्टान्ता अत्र संगृह्यन्ते - (१) श्वश्रू निर्गच्छोक्तिवद् (निषिद्धकर्मत्यागे कर्मवाद्युक्तिः), १-२८ ; (२) नभसो नीलतामिव (प्रतीतिसिद्धस्याप्यात्मत्वस्याध्यस्ततां प्रकटीकर्तुं दृष्टान्तः), २-२१ ; (३) विशुद्धे आकाशे मेघमण्डलं यथैव भूत्वा विलीयते तथा (आत्मनि अखिलं जगत्), २-६८ ; (४) उत्पत्तिस्थितिभङ्गेषु कुम्भस्य वियतो यथा (बुद्धेरुत्पत्त्यादय आत्मनोऽपि न स्युः), २-७९ ; (५) घटेतरखयोरिव (तत्त्वमर्थयोः सामानाधिकरण्यादिः), ३-९ ; (६) व्योम्नि तुषारधूमादीनीव (प्रत्यगात्मनि संसारः), ३-९९ ; (७) कण्ठे चामीकरं यथा छायायां रक्षो यथा (लब्धं लिप्सते वर्जितं परिजिहीर्षति), १-३१, ३२ ; (८) धावेदिति न दानार्थे पदं यद्वत् प्रयुज्यते (एधीत्यादि सिद्धार्थवाचिनि तथा), ३-९७ ; (९) दण्डेन दण्डिनं आराधको यथा, तद्वत् (साक्षी बुद्धिं वीक्षते), २-८० ; (१०) दण्डस्येवाप्सु वक्रता (परिणाम आत्मनि), २-८४ ; (११) दशमो दशमोस्मीति यथा न वेत्ति, (अद्वैतमात्मानं न वेत्ति), ३-६४, ६५ ; (१२) नीलोत्पलवत् (तत्त्वंपदार्थयोर्विशेषणविशेष्यता, अविवक्षितार्थत्यागश्च) ३-२ ; (१३) भस्मनीव हुतं हविः (विधिं विना कृतं कर्म), १-१६ ; (१४) तमोऽङ्गत्वं यथा भानोरग्नेः शीताङ्गता यथा । वारिणश्चोष्णता यद्वत् (ज्ञानस्य क्रियाङ्गता), १-७९ ; (१५) नोष्णिमानं दहत्यग्निः स्वरूपत्वात् यथा (आत्मा आत्मनं न विद्यात्) २-२३ ; (१६) दाह्यदाहकतैकत्र यथा स्याद्वन्हिदारुणोः (एवं अहंज्ञात्रोर्ज्ञेयज्ञातृकता), ३-५९ ; (१७) मृगतृष्णिकोदकपिपासुरिव, (कर्मणि मिथ्याज्ञानकृता प्रवृत्तिः), १-२९ ; (१८) नासाग्रे बदरं यथा (अतिदुःस्थोऽप्रबोध आत्मनि), ३-११० ; (१९) शशो निमीलनेनेव (मृत्युं परिजिहीर्षति), ४-१६ ; (२०) स्थाणुं चोरधियाऽऽलाय भीतो यद्वत् पलायते (बुद्ध्यादिभिरारोप्यात्मानं चेष्टते), १-६० ; (२१) पुंधिया स्थाणुधीरिव (ब्रह्मास्मीतिधिया अहंबुद्धिर्निवर्तते) २-२९ ; (२२) मृत्स्नेभके यथेभत्वं (देहादीन् तद्वदात्मनि), १-५९ ; (२३) यथा जात्यमणेर्ज्वलन्ती शिखा घटादीन् व्यनक्ति (तथा परमात्मा धीवृत्तीः), २-६४, ६६ ; (२४) यथा शयानाः स्वनामभिर्बोध्यमानाः प्रबुध्यन्ते (एवं वाक्येन आत्मा), ३-१०५ ; (२५) यथा स्वापनिमित्तेन स्वप्नदृक् प्रतिबोधितः स्वाप्नकरणादिकं नेक्षते (एवं अनात्मज्ञः श्रुत्या बोधितो गुरुशास्त्रादि नेक्षते), ४-३६ ; (२६) जलभाजनभेदेन सूर्यभेदवत् दृशेर्भेदः २-४७ ; (२७) सोमशर्मपिता यथा (तथा अभूताभिनिवेशेन असत्कल्पयति) २-५१ ; (२८) नौयानविभ्रमात् यद्वन्नगेषु गतिकल्पनम् (अहंबुद्धिविभ्रमात्,

अविक्रियस्य भोक्तृत्वकल्पनम्), २-६३ ; (२९) लक्षणं सर्पवद् रज्ज्वाः (प्रतीचः स्यादहम्), ३-२७ ; (३०) तमोऽभावे कुतः फणी (तद्वत् अहंबुद्धौ निवृत्तायां ममधीः कुतः ?) २-३०; (३१) दण्डसर्पो यथा दण्डावसाननिष्ठः स्यात् (तथा वाक्यात् जगत् नित्यावगतिनिष्ठं स्यात्), ४-३८ ; (३२) निवृत्तसर्पस्यापि कम्पावशेषवत् (निवृत्तमोहस्यापि मोहकार्यावशेषता), ४-६० ; (३३) तरोरुत्खातमूलस्य शोषेणैव यथा क्षयः (तथा ज्ञानिनः निवृत्त्यैव तनुक्षयः), ४-६१ ; (३४) जात्यन्धगजदृष्ट्येव अज्ञानेन आत्मा कोटिशः परिकल्प्यते, २-९३ ; (३५) स्रगन्धविलेपनवत् देहं पश्येत्, २-१२ ; (३६) स्त्रियामेकस्यामेव कमनीया, अशुचिः स्वाद्वी - इतिवत् (एकत्रापि कल्पितविरुद्धधर्मकल्पना भवेत्), २-५० ; (३७) प्रत्यगुद्भूतपित्तस्य यथा बाह्यार्थपीतता (तद्वत् आत्मनश्चैतन्यं बहिर्वद्दृश्यते), ३-३०.

दृष्टिः - बुद्धेर्दृष्टिः, आत्मनो भिन्ना इति श्रुतिः, २-९१ ; आत्मा दृष्टेर्द्रष्टा, न दृश्यः, अपरिच्छिन्नः प्रत्यग्रूपः, अतस्तं न द्रष्टुं शक्नुयात् कश्चित्, २-९२, ३-४९, ३-५०.

दृष्टिविधिः - यदि क्वचिद् वाक्यं प्रत्यक्षादिविरुद्धं वदेत् तत्र दृष्टिविध्यर्थम्, तथा उपास्यमित्यभिप्रायेण, ३-८१.

देहः - देहोपादाने धर्माधर्मौ निमित्तम्, (अव.) ; देहोऽनात्मा अन्नकार्यत्वात्, २-११ ; देहस्यानात्मत्वे युक्तयः, २-१२...२० ; सूक्ष्मदेहोऽपि अनात्मैव, विषयत्वात्, अपायित्वादिहेतुभ्यश्च, २-२१, २२ ; देहाद्भिन्नस्य निश्चितमनात्मत्वम् तथात्मनोऽप्यात्मत्वम्, मध्ये तु देहादिबुद्ध्यन्ते संशयः, ४-४, ५, ६.

द्रष्टृदर्शनदृश्याः - **ग्राहकादिः** । द्रष्टृदर्शनगोचराः आत्मानं वा अन्योन्यं वा न विदन्ति, भिन्नस्यैव ते ज्ञेयाः, २-१०६ ; द्रष्टृदर्शनदृश्यानां जाग्रदादिषु आगमापायदर्शनात् अस्ति तत्साक्षी - इति आत्मप्रतिपत्तिः लिङ्गाधीना, न साक्षात्प्रतिपत्तिः, ३-५७.

द्वयपारोक्ष्ये - आत्मा द्वयपारोक्ष्यवर्जित एव तत्त्वमर्थयोर्निष्ठा, ३-७६.

द्वैतम् - अहंबुद्धिपरिच्छेदव्यावृत्तौ द्वैतजातं नावशिष्यते, २-३० ; भगवन्मतेऽपि दृशेर्द्वैतयोगो नास्ति, २-४३ ; द्वैतं मिथ्यासिद्धम्, २-४४, ४५ ; **कूटस्थ** आत्मा न मनागपि द्वैतं स्पृशति, २-६९ ; अनात्मनो द्वैतेन्द्रजालस्य आत्मानवबोधोत्थस्य इतरेतरस्वभावापेक्षसिद्धत्वम्, २-११२, ११४ ; अज्ञानापनुत्तौ द्वैतानर्थाभावः, ३-१ ; निरस्तद्वैतप्रपञ्चम् आत्मानं साक्षात् तत्त्वमस्यादिवाक्यं प्रतिपादयति, ३-४७.

द्वैतिनः - नानारसब्रह्मवादे द्वैत्तिनोऽपि ज्ञानाभ्यासेनैव मुच्येरन्, न कर्मणा, १-७२.

ध

धर्मधर्मित्वम् - अन्तःकरणस्य बोद्धृत्वाहन्तयोर्यथा धर्मधर्मिभावः, नैवम् आत्मनि तयोर्धर्मधर्मित्वमस्ति, ३-१३.

धर्माधर्मौ - धर्माधर्माभ्यां देहोपादानम्, (अव.) ; देहारम्भकायोर्धर्माधर्मयोर्भोगादेव क्षयः, १-१२.

ध्वान्तम् - अज्ञानम् । बुद्धिसाक्षिणो ज्ञानेन ध्वान्तच्छेदः, १-१.

न

न जानामि - यथा घटादीनां 'न जानामि' इत्यव्यवहितं प्रत्यक्षम्, तथा सुषुप्ते आत्मज्ञानस्य न भवति, अभिव्यञ्जकाभावात्, ३-५८.

नाज्ञासिषम् - सुषुप्तादुत्थितस्य 'नाज्ञासिषम्' इति परामर्शदर्शनात् अहङ्कार आत्मनः 'अयो दहति' इतिवल्लक्षणम्, २-५४.

नाद्राक्षम् - 'न किञ्चिदन्यदद्राक्षम्' इति सुषुप्तिविषयकपरामर्शः न स्वरूपदृष्टिं वारयति, प्रत्ययं तु निषेधति, ४-२३.

नानारसब्रह्मवादः - नानारसब्रह्मवादिनां मतेऽपि न ज्ञानकर्मणोः समुच्चयसिद्धिः, १-६८...७८.

नित्यं कर्म, नित्येहा - दुरितक्षपणार्थत्वात् नित्यं न मुक्तिसाधनम्, १-२६ , नित्येहा नैमित्तिकं च कर्म आरादुपकारकत्वेन मोक्षहेतुः, १-४५...५० ; अतीतानन्तजन्मोपात्तानां कर्मणां नित्येन न क्षयः, १-८२.

नित्यावगतिः - नित्यावगतिरूपत्वादिभिर्हेतुभिर्नात्मा प्रत्यक्षादिगोचरः, ३-४७.

नियमविधिः - 'आत्मेत्येवोपासीत' इत्यादिर्नापूर्वविधिः ; विध्यभ्युपगमेऽपि नियमविधिः-परिसङ्ख्या विधिर्वा स्यात्, १-८८.

नियोगः - 'द्रष्टव्यः' (बृ. २-४-५) इत्यत्र न नियोगः, ज्ञानस्य अपुरुषतन्त्रत्वात्, १-८८ ; तत्त्वमस्यादिवाक्यानम् अभिधाश्रुतित्वात् न प्रामाण्यं युक्तमभ्युपगन्तुम्, अतो नियोगमुखेनैव तेषां प्रमाणं युक्तम् - इति केषाञ्चित् पक्षः, तन्निरासश्च, ३-४७ ; उत्पन्नात्मज्ञानस्य अद्वेष्टृत्वादयो न नियोगवशात् वर्तन्ते, ४-६९.

निरपेक्षः - आत्मा निरपेक्षः सापेक्षं सर्वदेहेषु पश्यति, २-७५ ; ग्राहकादेरन्यसाक्षिपूर्वकसिद्धावपि साक्षिणोऽन्यसाक्षिपूर्वकत्वं नास्ति, निरपेक्षसाक्षिमपेक्ष्यैव ते सिध्यन्ति, २-११०.

निरस्तैषणः, निरस्तसर्वकर्मा - नैष्कर्म्यसिद्धिग्रन्थो निरस्तैषणायैव निरस्तकर्मणे एव च दातव्यः, ४-७१, ७२.

निर्दुःखित्वम् - त्वमर्थस्य तदर्थेन विशेषणात् निर्दुःखित्वं गम्यते, ३-१० ; आत्मनो निर्दुःखित्वस्य स्वत एव सिद्धत्वात्, प्रत्यक्षादिसिद्धदुःखित्वं दुर्बलम्, प्रत्यक्षादेर्व्यभिचारित्वात्, ३-९४.

निर्द्वयः - अद्वितीयात्मा । मनुष्याभिमानिनं स्वीकृत्य कुर्वन्नेवेति श्रुतिः, न तु निर्द्वयम्, १-९६.

निर्विशेषणः, निर्गुणः - नेतिनेतिश्रुतिप्रामाण्यात् निर्गुण आत्मा, २-४२ ; आत्मानो विशेषणत्वेन यद्यद्दृश्यते तन्नात्मनः, आकाशस्य कुम्भादिवत्, तस्मादात्मा निर्विशेषणः, २-९४.

नेति नेति - नेतिनेतिश्रुत्या अवबोधितस्वरूपः कर्म न वीक्षतेऽपि, १-५८.

नैष्कर्म्यप्रवणाः - 'परीक्ष्य लोकान्' (मुं. २-१-१२) इत्याद्याः श्रुतयः नैष्कर्म्यज्ञाने तात्पर्यवत्यः, १-८७.

प

पटलम् - अविद्यापटलम् (१-४१, ३-३३, ४-३६) ; अनवबोधपटलम् (२-५२) इत्यादिप्रयोगैर्ग्रन्थकर्तुर्भावाविद्यावाद एवेष्ट इति केचिद् भ्रान्ताः । तत्र तत्रायं वादो सिद्धौ नाङ्गीक्रियत इति व्याख्याने स्पष्टीकृतम् ॥

पदपदार्थौ - ऋते वाक्यं न पदपदार्थविचारः, २-८ ; पदपदार्थाभिज्ञस्य वाक्यादेवाज्ञानापनुत्तिः, ३-१ ; अहमित्यत्र पदपदार्थावधारणे अन्वयव्यतिरेकौ युक्तिः, ४-२२.

पदार्थद्वयम् - आत्मा अनात्मा च ; तयोरात्मैव अज्ञानाश्रयः तद्विषयश्च, ३-१.

परमात्मा, परात्मा - नानारसब्रह्मवादिषु द्वैतिनोऽपि ज्ञानाभ्यासेनैव विमुच्येरन्, १-७२ ; अनात्मादर्शनेनैव परात्मा उपासितव्यः इति द्रष्टव्यादिविधेरर्थः, १-८८ ; अहंङ्कारः परमात्मनो लक्षणम्, २-५४, ५५, ५६ ; अविद्या अवस्त्वपि परमात्मेव भाति, ३-१११ ; परमात्मापरमात्मविवेकाभाववत एव उपदेशः, ४-२०.

परमार्थः - आत्मज्ञानं परमर्थात्मवस्तुस्वरूपमात्राश्रयादेव अविद्यातत्कार्यप्रध्वंसि, १-३६ ; क्रियाकारकफलात्मक आभासः परमार्थवस्तु न स्पृशति, २-५१ ; परमार्थतः आत्मनोऽविद्यया तत्कार्येण वा न संबन्धः, २-५३ ; प्रतिबुद्धपरमार्थतत्त्वस्य अन्यदेहोत्थदुःखसंबन्धो नैव शक्यशङ्कः, २-९० ; प्रकरणेऽस्मिन् परमार्थनिष्ठवेदान्तनिश्चितं ज्ञानं कथितमस्ति, ४-५२ ; अवगतपरमार्थतत्त्वस्य न शेषशेषिभावः, ४-५६.

पराक्, पराचीनम् - सुखदुःखादीनां पराक्त्वात्, प्रत्यगात्मभूतस्य न विधिगोचरत्वम्, १-९४ ; प्रत्यगात्मा पराची बुद्धिं सर्वदेहेषु पश्यति, २-७५ ; प्रतीच्यात्मनि पराञ्चि प्रत्यक्षादीनि न प्रवर्तन्ते, ३-४५ ; आत्मनोऽनुमित्या नानुभवो भवेत्, पराग्विषयकप्रत्यक्षोपजीवित्वात् अनुमितेः, ३-५१ ; पराचीनः प्रमातृप्रमाणादिव्यवहारः प्रतीचीनमात्मानम् अवगाहितुं नालम्, ३-५२ ; ज्ञानज्ञेयादिकं विजानतोऽविकारस्यात्मनः परागेव तमः, ४-४५.

परिणामः - साक्षिणि कर्तृत्वादिप्रतिषेधः, २-५८ ; धीर्न युगपत् विषयान् वेत्ति, अतः परिणामिनी, २-७० ; कल्पितपरिणामस्तु भवेदात्मनः, २-८४ ; परिणामिन्यो बुद्धयः प्रत्यर्थं भिद्यन्ति, अवगतेस्तु न भेदः, २-८६ ; यत्स्वरूपं विशेषं कञ्चिदाश्रित्य तदेवेदमिति प्रतीयते स परिणामी, ३-१६ ; स्वरूपेण भवन् कूटस्थः, ३-१६, १७ ; कूटस्थपरिणामिनोरज्ञानमेव संबन्धः, ३-२०.

परिसङ्ख्याविधिः - 'आत्मा वा अरे द्रष्टव्यः' इति परिसङ्ख्याविधिः स्यात् अनात्मादर्शनविधानात्, १-८८.

पश्वादिः - परीप्सा, जिहासा वा न शास्त्रकृता, पश्वादिष्वपि दर्शनात्, १-३०.

पारिशेष्यम् - नित्यं कर्म मुक्तये इति न पारिशेष्यात् सिध्यति, १-२६ ; आत्मानात्मनोर्मध्येऽनात्मनो नाज्ञानाश्रयत्वविषयत्वसिद्धिर्यस्मात्, तस्मात् पारिशेष्यात् आत्मन एवाज्ञानम्, ३-१.

पुरुषतन्त्रम्, पुरुषायासमात्रजनितम् - वस्तुयाथात्म्यज्ञानं न पुरुषतन्त्रम्, १-८८ ; स्त्रीकुणपे कामिनीति प्रत्ययः पुरुषायसमात्रजनितः, ३-९०.

पुरुषपरिकल्पना, पुरुषमोहः - वेदवाक्यस्य सापेक्षत्वसंभावना पुरुषपरिकल्पना, ३-९४ ; वाक्यप्रत्यक्षयोर्विरोधाशङ्का पुरुषमोहात्, ३-९६.

पुरुषार्थः - अनर्थः अनर्थहेतुः, पुरुषार्थः तद्धेतुश्च प्रकरणार्थः, ज्ञानं पुरुषार्थहेतुः, १-७ ; आत्मज्ञानं पुरुषार्थसिद्धौ रूपान्तरं साधनान्तरं वा नापेक्षते, १-३६ ; तत्पदार्थः त्वमर्थेन अपृथगर्थः सद्वतीयत्वं निहन्ति, अज्ञातपुरुषार्थत्वात्, ३-८०.

प्रतिपत्तिः - ऐकात्म्याप्रतिपत्तिरविद्या, १-७ ; वाक्यार्थाप्रतिपत्तौ कारणं त्वंपदार्थानभिज्ञता, २-१, ८ ; देहस्यानात्मत्वप्रतिपत्तौ रागद्वेषाद्यभावः, २-१६, १८ ; आत्मा नित्यप्रतिपन्नस्वभावः, २-११८ ; अवाक्यार्थप्रतिपत्तये विशेषणविशेष्ययोः सामर्थ्यम्, ३-१० ; देहाद्यनात्मत्वप्रतिपत्तावेव आत्मा तदर्थम् आत्मत्वेन आश्रयते, ३-२८, २९ ; सामान्यवाचि पदं श्रुत्यादिप्रतिबद्धं सत् विशेषार्थप्रत्तिहेतुर्भवति, ३-३२.

प्रतिज्ञाहेतुदृष्टान्तन्यायः - प्रतिज्ञादिवत् इतरेतरसाचिव्येन न प्रमाणानाम् अर्थावबोधकत्वम्, प्रत्येकं प्रमात्वात्, ३-८६.

प्रतिपत्तिकम् - स्वयंप्राप्तस्य कर्मणो विधानम्, १-८०.

प्रत्यक्प्रवणता - बुद्धेः प्रत्यक्प्रवणताम् उत्पाद्य कर्माणि अस्तं यन्ति, १-४९ ; चित्तस्य प्रत्यक्प्र-वणतायां वाक्यार्थज्ञानम्, १-५२ ; प्रत्यक्प्रवणुद्धय एव एतत्प्रकरणार्थं जानीयुः ४-७३.

प्रत्यक्षादयः - अनवबोधविषयस्य आत्मनः प्रत्यक्षादिलौकिकप्रमाणाविषयत्वम् (अव.) ; २-१, ३-४५, ४८ ; आत्मानात्मविभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपतितः, २-१०३ ; वाक्य-ज्ञानस्यैव न प्रत्यक्षादिप्रमाणान्तरैर्विरोधः, यदि क्वचित् विरोध इव तर्हि तत्र तद्दृष्टिविध्यर्थम्, ३-८१ ; अथवा वाक्यं प्रत्यक्षादि वा प्रमाणाभासः स्यात्, ३-८५ ; आत्मनः सुखदुःखादिसंबन्धो न प्रत्यक्षाद्यैरवगम्यते, ३-८७ ; आत्मनो निर्दुःखित्वस्य स्वतःसिद्धेर्वाक्यमेव प्रबलं प्रत्यक्षादिभ्यः ३-९४ ; आत्मा अनात्मा च प्रत्यक्षादिप्रमाणतः सिद्धः, ४-३.

प्रत्यक्षम् - अनुभवसिद्धम् । ज्ञानात् फलम् अनुभवसिद्धम्, १-९०.

प्रमितिप्रमाणप्रमेयप्रमातृलक्षणः - प्रमात्रादय आत्माऽऽनवबोधोपादानाः, २-१०६ ; एतल्लक्षणः संसारः । एष मिथ्याध्यासः, ३-१ । ('ग्रहीतृग्रहणग्राह्यगृहीतयः', 'द्रष्टृदर्शनदृश्याः' इत्येदुभय-मपि द्रष्टव्यम् ।) प्रमातृप्रमाणप्रमेयेभ्यो हीयमानोपादीयमानेभ्यो अन्वयव्यतिरेकाभ्याम् आत्मानं निष्कृष्य विजानीयात्, ३-४६ ; प्रमातृप्रमाणप्रमेयव्यवहारः पराचीनविषय एव, ३-५२.

प्रमाणम् - लौकिकप्रमाणसिद्धान्येव साधनान्युपादाय हितप्राप्तये अहितनिरासाय च प्रवर्तते लोकः १-२९ ; मिथ्याज्ञानमेव प्रवृत्तिनिमित्तमिति प्रत्यक्षानुमानागमप्रमाणैः सिद्धम्, १-३० ; न च बाहुल्यं प्रामाण्ये कारणम्, १-८६ ; ऐकात्म्यं न प्रमाणबलेन सिध्यति, १-८१ ; सर्वप्रमाणानामपि प्रमेयप्रतिपादनम्, वाक्यस्यापि तथैव, २-५ ; प्रमाणप्रमाभासयोर्व्यभिचारिणोः संविद्रूपस्यात्मनो नोच्छित्तिः, २-७८ ; श्रुतिप्रामाण्यम्, ३-३५..३८ ; प्रमाणानां प्रत्येकं प्रामाण्यम्, ३-८६ ; प्रमाणं सत् न प्रमाणान्तरेण विरुध्यते, ३-९६ ; अपूर्वाधिगमम् अकुर्वत् नैव प्रमाणम्, ३-८३, १२२ ; दुःखित्वं प्रमाणमूलं चेत् नैव केनापि वार्येत, ३-८८ ; यत्प्रतिपादयितुं प्रवृत्तं वाक्यं तत्र प्रमां नोत्पादयेत् चेत्, तस्य प्रामाण्यमेव कथम्, ३-१२२.

प्रमा, प्रमितिः - प्रमाणकर्मण्येव प्रमा न्याय्या, न कर्तरि, ३-८७ ; प्रसंख्यानं दुःखित्वं निवर्त-

येच्चेत्, प्रत्यक्षविरुद्धत्वात् न प्रमामुत्पादयेत्, ३-८९ ; प्रमाणानि न प्रमितिवर्धनया परिपूर्णाम् अवगतिं जनयन्ति, ३-९० ; दुःख्यस्मीति बहोः कालादुपचिता भावना प्रसंख्यानाद् ध्वस्ता चेत्, स्वल्पीयोऽभ्यासाज्जाता भावना स्थिरा भविष्यतीति का प्रमा ? ३-९२ ; वाक्यं प्रत्यक्षादिविरोधिनीं प्रमां जनयति चेत्, प्रत्यक्षतां गौणीं ब्रूयात्, ३-९६ ; वाक्यं यत्परं तत्र प्रमां नोत्पादयेच्चेत् तस्य कथं प्रामाण्यम् ? ३-१२२.

प्रमेयः - आत्मनः सर्वप्रमेयवैलक्षण्यम्, २-१ ; प्रमित्सायां प्रमातृप्रमाणयोर्यः स्वतःसिद्ध आभाति, स एव सन्नज्ञातः प्रमेयः, ३-८.

प्रवृत्तिः - कर्मप्रवृत्तौ मिथ्याज्ञानमेव निमित्तम् १-२९ ; देहादिव्यतिरिक्तात्मवादिनामपि मिथ्याज्ञानत एव प्रवृत्तिः १-९२ ; ज्ञानिनः परामर्थदृष्ट्या न प्रवृत्तिर्निवृत्तिर्वा, ४-५४ ; कर्मप्रवृत्तिबीजस्य उच्छिन्नत्वात् निवृत्त्यैव तनुक्षयः, न कर्मसु प्रवृत्तिः, ४-६१ ; प्रवृत्ति-निवृत्त्योरविद्याकार्यत्वम्, ४-६९.

प्रसंख्यानम् - वाक्यज्ञानयुक्त्योरभ्यासः । प्रसंख्यानवादस्य निराकरणम्, ३-८२, ८८.... ९३, ११७...१२५ ; श्रवणादावेव प्रसंख्यानमस्ति, ३-१२५.

फ

फलम् - काम्यकर्मणः फलं स्वर्गादि, दुरितक्षपणं चित्तशुद्धिश्च नित्यस्य, १-२६, ४७ ; ज्ञानम् उत्पत्तिसमकाले एव फलदायि, १-९० ; प्रमेयाणाम् अनुभूतिफलार्थित्वम्, न स्वात्मनः, २-९९ ; प्रमेयेषु अनधिगताधिगमः प्रमाणफलम्, आत्मनि तु अविद्यानाश-मात्रम् इत्युपचर्यते, २-१०५.

ब

बलवत् - सम्यग्ज्ञानं प्रमाणोत्थत्वात् अज्ञानापेक्षया बलवत्, १-३६, ३८ ; वाक्योत्थप्रत्यय एव बलीयान् प्रत्यक्षाद्यपेक्षया, ३-९४, ९५.

बाध्यबाधकभावः - विद्याम् अविद्या नैव बाधते, १-३८ ; ज्ञानकर्मणोर्बाध्यबाधकभावः, १-५५ ; तत्त्वमर्थयोरद्वितीयत्वप्रत्यक्त्वयोः दुःखित्वसद्वितीयत्वबाधकत्वे कारणम्, ३-७९, ८० ; प्रत्यक्षागमयोर्विरोधे बाध्यबाधकभावः, ३-८५ ; बोधाबोधौ बाध्यबाधकात्मकावपि आत्मानं न स्पृशतः, ३-१०७.

बुद्धिः, धीः - (१) अन्तःकरणम् । यदा कामेभ्यो व्युत्थिता, तदा आत्मानं प्रविवक्षति, १-४८ ; आत्मा बुद्धेः साक्षी, १-१, २-८० ; भानोर्जलपात्रकैरिव बुद्धिभिरात्मनः स्वरूपा-

पहारः, भेदश्च, २-४८, ४९ ; परिणामिनीं बुद्धिं कूटस्थ आत्मा वीक्षते, २-७१...७५ ; धीविक्रियासहस्राणां साक्षी आत्मा, २-७७ ; धियः सकाशात् आत्मानं विविच्य ज्ञेयम्, २-९७ ; बुद्ध्यादयो व्यवधीयन्ते, न त्वात्मा, २-९८ ; धीरन्यस्मात् सिध्यति, आत्मा तु स्वयं सिध्यति, २-११० ; आत्मनो व्यतिरेकेण बुद्धिदेहघटादयः षष्ठगोचरकल्पाः, २-११४.

(२) **बुद्धिवृत्तिः** - पुंधिया स्थाणुधीरिव, ब्रह्मास्मीति धिया अहंबुद्धिर्निवर्त्यते, २-२९ ; निवृत्तायामहंबुद्धौ ममधीः प्रविलीयते, २-३० ; अविक्रियस्य आत्मनः अहंबुद्धिविभ्रमाद् भोक्तृत्वम्, २-६३ ; परमात्मा सर्वधीवृत्तीनाम् अविक्रिय एवाभिव्यञ्जकः, २-६६ ; आत्मा शब्दाद्याकारनिर्भासा धियो व्याप्नोतीव, २-६९ ; बुद्धेरुत्पत्तिस्थितिनाशेषु नोत्पत्त्यादयः स्युरात्मनः, २-७९ ; अवगतेरेकत्वात् चण्डालबुद्धेर्यद्द्रष्टृ, तदेव ब्रह्मबुद्धिदृक्, न भिन्नम्, २-८८ ; घटबुद्धेः, घटाच्च यथा दृष्टुर्भिन्नत्वम्, एवम् अहंबुद्धेरहंगम्याच्च दुःखिनोऽपि आत्मनो भिन्नत्वम्, २-१००.

बुद्ध्यादिदेहान्ताः - देहादिबुद्ध्यन्ताः - एतेऽपि अनात्मन एव, २-१५, ४४, ४-४ ; बुद्ध्यादीनामनात्मत्वमन्वयव्यतिरेकाभ्यां लिङ्गात् सिध्यति, ३-३३.

बोधः - (१) ज्ञानम् । यद्यहङ्कारोऽपि आत्मधर्मः स्यात् तस्य बोधवत् स्यान्नित्यत्वम्, २-३३.

(२) **सम्यग्ज्ञानम्** - बोधात् प्रागपि अन्यदेहोत्थं दुःखं नास्ति, बोधादूर्ध्वं कुतः स्यात् ? २-९०.

(३) **अवगतिः** - यस्य बोधेऽप्यनुभवो न जायते, तं कथं शास्त्रं बोधयेत्, ३-३८.

बोद्धृत्वम् - ज्ञातृत्वम् । कूटस्थबोधात् बोद्धृत्वमात्मनः, बुद्धेस्तु आत्मबोधहेतुकं प्रत्ययोत्पत्तिहेतुतः ३-११, १५, १९.

ब्रह्म - परमात्मा । अनानात्वे ब्रह्मणि यथा न ज्ञानकर्मसमुच्चयो घटते, एवं नानारसब्रह्मवादेऽपि न घटते, १-६८ ; 'अहं ब्रह्म' इति विज्ञानं संसर्गात्मकत्वात् न वस्तुयाथात्म्यावगाहि - इति मतं न साधु, १-६७ ; सर्व एवाम्नायः क्रियार्थ इति न जैमिनेर्मतम्, अत एव 'अथातो ब्रह्मजिज्ञासा' इत्येवमादिब्रह्मवस्तुस्वरूपमात्रयाथात्म्यप्रकाशनपरं शारीरकं बादरायणोऽसूत्रयत्, १-९१ ; ब्रह्मास्मीतिधिया अहंबुद्धिः निवर्त्यते, २-२९, ३-९ ; 'अहं ब्रह्म' इति वाक्यतोऽहं ब्रह्मणो न धर्मो भवति २-२८ ; यदैव ब्रह्मास्मीत्यवगतिः, तदैव गीर्मनसोः सृतिमत्येति, ३-१ ; ज्ञानित्वाज्ञानित्वे ब्रह्मव्यतिरिक्ते इति यो जानाति स ब्रह्मविदुत्तमः, ४-५३ ; ब्रह्मसंस्थं शङ्करमभ्यर्च्य इदं ज्ञानं प्रकरणे उक्तम्, ४-७६.

भ

भावना - भावनोपचयात्र मुक्तिः, १-६७ ; अभ्यासलक्षणं प्रसंख्यानम् ऐकाग्र्यजनिता भावनैव, अतः नैकान्तिकफलकं तत्, ३-९१, ९२, ९३.

भावाभावौ - अहं देहादिरिति भावरूपं ज्ञानं नाहं देहादिः - इतिरूपात् अन्वयव्यतिरेकाभ्याम् अपगच्छति, अभावादपि व्यावृत्तिर्वाक्यादेव, ३-११३, ११४, ११५.

भिन्नसाक्षी, भिन्नसाधनः - द्रष्टृदर्शनादीनां ज्ञेयत्वं भिन्नसाधनम्, २-१०६ ; ग्राहकादीनामभावो भिन्नसाक्षिकः न ग्राहकादिनिष्ठः २-१०९.

भिन्नाभिन्नम् - ब्रह्मणो जीवाद् भिन्नाभिन्नत्वम् इति मतम् व्याहतम्,१-७८.

भेदः, भिदा, नानात्वम् - द्वैतस्य स्वयम् अवगतिरूपेण वा नानात्वं नास्ति, २-११२ ; इदं ज्ञानं भेदज्ञानम्, साक्षिणि भेदाभावज्ञानम् - इति विवेकोऽपि अविद्याकार्यम्, ३-६ ; आत्मनो बोधप्रत्यक्त्वयोर्न भेदः । अहंतद्विदोस्तु भिदा अस्ति, ३-१३, १४.

भ्रान्तिः - मोहः, मिथ्याज्ञानम् । भ्रान्त्या लब्धमेव लिप्सते, परिहृतमेव च परिजिहीर्षति, १-३१, ३२ ; भ्रान्तिज्ञानमेव स्वप्रवृत्तिनिवृत्तिनिमित्तम्, १-२१, ३० ; भ्रान्तिरेव रज्जुसर्पदर्शने कारणम्, २-३१ ; भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी च, अतो विचारं न सहते, ३-६६.

म

मम - ममत्वं नात्मधर्मः, २-२२; अहंबुद्धौ निवृत्तायां ममबुद्धिरपि निवर्तते, २-३० ; इदंज्ञानं ज्ञातुः स्यादज्ञानात्, अहमो विकारात् विषयस्योपकारित्वापकारित्वनिमित्तं ममबुद्धिः स्यात्, ३-६० ; ज्ञातुः अहंकारेणानुपक्रियमाणत्वात् न 'मम' स्यात्, अज्ञानव्यपाश्रयात् 'इदं' तु स्यात्, ३-६१ ; सुषुप्तौ अहंबुद्धिर्ममबुद्धिर्वा नास्ति, ३-६२ ; वाक्यज्ञानात् आत्मत्वं प्राप्तस्य 'अहम्' इति वा 'मम' इति वा मतिर्न स्यादेव, अज्ञानस्य नष्टत्वात्, २-११७.

मिथ्याज्ञानम्, अन्यथामतिः - अनात्मसु आत्मेति ज्ञानं मिथ्याज्ञानम् इति सांख्यमतं न सम्यक्, ३-६ ; मिथ्याज्ञानव्यतिरेकेण अज्ञानस्य अवस्तुत्वात् तस्य न संसारकारणत्वम् इति भाट्टमतं न साधु, ३-७ ; सकृदुत्पन्नमात्रम् ज्ञानं ध्वान्तं निरस्यति, अन्यथामतिः न तदन्या, ४-५७.

मिथ्याध्यासः - अहंममत्वादिः आत्मनि मिथ्याध्यास एव, २-११६ ; प्रमितिप्रमाणप्रमेयप्रमातृलक्षणो मिथ्याध्यास एव, ३-१ ; मिथ्यासिद्धम् (द्वैतम्), २-४४, ४५ ; मिथ्यास्वभावो (भेदः) २-९५ - इति च मिथ्याध्यासपर्यायौ ॥

मीमांसकः - अहंप्रत्ययग्राह्यत्वात् ग्राहक आत्मा इति मीमांसकमतम् तत्खण्डनं च, २-२४, २५, २७.

मुक्तिः मोक्षः - अविद्यानाश एव मुक्तिः, १-७ ; कर्मणैव मुक्तिरिति मतम्, १-९, २१ ; तत्खण्डनम्, १-२२-२८ ; न कर्म मुक्तिसाधनम्, अपि तु ज्ञानमेव, १-२१....३७ ; कर्म परम्परया मोक्षसाधनम्, १-४५...५२ ; ज्ञानं मोक्षस्य निरपेक्षसाधनम् अतो ज्ञानकर्म-समुच्चयो मोक्षसाधनम् इति मतम् अयुक्तम्, १-५४...७९ ; कर्मणैव मुक्तिरिति वादिनां निरासः, १-८०...९५ ; मुक्तिहेतोर्ज्ञानस्य अपुरुषतन्त्रत्वम्, १-८८, कर्मणैव न मुक्तिः ज्ञानादेव तु सा, १-९९, १००.

मुमुक्षुत्वम् - वैराग्यानन्तरं मुमुक्षुत्वम्, १-५२ ; मुमुक्षुभिः नित्यं नैमित्तिकं च कर्म सदैव कार्यम्, १-५० ; अमुमुक्षोर्गुरूपसर्पणं नास्ति २-७, मुमुक्षोः श्रुतिवाक्यात् 'नाहं न च मम' इति निश्चिता प्रमा जायते, २-११७.

मोहः - अज्ञानम् । वेदान्तवाक्यजन्यज्ञानमेव मोहं नाशयति, १-८ ; मोहात् हितप्रेप्सा अहितजिहासा च, १-२९, ३२ ; परिहृतावाप्तयोः बोधादेव हानावाप्तिः मोहमात्रान्तराय-त्वात् तयोः, १-३४ ; प्राप्तब्रह्मणः मोहमात्रपिधानत्वात्, ब्रह्मप्राप्तौ कर्म निरर्थकम्, १-६९, ७० ; द्वैतं मोहमूलम्, २-४४ ; बुद्ध्यादीनां मोहमात्रोपादानत्वम्, २-९९ ; निवृत्तमोहोऽपि निवृत्तसर्पः कम्पमिव मोहकार्यं न मुञ्चति, ४-६०.

य

यथावस्थित, यथाभूत - यथावस्थितवस्तुविषयं सम्यग्ज्ञानम्, १-२९ ; तत्त्वमस्यादिवाक्यानि यथावस्थितवस्तुयाथात्म्यान्वाख्याननिष्ठानि, ३-४७ ; वाक्यश्रवणं यथाभूतार्थप्रतिपत्तये, ३-६४.

यथेष्टाचरणम् - ज्ञानिनो मुमुक्षोर्वा यथेष्टाचरणं नास्ति, ४-६२...६७.

योगाभ्यासः - ध्यानाभ्यासः । एतदनन्तरं चित्तस्य प्रत्यक्प्रवणता, १-५२.

र

रागद्वेषौ - एतयोः शोभनाशोभनाध्यासनिबन्धनत्वम्, (अव.)

ल

लक्ष्यलक्षणभावः - वाक्यस्थपदार्थप्रत्यगात्मनोर्लक्ष्यलक्षणभावः, ३-३, ११, २६.

लौकिकम् - प्रत्यक्षादीनि लौकिकप्रमाणानि, (अव.) ; लौकिकप्रमाणसिद्धान्येव साधनान्युपादाय हितप्राप्तये अहितनिरासाय च प्रवर्तन्ते, १-२९ ; आत्मनो भिन्नाभिन्नं ब्रह्म - इति चेत् विरोधः, अलौकिकत्वं वा भिन्नाभिन्नपदार्थयोः १-७८ ; आत्मानात्मनोः स्वतः परतः सिद्धयोः लौकिकरज्जुसर्पाध्यारोपवत् अविद्योपाश्रय एव इतरेतराध्यारोपः, २-१०१ ; लौकिकप्रमेय-वैलक्षण्यम् आत्मनः, २-१०५ ; लौकिकप्रमाणानधिगम्यो वाक्यार्थः, ३-५३.

व

वस्तु - वस्तुमात्रबोधकं वाक्यजन्यज्ञानम्, १-३, १९ ; आत्मवस्तुयाथात्म्यावबोधादेव परमपुरुषार्थः, १-३५ ; अयथावस्तु अज्ञानम्, विद्या तस्य विरोधिनी, १-५६ ; ज्ञानस्य वस्तुतन्त्रत्वम्, कर्मणः अवस्तुतन्त्रत्वं च, १-७६ ; क्रियाकारकफलात्मक आभासः ईषदपि परमार्थवस्तु न स्पृशति, २-५१ ; वस्त्वेकनिष्ठं वाक्यम्, ३-८२.

वाक्यम् - वेदान्तागमवाक्यादेव सम्यग्ज्ञानम्, (अव.) १-८ ; वेदान्तवाक्यजनितज्ञानम् अभ्यस्यत एवोपासकस्य कालादज्ञानमपगच्छति ; तदभ्यासेन अन्यदेव अवाक्यार्थज्ञानम् उत्पद्यते अज्ञानोत्सारि - इति च मते न युक्ते, १-६७ ; ऐकात्म्यं न वाक्यैकगम्यम्, अनुभवमात्रस्वरूपं तत्, १-८९ ; तत्त्वमस्यादिवाक्यानां न कर्मार्थता, १-९१ ; तत्त्वमस्यादिवाक्यानां स्वतःसिद्धार्थ-बोधनात् अर्थान्तरं न शक्यं युक्तं वा कल्पयितुम्, १-९८, ३-११९ ; अहं ब्रह्मेति वाक्यं न प्रमामुत्पादयतीति चेत् तस्य प्रामाण्यमेव हीयते, ३-१२२.

विधिः - प्राप्तप्राप्तौ न विधिरपेक्ष्यते, १-३४, ७३ ; कामानामानन्त्यात् काम्यानि कर्माणि बहूनि श्रुतिस्मृतिषु विधीयन्ते, १-८५ ; आत्मज्ञानसाधनविधायिन्योऽपि श्रुतयः सन्ति, १-८७ ; ज्ञानविध्यङ्गीकारेऽपि नियमविधिः परिसङ्ख्याविधिर्वा स्यात्, १-८८ ; विधिमन्तरेण न किमपि कार्यमिति कालान्तरफलदायिकर्मविषयं स्याद् वचः । न तूत्पत्तिकाले एव फलदायिनि ज्ञाने एवम्, १-९० ; अन्वयव्यतिरेकन्यायो विधिपरिप्रापितः, ३-४ ; त्वमर्थावबोधाय विधिरप्याश्रीयते, ३-१२६.

विशेषणविशेष्यभावः - तत्पदार्थत्वंपदार्थयोर्विशेषणविशेष्यभावेन दुःखित्वानात्मत्ववारणे स्याताम्, ३-२, ३-१०.

वीक्षापन्नः - अन्वयव्यतिरेकाभ्याम् अनात्मानं त्यक्त्वा कोऽस्मीति वीक्षापन्नस्य 'तत्त्वम्' इत्याह श्रुतिः, ३-५, ५३ ; ४-३४.

वेदान्तः, वेदावसानम् - उपनिषत् । वेदान्ते संसारोत्सारि ज्ञानम् प्रतिपादितमस्ति, १-३,

४-७७ ; वेदावसानवाक्योत्थज्ञानमेवाज्ञानं दन्दहीति, १-८ ; सर्ववेदान्तनिश्चितं ज्ञानम् इह प्रकरणे उक्तम्, ४-५२.

वैराग्यम् - नित्यकर्मक्षालितधियो वैराग्यं जायते, १-४५, ४६, ४७.

व्यभिचारि - सर्वस्मिन् व्यभिचारिणि आत्मवस्त्वेव अव्यभिचारि, २-७८ ; वाक्योत्थं ज्ञानं अव्यभिचारि, प्रत्यक्षादिस्तु व्यभिचारी, ३-९४.

श

शब्दः - (१) शाब्दप्रत्यक्षयोर्न विरोधः, ३-८५ ; षष्ठीगुणक्रियाजातिरूढयः शब्दप्रवृत्तिहेतवः, त एते आत्मनि न सन्ति, ३-१०३ ; वेदरूपः शब्दोऽभिधानाभिधेयत्वसंबन्धाङ्गीकारेण नात्मनि वर्तते, ३-१०४ ; सुप्तपुरुषबोधकवाक्यवत् शब्दः आत्मनि ज्ञानं जनयति, ३-१०५.

(२) शब्दः - गुणविशेषः । प्रत्यक्षवाक्यजन्ययोर्विरोध इति वचनम् 'नायं शब्दः यस्मात् चक्षुषा रूपं पश्यामि' इतिवदभिधानमात्रम्, ३-७४.

शरीरादिबुद्ध्यन्ताः - देहादिबुद्ध्यन्ताः । शरीरेन्द्रियमनोबुद्धिषु अनात्मसु आत्मेति निःसन्धिबन्धनं मिथ्याज्ञानमेव अज्ञानम्, तद्व्यतिरिक्तं नास्ति वाक्यनिवार्यमज्ञानमिति साङ्ख्यचोद्यम्, ३-६ ; शरीरादिबुद्धिपर्यन्तोऽनात्मैवेति निश्चितवतोऽपि न बुभुत्सातो निवृत्तिः, ४-१०.

शारीरकम् - बादरायणीयं शास्त्रम् ; न कर्मार्थमेतत्, १-९१.

शास्त्रम्, श्रुतिः - (१) वेदान्ताः । निवृत्तिशास्त्रं नाभ्युपगम्यते, मीमांसकानुयायिभिः, १-२९; विधिप्रतिषेधशास्त्रेषु अनवबुद्धवस्तुयाथात्म्य एवाधिक्रियते, १-३१; ज्ञानी श्रुतेर्मूर्ध्नि वर्तते, १-४०; नैष्कर्म्यप्रवणाः श्रुतयोऽपि सन्ति, १-८७; हितं प्रेप्सताम् अहितं च जिहासतां उपायान् शास्त्रं भासयते, १-२९; शास्त्रं न पदार्थशक्त्याधानकृत्, १-३०, ३-९३; शास्त्रबलात् प्रसङ्ख्यानजस्यापि स्थास्नुत्वं स्यादिति न सम्यक्, ३-९३; युष्मदर्थे परित्यक्ते वीक्षापत्रस्य श्रुतिः 'तत्त्वमसि' इत्याह, ३-५, ५३; बौद्धाः श्रुतिमनादृत्य केवलमनुमानमाश्रिताः, ३-३४.

(२) तात्पर्यलिङ्गेषु प्रथमम् । सामान्यप्रवृत्तिपरं श्रुत्यादिप्रतिबद्धं विशेषार्थं भवेत्, ३-३२.

(३) श्रवणम् । प्रसङ्ख्यानं निराकुर्वद्भिरपि श्रवणे अभ्यासः स्वीक्रियते, ३-१२५.

श्रोतृचतुष्टयम् - (१) कृत्स्नानात्मनिवृतौ यः प्रत्यगात्मन्यवाक्यार्थतां प्रतिपद्यते,

(२) वाक्यश्रवणमात्रादेव यः प्रतिपद्यते, (३) श्रावितत्त्वमसिवाक्यः स्वयमेवान्वयव्यतिरेकौ कृत्वा अवाक्यार्थं प्रतिपद्यते, (४) अन्वयव्यतिरेकौ कारयित्वापि पुनःपुनर्वाक्यं श्राव्यते यः - इति श्रोतृचतुष्टये चरम एवास्य ग्रन्थस्याधिकारी, ३-६४.

ष

षड्भावविकाराः - आत्मना व्याप्तमेव परिणामिधियां वृत्तं षड्भावविक्रियाम् एति, २-८२; आत्मनि जायते, अस्ति, वर्धते, परिणमते, अपक्षीयते, नश्यति - इति षडपि विकारा न सन्ति, २-८५.

षष्ठगोचरः - पञ्चेन्द्रियव्यतिरिक्तार्थकल्पः, निःस्वरूपः । बुद्ध्यादयो आत्मनो व्यतिरेकेण षष्ठगोचरतुल्याः न सन्त्येव, २-११४.

षष्ठी - संबन्धः । षष्ठीगुणादयः शब्दप्रवृत्तिनिमित्ता आत्मनि न सन्ति, ३-१०३.

स

संशयः - सर्वत्रानादरनिमित्तं प्रमाणस्य प्रतिपन्नप्रतिपादनम्, विपरीतप्रतिपादनं वा, संशयितप्रतिपादनं वा, ३-३५ ; यत्र संशयः स्यात् नासौ आत्मा ; आत्मनोऽवगतिरूपत्वात् तत्र संशयप्राप्तिर्नास्ति, ३-३७ ; आत्मनि संशयानवतारात् अप्रमेयः, सः, ३-४७, ४८.

संसर्गः - वाक्यस्थम् उद्दिश्यमानम् उद्देशनगुणान्वितं आकाङ्क्षितपदार्थेन संसर्गं न प्रतिपद्यते, ३-२५; अहं ब्रह्मेति वाक्यजनितं विज्ञानं संसर्गात्मकमिति मतं न सम्यक्, १-६७, ३-७६; तत्त्वमसिवाक्यात् भेदसंसर्गरहितोऽवाक्यार्थो गम्यते, ३-२६, ७६.

संसारः, संसृतिः - वेदान्तज्ञानं संसारोत्सारि, १-३; अविद्या संसृतेर्बीजम् काममूला संसृतिः, १-४६; अविद्यान्वयेन संसारान्वयः, १-३९; ग्रहीत्राद्यात्मकः संसारः, अनात्मा आत्मानवबोधमात्राश्रयः, २-९७; ग्रहीतृग्रहणादिरूपोऽनात्मा, २-९७; संसारिता अद्वितीयेन विरुध्यते, ३-७९ ; संसारबीजाविद्यासंस्थ एव अन्वयव्यतिरेकलक्षणः, अनात्मत्वात्, ४-१६ ; सकलसंसारप्रविविक्तमात्मानं वाक्यात् प्रतिपद्यते, ४-३८.

सन्नज्ञातः - अज्ञातो ब्रह्मात्मा । सर्वोऽर्थो बुद्धिजन्मनः प्राक् अज्ञात एव, संश्च ; अतः स सन् अज्ञातः, ३-७ः प्रमित्सायां मातृप्रमाणयोः यः स्वयंसिद्ध आभाति स एव सन्नज्ञातः, ३-८.

समस्तव्यस्तम्, सामान्यविशेषयुक्तम् - नानारसं ब्रह्म । समस्तव्यस्तभूतस्य, ब्रह्मस्वरूपेणैव स्थितस्य कर्मणि हेतुर्नास्ति, १-७३ ; सामान्यविशेषरूपाभ्यां ज्ञानिनः आत्मैव कर्म - इत्यतः न नियोगापेक्षाऽस्य, १-७७ ; आत्मा सामान्यविशेषरहितः, ३-१७.

समुच्चयः - कर्मज्ञानसमुच्चयवादनिरसनम्, १-६०, ६६, ६८.

सम्यग्ज्ञानम्, सम्यग्बोधः - प्रमाणोत्थं ज्ञानं बलवत्वात् न बाध्यते, १-३६ ; संसारहेतुभूता-ज्ञानस्य अपनोदाय सम्यग्ज्ञानमेवालम्, १-३७ ; सम्यक्संशयमिथ्याज्ञानरूपेण धीरेव विभज्यते, नात्मा, ३-२० ; सम्यग्बोधः प्रवृत्तिवन्निवृत्तिमपि मृद्नाति, ४-५६ ; सम्यग्ज्ञानेन निवृत्ताज्ञानस्य कार्यं नावशिष्यते, ४-५९.

साक्षी - सदाविलुप्तसाक्षित्वमात्मनो दुरपह्नवम्, २-३६; आत्मा दुःखिनोऽपि साक्षी, धीविक्रियाणां सर्वासां साक्षी, २-७६,७७; ३-४६; आत्मा ग्राहकग्राह्यग्राहिणां हानोपादानयोः साक्षी, २-१०८; इदंज्ञानं भेदसंवित्, साक्षिणि भेदाभावः - इत्येतदपि अविद्याकार्यम्, ३-६; आगमापायिसाक्षिविभागेनान्वयव्यतिरेकन्यायः, ३-५४, ५५.

साङ्ख्याः - साङ्ख्याभ्युपगतप्रकियातो वेदान्तप्रकियाया विशेषः, २-८६, ९७; ३-६.

साध्यसाधने - पारलौकिकः साध्यसाधनभावो वचनादेव, १-२७; कर्म न मुक्तेः साधनम्, १-५३ ; कर्मज्ञानयोः साध्यसाधनभावत्वात् तयोरेककालेऽनवस्थितिः, १-५४ ; ज्ञानम् अज्ञानबाधनं प्रति नान्यत् काङ्क्षते, १-३६ ; ज्ञानोत्पत्तिं प्रति अमानित्वा-दीनि साधनानि, ४-६८, ७०.

सामानाधिकरण्यादिः - तत्त्वमस्यादिवाक्येषु पदानां सामानाधिकरण्यम्, अर्थानां विशेषण-विशेष्यता, पदार्थानां प्रत्यगात्मनश्च लक्ष्यलक्षणसंबन्धश्च, ३-६, ९, ११.

सामान्यविशेषार्थौ - पदं सामान्यं ब्रूते, वाक्यं विशेषार्थम्, ३-३२; वाक्ये स्वप्रधानयोः पदयोर्विरोधाशङ्का सामान्यालिङ्गितत्वात्, ३-७५.

सिद्धिः, राद्धिः - (१) निष्पत्तिः । ज्ञानसिद्धिर्वाक्यादेव-इत्यत्र पूर्वः पक्षः, २-२, ३; वाक्यार्थज्ञानसिद्धये अन्वयव्यतिरेकौ उच्येते, २-१०.

(२) ज्ञानम् - आत्मसिद्धौ अनात्मसिद्धिः, १-४; यतो राद्धिः प्रमाणानां स आत्मा कथं तैः सिध्येत् ? २-३७; अनात्मनः न स्वेन न वा आत्मरूपेण सिद्धिः, २-४५; अविद्याप्रसिद्ध्यैव अविद्यासद्भावप्रसिद्धिः, ३-१११, ११२.

सुखदुःखे - दुःखस्य आत्मानवबोध एव हेतुः (अव.); अनागमापायिनोऽपरतन्त्र-सुखस्य अनवबोधः पिधानम् - (अव.); आत्मनस्तु याथात्म्यावबोधमात्रादेव निरतिशय-सुखप्राप्तिः, निःशेषदुःखनिवृत्तिश्च, १-३५ ; आत्मा निरतिशयसुखहितस्वरूपः, (अव.), १-३०; कर्मी दुःखोदधौ जायते म्रियतेऽपि च, १-४२ ; आत्मनो न सुखदुःखादि-भिर्योगः, १-९४.

सुप्तः, सुषुप्तम् - आत्मनोऽहङ्कारो धर्मश्चेत् मुक्तिसुषुप्तयोर्यायात्, २-३२ ; सुषुप्तादुत्थितो

'नाज्ञासिषम्' इति प्राह, तेन अहं परमात्मनो लक्षणं भवति, २-५४; यत्साक्षिकौ जाग्रत्स्वप्नसुषुप्तीनाम् आगमापायौ स आत्मा-इति ज्ञानं लिङ्गाधीनम्, ३-५७; सुषुप्तौ अज्ञानमस्ति, ३-५८ ; अहंविकारशून्यत्वात् अज्ञानकृतज्ञातृत्वशून्यत्वाच्च सुषुप्ते नेदंज्ञानम्, न च ममज्ञानम्, ३-६२ ; सुषुप्तौ न किञ्चिदज्ञासिषम् - इति आत्मनश्चैतन्यदृष्टिं न वारयति, प्रत्ययं तु निषेधति, ४-२३.

सूक्ष्मदेहः - अहंममत्वयत्नेच्छादयः । सूक्ष्मदेहात्मबुद्धिनिराकरणम्, २-२२....४३.

स्वतः, स्वयम् - आत्मा स्वतःसिद्धः (अव.), १-३६, ८९,९७; स्वतःसिद्धपरतःसिद्धयोः आत्मानात्मनोरितरेतराध्यारोपः अविद्योपाश्रयः, २-१०१; स्वतःसिद्धां संविदमाश्रित्य धियो बोधाः, तानाश्रित्य घटादयश्च सिध्यन्ति, २-११५; आत्मा स्वयंज्योतिः, ३-४१; आत्मा स्वतो मुक्तः, ३-४२; आत्मा स्वतो बुद्धः, ३-४९.

स्वप्नः, स्वापः - स्वप्ननिमित्तोत्सारितनिद्रस्येव मुमुक्षोः वाक्यात् 'नाहम्, न च मम' - इति विज्ञानं जायते, २-११७ ; स्वापप्रबोधितो यथा स्वाप्नप्रकरणादिकं न पश्यति, एवं श्रुतिबोधितः गुरुशास्त्रादिकं न पश्यति, ४-३६, ३७ ; सुषुप्ताग्रहणमेव स्वप्नप्रबोधयोर्बीजम्, ४-४०, ४३ ; अन्यथाग्रहणमेव स्वप्नः, ४-४२; आत्मा सुषुप्तिस्वप्नजागरितलक्षणेषु तिसृष्वप्यवस्थासु द्वितीयं नैव पश्यति, ४-४८.

स्वार्थः - (१) न परावलम्बनः । आत्मा स्वार्थः सर्वदेहेषु परार्थां बुद्धिं पश्यति, २-७४; आत्मा स्वार्थत्वात् प्रत्यक्षादिभिर्न प्रमीयते, ३-४८.

(२) स्वाभिधेयम् । यथा विधिवाक्यानाम् स्वार्थमात्रे प्रामाण्यम् तथा ऐकात्म्यवाक्यानामपि स्वार्थमात्रे प्रामाण्यम् १-९१.

ह

हानोपादाने - अज्ञानहानमात्रं मुक्तिः, १-२४; परिहृतावाप्तयोः बोधादेव हानावाप्तिः, १-३४; आत्मा हानोपादानसाक्षी, हानोपादानवर्जितः, २-१०८; धियः सम्यक्तवादीनां हानोपादानता दृशौ अध्यस्यते, ३-२०, २१ ; प्रमात्रादिभ्यो हीयमानोपादीयमानेभ्योऽन्वयव्यतिरेकाभ्याम् आत्मानं निष्कृष्य विजानीयात्, ३-४६.

हितम् - आत्मा निरतिशयसुखहिताव्यतिरेकः, १-३०; 'हितं मे स्यात्', 'अहितं मे माभूत्' इति प्रवृत्तिनिमित्तं मिथ्याज्ञानम्, १-३०.

हेतुस्वरूपकार्याणि - ज्ञानकर्मणोः हेतुस्वरूपकार्याणि प्रकाशतमसोरिव विरोधीनि, १-६६.

ॐ तत्सत्

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

कतिचन वेदान्तग्रन्थाः; अध्यात्मप्रकाशकार्यालयेन प्रकाशिताः

अध्यात्मप्रकाशकार्यालयप्रकाशितेषु उपनिषद्भाष्येषु विशेषोऽयं यत् (१) 'विषयानुसारेण प्रविभक्तग्रन्थशरीरत्वम्' (२) तत्तद्विभागप्रतिपाद्यविषयसूचकशिरोलेख-निवेशः, (३) पाठान्तरनिर्देशभाष्यान्तरसंवादादिस्थलसूचनापूर्वकं हितमिताघटिप्पणदानम्, (४) विचारप्रचोदिका पीठिका, (५) उपनिषन्मूलस्य स्थूलाक्षरैः भाष्यस्य मध्यगात्राक्षरैः, उपनिषत्सारादि परिशिष्टभागस्य च सामान्यसूक्ष्माक्षरैः - इति चैवं विविधगात्रस्फुटाक्षरैरङ्कनं च इति । सुन्तराक्षरैः शुक्लमसृणपत्रे मुद्रापितानामप्येषां पुस्तकानां गात्राकारानुगुण्येन परिमितमूल्येनैव वितरणे प्रयत्नः कृतः । सर्वत्र टिप्पणव्याख्यानादिकं च नतनतया श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतम् ॥

१. **ईशावास्योपनिषद्भाष्यम् - (१९३२ ; २००२)** ८ + ४८ = ५६ पु.

समूलं सभाष्यटिप्पणयुतं च । उपनिषदो माध्यन्दिनपाठोऽपि दत्तः जिज्ञासूपयोगिमन्त्रानुक्रमणिकाशब्दसूच्यादिसमेतं विचारप्रचोदकपीठिकायुक्तं च ।

२. **केनोपनिषद्भाष्यम् (१९५९)** २० + १११ = १३१ पु.

ईशावास्यभाष्यवदेव सर्वपरिकरोपेतम् पदभाष्यं वाक्यभाष्यं च । अत्र भाष्यहृदयविसंवादिटीकाभिप्रायाः समालोचिताः । पदवाक्यभाष्ययोरेककर्तृकत्वम-संभावितमिति सविमर्शं पीठिकायामुपपादितं च ॥

३. **काठकोपनिषद्भाष्यम् (१९६२)** ३४ + १५५ = १८९ पु.

केनभाष्यवत् सर्वपरिकरोपेतम् ।

४. **मुण्डकोपनिषद्भाष्यम् (१९६०)** २२ + १३४ = १५२ पु.

कठभाष्यवत् सर्वपरिकरोपेतम् । पीठिकायां न केवलं भाष्यविषयविवेचनम्, किं तु भाष्यतट्टीकाकारयोः मतभेदविमर्शनं च कृतमत्र ॥

५. **माण्डूक्यरहस्यविवृतिः (१९५८, २००२)** १२८ + ४९० = ६१८ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिरनुगृहीतायाम् अन्वर्थाभिधानायामस्यां माण्डूक्योपनिषत्कारिकाव्याख्यायां माण्डूक्योपनिषति तत्कारिकासु च गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादसंमतवेदान्तप्रक्रियानुसारेण तथा विवृतानि यथा मोक्षमाणानां जिज्ञासूनामस्याः श्रवणमननाभ्यां छिद्येरन् सर्वसंशयाः भिद्येत च हृदयग्रन्थिरात्मसत्यानुबोधेन । उपनिषदः कारिकाणां च पार्थक्येन शाङ्कर भाष्यं दमास्ति । श्रीशाङ्करभगवत्पादभाष्यवाक्यर्थश्च प्रतिपदं प्रस्थानत्रयभाष्यान्तरवाक्यान्तरसङ्गानेन मतान्तरदोषाविष्करणपूर्वकं तथा व्याकृतो यथा विशुद्धसंप्रदायाध्वना गतिर्निर्विघ्ना भवेत् पाठकानाम् । विशिष्य च अलातशान्तिप्रकरणे प्राचीनग्रन्थतत्त्वशोधकोत्थापितमतान्तर-

संक्रान्तिशङ्कानिरसनपूर्वकं श्रीगौडपादसंमता वेदांत-प्रक्रिया प्रदर्शिता, पूर्वतनप्रकरणत्रयप्रक्रियया एकवाक्यतां गमिता च । अङ्कलभाषामय्या गैर्वाणवाणीमय्या च भूमिकया श्रीगौडपादसंमतप्रक्रियाया असाधारणं स्वरूपं माहायानिकप्रक्रियातो वैलक्षण्यस्फुटीकरणपूर्वकं हृदयंगमं कृतम् ॥

६. **तैत्तिरीयोपनिषच्छीक्षावल्लीभाष्यम् (१९६१)** २० + ७६ = ९६ पु.

टिप्पण्यादिसर्वपरिकरोपेतं मुण्डकभाष्यवत् ॥

७. **तैत्तिरीयोपनिषद्भाष्यम् : आनन्दवल्ली भृगुवल्ली च (१९६२):** ४०+४०७ = ४४७ पु.

सभाष्यम् - श्रीसच्चिदानन्देन्द्रसरस्वतीनिर्मित 'भाष्यार्थविमर्शिनी' नामव्याख्यासहितम् । व्याख्यायां भाष्याक्षरानुक्रमेणैव विषयोपपादनं कृतम् । भाष्ये अर्वाचीनमतान्तरप्रविष्टवेदान्ति-भिरुत्थाप्यमानशङ्कानां निरसनपूर्वकं विशुद्धशाङ्करप्रक्रियायाः श्रेष्ठ्यं च सम्यगाविष्कृतम् ।

पुस्तकस्यान्ते अनुवाकसूची, उपनिषत्खण्डसूची, अर्थनिर्देशपूर्वकं भाष्यस्थमुख्यशब्दानां सूची, विमर्शिनीगतमुख्यविषयसूची च - इत्येता वर्णानुक्रमसूच्यो निवेशिताः । आंग्लगैर्वाणभूमिकयोः भाष्यगता मुख्यविषयाः सप्रपञ्चं परिशीलिताः - इति सर्वाङ्गसुन्दरं परिष्करणमिदम् ॥

८. **सुगमा (१९५५, १९९९) :** १६ + ११९ = १३५ पु.

अध्यासभाष्यव्याख्या । श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिर्विनिर्मिता । प्रचलितव्याख्यानानां भिन्नभिन्नप्रस्थानावलम्बनत्वात् शुद्धं शाङ्करदर्शनं कीदृशम्, कथं च तदविवादम्, अविरुद्धं च स्यादिति संशयानानां मनःसमाधानाय प्रस्थानत्रयभाष्यैककण्ठ्यम् आदर्शयन्ती सार्वत्रिकानुभवानुसारिवेदान्तप्रक्रियाप्रख्यापनी इयं व्याख्या ॥

९. **सूत्रभाष्यार्थतत्त्वविवेचनी-१ (१९६४) :** १६ + १२२ = १३८ पु.

जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः प्रणीता । सार्वत्रिकानुभवानुसारि शाङ्करं प्रस्थानं स्वासाधारणधर्मविशिष्टं व्याख्यानगत-प्रस्थानान्तरकलङ्करहितं दूरीकृतभाष्यान्तरदुराक्रमं च परिशुद्धरूपेणाविष्कृतमत्र ॥

१०. **सूत्रभाष्यार्थतत्त्वविवेचनी-२ (१९६५) :** १८ + १४६ = १६४ पु.

जन्माद्यधिकरणभाष्यव्याख्या श्री सच्चिदानन्देन्द्रसरस्वतीविरचिता । यथैव जिज्ञासाधिकरणव्याख्यायां ब्रह्मज्ञानसतत्त्वनिर्धारणं कृतम्, एकमेवात्र जगज्जन्मादि-कारणसतत्त्वनिर्धारणं कृतम् सर्ववेदान्तादृताम् अध्यारोपापवाप्रक्रियामनुसृत्य । परिशिष्टे च जिज्ञासाधिकरणभाष्यव्याख्यायामिव सूत्रार्थसंबद्धाः केचन विषयाः भगवत्पादसंमतां वेदान्तप्रक्रियां निर्दिधारयिषूणाम् उपकाराय विचारिताः ।

११. **सूत्रभाष्यार्थतत्त्वाविवेचनी-३ (१९७०) :** २७ + ३१२ = ३३९ पु.

शास्त्रयोनित्वाधिकरणसमन्वयाधिकरणभाष्ययोर्व्याख्या । पूर्ववदेव शुद्धशाङ्कर-

प्रक्रियाप्रकाशिनी । परिशिष्टचिन्तायां शास्त्रप्रमाण्यसतत्त्वविमर्शः, श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता इत्याद्याः विषयाः संकलिताः ।

१२. **शुद्धशाङ्करप्रक्रियाभास्करः (१-२) (१९६४)** ४ + ३८ = ४२ पु.

वेदान्तसिद्धान्तनिर्णयः, शाङ्करसंप्रदायनिर्णयश्च - इति किरणद्वयात्मकः प्रथमो भागः ।

१३. **शुद्धशाङ्करप्रक्रियाभास्करः (३-४-५) (१९६४)** ४ + ४८ = ५२ पु.

अस्मिन् द्वितीये भागे शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्तप्रक्रियास्वरूपम्, अध्यारोपापवादविशेषश्च - इत्येते विषयाः प्रतिपादिताः ।

१४. **शुद्धशाङ्करप्रक्रियाभास्करः (६-७) (१९६५)** ४ + ५० = ५४ पु.

अस्मिन् तृतीये भागे - शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यं स्फुटितम्, शाङ्कराद्वैतस्य बोद्धमतसाम्यशङ्का च परिहृता ।

१५. **गीताशास्त्रार्थविवेक : (१९६६) :** ३० + १९६ = ११६ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिरनुगृहीतोऽयं ग्रन्थः । अल्पकायेनाप्यनेन प्रकरणेन सुचिन्तितेन, श्रीशङ्करभगवत्पादभाष्याद्दत एव वेदान्तार्थो गीताचार्यानुगृहीत इति, स एव चानुसृतः परमपुरुषार्थदायी इति च जिज्ञासवो निःसंशयं विजानीयुः । अत्र प्रप्रथमं साङ्ख्य-योग-कर्म-ध्यान-भक्ति - ज्ञानादिपदार्थानां विवेकः कृतः । तदनु च कर्मयोग - ध्यानयोग - भक्तियोग - ज्ञानयोगानां परस्परसंबन्धो निरुपितः । परिशिष्टे च भागे साङ्ख्ययोगदर्शनाभ्यां गीतादर्शनस्य सालक्षण्यवैलक्षण्ये विवेचिते येन स्पष्टं विज्ञायेत सर्ववेदान्तसिद्धान्त एवं परिशुद्धः स्वीकृतोऽत्र शास्त्रे इति ।

१६. **ब्रह्मविद्यारहस्यविवृतिः (१९६९) :** १८ + १३२ = १५० पु.

सगुणनिर्गुणब्रह्मविद्याविवेकेन जिज्ञासूनां निरायासप्रवेशः ब्रह्मणि यथा लभ्येत तथा श्रीचरणैः छान्दोग्योपनिषदोऽष्टमोऽध्यायोऽत्र व्याख्यातः ।

१७. **नैष्कर्म्यसिद्धि : ('क्लेशापहारिणी' व्याख्या सहिता) (१९६८, २००५)**

६८ + ५६६ = ६३४ पु.

व्याख्यानकर्तारः श्रीसुरेश्वराचार्यैः प्रमाणीकृतोपदेशसाहस्रीतः वार्तिकद्वयतश्च श्लोकान् समृद्धत्य वार्तिकप्रस्थानविशुद्धसंप्रदायमाविरकार्षुः । सत्वरं जिज्ञासुभिरवलोकनीया व्याख्येयम् ।

१८. **वेदान्तप्रक्रियाप्रत्यभिज्ञा (१९६४) :** २५० + ६७२ = ८२२ पु.

श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विनिर्मितोऽयं स्वतन्त्रो निबन्धः । तत्रास्मिन् प्रथमे सम्पुटे सर्वत्र वेदान्तेषु अध्यारोपापवादन्यायाश्रया एकैव प्रक्रिया प्राधान्येन परिगृहीतास्ति वेदान्तभियुक्तैरित्येतद्दर्शितमत्र । अस्याः प्रक्रियाया अनातरादेव हेतोः सर्वेऽपि वावदूकाः वेदान्तोपदिष्टमात्मैकत्वमनुभावरूढमापादयितुं नाशक्नुवन्नित्येतच्च निदर्शितम् अतिप्राचीन-

कालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्तविचारेतिहाससङ्क्षेपोपस्थापनेन ।

निस्तृतांग्लभाषामयभूमिकया संस्कृतभाषामयभूमिकया च समलङ्कृतः प्रधानविषयानु-क्रमणिकासंहितश्च ।

१९. वेदान्तबालबोधिनी (१९५९) : ६ + ५४ = ६० पु.

भगवत्पादविरचित प्रातःस्मरणस्तोत्रस्य प्रश्नोत्तररूपं व्याख्यानम् । भाष्यकारोक्तीनां सरणिमेवानुसृत्य वेदान्तसिद्धान्तोऽत्र जिज्ञासूनां हृदयंगमितः ।

२०. वेदान्तडिण्डिमः (१९३५, २००२) : १० + ८० = ९० पु.

सुप्रसिद्धमिदं प्रकरणं भावबोधिन्याख्यया व्याख्यया सहितम् । व्याख्यायां ललितया शैल्या, श्रुतिप्रमाणवचनोदाहरणपूर्वकं श्लोकार्थो विवृतः । युक्त्या समुपबृंहितश्च ।

२१. विसुद्धवेदान्तसारः (१९६८) : १८ + ८६ = १०४ पु.

अत्र जिज्ञासुजनचित्तभूमिकाविशेषानुसारेण अनुभवप्रधानदृष्ट्या मनःप्रधानदृष्ट्या इन्द्रियप्रधानदृष्ट्या चेति वेदान्तोपदेशस्त्रेधा विभज्य प्रदर्शितः ।

२२. विशुद्धवेदान्तपरिभाषा (१९६९) : १६ + १३० = १४६ पु.

ब्रह्म, जगत्, जीव इति पदार्थत्रयस्य सतत्त्वम्, जगद्ब्रह्मणोः जीवब्रह्मणोश्च संबन्धश्च साम्प्रदायिकपरिभाषाजातमवलम्ब्य अत्र निरूपितः ।

२३. शाङ्करं वेदान्तमीमांसाभाष्यम् (स्वयं व्याख्यातम्) (१९७४):१६+१०५=१२१ पु.

बादरायणीयवेदान्तमीमांसाभाष्यस्य उपोद्घातरूपम् अध्यासभाष्यं तत्त्वबुभुत्सूनां कृते गीर्वाणाङ्गलोभयभाषामयविवरणसंवलितम् ।

२४. वेदान्तविद्वद्गोष्ठी (१९६२) : ६६ + ९८ = १६४ पु.

शाङ्करभाष्यतद्व्याख्यानप्रस्थानयोर्वैलक्षण्यमधिकृत्यएकादशविद्वत्प्रकाण्डानामभि-प्रयाः अत्र दत्ताः । विद्वदभिप्रायसंग्राहिका आंग्लभूमिकाविभूषितश्च ।

२५. पञ्चपादिकाप्रस्थानम् (१९६६) : ३४ + १७१ = २०५ पु.

प्रप्रथमोऽयं महान् प्रयत्नः सुरभारतीवाङ्मये पञ्चपादिकाटीकाप्रस्थानस्य सुमहद्वैलक्षण्यं भाष्यप्रस्थानतोऽस्ति, विरोध एवं च कंचित् प्रमेयविशेषसतत्वनिर्धारणे- इति सप्रमाणं निर्णेतुम् । महता आयासेन अत्र नैकानि भाष्यवाक्यानि सङ्कलितानि प्रकरणप्रणेतृभिः श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः यथोक्तं प्रस्थानविरोधावगमं दृढीकर्तुम् । आस्थितश्च प्रथन्तः पण्डितप्रकाण्डान् सकलविद्यानिलयस्थप्राध्यापकांश्च विश्वासयितुं यथा स्वतन्त्रप्रस्थानत्वेनैव एतदुभयं प्रत्यभिज्ञाय भाष्यतट्टीकयोरसङ्कर पृथक्पृथक्पाठनप्रणाली-प्रणयनेन शुद्धशाङ्करप्रस्थानसतत्त्वबोधः सुखतरो लाभप्रदश्च भवेदिति ॥

२६. श्रीशङ्करहृदयम् (१९२९) : ३६ + २३८ = २७३ पु.

शीसच्चिदानन्देन्द्रसरस्वतीभिः पूर्वाश्रमे विनिर्मितं प्रकरणमिदं पूज्यपादानं

श्रीशङ्करभगवत्पादानां वेदान्तप्रक्रियारहस्यभेदकानां गभीरशयं विवृणोति । सर्वत्र चात्र प्रमाणवाक्यान्युदाहृतानि परःशतम् श्रीमद्भाष्यकृतां तत्साक्षादन्तेवासिनां श्रीसुरेश्वराचार्याणां सुप्रसिद्धमाण्डूक्यकारिकाकृतं श्रीगौडपादाचार्याणां च । अनुशाङ्करवेदान्तिभिः संप्रदायविरोधेन नूत्नतया अभ्यूहितस्य औपनिषदप्रक्रियामलिनीकरण-मूलस्य मूलाविद्यावादस्य समूलोत्पाटेनरूपोऽयं निबन्धः सम्यग्दर्शनलालसजनग्राहि-शाष्कतर्कपिशाचोच्चाटने महामन्त्ररूपो विजयते ।

२७. **पारमहंस्यमीमांसा (१९९४) :** १४ + १४६ = १६० पु.

संन्यासाश्रमः कथं शास्त्रेण विहितः, संन्यासस्य प्रकाराः, यतीनां नित्यानि अनुष्ठेयानि, संन्यासिनां मुख्यो ध्येयः, प्रणवचिन्तनस्य प्रकाराः - इत्यादयो विषयाः शाङ्करभाष्यं प्रमाणीकृत्य श्रुतिस्मृतिसङ्गतिपूर्वकं निरूपिता अस्मिन् प्रबन्धे । पारमहंस्यस्य वैशिष्ट्यं सम्यक् दर्शितमत्र । श्री सच्चिदानन्देन्द्रसरस्वतीभिर्विरचितोऽयं ग्रन्थः श्रुतिशङ्करसंस्कृतसंशोधनप्रतिष्ठानम् द्वारा प्रकाशितः ।

२८. **भक्तिचन्द्रिका - नारदभक्तिसूत्राणां व्याख्या (१९९९) :** ८ + २१४ = २२२ पु.

नारदप्रणीतानां भक्तिसूत्राणां व्याख्यारूपोऽयं ग्रन्थः । शाङ्करसूत्रभाष्यशैलीमनु-करोति इयं नूतना व्याख्या । भक्तिविषये संभावितानां सम्भाव्यमानानां बहूनां संशयानां परिहरोऽत्र दर्शितः । भक्तिभावुकैः रसिकैः अवश्यं अवलोकनीयोऽयं ग्रन्थः । कन्नडमूलग्रन्थरचयितारः - श्री स्वामिनः , संस्कृतानुवादकः - विद्वान् वेङ्कटेशशर्मा शास्त्री, होसहल्ली, शिवमोगा ।।

ENGLISH BOOKS

Books Authored by Sri. S.S. Swamiji

Sl. No.	Name of the Book		Price Rs.
1.	NARADA'S APHORISMS ON BHAKTI (The book will serve as a valuable guide to those who wish to tread the path of Bhakti)	32 P.	10 - 00
2.	MINOR WORKS OF SRI SANKARACHAARYA (Contains 16 most popular minor works of Sankara)	68 P.	15 - 00
3.	SANKARA'S CLARIFICATIONS OF CERTAIN VEDANTIC CONCEPTS (Some more deepseated misconceptions among students and scholars of Vedanta are clarified in this valuable text)	90 P.	25 - 00
4.	HOW TO RECOGNISE METHOD OF VEDANTA (Introduction to Sanskrit Text, "Vedanta Prakriya Prathyabhijna of Vedantic thought upto the time of Sarvajnatma Muni)	120 P.	30 - 00
5.	AVASTHATRAYA OR THE UNIQUE METHOD OF VEDANTA (Method of three states of Consciousness, which our real Self transcends. A valuable introduction to the study of Vedanta as a pure philosophy)	16 P.	10 - 00

6.	SALIENT FEATURES OF SANKARA VEDANTA (Presents matter and method of genuine Sankara Vedanta in a small compass)	110 P.	25 - 00
7.	MISCONCEPTIONS ABOUT SANKARA VEDANTA (All criticisms on Vedanta are convincingly solved using the genuine traditional methodology of Sankara Vedanta)	120 P.	25 - 00
8	VISION OF ATMAN (The different aspects of three means of Intuitive knowledge, to wit, Sravana, Manana and Nididhyasana are explained)	120 P.	20 - 00
9.	INTUITION OF REALITY (The Vedantic Knowledge is not mere subtle intellectualism but is intuition of Reality, arising through Divine Grace)	105 P.	20 - 00
10.	UPANISHADIC APPROACH TO REALITY (The Unique Method of teaching Vedanta adopted by Shri Gaudapada, Sankara & Sureshwara)	50 P.	20 - 00
11.	THE SCIENCE OF BEING (Deals with Chapter VI of Chandogya Upanishads. Presents in a nut-shell the true nature of the Science of Being)	124 P.	25 - 00
12.	ESSAYS ON VEDANTA (Contains essential tenets of the Upanishads and the method of approach adopted in them)	167 P.	60 - 00
13.	SUDDA-SAANKARAA-PRAKRIYA-BHAASKARA (Sheds Light on the Vedantic Method according to Sankara determining the real doctrine of Upanishads)	200 P.	50 - 00
14.	SANKARA'S SUTRA BHASHYA (Illustrates to an earnest seeker of Truth, how Sankara Bhashyas are self- explanatory, and do not require guidance of commentators)	125 P.	15 - 00
15.	INTRODUCTION TO VEDANTA TEXTS (Compilation of Introductions from English & Sanskrit works of S. S. Swamiji)	226 P.	40 - 00
16	ISAVASYOPANISHAD (Sankara Bhashya)	66 P.	40 - 00
17.	VEDANTA OR THE SCIENCE OF REALITY (Book Written by Sri K.A. Krishnaswamy Iyer) (Deals with the immediate realisation of Brahman by Intuitive reflection on the witness of the three states of consciousness)	560 P.	120 - 00

BOOKS AUTHORED BY SRI D. B. GANGOLLI I

18.	THE SCIENTIFIC APPROACH OF ADVAITA VEDANTA (Uses the modern audio-visual method with 14 diagrams to depict the fundamentals of Advaita Vedanta)	120 P.	30 - 00
19.	SATCHIDANANDEANDRA SARASWATHI (LIFE SKETCH)	56 P.	15 - 00
20.	THE METHOD OF VEDANTA (Translation of Vedanta Prakriya Pratyabhijna by Dr. A. J. Alston) Representing the first large scale critic of History of Advaita Vedanta, it seeks to establish a clear view of the traditional Advaita Vedanta based on Upanishads as systematised by Sankara)	1004 P.	No Stock

The commentator

Shri Satchidanandendra Sarawati Swamiji - a life of 95 years (1880-1975) dedicated to Shankaracharya

...initiated into the Vedantic learning by H H Shivabhinava Nrisimha Bharati Swamiji, the then pontiff of Sringeri Mutt.

...initiated into Bhakti by the great saint Shri Brahmachaitanya Maharaj of Gondavali.

...he was no mere dry, speculative, scholastic logician.

...presents the school of Gaudapada, Shankara and Sureshwara in its original form.

...with a crusader's zeal, purged the doctrines foreign to and opposed to the Shankara school, attributed to Shankara.

...a prolific writer having authored over two hundred books on Vedanta in Kannada, Sanskrit and English.

...his writings exhibit the confidence of an enlightened soul .

...founded the Adhyatma Prakasha Karyalaya in as early as 1920.

.... earned the appreciation and the admiration of many including H H Shri Chandrashekharendra Saraswati Swamiji, the 68th pontiff of Kanchi Kamakoti Peetham.

Naishkarmya Siddhi - *is an independent treatise by Shri Sureshwarāchārya, who was commissioned by Shankara himself to author this independent work. It comprises of four chapters in verse form interspersed with contextual passages in prose form. The main theme of this work is the interpretation of the Vedāntic text* तत्त्वमसि *(That Thou Art), as conducive to the extinction of Avidyā (ignorance about the unity of the Self) which is the basic cause of all evil and the sole impediment to the attainment of one's own inherent blissful nature. This induces the author to describe his work as* अशेषवेदान्तसारसंग्रहः *an epitome of the central teaching of all the Vedāntas. Sureshwara exclusively follows Upadesha Sāhasri an independent work of his preceptor. Shankara unlike any other writer on Advaitic Vedanata subsequent to Shankara. He also appeals to Shri Gaudapāda in support of his propositions. The work is aptly titled as* नैष्कर्म्यसिद्धिः *which according to the author denotes right intuition* (सम्यग्ज्ञानम्).

Kleśhapahariṇi - *" Remover of all difficulties" by Shri Satchidanandendra Saraswati Swamiji. is an original commentary in Sanskrit, on the Naishkarmya Siddhi of Sureshwara. It explains all the intricate points raised in the work in greater detail and in perfect consonance with the spirit of the Vārtika Prasthānam, remaining uninfluenced by the ideas of post-Shankara works. Further, Sureshwara's phraseology sometimes, is likely to be mistaken to be in favour of the theory of Mūla-avidyā. or positive ontological basic ignorance. so prominently brought forward by the Panchapādika and other post-Shankara Advaitins. but which is totally foreign to the original school of Shankara. Kleśhāpahariṇi explains all such apparent discrepancies. The explanations stand justified by appeal to universal intuition and also by ample quotes from the two Vārtikas by the same Āchārya and also from Upadesha Sāhasri of Shankara. The title Kleśhapaharini is no mere boast.*